श्रीमदभिनवगुप्तपादाचार्यविरचितः

श्रीतन्त्रालोकः



प्रो. राधेश्याम चतुर्वेदी

।। श्रीः ।।
विद्याभवन प्राच्यविद्या ग्रन्थमाला
१२०

महामाहेश्वरश्रीमदभिनवगुप्तपादाचार्यविरचितः

श्रीतन्त्रालोकः

(द्वितीयो भागः)

(४-७ आह्निकम्)

श्रीमदाचार्यजयरथकृतेन 'विवेक'व्याख्यानेन
'ज्ञानवती'-हिन्दीभाष्येण च विभूषितः

व्याख्याकारः सम्पादकश्च
प्रो० राधेश्याम चतुर्वेदी
व्याकरणाचार्य, एम० ए० (संस्कृत), पी-एच्०डी०, लब्धस्वर्णपदक
संस्कृत विभाग, कला संकाय,
काशी हिन्दू विश्वविद्यालय, वाराणसी

चौखम्बा विद्याभवन
वाराणसी

प्रकाशक

चौखम्बा विद्याभवन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
चौक (बैंक ऑफ़ बड़ौदा भवन के पीछे)
पो० बा० नं० 1069, वाराणसी 221001
फोन : 2420404

सर्वाधिकार सुरक्षित

प्रथम संस्करण 2002
मूल्य 500=00
सम्पूर्ण सेट (पाँच भाग) 2500=00

अन्य प्राप्तिस्थान

चौखम्बा संस्कृत प्रतिष्ठान

38 यू . ए . बंगलो रोड, जवाहरनगर
पो० बा० नं० 2113
दिल्ली 110007
फोन : 23956391

*

चौखम्बा सुरभारती प्रकाशन

के० 37/117, गोपालमन्दिर लेन
पो० बा० नं० 1129, वाराणसी 221001
फोन : 2335263, 2333371

कम्प्यूटर टाइप सेटर :
मालवीय कम्प्यूटर्स
वाराणसी

मुद्रक :
रत्ना प्रिंटिंग वर्क्स
वाराणसी

The

VIDYABHAWAN PRACHYAVIDYA GRANTHMALA

120

ŚRĪTANTRĀLOKAḤ

(PART TWO)

[4-7 Āhnikam]

With the commentary **VIVEKA**

by

Ācārya Śrī Jayaratha

and **Jñānavatī**-Hindi Commentary

Commented upon and Edited By

Prof. RADHESHYAM CHATURVEDI

Yākaraṇācārya, M.A., Ph.D., (Gold medalist)

Department of Sanskrit, Faculty of Arts,

Banaras Hindu University

CHOWKHAMBA VIDYABHAWAN

VARANASI

Publishers:

© **CHOWKHAMBA VIDYABHAWAN**

(Oriental Publishers & Distributors)

Chowk (Behind The Bank of Baroda Building)

Post Box No. 1069

VARANASI 221001

Telephone : 2420404

First Edition

2002

Also can be had of

CHAUKHAMBA SANSKRIT PRATISHTHAN

38 U. A. Bungalow Road, Jawaharnagar

Post Box No. 2113

DELHI 110007

Telephone : 23956391

*

CHAUKHAMBA SURBHARATI PRAKASHAN

K. 37 / 117, Gopal Mandir Lane

Post Box No.1129

VARANASI 221001

Telephone : 2335263
: 2333371

Computer Type-setters :
Malaviya Computers
Varanasi

Printers :
Ratna Printing Works
Varanasi

ॐ

तन्मे मनः शिवसङ्कल्पमस्तु

श्री ६ शिवचैतन्य वर्णी महाराज

अनुवादक के दीक्षागुरु



स्वामी श्री श्री १०८ शिवचैतन्यजी ब्रह्मचारीजी

मातङ्गेश्वर घाट, महेश्वर (जिला खरगोन) म. प्र.

गायत्रीसाधनासिद्धसिद्धिसाम्राज्यचुञ्चवे ।
श्रेय:प्राप्तिनिमित्ताय नमश्चैतन्यवर्णिने ॥

विषयानुक्रमणिका

चतुर्थमाह्निकम्

		कारिका-संख्या
१.	शाक्तोपायमण्डलप्रतिपादनप्रतिज्ञा	१
२.	विकल्पसंस्क्रियोपक्रमः	२
३.	अभ्यासातिशयतारतम्यात् स्फुटतातारतम्यम्	३-५
४.	स्फुटतमसंस्कृतविकल्पात् निर्विकल्पसंवित्प्राप्तिः	६
५.	विकल्पसंविदः अविकल्पसंविद्रूपतया परिस्फुरणाद् भैरवीयतेजसः स्फुटात्मत्वम्	७
६.	स्वात्मसंविदः अपास्याधेयरहितत्वम्	८-९
७.	संविदोऽस्फुटत्वादिरूपाभासने पारमेश्वरस्वातन्त्रस्य हेतुत्वम्	१०
८.	विश्वरूपतया भासनमेव माया द्वैतं वा तदपासनार्थमेव विकल्पसंस्कारोपदेशः	११-१२
९.	द्वैतच्छेदितर्कतत्त्वस्यावतारः तस्य भावनापदव्यपदेश्यत्वं च	१३-१४
१०.	तर्कस्य उत्तमयोगाङ्गत्वे श्रीपूर्वशास्त्रप्रामाण्यं ततोऽनामयपदप्राप्तिश्च	१५-१६
११.	शास्त्रान्तरोदितमोक्षमार्गस्य नियतितत्त्वोपेतरागतत्त्वानुरज्यत्वम्	१७-१८
१२.	रागतत्त्वस्वरूपम्	१९-२०
१३.	तत्र सुघोराख्याया वामाशक्तेर्विजृम्भणम्	२१-२३
१४.	एवंविधमूढजनस्य संसारोन्मज्जनाभावः	२४
१५.	शास्त्रान्तरपरायणानां मायापाशबद्धत्वाच्छिवदीक्षाऽभावे श्रीकामिकाप्रामाण्यम्	२५-२७
१६.	अत्रापि रागतत्त्वस्य नियामकत्वम्	२८
१७.	वैष्णवादिमते मोक्षस्य प्रलयाकलतामयत्वात् मन्त्रत्वस्यैवासादनात् मोक्षस्य हेयत्वम्	२९-३१
१८.	नवमाह्निके एतत्पल्लवनप्रतिज्ञा	३२
१९.	असद्गुरौ च रागे (वामाख्यस्य) मायापाशस्य कारणत्वम्	३३
२०.	श्रीपूर्वशास्त्रप्रामाण्येन असद्गुर्वनुरक्तस्य शुद्धविद्यारूपसत्तर्केण सद्गुर्वभिमुख्येन प्रवर्तनम्	३४-३५
२१.	अत्रैव प्रतिपादयिष्यमाणशक्तिपातक्रमानुपाति सदसद्गुर्वाश्रयणम्	३६-३७

२२.	स्वच्छन्दशास्त्रसंवादाद् वैष्णवादीनां मायया भ्रामणं शुद्धविद्यया च सन्मार्गारोहणञ्च	३८-३९
२३.	सांसिद्धिकस्य स्वत एव सत्तर्कोदय:	४०
२४.	सत्तर्कस्य त्रिधोदये उत्तरोत्तरं प्रति पूर्वपूर्वस्योपायत्वम्	४१
२५.	सांसिद्धिकस्य सर्वत्राधिकारित्वं परमुत्कृष्टत्वञ्च	४२-४३
२६.	सांसिद्धिके सत्तर्कस्य स्वत: प्रवृत्तौ श्रीपूर्ववाक्यप्रामाण्यात् शुद्धविद्याहेतुत्वम्	४४-४६
२७.	उपाधिभेदात् सांसिद्धिकस्य नानाविधत्वम्	४७-४८
२८.	अत्रार्थे श्रीत्रिंशकशासनसंवाद:	४९-५०
२९.	सांसिद्धिकस्य अकल्पितशब्दव्यपदेश्यत्वम् अविकल्पकस्य गुर्वन्तरस्य तद्भेदानाञ्चाभिधानम्	५१-५२
३०.	अस्य ज्ञानावाप्तौ भावनादीनां हेतुत्वम्	५३
३१.	अत्रार्थे अनेकशास्त्रप्रामाण्यम्	५४
३२.	तत्र सर्ववीरग्रन्थपाठ:	५५-५६
३३.	तत्रैव ब्रह्मयामलग्रन्थसंवाद:	५७-५८
३४.	पूर्णज्ञानवत्त्वमेव अकल्पितकल्पकस्य मुख्यं लक्षणम्	५९
३५.	ब्रह्मयामलसंवादेनात्र मन्त्रादे: सस्फुरत्वे स्वात्मदीक्षणे च स्वात्मविज्ञानस्य निमित्तत्वम्	६०-६४
३६.	गुर्वादिनैरपेक्ष्येण श्रीब्रह्मयामलान्तर्गतश्रीरक्ताविधानप्रोक्तविधेर-नुपालनाद् अस्य आचार्य-साधक-पुत्रक-समयिपदप्राप्ति:	६३-६४
३७.	प्रोक्तगुरोरभावे रक्तादेव्या गुरुकर्तृकविध्यनुष्ठानम्	६५
३८	श्रीसिद्धामते सस्फुरत्वाभावलक्षणानामेवं पुस्तकाद्विद्या-ध्ययने निषेध:	६६-६८
३९.	कल्पिताख्यस्य गुरोरकल्पितादिगुर्वाराधनदीक्षाक्रमेण शास्त्रार्थाधिगमद्वारा सत्तर्कोदय:	६९-७१
४०.	कल्पिताकल्पकगुरुस्वरूपम्	७२
४१.	तत्र अकल्पितभागस्य श्रेष्ठतमत्वं तत्र शुद्धविद्यातारतम्य-कृतोत्कर्षस्य हेतुत्वम्	७३-७५
४२.	अकल्पिते शास्त्रादिसंवादस्य आत्मप्रत्ययितज्ञानदार्ढ्यफलत्वम्	७६-७७
४३.	श्रीकिरणनिशाटनयो: प्रामाण्यात् परतत्त्वज्ञाने गुर्वादि-कारणत्रयस्य समस्तव्यस्ततया करणत्वम्	७८-८०
४४.	प्रमातुराश्वासावधिजीवनानां प्रमाणान्तराणामुपयोग इव सत्तर्कोदये करणत्रयस्यावकाश:	८१-८३
४५.	तत्र दृष्टान्तमुखेन एकस्मिन्नेवार्थे तत्तद्धर्मविशेषाग्रहवशात् पारिपूर्ण्याय प्रमाणान्तरप्रवृत्तौ दोषनिषेध:	८४-८५
४६.	तर्कस्यैव उत्तमयोगाङ्गत्वम्	८६
४७.	संवित्तौ यमादीनां योगाङ्गानामनुपयोगित्वम्	८७-८८

४८. अत्रार्थे वीरावलिशास्त्रप्रामाण्यम् ८९-९१
४९. अन्तरेव लब्धप्ररोहाणां प्रत्याहारादीनामपि संवित्तावनुपयोगित्वम् ९२-९४
५०. धारणाद्यन्तरङ्गत्रितयस्यापि तत्रानुपयोगित्वम् ९५
५१. संविदोऽसंस्कार्यत्वात् तर्कोपायवपुषैव यमादीनां योगाङ्गतानिर्वाहः ९६-९७
५२. पराद्वयदर्शने देहादेरपि संविद्रूपत्वे यमादीनामन्यव्यपोहनोपायतयैव निर्व्यूढिः, तत्र दृष्टान्तश्च ९८-९९
५३. स्वपरामर्शात्मनि बोधे क्रमस्यावश्यंभावित्वम् १००-१०२
५४. परामर्शापेक्षया पाठचिन्तनयोः स्वरूपम् १०३
५५. अद्वयसंवित्तौ यमादीनामनुपयोगित्वं मात्रतर्कोपायत्वञ्च १०४-१०५
५६ श्रीपूर्वशास्त्रसंवादात् प्राणायामादिभिः दर्शनान्तरीययोगानां कृत्रिमत्वम् १०६-१०८
५७. एतदुपसंहारमुखेन भगवत उभयरूपस्वभावपरामर्शस्य विकल्पत्वे तस्य च नैशसद्विद्यात्मकभेदाद् द्वैविध्यम् १०९-११२
५८. शुद्धविद्यारूपस्फुटविकल्पान्मायीयविकल्पप्रतिघातः ११३
५९. स्नानादिपरामृश्यभेदात् शुद्धविद्यापरामर्शस्य अनेकप्रकारत्वम् ११४
६०. शुद्धविद्यात्मकपरामर्शान् मायीयविकल्पस्यैव नाशे निमित्तासूत्रणं कल्पितार्चाद्यनादरस्य उपक्रमश्च ११५
६१. मायीयामशोचितस्नानादेः शुद्धविद्यापरामर्शकस्वरूपनिरूपणम् ११६-११७
६२. भेदाभेदबुद्धिकृतशुद्ध्यशुद्धिस्वरूपम् ११८
६३. अभेदबुद्ध्या संविद्रूपतासाक्षात्कारः ११९
६४. इतरेषां पूजार्चनाद्यङ्गानां कल्पितत्वप्रदर्शनम् १२०-१२१
६५. संवित्स्वातन्त्र्यनिबन्धनायां भवौघैकीकारपरामर्शरूपपूजायां संविदो द्वादशधात्वम् १२२-१२४
६६. अन्योक्तत्रयोदशरूपत्वापेक्षया संविदो द्वादशधोदयस्य निरवद्यता १२५
६७. श्रीयोगसंचरप्रामाण्यात् संविदः तत्तद्वैशिष्ट्याश्रयणम् १२६
६८. तदनुसारं चक्षुर्गोलकद्वयरूपाग्नीषोमात्मकप्रमातृप्रमेयरूपाभ्यां षोडशाराष्टारचक्राभ्यां सङ्कोचविकासौ १२७-१३०
६९. योनिलिङ्गसंयोगदृष्टान्तेन उपर्युक्तदार्ष्टान्तिकपुष्टिः १३१
७०. षोडशाराष्टारचक्रपीडनात् परप्रमातृरूपप्रकाशज्ञानस्य प्रवृत्तिः १३२
७१. तदुभयोपरिसंस्थितसहस्रारचक्राद् ब्रह्माण्डादीनामुद्भवः १३३
७२. षोडशारादिषु चतुर्षु चक्रेषु पञ्चबुद्धीन्द्रियाणां स्थूलप्रमेयतया प्रस्फुरणेन क्रियाशक्त्यात्मनः सोमस्य सृष्टिसंहारकारित्वम् १३४-१३६
७३. पाञ्चभौतिके शरीरे हंसशब्दव्यपदेश्यविभोः सिसृक्षया गुह्यचक्रौन्मुख्येन प्रवर्तनम् १३७

७४. गुह्यचक्राणां स्वात्मविश्रान्तावपि सिद्धिमुक्तिलाभे साधकतमत्वम्
७५. गुह्यचक्राणीति बहुवचननिर्देशे प्रमातृप्रमेयात्माग्नीषोम-साधकतमत्वम् १४०
७६. प्रमेयात्मसोमस्य द्विधाभासनेन पञ्चभूतात्मकविश्वसृष्टिः १४१-१४२
७७. कर्मेन्द्रियेषु पञ्चभूतेषु च एवंरूपत्वम्, तज्ज्ञानाद् योगिनो विश्वप्रभुतालाभश्च १४३-१४४
७८. सृष्ट्यादिक्रमचतुष्टयस्य मातृमानमेयगतत्वेन एकैकत्राक्षे द्वादशात्मकतोदयः १४५
७९. मेयदशायामपि एकस्याः संविदो मासराश्यादितया द्वादशात्मकत्वं तत्तद्रूपतया सर्वत्रावभासनञ्च १४६-१४७
८०. प्रकृतस्य क्रमनयसोदरताप्रदर्शनोपक्रमे संविदो द्वादशदेवी-रूपतायां प्रथमं प्रमेयगतसृष्टिस्वरूपस्य आगमिकः सृष्टिकालीत्वनिर्णयः १४८
८१. प्रमेयगतस्थितिस्वरूपस्य रक्तकालीत्वम् १४९
८२. प्रमेयगतसंहारस्वरूपस्य स्थितिनाशकालीत्वम् १५०
८३. प्रमेयगतानाख्यस्वरूपस्य यमकालीत्वम् १५१
८४. प्रमाणगतसृष्टिस्वरूपस्य संहारकालीत्वम् १५२-१५३
८५. प्रमाणगतस्थितिस्वरूपस्य मृत्युकालीत्वम् १५४
८६. शंकानिरासात् कर्मणां रोधनद्रावणस्वरूपनिर्णयपूर्वकं प्रमाणगतसंहारस्वरूपस्य रुद्रकालीत्वं भद्रकालीत्वं वा १५५-१५८
८७. द्वादशकरणानां प्रकार-स्वरूपनिर्णयपूर्वकं प्रमाणगतानाख्य-स्वरूपस्य मार्तण्डकालीत्वनिश्चयः १५९-१६३
८८. कालाग्निरुद्रसंज्ञककर्तुः कल्पिताकल्पितद्वैविध्यविचार-पूर्वकं प्रमातृगतसृष्टिस्वरूपस्य परमार्ककालीत्वनिर्णयः १६४-१६७
८९. प्रमातृगतस्थितिस्वरूपस्य कालाग्निरुद्रकालीत्वम् १६८
९०. प्रमातृगतसंहारस्वरूपस्य महाकालकालीत्वम् १६९-१७०
९१. प्रमातृगतानाख्यस्वरूपस्य महाभैरवचण्डोग्रघोरकालीत्वम् १७१-१७२
९२. प्रागुक्तकलनानाम् अस्या एव विजृम्भारूपत्वाद् अस्याः परत्वं कलनशब्दार्थस्य पञ्चविधत्वञ्च १७३-१७५
९३. पञ्चविधकलनाकरणात् देव्याः काली-कालसङ्कर्षिणीति व्यपदेशौ १७६
९४. अस्या एव मातृसद्भावसंज्ञा निशिसञ्चरोक्तवामेश्वरीति व्यपदेशश्च १७७
९५. द्वादशरूपत्वेऽपि संविदः तात्त्विकैकत्वं क्रमाक्रमातीतत्वञ्च १७८-१७९
९६. क्रमानुप्राणितपूजायाः संविदवष्टम्भेन पूर्णत्वम् १८०
९७. प्राप्तावसरे मंत्रवीर्यप्रकाशनोपक्रमेऽहंपरामर्शस्य हृदयरूपत्वम् १८१

९८. तस्यैव स्पन्दरूपत्वम् १८२-१८३
९९. तस्यैव ऊर्मिरूपत्वम् १८४
१००. तस्यैव साररूपत्वम् १८५
१०१. शक्तित्रितयारोहावरोहक्रमाभ्यां विश्वस्य भैरवीयस्वरूपे भैरवीयस्वरूपाद्वा विसर्गः ततः सद्रूपता, संवित्क्रमेण पराबीजस्योभयथा उदये सकारस्य औकारविसर्गक्रोडीकारेणा-भिधानात् सृष्टिप्राधान्यप्रदर्शनञ्च १८६-१८८
१०२. संवित्क्रमेणैव रेफादिबिन्द्वन्तवर्णपञ्चकरूपपञ्चपिण्डनाथस्य व्याप्तिरुद्धारश्च १८९-१९०
१०३. श्रीपिण्डनाथस्य संहारहृदय-हृदिति निर्देशौ १९१
१०४. पराबीजादिविषयोऽहंपरामर्श एव प्रकाशस्य प्रकाशत्वं मन्त्राणां हृदयात्मकं वीर्यञ्च १९२-१९३
१०५. अहंपरामर्शात्मना वीर्येण जपस्य मन्त्ररूपत्वम् १९४
१०६. ध्यानस्य वास्तवरूपाभिधाने बुभुक्षुमुमुक्षुभेदेन नियतानियताकाररूपद्वैविध्यम् १९५-१९९
१०७. मुद्रायाः वास्तवरूपाभिधानम् २००
१०८. होमस्य वास्तवस्वरूपाभिधानम् २०१-२०२
१०९. परस्वरूपावेशकारित्वाद् दीक्ष्यस्य दीक्षितत्वम् २०३
११०. दृष्टान्तद्वयपुरस्कारेण भैरवतासादनोपायतया जप्यादीनां बहुधात्वे औचित्यनिर्व्यूढिः २०४-२०८
१११. तन्मयीभवनस्य अनुत्तरात्मप्राप्तिरूपत्वं पूर्णतया तत्र फलान्त-रानवकाशः २०९-२१०
११२. यागविधिनानेन जीवन्मुक्तिलाभः २११-२१२
११३. अत्रार्थे विधिनिषेधतुल्यत्वोपक्षेपद्वारा श्रीमालिनीविजयाष्टादश-पटलसंवादः २१३-२२०
११४. शुद्ध्याशुद्ध्योः प्रकाशतानतिरिक्तत्वे वस्तुधर्मत्वाभावः २२१
११५. तयोः प्रमातृधर्मत्वे अशुद्धस्य वस्त्वन्तरेण शोध्यत्वे अन्योन्याश्रयत्व-वैयर्थ्या-ऽनवस्थानेति दोषत्रयप्रसङ्गः २२२-२२४
११६. युक्तिबलाद् भावानां शुद्ध्यशुद्धिविभागासिद्धिः २२५-२२७
११७. वैदिकीचोदनाश्रयेणैव शुद्ध्यादिविभागविनिश्चय इति पूर्वपक्षः २२८-२२९
११८. वैदिकीशैवीचोदनयोर्बलाबलविचारे वैदिक्याः सर्वपुरुष-विषयतया शैव्याश्च विशिष्टविषयतया भिन्नविषयत्वेना-वस्थितेः तयोरुत्सर्गापवादविधिवाक्यतया अर्थवादवाक्य-तया च प्रामाण्यपरीक्षणपुरःसरं संविदैकात्म्यानैकात्म्याभ्यां सर्वत्र शुद्ध्यशुद्धिविभागसिद्धिः २३०-२४०
११९. अत्रार्थे श्रीमद्वीरावलिप्रामाण्यम् २४१-२४२

१२०. मुनिभिरपि संविदैकात्म्यानैकात्म्याभ्यां शुद्ध्यशुद्धिविभागस्य परिगृहीतत्वम् २४३
१२१. चिदैक्यानैक्यवेदनात् शुद्ध्यशुद्ध्योः प्रमातृधर्मत्वसिद्धिः २४४
१२२. वस्तुधर्मत्वेऽप्यनयोः प्रमात्रपेक्षानिबन्धनत्वम् २४५
१२३. अत्र शैव्या विशेषचोदनया सामान्यवैदिकचोदनाया बाध्यत्वम् २४६
१२४. अत्रार्थे सर्वज्ञानोत्तरादिसंवादेन शैववाक्यस्याबाध्यत्वम् २४७-२४९
१२५. शैवशास्त्रस्य मुख्यया वृत्त्या सर्वोत्कृष्टत्वं तदङ्गभावेनैव शास्त्रान्तराणामनुष्ठेयत्वम् २५०-२५१
१२६. भेदाभेदप्रधानताभेदेन भगवतोपदिष्टवेदशास्त्रयोः क्रमेण बाध्यबाधकभावः २५२-२५३
१२७. पूर्वोक्ते 'न द्वैतं नापि चाद्वैतम्' इति मालिनीविजयवाक्ये श्रीभर्गशिखासंवादः २५४-२५५
१२८. पूर्वोक्तमालिनीवाक्यव्याकरणनीत्या सिद्धान्ते लिङ्गपूजा-जटाभस्मादि-व्रतचर्याविधानं कुलादौ तन्निषेधः त्रिके तयोरभावप्रतिपादनम् २५६-२५८
१२९. क्षेत्रादिसंप्रवेशविधानम् २५९
१३०. अन्यत्र एतन्निषेधः त्रिके विधिनिषेधाभावः २६०
१३१. समयादिप्रपालनोपदेशः, मतशास्त्रे तन्निषेधः २६१-२६२
१३२. पूर्वोक्तपरस्वरूप-लिङ्ग-नामानाञ्च परकीयस्वकीयस्वरूपविचारः २६३-२६४
१३३. गोत्रस्य मठिका-कुल-पदद्वयव्यपदेश्यत्वं प्रकारचतुष्टयत्वञ्च २६५-२६६
१३४. गोत्रादिपदस्थेन आदिना घर-पल्ली-पीठोपपीठ-मुद्रा-छुम्मेतिग्रहणे स्वसंतानाश्रयेण तादात्म्यप्रतिपत्तेश्च निबन्धनत्वम् २६७-२६८
१३५. मतशास्त्रेषु एतन्निषेधः २६९
१३६. साक्षादनौपयिकत्वात् क्षेत्रप्रवेशादिगोत्राद्यन्तस्य प्रस्तुते शास्त्रे विधिनिषेधाभावः २७०-२७२
१३७. श्रीत्रिकशासनप्रामाण्यात् परतत्त्वसन्निकृष्टासन्निकृष्टत्व-कृतम् उपायानां ग्राह्यत्वं त्याज्यत्वं च २७३-२७४
१३८. आत्मज्ञानस्य शिवतत्त्वसाक्षात्कारे नैमित्त्यम् २७५
१३९. तीव्रतमशक्तिपातपवित्रितस्यैव अत्र सामान्येनाधिकारः २७६-२७७
१४०. अभिनवगुप्तस्य चात्र विशेषेणाधिकारित्वम् २७८
१४१. शाक्तोपायस्योपसंहारः

पञ्चममाह्निकम्

कारिका-संख्या

१. आणवोपायनिरूपणप्रतिज्ञा १
२. विकल्पसंस्कारस्य उपायान्तरनिरपेक्षसापेक्षतया द्विधात्वे क्रमेण शाक्ताणवोपाययोरवलम्बनस्य औचित्यम् २-४

३. संविदो संस्कारानवकाशाद् विकल्पसंस्कारस्य उपायान्तरसापेक्षताया निरूपणम् ५
४. संवित्संनिकर्षविप्रकर्षकृतोपायबहुत्वस्य आणव एव अवकाशः ६
५. प्रकाशस्वातन्त्र्यात् प्राणादीनां जाड्येऽपि चिद्रूपत्वम् ७-८
६. अत्रार्थे त्रैशिरसागमप्रामाण्येन शैव्या शक्तेरेव जीवपदव्यपदेश्यत्वं जीवस्य चिद्रूपतापरमार्थत्वञ्च ९-१०
७. दर्पणादिवत् तत्तदनेकाकारधारित्वेऽपि प्राणबुद्ध्यादीनां वस्तुतो चिद्रूपत्वं शुद्धत्वाद्विश्वरूपाविभेदित्वञ्च ११-१३
८. विकल्पस्य संकुचितप्रमातृव्यापारत्वाद् बुद्ध्यादीनां सर्वभावाविभेदेन अवभासाऽभावः १४-१५
९. शून्यप्रमातरि विकल्प्याभावाद् बुद्धिप्राणशरीरत्रयस्यैव परमार्थप्रकाशने निमित्तत्वम् १६
१०. तत्र बुद्धेर्ध्यानमयत्वस्य, प्राणस्य उच्चारात्मकपञ्चवृत्तित्वस्य, शरीरस्य इन्द्रियविषयैकीभावेन संस्थितत्वस्य अवलम्बनेन परमार्थलाभः १७-१८
११. बुद्धिध्यानाद्युपक्रमे ध्यानरूपानुत्तरस्य अभिधानम् १९
१२. तस्य हृदि स्थितत्वे तत्रैव साक्षात्कार्यत्वे त्रिशिरोमतप्रामाण्यम् २०-२१
१३. तत्र प्राणापानोदानात्मकसोमसूर्याग्निसंघट्टरूपाद् ध्यानात् परप्रमातृतानुसंधानम् २२-२४
१४. एतस्य परादिशक्तिरूपत्वे परा-परापरा-ऽपराशक्तीनां सृष्टि-स्थिति-संहार-तुर्यरूपैर्द्वादशदेवीरूपत्वम् २५-२६
१५. इन्द्रियद्वादशात्मनः चक्रस्य स्ववृत्तिद्वादशकैः तत्तद्विषये सृष्ट्यादिचातूरूप्यावलम्बनेन सर्वस्य सर्वात्मकत्वाद् एकैकत्र स्वात्मध्यानसिद्धिः २७-३०
१६. इत्थं संस्कारमात्रेणावस्थितस्यापि विश्वस्य परिक्षये स्वात्मोच्छलतः संविच्चक्रस्य प्रशाम्यद्-शान्त-शमाऽवस्थानु-संधानक्रमरूपध्यानयोगेन विश्वस्य महाचक्रेऽयत्नतः पूर्णलयः ३१-३४
१७. चित्स्वाभाव्याद् विश्वस्य सर्वदा प्रलयोदयत्वे स्वसंविदि तत्प्रलयोदयध्यानेन शश्वद्भैरवीभावः ३५-३६
१८. आनुत्तरचक्रवत् त्रिशूलादारभ्य असंख्यारसहस्रपर्यन्तं चक्राणां ध्यानोपदेशः ३७-३८
१९. महेश्वरस्य बहुशक्तित्वस्य असंख्यारत्वे निमित्तत्वम् ३९
२०. अत्रार्थे माङ्गलशास्त्रप्रामाण्यम् ४०
२१. प्रथमोपायरूपस्य ध्यानस्य निरूपणे श्रीशंभुनाथस्य उपदेष्टृत्वम् ४१
२२. शास्त्रान्तरोक्तध्यानानाम् अनयैव दिशा समाश्रयणीयत्वम् ४२
२३. प्राणवृत्तिसमुच्चारनिरूपणोपक्रमे निरानंदात् जगदा-नन्दपर्यन्तम् अनुत्तरप्रविकासोपायतया प्राणनादिवृत्तीनां निरूपणं तत्र शंभुनाथोपदेशप्रामाण्यञ्च ४३-५१

२४. हृदयोच्चारयोगतः तत्रैव विश्रान्त्या अनुत्तरत्वलाभः ५२
२५. उपसंहारभङ्ग्या सामान्यविशेषात्मकषट्प्राणोच्चार-
जन्यनिरानन्दादीनां मन्त्रव्याप्तिमुखेनाभिधानप्रतिज्ञा ५३
२६. तत्र क्रमेण इच्छाज्ञानक्रियाशक्तिसमत्वरूपे विसर्गे
शूलवर्णपरामर्शगर्भः प्रवेशः ५४-५५
२७. भ्रूपृष्ठादारभ्य विन्दुनादान्तशक्तिव्यापिनीसमनाया
एव सोपानमालिकाश्रयणेन ऊर्ध्वकुण्डलिनीपदसमासादने
उपायत्वम् ५६
२८. औन्मनसे ऊर्ध्वकुण्डलीपदे बिन्दुद्वयरूपस्य विसर्गस्य विश्रान्तिः ५७
२९. तत्र दृष्टान्तः, भैरवयामलायां विसर्गभूमौ स्वानन्दसंवित्त्यै
समावेशोपदेशश्च ५८-५९
३०. महामूल-शुक्ल-वैसर्गिकानां सकारौकारबिन्दुद्वयानाम्
आपूरणयोगात् परतत्त्वे विश्रान्तेरहंपरामर्शरूपत्वमेव ६०-६१
३१. चिदात्मोच्चारोपक्रमे अनुत्तरविमर्शे प्रथमोल्लासरूप-
चिद्विमर्शतत्पराहंपरामर्शोदयः ६२
३२. ततः षष्ठवर्जमकारादिविसर्गान्तद्वादशकलात्मना प्रमाणात्म-
सूर्येण भावानां सृष्टि-स्थिति-संहाराभासनम् ६३
३३. अकारादि-बुद्धीन्द्रियादि-षोडशकलेन्दुरूपाभासितभावजातस्य
बोधाग्नौ विसर्गेण अमाख्याकलामृतेन षडध्वमण्डलाहुतिरूपं
संविद्देवीनां तर्पणम् ६४-६६
३४. षडध्वमण्डले अनुत्तरस्य कौलिकीशक्तिरूपविसर्गस्य
कादिहान्तक्षोभाधारस्य प्रपञ्चः ६७
३५. मातृकोदये अङ्गरूपेण कुलेश्वर्या सहितं कुलेशित्वं
विश्वस्य तन्मयत्वञ्च ६८
३६. विसर्गनिःष्यन्दविश्रान्तिभूरुपसञ्जीवनीकलाश्रयेण
बाह्याखिलार्चनहवनादीनां विधेयत्वम् ६९-७०
३७. शाक्तक्षोभाद्युपायजाले सर्वत्र सुधियः विसर्गभूरूप-
हृदयेऽधिष्ठानम् ७१
३८. योगिनीहृदयात्मविसर्गोन्मेषात् अनेकोपायेषु शाक्तक्षोभस्य
प्राधान्यम् ७२-७३
३९. योगिनीहृदयविश्रान्तस्य हानादानतिरस्कारेण
स्वात्ममात्रावस्थानरूपम् अभिज्ञानम् ७४
४०. परतत्त्वान्तःप्रवेशावतारक्रमे हेयोपादेयविभागाभावात्
नाददशाश्रयणे विश्वसंहारप्ररोहाभ्याम् आकाशसंहार-
कुण्डलिनीबीजयोरुदयाद् आद्यवर्णद्वयोद्धारः ७५
४१. नरदशया संविदो विकासयोग्यताधानाद्धेतोः मातृमानमेयस्वभावचक्रस्य
विश्वाभावरूपज्ञेयाभावाद् अकिंचिद्रूपत्वम् ७६

४२. अभावात्मज्ञेयस्य परप्रमात्रात्मवह्नौ, तस्य च शक्तिवह्नौ विलयात् क्रमशः अग्नि-शक्तिबीजयोरुद्धारः ७७
४३. तत्रैव विश्रामाद् योगिनः परतत्त्वान्तरानुप्रवेशसिद्धिः ७८
४४. संकोचविकासवत्त्वात् विमर्शस्यैव विश्रान्तिस्थानत्वम्, संकोचविकासयोश्च भैरवमुद्रानुप्रविष्टस्य योगिनः बाह्येऽपि आत्मदृष्ट्या संवित्स्पन्दतयैव तथाभासनत्वम् ७९-८०
४५. विशेषस्पन्दस्य औन्मुख्यशब्दव्यपदेश्यत्वम् ८१
४६. अहंपरामर्शानुविद्धमन्त्रमण्डलैकात्म्यात् शान्त्यादिसिद्ध्युदयः ८२
४७. बोधस्वातन्त्र्यसंज्ञकेन अक्षसंघेन भैरवमुद्रानुप्रवेशाक्रमेण स्वात्ममयतापादनम् ८३
४८. महासाहसपदाभिधेयचकितमुद्रानुप्रवेशेन परतत्त्वान्तःप्रवेशे संसारापकृतिसिद्धिः ८४-८५
४९. अत्रार्थे त्रिशिरोभैरवागमप्रामाण्याद् द्वादशान्तपदावधिकाद् उदानवाहक्रमेण मन्त्रभूमिप्रवेशनात् तद्धर्मप्राप्तिः ८६-८७
५०. पूर्णस्वात्मवृत्त्यासादनरूपमन्त्रभूमिप्रवेशनविधिनिरूपणम् ८८
५१. स्वात्मरूपाया वृत्तेर्नानात्वेऽपि स्वरूपे विश्रान्तेः भैरवमुद्राया अतिरहस्यत्वात् 'ख' प्रतीकमाश्रित्य व्याख्यानम् ८९-९१
५२. प्राणापानक्षोभापहानेन मध्यधामानुप्रवेशक्रमेण योगिनो स्वात्ममात्रनिष्ठत्वम् ९२
५३. खशब्दार्थस्य उच्चारोच्चारलक्षणं दशधात्वम् ९३
५४. धामशब्दार्थस्यापि दशधात्वम् ९४-९५
५५. परतत्त्वान्तःप्रवेशस्य उत्तमोपायत्वम् आणवस्य प्रवेशोपायत्वञ्च ९६
५६. श्रीब्रह्मयामलप्रामाण्यात् परावाग्रूपस्य रावस्य दशात्मकत्वम् ९७-९८
५७. यथायथमुत्कृष्टोत्कृष्टरावस्वरूपाभ्यासेन पारमार्थिकस्वरूपलाभः ९९
५८. परतत्त्वान्तः प्रवेष्टुमिच्छोः आनन्दो-द्भव-कम्प-निद्रा-घूर्णिलक्षणपञ्चकानामभिधानं ततो महाव्याप्त्युदयः १००-१०४
५९. पञ्चभिर्लक्षणैरेव महाव्याप्त्युदये लक्षणान्तराणां द्विविधाणवमलरूपत्वे तेषामनभिधानम् १०५-१०६
६०. अत्रार्थे श्रीमालिनीविजयोत्तरसंवादः १०७
६१. एतल्लक्षणपञ्चकमध्ये एकैकानुभवात् प्रतिनियत-चक्रेशत्वलाभात् अनुभवविशेषोदयः १०८-११०
६२. लक्षणपञ्चकानुबंधिचक्रपञ्चकानां प्रतिनियमे श्रीत्रैशिरसमतप्रामाण्यम् १११
६३. एतदुपेयतत्त्वस्य अव्यक्तलिङ्गशब्दव्यपदेश्यत्वे विश्वलयोदयकारणभूतसंविदो नैमित्त्यम् ११२-११३
६४. व्यक्त-व्यक्ताव्यक्ता-ऽव्यक्तभेदेन लिङ्गस्य त्रैविध्ये क्रमेण तस्य परसंविद्-मन्त्रवीर्य-विशेषस्पन्दरूपत्वं शिव-शक्ति-नरप्रधानत्वञ्च ११४-११६

६५. फलभेदादपि लिङ्गस्य त्रिधात्वम् ११७
६६. त्रयाणां लिङ्गानाम् उत्तरोत्तरं विश्रान्तिस्थानत्वम् ११८-११९
६७. व्यक्तादिलिङ्गभेदपरिहारेण योगिनीहृदयाभिधेय-
स्पन्दनात्मलिङ्गे बीजयोनिसमापत्त्या परसंविदावेशस्य
आविष्करणीयत्वं चर्याक्रमासूत्रणञ्च १२०-१२१
६८. आनन्दधाम्नि योगिनीहृदये सर्वदेवतागणसहितभैरवी-
शक्तेः प्रथनात् विश्वस्य सर्वदैव सृष्टिसंहारपात्रतासादनम् १२२-१२४
६९. निर्विकल्पस्वरूपपरतत्त्वान्तःप्रवेशस्य आणवोपायतयाऽभिधाने
अनुत्तराभ्युपायरूपत्वस्य हेतुत्वम् १२५
७०. आणवोपायपरे पृथगाह्निकपरिकल्पने योगिनो
भेदमयत्वेऽप्यभेदरूपत्वस्य हेतुत्वम् १२६
७१. ततो बाह्याकांक्षासंक्षयाद् योगिनो भैरवमुद्रानुप्रवेशात्म-
तत्त्वलाभः १२७
७२. उच्चारविध्यनन्तरं त्रिशिरःशास्त्रानुसारं सप्तधा करणस्य
अनिर्भज्य प्रकाशनं भाविनिरूपणप्रतिज्ञा च १२८-१३०
७३. वर्णतत्त्ववर्णनोपक्रमे नादस्य वर्णशब्दाभिधेयत्वम् १३१
७४. सृष्टिसंहारबीजद्वयेऽभिव्यज्यमानस्य स्वरयुक्तायुक्तककारादि-
सकारान्तवर्णकलापस्य मान्त्रस्य लौकिकस्य चोच्चारणात्
स्मरणाद्वा योगिनः चिदात्मताप्राप्तिः १३२-१३४
७५. अत्र आगमार्थसंवादः १३५
७६. सकलव्यवहारस्य स्मरणमूलत्वात् स्मरणस्य च आत्मसंप्राप्ति-
रूपत्वात् मन्त्रवीर्यत्वम् १३६-१३९
७७. व्यतिरिक्तसमयानपेक्षत्वाद् अनन्योन्मुखत्वे
सृष्टिबीजादीनां संविदैकात्म्यावाप्तौ उपायत्वम् १४०-१४१
७८. सृष्टिबीजस्य कन्दात् प्रभृति तत्तदाधारोल्लङ्घनक्रमेण
द्वादशान्तपर्यन्तम् अनुत्तरसंविदात्मना प्रस्फुरणम् १४२-१४५
७९. संहारबीजस्य हृदादिविश्रामपुरस्सरमेवोच्चारत्वम् १४६
८०. वर्णजप्यपरायणस्य ज्ञानिनोऽनुत्तरधाम्नि प्रवेशः १४७
८१. दीक्षोत्तरप्रामाण्यात् नीलपीतादिवर्णपरकतया वर्णतत्त्वाभिधानम्,
तदुदयद्वारेण सर्वमन्त्राणां स्वात्मसाक्षात्कारोपायत्वम् १४८-१५१
८२. भौतिकस्यापि वर्णजालस्य अनुपाधौ संविद्रूपे विश्रान्तेः
ताद्रूप्यम् १५२-१५३
८३. गुरोः प्रामाण्याद् भेदवैचित्र्यस्योपायमात्रविषयत्वम् न तूपेयविषयत्वम् १५४
८४. अनुत्तरपदप्राप्तौ उच्चाराद्युपायानां पाठक्रमः १५५
८५. पाठक्रममपहाय इहार्थक्रमावलम्बने स्थानकल्पनाद्युपायकल्पनाया
अकिंचित्करत्वम् १५६-१५८
८६. आह्निकार्थोपसंहारः

षष्ठमाह्निकम्

कारिका-संख्या

१. आणवाङ्गभूतस्थानकल्पनाप्रमेयनिरूपणस्य प्रतिज्ञा १
२. स्थानभेदस्य त्रैविध्ये प्राणस्य पञ्चधात्वं देहस्य द्विधात्वं बाह्यस्यैकादशविधत्वम् २-३
३. स्थानभेदगतप्राणाश्रयविधानोपदेशे षड्विधाध्वनः प्राणे प्रतिष्ठानम् ४-५
४. अध्वनः क्रमाक्रमतया कलनस्यैव कालत्वम् ६
५. संविद्गतकालस्य कालीशब्दव्यपदेश्यत्वम् ७
६. प्राणवृत्तिरूपायाः काल्या निरावरणरूपतया प्रस्फुरणात् शून्यप्रमातृत्वं योगिपरादशात्वञ्च ८-१०
७. शून्यप्रमातुरेव बहिरौन्मुख्येन प्राणप्रमातृत्वं तस्य स्पन्दोर्मिसंज्ञित्वञ्च ११
८. अत्रार्थे भट्टकल्लटादिवचनसंवादः १२
९. प्राणोल्लासस्य परसंविदः प्रथमपरिस्पन्दत्वं तस्य नामान्तरैर्व्यवहार्यत्वञ्च १३
१०. प्राणवृत्तेः प्राणादिपञ्चकरूपतया व्याप्त्या देहस्यापि संवेत्तृत्वम् १४
११. तत एव मूढचार्वाकादीनां देहातिरिक्तात्माभावरूपो भ्रमः १५-१६
१२. तथावासनासद्भावासद्भावयोः क्रमेण तेषाम् अपवेद्यप्रलयाकलप्रायत्वं तत्तत्फलोपभोगोदयश्च १७-१८
१३. आस्तिक्यवासनापेक्षया नास्तिक्यवासनाया अतिशयेन पापत्वम् १९-२०
१४. प्राणस्याध्वनः क्रियामूर्तिभेदेन द्विधात्वम् २१
१५. श्रीमत्त्रिशिरस्प्रामाण्यात् प्राणस्य शिखारूपत्वम् २२
१६. प्राणशिखाया मार्गान्तरखिलीकारेण मध्यधाम्नि निश्चलत्वापादनरूपबन्धेन निष्कलत्वात् शिवात्मकत्वं तत्तन्मन्त्रादिफलनियोजकत्वञ्च २३-२७
१७. संविदि सर्वाध्वनां प्रतिष्ठानम् २८
१८. संविदो मूर्तिक्रियात्मनाऽवभासनस्यैव अध्वत्वम् २९
१९. तत्तत्तत्त्वोल्लङ्घनक्रमेण शिवतत्त्वप्राप्तिकारणत्वम् अध्वशब्दस्य प्रवृत्तिनिमित्तम् ३०
२०. श्रीनिशाचारप्रामाण्यात् संज्ञात्रितये यौगिकीप्राधान्यात् सर्वत्रात्र अन्वर्थत्वम् ३१-३३
२१. क्रियाभासनस्य वर्ण-मन्त्र-पदत्रितयरूपकालाध्वत्वम् ३४
२२. मूर्त्यवभासनस्य कला-तत्त्व-भुवनत्रितयरूपदेशाध्वत्वम् ३५
२३. त्रिकद्वये स्थूल-सूक्ष्म-पररूपेण अध्वनः षड्विधत्वम् ३६
२४. कालाध्वनः प्राणादौ प्रतिष्ठानम् ३७
२५. अत्रस्थकालस्य तत्त्वान्तर्वर्तिकालादन्यत्वं क्रियाशक्तिरूपत्वञ्च ३८
२६. विश्वावभासकारित्वादस्य ईश्वरतत्त्वरूपत्वं शिवैकात्म्यञ्च ३९
२७. मायीयप्रमातरि अस्यैव कालतत्त्वतया प्रथनम् ४०

२८. शिवादिशुद्धविद्यान्तस्य मायादिरागान्तकञ्चुकपञ्चकतयोन्मेषः ४१-४२
२९. एषां शून्यादिप्रमातृत्वमपि तन्निमित्ताभिधानञ्च ४३-४४
३०. तत्र प्राणस्य विश्वात्मत्वनिरूपणम् ४५
३१. देहे अङ्गभेदात् प्राणस्य स्फुटास्फुटतया व्याप्तिः ४६
३२. प्राणीययत्नस्य अष्टधात्वम् ४७-४८
३३. स्वच्छन्दशास्त्रास्मन्मतस्वारस्यात् स्वारसिकस्य प्राणीययत्नस्य कन्दात्प्रभृति, इच्छापूर्वकस्य प्राणचारस्य च हृदयात्प्रभृति संवेदनम् ४९-५१
३४. प्राणीययत्नविधाने प्रभुशक्त्याऽऽत्मप्राणत्रयस्य सम्मिलितं हेतुत्वम् ५२
३५. स्थानभेदाद् उद्रिक्तत्वभेदाच्च प्राणाऽऽत्मशक्तीनां गौणमुख्यभावः ५३-५५
३६. प्रभुशक्तेः पात्रभेदात् कृत्यभेदाच्च वामा-ज्येष्ठा-रौद्रिकाभेदेन त्रैविध्यम् ५६-५७
३७. श्रीयोगचारसंवादात् सृष्ट्यादितत्त्वानभिज्ञानां मोक्ष्यत्वमोचकत्वयोरसंभावः ५८-५९
३८. सृष्ट्यादीनां प्राणात्मककालाधीनत्वात् प्राणचारस्य अवकाशः ६०
३९. सर्वजन्तूनां प्राणचारत्वे षट्त्रिंशदंगुलत्वे वीर्यादिषु च समत्वम् ६१-६२
४०. अहोरात्रविभागोपक्रमे षट्त्रिंशदंगुलात्मप्राणचारस्य प्राणापानरूपत्वेऽत्र सूर्यादिग्रहाणामुदयः ६३-६६
४१. प्रहराष्टकानां क्रमेण फलाभिधानम् ६७
४२. प्रहराष्टके नक्षत्राणां व्याप्यव्यापकभावेन अष्टाष्टकानां नागादीनाञ्चोदयः ६८-७१
४३. दिनरात्र्योः फलभेदः ७२
४४. श्रीमद्वीरावलिकुलप्रामाण्यात् सायंप्रातःसंध्ययो-र्व्याप्ति-ध्यान-योगमय्या दीक्षाया मुक्तिफलत्वम् ७३-७५
४५. अहोरात्रविभागे मासतिथिविभागनिरूपणम् ७६
४६. अहोरात्रस्य प्रकाशविश्रान्तितारतम्येन दिननिशाविभागः ७७
४७. वेद्यग्रहणपरत्वात् स्वात्मविश्रान्तिपरत्वाच्च प्रतिक्षणं कल्पनिमेषरूपदिनक्षपयोरुदयः तयोस्तुल्यकक्ष्यत्वे नियमाभावश्च ७८-८१
४८. वेदितृवेत्तृतया भेदद्वयेन, वेत्तुरपि द्वैविध्येन च ज्ञान-विचार-सत्तार्थतया प्रमातुस्त्रैविध्यम् ८२
४९. अत्रैव जाग्रदादिस्वरूपनिरूपणञ्च ८३
५०. वेद्यवेदकविश्रान्तिसाम्याद् रात्रिदिनयोर्विषुवदाख्यतुल्यकालत्वं तदेकतराधिक्याच्च दिवारात्रिन्यूनाधिक्यक्रमः ८४-८६
५१. अन्तःप्रकाशविमर्शयोरेकतरप्राधान्यात् प्रतिप्रमातृवद् बहिरपि प्रतिभुवनं रात्रिदिनयोर्वैशिष्ट्यम् ८७

५२. अत्रार्थे श्रीशंभुनाथस्य प्रामाण्यम् प्राच्यानां निषेधश्च ८८-९१
५३. प्राणादित्येन तत्तत्तिथ्याक्रमणे अपानचन्द्रस्य
एकैककलाह्रासक्रमेण क्षैण्यासादनात् कृष्णपक्षत्वम् ९२-९३
५४. अत्रार्थे श्रीकामिकासंवादः ९४
५५. पंचदशचान्द्रीकलानामपचये सुरकरणकार्यैराप्यायलिप्सया
पानस्य निमित्तत्वं षोडश्या अक्षयित्वञ्च ९५-९७
५६. आमावास्यप्रातिपदतुट्यर्धयोः सम्मेलनात् कृष्णशुक्लपक्षयो-
रेकतुट्यात्मपक्षसंधेर्प्रदर्शनम् ९८-९९
५७. तत्र प्रतिपदमावस्यासंघट्टात् सूर्यग्रहणम् १००
५८. मानमेयमातृरूपार्केन्दुराहुसंघट्टात् सूर्यग्रहणकालस्य तेषां
चिन्मात्रत्वात् महापुण्यत्वम् १०१-१०४
५९. शुद्धायां प्रतिपदि अपि महाग्रहणं तन्मोक्षे च विधुदूरीभावः १०५-१०६
६०. लौकिकपारलौकिकभूयःफलत्वं पारलौकिकस्य च मोक्षभाक्त्वं
ग्रहणमाहात्म्ये निमित्तम् १०७-१०८
६१. तिथिच्छेदादीनां प्राणरेचनरोधनाभ्यां यत्नजायत्नजत्वम् १०९
६२. अपानवाहेऽपि इन्दुपरिपूरणक्रमात् प्राणसूर्यस्य प्रतितुट्यैकैकध्येन
शुक्लपक्षगामिपञ्चदशतुट्युदयः ११०-१११
६३. अत्रैव च पूर्णिमाप्रतिपत्संभेदेनैव पक्षसंधिताद्यतिदेशः,
मासनिरूपणोपसंहारः, अब्दावतारश्च ११२-११३
६४. तत्र संक्रान्तित्रितये उत्तरायणम् ११४
६५. अत्रैव विषुवत्संक्रान्तेश्च पारलौकिकत्वम् ११५
६६. संक्रान्तित्रयानन्तरभावित्वाद् दक्षिणायनस्य लौकिकसिद्धिप्रदत्वम् ११६
६७. मकरादिराशिद्वादशकस्य प्रत्येकं गर्भतादिस्ववैशिष्ट्यानुगुणफल-
प्रदत्वम् ११७-११८
६८. उत्तरदक्षिणायनयोः फलदाने यथायथम् आसन्नदूरत्वम् ११९-१२०
६९. वर्षस्य इव दिननिशापक्षतिथिमासादीनामपि प्रत्यंगुलत्वम् १२१
७०. मासद्वादशके भाविद्वादशरुद्राणामधिष्ठातृत्वम् १२२
७१. प्रत्यंगुलषट्कं चैत्रादिद्वादशसंक्रान्तिवदत्र हृदि
द्वादशाब्दोदयनिरूपणम् १२३-१२५
७२. प्राणे षष्ट्यब्दोदयाभिधानम् १२६
७३. बाह्याहोरात्रगतप्राणचारसंख्यासाजात्येन अत्रैव
अहोरात्रसङ्कलनाप्रदर्शनम् १२७
७४. अब्दद्वादशच्छेदसंधौ क्षणमात्रमवधानाद् योगिसिद्धिसौकर्यस्यैव
एवंतिथिविभाजने प्रयोजनत्वम् १२८
७५. बाह्यकालस्वरूपनिरूपणम् १२९
७६. मानुषात्मकाहोरात्रमानेन पित्र्याद्यहोरात्रनिरूपणम् १३०-१३३
७७. अत्रार्थे रौरवादिवृत्तिस्वच्छन्दशास्त्रयोश्च मतस्याङ्गीकरणम्

अन्येषामनङ्गीकरणञ्च १३४-१३७

७८. एतदुपजीवनेन युगादिव्यवस्थानिरूपणम्, तत्र प्रतिमन्वन्तरमेकैकेन्द्र-संहारात् संहारचित्रताया अप्यवकाशलाभः १३८-१३९

७९. निरयेभ्यः अधःस्थितस्यापि प्रभोरूर्ध्वमपि संहारादौ स्वामित्वे रौरवमतप्रामाण्यम् १४०-१४१

८०. भुवनेश्वरादीनां निशाया आगमें पुर्यष्टकरूपत्वं क्षये स्त्रष्टृत्वञ्च १४२-१४४

८१. तत्तद्वर्षशतान्तक्रमेण वैष्णवादिदिनरात्रीणाम् अण्डलोपावधिका अव्यक्तान्तं व्यवस्था १४५-१४७

८२. अव्यक्तानां दिनमाननिरूपणम् १४८

८३. अत्र श्रीकण्ठनाथप्रधानानां रुद्राणामधिकारः १४९

८४. ब्रह्मणः निवृत्तकर्मतया अत्रैव अवस्थानं ज्ञाने शिवीभावोऽन्यथा सम्यङ्मुक्तेरभावात् पुनरपि श्रीकण्ठस्य सृष्टिकारित्वम् १५०-१५२

८५. प्रधानात् प्रभृति ईश्वरपर्यन्तम्, तत ऊर्ध्वं नादात्मनः प्राणस्य प्रशमनात्, यथोत्तरं वृद्धिक्रमेण तत्तत्तत्त्वगतदिनरात्रिव्यवस्था १५३-१५७

८६. बिन्द्वाद्यात्मिकायाः संविदोऽपि प्रशमनादत्र अंशांशिकातः सूक्ष्मसूक्ष्मतरलयाद् दिनरात्र्योः सामनसे पदे लयः १५८-१६५

८७. कालस्य समनाकलात्मकत्वात् नित्यत्वे समनायाः लयाभावः १६६

८८. अत्र प्रलय इव सृष्टावपि विश्वस्य अवस्थानम् १६७

८९. वक्ष्यमाणपरिमाणोपयोगिन्या दशादिपरार्धान्तायाः संख्यायाः क्रमेण निरूपणम् १६८-१६९

९०. अनन्तसृष्टिप्रलयेषु अण्डचतुष्टयस्य प्राधान्यम् अन्येषां तु गौणत्वम् १७०

९१. अत्र स्त्रष्टृसंहर्तृविभागप्रदर्शनम् १७१-१७२

९२. शक्त्यन्तं सृष्टेरपि माहात्म्यात् तस्याः शाक्तीमहासृष्टितया व्यपदेश्यत्वम् १७३

९३. पृथिव्यादितत्त्वप्रलये तत्त्वेश्वराणां तन्निवासिसदृशी व्यवस्था १७४

९४. शुद्धाध्वव्यवस्थितानां परशिवे लयः, लयभेदविषयकपरमतोल्लेखश्च १७५

९५. एवमपवृक्तेषु पुनः सृष्टौ भुवनेश्वरीणामधिकारः १७६

९६. ब्राह्म्यादिशक्तिपातस्य तत्त्वेश्वरेभ्यो ब्रह्मादिशब्दप्रवृत्तौ निमित्तत्वम् १७७

९७. प्रकटितकृत्यैकस्य शिवस्यैव ब्रह्मविष्ण्वाद्यात्मनावभासनम् १७८

९८. अष्टात्रिंशच्चिन्मात्रतत्त्वविश्रान्तिवशादेव नालिकादिषष्ट्यब्दोदयान्तं लयोदययोर्वैचित्र्याभिधानम् १७९-१८१

९९. कौलशक्तेर्बाह्याभासनस्य अनैयत्यम् १८२

१००. स्वप्नादौ च मितस्य कालांशस्य वैतत्येन, वैतत्यस्य च स्वपरदृष्टतया वैचित्र्येण अवभासनम् १८३-१८४

१०१. क्रियावैचित्र्यशक्तिजन्मनः कालस्य प्राणवद् अपानेऽपि वैचित्र्यम् १८५
१०२. योग्यनुभवसिद्धतया अपानवैचित्र्यस्य तद्गतब्रह्मादेश्च योगिभिरवेद्ययत्नतया यत्नसाध्यत्वम् १८६-१८८
१०३. कामिकप्रामाण्यात् तत्तदधिष्ठानद्वारेणोत्पत्तिनिमित्तत्वाद् ब्रह्मादीनां बाल्यादावधिष्ठानकारित्वम् १८९-१९०
१०४. मुक्तेरनाश्रिताधिष्ठानत्वस्य युक्तत्वादत्र अधिष्ठात्रुपदेशस्यौचित्यम् १९१-१९२
१०५. अधोवक्त्रस्य द्वैतापघातकतया अपानविश्रान्तिस्थानत्वम् १९३
१०६. अपानोदये प्राग्वत् षष्ट्यब्दोदययोजनाविधानम् १९४
१०७. समानस्य हार्दीनाडीषु संचरणाद् दशधात्वविधानम् १९५
१०८. देहे मुख्यनाडीनां तद्भेदोपभेदैः समस्थितेः समानपदव्यपदेश्यत्वम् १०६
१०९. क्रोधहर्षादिफलभेदात् नाडीनां दशधात्वम् १९७
११०. इडापिङ्गलासुषुम्नात्मके नाडीत्रय एव समानचारात् बाह्येऽहोरात्रे संक्रान्तीनां चतुर्विंशत्युदयः १९८-१९९
१११. विषुवद्वासरे रात्रौ च चतुर्विंशतिसंक्रान्तिनिरूपणम् २००-२०४
११२. विषुवत्संक्रान्तीनां विभागचतुष्टयस्य पूर्वाह्णादिशब्दैरभिधाने व्याप्तेर्निमित्तत्वम् २०५-२०६
११३. इतरत्र दिनह्रासवृद्धिक्रमेण संक्रान्तिह्रासवृद्धी २०७
११४. संक्रान्तिचतुर्विंशतेरुदयाद् वर्षद्वयविकल्पनम् २०८
११५. कालसंख्यायाः सूक्ष्मत्वे एकचारगतत्वं हेतुः २०९
११६. अन्तःसंक्रान्तिगस्य समानस्य मुख्यत्वात् ग्राह्यत्वम् २१०
११७. उदानगतकालनिरूपणे प्राणोदानयोर्ब्रह्मरन्ध्रवर्तिनासिक्यद्वादशान्तोर्ध्वधामवर्तिद्वादशान्तरूपोदयस्थानभेदः २११-२१३
११८. व्याने तु कालस्य हेतुत्रयकारणात् स्पन्दमात्रत्वम् २१४
११९. प्राणादीनां क्रमेण सृष्ट्यादिपञ्चकृत्यकारित्वम् २१५
१२०. वर्णोदयाभिधाने वर्णपदमन्त्रोदयस्य यत्नजायत्नजतया द्विधात्वे, तत्र अयत्नजवर्णोदयस्य परसूक्ष्मस्थूलतया त्रैविध्ये तत्र परवर्णोदयस्यापि द्विधात्वे परतमस्य अनाहतशब्दाभिधेयत्वं परमुपेयत्वञ्च २१६-२१८
१२१. परवर्णोदयाभिधाने अकारादिह्रस्वत्रयस्योदयात् षड्त्रिंशदंगुलत्वम् २१९-२२१
१२२. कादिवर्णानाम् अर्णसन्ततित्वं सकारहकारयोश्च हार्णपूरणत्वञ्च २२२-२२३
१२३. सूक्ष्मवर्णोदयोपक्रमे तस्य त्रैविध्ये सूक्ष्मसूक्ष्मवर्णोदयनिरूपणम् २२४
१२४. तत्र सूक्ष्मस्थूलवर्णोदयनिरूपणम् २२५
१२५. अत्रार्थे एकाशीतिपदपरामर्शक्रमतया गुरोर्मातङ्गशास्त्रस्य

च प्रामाण्यम् २२६-२२७
१२६. युक्त्यापि वर्णानां सुप्तिङ्नियमस्य अप्रयोज्यत्वे तत्तत्परामर्शविश्रान्त्या पदत्वम् २२८-२२९
१२७. एकाशीतिपदविमर्शक्रमेण स्थूलोपायस्य परोपाये मात्राकृतः लयः २३०
१२८. प्रत्यङ्गुलचतुष्टयं नवार्धमात्राक्रमेण षट्त्रिंशदङ्गुलात्मनि प्राणचारे एकाशीत्यर्धमात्राणामुदयः २३१
१२९. मात्राणामुदये ह्रस्वोदयानन्तरं दीर्घप्लुतव्यञ्जनानां क्रमेणोदयरूपविभागान्तरनिरूपणम् २३२-२३३
१३०. एकाशीतिकलामध्ये क्षकारगणनया त्र्यर्धमात्राधिकीभवने निखिलवर्णजातस्य गर्भीकारात् क्षस्य विभुत्वम् २३४-२३६
१३१. वर्णोदयस्य विलोमानुलोमक्रमयोः पर्यायशः भुक्तिमुक्तिफलत्वम् २३७
१३२. सूक्ष्मपरवर्णोदयस्य निरूपणम् २३८
१३३. अपानेऽपि एकाशीत्याद्यर्धमात्राणाम् उदये तस्य षट्त्रिंशदङ्गुलत्वम् २३९
१३४. गुरुप्रामाण्यात् स्थूलवर्णोदयनिरूपणम् २४०
१३५. वर्गक्रमेण वर्णानां स्थूलोदयाभिधाने मतद्वयप्रदर्शनम् २४१-२४२
१३६. अहोरात्रमेलने प्रतिवर्गं प्राणचाराणां विभागस्य प्रदर्शनम् २४३-२४४
१३७. षट्त्रिंशच्चषकक्रमेण वर्णानां स्थूलोदयनिरूपणम् २४५-२४९
१३८. एकोनपञ्चाशद्वर्णवादिनां मते प्राणचारसंख्याप्रदर्शनम् २४९-२५०
१३९. त्रिविधवर्णोदयनिरूपणोपसंहारः २५१
१४०. कालत्त्वोपसंहारः

सप्तममाह्निकम्

कारिका-संख्या

१. चक्रोदयनिरूपणप्रतिज्ञा १
२. परसंवित्तावुपायत्वाद् अयत्नजवर्णोदयनिरूपणानन्तरं यत्नजनिरूपणौचित्यम् २
३. अरघट्टचक्राग्रघटीयन्त्रौघवाहनन्यायेन यत्नजमन्त्रोदयरूपचक्रोदयस्य परसंविदुपायत्वसिद्धिः ३-४
४. एकपिण्डात्मनो मंत्रस्य प्रतिप्राणचारं तदानुगुण्याद् उदयस्य तत्संख्याकत्वं तत्र भागषोडशकस्थित्यार्धार्धादिकल्पनेन चतुःषष्टिभागान्तपरिमितप्राणाचारांशस्य योगिनामभिलक्ष्यत्वम् ५-२०
५. एवं प्राणग्रासे कालग्रासः कालग्रासे ज्ञानभेदग्रास इति संविदः पूर्णत्वम् २१-२३

६. संवेद्यभेदस्य संविदि भेदकत्वाभावात् कालस्य सूक्ष्मक्षणरूपत्वात् ज्ञानस्य सौक्ष्म्यावधितया च कालस्य ज्ञानभेदकत्वम् २४-२५

७. ततः स्वाऽभावपर्यन्तं ज्ञानस्य एकत्वम् २६

८. इन्द्रियाऽर्थप्रमातृसंयोगविभागावधिकत्वस्यैव ज्ञानावधित्वम् २७

९. प्राणगतत्वेनैव संयोगविभागितानिश्चयः २८

१०. संयोगविभागिताया अभावात् संविदः विज्ञानरूपत्वाऽभावाऽभावे संविदः पूर्णत्वम् अकालकलितत्वात् तस्या वैतत्याद्यस्पर्शश्च २९

११. कालसंस्पर्शाभावात् निर्विकल्पाया अपि संवित्तेः तथातथाविमर्शेन विकल्परूपत्वम् ३०

१२. स्पन्दान्तरानुदयात् तथातथाविमर्शेऽपि तस्या एकत्वमेव ३१

१३. अनित्थंवादिबौद्धमते शब्दारूषितक्रमिकविकल्पस्य समस्तव्यवहारलोपप्रसङ्गात् खण्डनम् ३२-३५

१४. स्वमतोक्ताद् विकल्पादेव सकलव्यवहारसिद्धिः ३६

१५. विकल्पस्य शिवत्वप्रदायित्वे पूर्वोक्तकथनानुवादः ३७

१६. दृष्टान्तपुरस्सरं योगिनां चक्रोदये प्राणसाम्येन प्रतिनियतचक्रनिष्ठमन्त्रोच्चारविषयत्वनिरूपणम् ३८

१७. प्राणसाम्यस्याविशेषात् जपहोमादीनां तुल्यविधित्वम् ३९

१८. अत्रार्थे सिद्धामतयोगिनीकौलशास्त्रयोः प्रामाण्यम् ४०

१९. तत्र श्रीयोगिनीकौलग्रन्थपाठात् योगिनो मन्त्रपदेषु प्रतिप्राणचारं शक्तितत्त्वगप्रविभागेन जपहोमादौ मन्त्रोदयज्ञानात् फलप्राप्तिः ४१

२०. चक्राणां प्रागुक्तविभागाश्रयेण योगिनः प्राणग्रासे प्राणसाम्येनोदिताया विद्यायाः मन्त्रस्य च तत्तत्सिद्धिप्रदायित्वात् जपादौ योज्यत्वम् ४२-४४

२१. मालामन्त्रादिषु समस्तस्य पदस्य प्राणसाम्येनोच्चारयितुमशक्यत्वात् पदांशांशिकया विभागेनोच्चारणे तत्तज्जपसंख्यासिद्धेः सर्वत्र द्वादशाख्यादिचक्रेषु प्राणचाराणां सषट्शतासहस्रैकविंशतित्वम् ४५-५१

२२. चक्रोदयनिरूपणोपसंहारः ५२

२३. प्राणचारोदयानुसारं चक्राणामुदये तस्य प्रवेशैकात्म्यनिर्गमलक्षणे त्रैविध्ये मध्यमोदयस्य श्रेष्ठत्वम् ५३-५४

२४. अत्रार्थे श्रीमद्विंशतिकत्रिकशास्त्रस्य प्रामाण्यात् मन्त्रविद्याचक्रोदयविदः क्षिप्रं सिद्धिभाक्त्वम् ५५-५६

२५. आरुरुक्षवे योगिने शक्तितत्त्वगतैकैकपिण्डाक्षरमन्त्रजपस्य विधिः विभागशून्यबह्वक्षरमन्त्रादिजपस्य च निषेधः ५७-५८

२६. चक्रोदयांशेष्वपि प्रवेशादित्रैविध्याद् अहोरात्रस्य त्रिशस्त्रिशः विभागे क्रमेण कालस्य अर्धोदयः प्रवेशादित्रिकस्य त्र्यंशोदयश्च ५९-६१

२७. कालाध्वनः पारम्पर्येण षडध्वनश्च चित्यामवस्थानम् ६२
२८. अतो विश्वसृष्टिसंहारयोः संविदधीनत्वम् ६३
२९. अत्रार्थे श्रीमालिनीतंत्रप्रामाण्यम् ६४
३०. प्राणस्य देहाविष्टत्वाद् देहनिष्ठतया स्मरणम् ६५
३१. चिदादीनामन्त्यस्थूलताया नाडीरूपताङ्गीकारे देहसन्तानत्वम् ६६
३२. अत्रार्थे स्वतन्तुव्याप्तपलाशपत्रन्यायेन श्रीस्वच्छंदशास्त्रसंवादः ६७
३३. देहस्य त्रिप्रकारप्रमाणावच्छिन्नत्वम् ६८-६९
३४. तत्र प्राणप्राधान्येऽपि विश्वसृष्टिसंहारादिषु अपानवायुक्रमात् प्राग्वद् वैचित्र्यम् ७०
३५. अनुभवदृशा चक्रोदयोपसंहारः

संकेत सूची

अजड् प्र०सि०	अजडप्रमात्रिकासिद्धि
अ०को०	अमरकोश
अनु०	अनुत्तराष्टिका
ई०प्र०	ईश्वरप्रत्यभिज्ञा
ई०प्र०वि०	ईश्वरप्रत्यभिज्ञाविमर्शिनी
उ०स्तो०	उत्पलस्तोत्रावली
भ०गी०	श्रीमद्भगवद्गीता
तं०	तन्त्रालोक
तं०सा०	तन्त्रसार
ने०तं०	नेत्रतन्त्र
प०त्री०	परात्रिशिंका
प०सा०	परमार्थसार
पा०सू०	पाणिनिसूत्र
मा०तं०	मातङ्गतन्त्र
मा०वि०	मालिनीविजयतन्त्र
वि०भै०	विज्ञानभैरव
बृ०आ०उ०	बृहदारण्यक उपनिषत्
शि०सू०	शिवसूत्र
साम्ब०पं०	साम्बपञ्चाशिका
स्प०का०	स्पन्दकारिका
स्व०तं०	स्वछन्दतन्त्र
ह०स्तो०	हरिमीडेस्तोत्र

चतुर्थमाह्निकम्

* विवेक *

योदुर्विकल्पविघ्नविध्वंसे सद्विकल्पगणपतिताम् ।
वहति जयताज्जयन्तः स परं परमन्त्रवीर्यात्मा ॥

इदानीं शांभवोपायानन्तरं क्रमप्राप्तं शाक्तोपायं कथयितुमपरार्धेन प्रतिजानीते—

अथ शाक्तमुपायमण्डलं कथयामः परमात्मसंविदे॥ १ ॥

'उपायममण्डलम्' इति विकल्पसंस्क्रियादीनामानैक्यात् ॥ १ ॥

तत्र प्रथममनुजोद्देशोद्दिष्टां विकल्पसंस्क्रियां तावदभिधातुमुपक्रमते—

अनन्तराह्निकोक्तेऽस्मिन्स्वभावे पारमेश्वरे ।
प्रविविक्षुर्विकल्पस्य कुर्यात्संस्कारमञ्जसा ॥ २ ॥

---

* ज्ञानवती *

जो दुर्विकल्परूपी विघ्न का विध्वंस होने पर साद्विकल्पगण के स्वामित्व को धारण करते हैं, जयशील, परमन्त्रवीर्यस्वरूप वे परम (= शिव) सर्वोत्कृष्ट हो ।

अब शाम्भवोपाय के बाद क्रमशः प्राप्त शाक्तोपाय का वर्णन करने के लिए उत्तरार्ध से प्रतिज्ञा करते हैं—

अब हम परम आत्मबोध के लिये शाक्त उपायसमूह कहेंगे ॥ १ ॥

उपायसमूह—विकल्प संस्कार आदि के अनेक होने से ॥ १ ॥

सबसे पहले अनुजोद्देश में कथित विकल्पसंस्कार का कथन करने के लिए वर्णन का प्रारम्भ करते हैं—

पिछले आह्निक में कहे गये पारमेश्वर स्वभाव में प्रवेश करने की इच्छा वाले को विकल्प का संस्कार शीघ्र करना चाहिये ॥ २ ॥

'अस्मिन्स्वभाव' इति निर्विकल्पैकरूपे, तेनास्य शांभवोपाय एव विश्रान्तिः, इत्यावेदितम् । संस्कारमिति—पौनःपुन्येन श्रुतचिन्तादिवशात् अस्फुटत्वादिक्रमेण स्फुटतमत्वाद्यापत्तिपर्यन्तं गुणान्तराधानं, येन निर्विकल्पस्वरूपानुप्रवेशो भवेत् । अञ्जसेति शीघ्रम्, अन्यथा हि विरुद्धविकल्पान्तरोत्पादात् संस्कारस्य प्ररोहो न स्यात् ॥ २ ॥

ननु ज्ञानस्य क्षणिकत्वे सर्वेषामविवादः, तद्विकल्पस्यापि ज्ञानरूपत्वेन क्षणिकत्वात्, उत्पादसमनन्तरमेव अन्तर्हितस्वरूपस्य कथं नाम संस्कारः प्ररोहमियात्, स हि स्थिरे स्यात्, यथा—तिलादौ सुमनोभिः, तत् कथमे- तदुक्तम् ? इत्याशङ्क्याह—

विकल्पः संस्कृतः सूते विकल्पं स्वात्मसंस्कृतम् ।
स्वतुल्यं सोऽपि सोऽप्यन्यं सोऽप्यन्यं सदृशात्मकम् ॥ ३ ॥

इह यथा नीलविकल्पान्नीलविकल्पस्यैव उत्पादो, न पीतविकल्पस्य, तथैव अस्फुटत्वेऽपि स्फुटीभावाय भाव्यमानत्वात् भ्रश्यदस्फुटत्वाद्यापत्तेः आहितसंस्कारो विकल्पः स्वात्मवत् संस्कृतमेव विकल्पान्तरं जनयेत्, कारणानुरूपेणैव हि प्रायः कार्यस्योत्पादो भवेत्, इति भावः । एवं विकल्पान्तरेष्वपि ज्ञेयम् । सोऽपि इति

इस स्वभाव में—निर्विकल्पक रूप में, इससे यह कहा गया कि इसकी शाम्भवोपाय ही विश्रान्ति है । संस्कार = बारबार श्रवण चिन्तन आदि के कारण अस्फुटत्व आदि के क्रम से स्फुटतमत्व आदि की प्राप्ति तक दूसरे गुणों का आधान, जिससे निर्विकल्पक स्वरूप में अनुप्रवेश हो जाता है । अञ्जसा = शीघ्र । अन्यथा दूसरे विपरीत विकल्प की उत्पत्ति के कारण संस्कार का विकास नहीं होगा ॥ २ ॥

प्रश्न—ज्ञान की क्षणिकता के विषय में सबका मत एक है—तो विकल्प के भी ज्ञानरूप होने से क्षणिक होने के कारण उत्पत्ति के बाद ही लुप्तस्वरूप वाले (विकल्प) का संस्कार कैसे उत्पन्न होगा ? क्योंकि वह (= संस्कार) तो (विकल्प के) स्थिर होने पर होगा जैसे कि पुष्पों के द्वारा तिल आदि में, तो यह कैसे कहा गया ? यह शङ्का कर कहते हैं—

संस्कारसम्पन्न विकल्प अपने के समान संस्कृत विकल्प को उत्पन्न करता है । वह अपने सदृश दूसरे को दूसरा भी अन्य (को उत्पन्न करता है) ॥ ३ ॥

जिस प्रकार नील विकल्प से नील विकल्प की ही उत्पत्ति होती है न कि पीत विकल्प की उसी प्रकार अस्फुट होने पर भी स्फुट होने के लिए भाव्यमान होने के कारण भ्रष्ट होते हुए अस्फुटत्व आदि की आपत्ति से आहित संस्कार वाला विकल्प अपने समान संस्कृत ही विकल्पान्तर को उत्पन्न करेगा क्योंकि कारण के अनुरूप

संस्कृताद्विकल्पाज्जातो द्वितीयः, सोऽप्यन्यमिति तृतीयः, पुनः सोऽप्यन्यमिति चतुर्थः । अत्र स्वतुल्यत्वस्य संबन्धसहिष्णुत्वेऽपि 'सदृशात्मकम्' इत्युक्त्या दूर दूरत्वेऽपि विकल्पमालायाः सादृश्यस्य न काचिद्धानिः, इत्यावेदितम् ॥ ३ ॥

ननु एकस्मात् संस्कृताद्विकल्पात् यदि तादृशस्यैव द्वितीयस्योत्पादः तदास्तां, तृतीयादेः पुनरेवमेवोत्पात्तावानर्थक्यं स्यात्, विशेषे वा सादृश्यस्य हानिः ? इत्याशङ्क्याह—

चतुर्ष्वेव विकल्पेषु यः संस्कारः क्रमादसौ ।
अस्फुटः स्फुटताभावी प्रस्फुटन्स्फुटितात्मकः ॥ ४ ॥

स्फुटताभावीति स्फुटनयोग्यः, प्रस्फुटन्निति उद्गच्छत्स्फुटत्वः, स्फुटतात्मक इति सिद्धस्फुटत्वः, क्रमादिति अभ्यासातिशयतारतम्यात्, अत एव अत्र यथायथमतिशयदर्शनात् नानर्थक्यं, नापि सादृश्यस्य हानिः—विसदृशस्य प्रत्ययान्तरस्यानुत्पादात्, आद्य एव हि संस्कारो यथायथमभ्यासातिशयात् प्ररोहमुपगत इत्येवमुक्तम् ॥ ४ ॥

न च इयानेव अस्य संस्कारः संभवेत् । इत्याह—

ततः स्फुटतरो यावदन्ते स्फुटतमो भवेत् ।

ही कार्य की उत्पत्ति होती है—यह भाव है । इसी प्रकार दूसरे विकल्पों के बारे में भी जानना चाहिये । वह भी = संस्कृत विकल्प से उत्पन्न दूसरा (विकल्प) वह भी अन्य को = तीसरे को । पुनः वह भी अन्य को = चौथे को । यहाँ स्वतुल्य के सम्बन्धसहिष्णु होने पर भी 'सदृशात्मक' इस उक्ति से विकल्पमाला के दूर दूरतर होने पर भी सादृश्य की हानि नहीं होगी—यह बतलाया गया ॥ ३ ॥

प्रश्न—एक संस्कृत विकल्प से यदि उसी प्रकार के दूसरे विकल्प की उत्पत्ति होती है तो हो तीसरे आदि विकल्प की इस प्रकार की उत्पत्ति निरर्थक होगी ? और विशेष होने पर सादृश्य नहीं रहेगा—यह शङ्का कर कहते हैं—

चारों विकल्पों में जो संस्कार होता है वह क्रमशः अस्फुट, स्फुटनयोग्य, स्फुटनोन्मुख और पूर्ण स्फुट होता है ॥ ४ ॥

स्फुटता भावी = स्फुटन के योग्य । प्रस्फुटन् = उत्पन्न होती हुई स्फुटता वाला । स्फुटितात्मक = पूर्णस्फुट । क्रम से = अभ्यास के अतिशय के तारम्यय से । इसलिये यहाँ क्रमशः अतिशय दृष्ट होने के कारण निरर्थकता नहीं है और न सादृश्य की हानि है क्योंकि दूसरा विसदृश प्रत्यय उत्पन्न नहीं होता । पहला ही संस्कार क्रमिक अभ्यास के कारण विकास को प्राप्त हुआ—यह सोचकर ऐसा कहा गया ॥ ४ ॥

इतना ही इसका संस्कार संभव नहीं है—यह कहते हैं—

तत इति चतुर्भ्योऽनन्तरम् ॥

ननु अभ्यासातिशयतोऽपि अस्फुटत्वादिरूपो विकल्पः कथं शीघ्रमेव स्फुटताभाव्यादिरूपतामेति ?—इत्याशङ्क्याह—

अस्फुटादौ विकल्पे च भेदोऽप्यस्त्यान्तरालिकः ॥ ५ ॥

भेद इति विशेषः, आन्तरालिक इति मध्यवर्ती, तथाहि अस्फुटस्फुटताभाविनोरन्तराले भ्रश्यदस्फुटत्वः, एवमीषत्प्रस्फुटत्वः अङ्कुरितस्फुटितत्त्वः आसूत्रितस्फुटतरत्वः उद्गच्छत्स्फुटतमत्वश्चेति ॥ ५ ॥

ननु एवं-कृते सति किं स्यात् ?—इत्याशङ्क्याह—

ततः स्फुटतमोदारताद्रूप्यपरिबृंहिता ।
संविदभ्येति विमलामविकल्पस्वरूपताम् ॥ ६ ॥

ततो—यथोक्तात् संस्काराद्धेतोः, स्फुटतमम्, अत एव उदारं—निर्विल्पकसमानकक्ष्यतया महत्, यत्ताद्रूप्यं—विकल्पकत्वं तेन परिवृंहिता—संस्कारान्तरनिरपेक्षीकृता सती, विकल्परूपा संवित्, विमलां-सङ्कोचकलङ्कापहस्तनेन शुद्धामविकल्पस्वरूपतामभ्येति—पूर्णाविकल्पज्ञानमयतया परिस्फुरतीत्यर्थः । अतश्च 'विकल्पमात्रे एव न विश्रान्तव्यम्' इत्यपि अनेन उक्तम् । यदाहुः—

उसके बाद स्फुटतर और अन्त में स्फुटतम होता है ॥ ५- ॥

उसके बाद = चार के बाद ॥

प्रश्न—अत्यधिक अभ्यास से भी अस्फुटत्वादिरूप विकल्प किस प्रकार शीघ्र ही स्फुटताभाव्य आदि रूपता को प्राप्त करता है ? यह शङ्का कर कहते हैं—

अस्फुट आदि विकल्प में भीतर-भीतर भेद भी रहता है ॥ -५ ॥

भेद = विशेष । आन्तरालिक = मध्यवर्त्ती । इस प्रकार अस्फुट और स्फुटताभावी के बीच में नष्ट होती अस्फुटता वाला । इसी प्रकार ईषत् स्फुटतावाला, अंकुरित स्फुटता वाला, आसूत्रित स्फुटता वाला, उद्गच्छत् स्फुटमत्ता वाला ॥५॥

प्रश्न—ऐसा करने पर क्या होगा ?—यह शङ्का कर कहते हैं—

इसके बाद स्फुटतम उदार ताद्रूप्य से परिपुष्ट संविद् निर्मल निर्विकल्पकरूपता को प्राप्त करती है ॥ ६ ॥

ततः = यथोक्त संस्कार के कारण स्फुटतम अत एव उदार = निर्विकल्पक समानकक्ष्य होने के कारण महान्, जो ताद्रूप्य = विकल्पकत्व, उससे परिवृंहित संस्कारान्तरनिरपेक्ष की गई, विकल्परूपा संवित्, विमला = सङ्कोचकलङ्क को हटाने से शुद्ध, अविकल्पक स्वरूपता को प्राप्त करती है = पूर्ण अविकल्प ज्ञानमय होकर स्फुरण करती है । इसलिए—विकल्प मात्र में ही विश्राम नहीं करना चाहिये'

'परमार्थविकल्पेऽपि नावलीयेत पण्डितः ।
को हि भेदो विकल्पस्य शुभे वाप्यथ वाऽशुभे ॥' इति ॥ ६ ॥

एतदेव प्रकृते योजयति—

अतश्च भैरवीयं यत्तेजः संवित्स्वभावकम् ।
भूयो भूयो विमृशतां जायते तत्स्फुटात्मता ॥ ७ ॥

अतो—विकल्पसंविदा एव तत्तत्संस्कारबलादविकल्पसंविद्रूपतया परिस्फुरणाद्धेतोः, यद्भैरवीयं ज्ञानक्रियाख्यं संवित्स्वभावं तेजः तद्रूप एव 'अहमिति' भूयो भूयः अस्फुटत्वादिक्रमेण उद्गच्छत्स्फुटतमत्वाद्यापत्तिपर्यन्तेन परामृशतां तीव्रतीव्रशक्तिपातवतां महात्मनां, तस्य परामृश्यस्य संविदात्मकस्य भैरवीयस्य तेजसः स्फुटात्मता जायते—शांभवावेशवशेन तत्साक्षात्कारो भवतीत्यर्थः ॥ ७ ॥

ननु संविदः प्रमात्रेकरूपत्वात् परामर्शकत्वमेव युज्यते, न परामृश्यत्वं, तथात्वे हि नीलादिवत् अस्या जाड्यं प्रसज्येत् ?—इत्याशङ्कां दर्शयति—

ननु संवित्पराम्रष्ट्री परामर्शमयी स्वतः ।
परामृश्या कथं ताथारूप्यसृष्टौ तु सा जडा ॥ ८ ॥

यह भी इससे कहा गया । जैसा कि कहते हैं—

'पण्डित को चाहिए कि वह परमार्थ विकल्प मे भी लीन न हो । शुभ (= शुद्ध) अथवा अशुभ (= अशुद्ध) विकल्प में क्या अन्तर है ? ॥ ६ ॥

इसी को प्रस्तुत मे जोड़ते हैं—

इस कारण संवित्स्वभाव वाला जो भैरवीय तेज है उसका बार-बार विमर्श करने वाले (साधकों) को उसकी स्फुट (प्रतीति होती है) ॥ ७ ॥

अतः = विकल्प संविद् के ही भिन्न-भिन्न संस्कार के बल से अविकल्प संविद् रूप में परिस्फुरण करने के कारण, जो भैरवसम्बधी ज्ञानक्रिया नामक संवित् का स्वभाव तेज उसी रूप वाला ही 'मैं' ऐसा बार-बार अस्फुटत्व आदि के क्रम से उद्गच्छत् स्फुटतमत्व आदि की प्राप्तिपर्यन्त परामर्श करने वालों को = तीव्र तीव्र शक्तिपात वाले महात्माओं को, उस परामृश्य संविदात्मक भैरवीय तेज की स्फुटात्मता उत्पन्न होती है = शाम्भवावेश के कारण उसका साक्षात्कार हो जाता है ॥ ७ ॥

प्रश्न—संविद के केवल प्रमातारूप होने से (उसका) परामर्शक होना ही ठीक है न कि परामृश्य (होना) क्योंकि वैसा होने पर नील (= घट) आदि के समान यह जड़ हो जायगी ?—यह शङ्का दिखलाते हैं—

प्रश्न है कि परामर्श करने वाली संवित्शक्ति स्वयं परामर्शमयी है तो वह परामृश्य कैसे हो सकती है? उस प्रकार की सृष्टि होने पर तो वह

ताथारूप्येति परामृश्यत्वस्येत्यर्थ: ॥ ८ ॥

एतदेव समाधत्ते—

उच्यते स्वात्मसंवित्तिः स्वभावादेव निर्भरा ।
नास्यामपास्यं नाधेयं किञ्चिदित्युदितं पुरा ॥ ९ ॥

इह स्वात्मरूपा संवित् तावत् अतिरिक्तस्य अपेक्षणीयस्याभावात् स्वत एव निर्भरा नान्याकांक्षेति, नित्योदितत्त्वात् अस्यां स्वात्मसंवित्तौ न किञ्चिदस्फुटत्वादि अपास्यं, नापि स्फुटतमत्वादि आधेयमिति । पुरा—अनुपायाह्निके

'अत्र तावत्क्रियायोगो नाभ्युपायत्वमर्हति ।'

इत्यादिनोक्तम् । यदभिप्रायेणैव अतो बाह्यैरपि

'नापनेयमतः किञ्चित्प्रक्षेप्तव्यं न किञ्चन ।
द्रष्टव्यं भूततोद्भूतं भूतदर्शी विमुच्यते ॥'

इत्याद्युक्तम् ॥ ९ ॥

ननु यद्येवं तत् इयान् अस्फुटत्वादिरूपः संविदः कुतस्त्योऽयं स्फारः? इत्याशङ्क्याह—

जडरूप हो जायगी ॥ ८ ॥

ताथारूप्य = परामृश्यत्व का—यह अर्थ है ॥ ८ ॥

इसी का समाधान करते हैं—

(इस विषय में) कहते हैं—स्वात्मबोध स्वभाव से ही निराकाङ्क्ष है । इसमें न तो किसी का आधान किया जा सकता न ही (इससे) कुछ हटाया जा सकता है—ऐसा पहले कहा जा चुका है ॥ ९ ॥

स्वात्मरूपा संवित् अतिरिक्त अपेक्षणीय के अभाव के कारण स्वतः ही निर्भर = दूसरे की आकांक्षा से रहित है । नित्योदित होने के कारण इस स्वात्मसंविद् में कुछ अस्फुटत्व आदि त्याज्य नहीं हैं और न स्फुटतमत्व आदि आधेय है । पहले = अनुपाय आह्निक में—

"इस विषय में क्रियायोग उपाय नहीं बनता ।"

इत्यादि के द्वारा कहा गया है । जिस अभिप्राय से ही इससे बाह्य लोगों के द्वारा भी

"इससे कुछ अपसार्य नहीं है और न इसमें कुछ प्रक्षेप्तव्य है । भूतता से उद्भूत द्रष्टव्य है । (ऐसा) भूतदर्शी मुक्त हो जाता है । इत्यादि कहा गया है ॥ ९ ॥

प्रश्न—यदि ऐसा है तो इतना बड़ा अस्फुटत्व आदि रूप संविद का यह स्फार

किं तु दुर्घटकारित्वात्स्वाच्छन्द्यान्निर्मलादसौ ।
स्वात्मप्रच्छादनक्रीडापण्डितः परमेश्वरः ॥ १० ॥

किं पुनः, असौ परमेश्वरः परः प्रकाशः—स्वरूपगोपनात्मकदुर्घटकारित्व-लक्षणात् शुद्धात् स्वाच्छन्द्यात् हेतोः, परप्रमात्रेकस्वभावस्यापि स्वात्मनः प्रच्छादनं —ग्राह्यग्राहकाद्युल्लासात्तथात्वेनाभासनं, सैव क्रीड़ा—प्रतिनियतफलाननुसंधानेन प्रवृत्तिः, तत्र पण्डितः—प्रवीण इत्यर्थः । इयमेव हि तस्य स्वातन्त्र्यरूपा मायाख्या शक्तिः—यदनावृतमपि स्वं रूपमावृत्तवेनैव आभासयति, यतोऽय-मियान् ग्राह्यग्राहकाद्यात्मा भेदावभासः ॥ १० ॥

तदाह—

अनावृत्ते स्वरूपेऽपि यदात्माच्छादनं विभोः ।
सैव माया यतो भेद एतावान्विश्ववृत्तिकः ॥ ११ ॥

एवमस्य विश्वरूपतयावभासनमेव द्वैतमुच्यते, यद्वशादयं दुरन्तः संसारबन्धः, तदपासनायैव च अयं परामर्शो—यत् संविदेव पुनः पुनः परामृश्यमाना स्फुटतामियात् इति ॥ ११ ॥

तदाह—

कहाँ से (उत्पन्न होता) है ? यह शङ्का कर कहते हैं—

किन्तु यह परमेश्वर दुर्घटकारी स्वच्छन्द और निर्मल होने के कारण आत्मगोपन की लीला में पण्डित है ॥ १० ॥

यह परमेश्वर = परप्रकाश, स्वरूपगोपनरूप दुर्घटकारित्व लक्षणवाले शुद्ध स्वातन्त्र्य के कारण, केवल परप्रमातृस्वभाव वाले भी स्वात्मा का, प्रच्छादन = ग्राह्य ग्राहक आदि उल्लास होने से उस रूप में आभासन, वही क्रीडा = निश्चित फल का अनुसन्धान न होने से प्रवृत्ति, उसमें पण्डित = प्रवीण है । यही उसकी स्वातन्त्र्यरूप माया नामक शक्ति है जो कि अपने अनावृत रूप को भी आवृत के रूप में आभासित करती है जिससे ग्राह्यग्राहकरूप भेद का यह इतना बड़ा अवभास होता है ॥ १० ॥

वह कहते हैं—

परमेश्वर के स्वरूप के अनावृत होने पर भी (जो) उसका आत्मगोपन है वही माया है जिस कारण विश्व में रहने वाला इतना भेद है ॥ ११ ॥

इसका विश्व के रूप में अवभासन ही द्वैत कहा जाता है जिस कारण संसार का यह दुरन्त बन्धन है और उसको दूर करने के लिये ही यह परामर्श है कि संविद् ही बार-बार परामृष्ट होकर स्फुटता को प्राप्त होती है ॥ ११ ॥

तथाभासनमेवास्य द्वैतमुक्तं महेशितुः ।
तद्द्वयापासनेनायं परामर्शोऽभिधीयते ॥ १२ ॥

तद्द्वयापासनेति—कार्यकारणयोरभेदोपचारात् ॥ १२ ॥

ननु इह 'नहि भातमभातं भवति' इति सर्वेषामविवादः, देहनीलादि चेदं भेदेनावभासते, तत् कथमुक्तं 'तदपासनेन संविद एव अवभासो भवेत्'? इत्याशङ्कामपाकर्तुं विकल्पसंस्क्रियानन्तर्येण अनुजोद्देशोद्दिष्टं तर्कतत्त्वमवतारयति—

दुर्भेदपादपस्यास्य मूलं कृन्तन्ति कोविदाः ।
धारारूढेन सत्तर्ककुठारेणेति निश्चयः ॥ १३ ॥

बन्धैककारणत्वात् दुष्टो योऽसौ ग्राह्यग्राहकाद्यात्मा भेदः, स एव दुरुन्मूल्यत्वात् पादपः तस्य अस्य अनुभूयमानस्य, कोविदाः प्रत्यभिज्ञातस्वात्मानः, सन्—साक्षात्तत्त्वनिष्ठः, अत एव तर्कान्तरविलक्षणो योऽसौ परां कोटिं प्राप्तस्तर्कः—शुद्धविद्यांशस्पर्शपवित्रिताया बुद्धेरुदीयमानः स्वात्मप्रत्यभिज्ञापनपररूपः, स एव समुत्तेजिधारः कुठारः, तेन मूलम्—अख्यातिलक्षणं कारणमेव कृन्तन्ति, यथास्य पूर्णपरसंविन्मात्रख्यातेः पुनरुत्थानमेव न भवेत्, इत्ययं निर्णयः, स एव हि

वह कहते हैं—

इस परमेश्वर का उस प्रकार का आभासन ही द्वैत है । उस द्वैत के अभेदमय होने से यह परामर्श कहा जाता है ॥ १२ ॥

उस दो के हटाने से—कार्य कारण का अभेद मानने से ॥ १२ ॥

प्रश्न—"(एक बार भी) भासित होने वाला अभासित नहीं होता ।"

इसमें सबका ऐकमत्य है । और यह शरीर और घट आदि भिन्न आभासित होता है, तो कैसे यह कहा गया कि उसको हटाने से संविद् का ही अवभास होता है ?—इस शङ्का को हटाने के लिए विकल्प के संस्कार के बाद अनुजोद्देश में उद्दिष्ट तर्कतत्त्व का प्रारम्भ करते हैं—

विद्वान् लोग सतर्क रूपी कुठार की तीक्ष्ण धार से इस दुर्भेद वृक्ष का मूल काट देते हैं । यह निश्चित है ॥ १३ ॥

बन्धन का एकमात्र कारण होने के नाते दुष्ट जो यह ग्राह्यग्राहक आदि रूप भेद वही कठिनाई से उखाड़ने योग्य होने के कारण वृक्ष, उस इस अनुभूयमान के, विद्वान् = आत्मा की प्रत्यभिज्ञा वाले, सत् = साक्षात् तत्त्व में वर्त्तमान, इसलिए दूसरे तर्कों से विलक्षण जो यह परा सीमा को प्राप्त तर्क = शुद्धविद्या के किञ्चित् स्पर्श से पवित्र बुद्धि से उत्पन्न होता हुआ आत्मप्रत्यभिज्ञापन पररूप, वही तीक्ष्ण की गई धारवाला कुठार है उससे मूल को = अख्याति लक्षण वाले कारण को, ही काट देते हैं । ताकि इसका पूर्ण परसंविन्मात्र ख्याति के कारण पुनरुत्थान न हो

महात्मनां देहाद्यालोचनेन यथायथमभ्यासातिशयात् विकल्पशुद्धिमादधानः, परां काष्ठामुपागतः सन्, भावनात्मकतां यायात्, येन अस्फुटमपि संविद्रूपं स्फुटतामासादयेत् ॥ १३ ॥

अत आह—

तामेनां भावनामाहुः सर्वकामदुघां बुधाः।
स्फुटयेद्वस्तु यापेतं मनोरथपदादपि ॥ १४ ॥

यस्तर्कः, तां भावनामाहुः, इति विधीयमानलिङ्गानुवेधः तर्क एव हि परां काष्ठामुपगतो भावनेत्युच्यते, तदुक्तम्—

'तदेव परम ज्ञानं भावनामयमिष्यते ।' इति ।

अत एव एनामित्यन्वादेशेनास्य कथनं, तस्यां च परिनिष्पन्नायामभीप्सितफलावाप्तिर्भवेत् इत्युक्तं—सर्वकामदुघामिति, तदुक्तम्—

'मुहूर्तादेव तत्रस्थः समाधिं प्रतिपद्यते ।
तत्रापि च सुनिष्पन्नो फलं प्राप्नोत्यभीप्सितम् ॥' इति ।

या भावनैव हि मनोरथादपि अपेतं—स्वतन्त्रविकल्पानामपि अविकल्प्यत्वादगोचरं, वस्तु—पारमार्थिकं परप्रमात्रेकलक्षणं संविद्रूपं, स्फुटयेत्—अविकल्पवृत्त्या

यह निर्णय है । वही महात्माओं के देह आदि आलोचन के द्वारा क्रमशः अभ्यास का अतिशय होने से विकल्प की शुद्धि को ले आता हुआ, अन्तिम सीमा को प्राप्त हो, भावनात्मकता को प्राप्त होता है जिससे अस्फुट भी संविद्रूप स्फुटता को प्राप्त करता है ॥ १३ ॥

इसलिए कहते है—

विद्वज्जन इस भावना को सर्वकामप्रदात्री कहते हैं जो मनोरथ से परे वस्तु को स्पष्ट कर देती है ॥ १४ ॥

जो तर्क है उसे (विद्वान लोग) भावना कहते हैं । इस प्रकार विधीयमान लिङ्गानुवेध वाला तर्क ही पराकाष्ठा को प्राप्त होने पर भावना कहा जाता है वही कहा गया है—"वही भावनामय परमज्ञान कहा जाता है ।"

इसलिए 'एनाम्' इस सर्वनाम से इसका कथन हुआ है । उसके पूर्ण होने पर इष्टफल का प्राप्ति होती है—इसलिए कहा गया—सर्वकामदुघा । वही कहा गया है—

"उसमें स्थित (साधक) एक क्षण में समाधि को प्राप्त हो जाता है । और उसके भी निष्पन्न होने पर इष्ट फल को प्राप्त करता है ।"

जो भावना ही मनोरथ से भी रहित = अविकल्प्य होने के कारण स्वतन्त्र

साक्षात्कुर्यात्, यन्महिम्ना किं नाम न योगिनः सिद्ध्येत् ॥ १४ ॥

अतश्च 'इदमेव उत्तमं योगस्याङ्गम्' इत्यस्मद्दर्शने उच्यते, इत्याह—

श्रीपूर्वशास्त्रे तत्प्रोक्तं तर्को योगाङ्गमुत्तमम् ।
हेयाद्यालोचनात्तस्मात्तत्र यत्नः प्रशस्यते ॥ १५ ॥
मार्गे चेतः स्थिरीभूतं हेयेऽपि विषयेच्छया ।
प्रेर्य तेन नयेत्तावद्यावत्पदमनामयम् ॥ १६ ॥

यद्यपि

'प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥'

इत्यादिनीत्या तर्कस्य प्राणायामादिभिर्योगाङ्गगत्वे साम्यं, तथापि हेयाद्यालोचनात् असौ उत्तममन्तरङ्गं योगस्याङ्गं, तर्केण हि 'इदं हेयम् इदमुपादेयम्' इति विचारयन् योगी झटित्येव तत्त्वज्ञो भवेत्, तदुक्तम्—

'ऊहोऽन्तरंगं योगस्य तेन चाध्वन्यवस्थितेः ।

विकल्पों का भी विषय नहीं है ऐसी वस्तु = पारमार्थिक केवल प्रमातृलक्षण संविदरूप को, स्फुट करता है = अविकल्पवृत्ति से (उसका) साक्षात्कार करता है जिसकी महिमा से योगी को क्या नहीं सिद्ध होता ॥ १४ ॥

इसलिए हमारे दर्शन में 'यही योग का उत्तम अङ्ग है'—ऐसा कहा जाता है—यह कहते हैं—

मालिनीविजयतन्त्र में कहा गया है कि हेय आदि की समीक्षा करने के कारण तर्क उत्तम योगाङ्ग है । इस कारण उस विषय में प्रयास की प्रशंसा की जाती है ॥ १५ ॥

हेय मार्ग में भी विषय की इच्छा से यदि चित्त स्थिर हो गया तो उसे प्रेरित कर उसी मार्ग से 'तब तक' ले चलना चाहिये जब तक कि निरञ्जन पद (प्राप्त न हो जाय) ॥ १६ ॥

यद्यपि

"योग, प्राणायाम तथा ध्यान, प्रत्याहार धारणा तर्क और समाधि इन छः अङ्गों वाला कहा जाता है ।"

इत्यादि नीति के अनुसार तर्क का प्राणायाम आदि के साथ योग के अङ्ग के रूप में साम्य है तथापि हेय आदि के आलोचन के कारण यह योग का उत्तम अर्थात् अन्तरङ्ग अङ्ग है । तर्क के द्वारा 'यह हेय है और यह उपादेय'—ऐसा विचार करने वाला योगी झट से तत्त्वज्ञानी हो जाता है । वही कहा गया है—

साधारणोऽप्यसौ मुक्तेर्भूयसोपकरोति हि ॥' इति ।

तथा

'स्वसिद्धान्ताविरुद्धेन यस्तर्केण विचारयेत् ।
धर्मज्ञानापवर्गार्थे स तत्त्वं वेद नापरः ॥'

इति, अतश्च-अत्रैव मुख्यया वृत्त्या यतितव्यम् इत्युक्तं 'तस्मात्तत्र यत्नः प्रशस्यते' इति, तत्र हि कृतप्रयत्नो योगी सांख्यादिशास्त्रान्तरोदिते हेये मोक्षोपायलक्षणे मार्गे 'ममेदमेव आकाङ्क्षणीयं तत्त्वम्' इत्याद्यभिमानोदयात् स्थिरीभूतमपि चेतः, तेन तर्केण प्रेर्य-ततो हेयान्मार्गात् पराङ्मुखीकृत्य, तावन्नयेत्-उपादेये मार्गे विश्रामयेत्, यावत् पदमनामयं-सर्वोत्तीर्णपरप्रकाशात्मतया प्रस्फुरेदित्यर्थः ॥ १५-१६ ॥

अत्र च विषमत्वात् स्वयमेव पदचतुष्टयं व्याचष्टे—

मार्गोऽत्र मोक्षोपायः स हेयः शास्त्रान्तरोदितः ।
विषिणोति निबध्नाति येच्छा नियतिसङ्गतम् ॥ १७ ॥
रागतत्त्वं तयोक्तं यत् तेन तत्रानुरज्यते ।

"ऊह योग का अन्तरङ्ग है, उसके द्वारा अध्वा में स्थित होने के कारण, यह साधारण होते हुए भी मुक्ति का प्रचुर उपकार करता है ।"

तथा

"जो (साधक) अपने सिद्धान्त के अनुकूल तर्क के द्वारा धर्म ज्ञान और मोक्ष के लिये विचार करता है वह तत्त्व को जानता है दूसरा नहीं ।"

इसलिए इसी में मुख्यवृत्ति से प्रयास करना चाहिए । इसलिये कहा गया—'इस कारण इस विषय में यत्न की प्रशंसा की जाती है ।

उसमें प्रयत्न करने वाला योगी सांख्य आदि दूसरे शास्त्रों में उक्त हेय मोक्षोपायलक्षण मार्ग में 'मेरा यही आकाङ्क्षणीय तत्त्व है' । इत्यादि धारणा के उदय होने से स्थिर हुए चित्त को भी उस तर्क से प्रेरित कर = उस हेय मार्ग से पराङ्मुख कर, तब तक ले जाता है = उपायदेय मार्ग में विश्रान्त कराता है जब तक पद अनामयरूप से = सर्वोत्तीर्ण प्रकाश रूप से स्फुरित नहीं होता ॥ १५-१६ ॥

क्लिष्ट होने के कारण स्वयं चारो पदों की व्याख्या करते हैं—

इस विषय में अन्य शास्त्रों में कहा गया मोक्षोपायरूप मार्ग हेय है । जो इच्छा नियति से संयुक्त (राग) को विशेष रूप में बाँधती है उस (इच्छा) के कारण वह राग तत्त्व कहा जाता है क्योंकि वह (= मन) उस (= विषय) में अनुरक्त किया जाता है ॥ १७-१८- ॥

शास्त्रान्तरोदितस्य मार्गस्य हेयत्वं प्रागेवोपपादितम्, इति नेह पुनरायस्तम् 'षिञ् बन्धने' इत्यस्य विपूर्वस्य अचि विषयशब्दः, तेन बिषयरूपा बन्धयित्री येयमिच्छा—'इदमेव मे स्यात्' इत्यादिरभिमानविशेषः, तया नियतिसङ्गतं रागतत्त्वमुक्तं सामान्येन, सर्वविषयमभिलाषमात्रं हि रागतत्त्वस्य रूपं, तदेव नियत-विषयतयोद्यत् नियतितत्त्वस्य, इति तद्युक्तं रागतत्त्वमस्य अभिधेयम्, यत् यस्माद्धेतोः तत्र नियतेः हेये मार्गे तेन रागेण चेतोऽनुरज्यते—स्थिरीभवेत् इत्यर्थः । ननु सर्वत्रैव अन्यत्र

'गुरुदेवाग्निशास्त्रस्य ये न भक्ता नराधमाः ।
असद्युक्तिविचारज्ञाः शुष्कतर्कावलम्बिनः ॥
भ्रमयत्येव तान्माया ह्यमोक्षे मोक्षलिप्सया ॥'

इति । तथा

'हेतुशास्त्रं च यल्लोके नित्यानित्यविडम्बकम् ।
वादजल्पवितण्डाभिर्विवदन्ते ह्यनिश्चिताः ॥
हेतुनिष्ठानि वाक्यानि वस्तुशून्यानि सुव्रते ।
ज्ञानयोगविहीनानि देवतारहितानि तु ॥
धर्मार्थकाममोक्षेषु निश्चयो नैव जायते ।
अज्ञानेन निबद्धानि त्वधर्मेण निमित्ततः ॥
निरयं ते प्रयच्छन्ति ये तत्राभिरता जनाः ।'

दूसरे शास्त्रों में कथित मार्गों की त्याज्यता पहले ही बतला दी गई इसलिये यहाँ फिर विस्तार नहीं किया गया ॥ वि उपसर्ग पूर्वक 'षिञ्' बन्धने धातु से अच्प्रत्यय जोड़कर विषय पद बनता है इस प्रकार विषयरूपा बन्धनकारणी जो यह इच्छा 'यही मुझे हो जाय' इत्यादि विशिष्ट अभिमान, उसके द्वारा, नियतिसङ्गत = सामान्यतः कथित रागतत्त्व सब विषय की इच्छामात्र ही रागतत्त्व का स्वरूप' वही निश्चितरूप से उठते हुए नियतितत्त्व का, उससे युक्त रागतत्त्व इसका वाच्य है । जिससे = जिस कारण से, उस नियति के हेयमार्ग में उस राग के कारण चित्त अनुरक्त होता है = स्थिर होता है । प्रश्न—अन्यत्र सर्वत्र

''जो नराधम लोग गुरु, देवता, अग्नि और शास्त्र के भक्त नहीं हैं असत् युक्ति एवं विचार को जानने वाले, शुष्कतर्क का सहारा लेने वाले है । उनको माया अमोक्ष में मोक्ष की इच्छा से, भ्रमित करती हैं ॥'' तथा

''लोक में जो नित्यानित्य की विडम्बना करने वाला तर्क शास्त्र है (उसका आश्रय लेकर) निश्चयविहीन लोग वाद जल्प और वितण्डा के द्वारा विवाद करते हैं। हे सुव्रते ! हेतुनिष्ठ किन्तु वस्तुशून्य (वे) वाक्य (जो) ज्ञानयोग और अज्ञान से रहित और देवता से विहीन और अज्ञान से युक्त हैं (उनके द्वारा) धर्मार्थकाममोक्ष के विषय में निश्चय नहीं होता । जो लोग इसमें तल्लीन होते हैं वे अधर्म के कारण

इत्यादिना भगवतास्य तर्कस्य निन्दां विदधता अधमत्वमवद्योतितम्, यदभिप्रायेणैव तद्वेदकस्य गुरोरपि परिहार्यत्वमुक्तम्, यदुक्तम्—

'तार्किकं न गुरुं कुर्यात्..........................।'

इति । तथा

'..............................तार्किके वधबन्धनम् ।'

इति । एतदनुवेधेनैव अभियुक्तैरपि—

'वस्तुनिर्णयशून्याभिर्बोधिताभिः परस्परम्।
अभिमानैकसाराभिर्जिह्वीमस्तर्कबुद्धिभिः ॥'

इत्याद्युक्तम्, तत् कथमस्य इहोत्तमत्वमुक्तम्, एवं हि श्रुतिविरोधः स्यात्, न च उभयत्रापि एकस्यैव प्रामाण्यकारणस्य सद्भावात् एकत्रापि अप्रामाण्यमुद्भावयितुं शक्यम्, इति किमत्र प्रतिपत्तव्यम् ? विषयभेदोऽत्र प्रतिपत्तव्यो, येन सर्वं स्वस्थं स्यात्, द्विविधो हि तर्कः—कश्चिद्धि वस्तुनिर्णयशून्यश्छलादिप्रधानः परपराजयमात्रपर्यवसानो जल्पप्रायः, कश्चित् हेयोपादेयविवेककारितया वस्तुनिर्णयफलः छलादिशून्यो वादप्रायः, तत्राद्यस्य वस्तुनिर्णयशून्यत्वात् गर्हणीयत्वम्, अत एव

नरक में जाते हैं ।''

इत्यादि के द्वारा भगवान् इस तर्क की निन्दा करते हुए निकृष्ट बतलाते हैं इसी अभिप्राय से उसके ज्ञाता गुरु को भी त्याज्य कहा गया है । जैसा कि कहा गया है—

''तार्किक को गुरु नहीं बनाना चाहिये ।'' तथा

''............तार्किक (मान्यता) में वध और बन्धन है ।''

इस अनुवेद्य से ही प्रामाणिकों द्वारा भी

''वस्तुनिर्णय से शून्य, परस्पर ज्ञापित, अभिमानतत्त्व वाली तर्कबुद्धियों से हम लोग लज्जित होते हैं ।''

इत्यादि कहा गया है । तो इस (तर्क) को यहाँ उत्तम कैसे कहा गया ? क्योंकि इस प्रकार श्रुतिविरोध होता है । दोनों जगह प्रमाण्यकारण के एक ही होने से एक जगह भी अप्रामाण्य की उद्भावना नहीं की जा सकती फिर यहाँ क्या समझा जाय ? (इस प्रश्न के उत्तर में कहते हैं कि) यहाँ विषय का भेद जानना चाहिये जिससे सब स्वस्थ हो जायगा । तर्क दो प्रकार का होता है—(१) कोई वस्तु निर्णय से शून्य छल आदि की प्रधानता वाला । दूसरे की पराजय में समाप्त होने वाला जल्प जैसा होता है (२) कोई हेय-उपादेय का भेद करने के कारण वस्तु के निर्णय के फलवाला छल आदि से शून्य वाद जैसा होता है । उनमें पहला वस्तुनिर्णय से शून्य होने के कारण निन्दनीय है । इसलिये

'.........................वस्तुशून्यानि.........।'

इति । तथा

'.........................निश्चयो नैव जायते ।'

इत्याद्युक्तम्, अत एव तद्वेदकानामपि वस्तुज्ञत्वाभावात् परिहार्यत्वमभिहितम्, यस्तु हेयाद्यालोचनेन वस्तुपरिशुद्धिमादधानो हेयमपहाय उपायदेये विश्रामयेत् स परमुत्तमं योगस्याङ्गम्,

इति न कश्चिद्दोषः, तत् आस्माकः सत्तर्को, दर्शनान्तरीयस्त्वसत्तर्कः—इति विभागः ॥ १७ ॥

ननु स्वार्थतत्परो लोकः स्वयमेव अनपेक्षितशास्त्रो हेयमपहातुमुपादेयं च उपादातुं प्रवर्तते, नहि बुभुक्षितस्याशने मलिनस्य वा स्नाने शास्त्रमुपयुज्यते, तत्किम् अत्र तर्केण ?—इत्याशङ्क्याह—

यथा साम्राज्यसंभोगं दृष्ट्वाप्यदृष्ट्वथवाधमे ॥ १८ ॥
भोगे रज्येत दुर्बुद्धिस्तद्वन्मोक्षेऽपि रागतः।

यथा खलु अज्ञः कश्चन—हेयोपादेयविवेकमजानानः, साम्राज्य संभोगं सम्यगुपभोगयोग्यतया परिज्ञाय अपरिज्ञाय वा, अधमे—दुर्गतजनोपभोग्ये, भोगे

".........वस्तु शून्य....." तथा

".............निश्चय नहीं होता"

इत्यादि कहा गया है । इसलिये वस्तुज्ञान के अभाव के कारण उसके ज्ञान को त्याज्य कहा गया है । और जो हेय आदि के विचार के द्वारा वस्तु की शुद्धता का आधान करता हुआ हेय को छोड़ कर उपादेय में विश्रान्त होता है वह पर = उत्तम, योगाङ्ग है । इस प्रकार कोई दोष नहीं है । तो हमलोगों का (तर्क) सत्तर्क है और दूसरे दर्शन का तर्क असत् है—यह विभाग है ॥ १७ ॥

प्रश्न—स्वार्थ में तत्पर मनुष्य स्वयं शास्त्र की अपेक्षा न रखकर त्याज्य को छोड़ने एवं ग्राह्य का ग्रहण करने के लिये प्रवृत्त होता है । भूखे के भोजन में या गन्दे (व्यक्ति) के स्नान में शास्त्र की उपयोगिता नहीं होती । तो इस तर्क से क्या लाभ ?—यह शङ्का कर कहते हैं—

जिस प्रकार कोई दुर्बुद्धि साम्राज्यभोग को देख कर या विना देखे उसमें अनुरक्त हो जाता है उसी प्रकार (शास्त्रान्तरीय) मोक्ष में रागतः (प्रतिबद्ध मूर्ख) भोग में आसक्त होता है ॥ -१८-१९- ॥

जैसे कोई मूर्ख हेय उपादेय के भेद को न जानता हुआ साम्राज्यसंभोग को भलीभाँति उपभोग के योग्य जानकर या न जानकर, अधम = दुर्गति को प्राप्त

रागतो रज्येत—चिरतरप्ररूढप्राक्संस्कारपरिपाकवशात् आसक्तो भवेत्, तथैव साक्षान्मोक्षमपहाय असन्मोक्षेऽपि, इति वाक्यार्थः, तेन हेयहानाय उपादेयोपादानाय च अवश्यं तर्कस्योपयोगः, इति युक्तमुक्तम् 'तर्को योगाङ्गमुत्तमम्' इति ॥ १८ ॥

ननु स्वभावत एवायं सर्वो जनस्तत्तद्दर्शनासक्तः स्यात् यदभिप्रायेण—

'रिक्तस्य जन्तोर्जातस्य कार्याकार्यमपश्यतः।
विलब्धा वत केनामी सिद्धान्तविषमग्रहाः ॥'

इत्यादि अन्यत्रोक्तं, तत् तदुचित एव मोक्षोऽपि अस्य भवेत्, इति कोऽयं रागो नाम ?—इत्याशङ्क्याह—

स एवांशक इत्युक्तः स्वभावाख्यः स तु स्फुटम् ॥ १९ ॥
सिद्ध्यङ्गमिति मोक्षाय प्रत्यूह इति कोविदाः ।

स—राग एव हि 'स्वाभावाख्योऽंशक' इत्यागमेषूक्तम्, तथाहि श्रीस्वच्छन्द-शास्त्रे—

'अंशकं षड्विधं देवि कथयाम्यनुपूर्वशः ।'

इत्युपक्रम्य

लोगों के द्वारा भोग्य भोग में रागवश रक्त होता है = बहुत दिनों तक प्ररूढ़ प्राचीन संस्कार के परिपाक के कारण आसक्त हो जाता है, उसी प्रकार साक्षात् मोक्ष को छोड़कर असत् मोक्ष में भी—यह वाक्यार्थ है । इससे त्याज्य के त्याग तथा ग्राह्य के ग्रहण के लिये तर्क का अवश्य उपयोग है । इसलिये ठीक कहा गया है—'तर्क योग का उत्तम अङ्ग है' ॥ १८ ॥

प्रश्न—स्वभाव से ही ये सब लोग भिन्न भिन्न दर्शनो में आसक्त होते हैं जिस अभिप्राय से—

"कार्या कार्य को न जानने वाले रिक्त संसार में उत्पन्न जन्तु के ये सिद्धान्त विषयग्रह किसके द्वारा छुड़ाये गये ।"

इत्यादि अन्यत्र कहा गया है । तो उसी के अनुकूल मोक्ष भी इसको मिलेगा फिर यह राग क्या है?—यह शङ्का कर कहते हैं—

वही अंशक और स्वभाव नाम से जाना जाता है । वह स्पष्ट रूप से सिद्धि का अङ्ग हैं एवं मोक्ष के लिये विघ्नस्वरूप है—ऐसा विद्वान् लोग (कहते हैं) ॥ -१९-२०- ॥

वह = राग ही । 'स्वभाव नामक अंश है'—ऐसा आगमों में कहा गया है । स्वच्छन्दतन्त्र में—

"हे देवि ! छः प्रकार के अशों को क्रमशः कह रहा हूँ ।

'भावांशकः स्वभावाख्यः पुष्पपातांश एव च।'

इत्युद्दिश्य

'स्वभावश्च भवेच्चेष्टा कथयाम्यनुपूर्वशः ।
ब्राह्मांशो वेदभक्तस्तु रुद्रांशं च निबोध मे ॥
रुद्रभक्तः सुशीलश्च शिवशास्त्ररतः सदा ।'

इत्यादिना असौ लक्षितः । ननु यद्येवं तत् सर्वोऽयं जनः स्वभाववशादेव स्वोचितं मोक्षमासादयेत्, इति को नाम अस्य हेयोपादेयविभागः ?— इत्याशङ्क्याह—'स तु इत्यादि, स—एवंविधःस्वभावः पुनः स्फुटम्

'पौरुषं चैव सांख्यानाम्.................।'

इत्याद्यागमप्रमाणसिद्धत्वेन अपरिम्लानतया तत्तत्त्वोचितभोगात्मिकायाः सिद्धेरङ्गमपि

'स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रङ्गात् ।'

(यो०सू० ३-५१)

इत्याद्युक्तिवन्मोक्तुं विघ्न इत्यागमज्ञाः, एवंस्वभावो हि तत्तत्त्वावाप्ति-लक्षणां सिद्धिमेव मुक्तिमभिमन्यते, इति मुक्त्याभासरूपायां हेयायां तस्यामेव

इस प्रकार प्रारम्भ कर

'भावांशक, स्वभाव नामक और पुष्पपातांश ।'

इस प्रकार नाम गिनाकर

'स्वभाव चेष्टा होती है (उसे मैं) क्रमशः कह रहा हूँ । ब्रह्मांश वेदभक्त होता है। अब मुझ से रुद्रांश को जानो । रुद्रभक्त सदा सुशील और शैवशान्त्र में तल्लीन, रहता है ।'

इत्यादि के द्वारा यह लक्षित (किया गया) है ।

प्रश्न—यदि ऐसा है तो सब लोग स्वभावतः ही अपने योग्य मोक्ष को प्राप्त कर लेंगे फिर इनके लिये हेय-उपादेय का विभाजन कैसा ? यह शङ्का कर कहते हैं—'वह तो' इत्यादि । वह = इस प्रकार का स्वभाव स्फुटरूप से

'सांख्यों का पौरुष................. ।'

इत्यादि आगमप्रमाण से सिद्ध होने के कारण स्वच्छ होने से उस तत्त्व के योग्य भोगात्मक सिद्धि का अङ्ग होते हुए भी

'देवताओं के द्वारा निमन्त्रण पाने पर भी उनका सहवास नहीं करना चाहिए क्योंकि अनिष्ट की शङ्का रहती है ।'

इत्यादि उक्ति की भाँति मोक्ष प्राप्त कराने में विघ्न है—ऐसा आगम के

विश्रान्तः ॥ १९ ॥

एवमेवंस्वभावत्वादेव साक्षान्मोक्षोपायमपहाय अन्यत्रासक्तो भवेत्, इत्याह—

शिवशासनमाहात्म्यं विदन्नप्यत एव हि ॥ २० ॥
वैष्णवाद्येषु रज्येत मूढो रागेण रञ्जितः ।

ननु असौ साक्षान्मोक्षोपायतया शिवशासनस्य प्रभावातिशयं चेज्जानीते किमित्यन्यत्र आसक्तो भवेत् ?—इत्याशङ्क्याह—

यतस्तावति सा तस्य वामाख्या शक्तिरैश्वरी ॥ २१ ॥
पाञ्चरात्रिकवैरिञ्च सौगतादेर्विजृम्भते ।

तावतीति—तत्तन्नियतसिद्धिमात्राप्रदे, वामाख्येति

'वामा संसारवमनात् ....।'

इत्याद्युक्त्या संसाराविर्भाविका तिरोधानशक्तिरित्यर्थः, वैरिञ्चाः—ब्रह्मवादिनः ॥ २१ ॥

ननु शिवशासनमाहात्म्यमजानन् चेदन्यत्र आसक्तो भवेत् तत् भवतु नाम,

---

विद्वान् (कहते हैं) । इस प्रकार स्वभाव उस तत्त्व की प्राप्तिलक्षण वाली सिद्धि को ही मुक्ति मानता है इसलिये मुक्त्याभासरूप उस हेय में ही विश्राम करने लगता है ॥ १९ ॥

फलतः इस स्वभाववाला होने के कारण ही वह साक्षात् मोक्ष के उपाय को छोड़कर अन्यत्र आसक्त हो जाता है ।—यह कहते हैं—

इसीलिये शिवशास्त्र के माहात्म्य को जानते हुए भी राग से रञ्जित होकर वह मूढ़ वैष्णव आदि (सम्मत मोक्ष) में अनुरक्त हो जाता है ॥ -२०-२१- ॥

प्रश्न—यदि यह (साधक) शिवशास्त्र के अतिशय प्रभाव को साक्षात् मोक्ष का उपाय जानता है फिर अन्यत्र कैसे आसक्त होता है ?—यह शंका कर कहते हैं—

जिस कारण उतने के विषय में उस (मूढ) की वह ईश्वरीय वामाशक्ति पाञ्चरात्र ब्रह्मवादी एवं बौद्ध आदि के विषय में प्रेरित करती है ॥ -२१-२२- ॥

उसमें = भिन्न-भिन्न निश्चित सिद्धि मात्र को देने वाले । वामा नामक—

"संसार का वमन करने के कारण वामा.....................।"

इत्यादि उक्ति के अनुसार संसार को प्रकट करने वाली तिरोधान (= निग्रह) शक्ति । वैरिञ्च = ब्रह्मवादी ॥ २१ ॥

को दोषो, जानन् पुनः कथमेवम् ?—इत्याशङ्क्याह—

दृष्टाः साम्राज्यसंभोगं निन्दन्तः केऽपि बालिशाः ॥ २२ ॥
न तु संतोषतः स्वेषु भोगेष्वाशीः प्रवर्तनात् ।

इह खलु केऽपि बालिशप्राया अत्युत्कृष्टतया स्पृहणीयत्वेन परिज्ञायापि साम्राज्यसंभोगं बालिशत्वादेव निन्दन्तो दृष्टाः, न पुनः संतुष्टत्वात्, तेषां हि भोगाभिलाषस्य दूरापास्तत्त्वात् तन्निन्दायामौचित्यमित्याशयः, बालिशानाम् पुनः संतोषस्तावन्नास्ति, यतः—स्वेषु अधमेषु भोगेष्वपि 'पुनः पुनरेतत् स्यात्'—इत्येवंरूपमाशीर्वादं प्रवर्तयन्ते—भोगाभिलाषस्यानपास्तत्त्वात्, एवं विदन्तोऽपि शिवशासनमाहात्म्यं मूढाः तन्निन्दामारभमाणा अन्यत्रासक्ता दृश्यन्ते, यद्वशात् तेषां वामाधिष्ठितत्त्वात् पुनः पुनः संसारे एव निमज्जनं भवेत् ॥ २२ ॥

तदाह—

एवं चिद्भैरवावेशनिन्दातत्परमानसाः ॥ २३ ॥
भवन्त्यतिसुघोराभिः शक्तिभिः पातिता यतः ।

अति सुघोराभिरिति

प्रश्न—शैवशास्त्र के माहात्म्य को न जानते हुए यदि (साधक) अन्यत्र आसक्त होता है तो; ,(इसमें) क्या दोष है ? किन्तु जानते हुए ऐसा कैसे होता है ? यह शङ्का कह कहते हैं—

कुछ मूर्ख साम्राज्यभोग की निन्दा करते हुए देखे गये हैं । ऐसा (वे) सन्तोष के कारण नहीं करते अपितु अपने भोगों के विषय में आशीर्वाद प्राप्त करने के लिये ऐसा करते हैं ॥ -२२-२३- ॥

कुछ मूर्ख लोग अत्यन्त उत्कृष्ट होने के कारण साम्राज्यभोग को स्पृहणीय के रूप में जानकर भी मूर्खता के कारण ही (उसकी) निन्दा करते हुए देखे गये हैं न कि सन्तुष्ट होने के कारण । उनकी भोगेच्छा के दूर होने के कारण उसकी निन्दा करना उचित है—यह आशय है । मूर्खों को तो सन्तोष है नहीं । क्योंकि (वे) अपने निम्न स्तर के भोगों के विषय में भी "यह बार-बार हो' इस प्रकार का आशीर्वाद चाहते हैं क्योंकि भोग की अभिलाषा शान्त नहीं होती । इस प्रकार के शिवशास्त्र के माहात्म्य को जानते हुए भी वे मूर्ख उसकी निन्दा करते हुए अन्यत्र आसक्त दिखाई पड़ते हैं । जिसके कारण वामाशक्ति के द्वारा अधिष्ठित होने से बार-बार संसार में उनका निमज्जन होता है ॥ २२ ॥

वह कहते हैं—

चूँकि इस प्रकार चिद्भैरव के आवेश की निन्दा में तत्परचित्त वाले अत्यन्त घोर शक्तियों के द्वारा पतित बना दिये जाते हैं ॥ -२३-२४- ॥

'विषयेष्वेव संलीनानधोधः पातयन्त्यणून् ।'

इत्यादिलक्षिताभिः घोरतर्यभिधानाभिरपराभिरित्यर्थः ॥ २३ ॥

अत एव च अस्य मूढजनस्य संसारादुन्मज्जनमेव नास्ति, इत्याह—

तेन शांभवमाहात्म्यं जानन्यः शासनान्तरे ॥ २४ ॥
आश्वस्तो नोत्तरीतव्यं तेन भेदमहार्णवात् ।

आश्वस्तहृदयत्वात् तन्निष्ठो, न पुनः

'अन्तः कौलो बहिः शैवो लोकाचारे तु वैदिकः ।'

इत्यादिनीत्या लोकसंग्रहरक्षापरत्वेन उत्तानतया, इति नास्य संसारार्णवादुत्तारः स्यात्—तदन्तरेव उन्मज्जननिमज्जानानुभवस्याविच्छेदात् ॥ २४ ॥

न च एतदस्माभिः स्वोपज्ञमेवोक्तमित्याह—

श्रीकामिकायां प्रोक्तं च पाशप्रकरणे स्फुटम् ॥ २५ ॥

तदेव पठति—

वेदसांख्यपुराणज्ञाः पाञ्चरात्रपरायणाः ।

अति सुघोर के द्वारा—

"विषयों में ही संलीन जीवों को नीचे -नीचे गिराती हैं ।"

इत्यादि के द्वारा लक्षित घोरतरी नामवली अपरा (शक्तियों) के द्वारा ॥२३॥

इसीलिये इस मूर्ख मनुष्य का संसार से उद्धार भी नहीं होता—यह कहते हैं-

इसलिये शाम्भवशास्त्र (= समावेश) के माहात्म्य को जानता हुआ जो दूसरे शास्त्र में श्रद्धावान् होता है वह भेदरूपी महासमुद्र को पार नहीं कर सकता ॥ -२४-२५- ॥

आश्वस्तहृदय वाला होने के कारण उसमें लगा हुआ न कि "भीतर से कौल, बाहर से शैव और लोकाचार में वैदिक ।"

इत्यादि नीति के द्वारा लोकसंग्रह की रक्षा में लगने के कारण उत्तान रूप से इसका संसार सागर से उद्धार नहीं होता क्योंकि उसके भीतर ही डूबने उतराने का अनुभव निरन्तर चलता रहता है ॥ २४ ॥

इसे हमने अपने मन से ही नहीं कहा है—यह कहते हैं—

श्रीकामिकशास्त्र के पाशप्रकरण में यह स्पष्ट रूप से कहा गया है ॥ -२५ ॥

वही कहते हैं—

ये केचिदृषयो धीराः शास्त्रान्तरपरायणाः ॥ २६ ॥
बौद्धार्हताद्याः सर्वे ते विद्यारागेण रञ्जिताः ।
मायापाशेन बद्धत्वाच्छिवदीक्षां न विन्दते ॥ २७ ॥

धीराः—वेदादिविषय एव स्थिरप्रज्ञाः, शास्त्रान्तरं वेदान्तादि, विद्या च रागश्चेति समाहारे द्वन्द्वः, विद्या चात्र रागशब्दसंनिधेरशुद्धविद्योच्यते, अत एव वेदादिशास्त्रनिष्ठा मायान्तःपातात् तदुत्तीर्णं शैवं ज्ञानं न लभन्ते, इत्युक्तम्—

'मायापाशेन बद्धत्वाच्छिवदीक्षां न विन्दते ।' इति ॥ २६-२७ ॥

पूर्वं च यदस्माभिः श्रीपूर्वशास्त्रीये संवादग्रन्थे विषयेच्छाशब्देन वेदादिशास्त्रान्तरोदिते मोक्षोपाये अभिष्वङ्गप्रदं नियतितत्त्वोपेतं रागतत्त्वं व्याख्यातं, तत् न निर्मूलम्, इत्यभिद्योतयितुम् अत्रत्यमपि रागशब्दं व्याचष्टे—

रागशब्देन च प्रोक्तं रागतत्त्वं नियामकम् ।
मायीये तच्च तं तस्मिञ्छास्त्रे नियमयेदिति ॥ २८ ॥

अत्र च रागशब्देनेति—वक्ष्यमाणेन हेतुना, नियामकं रागतत्त्वमुक्तमिति समन्वयः, नियामकमिति नियत एव कस्मिंश्चिद्विषयेऽभिष्वङ्गदमित्यर्थः, यतस्तद्राग-

---

वेद सांख्य पुराण के ज्ञाता पाञ्चरात्र के अनुसार आचरण करने वाले तथा अन्य जो कोई धीर ऋषि दूसरे शास्त्रों को मानने वाले बौद्ध जैन आदि हैं वे सब विद्याराग के द्वारा रञ्जित होकर मायापाश में बद्ध होने के कारण शिवदीक्षा नहीं प्राप्त करते ॥ २६-२७ ॥

धीर लोग = वेद आदि विषय में स्थिर प्रज्ञ । शास्त्रान्तर = वेदान्त आदि । विद्या और राग यह समाहार में द्वन्द्व है । रागशब्द के साथ रहने से विद्या शब्द से अशुद्ध विद्या कहा जाता है । इसलिए वेद आदि शास्त्रों में निष्णात लोग माया के भीतर पड़ने से उसको माया से उत्तीर्ण शैव ज्ञान को प्राप्त नहीं करते । इसलिये कहा गया—मायापाश से बद्ध होने के कारण शिवदीक्षा को नहीं प्राप्त करते ॥ २६-२७ ॥

हम लोगों के द्वारा जो पहले श्रीपूर्वशास्त्रवाले संवादग्रन्थ में = विषय-इच्छा शब्द से वेद आदि दूसरे शास्त्रों में उक्त मोक्ष के उपाय में अभिष्वङ्गप्रद (= आसक्ति प्रदान करने वाले), नियति तत्त्व से युक्त रागतत्त्व की व्याख्या की गई, वह निर्मूल नही हैं—यह बतलाने के लिए यहाँ के राग शब्द की व्याख्या करते हैं—

राग शब्द से नियामक रागतत्त्व को कहा गया है । और वह (= राग तत्त्व) मायीय शास्त्र में उस (मूढ) को बाँध देता है ॥ २८ ॥

यहाँ रागशब्द से—वक्ष्यमाण हेतु के द्वारा नियामक रागतत्त्व कहा गया—यह

तत्त्वं तस्मिन्नियते मायीये शास्त्रे वेदादौ, तं मूढं जनं नियमयेत् 'इदमेव ममाकाङ्क्षणीयम्' इति सङ्कुचितत्त्वेनावस्थापयेत्, यद्यपि सामान्येन सर्वविषयाभिलाषमात्रमयत्वं नाम रागतत्त्वस्य स्वरूपं, तथापि नियतविषयोपारोहमन्तरेण तत् नाभिव्यक्तिमियात्, इत्यवश्यमेव तन्नियतितत्त्वामाक्षिपेत्, इति युक्तमुक्तं 'रागतत्त्वं नियामकम्' इति ॥ २८ ॥

ननु प्राप्तेऽपि वैष्णवादिशास्त्रान्तरोदिते मोक्षे किमिति नाम अयं जनः संसारात् नोन्मज्जति ?—इत्याशङ्क्याह—

मोक्षेऽपि वैष्णवादेर्यः स्वसङ्कल्पेन भावितः ।
परप्रकृतिसायुज्यं यद्वाप्यानन्दरूपता ॥ २९ ॥
विशुद्धचित्तमात्रं वा दीपवत्संततिक्षयः ।
स सवेद्यापवेद्यात्मप्रलयाकलतामयः ॥ ३० ॥

यः खलु वैष्णवादीनां मते मोक्षः, सोऽपि अस्मद्दर्शने प्रलयाकलतामयः—इति संबन्धः, तत्र वैष्णवानां 'परप्रकृतिसायुज्यं मोक्षः' तन्मते हि भगवद्वासुदेवाभिधानस्य महाविभूतेश्चेतनाचेतनविधातृत्वात् परप्रकृतिरूपस्य परस्य ब्रह्मणः स्वस्वभावात् क्रमविचित्रतया तथा तथा भावनात् विश्वरूपतयानेकात्मनोऽपि

समन्वय है । नियामक = किसी निश्चित विषय में आसक्ति देने वाला । क्योंकि रागतत्त्व उस नियत मायीय शास्त्र वेद आदि में उस मूढ़ आदि को नियमित करता है = 'यही मेरा आकाङ्क्षणीय है—इस प्रकार संकुचित रूप से स्थापित करता है । यद्यपि सामान्य रूप से सभी विषयों की इच्छामात्र से युक्त होना रागतत्त्व का स्वरूप है तथापि नियत विषय के उपारोह के बिना अभिव्यक्ति को प्राप्त नहीं होता इसलिये वह आवश्यक नियति तत्त्व का आक्षेप करता है । इसलिये ठीक कहा गया 'रागतत्त्व नियामक है' ॥ २८ ॥

प्रश्न—वैष्णव आदि दूसरे शास्त्रों में उक्त मोक्ष के प्राप्त होने पर भी यह मनुष्य संसार से मुक्त क्यों नहीं होता ? यह शङ्का कर कहते हैं—

वैष्णव आदि का जो अपने विचार से उत्पादित 'परा प्रकृति के साथ सायुज्य' रूप मोक्ष है (या वेदान्तियों का) आनन्दरूपता (मोक्ष है) (अथवा विज्ञानवादी बौद्ध का) विशुद्ध चित्तमात्र या (शून्यवादियों का) दीप के समान (कर्म-) सन्तान का क्षय (मोक्ष कहा गया) है वह (हमारे सिद्धान्त के अनुसार) सवेद्य प्रलयाकल या अपवेद्य प्रलयाकल (अवस्था है) ॥ २९-३० ॥

वैष्णव आदि के मत में जो मोक्ष है वह भी हमारे दर्शन में प्रलयाकलता वाला है—यह सम्बन्ध है । उनमें वैष्णवों का परप्रकृतिसायुज्य मोक्ष है । उनके मत में भगवान् वासुदेव नामक महाविभूति चेतनाचेतन के विधाता हैं । परप्रकृति रूप

'एकमेवाद्वितीयं ब्रह्म ।'

इत्यादिश्रुतेः तत्त्वज्ञानाभ्यासात् परिशुद्धसंविद्रूपैकतत्त्वाव्यभिचारात् अनैक्यस्यापारमार्थिकत्वात् उपशान्तविकारग्रन्थेरैक्यात्मावगमो मोक्षः, यत् श्रुतिः—

'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।' इति
'........ततः सर्गो बुद्बुदत्वेनाभिव्यज्यते ।' इति च ।

ब्रह्मवादिनाम् 'आनन्दरूपता मोक्षः' तन्मते हि संसारदशायामविद्यावरणवशेन अनुभूयमानस्य आत्मनः

'आत्मा श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।'

इत्यादिश्रुतेः तत्त्वज्ञानाभ्यासादविद्यावरणापगमे निरवधिकनिरतिशयस्वप्रकाशनैसर्गिकानन्दसुन्दरतया संवेदनं मोक्षः । यत् श्रुतिः

'विज्ञानमानन्दं ब्रह्म ।' इति ।

'विशुद्धचित्तमात्रं मोक्षः' तन्मते हि स्वभावतः प्रभास्वरस्वरूपस्य चित्तसंतानस्यानाद्यविद्याबलात् रागादिभिरागन्तुकैर्मलैरावृतत्वेऽपि नैरात्म्यादिभावनाभ्यासात् तत्तदागन्तुकमलप्रहाणेन आश्रयपरावृत्तिबलादविनश्वरज्योतीरूपस्वस्वरूपसाक्षात्कारो

परब्रह्म का अपना स्वभाव होने के कारण क्रमविचित्रता से उस प्रकार भावना करने से विश्वरूप में अनेकात्मक होते हुए भी "ब्रह्म एक अद्वितीय ही है" इत्यादि श्रुति से प्राप्त तत्त्वज्ञान के अभ्यास से परिशुद्ध संविद्रूप एक तत्त्व का व्यभिचार न होने के कारण अनैक्य के अपारमार्थिक होने से विकारग्रन्थि के शान्त होने पर साधक को ऐक्यात्मता का ज्ञान होना मोक्ष है । जैसी की श्रुति है—

"इसका एक पाद समस्त संसार है । इसका तीन पाद आकाश में अमृत है ।" तथा

"इसके बाद यह सृष्टि उससे बुलबुले के समान अभिव्यक्त होती है ॥"

ब्रह्मवादियों के मत में आन्दरूपता ही मोक्ष है । उनके मत में = संसारदशा में अविद्यारूपी आवरण के कारण अनुभव करने वाली आत्मा का

"आत्मा का (दर्शन) श्रवण मनन और निदिध्यासन करना चाहिये ॥"

इत्यादि श्रुति के द्वारा तत्वज्ञान के अभ्यास से अविद्या का आवरण हट जाने पर निस्सीम निरतिशय स्वप्रकाश स्वाभाविक आनन्दसुन्दर के रूप में संवेदना ही मोक्ष है । जैसी कि श्रुति है—

"ब्रह्म विज्ञान और आनन्द स्वरूप है ॥"

विज्ञानवादी बौद्धों के मत में 'विशुद्ध चित्तमात्र मोक्ष है । उनके मत में स्वभावतः प्रकाशमान रूप वाले चित्तसन्तान के, अनादि अविद्या के बल से राग

मोक्षः, यदाहुः—

'प्रभास्वरमिदं चित्तं प्रकृत्यागन्तवो मलाः ।
तेषामपाये सर्वार्थं तज्ज्योतिरविनश्वरम् ॥' इति ।

वैभाषिकाणां 'दीपवत् संततिक्षयो मोक्षः' । तन्मते हि क्लेशकर्मादि-हेतुसमुत्थं तत्फलरूपं रूपादिस्कन्धपञ्चकम्, इति तदुभयात्मायं संसारः, यदाहुः—

'हेतुफले संसारः ।'

इति मोक्षः; पुनर्दीपस्य यथा स्नेहादिकारणक्षयात् पुनरुत्पादायोगात् निरोधः, तथैव नैरात्म्यादिभावनाभ्यासात् क्लेशकर्मादिप्रहाणेन रूपादीनां पञ्चानामपि स्कन्धानाम् इति, यदाहुः—

'दीपो यथा निर्वृतिमभ्युपेतो
नैवावनिं गच्छति नान्तरिक्षम् ।
देशं न कञ्चिद्विदिशं न काञ्चित्
स्नेहक्षयात्केवलमेति शान्तिम् ॥
योगी तथा निर्वृतिमभ्युपेतो
नैवावनिं गच्छति नान्तरिक्षम् ।

आदि आगन्तुक मलों के द्वारा, आवृत होने पर भी नैरात्म्य आदि भावना के अभ्यास से तत्तद् आगन्तुक मलों के त्याग से आश्रय की परावृत्ति के बल से अविनश्वर ज्योति रूप अपने स्वरूप का साक्षात्कार ही मोक्ष है । जैसे कि कहते हैं—

"यह चित्त प्रकाशशील है । मल स्वभाव से आगन्तुक हैं । उनका नाश होने पर समस्त प्रयोजन सिद्ध हो जाता है । वह अविनश्वर ज्योति है"

वैभषिकों के मत में दीप के समान प्रवाह का क्षय ही मोक्ष है । उनके मत में क्लेश कर्म आदि कारणों से उत्पन्न रूप आदि पाँच स्कन्ध उनके फलस्वरूप हैं । दोनों ही यह संसार है । जैसा कि कहते हैं—

"हेतु और फल संसार है ।"

और मोक्ष—जैसे स्नेह आदि कारणों के नाश से पुनः उत्पन्न न होने के कारण दीपक का निरोध हो जाता है । उसी प्रकार नैरात्म्य आदि भावना के अभ्यास से क्लेश कर्म आदि के त्याग के द्वारा रूप आदि पाँचों स्कन्धों का ((निरोध हो जाता है) । जैसा कि कहते हैं—

'जिस प्रकार निर्वाण को प्राप्त दीपक न पृथ्वी में जाता है, न अन्तरिक्ष में, न किसी देश में और न किसी विदिशा (= विशिष्ट दिशा) में । स्नेह के क्षय से (वह) केवल शान्त हो जाता है ।'

देशं न कञ्चिद्विदिशं न कांचित्
क्लेशक्षयात्केवलमेति शान्तिम् ॥'

इति । प्रलयाकलानां 'सवेद्यापवेद्यात्मेति' विशेषणोपादाने च अयमभिप्रायः— अत्राद्ये पक्षद्वये ब्रह्मण आनन्दमयत्वात् स्वात्मपरामर्शकतया सवेद्यप्रलयाकलप्रायत्वम्, इतरत्र पुनरेकस्य नित्यस्य कस्यचिद्वेदकस्य अनभ्युपगमात् अपवेद्यप्रलयाकलप्रायत्वम्, पक्षचतुष्टयस्य अस्य पक्षान्तरोपलक्षणत्वात् अक्षपादमतादावात्मनः सर्वगुणोच्छेदात्मनि अपवर्गेऽपि अपवेद्यप्रलयाकलप्रायत्वमेवावसेयम्, प्रलयाकलानां च मलद्वयावशेषात् संसारकारणस्याप्रक्षयात् संसारित्वमेव, इति— एतत्प्रायस्य मोक्षस्यापि हेयत्वमुक्तम्, एवं च व्यर्थ एव तैस्तत्तत्तत्त्वप्रलयात् स्वारसिक्यामपि प्रलयाकलतायां यत्नः कृतः इति भावः, अत एव 'स्वसङ्कल्पेन भावितः' इत्यनेन च अस्य पक्षचतुष्टयस्य काल्पनिकत्वात् अवास्तवत्वं प्रकाशितम् ॥ २९-३० ॥

ननु इह 'बन्धप्रक्षयो नाम मोक्षः' स च

......................अन्धात्तैमिरिको वरः ।'

इतिन्यायेन त्रिमलबद्धं सकलमपेक्ष्य द्विमलबद्धस्य प्रलयाकलस्य वृत्तः—इति किमिति नामास्य तत्प्रायस्यापि मोक्षस्य एकान्ततो हेयत्वम् ?—इत्याशङ्क्याह—

"उसी प्रकार निर्वाण को प्राप्त योगी न पृथ्वी में जाता है, न अन्तरिक्ष में, न किसी देश में न किसी दिशा में । क्लेशों का क्षय होने से (वह) केवल शान्त हो जाता है ।"

प्रलयाकलों का 'सवेद्य अपवेद्य रूप' विशेषण देने में यह अभिप्राय है—प्रथम दो पक्षों में ब्रह्म आनन्दमय होने से आत्मा के परामर्शक के रूप में सवेद्यप्रलयाकलप्राय है । अन्यत्र पुनः एक नित्य किसी वेदक के स्वीकार न करने से (वह) अपवेद्यप्रलयाकलप्राय है । चूँकि यह चार पक्ष दूसरे पक्षों का भी उपलक्षण है इस कारण न्याय आदि मतों में आत्मा का सर्वगुणोच्छेदरूप अपवर्ग होने पर भी अपवेद्य प्रलयाकलप्रायता ही माननी चाहिये । और प्रलयाकलों के दो मलों के अवशिष्ट होने के कारण संसारकारण का क्षय न होने से संसारित्व रहता ही है । इसलिये इस प्रकार का मोक्ष भी हेय कहा गया है । इस प्रकार उन लोगो ने भिन्न-भिन्न तत्त्वों के प्रलय के कारण स्वाभाविक प्रलयाकलता में व्यर्थ ही प्रयास किया—यह भाव है । इसलिये 'अपने सङ्कल्प से भावित' इस (वाक्य) के द्वारा काल्पनिक होने से इस चार पक्ष की अवास्तविकता प्रकाशित की गई ॥२९-३०॥

प्रश्न—'बन्धन का नाश ही मोक्ष है ।' और वह

..............अन्धे की अपेक्षा रात्र्यन्ध (= रतौंधी रोग वाला) श्रेष्ठ है ।'

इस न्याय से तीन मलों से बद्ध सकल की अपेक्षा दो मलों से बद्ध,

तं प्राप्यापि चिरं कालं तद्भोगाभोगभुक्ततः ।
तत्तत्त्वप्रलयान्ते तु तदूर्ध्वां सृष्टिमागतः ॥ ३१ ॥
मन्त्रत्वमेति संबोधादनन्तेशेन कल्पितात् ।

वैष्णवादिः खलु अयं जनः, तं—प्रलयाकलप्रायं मोक्षं चिरं कालमासाद्यापि प्रलयाकलसंबन्धिमोहादिरूपभोगाभोगभुक् सन्, समनन्तरं तस्य प्रलयाकलभोगभूमेर्मायादेस्तत्त्वस्य प्रलयान्ते, पुनः सृष्टिप्रारम्भे

'................प्रबुध्यन्ते मन्त्रत्वाय भवाय।'

इत्यादिनीत्या आयातशक्तिपातत्वे सति अनन्तेशेन कृतात् ज्ञानक्रियोत्तेजनलक्षणात् संबोधात्, तदूर्ध्वां—मायोपरिवर्तिनीं शुद्धां सृष्टिं प्राप्तः सन् मन्त्रत्वमेति, अन्यथा पुनः संसारित्वम्—इति सिद्धम्, अत एव प्राप्तायामपि वैष्णवादिदर्शनान्तरोक्तायां मुक्तौ संसारस्य प्रक्षयो न जायते, इति तत्र हेयत्वमुक्तम् ॥ ३१ ॥

ननु समानेऽपि प्रलयाकलत्वे केषाञ्चिन्मन्त्रत्वं केषाञ्चित् संसारित्वम्, इत्यत्र किं निमित्तम् ?—इत्याशङ्क्याह—

प्रलयाकल को (मोक्ष) मिल गया फिर इस तत्प्रायमोक्ष को सर्वथा हेय क्यों कहा गया—यह शङ्का कर कहते हैं—

उसको प्राप्त कर बहुत समय तक उस भोग के विस्तार को भोगने से उस तत्त्व के प्रलय के अन्त में उससे ऊपर वाली सृष्टि में आया हुआ (वह जीव) अनन्त के द्वारा कल्पित संबोध के कारण मन्त्रदशा को प्राप्त होता है ॥ ३१-३२- ॥

ये वैष्णव आदि लोग उस = प्रलयाकलप्राय मोक्ष को बहुत समय तक प्राप्त करके भी प्रलयाकलसम्बन्धी मोह आदि रूप भोग के विस्तार को भोगते हुए बाद में उस प्रलयाकलों की भोगभूमि माया आदि तत्त्व के प्रलय के अन्त में पुनः सृष्टि का प्रारम्भ होने पर

'.....................मन्त्रत्व एवं जन्म के लिये प्रबुद्ध होते है ।'

इत्यादि नीति के द्वारा शक्तिपात का आयात होने पर अनन्तेश्वर के द्वारा किये गये ज्ञानक्रिया की उत्तेजना लक्षण वाले संबोध के कारण उसके ऊपर वाली = माया के ऊपर रहने वाली शुद्ध सृष्टि को प्राप्त होकर मन्त्ररूपता को प्राप्त करते हैं अन्यथा पुनः संसारी बनते हैं—यह सिद्ध है इसलिये वैष्णव आदि दूसरे दर्शनों में वर्णित मुक्ति के प्राप्त होने पर भी (उनके लिये) संसार का नाश नहीं होता इसलिये उनको हेय कहा गया है ॥ ३१ ॥

प्रश्न—प्रलयाकलत्व के समान होने पर भी कुछ लोगों को मन्त्रत्व और कुछ को संसारित्व प्राप्त होता है—इसमें क्या कारण है ? यह शङ्का कर कहते हैं—

एतच्चाग्रे तनिष्याम इत्यास्तां तावदत्र तत् ॥ ३२ ॥

अग्र इति—नवमाह्निकादौ, यद्वक्ष्यति—

'एतत्कार्ममलं प्रोक्तं येन साकं लयाकलाः ।
स्युर्गुहागहनान्तःस्थाः सुप्ता इव सरीसृपाः ॥
ततः प्रबुद्धसंस्कारास्ते यथोचितभागिनः ।
ब्रह्मादिस्थावरान्तेऽस्मिन्संसरन्ति पुनः पुनः ॥
ये पुनः कर्मसंस्कारहान्यै प्रारब्धभावनाः ।
भावनापरिनिष्पत्तिमप्राप्य प्रलयं गताः ॥
महान्तं ते तथान्तःस्थभावनापाकसौष्ठवात् ।
मन्त्रत्वं प्रतिपद्यन्ते चित्रं चित्राच्च कर्मतः ॥' इति ।

'इत्यास्ताम्' इति, प्रकृते तर्कतत्त्वेऽस्यानुपयोगात् ॥ ३२ ॥

ननु यदि नाम दर्शनान्तरोक्तया मुक्त्या संसारस्य प्रक्षयो न जायते, तत् कस्मादयं वैष्णवादिर्जनस्तत्र अनुरज्यते ?—इत्याशङ्क्याह—

**तेनाज्ञजनताक्लृप्तप्रवादैर्यो विडम्बितः ।
असद्गुरौ रूढचित् स मायापाशेन रञ्जितः ॥ ३३ ॥**

इसका (हम) आगे विस्तार करेंगे इसलिये यही पर विराम करिये ॥ -३२ ॥

आगे = नवम आह्निक आदि में । जैसा कि कहेंगें—

यह कार्ममल का कथन हुआ जिसके साथ प्रलयाकल जीव गुफा के अन्धकार में स्थित सरीसृप के समान सोये रहते है । बाद में संस्कार के प्रबुद्ध होने पर अपने औचित्य के भागी (बनकर) वे ब्रह्मा से लेकर स्थावरपर्यन्त इस संसार में बार-बार संसरण करते हैं । और जो लोग कर्मसंस्कार की हानि के लिये भावना का प्रारम्भ कर भावना के परिपाक को न प्राप्त कर प्रलय को प्राप्त हो गये वे अन्तःकरण में स्थित भावना के परिपाक की सुष्ठुता वाले विचित्र कर्म के कारण महान् मन्त्रत्व को प्राप्त होते हैं ।''

''विराम कीजिये'' क्योंकि प्रस्तुत तर्क तत्त्व में इसका कोई उपयोग नहीं हैं ॥ ३२ ॥

प्रश्न—यदि दूसरे दर्शनों में उक्त मुक्ति से संसार का नाश नहीं होता तो वैष्णव आदि लोग उसमें अनुराग क्यों करते हैं ?—यह शङ्का कर कहते हैं—

इस कारण मूर्ख जनता के द्वारा कल्पित प्रवादों से जो ठग लिया गया है और असद् गुरु में श्रद्धा रखता है वह मायापाश से रञ्जित है ॥ ३३॥

यः खलु वैष्णवादिर्जनोऽज्ञजनतया—कपिलादिना उपदेष्टृसमूहेन, कल्पितैः—प्रकृतिपुरुषविवेकादिभिः प्रवादैः मोहितः, स यतस्तेन सकललोकप्रसिद्धेन भगवता परमेश्वरेण, मायापाशेन—वामाख्यया शक्त्या, तत्रैव गाढानुरक्तीकृतः, अत एवासद्गुरौ तत्त्वोपदेष्टरि आचार्यविशेषे रूढचित्—आश्वस्तो, न तु जिज्ञासा-मात्रवान्, सद्गुरौ पुनराश्वस्तस्य साक्षादेव मोक्षो भवेदित्यर्थसिद्धो व्यतिरेकः, अत एव चानेन तर्कतत्त्वानन्तर्येण अनुजोद्देशोद्दिष्टं तदनुषक्तमेव गुरुसतत्त्वमपि प्रतिपादयितुमुपक्रमः कृतः ॥ ३३ ॥

ननु यद्येवं तर्हि अस्य वैष्णवादेर्वामाधिष्ठितत्त्वात् सद्गुरावेवाश्वासो न जायते, इति का कथा साक्षान्मोक्षावाप्तौ ?—इत्याशङ्क्याह—

सोऽपि सत्तर्कयोगेन नीयते सद्गुरुं प्रति ।
सत्तर्कः शुद्धविद्यैव सा चेच्छा परमेशितुः ॥ ३४ ॥

सोऽपीति—असद्गुरौ रूढचित् वैष्णवादिः, ननु युक्तियुक्ते वस्तुनि तर्केण प्ररोहः क्रियते शिवशक्त्या च सद्गुरुप्राप्तिः, इति सर्वत्रैवोक्तम्—

'यत्र रूढिः प्रजायेत युक्तियुक्ते विनिश्चयात् ।
शुद्धविद्याप्रसादोऽसावित्याह भगवाञ्छिवः ॥'

जो वैष्णव आदि लोग मूर्ख लोगों के द्वारा = कपिल आदि उपदेष्टा लोगों के द्वारा, कल्पित = प्रकृतिपुरुषभेद आदि प्रवादों के द्वारा मोहित हैं वे चूँकि उस = सकललोकप्रसिद्ध भगवान अनन्तनाथ के द्वारा मायापाश से = वामा नामक शक्ति से, उसी में गाढ़रूप से अनुरक्त कर दिये जाते हैं । इसलिये असद्गुरु = तत्त्व के उपदेशक आचार्यविशेष में, रूढ़चित् = विश्वास रखने वाला न कि केवल जिज्ञासा वाला । सदगुरु में विश्वास रखने वाले का साक्षात् ही मोक्ष होता है—यह व्यतिरेक अर्थात् सिद्ध है । इसलिये इस तर्कतत्त्व के आनन्तर्य से अनुजोद्देशोद्दिष उससे सम्बद्ध गुरुतत्व का भी प्रतिपादन करने के लिये भूमिका रच दी गई ॥ ३३ ॥

प्रश्न—यदि ऐसा है तो वामा के द्वारा अधिष्ठित होने के कारण इस वैष्णव आदि का सद्गुरु में विश्वास ही नहीं होगा फिर साक्षात् की प्राप्ति की क्या बात ? यह शङ्का कर कहते हैं—

वह भी सत्तर्क के योग से सद्गुरु के पास ले जाया जाता है । शुद्ध विद्या ही सत्तर्क है और वह परमेश्वर की इच्छा है ॥ ३४ ॥

वह भी = असदगुरु में दृढ़ विश्वास वाला वैष्णव आदि । युक्तियुक्त वस्तु में तर्क के द्वारा आरोहण किया जाता है और शिव की शक्ति के द्वारा सद्गुरु की प्राप्ति होती है—यह सर्वत्र कहा गया है—

'जिस युक्तियुक्त में निश्चय होने के कारण दृढ़विश्वास उत्पन्न होता है तो यह शुद्धिविद्या का प्रसाद है—ऐसा भगवान् शिव कहते हैं ।'

इति, सेति शुद्धविद्या, इच्छेति सद्गुरुप्राप्तिपर्यवसायिनी अनुग्रहरूपा ॥ ३४ ॥

न च एतत् स्वोपज्ञमेवोक्तम्, इत्याह—

श्रीपूर्वशास्त्रे तेनोक्तं स यियायुः शिवेच्छया ।
भुक्तिमुक्तिप्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति ॥ ३५ ॥

सः—रुद्रशक्तिसमाविष्टः, स्वस्वरूपं प्राप्तुमिच्छुः, ज्येष्ठाख्यशक्तिरूपया शिवेच्छया सद्गुरुं प्रति नीयते—सद्गुर्वाभिमुख्येन प्रवर्त्यते, येनास्य भुक्तिमुक्ती सिद्ध्यतः, तेन सत्तर्कशिवशक्त्योरभेदात् यत् सत्तर्केण सद्गुर्वाभिमुख्येन प्रवर्तनं तत् शिवशक्त्यैव, इति सिद्धम् ॥ ३५ ॥

ननु 'सर्वस्य शिवेच्छयैव, असद्गुरौ सद्गुरौ वा आभिमुख्यमभिजायते' इत्युक्तं, तत् सद्गुरावेव तदस्तु, किं क्रमेण ?—इत्याशङ्क्याह—

शक्तिपातस्तु तत्रैष क्रमिकः संप्रवर्तते ।
स्थित्वा योऽसद्गुरौ शास्त्रान्तरे वा सत्पथं श्रितः ॥ ३६ ॥

शास्त्रान्तरे इति—अर्थादसत्पथे वैष्णवाद्ये, सत्पथं शैवगुरुशास्त्रलक्षणम्,

---

वह = शुद्धविद्या । इच्छा—सद्गुरु की प्राप्ति में पर्यवसित होने वाली अनुग्रहरूपा ॥ ३४ ॥

इसे (हमने) अपनी बुद्धि से ही नहीं कहा है—यह कहते हैं—

श्री पूर्वशास्त्र में उन्होंने (= ईश्वर ने) कहा है कि (गुरु के पास) गमन की इच्छा वाला वह शिव की इच्छा से भुक्ति एवं मुक्ति प्राप्त करने के लिये सद्गुरु के पास ले जाया जाता है ॥ ३५ ॥

वह = रुद्रशक्ति से समाविष्ट अपने स्वरूप के प्राप्त करने की इच्छा वाला, ज्येष्ठा शक्तिरूपा शिव की इच्छा से, सदगुरु के पास ले जाया जाता है = सदगुरु की ओर प्रवृत्त कराया जाता है जिससे इसको भोग और मोक्ष प्राप्त हो जाय । इस प्रकार सत्तर्क और शिवशक्ति में अभेद होने से सर्तक के द्वारा जो सद्गुरु की ओर प्रवर्त्तन होता है वह शिव की शक्ति के द्वारा ही होता है—यह सिद्ध है ॥ ३५ ॥

प्रश्न—सद्गुरु या असदगुरु के प्रति सबकी अभिमुखता शिव की इच्छा से ही होती है—यह कहा गया तो सद्गुरु के प्रति ही वह क्रम से क्यों ?—यह शङ्का कर कहते है—

जो असद् गुरु या दूसरे (असत्) शास्त्र का अनुसरण कर सत्पथ पर आया है उस पर यह शक्तिपात क्रम से किया जाता है ॥ ३६ ॥

दूसरे शास्त्रों में अर्थात् असदमार्ग वाले वैष्णव आदि (शास्त्रों में) । सत्पथ =

तत्रेति—असद्गुर्वाद्याश्रयानन्तरं सद्गुर्वाद्याश्रिते ॥ ३६ ॥

ननु अयं लोकश्चेत् सद्रूपमसद्रूपं वा गुरुं शास्त्रं च शक्तिपातवशादाश्रयेत् तदस्तु, को नाम दोषः, तयोरेव पुनरसत्त्वे सत्त्वे वा किं निमित्तम् ?—इत्याशङ्क्याह—

गुरुशास्त्रगते सत्त्वेऽसत्त्वे चात्र विभेदकम् ।
शक्तिपातस्य वैचित्र्यं पुरस्तात्प्रविविंच्यते ॥ ३७ ॥

अत्रेति—समनन्तरोक्ते, पुरास्तादिति—शक्तिपाताह्निकादौ, विभेदकं—विशेषे हेतुः, एवं वामाख्यया मायाशक्त्या अधिष्ठिता दर्शनान्तरीया गुर्वाद्याः, ज्येष्ठाशत्तया पुनरास्माकाः, तेन तच्छक्त्यैवाधिष्ठितोऽयं लोकः तत्रश्वस्तः स्यात् ॥३७॥

न च एतदप्रमाणकम्, इत्याह—

उक्तं स्वच्छन्दशास्त्रे तत् वैष्णवाद्यान्प्रवादिनः ।
सर्वान्भ्रमयते माया सामोक्षे मोक्षेलिप्सया ॥ ३८ ॥

भ्रमयते इति अतस्मिंस्तद्ग्रहात्, तदाह 'अमोक्षे मोक्षलिप्सया' इति, अत्र चार्थद्वारेण पाठे अयमाशयो—यत् तत्र बहुधोक्तमिति, तदुक्तं—

शैव गुरु (शिव) शास्त्र वाला । वहाँ = असद्गुरु आदि का आश्रय लेने के बाद सद्गुरु आदि के आश्रित मे ॥ ३६ ॥

प्रश्न—यह लोक यदि शक्तिपातवश सद्रूप या असद्रूप गुरु या शास्त्र का आश्रयण करता है तो करे क्या दोष है ? उन्हीं दोनों की सत्यता और असत्यता का क्या कारण है ?—यह शङ्का कर कहते हैं—

गुरु एवं शास्त्र के इस सत्त्व और असत्त्व में शक्तिपात का वैचित्र्य ही भेदक है । (और यह वैचित्र्य) आगे बतलाया जायगा ॥ ३७ ॥

इसमें = पहले कहे गये । आगे = शक्तिपात आह्निक आदि में, विभेदक = विशेष में कारण । इस प्रकार दूसरे दर्शनों के गुरु आदि वामा नामक मायाशक्ति से अधिष्ठित है और हमारे (गुरु) ज्येष्ठाशक्ति के द्वारा । इसलिए उस शक्ति से अधिष्ठित यह लोक उसमें आश्वस्त है ॥ ३७ ॥

यह (कथन) प्रमाणरहित नहीं है—यह कहते हैं—

स्वच्छन्दतन्त्र में यह कहा गया है । वह माया अमोक्ष में मोक्ष की लिप्सा से वैष्णव आदि सभी प्रवादियों को भ्रमित करती है ॥ ३८ ॥

भ्रम में डालती है—जो जैसा नहीं है उसमें वैसा ज्ञान करने से । 'अमोक्ष में मोक्ष की लाभेच्छा से'—यहाँ अर्थ के द्वारा पाठ होने में यह आशय है कि वहाँ अनेक प्रकार से कहा गया है—वही कहा गया है—

'अतः परं भवेन्माया सर्वजन्तुविमोहिनी ।
निर्वैरपरिपन्थिन्या यया भ्रमितबुद्धयः ॥
इदं तत्त्वमिदं नेति विवदन्तीह वादिनः ।
सत्पथं तु परित्यज्य नयति द्रुतमुत्पथम् ॥
गुरुदेवाग्निशास्त्रस्य ये न भक्ता नराधमाः ।
असद्युक्तिविचारज्ञाः शुष्कतर्कावलम्बिनः ॥
भ्रमयत्येव तान्माया ह्यमोक्षे मोक्षलिप्सया ।' इति।

तथा

'सांख्यवेदपुराणज्ञा अन्यशास्त्रविनिश्चये ।
न तांल्लङ्घयितुं शक्ता यदान्ये मोक्षवादिनः ॥
क्लिश्यन्ते मायया भ्रान्ता अमोक्षे मोक्षलिप्सया ।' इति ॥ ३८ ॥

ननु यदि वैष्णवादिरयं जनो मायया भ्रमितः तत् तस्य तत्रैव संस्कारप्ररोहात् असन्मार्गादवरोहो न स्यात्, इत्यस्य कदाचिदपि सन्मार्गारोहो न भवेत् ?—इत्याशङ्क्याह—

यस्तु रूढोऽपि तत्रोद्यत्परामर्शविशारदः ।
स शुद्धविद्यामाहात्म्याच्छक्तिपातपवित्रितः ॥ ३९ ॥
आरोहत्येव सन्मार्गं प्रत्यूहपरिवर्जितः ।

"इसके बाद सब जन्तुओं को मोह में डालने वाली माया तत्त्व है । निर्वैर की परिपन्थिनी जिसके द्वारा भ्रान्तबुद्धि वाले वादी लोग यह तत्त्व है यह नहीं, इस प्रकार विवाद करते हैं । (यह माया) शीघ्र ही सत्पथ को छोड़ कर असत्पथ पर ले जाती है । जो नराधम गुरु, देवता, अग्नि और शास्त्र के भक्त नहीं हैं, असद् युक्तिविचार को जानने वाले तथा शुष्क तर्क का आश्रय लेते हैं उनको, अमोक्ष में मोक्ष की लिप्सा से, माया भ्रम में डालती है ।" तथा

"सांख्य वेद और पुराण को जानने वाले अन्य मोक्षवादी जब अन्य शास्त्र का निश्चय होने पर उनको लांघने में समर्थ नहीं होते तो अमोक्ष में मोक्ष की लिप्सा के द्वारा माया के द्वारा भ्रान्त वे लोग कष्ट पाते हैं ॥ ३८ ॥

प्रश्न—यदि यह वैष्णव आदि लोग माया के द्वारा भ्रमित हैं तो वहीं पर उनके संस्कार का प्ररोह होने से असन्मार्ग से अवरोह होगा ही नहीं फिर कभी भी सन्मार्ग पर (वे) आरूढ़ नहीं हो सकेगें ? यह शङ्का कर कहते हैं—

जो (व्यक्ति) उस (असत् मार्ग) में चल रहा है किन्तु सत्तर्क में विशारद है वह शुद्धविद्या के माहात्म्य से शक्तिपात के द्वारा पवित्र किया गया विघ्नरहित हो सन्मार्ग पर आरूढ़ होता ही है ॥ ३९-४०- ॥

यः पुनस्तत्र वैष्णवादौ संस्कारदार्ढ्यात् जातप्ररोहोऽपि उद्यन्योऽसौ सत्तर्कात्मा परामर्शः तेन विशारदः—सारेतरविभागकुशलः, अत एव स सत्तर्कात्मशुद्ध-विद्यामाहात्म्यात् ज्येष्ठाशक्त्यधिष्ठानपवित्रीभूतः सन् निर्विघ्नमेव सन्मार्गमारोहति—अस्मद्दर्शननिष्ठो भवेत्, येनास्य साक्षात् मोक्षः स्यात् ॥ ३९ ॥

ननु अस्य परामर्शोदये किं निमित्तम् ?—इत्याशङ्क्याह—

स तावत्कस्यचित्तर्कः स्वत एव प्रवर्तते ॥ ४० ॥
स च सांसिद्धिकः शास्त्रे प्रोक्तः स्वप्रत्ययात्मकः ।

स्वत एव—लोकप्रसिद्धगुरूपदेशादिनिमित्तानपेक्षं, न तु सर्वसर्विकया निर्निमित्तमेव, वस्तुतः पारमेश्वरशक्तिपातादेर्निमित्तान्तरस्यापि संभवात्, अत एव चास्य यौगिकमपि नाम अस्मद्दर्शनेऽभिहितम्, इत्याह 'स च' इत्यादि । स इति—स्वयं प्रवृत्ततर्कः, सांसिद्धिक इति—तर्केण सह संसिद्ध्या जन्मनागत इत्यर्थः । उक्तं च

'गुरुशास्त्रानपेक्षं च यस्यैतत्स्वयमुद्भवेत् ।
स सांसिद्धिक इत्युक्तस्तत्त्वनिष्ठो महामुनिः ॥' इति ।

जो इसमें = वैष्णव आदि में, संस्कार की दृढ़ता के कारण प्ररोह उत्पन्न होने पर भी ऊपर उठने वाला यह सत्तर्कात्मा परामर्श, उससे विशारद = तत्त्व से अतिरिक्त को अलग करने में कुशल, इसलिये वह सत्तर्करूप शुद्धविद्या की महिमा से, ज्येष्ठाशक्ति के अधिष्ठान से पवित्र होता हुआ निर्विघ्न हो सन्मार्ग पर आरूढ़ होता है = हमारे दर्शन में निष्ठा रखता है, जिससे इसको साक्षात् मोक्ष हो जाता है ॥ ३९ ॥

प्रश्न—इसके परामर्शउदय में क्या कारण है—यह शङ्का कर कहते हैं—

वह सत्तर्क किसी (भाग्यशाली) को स्वयं ही उत्पन्न हो जाता है । और वह (व्यक्ति) शास्त्र के अनुसार स्वयं ज्ञान वाला सांसिद्धिक (योगी) कहा गया है ॥ -४०-४१- ॥

स्वत एव = लोकप्रसिद्ध गुरूपदेश आदि कारणों की अपेक्षा न रखते हुए न कि पूर्णरूपेण विना कारण के । क्योंकि वस्तुतः पारमेश्वर शक्तिपात आदि दूसरे कारण भी सम्भव हैं । इसीलिए हमारे दर्शन में इसका यौगिक नाम भी कहा गया है—यह कहते हैं—स च इत्यादि । स = स्वयं तर्क में प्रवृत्त होने वाला । सांसिद्ध = तर्क साथ, संसिद्धि से = जन्म से आया हुआ—यह अर्थ है । कहा भी गया है—

"जिसको गुरु और शास्त्र के बिना स्वयं यह (सत्तर्क) उत्पन्न होता है वह तत्त्वनिष्ठ महामुनि सांसिद्धिक कहा गया है ।"

अत एव स्व आत्मीयो, न तु गुर्वादिपरापेक्षः, इदमेवेति सुनिश्चितं ज्ञानमात्मा स्वभावो यस्य स तथोक्तः ॥ ४० ॥

ननु अन्यत्र परतत्त्वाधिगमे गुर्वाद्यन्यदपि कारणतयोक्तम्, इह पुनः कथं स्वत एव इति 'एकमेव'—इत्याशङ्क्याह—

किरणायां यदप्युक्तं गुरुतः शास्त्रः स्वतः ॥ ४१ ॥
तत्रोत्तरोत्तरं मुख्यं पूर्वपूर्व उपायकः ।

यदपि किरणाख्यायां संहितायां मायाधर्मैः शून्यं परं तत्त्वं ज्ञातुम्—

'शून्यमेवंविधं ज्ञेयं गुरुतः शास्त्रः स्वतः ।'

इत्यादिना कारणत्रयमुक्तं, तत्र उत्तरोत्तरं मुख्यं विवक्षितं, यथा—गुरुतः शास्त्रं, ततोऽपि स्वपरामर्शः, यतः पूर्वः पूर्वो यथा गुरुः शास्त्रे उपायः, तदपि स्वपरामर्शे । एवम्

'उपादायापि ये हेयास्तानुपायान्प्रचक्षते ।'

इत्याद्युक्तयुक्त्या गुरुशास्त्रयोरुपायत्वादमुख्यत्वम्, इति स्वपरामर्शस्यैव

इसलिए स्व = आत्मीय, न कि गुरु आदि दूसरे की अपेक्षा वाला, 'यही है'—ऐसा सुनिश्चित ज्ञान है आत्मा = स्वभाव जिसका वह उस प्रकार का कहा गया है ॥ ४० ॥

प्रश्न—अन्यत्र परतत्त्व की प्राप्ति में गुरु आदि दूसरे (तत्त्व) भी कारण के रूप में कहे गये है—यहाँ कैसे स्वतः एव 'एकमेव' ऐसा (कहा जाता है) ? यह शङ्का कर कहते हैं—

किरणागम में जो गुरु से, शास्त्र से और स्वतः (ये तीन उपाय बतलाये गये) उनमें उत्तरोत्तर उत्कृष्ट हैं और पूर्व-पूर्व (उनका) उपाय हैं ॥ -४१-४२- ॥

किरण नामक संहिता में माया के धर्मों से शून्य परमतत्त्व को जानने के लिये—

"इस प्रकार के शून्य को गुरु से शास्त्र से और स्वतः जानना चाहिये ।"

इत्यादि के द्वारा जो तीन कारण कहे गये हैं उनमें उत्तरोत्तर मुख्य विवक्षित हैं। जैसे—गुरु से शास्त्र और उसकी अपेक्षा अपना परामर्श (मुख्य है) । क्योंकि पहला-पहला उपाय है । जैसे शास्त्र के विषय में गुरु और वह (= शास्त्र) भी अपने परामर्श के विषय में । इस प्रकार—

"ग्रहण करके भी जो हेय हैं उन्हें उपाय कहते हैं ।"

इत्यादि उक्त युक्ति से गुरु और शास्त्र के उपाय होने से वे दोनों अमुख्य हैं

प्राधान्यं, येन अत्रास्यैव उपादानम् ॥ ४१ ॥

तेन यस्य स्वत एव परामर्श उद्भवेत् स एव सर्वत्र अधिकृतः, इत्याह—

यस्य स्वतोऽयं सत्तर्कः सर्वत्रैवाधिकारवान् ॥ ४२ ॥
अभिषिक्तः स्वसंवित्तिदेवीभिर्दीक्षितश्च सः ।

यस्य स्वतो—गुर्वादिनैरपेक्ष्येण, अयं समनन्तरोक्तः सत्तर्क उदेति, स सर्वत्रैव—योगज्ञानादावधिकारवान्भवेत् ।

ननु

'न चाधिकारिता दीक्षां विना योगेऽस्ति शाङ्करे ।'

इत्याद्युक्त्या दीक्षादिकमपहाय कथमस्य सर्वत्रैवाधिकारः ?—इत्याशङ्क्योक्तं—'स्वसंवित्तिदेवीभिर्दीक्षितोऽभिषिक्तश्चेति—स्वा आत्मीया याः संवित्तय इन्द्रियवृत्तयः ता एव

'बहिर्मुखस्य मन्त्रस्य वृत्तयो या प्रकीर्तिताः ।
ता एवान्तर्मुखस्यास्य शक्तयः परिकीर्तिताः ॥'

इत्याद्युक्त्या प्रमात्रैकात्म्यमभिद्योतयन्त्यो देव्यः, ताभिर्ज्ञानक्रियोत्तेजनेन सर्वत्रैव

इस प्रकार स्वपरामर्श की ही प्रधानता है जिससे यहाँ इसी का ग्रहण किया गया ॥ ४१ ॥

इसलिये जिसको स्वयं परामर्श उत्पन्न हो जाता है वही सर्वत्र अधिकृत है—यह कहते हैं—

जिसको यह सत्तर्क स्वयं (उदित हुआ है) वह अपनी संवित् देवियों के द्वारा दीक्षित एवं अभिषिक्त होकर सर्वत्र अधिकारी बन जाता है ॥ -४२-४३- ॥

जिसको स्वयं = गुरु आदि से निरपेक्ष, यह = पूर्वोक्त, सत्तर्क उदित होता है वह सर्वत्र ही = योग ज्ञान आदि में अधिकारवान् होता है ॥ ४२ ॥

प्रश्न—

"शाङ्कर योग में विना दीक्षा के अधिकार नहीं होता ।"

इत्यादि उक्ति के द्वारा दीक्षा आदि को छोड़कर इसका सर्वत्र कैसे अधिकार हो जाता है ?—यह शङ्का कर कहा गया—अपनी सवित्ति देवियों के द्वारा दीक्षित और अभिषिक्त । स्वा = आत्मीय जो संवित्तियाँ = इन्द्रियवृत्तियाँ, वे ही

"जो बहिर्मुख मन्त्र की वृत्तियाँ कही गई हैं वें ही इस अन्तर्मुख की शक्तियाँ कही गई हैं ।"

स्वातन्त्र्यमापादितः, इत्यर्थः ॥ ४२ ॥

अतश्च स एव परमुत्कृष्ट इत्याह—

स एव सर्वाचार्याणां मध्ये मुख्यः प्रकीर्तितः॥ ४३ ॥
तत्संनिधानेनान्येषु कल्पितेष्वधिकारिता ॥

सर्वाचार्याणां वक्ष्यमाणानामकल्पितकल्पकादीनां मुख्यत्वादेव च तत्संनिधावन्येषां न परानुग्रहादावधिकारः, इत्युक्तं 'तत्संनिधाने न' इत्यादि, यद्वक्ष्यति—

'यथा भेदेनादिसिद्धाच्छिवान्मुक्तशिवा ह्यधः ।
तथा सांसिद्धिकज्ञानादाहृतज्ञानिनोऽधमाः ॥
तत्संनिधौ नाधिकारस्तेषां मुक्तशिवात्मवत् ।
किन्तु तूष्णीं स्थितिर्यद्वा कृत्यं तदनुवर्तनम् ॥' इति ॥ ४३ ॥

ननु गुरुतः शास्त्राधिगमः—इत्यत्र सर्वेषामविवादः, तद्यस्य गुरुरेव नास्ति तस्य शास्त्राधिगमे का वार्ता ? इत्ययं स्वयं प्रवृत्ततर्कोऽपि दीक्षाद्यारभमाणः

'शास्त्रहीने न सिद्धिः स्याद्दीक्षादौ वीरवन्दिते ।'

इत्याद्युक्त्या कां नाम सिद्धिमासादयेत् ?—इत्याशङ्क्याह—

इत्यादि उक्ति के द्वारा प्रमाता के साथ एकात्मता को द्योतित करने वाली देवियाँ, उनके द्वारा ज्ञान और क्रिया के उत्तेजन से सर्वत्र स्वातन्त्र्य को प्राप्त—यह अर्थ है ॥ ४२ ॥

इसलिये वही परम उत्कृष्ट है—यह कहते हैं—

वही सभी आचार्यों में मुख्य कहा गया है । उसके सामने अन्य कल्पित आचार्य अधिकारी नहीं होते ॥ -४३-४४- ॥

अकल्पित कल्पक आदि आगे कहे जाने वाले सब आचार्यों के मुख्य होने से ही उनके समीप दूसरो को परानुग्रह का अधिकार नहीं है—यह कहा गया—'उसके सन्निधान में नहीं इत्यादि । जैसा कि कहेंगे—

"जिस प्रकार भेददृष्टि से आदिसिद्ध शिव की अपेक्षा मुक्त शिव निम्न कोटि के हैं उसी प्रकार सांसिद्धिक ज्ञानी की अपेक्षा आहृतज्ञानी अधम है । मुक्तशिवों की भाँति उनकी सन्निद्धि में उनका अधिकार नहीं है । किन्तु (या तो) वे चुपचाप बैठे रहें या उनका अनुवर्त्तन करें" ॥ ४३ ॥

प्रश्न—गुरु से शास्त्र का ज्ञान होता है—इस विषय में सब एकमत है । तो जिसके गुरु नही है उसके शास्त्रागम की क्या बात ? तो यह स्वयं तर्क में प्रवृत्त होकर भी दीक्षा आदि को आरम्भ करता हुआ

"हे वीरवन्दिते ! शास्त्रहीन होने पर दीक्षा आदि में सिद्धि नहीं होती ।"

स समस्तं च शास्त्रार्थं सत्तर्कादिव मन्यते ॥ ४४ ॥

मन्यते, इत्यवबुद्धयेते ॥ ४४ ॥

ननु गुर्वादिनैरपेक्ष्येण कथमेतावतैव समस्तशास्त्रावबोधो भवेत्? इत्याशङ्क्याह—

शुद्धविद्या हि तत्रास्ति सत्यं यद्यत्र भासयेत् ।

न च एतद्युक्तिमात्रेणैव सिद्धम्, अपि त्वागमेनापि इत्याह—

सर्वशास्त्रार्थवेत्तृत्वमकस्माच्चास्य जायते ॥ ४५ ॥
इति श्रीपूर्ववाक्ये तद् अकस्मादिति-शब्दतः ।

तत्—सत्तर्कनिमित्तकं समस्तशास्त्रावबोधलक्षणं वस्तु, 'अकस्मादितिशब्दात्' उक्तमिति संबन्धः ॥

ननु 'अकस्मात् इति' शब्दमात्रादेव कथमेतदुक्तं स्यात् ?—इत्याशङ्क्याह—

लोकाप्रसिद्धो यो हेतुः सोऽकस्मादिति कथ्यते॥ ४६ ॥
स चैष परमेशानशुद्धविद्याविजृम्भितम् ।

इत्यादि उक्ति से किस सिद्धि को प्राप्त करेगा ? यह शङ्का कर कहते हैं—

वह समस्त शास्त्र को सत्तर्क से जान लेता है ॥ -४४ ॥

मानता है = जान लेता है ॥ ४४ ॥

प्रश्न—गुरु आदि से निरपेक्ष होकर इतने से ही समस्त शास्त्र का ज्ञान कैसे होगा ? यह शङ्का कर कहते हैं—

जो सत्य का अवभासन न कराये वह शुद्धविद्या नहीं है ॥ ४५- ॥

यह केवल युक्ति से ही सिद्ध नहीं बल्कि आगम से भी (सिद्ध) है—यह कहते हैं—

यह अकस्मात् सब शास्त्रों का वेत्ता हो जाता है—ऐसा श्रीपूर्वशास्त्र में 'अकस्मात्' इस शब्द के द्वारा कहा गया है ॥ -४५-४६- ॥

वह = शुद्धविद्या निमितवाली समस्त शास्त्रों का ज्ञानलक्षण वाली वस्तु । 'अकस्मात्' इस शब्द से 'उक्तम्' का सम्बन्ध है ।

प्रश्न—'अकस्मात्' इस शब्दमात्र से ही यह कैसे कहा गया ?—यह शङ्का कर कहते हैं—

जो हेतु लोक में अप्रसिद्ध होता है वही अकस्मात् कहा जाता है । और वह परमेश्वर की शुद्धविद्या का उल्लास है ॥ -४६-४७- ॥

अकस्मादिति हि निर्निमित्तत्वमुच्यते, न चैतद्युज्यते, तथात्वे हि—नित्यसतत्त्वमतत्त्वं वा स्यात् ॥ ४६ ॥

तदत्र केनचित् हेतुना अवश्यभाव्यं, स च न लोकप्रसिद्धो—गुरूपदेशादेः साक्षाददृष्टत्वात्, तेन पारिशेष्याल्लोकाप्रसिद्धः, स चैष फलानुमेयः पारमेश्वरः शुद्धविद्यासमुल्लासो, यद्वशादेव अस्य गुरुशास्त्रानपेक्षं सर्वविषयं प्रातिभं महाज्ञानमुदियात्, यद्वक्ष्यति—

'मध्यतीव्रात्पुनः सर्वमज्ञानं विनिवर्तते ।
अयमेव यतो याति बन्धमोक्षतथात्मताम् ॥
तत्प्रातिभं महाज्ञानं शास्त्राचार्यानपेक्षि यत् ।' इति ॥

उपाधिभेदाच्च अस्य नानात्वम्, इत्याह—

अस्य भेदाश्च बहवो निर्भित्तः सहभित्तिकः ॥ ४७ ॥
सर्वगोंऽशगतः सोऽपि मुख्यामुख्यांशनिष्ठितः ।
भित्तिः परोपजीवित्वं परा प्रज्ञाथ तत्कृतिः ॥ ४८ ॥

भित्तेर्निष्क्रान्तो निर्भित्तिः, सह भित्त्या वर्तते इति सहभित्तिकः इत्यस्य सांसिद्धिकस्य मुख्यं भेदद्वयं, सहभित्तिश्च सर्वामेव भित्तिं गतः स्यात् अंशेन वा, इत्युक्तं 'सर्वगोंऽशगतश्च' इति, सोऽपि अंशगतः मुख्यांशनिष्ठितः स्यात् अन्यथा

'अकस्मात्' से निमित्तहीनता कही जाती है किन्तु यह ठीक नहीं है क्योंकि वैसा होने पर (वह) या तो नित्य सतत्त्व या अतत्त्व हो जायगा । तो यहाँ किसी न किसी हेतु को होना चाहिए । वह (हेतु) लोकप्रसिद्ध नहीं है क्योंकि गुरु का उपदेश साक्षात् देखा नहीं गया । इसलिये परिशेषात् लोक मे प्रसिद्ध नहीं है । वह यह फल से अनुमेय पारमेश्वर शुद्धविद्या का समुल्लास है जिसके कारण इसको गुरु एवं शास्त्र से निरपेक्ष सर्वविषयक प्रातिभ महाज्ञान का उदय होता है । जैसा कि कहेंगे—

"मध्यतीव्र शक्तिपात से समस्त अज्ञान निवृत्त हो जाता है । जिसके कारण यह बन्ध मोक्ष को प्राप्त होता है । जो शास्त्र और आचार्य की अपेक्षा न रखकर (उत्पन्न होता है) वह प्रातिभ महाज्ञान है" ॥ ४६ ॥

उपाधियों के भेद से यह अनेक है—यह कहते हैं—

इसके निर्भित्तक, सहभित्तिक (= सभित्तिक), सर्वग, अंशग आदि बहुत भेद हैं । वह (अंशग) भी मुख्य अमुख्य अंश में रहता है । भित्ति का अर्थ है—परोपजीवी होना । और पराप्रज्ञा उसकी कृति है ॥-४७-४८॥

भित्ति से रहित = निर्भित्ति । भित्ति के साथ वर्त्तमान सहभित्तिक । सांसिद्धिक ज्ञान के ये मुख्य दो भेद हैं । सहभित्तिक-समस्तभित्तिक को व्याप्त करता है या

वा इति सहभित्तिकस्य त्रयो भेदाः, निर्भित्तिना सह अस्य चत्वारः, बहुत्वं च भित्तेस्तदंशानां च नानात्वात्, अत्र यद्भावाभावाभ्यां भेदोल्लासः तं भित्तिशब्दं व्याचष्टे 'भित्तिः' इत्यादिना, परोपजीवित्वमिति—उपजीव्यमानः परो भित्तिरित्यर्थः, कः परः ? इत्याशङ्क्योक्तं 'परः प्रज्ञाथ तत्कृतिः' इति, प्रज्ञा स्वविमर्शः, तत्कृतिः—तत्तत्कर्माभिधायकं परकृतं शास्त्रम् । ननु अस्य स्वत एव ज्ञानोदयादुपजीव्यमानतया परो नास्ति, इत्यतोऽस्तु नाम निर्भित्तिकत्वं, को दोषः, सहभित्तिकत्वे पुनरस्य उच्यमाने सांसिद्धिकत्वमेव न स्यात्—परोपजीवित्वेन कल्पितत्त्वापत्तेः, न च असंभवत्तत्सामान्यः तद्विशेषो नाम, इति कथमस्य सहभित्तिकत्वमुक्तम् ? उच्यते—इह खलु स्वत एव सत्तर्कोदयात् खिलीकृत-निखिलबन्धनस्य भैरवीभावपूर्णस्य सांसिद्धिकस्य गुरोः स्वात्मनि कृतकृत्यत्वात् शेषवृत्तौ परानुग्रह एव परं प्रयोजनम्, यदुक्तं प्राक्—

'समस्तयन्त्रणातन्त्रत्रोटनाटङ्कधर्मणः ।
नानुग्रहादृते किञ्चिच्छेषवृत्तौ प्रयोजनम् ॥' इति ।

तथा

'स्वं कर्त्तव्यं किमपि कलयंल्लोक एष प्रयत्नात्
नो पारक्यं प्रति घटयते काञ्चन स्वात्मवृत्तिम् ।

किसी अंश को—इसलिये कहा गया 'सर्वगामी और अंशगामी' वह अंशगामी भी मुख्य अंश में रहता है या अन्यत्र इस प्रकार सहभित्तिक के तीन भेद हैं । निर्भित्ति के साथ इसके (= शक्तिपात के) चार भेद हैं । (इसकी) अनेकता—भित्ति और उसके अंशों के अनेक होने के कारण है, यहाँ जो भाव और अभाव के द्वारा भेद का उल्लास होता है उस भित्ति शब्द की व्याख्या 'भित्तिः' इत्यादि के द्वारा करते हैं। परोपजीविता = उपजीव्यमान पर भित्ति—यह अर्थ है । कौन पर ? यह शङ्का कर कहा गया 'पराप्रज्ञ और उसकी कृति' । प्रज्ञा = आत्मविमर्श । उसकी कृति = उसके कर्म को बतलाने वाला परकृतशास्त्र । प्रश्न—इसको स्वयं ही ज्ञान का उदय होने के कारण कोई दूसरा कारण नहीं है इसलिये यह निर्भित्तिक हो, क्या दोष है ? किन्तु इसको सहभित्तिक कहने पर (यह) सांसिद्धिक ही नहीं होगा क्योंकि परोपजीवी होने के कारण (यह) कल्पित होने लगेगा । जिसमें सामान्य संभव नहीं होता उसमें विशेष हो नहीं सकता फिर इसको सहभित्तिक कैसे कहा गया है ? उत्तर देते हैं—स्वयं सत्तर्क का उदय होने के कारण जिसका समस्त बन्धन कट चुका है ऐसे भैरवीभाव से पूर्ण सांसिद्धिक गुरु के अपने प्रति कृतकृत्य होने से शेषवृत्ति को करने में परानुग्रह ही परम प्रयोजन है । जैसा कि पहले कहा गया—

'समस्त यन्त्रणातन्त्र को तोड़ने में छीनी का काम करने वाले (गुरु) का शेषवृत्ति में अनुग्रह के अलावा कोई दूसरा प्रयोजन नहीं है ।' तथा—

'यह संसार अपना कुछ कर्त्तव्य है (यह सोचकर) दूसरे के प्रति अपनी कोई

यस्तु ध्वस्ताखिलभवमलो भैरवीभावपूर्णः
कृत्यं तस्य स्फुटमिदमियल्लोककर्तव्यमात्रम् ॥'

इति च । तत्रास्य निर्मलसंविदोऽनुग्राह्यान् प्रति निरुपकरणमेव अनुग्रहकारित्वम्—इत्यसौ निरनुसंधानदर्शनमात्रेणैव स्वसंवित्संक्रान्तेः स्वसाम्यापादनेन ताननुगृह्णाति, यदुक्तं प्राक्—

'तं ये पश्यन्ति तादृरूप्यक्रमेणामलसंविदः ।
तेऽपि तद्रूपिणस्तावत्येवास्यानुग्रहात्मता ॥'

इति, यदभिप्रायेणैव परानुग्रहेऽपि परानपेक्षित्वात् 'निर्भित्तिकः' इत्ययमुच्यते । अनिर्मलसंविदः प्रति पुनरस्य सोपकरणमेव अनुग्रहकारित्वम्—इति 'असावित्थं मयायमनुग्राह्यः' इत्याद्यनुसंधानेन अत्र प्रवृत्तेः सर्वमेव बाह्यमुपकरणजातमपेक्षते, येनास्य परानुग्रहः सिद्ध्येत्, यदुक्तं प्राक्—

'सोऽपि स्वातन्त्र्यधाम्ना चेदप्यनिर्मलसंविदाम् ।
अनुग्रहं चिकीर्षुस्तद्भाविनं विधिमाश्रयेत् ॥' इति ।
'तदर्थमेव चास्यापि परमेश्वररूपिणः ।
तदभ्युपायशास्त्रादौ श्रवणाध्ययनादरः ॥'

इति च । अनिर्मलचित्त्वेऽपि अनुग्राह्याणां वैचित्र्यात् तत्तदाशयानुसारेण

क्रिया नहीं करता । किन्तु जिसने समस्त सांसारिक मलों को ध्वस्त कर दिया है और भैरवीभाव से पूर्ण है उसका कार्य स्पष्ट रूप से लोक कर्त्तव्यमात्र है ।'

इस निर्मल संविद वाले की अनुग्राह्यों के प्रति निष्कारण अनुग्रहकारिता है । इसलिए यह लक्ष्यहीन दर्शनमात्र से ही अपनी संवित् की संक्रान्ति से अपनी समता के सम्पादन के द्वारा उनको अनुगृहीत करता है । जैसा कि पहले कहा गया—

'जो निर्मल संविद् वाले लोग उनको तद्रूप क्रम से देखते हैं वे भी उस रूप के हो जाते हैं और वही इनका अनुग्रह है ।'

इसी अभिप्राय से परानुग्रह होने पर भी परानपेक्षी होने के कारण इसे निर्भित्तिक कहा जाता है । किन्तु जो निर्मल संविद् वाले नहीं है उनके प्रति इसका अनुग्रह सोपकरण है । 'यह इस प्रकार मेरे द्वारा अनुग्राह्य है ।' इत्यादि अनुसन्धान के साथ इसकी प्रवृत्ति होने से (उसे) सभी बाह्य उपकरणों की अपेक्षा होती है जिससे इसका परानुग्रह सिद्ध होता है । जैसा कि पहले कहा गया—

'वह भी, यदि अपने स्वातन्त्र्य के कारण अनिर्मल संविद् वालों के ऊपर अनुग्रह करना चाहता है तो, भावीविधि का आश्रयण करें ।'

इस लिए परमेश्वरस्वरूप इसके लिये भी 'उसके उपायभूत शास्त्र आदि के श्रवण और अध्ययन आदि में आदर (आवश्यक है)'

उपकरणानामपि आनन्त्यम्—इति तदभिधायकं शास्त्रमपि सर्वेषामेवापेक्षणीयम्, अन्यथा हि परानुग्रहो न सिद्ध्येत्, यदुक्तम्—

'चित्तभेदान्मनुष्याणां शास्त्रभेदो वरानने ।
व्याधिभेदाद्यथा भेदो भेषजानां महौजसाम् ॥
यथैकं भेषजं ज्ञात्वा न सर्वत्र भिषज्यति ।
तथैकं हेतुमालम्ब्य न सर्वत्र गुरुर्भवेत् ॥' इति ।

यदभिप्रायेणैवास्य सर्वगतत्त्वमुक्तम् । कश्चिदपि असावेकमेव नियतं शास्त्रमधिकृत्य तदुचितानेव अनुग्राह्याननुगृह्णाति—इत्यंशगतत्त्वम् अस्योक्तम्, यद्वक्ष्यति—

'कल्पवित्तत्समूहज्ञः शास्त्रवित्संहितार्थवित् ।
सर्वशास्त्रर्थविच्च............................ ॥' इति ।
'यो यत्र शास्त्रे स्वभ्यस्तज्ञानो व्याख्यां चरेत्तु सः ।
नान्यथा... ॥'

इति च । तत्तच्छास्त्रात्मनामंशानामपि—

'वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ॥'

चित्त के अनिर्मल होने पर भी अनुग्राह्यों के वैचित्र्य के कारण भिन्न-भिन्न आशय के अनुसार उपकरण भी अनन्त होते हैं । इसलिए उसका वर्णन करने वाला शास्त्र भी सबके लिये अपेक्षणीय है । अन्यथा परानुग्रह ही सिद्ध नहीं होगा । जैसा कि कहा गया—

"हे वरानने ! जिस प्रकार व्याधि के भेद से महातेजस्वी औषधियों में भेद होता है उसी प्रकार मनुष्यों के चित्तभेद से शास्त्र का भी भेद होता है । जिस प्रकार एक औषधि को जान कर सर्वत्र औषधिक उपचार नहीं किया जाता उसी प्रकार एक कारण को आधार बनाकर सर्वत्र गुरु नहीं होता ।"

इसी अभिप्राय से इसको सर्वगत कहा गया है कोई भी यह (गुरु) किसी एक निश्चित शास्त्र को अधिकृत कर उसके योग्य ही अनुग्राह्यों को अनुगृहीत करते हैं—इसलिये इसे अंशगत कहा गया है । जैसा कि कहेंगे—

"कल्प को जानने वाला, उस समूह को जानने वाला, शास्त्रज्ञ, संहितार्थवेत्ता, और समस्त शास्त्रों के अर्थ को जानने वाला ।"

"जो जिस शास्त्र में भली प्रकार अभ्यस्त ज्ञानवाला है वह (उसी शास्त्र की) व्याख्या का आचरण करे अन्यथा नहीं ।"

भिन्न-भिन्न शास्त्ररूप अंशो में भी—

"वेद की अपेक्षा शैवमार्ग, उसकी अपेक्षा वाममार्ग, उससे बड़ा दक्षिणमार्ग फिर

इत्याद्युक्त्या यथोत्तरं मुख्यत्वम्, इतरेषां चामुख्यत्वम्—इति मुख्यामुख्यरूपत्वमुक्तम् । न च अस्य एवमपि परमुखप्रेक्षित्वात् सांसिद्धिकत्वं खण्ड्यते—स्वात्मनि स्वत एव कृतकृत्यत्वात् परार्थमेतदपेक्षणात्, यदुक्तं प्राक्—

'नहि तस्य स्वतन्त्रस्य क्वापि कुत्रापि खण्डना।
नानिर्मलचितः पुंसोऽनुग्रहस्त्वनुपायकः ॥'

इति, तेनास्य स्वात्मन्यन्यानपेक्षणात् सांसिद्धिकत्वमेव—इति यथोक्तमेव युक्तम् ॥ ४७-४८ ॥

न च एतत् स्वोपज्ञमेवोक्तम्, इत्याह—

अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः ।
स सिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः ॥ ४९ ॥
एवं यो वेत्ति तत्त्वेन तस्य निर्वाणगामिनी ।
दीक्षा भवेदिति प्रोक्तं तच्छ्रीत्रिंशकशासने ॥ ५० ॥

परशक्तिपातानुगृहीतत्त्वात् गुर्वाद्यनपेक्षणेन, अदृष्टं-बाह्यदीक्षोपकरणोपलक्षणभूतं, मण्डलं-यागादि येन सः, तथाविधोऽपि, अत एव तिलाज्याहुतिवर्जिताम्, असंदिग्धां निर्वाणगामिनीं दीक्षां भजमानो, यः कश्चित् एवमेव—स्वत

कौल मार्ग, उससे बढ़कर मतशास्त्र, उसकी अपेक्षा त्रिक सर्वोत्तम है ।''

इत्यादि उक्ति के द्वारा क्रमशः उत्तरोत्तर मुख्यता है और अन्य अमुख्य है—इस प्रकार मुख्यामुख्यरूपता कही गई है । ऐसा होने पर भी परमुखापेक्षी होने के कारण इसका सांसिद्धिकत्व खण्डित नहीं होता क्योंकि (यह) अपने में स्वयं कृतकृत्य है और इसकी अपेक्षा दूसरे के लिये है । जैसा कि पहले कहा गया—

''इस स्वतन्त्र की कहीं भी कोई भी खण्डना नहीं है और अनिर्मलचित्त वाले पुरुष का अनुग्रह उपायरहित नहीं है ।''

इसलिये अपने विषय में परापेक्षी न होने के कारण (यह) सांसिद्धिक ही है । इसलिये यथोक्त ठीक है ।

इन्हें स्वोपज्ञ ही नहीं कहा गया—यह कहते हैं ॥ ४७-४८ ॥

मण्डल को न देखा हुआ भी जो कोई इस प्रकार का तत्त्वज्ञान कर लेता है वह नित्य सिद्धिप्राप्त हो जाता है । वही योगी और वही दीक्षित है। इस प्रकार जो तत्त्वतः जानता है उसकी निर्वाणगामिनी दीक्षा होती है—ऐसा श्री त्रिकशास्त्र में कहा गया है ॥ ४९-५० ॥

परशक्तिपात से अनुगृहीत होने के कारण गुरु आदि की अपेक्षा न होने से नहीं देखा गया बाह्य दीक्षा के उपकरण का उपलक्षणभूत मण्डल = याग आदि जिसके द्वारा वह उस प्रकार का भी, इसलिये तिल घृत की आहुति से रहित

एव तात्त्विकेन रूपेण विशेषानुपादानात् स्वात्मानं वेत्ति, स दीक्षितः—स्वसंवित्ति-देवीभिरेव पाशक्षपणपुरःसरं स्वात्मज्ञानपात्रतामापादितः, अत एव स नित्यं योगी —व्युत्थानकालेऽपि परमेश्वरैकात्म्यवान्, अत एव स सिद्धिभाक्—जीवन्नेव मोक्षलक्षणां सिद्धिं भजमानः—इत्येतत् श्रीत्रिंशिकाशास्त्रे प्रोक्तं—नैतन्निष्प्रमाणक-मित्यर्थः । तत्र च

'अदृष्टमण्डलोऽप्येवम्..................... ।'

इत्यादिश्लोकानन्तरम्

'अनेन ज्ञातमात्रेण.......................... ।'

इत्यादिग्रन्थान्तरं संभवदपि प्रकृतानुपयोगात् न पठितम्, अदृष्टमण्डलत्वादेव च 'तिलाज्याहुतिवर्जितत्त्वादि' अवसीयते, इति—तदपि न पठितम् ॥ ४९-५०॥

अस्य च व्यपदेशान्तरमपि अस्ति, इत्याह—

अकल्पितो गुरुर्ज्ञेयः सांसिद्धिक इति स्मृतः ।

य एष गुरुः 'सांसिद्धिकः' इत्यस्मच्छास्त्रे स्मृतः, स आचार्यान्तरेण अनिष्पादितत्त्वात् 'अकल्पितो' ज्ञेयः—अकल्पितशब्दव्यपदेश्योऽपि भवेदित्यर्थः ।

सन्देहशून्य निर्वाणगामिनी दीक्षा से युक्त जो कोई इसी प्रकार = स्वतः ही तात्त्विकरूप से विशेष का उपादान न करते हुए अपने को जानता है वह दीक्षित = अपनी संवित्तिदेवियों के द्वारा पाशनाशपूर्वक स्वात्मज्ञान की पात्रता को प्राप्त कराया गया, इसलिए वह नित्य योगी = व्युत्थानदशा में भी परमेश्वर से तादात्म्य स्थापित करने वाला, इसलिये सिद्धि का भागी = जीवित रहते हुए मोक्ष रूप सिद्धि वाला, होता है । यह त्रिंशिकाशास्त्र में कहा गया है । अर्थात् यह (कथन) निष्प्रमाण नहीं है । और वहाँ—

"अदृष्टमण्डल भी यह ....।"

इत्यादि श्लोक के बाद

"इस ज्ञात = मात्र से ....।"

इत्यादि दूसरे ग्रन्थ की सम्भावना होते हुए भी प्रस्तुत के लिये अनुपयोगी होने से यहाँ नहीं पढ़ा गया । 'अदृष्टमण्डल, होने के कारण ही' तिल आज्य की आहुति का वर्जन—निश्चित होता है । इसलिए उसे भी नहीं कहा गया ॥४९-५०॥

इसका दूसरा नाम भी है । यह कहते हैं—

जो (शास्त्रों में) सांसिद्धिक कहा गया है उसे अकल्पित गुरु जानना चाहिये ॥ ५१- ॥

जो यह गुरु हमारे शास्त्र में सांसिद्धिक कहा गया है उसे दूसरे आचार्य से

एवमकल्पितं गुरुमुक्त्वा तत्संबन्धतया गुर्वन्तरमपि आह—

यस्तु तद्रूपभागात्मभावनातः परं विना ॥ ५१ ॥
शास्त्रवित्स गुरुः शास्त्रे प्रोक्तोऽकल्पितकल्पकः ।

यः पुनः सांसिद्धिकरूपभागपि स्वयमुदिते ज्ञाने तावता परिपूर्ण्यस्याभावात्

'अहमेव परो हंसः........................।'

इत्याद्युक्तेरात्मभावनाबलात्, परं गुर्वादिकमनपेक्ष्य शास्त्रवित्, स गुरुर्ज्ञानस्य सांसिद्धिकत्वेनाकल्पितत्त्वात् आत्मभावनातः शास्त्रवेदनक्रमेण कल्पनाच्च 'अकल्पितकल्पकः' इत्यस्मच्छास्त्रे प्रोक्तः ॥ ५१ ॥

सांसिद्धिकवदस्यापि बहवो भेदाः, इत्याह—

तस्यापि भेदा उत्कृष्टमध्यमन्दाद्युपायतः ॥ ५२ ॥

उपायः—शक्तिपातः ॥ ५२ ॥

ननु अस्य स्वयं प्रवृत्तज्ञानपारिपूर्ण्याय किमात्मभावनैव निमितम्, उतान्यदपि

निष्पन्न न होने के कारण अकल्पित समझना चाहिए = अकल्पित शब्द से भी (वह) व्यवहार्य होता है—यह भाव है ॥ ५० ॥

इस प्रकार अकल्पित गुरु का कथन कर उसके सम्बन्ध से दूसरे गुरु का भी कथन करते हैं—

उस (सांसिद्धिक) रूप वाला जो (पुरुष) गुरु आदि के विना भी आत्मभावना के द्वारा शास्त्रों को जान लेता है वह गुरु शास्त्र में अकल्पित कल्पक कहा गया है ॥ -५१-५२- ॥

जो सांसिद्धिक रूपवाला होते हुए भी ज्ञान के स्वयं उदित होने पर उतनी पूर्णता के अभाव के कारण

"मै ही परमहंस हूँ ।"

इत्यादि उक्ति के कारण आत्मभावना के बल से दूसरे = गुरु आदि, की अपेक्षा न करके शास्त्र का वेत्ता हो जाता है वह गुरु, ज्ञान के सांसिद्धिक होने से अकल्पित होने के कारण तथा आत्मभावना से = शास्त्रवेदनक्रम के द्वारा कल्पना करने से, हमारे शास्त्र में अकल्पितकल्पक कहा गया है ॥ ५१ ॥

सांसिद्धिक की भाँति इसके भी अनेक भेद हैं—यह कहते हैं—

उसके भी उत्कृष्ट मध्य मन्द आदि उपाय के कारण (अनेक) भेद हैं ॥ -५२ ॥

उपाय = शक्तिपात ॥ ५२ ॥

किञ्चित् ?—इत्याशङ्क्याह—

भावनातोऽथ वा ध्यानाज्जपात्स्वप्नाद् व्रताद्धुतेः ।
प्राप्नोत्यकल्पितोदारमभिषेकं महामतिः ॥ ५३ ॥

अयं खलु महाज्ञानी भावनाद्यनन्तोपायमाहात्म्यात् गुर्वादिना परेणाकृतत्त्वात् अकल्पितम्, अत एवोदारं—महान्तम्, अभिषेकं प्राप्नोति शास्त्रज्ञानादावधिकारवान्भवति, इत्यर्थः ॥ ५३ ॥

ननु एवं ज्ञानावाप्तौ भावनादिनिमित्तानन्त्ये किं प्रमाणम् ?—इत्याशङ्क्याह—

श्रीमद्वाजसनीये श्रीवीरे श्रीब्रह्मयामले ।
श्रीसिद्धायामिदं धात्रा प्रोक्तमन्यत्र च स्फुटम् ॥ ५४ ॥

इदमिति—भावनादीनां निमित्तानामानन्त्यम् ॥ ५४ ॥

एवमनेकागमोक्तावपि निदर्शनार्थं प्रथमं श्रीसर्ववीरग्रन्थं पठति—

तस्य स्वेच्छाप्रवृत्तत्वात् कारणानन्ततेष्यते ।
कदाचिद्भक्तियोगेन कर्मणा विद्ययापि वा ॥ ५५ ॥
ज्ञानधर्मोपदेशेन मन्त्रैर्वा दीक्षयापि वा ।

प्रश्न स्वयं प्रवृत्तज्ञान की पूर्णता के लिये क्या इसकी आत्मभावना ही कारण है या दूसरा भी ? यह शङ्का कर कहते हैं—

(यह) महाबुद्धिमान् भावना से अथवा ध्यान, जप, स्वप्न, व्रत हवन के द्वारा अकल्पित उदार अभिषेक को प्राप्त करता है ॥ ५३ ॥

यह महाज्ञानी भावना आदि अनन्त उपायों की महिमा से गुरु आदि पर के द्वारा विहित न होने से अकल्पित अतएव उदार = महान् अभिषेक को प्राप्त होता है = शास्त्र ज्ञान आदि में अधिकारवान् होता हैं ॥ ५३ ॥

प्रश्न—इस प्रकार की ज्ञानप्रप्ति में भावना आदि अनन्त निमित्त हैं इसमें क्या प्रमाण है ? यह शंका....

श्रीवाजनीय, श्रीवीर, श्रीब्रह्मयामल और श्रीसिद्धातन्त्र में विधाता ने इसे कहा है और अन्यत्र भी यह स्पष्ट है ॥ ५४ ॥

यह = भावना आदि कारणों की अनन्तता ॥ ५४ ॥

इस प्रकार अनेक आगम के कहने पर भी उदाहरण के लिये सर्ववीर ग्रन्थ का कथन करते हैं—

उस (= साधक) के स्वेच्छा से प्रवृत्त होने से अनन्त कारण माने जाते हैं । सम्पूर्ण जगत् के स्वामी परमेश्वर कभी भक्तियोग से, कमी कर्म से,

एवमाद्यैरनेकैश्च प्रकारैः परमेश्वरः ॥ ५६ ॥
संसारिणोऽनुगृह्णाति विश्वस्य जगतः पतिः ।

तत्र हि

'अनादिमति संसारे कारणं परमेश्वरः ।
स्वभावेनैव जन्तूनामनुग्रहपरः सदा ॥'

इत्यादिना परमेश्वरस्य स्वस्वातन्त्र्यादेव अनुग्रहकारित्वमुपक्रम्य

'तया बद्धाञ्छिवो जन्तून्स्वेच्छया मोचयत्यतः ।'

इत्यादिना तदेव निर्वाह्य,अनेन ग्रन्थेन भगवतः स्वातन्त्र्येऽपि परानुग्रहे निमित्तान्तरोपलक्षिततत्त्वमुक्तम्, तथाहि—तस्य परमेश्वरस्यैव भगवतः

'इच्छैव कारणं तस्य.................... ।'

इत्याद्युक्त्या स्वेच्छाया एवानुग्रहादिप्रवृत्तौ कारणत्वेऽपि अनुग्राह्यभेदात् तस्या अपि वैचित्र्यात् कारणानामानन्त्यमुच्यते, वस्तुतस्तु तदतिरेक्यन्यत् अस्यापेक्षणीयं नास्ति—इति बहुशः प्रागुक्तम्, तेन निखिलस्य जन्मतो जन्तुचक्रस्य पालनादियोगात् 'पतिः' परमेश्वरोऽसौ तत्तदाशयानुसारेण कदाचिद्भक्त्या कदाचिद्योगेन—इत्येवमाद्यैरनेकैः कारणप्रकारैः संसारिणः— सङ्कुचितं प्रमातृ-

---

कभी विद्या से, ज्ञान धर्मोपदेश, मन्त्र अथवा दीक्षा आदि अनेक प्रकारों से संसारियों के ऊपर अनुग्रह करते हैं ॥ ५५-५७- ॥

अनादि संसार में कारण रूप परमेश्वर स्वभाव से ही सदा प्राणियों के अनुग्रह में तत्पर हैं ।

इत्यादि के द्वारा अपने स्वातन्त्र्य से ही परमेश्वर की अनुग्रहकारिता से प्रारम्भ कर

"इसलिए उसके द्वारा वद्ध जन्तुओं को शिव स्वेच्छा से मुक्त करते हैं" इत्यादि के द्वारा उसी का निर्वाह कर इस ग्रन्थ के द्वारा स्वतन्त्र होने पर भी भगवान् का दूसरे के अनुग्रह में कारणान्तर की उपलक्षितता कही गई है । इस प्रकार—उस भगवान् परमेश्वर की ही

"उसकी इच्छा ही कारण है .... ।"

इत्यादि उक्ति के द्वारा स्वेच्छा के ही अनुग्रह आदि प्रवृत्ति में कारण होने पर अनुग्राह्य के भेद से उस (प्रवृत्ति) के भी विचित्र होने से कारणों की अनन्तता कही जाती है । वस्तुतः तो उससे भिन्न दूसरा कुछ इसके लिये अपेक्षणीय नहीं है—यह पहले कई बार कहा जा चुका है । इसलिये जन्म वाले यह समस्त जन्तु समूह का पालन आदि करने से पति = यह परमेश्वर भिन्न-भिन्न आशय के अनुसार कभी भक्ति से कभी योग से इत्यादि अनेक कारण प्रकारों से संसारियों = संकुचित

वर्गमनुगृह्णाति, सङ्कोचापहस्तनेन पूर्णज्ञानरूपतया प्रथयतीत्यर्थः । 'एवमाद्यैः' इत्यनेन तपोजपादेर्ग्रहणम्, एवं पूर्णज्ञानावाप्तावनेके उपायाः संभवन्ति, इति तात्पर्यार्थः ॥ ५५-५६ ॥

एवमुपदर्शितेऽपि निमित्तानन्त्यसाधनाय प्रमाणेऽधिकावापं कर्तुं श्रीब्रह्मयामल-ग्रन्थं पठति—

मातृमण्डलसंबोधात् संस्कारात्तपसः प्रिये ॥ ५७ ॥
ध्यानाद्योगाज्जपाज्ज्ञानान्मन्त्राराधनतो व्रतात् ।
संप्राप्यं कुलसामान्यं ज्ञानं कौलिकसिद्धिदम्॥ ५८ ॥

मातॄणां—चक्षुरादिकरणेश्वरीणां, मण्डलस्य सम्यक् वृत्तिरूपतापरिहारेण शक्तिरूपतया परिज्ञानान्मातृमण्डलकर्तृकात् प्रियमेलापादिक्रमेण संबोधनाद्वा—इत्येवमाद्यैरनन्तैर्निमित्तैः

..........................कुलमुत्पत्तिगोचरम् ।'

इत्याद्युक्त्या कुले—स्वस्वरूपादतिरेकायमाणतया उत्पत्स्यमाने प्रमातृ-प्रमेयात्मनि विश्वत्र, सामान्यम्—अनुगामितया वर्तमानम्, अन्यथा हि अस्य भानमेव न भवेदिति भावः, अत एव कुले—आत्मनि, भवा येयं सिद्धिः, तां ददाति—स्वात्ममात्ररूपतया प्रस्फुरत्परप्रमात्रात्म ज्ञानमवश्यं प्राप्यते इत्यर्थः,

---

प्रमातृवर्ग के ऊपर अनुग्रह करते हैं = सङ्कोच को हटा कर पूर्णज्ञान के रूप में विस्तृत करते हैं । 'एवमाद्यैः' इससे तप जप आदि का ग्रहण है । इस प्रकार पूर्णज्ञान की प्राप्ति में अनेक उपाय सम्भव हैं—यह तात्पर्यार्थ है ॥ ५५-५६ ॥

निमित्त की अनन्तता की सिद्धि के लिये प्रदर्शित प्रमाण में अधिकता लाने के लिये ब्रह्मयामल ग्रन्थ को कहते हैं—

हे प्रिये मातृमण्डल के सम्यक् ज्ञान से, संस्कार से, तप से, ध्यान, योग, जप, ज्ञान, मन्त्र, आराधना, व्रत के द्वारा कौलिक सिद्धि को देने वाला कुलसामान्य ज्ञान प्राप्त करना चाहिये ॥ -५७-५८ ॥

माताओं के = चक्षु आदि करणेश्वरीवर्ग के, मण्डल की सम्यक् वृत्तिरूपता को हटाकर शक्तिरूप में ज्ञान करने से मातृमण्डलकर्त्तृक से अथवा प्रियमेलाप आदि के क्रम से संबोधन के कारण—इत्यादि अनन्त निमित्तों से

"...............कुल उत्पत्ति का विषय ।"

इत्यादि उक्ति के द्वारा, कुल में = अपने स्वरूप से भिन्न रूप में, उत्पत्स्यमान प्रमातृप्रमेयरूप विश्व में, सामान्य = अनुगामी के रूप में वर्त्तमान, अन्यथा इसका भान ही नहीं होगा—यह भाव है । इसलिए कुल = आत्मा में उत्पन्न होने वाली जो यह सिद्धि, उसको देते हैं = स्वात्ममात्ररूप में प्रस्फुरत् परप्रमातारूप ज्ञान को

संस्कारात्—दीक्षादेः ॥ ५७-५८ ॥

ननु यद्येवं, तर्हि अकल्पितकल्पकस्य गुरोः भावनादिहेतुजालनिष्ठत्वं नाम मुख्यं लक्षणम् ? इत्याशङ्कां ग्रन्थकृदेव स्वयं निराकर्तुमाह—

तत्त्वज्ञानात्मकं साध्यं यत्र यत्रैव दृश्यते ।
स एव हि गुरुस्तत्र हेतुजालं प्रकल्प्यताम् ॥ ५९ ॥

यत् खलु स्वात्मलक्षणं सिसाधयिषितं परतत्त्वात्मकं पूर्णं ज्ञानं तदेव नाम यत्र क्वापि दृश्यते स एव अकल्पितकल्पको गुरुर्ज्ञेयो न पुनर्भावनादिहेतुजालमात्रनिष्ठः, एवं हि

'नावश्यं कारणानि कार्यवन्ति भवन्ति ।'

इतिन्यायेन भावनादौ हेतुजाले कृतप्रयत्नोऽपि कश्चित् कदाचित् पूर्णं ज्ञानं नासादयेत्,—इति कथमिव अस्य अकल्पितकल्पकत्वं स्यात्, एवंरूपस्य ज्ञानस्य कादाचित्कत्वात् केनचित् कारणेन भाव्यम्, इत्युक्तं 'तत्र हेतुजालं प्रकल्प्यताम्' इति, तेनेह फलभूतं पूर्णज्ञानवत्त्वमेवास्य मुख्यं लक्षणम्—इति तात्पर्यार्थः ॥ ५९ ॥

न च एतदस्मदुपज्ञमेव, इत्यर्थद्वारेण संवादयति—

अवश्य प्राप्त करते हैं । संस्कार से = दीक्षा आदि के (संस्कार से) ॥ ५७-५८ ॥

प्रश्न—यदि ऐसा है तो अकल्पितकल्पक गुरु का मुख्य लक्षण होगा—भावना आदि कारण के जाल में रहना ? इस शङ्का को ग्रन्थकार स्वयं हटाने के लिये कहते हैं—

तत्त्वज्ञानात्मक साध्य जहाँ दिखायी दे वही गुरु होता है । उसी में हेतुजाल की कल्पना करनी चाहिये ॥ ५९ ॥

जो आत्मलक्षण वाला सिद्धि के लिये इष्ट परतत्त्वात्मक पूर्णज्ञान है वही जहाँ कहीं भी दिखाई देता है । उसी को अकल्पितकल्पक गुरु जानना चाहिए न कि भावना आदि हेतुजाल में उपनिबद्ध । इस प्रकार—

"कारण आवश्यक रूप से कार्यवान् नहीं होते ।"

इस न्याय से भावना आदि हेतुजाल के विषय में प्रयत्नशील भी कोई कदाचित् पूर्णज्ञान नहीं प्राप्त करता फिर वह कैसे अकल्पितकल्पक होगा । इस प्रकार के ज्ञान का, कादाचित्क होने के कारण, कोई कारण होना चाहिए । इसलिये कहा गया—'उस विषय में हेतुजाल की कल्पना करनी चाहिये ।' इसलिये यहाँ फलभूतपूर्णज्ञानवान् होना ही इसका मुख्य लक्षण है—यह तात्पर्यार्थ है ॥ ५९ ॥

यह हमारा उपज्ञ नहीं है इसे अर्थ के द्वारा पुष्ट करते हैं—

तत्त्वज्ञानादृते नान्यल्लक्षणं ब्रह्मयामले।

'भावित: सुप्रसन्नात्मा जपहोमरत: सदा।'

इत्यादि अन्यत् शास्त्रन्तरोक्तं लक्षणमपहाय, तत्त्वज्ञानमेव मुख्यं लक्षणं श्रीब्रह्मयामले गुरोरुक्तम्, इति वाक्यार्थ:, यदभिप्रायेणैव

'सर्वलक्षणहीनोऽपि ज्ञानवान्गुरुरुत्तम: ।'

इत्यादि अन्यत्रोक्तम् ॥

ननु भावनादौ कृतप्रयत्नस्यापि न किचित्फलं जायते इत्येतदागमेन विरुद्ध्यते ? इत्याशङ्कां गर्भीकृत्य पुनरपि अर्थद्वारेण संवादयति—

तत्रैव चोक्तं सेवायां कृतायामविकल्पत: ॥ ६० ॥
साधकस्य न चेत्सिद्धि: किं कार्यमिति चोदिते।
आत्मीयमस्य संज्ञानक्रमेण स्वात्मदीक्षणम् ॥ ६१ ॥
सस्फुरत्वप्रसिद्ध्यर्थं तत: साध्यं प्रसिद्ध्यति ।

तत्र—श्रीब्रह्मयामले एव च—अविकल्पत:,

तत्त्वज्ञान के अतिरिक्त दूसरा कोई लक्षण (गुरु का) नहीं है—ऐसा ब्रह्मयामल में भी कहा गया है ॥ ५९-६० ॥

"भावित सुप्रसन्न आत्मा वाला सदा जप होम में रत रहने वाला गुरु होता है ॥"

इत्यादि दूसरे शास्त्रों में उक्त अन्य लक्षण को छोड़कर, तत्त्वज्ञान ही गुरु का मुख्य लक्षण ब्रह्मयामल में कहा गया है—यह वाक्यार्थ है । जिस अभिप्राय से ही—

"सब लक्षणों से हीन भी ज्ञानवान् (व्यक्ति) उत्तम गुरु है ।"

इत्यादि अन्यत्र कहा गया है ॥ ६० ॥

प्रश्न—भावना आदि के विषय में प्रयत्न करने वाले को भी कुछ फल नहीं मिलता यह तो आगम के विरुद्ध है ?—इस शङ्का को भीतर रखकर पुन: अर्थ के द्वारा पुष्ट करते हैं—

वहीं कहा गया है—संशयरहित होकर सेवा (= जप आदि) करने पर भी साधक को यदि सिद्धि नहीं मिलती तो क्या करना चाहिये ?

ऐसा प्रश्न होने पर, इस (= इस आदि) के सम्यक् ज्ञान के क्रम से आत्मा के विषय में (मन्त्र आदि के) स्वरूप की उत्तेजना के लिये आत्मदीक्षा ही (उपाय है) इसके बाद साध्य (= निर्विकल्पक ज्ञान) सिद्ध हो जाता है ॥ -६०-६१- ॥

'.........................संशयानो न सिद्ध्यति ।'

इत्याद्युक्त्या, विकल्पः—संशयः, तदभावात्—स्वपक्षदार्ढ्येन स्वकल्पाम्नातायां लक्षजपादिरूपायां सेवायां कृतायामपि, साधकस्य केनापि वैगुण्येन, तत्फलभूता मनीषितार्थसंपत्तिलक्षणा सिद्धिः, न चेत्स्यात्, तदा किं तेन कार्यम्, इति भगवत्या चोदिते—प्रश्निते सति, आत्मीयम्—आत्मसंबन्धि, सं सम्यक्—संशयविपर्यासरहितम् 'आत्मैवेदं सर्वम्' इत्येवमात्म, यत ज्ञानं, तस्य क्रमो—यथायथमभ्यासातिशयात् पराधाराधिरोहः, तेन सस्फुरत्वप्रसिद्ध्यर्थम्, अर्थात्—जप्यस्य मन्त्रादेः स्वरूपोत्तेजनाय निमित्तान्तरभूतं, स्वात्मनो दीक्षणम्-परसंविद्रूपतया प्रत्यवमर्शनं नाम, भगवतोत्तरमुक्तं, येन सिसाधयिषितं वस्तु साधकस्य प्रसिद्ध्यतिफलपर्यन्तां निष्पत्तिं यायादित्यर्थः ॥ ६०-६१ ॥

अत्रैव तात्पर्यार्थं व्याचष्टे—

अनेन स्वात्मविज्ञानं सस्फुरत्वप्रसाधकम् ॥ ६२ ॥
उक्तं मुख्यतयाचार्यो भवेद्यदि न सस्फुरः ।

अनेन-श्रीब्रह्मयामलग्रन्थेन, साधकस्य स्वात्मीयमेव विज्ञानं जप्यस्य मन्त्रादेः

वहाँ = ब्रह्मयामल में ही । विना विकल्प के—

"............... संशय करने वाला सिद्धि को नहीं प्राप्त करता ।"

इत्यादि उक्ति के द्वारा, विकल्प = संशय, उसके अभाव से अपने पक्ष की दृढ़ता से अपने कल्प में कथित लाख जप आदि रूप सेवा के करने पर भी साधक को किसी दोष के कारण उसकी फलभूत मनोवाञ्छितफल की प्राप्तिरूपा सिद्धि यदि नहीं मिलती है तो उसे क्या करना चाहिए ? ऐसा भगवती के द्वारा प्रश्न किये जाने पर, आत्मीय = आत्मासम्बन्धी सं = सम्यक् = संशय विपर्यय से रहित 'यह सब आत्मा ही है' इसप्रकार का जो ज्ञान, उसका क्रम = क्रमशः अभ्यास की अधिकता के कारण परधारा पर चढ़ना, उससे सस्फुरत्व की प्रसिद्धि के लिए, अर्थात् जप्य मन्त्र आदि स्वरूप को उत्तेजित करने के लिये, निमित्तान्तरभूत अपनी दीक्षा = परसंविद्रूप में प्रत्यवमर्श, भगवान् के द्वारा उत्तर कहा गया जिससे साधक को सिसाधयिषित वस्तु मिल जाती है = (वह) फलपर्यन्त निष्पत्ति को प्राप्त होता है ॥ ६०-६२ ॥

यही तात्पर्यार्थ की व्याख्या करते हैं—

इससे (यह सिद्ध हुआ कि) आत्मविज्ञान (मन्त्र आदि की) उत्तेजना का साधक है । यदि आचार्य स्फुरत्ता वाला न हो तो (स्वात्मदीक्षा करानी चाहिये) ॥ -६२-६३- ॥

इससे = ब्रह्मयामल ग्रन्थ से, साधक का अपना ही विज्ञान जप्य मन्त्र आदि

सस्फुरत्वे निमित्तमुक्तं, यदि नाम मुख्यत्वेनाचार्यः परमेश्वरैकात्म्यायोगात् सस्फुरो न स्यात्, तेन सस्फुरे पुनराचार्ये सति तमेव स्वात्मनि दीक्षां कारयेत्, येनास्य मन्त्रोऽपि सस्फुरः स्यात् ॥ ६२ ॥

ननु आचार्यः सस्फुरो भवतु अस्फुरो वा, किमनेन नः प्रयोजनं, तमन्तरेण पुनः स्वयमेव दीक्षा न भवेत्, एवं हि आगमविरोध आपतेत्, तदपव्याख्यानमेतत् ?—इत्याशङ्क्याह—

तत्रैव च पुनः श्रीमद्रक्ताराधनकर्मणि ॥ ६३ ॥
विधिं प्रोक्तं सदा कुर्वन् मासेनाचार्य उच्यते ।
पक्षेण साधकोऽर्धार्धात् पुत्रकः समयी तथा ॥ ६४ ॥

तत्रैव—श्रीब्रह्मयामले, पुनः—समनन्तरोक्तप्रश्नोत्तरानन्तरं, श्रीमद्रक्तायाः—श्रीचण्डिकाया विधाने, प्रकर्षेण—गुर्वादिनैरपेक्ष्येण, उक्तं विधिं—तन्मन्त्रग्रहण-जपध्यानादिरूपं, सदा—प्रत्यहं, साधकः कुर्वन्, मासेन अभिषेकादि-परिहारेण 'आचार्यः' उच्यते—तदुचितमधिकारमारभमाणो न प्रत्यवैतीत्यर्थः । एवं पक्षेण 'साधकः' सार्धेन-दिनसप्तकेन 'पुत्रकः' पादोनेन दिनचतुष्टयेन 'समयी' इति ॥ ६३-६४ ॥

की स्फुरत्ता में कारण कहा गया है । यदि मुख्य आचार्य परमेश्वर के साथ ऐकात्म्य न होने से स्फुरण से युक्त नहीं होता तो वह सस्फुर आचार्य के रहने पर उसी से अपनी दीक्षा कराये जिससे इसका मन्त्र भी स्फुरणयुक्त हो जाय ॥ ६२ ॥

प्रश्न—आचार्य सस्फुर हो या अस्फुर हमें इससे क्या लेना देना है ? उसके बिना स्वयं ही दीक्षा नहीं होगी और इस प्रकार आगम से विरोध आ रहा है तो यह तो दुष्ट व्याख्यान है ? यह शङ्का कर कहते हैं—

उसी (ग्रन्थ) में फिर रक्तादेवी की आराधना के विषय में कही गयी विधि का सदा अनुसरण करने वाला एक मास में आचार्य कहलाता है; एक पक्ष में साधक, आधा (सात दिन) में पुत्रक उसके आधे (चार दिन) में समयी कहा जाता है ॥ ६३-६४ ॥

वहीं पर = ब्रह्मयामल में, पुनः = पूर्वोक्त प्रश्नोत्तर के बाद, श्रीमद्रक्ता के = चण्डिका के, विधान में प्रकर्ष के साथ = गुरु आदि से निरपेक्ष होकर, उक्त विधि को = उसके मन्त्र का ग्रहण जप ध्यान आदि रूप को, सदा = प्रतिदिन करता हुआ साधक एक मास में अभिषेक आदि से रहित होकर आचार्य कहा जाता है = उसके योग्य अधिकार का प्रारम्भ करता हुआ असफल नहीं होता । इसी प्रकार एक पक्ष में 'साधक' सार्ध में = सात दिन में, पुत्रक, एक पाद कम होने से = चार दिन में समयी कहा जाता है ॥ ६३-६४ ॥

ननु दीक्षामन्तरेण कथं समय्यादिरूपत्वं स्यात् ?—इत्याशङ्क्याह—

दीक्षयेज्जपयोगेन रक्तादेवी क्रमाद्यतः ।
गुरोरलाभे प्रोक्तस्य विधिमेतं समाचरेत् ॥ ६५ ॥

दीक्षयेदित्यनेन सर्वमेव गुरुकर्तृकं कर्मोपलक्षितम्, यदुक्तम्—

'जुहोति जपति प्रेद्धे सर्वत्रैवात्र चण्डिका ॥' इति ।

क्रमादिति-समय्यादिरूपात् । ननु यद्येवं तर्हि गुरुप्रशंसाभिधायिनो निखिलस्यैव आगमस्यानर्थक्यमापतेत् ? इत्याशङ्क्याह—'गुरोरलाभे' इत्यादि, प्रोक्तस्य—अकल्पितकल्पकादेः सस्फारस्य गुरोर्लाभे सति, एतं—समनन्तरोक्तं, स्वयमेव मन्त्रग्रहणादिरूपं विधिं समाचरेत्—अनुतिष्ठेत्, अन्यथा पुनराचार्यमेव सर्वं कारयेत्, इति भावः ॥ ६५ ॥

ननु यद्येवं

'स्वयं गृहीतमन्त्राश्च क्लिश्यन्ते चाल्पबुद्धयः ।'

इत्यादिना पुस्तकाधीतविद्यानां क्लेशभागित्वाद्यात्मा दोषः कस्मादन्यत्रोक्तः ? इत्याशङ्क्याह—

प्रश्न—दीक्षा के विना समयी आदि रूपता कैसे होती है ? यह शङ्का कर कहते हैं—

गुरु के न रहने पर चूँकि रक्तादेवी स्वयं क्रम से जप योग से दीक्षा देती हैं इसलिए उक्त गुरु के न मिलने पर स्वयं इस विधि का आचरण करना चाहिये ॥ ६५ ॥

'दीक्षित करती है, इसके द्वारा सभी गुरुकर्तृक कर्म समझना चाहिये न कि केवल दीक्षा । जैसा कि कहा गया—

"प्रज्वलित (अग्नि) में यहाँ सर्वत्र चण्डिका ही हवन जप करती है ।"

क्रम से—समयी आदि रूप (क्रम से) । प्रश्न—यदि ऐसा है तो गुरु की प्रशंसा करने वाला समस्त आगम निरर्थक हो जायेगा ? यह शङ्का कर कहते हैं—'गुरु के न मिलने पर' इत्यादि । उक्त की = अकल्पितकल्पक आदि स्फुरणयुक्त गुरु की प्राप्ति न होने पर, इस = पूर्वोक्त, स्वयमेव मन्त्रग्रहण आदि विधि का आचरण = अनुष्ठान करना चाहिये । अन्यथा आचार्य से सब कराना चाहिये—यह भाव है ॥ ६५ ॥

प्रश्न—यदि ऐसा है तो—

"स्वयं मन्त्रों का ग्रहण करने वाले अल्पबुद्धि लोग कष्ट में पड़ते है ।"

इत्यादि के द्वारा पुस्तक से विद्या प्राप्त करने वालों का क्लेशभागत्व आदि

मते च पुस्तकाद्विद्याध्ययने दोष ईदृशः ।
उक्तो यस्तेन तद्दोषाभावेऽसौ न निषिद्धता ॥ ६६ ॥

मते इति—श्रीसिद्धामते, यद्वक्ष्यति—

'पुस्तकाधीताविद्याश्चेत्युक्तं सिद्धामते यतः ।' इति ।

तेनेति—भगवता, ईदृश इति—समन्तरोक्तः सस्फुरत्वाभावलक्षणः, पुस्तकावस्थिता हि मन्त्रा निर्वीर्या इति ततो गृहीतानां तेषां, न स्वसिद्धिसाधनाय निजं तेजः प्रस्फुरेत्, इति—पुस्तकाधीतविद्यानां सिद्ध्यभावात् क्लेशमात्रभागित्वमुक्तम्, यद्वक्ष्यति—

'लिपिस्थितस्तु यो मन्त्रो निर्वीर्यः सोऽत्र कल्पितः ।
सङ्केतबलतो नास्य पुस्तकात्प्रथते महः ॥' इति ।

स एव चेद्यदा दोषो न स्यात् तदा नायं कश्चिन्निषेधः, 'पुस्तकान्मन्त्रा नाध्येयाः' इति, पुस्तकाधीतानां हि मन्त्राणां समनन्तरोक्तया युक्त्या केषाञ्चन निजं तेजः प्रस्फुरेत्, यद्वक्ष्यति—

'ये तु पुस्तकलब्धेऽपि मन्त्रे वीर्यं प्रजानते ।
ते भैरवीयसंस्काराः प्रोक्ताः सांसिद्धिका इति ॥' इति ॥ ६६ ॥

रूप दोष दूसरी जगह क्यों कहा गया ? यह शङ्का कर कहते हैं—

सिद्धामत में भी पुस्तक से विद्याध्ययन में ऐसा ही दोष कहा गया है । इसलिये दोष के न रहने पर यह निषेध भी नहीं है ॥ ६६ ॥

मत में = सिद्धामत में । जैसा कि कहेंगें—

"और पुस्तक से विद्या प्राप्त करने वाले, क्योंकि ऐसा सिद्धामत में कहा गया है ।"

उसके द्वारा = भगवान् शिव के द्वारा । इस प्रकार का = पूर्वोक्त सस्फुरत्वाभावलक्षण वाला । पुस्तकों में स्थित मन्त्र निर्वीर्य होते हैं इसलिये वहाँ से लिये गये उनका, अपनी सिद्धि के साधन के लिये अपना तेज स्फुरित नहीं होता । पुस्तक से विद्या प्राप्त करने वाले को सिद्धि न मिलने के कारण केवल क्लेश का भागी कहा गया है । जैसा कि कहेंगे—

"जो मन्त्र लिपि में बद्ध है वह इस विषय में निर्वीर्य माना गया है । सङ्केतबल वाली पुस्तक से इसका (= मन्त्र का) तेज नहीं फैलता ।"

यदि यह दोष न हो, तो ऐसा कोई निषेध नहीं है—कि 'पुस्तक से मन्त्रों का अध्ययन नहीं करना चाहिये । 'पुस्तक से अधीत मन्त्रों का निजी तेज पूर्वोक्त युक्ति से किसी (उच्चस्तरीय पुरुष) के विषय में स्फुरित होता है । जैसा कि कहेंगे—

"जो लोग पुस्तक से उपलब्ध मन्त्र में भी वीर्य का ज्ञान करते है वे भैरवी

एतदभिप्रायावेदकं च तत्रत्यमेव ग्रन्थं पठति—

मन्त्रद्रव्यादिगुप्तत्वे फलं किमिति चोदिते ।
पुस्तकाधीतविद्या ये दीक्षासमयवर्जिताः ॥ ६७ ॥
तामसाः परहिंसादि वश्यादि च चरन्त्यलम् ।
न च तत्त्वं विदुस्तेन दोषभाज इति स्फुटम् ॥ ६८ ॥

इह खलु

'कथितं गोपितं तेभ्यस्तस्माल्लेख्यं न पुस्तके ।
गुरुवक्त्रात्तु लभ्येत अन्यथा न कदाचन ॥' इति ।

तथा

'स्वमन्त्ररक्षणं यत्नात्सर्वदा कारयेत्सुधीः ।'

इत्यादि भगवदुक्तं बहुशोऽवधार्य, मन्त्रादीनां पुस्तकाद्यलिखनेन 'गोपने किं प्रयोजनम्' ? इति देव्या प्रश्निते, भगवता 'पुस्तकाधीतविद्या' इत्यादिनोत्तरं दत्तं, मन्त्राणां हि पुस्तकादौ लिखने केचन 'दीक्षासमयवर्जिताः' अत एव 'तामसाः' तमो—बौद्धपौंस्नत्वेन द्विप्रकारमज्ञानं, तत्र भवा ज्ञानशून्याः, ततस्तानधीत्य

संस्कार से युक्त सिद्ध कहे गये हैं" ॥ ६६ ॥

इस अभिप्राय को बतलाने वाले उस स्थान के ग्रन्थ को पढ़ते हैं—

मन्त्र द्रव्य आदि के गुप्त रखने का क्या फल है—ऐसा प्रश्न होने पर (उत्तर है कि) जो पुस्तक से विद्याध्ययन करने वाले, दीक्षा की समयी चर्या से रहित, तामस वृत्ति वाले हैं तथा दूसरे की हिंसा वशीकरण आदि करते हैं, वे तत्त्ववेत्ता नहीं है इस कारण दोष के भागी होते हैं—यह स्पष्ट है ॥ ६७-६८ ॥

यहाँ

"उक्त (मन्त्र) उनसे छिपाया गया (अथवा उनसे गोपित मन्त्र कहा गया) इसलिये इसे पुस्तक में नहीं लिखना चाहिये । इसे गुरुमुख से प्राप्त करना चाहिये कभी भी अन्य प्रकार से नहीं ।"

"बुद्धिमान् सदा अपने मन्त्र की रक्षा प्रयत्न से करे ।"

इत्यादि भगवान् के वचन का बहुत प्रकार से विचार कर मन्त्र आदि को पुस्तक आदि में न लिखने से छिपाने में क्या प्रयोजन है ?—ऐसा देवी के द्वारा प्रश्न करने पर भगवान् ने 'पुस्तक से प्राप्त विद्या—" इत्यादि के द्वारा उत्तर दिया। मन्त्रों को पुस्तक आदि में लिखने पर कुछ लोग 'दीक्षासमय से रहित इसलिये तामस = तम अर्थात बौद्ध और पौरुष दो प्रकार का अज्ञान उसमें होने

'परहिंसाद्यर्थं चरन्ति' न पुनस्तत् सिद्ध्येत्, यतस्ते मन्त्रादीनां तत्त्वं न जानते गुरुमुखाभावात्, ततश्च स्फुटमेव तेषां निरयपातादिदोषभागित्वं स्यात्, यतस्ते पुस्तकाधीतत्त्वेन मन्त्रणां निर्वीर्यत्वात्, तत्तद्वश्याद्यारभमाणास्तत्सिध्द्यभावात्, शास्त्रे स्वयं शिथिलितास्थाः सन्तः, परेषामपि तत्र अनादरमुत्पादयन्ति—इति शास्त्रप्रक्रियोत्सादे निमित्तत्वमासादयेयुः ॥ ६७-६८ ॥

अत्रैव वैषम्यात् पदयुगं व्याचष्टे—

पूर्वं पदयुगं वाच्यमन्योन्यं हेतुहेतुमत् ।

अन्योन्यमिति—यतः पुस्तकाधीतविद्या अतो दीक्षासमयवर्जिताः, यतश्च दीक्षासमयवर्जिताः अतश्च पुस्तकाधीतविद्या इति ॥

एवमकल्पितकल्पकं गुरुमभिधाय कल्पितमपि अभिधातुमुपक्रमते

यस्तु शास्त्रं विना नैति शुद्धविद्याख्यसंविदम् ॥ ६९ ॥
गुरोः स शास्त्रंमन्विच्छुस्तदुक्तं क्रममाचरेत् ।

वाले = ज्ञानशून्य लोग । इसलिए उनको पढ़ कर परहिंसा आदि कार्य को करते हैं । इसलिए वह (मन्त्र) सिद्ध नहीं होता क्योंकि वे गुरुमुख से प्राप्त न होने के कारण मन्त्र आदि का तत्त्व नहीं जानते । इसलिये स्पष्टरूप से वे लोग नरकपात आदि दोष के भागी होंगे क्योंकि वे पुस्तक से अधीत होने से मन्त्रों के निर्वीर्य होने के कारण भिन्न—भिन्न वशीकरण आदि का आरम्भ कर उसकी सिद्धि न होने से शास्त्र में स्वयं शिथिलित आस्था वाले होते हुए उसमें दूसरे का भी अनादर उत्पन्न कराते हैं । इस प्रकार वे शास्त्रप्रक्रिया के सर्वनाश का कारण बनते हैं ॥ ६७-६८ ॥

यहाँ वैषम्य होने से पदयुग की व्याख्या करते हैं—

पहले के दोनों पद (= पुस्तकाधीतविद्याः और दीक्षासमयवर्जिताः) परस्पर कार्यकारण सम्बन्ध वाले हैं ॥ ६९- ॥

अन्योऽन्य = क्योंकि वे लोग पुस्तक से विद्या प्राप्त किये हैं अतः दीक्षा-समय (= दीक्षा के समय आचार्य या गुरु से निर्दिष्ट आचार के पालन) से रहित है । क्योंकि (वे) दीक्षासमय से रहित है अतः पुस्तक से प्राप्त विद्या वाले हैं ॥ ६८-६९ ॥

इस प्रकार अकल्पितकल्पक गुरु का कथन कर कल्पित (गुरु) को भी कहने का उपक्रम करते हैं—

जो शास्त्राध्ययन के बिना शुद्धविद्या नामक संविद् का लाभ नहीं करता, गुरु से शास्त्र को जानने की इच्छावाला वह उस (= शास्त्र) में उक्त क्रम का आचरण करे ॥ -६९-७०- ॥

यः कश्चित् पुनः शास्त्रपरामर्शमन्तरेण सत्तर्कात्मिकां शुद्धविद्याख्यां संविदं नाभ्येति—यस्य स्वत एव सत्तर्को नोदियात्, स कस्यापि अकल्पितादेर्गुरोः सकाशात् शुश्रूषादिना शास्त्रमन्वेष्टुमिच्छुः सन् वृद्धव्यवहाराद्यधिगतं शास्त्रोक्तमेव 'इदं कृत्वा इदं कुर्यात्' इत्येवमात्मकं क्रममाचरेत्, येनास्य गुर्वाराधनक्रमेण शुद्धविद्योदयः स्यादिति ॥ ६९ ॥

तदाह

येन केनाप्युपायेन गुरुमाराध्य भक्तितः ॥ ७० ॥
तद्दीक्षाक्रमयोगेन शास्त्रार्थं वेत्त्यसौ ततः ।
अभिषेकं समासाद्य यो भवेत्स तु कल्पितः ॥ ७१ ॥
सन्नप्यशेषपाशौघविनिवर्तनकोविदः ।

इह खलु

'तमराध्य ततस्तुष्टाद्दीक्षामासाद्य शाङ्करीम् ।'

इत्यादिशास्त्रोक्तक्रमेण प्रथमं गुरोरेव तावदाराधनं कार्यं, तच्च नोपायमन्तरेण भवेत्—इतितराम् तत्स्वीकारे यतितव्यम्, स च नैकः—आराधनीयानामानैक्यात्, कश्चिद्धि शुश्रूषया, कश्चिद्धनेन, कश्चिच्च प्रतिविद्यादिना आराध्यते, इति 'येन केनाप्युपायेन' इति सामान्येनोक्तं—यस्य हि यथाराधनं सिध्यति तस्य तथा

जो कोई शास्त्र का परामर्श न कर सत्तर्क रूप शुद्धविद्या नामक संविद् को नही प्राप्त करता = जिसको स्वतः सत्तर्क उदित नहीं होता, वह किसी अकल्पित आदि गुरु के पास से सुश्रूषा आदि के द्वारा शास्त्र के अन्वेषण का इच्छुक वृद्ध-व्यवहार आदि से प्राप्त (या ज्ञात) शास्त्रोक्त 'यह करके यह करना चाहिये' इस प्रकार के क्रम का आचरण करता है जिससे इसको गुरुआराधन के क्रम से शुद्ध-विद्या का उदय होता है ॥ ६९-७० ॥

वह कहते हैं—

जिस किसी भी उपाय से भक्तिपूर्वक गुरु की आराधना कर उस (के द्वारा दी गयी) दीक्षाक्रम के योग से यह शास्त्र के अर्थ को जान लेता है। फिर अभिषेक को प्राप्त कर वह कल्पित गुरु हो जाने पर भी समस्त पाशसमूह का नाश करने में विद्वान् होता है ॥ -७०-७२- ॥

"उसकी आराधना कर सन्तुष्ट उस (गुरु) से शाङ्करी दीक्षा को प्राप्त कर'

इत्यादि शास्त्रोक्त क्रम से पहले गुरु की ही आराधना करनी चाहिये । और वह बिना उपाय के नहीं होता इसलिये उसके स्वीकार के विषय में प्रयास करना चाहिये। वह (प्रयास) एक नहीं है क्योंकि आराधनीय (गुरु) अनेक (प्रकार के) हैं। कोई (आराधनीय) सेवा से, कोई धन से, और कोई प्रतिविद्या आदि के द्वारा

कार्यमिति भावः, तच्च न दृष्टवत्कार्यार्थमेव कार्यम्, इत्युक्तं 'भक्तित' इति, आराधिताच्च तस्माद्दीक्षाक्रमसंबन्धो भवेत्—येनास्य शास्त्राधिगमः सिद्ध्येत्, अन्यथा हि शास्त्रश्रवणमात्रेऽपि अधिकारो न स्यात्, तदधिगमे पुनः का नाम संभावनेति भावः, यदुक्तम्—

'अदीक्षितानां पुरतो नोच्चरेच्छिवसंहिताम् ।' इति ।

तदनन्तरं च

'संहितापारगस्येह सेकः कार्योऽन्यथा नहि ।'

इत्याद्युक्तदृशा 'अभिषेकम्' अर्थात् तस्मादेव गुरोः सम्यक् पूर्णज्ञानादि-रूपत्वेनासाद्य, यः सर्वत्रैव परानुग्रहादावधिकृतो भवेत्, स पुनराचार्यान्तरेण निष्पादितत्त्वात् कल्पितोऽपि सन्, अशेषस्य पाशौघस्य, विशेषण—निःसंस्कारं, निवर्तने कोविदः—प्रगल्भते इत्यर्थः । अनेन कल्पितत्त्वेऽपि अस्य फलतः कश्चिदकल्पितात्र विशेषः—इत्यावेदितम् । परमेश्वर एव हि आचार्यमूर्तिमाश्रित्य अशेषपाशौघविनिवर्तनं कुर्यात्, तदुक्तम्—

'यस्मान्महेश्वरः साक्षात्कृत्वा मानुषविग्रहम् ।

आराधित होता है । इसलिये सामान्यतः जिस किसी उपाय से कहा गया । जिसकी आराधना जिस प्रकार सिद्ध हो उसको वैसे ही करना चाहिये—यह तात्पर्य है । उसे दृष्ट के समान कार्य के लिये ही नहीं करना चाहिये—इसलिये कहा गया—भक्ति से। आराधित उस (गुरु) से दीक्षाक्रम का सम्बन्ध हो जाता है जिससे इसको शास्त्र का ज्ञान हो जाता है अन्यथा शास्त्र के श्रवण में भी अधिकार नहीं होता फिर उसके ज्ञान के विषय में क्या सम्भावना होगी—यह भाव है । जैसे कि कहा गया है—

"अदीक्षित के सामने शिवसंहिता का उच्चारण नहीं करना चाहिये ।"

और उसके बाद

"संहिता के विद्वान् का ही अभिषेक करना चाहिये अन्यथा नहीं ।"

इत्यादि उक्त दृष्टि से 'अभिषेक' अर्थात् उसी गुरु से भलीभाँति पूर्ण ज्ञान आदि रूप को प्राप्त करके जो सर्वत्र परानुग्रह आदि के विषय में अधिकारी होता है वह दूसरे आचार्य से रचित होने के कारण कल्पित होता हुआ भी, समस्त पाश-समूह के, विशेषरूप से = संस्कारसहित, हटाने में विचक्षण—प्रगल्भ होता है। इससे यह कहा गया कि इसके कल्पित होने पर भी फल की दृष्टि से अकल्पित (गुरु) से (इस कल्पित गुरु का) कोई अन्तर नहीं है । परमेश्वर ही आचार्य की मूर्ति का आश्रय लेकर । समस्त पाशसमूह का नाश करते हैं । वही कहा गया है—

"जिस कारण महेश्वर साक्षात् मनुष्य का शरीर धारण कर कृपावश गुरु के

कृपया गुरुरूपेण मग्नाः प्रोद्धरति प्रजाः ॥' इति ।

तदत्र किं वस्तुतः कल्पिताकल्पितविभागेन इति भावः ॥ ७०-७१ ॥

एवमकल्पितत्त्वेऽपि कस्यचिद्यथा स्वात्मज्ञानपारिपूर्ण्याय भावनादिना कल्पितत्त्वमपि संभवेदिति 'अकल्पितकल्पकः' उक्तः, तथा कल्पितस्यापि गुर्वाद्यनपेक्षमेव स्वप्रतिभाबलात् क्वचिच्छास्त्रेऽधिगमो जायते—इत्यकल्पितत्त्वं भवेत्, इति कल्पिताकल्पिताख्यं गुरुमप्यभिधातुमाह—

यो यथाक्रमयोगेन कस्मिंश्चिच्छास्त्रवस्तुनि ॥ ७२ ॥
आकस्मिकं व्रजेद्बोधं कल्पिताकल्पितो हि सः ।

यः कश्चित्कल्पितो गुरुः, कस्मिंश्चित्—लोकोत्तरे शास्त्रीये पारमार्थिकप्रमेयरूपे वस्तुनि, आकस्मिकं—गुर्वाद्यनपेक्षमेव, यथाक्रमयोगेन—यथावस्तु, बोधमासादयेत्, स कल्पितत्त्वेऽपि स्वयमेव बोधप्रवृत्तेरकल्पितः ॥ ७२ ॥

ननु कल्पितस्य गुरोः क्वचिदंशे यद्यकल्पितत्त्वं भवेत् तावता किम् ? इत्याशङ्क्याह—

रूप से (अज्ञान में) मग्न प्रजाओं का उद्धार करते हैं ।''

तो यहाँ वस्तुतः कल्पितअकल्पित विभाग से क्या मतलब ? यह भाव है ॥ ७०-७१ ॥

इस प्रकार अकल्पित होने पर भी जैसे किसी को अपने ज्ञान की पूर्णता के लिये भावना आदि के कारण किसी का कल्पित होना भी सम्भव है इसलिये 'अकल्पितकल्पक' कहा गया उसी प्रकार कल्पित का भी गुरु आदि से निरपेक्ष अपनी प्रतिभा के बल से किसी शास्त्र का ज्ञान भी हो जाता है—इसलिये वह अकल्पित होता है—इसलिये कल्पिताकल्पित नामक गुरु को बतलाने के लिये कहते हैं—

जो क्रम का अनुसरण करने से किसी शास्त्र के अर्थ का आकस्मिक बोध प्राप्त कर लेता है वह कल्पिताकल्पित (गुरु माना जाता) है ॥ -७२-७३- ॥

जो = कोई कल्पित गुरु, किसी = लोकोत्तर शास्त्रीय पारमार्थिक प्रमेयरूप वस्तु में, आकस्मिक = गुरु आदि से निरपेक्ष, यथाक्रमयोग से = वस्तु के अनुसार, ज्ञान को प्राप्त करता है वह कल्पित होने पर भी स्वयं ही बोध होने के कारण अकल्पित होता है ॥ ७२-७३ ॥

प्रश्न—कल्पित गुरु यदि किसी अंश में अकल्पित हो जाता है तो उससे क्या ? यह शङ्का कर कहते हैं—

तस्य योऽकल्पितो भागः स तु श्रेष्ठतमः स्मृतः ॥ ७३ ॥
उत्कर्षः शुद्धविद्यांशतारतम्यकृतो यतः ।

श्रेष्ठतमत्वे शुद्धविद्यातारतम्यकृत उत्कर्षो हेतुः—शुद्धविद्याया एव तरतमभावो हि अकल्पितत्त्वादौ निमित्तमिति भावः ॥ ७३ ॥

ननु 'कल्पितस्याकल्पितस्य वा गुरोः फले न कश्चिद्विशेषः' इति समनन्तरमेवोक्तं, तदकल्पितस्य कल्पितापेक्षया श्रेष्ठतमत्वे किं निमित्तम्? इत्याशङ्क्याह—

यथा भेदेनादिसिद्धाच्छिवान्मुक्तशिवा ह्यधः ॥ ७४ ॥
तथा सांसिद्धिकज्ञानादाहृतज्ञानिनोऽधमाः ।
तत्संनिधौ नाधिकारस्तेषां मुक्तशिवात्मवत् ॥ ७५ ॥
किं तु तूष्णीं-स्थितिर्यद्वा कृत्यं तदनुवर्तनम् ।

यद्यपि भेदेश्वरवादे

'.........................परेह शिवसमता ।'

इत्याद्युक्तेः अणूनां सर्वज्ञत्वसर्वकर्तृत्वाद्यभिव्यक्तेरविशेषात् 'शिवसाम्यं नाम मुक्तिरिष्यते' तथापि मुक्ताणुभ्योऽस्यास्ति विशेषो—यदयमनादिसिद्ध इति, तेषां

उसका जो अकल्पित भाग है वह श्रेष्ठतम माना गया है । क्योंकि वह उत्कर्ष शुद्धविद्या के अंश के तारतम्य से बना है ॥ -७३-७४- ॥

श्रेष्ठतम होने में शुद्ध विद्या के तारतम्य से विहित उत्कर्ष कारण है = शुद्ध विद्या का ही तरतम भाव अकल्पितत्व आदि मे कारण होता है ॥ ७३ ॥

प्रश्न—कल्पित या अकल्पित गुरु के फल में कोई अन्तर नहीं है यह अभी—अभी कहा गया तो फिर कल्पित की अपेक्षा अकल्पित के श्रेष्ठतम होने में क्या हेतु है ? यह शङ्का कर कहते हैं—

जिस प्रकार भेदेश्वरवाद में आदिसिद्ध शिव की अपेक्षा मुक्त शिव निम्नस्तर के होते हैं उसी प्रकार सांसिद्धिक ज्ञान वालों की अपेक्षा आहृत ज्ञान वाले निम्नश्रेणी के हैं । उनके सामने उन (= आहृत कल्पित ज्ञानियों) का मुक्त शिवों की भाँति कोई अधिकार नहीं होता या तो वे (= कल्पित गुरु) चुप रहते हैं या उसका (= अकल्पित गुरु का) अनुवर्त्तन करते हैं ॥ -७४-७६- ॥

यद्यपि भेदेश्वरवाद में—

".....................यहाँ शिवसाम्य पर है ।"

इत्यादि उक्ति से अणुओं की सर्वज्ञत्व सर्वकर्तृत्व आदि की अभिव्यक्ति के समान होने से शिवसाम्य मुक्ति मानी जाती है । तथापि मुक्त अणुओं से इसकी यह

पुनःसर्वज्ञत्वादि तदुपाधिकम्, इति यथा सर्वज्ञत्वाद्यविशेषेऽपि तस्मान्मुक्तशिवा न्यूनाः, तथैव अकल्पितादपि गुरोः कल्पितादयः, अस्य हि स्वत एव प्रवृत्तेरनुपाधिकं ज्ञानम्, एषां पुनः परोपाधिकमिति, अत एव यथा परशिवसंनिधौ मुक्तशिवानां सृष्ट्याद्यधिकारित्वे नाधिकारः, तथैव सांसिद्धिकस्य गुरोः संनिधाने कल्पितादीनां दीक्षादौ, इति युक्तमुक्तम् अकल्पितः श्रेष्ठतमः' इति । ननु यद्येवं तत् किं तत्संनिधौ मुक्ताणुवत् कल्पितादयोऽपि किञ्चित् कुर्वन्ति न वा ? इत्याशङ्क्योक्तं 'किं तु तूष्णींस्थितिः' इत्यादि ॥ ७४-७५ ॥

ननु इह स्वतः प्रवृत्ततर्कस्यापि अकल्पितस्य यन्नाम शास्त्रादिसापेक्षत्वं प्रागुक्तं, तत् किमस्य, दूषणमुत भूषणम् ? इत्याशङ्क्याह—

यस्त्वकल्पितरूपोऽपि संवाददृढताकृते ॥ ७६ ॥
अन्यतो लब्धसंस्कारः स साक्षाद्भैरवो गुरुः ।

यः पुनरकल्पितरूपोऽपि गुरुः स्वानुभवमात्रगोचरस्य स्वयंप्रवृत्तस्य ज्ञानस्य परत्रापि तथोपलभ्यमानत्वात्मना संवादनेन 'एवमेतत् नान्यथा' इत्येवं रूपं दार्ढ्यं कर्तुम्' अन्यतो—गुरुशास्त्रादेः समस्तात्, गुरुतः शास्त्रतो वा

विशेषता है कि—यह अनादि सिद्ध है । और उनका सर्वज्ञत्व आदि उसकी उपाधि वाला है । इसलिये जैसे सर्वज्ञत्व आदि के समान होने पर भी मुक्त शिव उसकी अपेक्षा हीन है उसी प्रकार कल्पित आदि अकल्पित गुरु से (हीन) है । स्वतः प्रवृत्ति के कारण इसका ज्ञान निरुपाधिक है और इनका परोपाधिक ।

इसलिये जैसे परशिव के निकट मुक्तशिवों का सृष्टि आदि का अधिकारी होने का अधिकार नहीं है उसी प्रकार सांसिद्धिक गुरु के पास रहने पर कल्पित आदि का दीक्षा आदि में (अधिकार नहीं) है । इसलिये ठीक कहा गया—'अकल्पित श्रेष्ठतम है ।' प्रश्न—यदि ऐसा है तो क्या निकटवर्त्ती मुक्त अणु के समान कल्पित आदि कुछ करते हैं या नहीं ? यह शङ्का कर कहा गया 'किन्तु चुपचाप रहते हैं इत्यादि ॥ ७४-७६ ॥

प्रश्न—स्वतः तर्क प्राप्त अकल्पित (गुरु) के लिये शास्त्र आदि की अपेक्षा जो कि पहले कही गई तो वह इसके लिये क्या दोष है या अलङ्करण ? यह शङ्का कर कहते हैं—

जो अकल्पित रूप वाला भी संवाददृढ़ता के लिये दूसरे (गुरु आदि) से संस्कार प्राप्त करता है वह गुरु साक्षात् भैरव होता है ॥ -७६-७७- ॥

जो अकल्पित रूप वाला भी गुरु केवल अपने अनुभव के विषयभूत स्वयं प्राप्त ज्ञान को दूसरे में उसी प्रकार प्राप्त कराने रूप संवादन से 'यह ऐसा है अन्यथा नहीं है' इस प्रकार की दृढ़ता को बनाने के लिये दूसरे से = गुरु शास्त्र आदि सब से या अलग-अलग गुरु से या शास्त्र से अतिशय को प्राप्त करता है

व्यस्तात्, प्राप्तातिशयः स स्वात्मनि नैराकाङ्क्ष्येण 'साक्षाद्भैरवः' पूर्णपरसंविदाविष्ट इत्यर्थः ॥ ७६ ॥

ननु कथं संवादमात्रादेव एतत्स्यात् ?—इत्याशङ्क्याह—

यतः शास्त्रक्रमात्तज्ज्ञगुरुप्रज्ञानुशीलनात् ॥ ७७ ॥
आत्मप्रत्ययितं ज्ञानं पूर्णत्वाद्भैरवायते ।

यतः शास्त्राधिगमक्रमेण शास्त्रज्ञगुरुप्रज्ञाया अनुशीलनाच्च 'इत्थमिदं, नानित्थम्' इत्येवं रूपात् पर्यालोचनात् ससंवादं सत् ज्ञानम् आत्मनि सञ्जातप्रत्ययम् 'एवमेवैतत्, नान्यथा' इत्येवंनिश्चयोत्पादात् दार्ढ्यं प्राप्तम्, अत एव नैराकाङ्क्ष्यात् पूर्णं सत् भैरवायते—निराशंसानुत्तरपरज्ञानरूपतया प्रस्फुरति, इत्यर्थः ॥ ७७ ॥

अत एवागमोऽप्येवम्, इत्याह—

तेन श्रीकिरणोक्तं यद्गुरुतः शास्त्रतः स्वतः ॥ ७८ ॥
त्रिप्रत्ययमिदं ज्ञानमिति यच्च निशाटने ।
तत्सङ्घातविपर्यासविग्रहैर्भासते तथा ॥ ७९ ॥

वह अपने में निराकाङ्क्ष होने से साक्षात् भैरव = पूर्णपरसंविद् से आविष्ट हो जाता है ॥ ७६-७७ ॥

प्रश्न—यह केवल संवाद से ही कैसे होता है ? यह शङ्का कर कहते हैं—

क्योंकि शास्त्रज्ञान के क्रम से और शास्त्रज्ञगुरु की प्रज्ञा के अनुशीलन से आत्मविमर्शरूप ज्ञान पूर्ण होने के कारण भैरव जैसा हो जाता है ॥ -७७-७८- ॥

चूँकि शास्त्रज्ञान के क्रम से तथा शास्त्रज्ञ गुरु की प्रज्ञा के अनुशीलन से 'यह ऐसा है ऐसा नहीं है' इस प्रकार के पर्यालोचन से संवादयुक्त ज्ञान जो कि अपने में उत्पन्न विश्वास वाला है = 'यह ऐसा ही है अन्यथा नहीं' इस प्रकार का निश्चय उत्पन्न होने से दृढ़ता को प्राप्त है, इसलिये निराकाङ्क्ष होने से पूर्ण होता हुआ भैरव बन जाता है = निराकाङ्क्ष अनुत्तर पर ज्ञान के रूप में स्फुरित होता है ॥ ७७-७८ ॥

इसलिये आगम भी ऐसा है—यह कहते हैं—

इसलिये किरणागम में जो कहा—कि गुरुतः शास्त्रतः स्वतः । अथवा श्री निशाटन में जो कहा कि यह ज्ञान तीन कारणों वाला (तीन कारणों से उत्पन्न होता) है, वह उन (तीनों) के समूह से अथवा किसी एक या दो से होता है ॥ -७८-७९ ॥

त्रिप्रत्ययमिति, यदुक्तं तत्र—

'त्रिप्रत्ययमिदं ज्ञानमात्मा शास्त्रं गुरोर्मुखम् ।'

इति, तेनाकल्पितस्यापि गुर्वाद्यपेक्षणेन हेतुना, श्रीकिरणादौ यत् परतत्त्वज्ञाने गुर्वादि कारणत्रयमुक्तं तत् सङ्घातादिरूपत्वेन, तथा—उक्तेन प्रकारेण, भासते—सर्वस्यैव अनुभवसिद्धतया प्रस्फुरतीत्यर्थः, सङ्घातः—समस्तत्वं, विपर्यासः—उक्तक्रमान्यथाभावः, कस्यचित् स्वतः प्रवृत्तेऽपि ज्ञाने गुरुशास्त्राभ्यां पूर्णता भवेत्, इति भावः, विग्रहो—व्यस्तत्वं,—कस्यचिद्धि गुर्वादिभिरेककैरेव ज्ञानं जायते, इत्याशयः ॥ ७८-७९ ॥

ननु यदि नाम परतत्त्वज्ञाने गुर्वादीनां समस्तानामेव कारणत्वं, तत् कथं व्यस्तानामप्युक्तं, व्यस्तत्वेऽपि वा एकस्मादेव कार्यसिद्धेः किमन्येन ? इत्याशङ्क्याह—

करणस्य विचित्रत्वाद्विचित्रामेव तां छिदम् ।
कर्तुं वासी च टङ्कं च क्रकचं चापि गृह्यते ॥ ८० ॥
तावच्च छेदनं ह्येकं तथैवाद्याभिसंधितः ।

तक्षादयो हि करणस्य छिदिक्रियायां साधकतमस्य वास्यादेर्विचित्रत्वात्

तीन कारणों वाला । जैसा कि वहाँ कहा गया है—

"यह ज्ञान आत्मा शास्त्र और गुरुमुख (इन) तीन कारणों वाला है ।"

इसलिये अकल्पित का भी गुरु आदि की अपेक्षारूप हेतु से किरणसंहिता आदि में परतत्त्व के ज्ञान के विषय में जो गुरु आदि तीन कारण कहे गये हैं वह समूह आदि के रूप में । तथा = उक्त प्रकार से, भासित होता है = सबको अनुभवसिद्ध होकर स्फुरित होता है । सङ्घात = समस्तता । विपर्यास = उक्त क्रम का अन्यथा होना । किसी की, ज्ञान के स्वतः प्रवृत्त होने पर भी, पूर्णता गुरु और शास्त्र से होती है यह भाव है । विग्रह = व्यस्तता किसी को गुरु आदि किसी एक से ही ज्ञान हो जाता है ॥ ७८-७९ ॥

प्रश्न—यदि परतत्त्व के ज्ञान के विषय में गुरु आदि सभी कारण हैं तो व्यस्त भी (कारण) कैसे कहे गये ? व्यस्त होने पर भी एक ही से कार्य सिद्ध होने पर अन्य से क्या (प्रयोजन) ? यह शङ्का कर कहते हैं—

साधनों के विचित्र होने से विचित्र कटाई को करने के लिये (शिल्पी) बँसुला, छीनी और आरी भी लेता है लेकिन उनसे छिदा तो एक ही होती है, उसी प्रकार आद्य अभिसन्धान के भेद से साधन भिन्न होते हैं ॥ ८०-८१- ॥

बढ़ई आदि काटने की क्रिया में करण = साधकतम, बसुला आदि के विचित्र

तथाविधामेव तां छिदं—द्वैधीभावं कर्तुं समस्तमसमस्तं वा तदुपाददते, इति वाक्यार्थः । लोके हि सरले यथा महति दारुणि वास्यादिभिर्व्यस्तैरवच्छेदः क्रियते वक्रकोटरादौ च समस्तैरित्याशयः । ननु करणवैचित्र्यात् कार्यवैचित्र्ये नास्ति विवादः, तत् वास्यादेः करणस्य भेदाच्छिदिक्रियापि भिन्नभिन्नैव, इति—व्यस्तैः समस्तैर्वा कथमेभिरेकमेव कार्यं क्रियते? इत्याशङ्क्याह—'तावच्च' इत्यादि, तावत्—तत्तद्वास्यादिकरणनिर्वर्त्यमियत् यच्छेदनं तद्ध्येकं, न भिन्नभिन्नं, तथैव चिच्छिदिषात्मन एकस्यैव आद्यस्याभिसंधानस्य भावात्—परामर्शभेदादेव हि परामृश्यभेदो भवेदिति भावः, एवमेकस्यामपि छिदिक्रियायां वास्यादीनां समस्तानां व्यस्तानां च करणत्वे न कश्चिद्दोषः ॥ ८० ॥

एतदेव प्रकृते योजयति—

इत्थमेव मितौ वाच्यं करणस्य स्वकं वपुः ॥ ८१ ॥
न स्वतन्त्रं स्वतो मानं कुर्यादधिगमं हठात् ।
प्रमात्राश्वासपर्यन्तो यतोऽधिगम उच्यते ॥ ८२ ॥
आश्वासश्च विचित्रोऽसौ शक्तिपातवशात्तथा ।
प्रमितेऽपि प्रमाणानामवकाशोऽस्त्यतः स्फुटः ॥ ८३ ॥

होने से उस प्रकार की उस कटान = दो भागों में बाँटने को, करने के लिये सम्पूर्ण या अलग—अलग उस (कारण) को लेते हैं—यह वाक्यार्थ है । जैसे लोक में सरल बड़ी लकड़ी को अलग—अलग बसुला आदि से काटा जाता है और टेढ़ी खोढरा आदि को (काटने के लिए) सब (हथियार काम में लाये जाते हैं)—यह आशय है । प्रश्न—करण की विचित्रता से कार्य की विचित्रता में किसी को विरोध नहीं है । तो बसुला आदि साधन के भेद से छेदन क्रिया भी भिन्न-भिन्न होगी । फिर व्यस्त या समस्त इनके द्वारा कैसे एक ही कार्य किया जाता है ?—यह शङ्का कर कहते हैं—उतना इत्यादि । भिन्न-भिन्न बसुला आदि साधन के द्वारा विहित इतनी जो कटान है वह तो एक ही है न कि भिन्न-भिन्न । उसी प्रकार छेदन की इच्छा वाले एक ही प्रथम अभिसन्धान के होने से, परामर्श का भेद होने से ही परामृश्य का भेद होता है—यह भाव है । इस प्रकार एक ही छिदिक्रिया के विषय में सभी या अलग—अलग बसुला आदि के करण होने में कोई दोष नहीं है ॥ ८० ॥

इसी को प्रस्तुत से जोड़ते हैं—

इसी प्रकार प्रमिति में करण (= गुरु आदि) का अपना स्वरूप (समझना चाहिये) । प्रमाण स्वयं (अपने रूप में स्वतन्त्र नहीं है (कि वह) हठात् (= प्रमाता के विना) ज्ञान कर ले । क्योंकि अधिगम प्रमाता के विश्वासपर्यन्त माना जाता है । शक्तिपात के अनुसार विश्वास भी विचित्र होता है । पदार्थ के उस प्रकार के प्रमित होने पर भी प्रमाणों के लिये

करणस्य—गुर्वादेः, स्वकम्—अनन्यसाधारणं, वपुः—स्वरुपं, तर्कज्ञानात्मिकायां मितौ, इत्थम्—उक्तेन व्यस्तसमस्तात्मना प्रकारेणैव वाच्यं, यद्यपि गुर्वादेरेकैकस्यापि तत्त्वाधिगमेऽस्ति साधकतमत्वं, तथापि यावता प्रमातुराकाङ्क्षा विरमेत्, तावदेव एषां व्यस्तानां समस्तानां वा विनियोगः, इत्याकूतम्, अत एव न मानं नाम मानत्वात्स्वतन्त्रम् इत्येव बलात्कारेण प्रमात्रपेक्षां विनां अधिगमं विदध्यात्, अधिगमो हि नाम 'ज्ञातोऽयं मयार्थः' इत्येवंपर्यवासनः प्रमातुराश्वासः, स एव चेन्नोत्पन्नः को नाम अधिगमार्थः, स च आश्वासः शक्तिपातस्य तीव्रतमत्वादिभेदात् तथा तीव्रतमत्वादिनैव क्रमेण विचित्रो, येन—गुर्वादेर्व्यस्तात् समस्ताद्वा उत्पद्यते इत्याशयः, अत एव बहिः प्रमितेऽपि अर्थे प्रमातुराश्वासानुत्पादात् प्रमाणान्तराणामस्ति निर्बाध उपयोगः ॥ ८१-८३ ॥

ननु अर्थालोकादिरूपा सामग्री चेन्न सङ्घटिता, तत् ज्ञानमेव नोत्पद्यते, इति कस्तत्र अधिगमार्थः अथ चेत् सङ्घटिता, तत् प्रथमाक्षसंनिपात एव प्रत्ययान्तरानपेक्षिणः प्रमातुरनधिगतार्थविषयोऽधिगमः स्यात्, एवमपि उत्तरकालं धारावाहीनि विज्ञानानि तत्र चेत्प्रवर्तन्ते, तत् प्रवर्तन्तां नाम, को दोषः, तेषां पुनस्तत्रैव प्रमाणत्वं न भवेत्—आद्येनैव ज्ञानक्षणेन अपूर्वस्यार्थस्य प्रकाशनात्, अपूर्वार्थप्रकाशत्वमेव हि नाम प्रमाणत्वम्, यदाहुः—

स्पष्ट अवकाश रहता है ॥ -८१-८३ ॥

करण का = गुरु आदि का । स्वक = अपना निजी । वपु = स्वरूप । तर्कज्ञानरूप प्रमिति में, इस प्रकार = उक्त समस्त व्यस्त रूप प्रकार, से ही कहना चाहिये । यद्यपि तत्त्व की प्राप्ति में गुरु आदि एक-एक साधकतम है तथापि जितने से प्रमाता की आकांक्षा शान्त हो जाय, इन व्यस्त या समस्त में से उतने का ही विनियोग होता है—यह सङ्केत है । इसलिये प्रमाण, प्रमाण होने के कारण स्वतन्त्र है इसलिये यह प्रमाता की अपेक्षा के विना जबर्दस्ती ज्ञान करा देगा—ऐसा नहीं है। ज्ञान 'मैंने यह अर्थ जान लिया' यहाँ समाप्त होने वाला प्रमाता का विश्वास है। यदि वही उत्पन्न नहीं हुआ तो अधिगम का अर्थ क्या है ? और वह विश्वास शक्तिपात के तीव्र तीव्रतम आदि भेद से उसी प्रकार तीव्र तीव्रतम आदि क्रम से विचित्र होता है जिससे व्यस्त या समस्त गुरु आदि से उत्पन्न होता है । इसलिये बाहर ज्ञात भी अर्थ (= विषय) में प्रमाता का विश्वास उत्पन्न न होने से दूसरे प्रमाणों का निर्बाध उपयोग होता है ॥ ८१-८३ ॥

प्रश्न—यदि पदार्थ आलोक आदि रूप सामग्री एकत्रित न हो तो ज्ञान ही उत्पन्न नहीं होगा फिर वहाँ अधिगम का क्या तात्पर्य ? और सङ्घटित हो गई तो पहली दृष्टि पड़ने पर ही कारणान्तर की अपेक्षा न करने वाले प्रमाता को अनधिगतार्थविषयक ज्ञान हो जायेगा । फिर भी बाद में यदि धारावाहिक ज्ञान होते हैं तो हों क्या हर्ज है ? वे वहीं प्रमाण बनेगें क्योंकि प्रथम ज्ञानक्षण ने अपूर्व अर्थ का

'अनधिगतविषयं प्रमाणम्, अज्ञातार्थप्रकाशो वा ।'

इति, प्रमातुरपि एतावतैव फलवत्त्वं 'ज्ञातोऽयं मयार्थः' इत्येवंसंतोषाभिमानात्, न च एतत् औत्तरकालिकानां धारावाहिनां विज्ञानानां संभवति, इति कथमुक्तं 'प्रमितेऽपि प्रमाणानामवकाशः' इति ?—इत्याशङ्क्याह—

दृष्ट्वा दृष्ट्वा समाश्लिष्य चिरं सञ्चर्व्य चेतसा ।
प्रिया यैः परितुष्येत किं ब्रूमः किल तान्प्रति ॥ ८४ ॥

दृष्ट्वा दृष्ट्वेति—आभीक्ष्ण्येनाश्लेषसञ्चर्वणयोरपि असौ अर्थाल्लभ्यते, चिर-शब्दाद्वा तेन रूपज्ञानात्मकैः स्पर्शज्ञानात्मकैस्तत्पृष्ठभाविविकल्पज्ञानात्मकैश्च शतशः प्रवृत्तैः प्रमाणैः प्रमितायां प्रियायां येषामाश्वासलक्षणः परितोषो जायते, तान् प्रति किं ब्रूमः—प्रमात्राश्वासपर्यन्तस्याधिगमस्य आद्येनेव ज्ञानक्षणेन उत्पादेऽनुभवविरोधान्न किञ्चित्, इति यावत्, अतश्च

'एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो न भागो दृष्टः स्याद्यः प्रमाणैः परीक्ष्यते ॥'

इत्याद्युक्तमयुक्तमेव, इति भावः, तेन

प्रकाश कर दिया और अपूर्व अर्थ का प्रकाश होना ही प्रमाण है । जैसा कि कहते हैं—

"जो अप्राप्त विषय का प्रापक हो या अज्ञात का ज्ञापक हो वह प्रमाण है ।"

प्रमाता की भी सफलता इतने से ही है । क्योंकि 'मैंने यह अर्थ जान लिया है,—इस प्रकार के सन्तोष का अनुभव होता है । और यह उत्तरकालिक धारावाहिक ज्ञानों के विषय में सम्भव नहीं है । फिर कैसे कहा गया कि ज्ञात वस्तु के विषय में भी प्रमाणों का अवसर होता है । यह शङ्का कर कहते हैं—

बार-बार देखकर आलिङ्गन कर और बहुत देर तक रसास्वाद करने पर जिनके द्वारा मन से प्रिया को सन्तोष मिलता है उनके प्रति क्या कहा जाय ? ॥ ८४ ॥

देखदेख कर बार-बार आलिङ्गन और चित्तचर्वणा का भी यह (ज्ञान) अर्थात् प्राप्त होता है । अथवा चिरशब्द से (यह प्राप्त होता है ।) इससे रूपज्ञानात्मक स्पर्शज्ञानात्मक और उसके बाद होने वाले विकल्पज्ञानात्मक सैकड़ों प्रवृत्त प्रमाणों के द्वारा प्रमित प्रिया के विषय में जिनका विश्वासलक्षणवाला सन्तोष उत्पन्न होता है उनसे (हम) क्या कहें । प्रमाता के विश्वासपर्यन्त ज्ञान की प्रथम ज्ञानक्षण के द्वारा उत्पत्ति के अनुभवविरोध होने से कुछ नहीं (कह सकते) । इसलिये—

"स्वयं प्रत्यक्ष होने वाले एक अर्थस्वभाव का कौन सा अन्य भाग नहीं देखा गया जिसका कि प्रमाणों के द्वारा परीक्षण किया जाय ।"

'यत्रापि स्यात्परिच्छेदः प्रमाणैरुत्तरैः पुनः ।
नूनं तत्रापि पूर्वेण सोऽर्थो नावधृतस्तथा ॥'

इत्याद्युक्तयुक्त्या पूर्वप्रमाणानधिगतः कश्चिदपूर्व एवांशः प्रमाणान्तरैरवश्यमधिगम्यते, येन पर्यन्ते प्रमातुः समाश्वासोत्पादः स्यात् । यत् पुनरन्यैः

'नैवाधिकपरिच्छेदः प्रमाणैरुत्तरैर्ध्रुवम् ।
धारावाहिषु बोधेषु कोऽधिकोऽर्थः प्रकाशते ॥'

इत्याद्युक्त्या गृहीतग्राहिणामपि धारावाहिनां विज्ञानानां प्रामाण्यमुक्तं, तन्न युक्तं—व्यर्थत्वादिदूषणशतोपनिपातात्, तस्मादेकस्मिन्नपि अर्थेऽनेकप्रमाणप्रवृत्त्यात्मनि संप्लवेऽपि नाधिगतस्यैव अर्थस्याधिगमः, इति—न प्रमाणान्तराणां निष्प्रयोजनत्वं, तैरपि—अपूर्वस्यार्थस्य प्रकाशनात्, यद्येवं तदौत्तरकालिकानां धारावाहिनां विज्ञानानां स्वारसिक्यां प्रवृत्तावपूर्वार्थ प्रकाशो न कदाचिदपि विरमेत्, इत्यनवस्थापि न स्यात्—प्रमात्राश्वासलक्षणस्य अनुलङ्घनीयस्यावधेर्भावात् । एवमपि एकस्मिन्नेवार्थे प्रमातुरनेकैः प्रमाणैः प्रवृत्तैः संभूयापूर्वतया प्रकाशो जायते,—इत्येषां पूर्वापेक्षमुत्तरेषां प्रामाण्यम्, उत्तरापेक्षं च पूर्वेषाम्—इत्यन्योन्याश्रयतापि न स्यात्,

---

इत्यादि कथन अयुक्त ही है—यह भाव है । इसलिये—

"जहाँ कहीं भी बाद के प्रमाणों से ज्ञान होता है निश्चित ही वहाँ भी पूर्व प्रमाण से वह (अर्थ) उस प्रकार ज्ञात नहीं था ।"

इत्यादि उक्तियुक्ति के द्वारा पूर्व प्रमाण से अज्ञात कोई अपूर्व ही अंश दूसरे प्रमाण से अवश्य जाना जाता है । जिससे अन्त में प्रमाता को विश्वास उत्पन्न हो जाता है ।

जो कि दूसरे के द्वारा—

"बाद के प्रमाणों से निश्चित रूप से कोई अधिक ज्ञान नहीं (प्राप्त होता) । धारावाहिक ज्ञानों में कौन सा अधिक विषय प्रकाशित होता है ।"

इत्यादि युक्ति के द्वारा ज्ञातविषयक ज्ञान करने वाले धारावाहिक ज्ञानों का प्रामाण्य कहा गया, वह ठीक नहीं है क्योंकि निरर्थकता आदि सैकड़ों दोष आ पड़ते हैं । इसलिये एक ही विषय में अनेक प्रमाण की प्रवृत्तिरूप संप्लव होने पर भी ज्ञातविषय का ही ज्ञान नहीं होता । इसलिए दूसरे प्रमाण निष्प्रयोजन नहीं है क्योंकि वे भी अपूर्व (= अज्ञात) विषय का ज्ञान कराते हैं । यदि ऐसा है तो उत्तरकालिक धारावाहिक ज्ञानों की स्वाभाविक प्रवृत्ति होने पर अपूर्व विषय का ज्ञान कभी नहीं रुकेगा, इसलिये अनवस्था भी नहीं होगी क्योंकि प्रमाता के विश्वासघाती भी एक विषय में अनेक प्रमाणों के मिलकर प्रवृत्त होने से वहीं अनुल्लङ्घनीय अवधि (वहाँ) है । ऐसा होने से प्रमाता को अपूर्व ज्ञान होता है । इसलिये इनमें पूर्व की अपेक्षा से उत्तर के और उत्तर की अपेक्षा से पूर्व के (ज्ञानों) का

अत्रान्योन्यापेक्षस्यैव प्रामाण्यस्याभावात्, अपूर्वार्थप्रकाशाधीनं हि ज्ञानानां प्रामाण्यम्, स चापूर्वार्थविषयः प्रकाशः सर्वेषामेव पृथक्पृथगवस्थितः, इति को नाम अन्योन्याश्रयताया अवकाशः, संप्लवो हि धर्म्यभिप्रायेणोच्यते 'एकस्मिन्नेवार्थेऽनेकप्रमाणप्रवृत्तिः' इति, वस्तुतः पुनरनेकधर्मविशेषिते धर्मिणि केनचित् कश्चिद्धर्मविशेषोऽपूर्वतया प्रकाशते, यद्वशात्—तत्तद्धर्माधिगतिपुरःसरीकारेण पूर्णेन रूपेण धर्मिणमधिगम्य प्रमातुः पर्यन्ते समाश्वासो जायते इति ॥ ८४ ॥

तदेतदाह—

इत्थं च मानसंप्लुत्यामपि नाधिगते गतिः ।
न व्यर्थता नानवस्था नान्योन्याश्रयतापि च ॥ ८५ ॥

इदानीं तर्कतत्त्वानुषक्तं गुरुसतत्त्वमुपसंहारन् तदानन्तर्येणानुजोद्देशोद्दिष्टं योगाङ्गानुपयोगित्वमपि वक्तुमुपक्रमते—

एवं योगाङ्गमियति तर्क एव न चापरम् ।
अन्तरन्तः परामर्शपाटवातिशयाय सः ॥ ८६ ॥

एवमियति—गुरुसतत्त्वात्मनि प्रमेये प्रतिपादिते, तर्क एव उत्तमं योगाङ्गं, न

प्रामाण्य—इस प्रकार का अन्योऽन्याश्रय (दोष) भी है, क्योंकि यहाँ अन्योऽन्यापेक्ष प्रमाण्य का ही अभाव है । ज्ञानों का प्रामाण्य अज्ञात अर्थ के ज्ञान के अधीन होता है और वह अज्ञातअर्थविषयक ज्ञान सभी का अलग—अलग होता है फिर अन्योऽन्याश्रय का अवकाश कहाँ ? 'सम्पलवः' धर्मी के अभिप्राय से कहा जाता है। 'एक ही विषय में अनेक प्रमाणों की प्रवृत्ति होती है । यह वस्तुतः अनेकधर्मविशिष्ट धर्मी में किसी (प्रमाण) के द्वारा कोई एक धर्म अपूर्व के रूप में प्रकाशित होता है जिस कारण भिन्न-भिन्न धर्म के ज्ञानपूर्वक पूर्णरूप से धर्मी को जानकर अन्त में प्रमाता आश्वस्त होता है ॥ ८४ ॥

वही कहते हैं—

इस प्रकार प्रमाण की व्याप्ति होने पर भी (प्रमाण की) गति केवल अधिगत ज्ञान तक ही नहीं रहती (अन्यत्र भी होती है) । इस प्रकार प्रमाण न व्यर्थ होते हैं न उनमें अनवस्था दोष होता है और न (प्रमाण और प्रमिति) अन्योऽन्याश्रय होते हैं ॥ ८५ ॥

अब तर्कतत्त्व से लगे हुए गुरुतत्त्व का उपसंहार करते हुए उसके बाद अनुजोद्देश में उक्त योगाङ्गों की अनुपयोगिता को भी कहने का उपक्रम करते हैं—

इस प्रकार इतने (तत्त्वप्रतिपादक साधनों के होने पर भी) तर्क ही योगाङ्ग है दूसरा कुछ नहीं । वह (= तर्क) अन्दर-अन्दर जाकर परामर्श की दक्षता उत्पन्न करता है ॥ ८६ ॥

पुनरपरं यमादि किञ्चित्, इति पर्यवसितम्, यतः स एवान्तरन्तर्—यथायथं संवित्संनिकर्षेण शुद्धविद्यात्मनः परामर्शस्य पाटवातिशयं जनयेत्, येन अन्ते योगिनः परसंवित्साक्षात्कारः स्यात्, तदुक्तं—

'लब्धभूमेर्विरक्तस्य तज्जयोपायपेशलः ।
ऊहो नाम वितर्कोक्तिः प्रविचारेक्षणात्मकः ॥
यद्यत्सातिशयं स्थानं भोगेन समधिष्ठितम् ।
विनश्वरेण संदेहमूलेन सुमलीमसम् ॥
किमनेन विकल्पोक्तिव्यवहारात्मना त्वलम् ।
अस्मदन्यद्विशिष्टेन भोगेन परिपूरितम् ॥' इत्यादि ।
'पदं पदवतां श्रेष्ठं स्वतेजोगूढलोचनम् ।
तदेकं निर्वितर्कं स्यात्प्रभोः स्थानमनातुरम् ॥
शेषाणि सवितर्काणि संत्याज्यानि मुमुक्षुभिः ।
न वितर्कं विना तानि त्यक्तुं योगप्रयोक्तृभिः ॥
शक्यन्ते मुनिशार्दूल तस्मात्तर्कोऽपि युज्यते ।
योगिनोऽङ्गत्वमापन्नः स्वोपकाराय चेष्टते ॥' इत्यन्तम् ॥ ८६ ॥

ननु समानेऽपि योगाङ्गत्वे तर्कस्यैवोत्तमं योगाङ्गत्वं, न पुनर्यमादीनामित्यत्र किं

इस प्रकार इतना = गुरुतत्त्वरूप प्रमेय के प्रतिपादित होने पर 'तर्क ही उत्तम योगाङ्ग है दूसरा यम आदि कुछ नहीं'—यह निश्चित हुआ । क्योंकि वही भीतर -भीतर = यथोचित संवित्सन्निकर्ष के द्वारा शुद्धविद्यारूप परामर्श की अतिशय पटुता को उत्पन्न करता है जिससे अन्त में योगी को परसंवित् का साक्षात्कार होता है । वही कहा गया है—

"साधना की भूमि को प्राप्त करने वाले विरक्त का, उसके विजय में चतुर, विचार ईक्षणरूप ऊह वितर्क कहा जाता है । जो-जो सातिशय स्थान भोग से अधिष्ठित है, विनश्वर सन्देह रूप मल से मलिन है । विकल्पोक्ति व्यवहार वाले इस स्थान से क्या लाभ ।

इससे भिन्न जो आनन्दमय पद है वह विशिष्टभोग से पूरित है ।"

यहाँ से लेकर

"वह पदवानों में श्रेष्ठ, अपने तेज रूप गूढ लोचन वाला है । वह एक वितर्कहीन, प्रभु का निर्विघ्न स्थान है । शेष सवितर्क स्थान मुमुक्षुओं के द्वारा त्याज्य हैं । योगप्रयोक्ता लोग उसे वितर्क के विना नहीं छोड़ सकते । हे मुनिश्रेष्ठ ! इसलिये तर्क भी योग है । योगाङ्ग बनकर (वह) अपने (साधक के) उपकार के लिये चेष्टा करता है ।"

यहाँ तक कहा गया है ॥ ८६ ॥

निमित्तम् ?—इत्याशङ्क्याह—

अहिंसा सत्यमस्तेयब्रह्मचर्यापरिग्रहाः ।
इति पञ्च यमाः साक्षात्संवित्तौ नोपयोगिनः॥ ८७ ॥
तपः प्रभृतयो ये च नियमा यत्तथासनम्।
प्राणायामाश्च ये सर्वमेतद्बाह्यविजृम्भितम् ॥ ८८ ॥

प्रभृतिना शौचादय उक्ताः, यदुक्तम्—

'शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।'

(पातं.यो.सू. २३२)

इति, एवमादयः सर्वे संवित्तौ साक्षान्नोपयोगिनः इति संबन्धः, साक्षाद्ग्रहणेन पारम्पर्येण पुनर्येषामुपयोगित्वं भवेदपि नाम—इति सूचितम्, एषां साक्षादनुपयोगित्वे हेतुः—'सर्वमेतद्बाह्यविजृम्भितम्' इति ॥ ८७-८८ ॥

न चैतद्युक्तिमात्रेणैव सिद्धं, यावदागमेनापि,

इत्याह—

श्रीमद्वीरावलौ चोक्तं बोधमात्रे शिवात्मके ।
चित्तप्रलयबन्धेन प्रलीने शशिभास्करे ॥ ८९ ॥

प्रश्न—योगाङ्गता समान होने पर भी तर्क ही उत्तम योगाङ्ग है यम आदि नही, इसमें क्या कारण है ? यह शङ्का कर कहते हैं—

अहिंसा सत्य अस्तेय ब्रह्मचर्य और असंग्रह ये पाँच यम संवित् के लिये साक्षात उपयोगी नहीं है । तर्क आदि जो नियम हैं और जो आसन और प्राणायाम हैं यह सब बाहरी उल्लास की उत्पत्ति के कारण हैं ।

प्रभृति (पद) के द्वारा (शौच) आदि कहे गये हैं । जैसा कि कहा गया है—

"शौच सन्तोष तपस्या स्वाध्याय ईश्वरापर्णबुद्धि ये नियम हैं ।"

ये सब संवित्ति के लिये साक्षत् उपयोगी नहीं है—यह सम्बन्ध (= अन्वय) है। साक्षात् शब्द का ग्रहण करने से इनका पारम्परिक रूप से उपयोग हो भी सकता है—यह बतलाया गया । इसके साक्षात् अनुपयोगी होने में कारण है—"यह सब बाह्य-विजृम्भित है" ॥ ८७-८८ ॥

यह केवल युक्ति से ही नहीं आगम से भी सिद्ध है—यह—

श्रीमद् वीरावली नामक ग्रन्थ में कहा गया है—शिव के बोधमात्र होने पर चित्त के प्रलय रूप में प्राप्त होने से जब चन्द्रमा और सूर्य (= प्राण और अपान) अवरुद्ध हो जाते हैं और आत्मसंविद् रूप जीव आदित्य

प्राप्ते च द्वादशे भागे जीवादित्ये स्वबोधके ।
मोक्षः स एव कथितः प्राणायामो निरर्थकः॥ ९० ॥
प्राणायामो न कर्तव्यः शरीरं येन पीड्यते ।
रहस्यं वेत्ति यो यत्र स मुक्तः स च मोचकः॥ ९१ ॥

चित्तस्य चेत्यग्रासीकरणक्रमेण चेतयितरि यः प्रलयो—विश्रान्तिः, स एव अनन्यगमनात्मा बन्धः, तेन शशिसहिते भास्करे—प्राणापानप्रवाहे प्रलीने, मध्यधामलयादुच्छिन्नस्ववाहे, अत एव जीवः—उदान एव आदित्यः तत्तत्प्रमेयादिदाह्यवस्तूपादानात् अग्निः, तस्मिन् मध्योर्ध्ववाहक्रमेण द्वादशान्तं प्राप्ते सति—प्रमाणप्रमेयव्यवहारोच्छेदेन प्रमातर्येव पराङ्काष्ठामधिरूढे, निःश्रेयसात्मपरश्रेयो- रूपे स्वबोधके स्वप्रकाशे बोधमात्रे अर्थादुदिते, यः कश्चिदनुभवविशेषः स एव मोक्षः कथितः,

'शशिभास्करसंयोगाज्जीवस्तन्मात्रतां व्रजेत् ।
अत्र ब्रह्मादयो लीना मुक्तये मोक्षकाङ्क्षिणः ॥'

इत्यादिना तत्रैव प्रागुपदिष्टो, न तु दर्शनान्तरवन्निमित्तान्तरसमधिगम्यः, अत एव रेचकादिरूपः प्राणायामो निरर्थकः—तेन न कश्चिन्मोक्षलक्षणोऽर्थः सिद्ध्यति इत्यर्थः । एवं भगवता प्रश्निते भगवतीप्रश्नार्थमेव सिद्धान्तीकर्तुम्

द्वादशी स्थिति को प्राप्त कर लेता है तो यही मोक्ष कहा गया है । शेष प्राणायाम निरर्थक हैं ॥ ८९-९० ॥

जिसके द्वारा शरीर पीड़ित होता है वह प्राणायाम निरर्थक है । जिसमें वर्त्तमान् रहस्य को जो जानता है वही मुक्त है और वही दूसरों को मुक्त कराता है ॥ ९१ ॥

चित्त के चेत्य को निगलते हुए चेतयिता में जो प्रलय = विश्रान्ति वही अनन्य गमनरूप बन्ध है । उसके द्वारा चन्द्र सहित सूर्य के = प्राणअपान प्रवाह के, लीन होने पर = सुषुम्ना में लय के कारण अपने प्रवाह के उन्छिन्न होने पर, इसलिये जीव = उदान ही आदित्य भिन्न—भिन्न प्रमेय आदि दाह्य वस्तु का ग्रहण करने से अग्नि, उसमें मध्य एवं ऊपर प्रवाह के क्रम से, द्वादशान्त को प्राप्त होने पर = प्रमाण प्रमेय का व्यवहार उछिन्न होने से प्रमातृ के ही पराकाष्ठा पर अधिरूढ़ होने पर, निःश्रेयसात्म परश्रेयोरूप स्वबोध = स्वप्रकाश = बोधमात्र के अर्थात् उदित होने पर जो कोई अनुभवविशेष है वही मोक्ष कहा गया है ।

"शशि सूर्य के संयोग से जीव तन्मात्रता (= बोधमात्रता) को प्राप्त होता है । मोक्षेच्छु ब्रह्मादिक मुक्ति के लिये उसी में लीन होते हैं ।

इत्यादि के द्वारा वहीं पहले उपदिष्ट न कि दूसरे, दर्शनों की भांति दूसरे कारणों से प्राप्य । इसलिये रेचक आदि रूप प्राणायाम निरर्थक है अर्थात् उससे

'सत्यमेतन्महाप्राज्ञ प्राणायामो न कारणम् ।'

इत्युपक्रम्य

'प्राणायामो न कर्तव्यः शरीरं येन पीड्यते ।'

इत्यादिना परपक्षे बाधकं प्रमाणमुपन्यस्य स्वपक्षे साधकं प्रमाणं दर्शयति 'रहस्यं वेत्ति यो यत्र' इत्यादि, रहस्यं—प्रमाणाद्यप्रवृत्तेः सर्वजनागोचरं प्रमातृमात्र-सतत्त्वं परं तत्त्वं, योऽभिजानाति—साक्षात्कुर्यात्, स स्वयं मुक्तः सन्, अन्येषामपि मोचकः, प्राणायामस्य आनर्थक्याभिधाने यमादीनामपि दण्डा-पूपीयन्यायेन तत् अर्थसिद्धम्, इति पृथक् नोक्तम्, 'बोधमात्रे शिवात्मके' इत्यनेन पुनः प्राक् पटलद्वयोक्तमर्थजातं संक्षिप्योपक्षिप्तम् ॥ ८९-९१ ॥

ननु यमादि यदि बाह्यविजृम्भितत्त्वात् न संवित्तावुपयोगि, तदस्तु, को दोषः, प्रत्याहारादि पुनर्बाह्यात्प्रत्यावृत्तं सत्, अन्तरेव लब्धप्ररोहम्, इति तदपि कथं न तत्रोपयुक्तम् ?—इत्याशङ्क्याह—

प्रत्याहारश्च नामायमर्थेभ्योऽक्षधियां हि यः ।
अनिबद्धस्य बन्धस्य तदन्तः किल कीलनम् ॥ ९२ ॥

कोई मोक्षरूप अर्थ सिद्ध नहीं होता । इस प्रकार भगवान् के द्वारा प्रश्न करने पर भगवती के प्रश्नार्थ को सिद्धान्त बनाने के लिये—

"हे महाप्राज्ञ ! यह सत्य है, प्राणायाम कारण नहीं है ।"

ऐसा प्रारम्भ कर

"जिसके द्वारा शरीर पीड़ित हो (वह) प्रणायाम नहीं करना चाहिये ।"

इत्यादि के द्वारा पर पक्ष में बाधक प्रमाण को प्रस्तुत कर अपने पक्ष में साधक प्रमाण को दिखलाते हैं—'जो जहाँ रहस्य को जानता है' इत्यादि । रहस्य = प्रमाण आदि की प्रवृत्ति न होने के कारण सब लोगों का अविषय केवल प्रमातृरूप परमतत्त्व को जो जानता है = साक्षात्कार करता है, वह स्वयं मुक्त होते हुए दूसरों को भी भुक्त कराता है । प्रणायाम की निरर्थकता का कथन होने पर दण्डापूणीयन्याय से यम आदि की भी वह (= निरर्थकता) अर्थात् सिद्ध हो जाती है । इसलिये अलग से नहीं कहा गया । 'बोधमात्र शिवरूप में' इसके द्वारा पुनः पहले दो पटलों में कही गयी विषयवस्तु संक्षेप में कही गई ॥ ८९-९१ ॥

प्रश्न—यम आदि बाहर घटित होने से संवित् के विषय में उपयोगी नहीं हैं तो न हों कोई दोष नहीं है किन्तु प्रत्याहार आदि तो बाहर से प्रत्यावृत्त होते हुए भीतर आरोह करते हैं तो फिर वे भी उस विषय में कैसे उपयोगी नहीं है ? यह शङ्का कर कहते हैं—

प्रत्याहार यह है—ज्ञानेन्द्रियों का (अपने-अपने) विषयों से जो

चित्तस्य विषये क्वापि बन्धनं धारणात्मकम्।
तत्सदृग्ज्ञानसंतानो ध्यानमस्तमिता परम् ॥ ९३ ॥
यदा तु ज्ञेयतादात्म्यमेव संविदि जायते ।
ग्राह्यग्रहणताद्वैतशून्यतेयं समाहितिः ॥ ९४ ॥

अयं हि नाम प्रत्याहारो—यदर्थेभ्यो रूपादिभ्यः प्रत्याहृतानां चक्षुरादीन्द्रियज्ञानानाम् अन्तः कीलनं—चित्तस्वरूपानुकारायमाणतया स्वात्मायत्ततासादनम्, यदुक्तम्—

'स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ।'
(यो०सू० २-५४)

इति, तदेव च अनिबद्धस्य

'संसारोऽस्ति न तत्त्वतस्तनुभृतां बन्धस्य वार्तैव का ।'

इत्यादिन्यायेन अलब्धप्ररोहस्यापि बन्धस्य, कीलनं—दार्ढ्यापादनम् 'परस्या हि संविदः स्वस्वातन्त्र्यात् गृहीतसङ्कोचाया देशाद्यवच्छिन्नत्वं नाम बन्धः' स एव चात्र कुतश्चित् प्रत्याहृतानामिन्द्रियाणां कुत्रचिदवस्थापनादुपोद्वलीकृतः, इति कथं नाम प्रत्याहारादेः संवित्साक्षात्कारायोपयोगः—व्यापिका हि संविदः कथं नाम कुत्रचिदेवोपलम्भो भवेत् इति भावः, यदुक्तम्—

(हटाना) और अप्रकट बन्ध को अन्दर ही अन्दर कीलित कर देना ॥ चित्त को जिस किसी विषय पर बाँध देना धारणा है । इसी प्रकार के ज्ञान का प्रवाह अर्थात् अस्तमिता (= अव्यवहित एकतानता) ध्यान हैं । और जब संविद् में ज्ञेय का ज्ञान के साथ तादात्म्य हो जाता है और ज्ञेय-ज्ञान की द्वैतता समाप्त हो जाती है तब उसे समाधि कहते हैं ॥ ९२-९४ ॥

प्रत्याहार यह है कि रूप आदि विषयों से प्रत्याहृत चक्षु आदि इन्द्रियज्ञानों का भीतर कीलन = चित्त स्वरूप का अनुकरण करते हुए स्वात्मायत्तता को प्राप्त करना। जैसा कि कहा गया है—

"अपने-अपने विषयों से संयोग न होने पर चित्त का अपने रूप में अनुकार के समान इन्द्रियों का प्रत्याहार है ।"

और वही अनिबद्ध का—

"शरीरधारियों के लिये वस्तुतः संसार है ही नहीं फिर बन्धन की क्या बात"

इत्यादि न्याय से प्ररोह को अप्राप्त बन्धन का कीलन = दृढ़ करना । 'परा संविद् का अपने स्वातन्त्र्यवश सङ्कोच ग्रहण करने पर देश आदि से अवच्छिः ोना ही बन्धन है ।" और वही यहाँ कहीं से प्रत्याहृत इन्द्रियों की कहीं स्थापन करने से उद्वलित कर दिया गया फिर कैसे प्रत्याहार आदि संवित् के साक्षात्कार े लिये

'यत्र यत्र मनो याति तत्र तत्रैव धारयेत् ।
चलित्वा कुत्र गन्तासि सर्वं शिवमयं यतः ॥' इति ।

एवं धारणादावपि अवसेयम्, तत्र हि कन्दादौ नियत एव देशे 'चित्तस्य बन्धो रूपम्' यदुक्तम्—

'देशबन्धश्चित्तस्य धारणा ।' (यो० सू० ३-१) इति ।

ध्यानेऽपि सजातीयानामेव ज्ञानानां प्रवहद्रूपत्वं नाम रूपं, न विजातीयानाम्, इत्यत्र नियताकारावच्छिन्नत्वम् । यदुक्तम्—

'तत्र प्रत्ययैकतानता ध्यानम् ।' (यो० सू० ३-२) इति,

अत एव 'अस्तमिता परम्' इत्युक्तम् । समाधावपि ज्ञानज्ञेयाख्यरूपद्वयतिरस्कारेण ध्येयात्मज्ञेयमात्रप्रतिभास एव रूपम्, इत्यत्र नियत एवाकारोऽवच्छेदकः, यदुक्तम्—

'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ।'
(यो० सू० ३-३) इति ॥ ९२-९४ ॥

ननु यमादीनां पञ्चानामपि बहिरङ्गत्वात् यदि संवित्तौ नोपयोगः, तत्

उपयोगी हैं—व्यापक संविद् की किसी स्थानविशेष में ही कैसे उपलब्धि होगी—यह भाव है जैसा कि कहा गया है—

"जहाँ-जहाँ मन जाता है वहीं-वहीं उसे धारण करना चाहिये । चलकर (वह) कहाँ जायगा क्योंकि सब शिवमय है ।"

इसी प्रकार धारणा आदि के बारें में भी जानना चाहिये । वह 'कन्द आदि निश्चित प्रदेश में चित्त का बन्धनरूप है ।' जैसा कि कहा गया—

"चित्त का (किसी) स्थान बन्धन में धारणा है ।"

ध्यान में भी सजातीय (ज्ञानों) की प्रवाहरूपता ही (उसका) रूप है न कि विजातीय (ज्ञानों) की । इसलिये यहाँ निश्चित आकार से अवछिन्नता है । जैसा कि कहा गया है—

"उस विषय में प्रत्यय की एकतानता ध्यान (कहलाती) है ।"

इसलिये (ऊपर श्लोक में) 'अस्तमिता परम्' कहा गया है । समाधि में भी ज्ञान ज्ञेय नामक दो रूपों को हटाकर ध्येयरूप केवल ज्ञेय का अभास ही (उसका) रूप है । इस प्रकार यहाँ निश्चित ही आकार अवच्छेदक है । जैसा कि कहा गया—

"वही (= ध्यान) स्वरूपशून्य अर्थमात्र निर्भास होने पर समाधि होती है" ॥ ९२-९४ ॥

तावदास्ताम्

'त्रयमन्तरङ्गं पूर्वेभ्यः ।' (यो०सू० ३-७)

इति तेषां किमिति नाम न तत्रोपयोगः ?—इत्याशङ्क्याह—

तदेषा धारणाध्यानसमाधित्रितयी पराम् ।
संविदं प्रति नो कञ्चिदुपयोगं समश्नुते ॥ ९५ ॥

'अनिबद्धस्य बन्धस्य तदन्तः किल कीलनम्' इत्याद्युक्त्या बन्धकत्वादेर्हेतोः ॥ ९५ ॥

ननु यद्येव तद्यमादीनामष्टानामपि योगाङ्गानां किमर्थमभिधानम्? इत्याशङ्क्याह—

योगाङ्गता यमादेस्तु समाध्यन्तस्य वर्ण्यते ।
स्वपूर्वपूर्वोपायत्वादन्त्यतर्कोपयोगतः ॥ ९६ ॥

अन्त्येति—अन्ते साधुः, अष्टानां यमादीनामङ्गानामुपेयत्वेन योग्य इति, यमा नियमानामुपायो, नियमाश्च आसनस्य—इत्यादिक्रमेण यमादीनामष्टानामपि पूर्वपूर्वोपायत्वेन योगाङ्गत्वं वर्णितम्, यथैषामुपेयरूपत्वात् पार्यन्तिके तर्के द्वारद्वारिभावेनो-

---

प्रश्न—यम आदि पाँचो के बहिरङ्ग होने के कारण यदि संविद् के लाभ में (उनका) उपयोग नहीं है तो न हो "पूर्व की अपेक्षा (ध्यान आदि) तीन अन्तरङ्ग हैं।"

ऐसा (कथन होने से) उनका वहाँ उपयोग क्यों नहीं है ।—यह शङ्का कर कहते हैं—

धारणा ध्यान और समाधि ये तीन परबोध के प्रति किसी उपयोग के नहीं हैं ॥ ९५ ॥

'अनिबद्ध बन्धन का उसके भीतर कीलना' इत्यादि उक्ति के द्वारा बन्धन आदि का कारण होने से उपयोगी नहीं है ॥ ९५ ॥

प्रश्न—यदि ऐसा है तो यम आदि आठ योगाङ्गों का कथन क्यों किया गया ?—यह शङ्का कर कहते हैं—

यम से लेकर समाधि तक (के = उपायों) को जो योगाङ्ग कहा गया उनमें पूर्व-पूर्व पर-पर के उपाय हैं और अन्तिम (= समाधि) तर्क का उपाय है ॥ ९६ ॥

अन्त्य = अन्त के लिये समीचीन, यम आदि आठ अङ्गों के उपेय के रूप में योग्य । यम नियमों के उपाय हैं और नियम आसन के—इत्यादि क्रम से पूर्ववर्त्ती यम आदि आठ उत्तर-उत्तर के उपाय हैं इसलिए इनको योगाङ्ग कहा गया है ।

पयोगः स्यात्, यस्मादष्टाभिरपि एतैरङ्गैरुपस्कृतमतेर्योगिन एवं स्वपरामर्शो जायते, येनास्य झटित्येव स्वसंवित्तिसाक्षात्कारो भवेत्, यन्नाम अत्र योगस्य स्वदर्शनोक्तानि षडङ्गान्यपहाय पातञ्जलीयं यमाद्यङ्गाष्टकमुक्तं, तत्रायमाशयो यत् क्वचिदपि एतदङ्गाष्टकातिरिक्तम् अन्यदङ्गान्तरं नास्ति, इति सर्वत्र तर्कस्यैवाङ्गान्तराण्युपायः, स च स्वसंवित्साक्षात्कारस्येति ॥ ९६ ॥

एतदेवोपपादयति—

अन्तः संविदि रूढं हि तद्द्वारा प्राणदेहयोः ।
बुद्धौ वार्प्यं तदभ्यासान्नैष न्यायस्तु संविदि ॥ ९७ ॥

यतः खलु संविदि, अन्तर्—अभेदेन, जातप्ररोहं संवेद्यमानं सत् तद्यमादि, तद्द्वारा—संविन्मुखेनैव, नहि असंविदितिं किञ्चिदपि वस्तु व्यवहारयोग्यं भवेत्, इति भावः, अभ्यासात्—पौनःपुन्येन सेवनात्, देहादावर्प्यं—देहादि यथा शनैः शनैः संस्कारपाटवेन तथैव प्ररोहमियादित्यर्थः, तद्यथा आसनादि देहे, प्राणायामादि प्राणे, प्रत्याहारादि बुद्धाविति । संविदि पुनरेष देहादौ प्ररूढस्य यमादेः तद्द्वारेण अभ्यासबलात् प्ररोहोत्पादनात् स न्यायो न भवेत्, संविदि हि यमादेः प्ररोहः पटीयस्त्वमुच्यते, स एव च नाम संस्कारः, न च संवित्

जिससे कि इनके उपेयरूप होने से पार्यन्तिक तर्क के विषय में साधनसाध्य रूप से उपयोग होता है जिस कारण इन आठों अङ्गों से परिष्कृत बुद्धि वाले योगी को इस प्रकार का आत्मपरामर्श हो जाता है जिससे इसको झट से अपनी संवित् का साक्षात्कार हो जाता है । जो यहाँ योग के अपने दर्शन में कहे गये छः अङ्गों को छोड़कर पातञ्जलीय यम आदि आठ अङ्गों को कहा गया उसका यह आशय है— कि इन आठ अङ्गों के अतिरिक्त कहीं भी दूसरे अङ्ग नहीं हैं । इसलिये सर्वत्र दूसरे अङ्ग तर्क के ही उपाय हैं और वह (तर्क) अपनी संवित् के साक्षात्कार का ॥९६॥

इसी को बतलाते हैं—

संविद् के अन्दर उत्पन्न वे (= यमादि) उस (= संविद्) के द्वारा प्राण और देह को बार-बार के अभ्यास के द्वारा बुद्धि को समर्पित करते हैं । संविद् के विषय में यह न्याय (= सिद्धान्त) नहीं हैं ॥ ९७ ॥

चूँकि संविद् में भीतर = अभिन्न रूप से, उत्पन्न संवेद्यमान वह यम आदि, उसके द्वारा = संविद् के द्वारा, क्योंकि कोई भी अज्ञात वस्तु व्यवहार के योग्य नहीं होती—यह भाव है । अभ्यास के कारण = बार-बार सेवन से, देह आदि में भी अर्पणीय = जिससे कि शरीर आदि धीरे-धीरे संस्कारपटुता के द्वारा उसी प्रकार प्ररोह को प्राप्त हों—यह अर्थ है । जैसे कि आसन आदि शरीर के, प्राणायाम आदि प्राण के और प्रत्याहार आदि बुद्धि के (प्ररोह का कारण बनते हैं) । संविद के विषय में यह = प्ररूढ़ यम आदि, का देह आदि के विषय में उसके द्वारा

संस्कार्या, संस्कारो हि अतिशयः, स च नास्यां सम्भवेत्—असंविद्रूपतापत्तेः, तेन पराद्वयरूपायां नित्योदितायामस्यां यमादेर्न किञ्चित्प्रयोजनम्—इति तात्पर्यम्, यदुक्तम्—

'अन्तः संविदि यन्निरूढमभितस्तत्प्राणधीविग्रहे
सञ्चार्येत कथं तथेति घटते तत्राभ्युपायक्रमः ।
ये त्वभ्यासपथेन संविदमिमां संस्कर्तुमभ्युद्यता
स्ते किं कुत्र कथं नु वा विदधतामित्यत्र संदिद्महे ॥'

इति ॥ ९७ ॥

अथ वा देहादिद्वारेण संविद्यभिव्यक्तिलक्षणोऽतिशयो भवेत् इत्याह—

अथ वास्मद्दृशिप्राणधीदेहादेरपि स्फुटम् ।
सर्वात्मकत्वात्तत्रस्थोऽप्यभ्यासोऽन्यव्यपोहनम् ॥ ९८ ॥

यद्वा पराद्वयदर्शने

'प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्प्यश्च ।'

इत्यादिनीत्या देहादेरपि संविद्रूपत्वेन सर्वात्मकत्वात्, तत्र प्राणादाववस्थितोऽपि

अभ्यास के बल से प्ररोह के उत्पन्न होने से, वह न्याय लागू नहीं होता । संविद् में यम आदि का प्ररोह पटुता कहा जाता है और वही संस्कार है । किन्तु संविद् संस्कार्य नही । क्योंकि संस्कार अतिशय (का नाम) है और वह इसमें सम्भव नही । क्योंकि तब वह असंविद् हो जायेगी इसलिये पराद्वयरूपा नित्योदित इसके विषय में यम आदि का कोई प्रयोजन नही है—यह तात्पर्य है । जैसा कि कहा गया है—

"जो भीतर संविद् में सर्वत्र निरूढ़ है वह प्राण बुद्धि और शरीर में कैसे सञ्चारित किया जाय ? इस विषय में उपाय का क्रम तो घटित होता है । किन्तु जो लोग अभ्यासमार्ग से इस संविदा का संस्कार करने के लिये तत्पर हैं वे क्या, कहाँ और किस प्रकार करें इस विषय में हमें सन्देह होता है ॥ ९७ ॥"

अथवा शरीर आदि के द्वारा संविद् में अभिव्यक्ति लक्षण वाला अतिशय होता है—यह कहते हैं—

अथवा हमारे (= त्रिक) दर्शन में प्राण धी देह आदि के भी स्पष्ट रूप से सर्वात्मक होने से उस (प्राण आदि में) अभ्यास अन्य (= भेद) का व्यपोहन ही है ॥ ९८ ॥

अथवा पराद्वय दर्शन में

"ब्रह्म का प्रदेश भी सार्वरुप्य का अतिक्रमण न करने वाला और अविकल्प्य है ।"

यमादीनामभ्यासः, अन्येषां भेदनिष्ठानामयमादिरूपाणां हिंसादीनामपोहनम्, एवं हि यथात्मनि हिंसा न कार्या, तथा परत्रापि—इति स्वपरयोरात्मरूपतयावभावसनेन भेदविगलनात् संविद एवाभिव्यक्तिर्भवेत्, इति भावः ॥ ९८ ॥

ननु यद्यत्र अभ्यस्यते तच्चेत् तत्र संस्कारदार्ढ्यात् पाटवातिशयं यायात्, इत्यस्तु को दोषः, तत् पुनरन्यव्यपोहनमाधातुं कथमुत्सहते—येन कार्यान्तरमपि उत्पद्येत ? इत्याशङ्का शमयितुं दृष्टान्तयति—

देह उत्प्लुतिसंपात धर्मोज्जिगमिषारसात् ।
उत्प्लाव्यते तद्विपक्षपाताशङ्काव्यपोहनात् ॥ ९९ ॥

उत्प्लुतिः—ऊर्ध्वं प्लवनं, तस्याः पौनःपुन्येन संभवात् यः संपातस्तद्धर्मा येयमुद्गन्तुमिच्छा तस्या रसः—पुनः पुनरभ्यासादादरातिशयः ततो हतोः,यथा देहः तस्योज्जिगमिषारसस्य विपक्षभूतो यस्तिर्यगधश्च पातः तदाशङ्काया व्यपोहनमधिकृत्य, उत्प्लाव्यते—अङ्गश्रमादिनोर्ध्वप्लवने योग्यः क्रियते इत्यर्थः,—तेन ऊर्ध्वं प्लवनाभ्यासेन अधःपातादि देहे व्यपोह्यते—इत्यन्यदभ्यस्यतोऽपि अन्यनिवृत्तिर्भवेदिति भावः ॥ ९९ ॥

इत्यादि नीति के द्वारा देह आदि के भी संविद्रूप होने से सर्वात्मक होने के कारण वहाँ = प्राण आदि में, यम आदि का अभ्यास भी होता है । अन्य भेद-युक्त यम आदि रूप हिंसा आदि का निषेध होता है । इस प्रकार जैसे अपने विषय में हिंसा नही करनी चाहिये उसी प्रकार दूसरे के विषय में भी—इस प्रकार स्व एवं पर के आत्मरूप में अवभास के द्वारा भेद हट जाने के कारण संविद् की ही अभिव्यक्ति होती है—यह भाव है ॥ ९८ ॥

प्रश्न—जिसका जहाँ अभ्यास किया जाता है वह वहाँ संस्कार की दृढ़ता के कारण अतिशय पटुता को प्राप्त हो जाता है तो हो क्या हर्ज है किन्तु वह दूसरे का निषेध करने के लिये कैसे समर्थ होता है जिससे कि दूसरा कार्य उत्पन्न हो जाय ?—इस शङ्का का समाधान करने के लिये दृष्टान्त देते हैं—

ऊपर कूदने के आस्वाद के कारण शरीर ऊपर कूदता है नीचे भी गिरता है । किन्तु उस (= उत्प्लुति) के विपक्ष भूत पतन की आशङ्का को छोड़कर यह शरीर ऊपर उछाला जाता है ॥ ९९ ॥

उत्प्लुति = ऊपर उछलना, उसके बार-बार सम्भव होने से जो पतन उस धर्म वाली जो यह ऊपर जाने की इच्छा उसका रस बार-बार अभ्यास होने से अतिशय आदर, उस कारण । जैसे देह, उस उज्जिगमिषारस का विपक्षभूत जो तिरछे या नीचे गिरना उसकी आशङ्का का निषेध कर, ऊपर उछाला जाता है = अङ्गश्रम आदि के द्वारा ऊपर उछलने के योग्य किया जाता है—यह अर्थ है । उस ऊर्ध्वप्लवन के अभ्यास से शरीर में अधःपतन आदि निषिद्ध किया जाता है—

एतदेव प्रकृते योजयति—

गुरुवाक्यपरामर्शसदृशे स्वविमर्शने ।
प्रबुद्धे तद्विपक्षाणां व्युदासः पाठचिन्तने ॥ १०० ॥

एवं शिष्यस्य पाठचिन्तनादौ विषये पुनः पुनरभ्यासातिशयात्, गुरुवाक्यपरामर्शानुगुणे स्वपरामर्शे, उदितस्य स्वपरामर्शस्य, विपक्षभूतानां मौढ्यादीनामपि व्युदासः......... ॥ १०० ॥

ननु गुरुवाक्यबलादेवास्य मौढ्यादीनामपि व्युदासः सिध्येदिति अन्तर्गडुप्रायेण स्वविमर्शेनापि कोऽर्थः ?—इत्याशङ्क्याह—

नह्यस्य गुरुणा शक्यं स्वं ज्ञानं शब्द एव वा ।
धियि रोपयितुं तेन स्वप्रबोधक्रमो ध्रुवम् ॥ १०१ ॥

नहि नामास्य शिष्यस्य स्वबलादेव गुरुणा चिन्ताद्यात्म स्वं ज्ञानं, पाठ्यमानो वा स्वः शब्दः तद्बुद्धौ प्ररूढं कर्तुं शक्यं, यावदस्य स्वपरामर्शो न स्यात्, यतः स्वविमर्शं विना हि असौ गुरुवाक्यामवधारयितुमपि नालं, का पुनर्मौढ्यादिनिवृतौ

इस प्रकार एक का अभ्यास करते हुए दूसरे की निवृत्ति हो जाती है—यह भाव है ॥ ९९ ॥

इसी को प्रस्तुत में जोड़ते है—

(इसी प्रकार) पाठचिन्तन में गुरु-(प्रोक्त) वाक्य के परामर्श के सदृश आत्मविमर्श के उत्पन्न हो जाने पर उसके विरोधी (= मूर्खता आदि) का निराकरण हो जाता है ॥ १०० ॥

इस प्रकार पाठचिन्तन आदि के विषय में शिष्य का पुनः पुनः अतिशय अभ्यास होने से, गुरुवाक्य के परामर्श के अनुरूप अपना परामर्श होने पर, उदित अपने परामर्श के विपक्षभूत जाड्य आदि का भी लोप हो जाता है ॥ १०० ॥

प्रश्न—गुरुवाक्य के बल से ही इसकी मूर्खता आदि का भी निषेध सिद्ध हो जाता है फिर भीतरी ग्रन्थि के समान अपने विमर्श से क्या लाभ ? यह शङ्का कर कहते हैं—

गुरु के द्वारा अपना ज्ञान अथवा शब्द इस (= शिष्य) की बुद्धि में आरोपित नहीं किया जा सकता । इसलिये अपने आत्मविमर्शरूप बोध का क्रम आवश्यक है ॥ १०१ ॥

जब तक इस (शिष्य) का अपना परामर्श उदित नहीं होता तब तक इस शिष्य का गुरु के द्वारा अपने बल से ही चिन्ता आदि स्वरूप आत्मज्ञान अथवा पाठ्यमान अपना शब्द उसकी बुद्धि में बैठाया नहीं जा सकता । क्योंकि आत्माविमर्श के विना यह (शिष्य) गुरुवाक्य को समझने में भी समर्थ नहीं है फिर

संभावनापि भवेत्, तस्मान्निश्चितमेव स्वस्यात्मीयस्य शुद्धविद्यारूपत्वात् प्रकृष्टस्य परामर्शात्मनः बोधस्य क्रमोऽस्तीति शेषः ॥ १०१ ॥

यन्माहात्म्यादवधानशालिनां स्वप्नानुभूतमपि वस्तु अर्थक्रियापर्यन्तां साक्षात्काररूपतामेति, इत्याह—

अत एव स्वप्नकाले श्रुते तत्रापि वस्तुनि ।
तादात्म्यभावनायोगो न फलाय न भण्यते ॥ १०२ ॥

अतः—स्वपरामर्शस्य सद्भावादेव, तत्र असदर्थोपलम्भात्मन्यपि स्वप्नसमये कस्मिंश्चित् श्रुतेऽपि वस्तुनि विषये स्त्र्यादाविव ताद्रूप्येण पुनःपुनरभ्यासात्मा भावनायोगः क्रियमाणः फलाय न न भण्यते—जागरोचितार्थक्रियाकारितया साक्षात्क्रियते इत्यर्थः ॥ १०२ ॥

ननु यद्विषयोऽयं नाम स्वपरामर्श इष्यते, तयोः पाठचिन्तनयोरेव किं स्वरूपम् ?—इत्याशङ्क्याह—

सङ्केतानादरे शब्दनिष्ठमामर्शनं पठिः।
तदादरे तदार्थस्तु चिन्तेति परिचर्च्यताम् ॥ १०३ ॥

मूर्खता आदि निवृत्ति की सम्भावना भी क्या हो सकती है इसलिए निश्चित ही अपना शुद्धविद्यारूप होने से प्रकृष्ट परामर्शरूप बोध का क्रम है ॥ १०१ ॥

जिसकी महिमा से ध्यानी लोगों के लिये स्वप्न में अनुभूत भी वस्तु अर्थ क्रियापर्यन्त साक्षात्काररूपता को प्राप्त होती है—यह कहते हैं—

इसीलिये स्वप्नकाल में भी (दृष्टया) श्रुत पदार्थ के विषय में तादात्म्य भावना हो जाती है और उसका फल भी नहीं होता ऐसा नहीं है । (अवश्य होता है) ॥ १०२ ॥

अतः = अपना परामर्श होने से ही, वहाँ = असत् अर्थ की प्राप्ति वाले स्वप्न काल में, किसी श्रुत वस्तु जैसे स्त्री आदि के विषय में उस रूप में पुनः पुनः अभ्यास रूप किया जाता हुआ भावना योग फल के लिये नहीं कहा जाता ऐसा नहीं है अर्थात् जागरोचित अर्थक्रियाकारी रूप में (उसका) साक्षात्कार होता है ॥ १०२ ॥

प्रश्न—जिस विषयक यह स्वपरामर्श माना जाता है उन पाठ और चिन्तन का क्या स्वरूप है ? यह शङ्का कर कहते हैं—

सङ्केतग्रह के प्रति उपेक्षा एवं शब्द के विषय में परामर्श को पठन (कहा जाता है) । और उस (= सङ्केत) का आदर कर उस अर्थ का परामर्श चिन्तन (कहलाता) है—ऐसा कहना चाहिये ॥ १०३ ॥

संङ्केतस्य—सांकेतिकस्यार्थस्य; अनादर:—उपेक्षा, अत एव 'शब्दनिष्ठम्' इत्युक्तं, न पुनरर्थनिष्ठमपि, तदादरे शब्दापेक्षायां शब्दप्रतीतिपुर:सरीकारेण हि अर्थप्रतीतिरिति भाव: ॥ १०३ ॥

एवमेतत्प्रसङ्गादभिधाय प्रकृतमेवानुसरति—

तदद्वयायां संवित्तावभ्यासोऽनुपयोगवान् ।
केवलं द्वैतमालिन्यशङ्कानिर्मूलनाय स: ॥ १०४ ॥

तदिति-उक्ताद्धेतो:, अभ्यास इति यमादीनाम् । ननु यदि नामायमनुपयुक्त: तत्किमर्थमुक्त: ?—इत्याशङ्क्याह—केवलमित्यादि ॥१०४ ॥

ननु यद्येवं तत्कथं स्वपरामर्शात्मनस्तर्कस्य द्वैतशङ्कानिर्मूलत्वं प्रागुक्तम् ? इत्याशङ्क्याह—

द्वैतशङ्काश्च तर्केण तर्क्यन्त इति वर्णितम् ।
तत्तर्कसाधनायास्तु यमादेरप्युपायता ॥ १०५ ॥

वर्णितमिति तर्कतत्त्वचर्चावसरे, उक्तं च

'अनेन लक्षयेद्योगी योगसिद्धिप्रवर्तकम् ।
निवर्तकं च यद्वस्तु बहुधा संव्यवस्थितम् ॥'

सङ्केत का = सङ्केतित अर्थ का, अनादर = उपेक्षा, इसलिये 'शब्दनिष्ठम्' ऐसा कहा गया न कि अर्थनिष्ट उसका आदर होने पर शब्द की अपेक्षा होने पर शब्द की प्रतीति के बाद अर्थ की प्रतीति होती है—यह भाव है ॥ १०३ ॥

प्रसङ्गात् इसका कथन कर प्रस्तुत का अनुसरण करते हैं—

इसलिये अद्वैत संवित् के विषय में अभ्यास करना निरर्थक है । वह (= अभ्यास) केवल द्वैत के मालिन्यशङ्का के विनाश के लिये है ॥१०४॥

तत् = उक्त कारण से, यम आदि का अभ्यास । प्रश्न—यदि यह अनुपयुक्त है तो क्यों कहा गया ?—यह शङ्का कर कहते हैं—केवल इत्यादि ॥ १०४ ॥

प्रश्न—यदि ऐसा है तो क्यों स्वपरामर्शरूप तर्क को पहले द्वैतशङ्का का उन्मूलक कहा गया ? यह शङ्का कर कहते हैं—

यह कहा जा चुका है कि द्वैत की शङ्कायें तर्क के द्वारा विमर्श का विषय बनती है । इसलिए यम आदि भी उसी सत्तर्कसाधना का उपाय बनते हैं ॥ १०५ ॥

वर्णन किया गया—तर्क तत्त्व की चर्चा के अवसर पर । कहा भी गया है—

"इसके द्वारा योगी योगसिद्धि को देने वाली तथा बाधक जो वस्तु है उसे

इति, तस्मात् यमादीनां यद्द्वैतशङ्कानिर्मूलकत्वमुक्तं तत् तर्कोपायत्वात्पारम्पर्येण, इत्येषां तदेव मुख्यतयाभिधानीयम्, इत्याह—'तत्तर्केत्यादि' तेन तर्कस्यैव संवितौ साक्षादुपायत्वं, नेतरेषाम् इत्युक्तं भवेत् ॥ १०५ ॥

न चैतत् निष्प्रमाणकमित्याह—

उक्तं श्रीपूर्वशास्त्रे च न द्वैतं नापि चाद्वयम् ।
लिंङ्गापूजादिकं सर्वमित्युपक्रम्य शम्भुना ॥ १०६ ॥
विहितं सर्वमेवात्र प्रतिषिद्धमथापि वा ।
प्राणायामादिकैरङ्गैर्योगाः स्युः कृत्रिमा यतः ॥ १०७ ॥
तत्तेनाकृतकस्यास्य कलां नार्हन्ति षोडशीम् ।

श्रीपूर्वशास्त्र इत्युपक्रम्य शंभुनोक्तम्, इति संबन्धः 'न द्वैतं नापि चाद्वैतम्' इत्येवं-वृत्तानुरोधान्न पठितम्, 'लिङ्गपूजादिकं सर्वम्' इत्यत्रापि नञा संबन्धः, यदुक्तं तत्र

'.........................लिङ्गपूजादिकं न च ।' इति ।

सर्वमित्यनेन लिङ्गपूजाद्यपरित्यागादेः स्वीकारः, यदुक्तं तत्र—

अनेक प्रकार से व्यवस्थित समझे (= लक्षित कराये) ॥

इस कारण यम आदि को जो द्वैतशङ्का का विनाशक कहा गया वह पारम्परिक रूप से तर्करूप उपाय वाला होने के कारण । इसलिये इनका मुख्य रूप से अभिधेय वही (तर्क ही) है—यह कहते हैं—'तो तर्क' इत्यादि । इस कारण तर्क ही संवित् की प्राप्ति में साक्षात् उपाय है दूसरे नहीं, यह कहा गया ॥ १०५ ॥

और यह (कथन) प्रमाणरहित नहीं है—यह कहते हैं—

श्री मालिनीविजयोत्तरतन्त्र में 'लिङ्गपूजा आदि सब'—ऐसा प्रारम्भ कर भगवान् शिव ने कहा है—यहाँ विहित अथवा प्रतिषिद्ध सब कुछ (अनुपयोगी है) प्राणायाम आदि अङ्गों वाले योग चूँकि कृत्रिम हैं इसलिये (ये सब) इस अकृत्रिम की सोलहवीं कला के बराबर भी नहीं हैं ॥ १०६-१०८- ॥

'श्रीपूर्वशास्त्र में' यहाँ से प्रारम्भ कर 'शम्भु के द्वारा कहा गया' यहाँ तक सम्बन्ध है । छन्द के अनुरोध से 'न द्वैत न अद्वैत' ऐसा नहीं पढ़ा गया ।''

'लिङ्गपूजा आदि सब' यहाँ भी नञ् से सम्बन्ध है । जैसा कि वहाँ कहा गया—

''और न लिङ्ग पूजा आदि''

'सब' इस पद से लिङ्गपूजा आदि का अपरित्याग स्वीकृत किया गया है जैसा

'न चापि तत्परित्यागो निष्परिग्रहतापि वा ।
सपरिग्रहता वापि जटाभस्मादिसंग्रहः ॥
तत्त्यागो वा व्रतादीनां चरणाचरणं च यत् ।
क्षेत्रादिसंप्रवेशश्च समयादिप्रपालनम् ॥
परलिङ्गस्वरूपादि नामगोत्रादिकं च यत् ।
नास्मिन्विधीयते किञ्चिन्न चापि प्रतिषिध्यते ॥' इति ।

एवं हि तूष्णींभाव आपतेत्, इत्याशङ्क्य 'विहितम्' इत्याद्युक्तं, सर्वमिति विधीयमानं प्रतिषिध्यमानं च किञ्चिन्निषिद्धं, किञ्चिद्विधीयमानं हि भेदमेवाविर्भावयेत् तेन—संविदद्वैतशालिनो योगिनः कार्याकार्यविभागो नास्ति, इत्युक्तं स्यात्, अत एव प्राणायामाद्यङ्गकरणकतया कृत्रिमत्वात् स्वरससिद्धसंविद- द्वयात्मनो योगस्य स्वल्पेनापि अंशेन दर्शनान्तरीया योगाः साम्यमात्रमप्यधिगन्तुं नोत्सहन्ते इत्युक्तं—प्राणायामादिकैरित्यादि ॥ १०७ ॥

ननु यद्येवं तत् अकृतकत्वेन निमित्तानपेक्षणादस्य नित्यं सत्त्वमसत्त्वं वा स्यात् ?—इत्याशङ्क्याह—

किं त्वेतदत्र देवेशि नियमेन विधीयते ॥ १०८ ॥
तत्त्वे चेतः स्थिरं कार्यं तच्च यस्य यथास्त्विति ।

कि वहाँ कहा गया—

"और न उसका परित्याग, निष्परिग्रहता, सपरिग्रहता अथवा जटाभस्म आदि का संग्रह या उसका त्याग, व्रत आदि का पालन करना या नहीं करना, क्षेत्र आदि में प्रवेश, समय आदि का पालन, परलिङ्गस्वरूप आदि और नाम गोत्र आदि जो (कुछ) है, यहाँ न तो किसी का विधान और न निषेध ॥"

इस प्रकार तो मौनभाव आ जाता है ?—यह शङ्का कर 'विधान किया गया' इत्यादि कहा गया है । 'सर्व' इससे कुछ विधीयमान और कुछ निषिध्यमान' का निषेध कर कुछ का विधान करना भेद को प्रकट करता है । इसलिये संविद-अद्वैतशाली योगी के लिये कार्याकार्य का विभाग नहीं है—यह कहा गया । इसलिये प्राणायाम आदि अङ्गरूप करण वाला होने से कृत्रिम होने के कारण दर्शनान्तरीय योग अल्पांश में भी स्वभावसिद्ध संविद् अद्वयरूप योग की तुलना करने का साहस नहीं करते—इसलिये कहा गया—'प्राणायाम आदि के कारण' ॥ १०७-८ ॥

प्रश्न—यदि ऐसा है तो स्वाभाविक होने से कारण की अपेक्षा न करने से इसकी सत्ता या असत्ता नित्य होगी ? यह शङ्का कर कहते हैं—

हे देवेशि ! यहाँ इसका अवश्य विधान है कि तत्त्व में चित्त को स्थिर करना चाहिये यह जिसका चाहे जिस प्रकार से हो ॥ -१०८-१०९- ॥

किं पुनरेतत् अत्र नियमेन विधातव्यं, यत्—'तत्त्वे स्थिरं चेत: स्यात्' इति, चेतसोऽपि अत्र स्थैर्यमाकस्मिकमेव न स्यात्, इत्यत्र केनापि निमित्तेनावश्यं भाव्यम् ?—इत्याशङ्क्य उक्तं 'तच्च यस्य यथास्त्विति' तच्च—स्थिरं चेतो, यस्य कस्यचन योगिनो, यथा नियतनिमित्तानपेक्षित्वेन स्यादित्यर्थ:, यदुक्तं तत्र—

'तच्च यस्य यथैव स्यात्स तथैव समाचरेत् ।' इति,

अत एव नियमाभावात् सर्वमेव विहितं प्रतिषिद्धं चेत्युक्तम् । अष्टादशस्य पटलस्यैकवाक्यतां दर्शयितुमालूनविशीर्णतया अयं ग्रन्थ: संवादित: ॥ १०८ ॥

तदेवोपसंहरति—

एवं द्वैतपरामर्शनाशाय परमेश्वर: ॥ १०९ ॥
क्वचित्स्वभावममलमामृशन्ननिशं स्थित: ।

ननु शुद्धसंविन्मात्रात्मैव पारमेश्वर:स्वभावो यस्य 'अहमेव सर्वम्' इत्येवंरूप: परामर्श:, न च अस्य क्वचित् कदाचित् कश्चिद्विशेष: संभवेत् इति कथमुक्तं— क्वचिदमलं स्वभावमामृशन् स्थित: ? इति, इत्याशङ्क्याह—

य: स्वभावपरामर्श इन्द्रियार्थाद्युपायत: ॥ ११० ॥
विनैव तन्मुखोऽन्यो वा स्वतन्त्र्यात्तद्विकल्पनम् ।

फिर क्या यहाँ नियम बनाया जाय कि—तत्त्व में चित्त स्थिर हो' । यहाँ चित्त की स्थिरता भी आकस्मिक नहीं होगी इसलिये यहाँ भी कोई कारण अवश्य होना चाहिये ? यह शङ्का कर कहा गया—'वह जिसको जैसे हो ।' वह = स्थिरचित्त, जिस किसी योगी को, जैसे = निश्चित कारण की अपेक्षा न रखकर हो—यह अर्थ है । जैसा कि वहाँ कहा गया—

इसलिये नियम न होने के कारण सब कुछ विहित और प्रतिषिद्ध है—यह कहा गया । अठारहवें परिच्छेद को एक वाक्य में दिखाने के लिये छिन्न-भिन्न रूप से यह ग्रन्थ कहा गया ॥ १०८-९ ॥

उसी का उपसंहार करते हैं—

इस प्रकार परमेश्वर द्वैत के परामर्श के नाश के लिये सर्वत्र अपने निर्मल स्वभाव का सदा परामर्श करते हुए स्थित है ॥ -१०९-११०- ॥

प्रश्न—परमेश्वर का स्वभाव शुद्धसंविन्मात्र रूप है । जिसका 'मैं ही सब हूँ' ऐसा परामर्श होता है । इसका कहीं कभी कोई विशेष सम्भव नहीं है फिर कैसे कहा गया कि कहीं निर्मल स्वभाव का परामर्श करते हुए स्थित है ?''—यह शङ्का कर कहते हैं—

इन्द्रियों के विषय आदि उपायों के विना अथवा उन (= इन्द्रियों) की उन्मुखता वाला जो स्वाभाविक परामर्श है उसकी विकल्पना (परमेश्वर के)

इह खलु इन्द्रियार्थाद्युपायनैरपेक्ष्येण अन्तरुल्लखिताकारमात्रनिष्ठ:, तन्मुख:—इन्द्रियार्थाद्युपायको निर्विकल्पपृष्ठभावी अन्यो वा य: स्वभावपरामर्श: तदुभयरूपमपि क्षेत्रज्ञस्वातन्त्र्योल्लासितं विकल्पनं विकल्प इत्यर्थ: ॥ ११० ॥

तच्च द्विधा, इत्याह—

तच्च स्वच्छस्वतन्त्रात्मरत्ननिर्भासिनि स्फुटम् ॥ १११ ॥
भावौघे भेदसंधातृ स्वात्मनो नैशमुच्यते ।
तदेव तु समस्तार्थनिर्भरात्मैकगोचरम् ॥ ११२ ॥
शुद्धविद्यात्मकं सर्वमेवेदमहमित्यलम् ।

तच्च—विकल्पनं, परानवभास्यत्वात् स्वच्छ:, अत एवानन्यापेक्षत्वात् स्वतन्त्रो, योऽसावात्मा प्रमात्रेकरूप: पर: प्रकाश:, स एव प्रतिबिम्बग्रहणसहिष्णुत्वात् स्फटिकं, तत्राभेदेन निर्भासनशीलेऽपि प्रमातृप्रमेयात्मनि भावौघे, स्फुटं कृत्वा, स्वात्मन: सकाशादन्यापोहरूपत्वेन भेदसंधायकत्वात् नैशं—मायीयमुच्यते, इति सामान्येनोक्ते: सर्वैरिवाभिधीयते इत्यर्थ:, तदेव विकल्पनं पुन: 'सर्वमिदमहमेव' इत्येवंरूपम्, अत एव समस्तार्थपरिपूर्ण-

---

स्वातन्त्र्य से ही सम्भव है ॥ -११०-१११- ॥

इन्द्रिय विषय आदि उपायों से निरपेक्ष केवल अन्त: उल्लिखित आकार में स्थित, तन्मुख = इन्द्रिय विषय आदि उपाय वाला, निर्विकल्प के पीछे होने वाला अथवा अन्य जो स्वभाव का परामर्श उन दोनों रूपों वाला क्षेत्रज्ञ के स्वातन्त्र्य से उल्लसित विकल्पन = विकल्प—यह अर्थ है ॥ ११०-१११ ॥

और वह दो प्रकार का है—यह कहते हैं—

वह (= विकल्प) स्वच्छ स्वतन्त्र आत्मरत्न के समान प्रकाशित होने वाले भाव-समूह में स्पष्टतया भेद का आधायक होने से मायीय कहलाता है । और वही समस्त अर्थ से पूर्ण केवल आत्मा को विषय बनाने वाला 'यह सब कुछ मैं ही हूँ' इस प्रकार का होने पर शुद्ध विद्यावाला कहा जाता है ॥ -१११-११२- ॥

वह = विकल्प, दूसरे से अवभास्य न होने के कारण स्वच्छ इसलिये अन्य की अपेक्षा वाला न होने के कारण स्वतन्त्र जो यह आत्मा = प्रमाता रूप परप्रकाश, वही प्रतिबिम्बग्रहणसहिष्णु होने के कारण स्फटिक, उसमें निर्भासनशील भी प्रमातृप्रमेयरूप भावसमूह के स्पष्ट से अपने पास से अन्यापोहन रूप से भेदसन्धायक होने के कारण, (वह विकल्प) नैश = मायीय कहलाता है—ऐसा सामान्य उक्ति के कारण सब लोग कहते हैं । वही विकल्प पुन: 'यह सब मैं ही हूँ। इस प्रकार का है, इसलिये समस्त अर्थ से परिपूर्ण स्वात्ममात्र में स्थित,

स्वात्मैकनिष्ठम्, अत एवालं—पर्याप्तं सत् शुद्धविद्यात्मकमुच्यते, इति प्राच्येन संबन्धः ॥ १११-११२ ॥

ननु

'सर्वो विकल्पः संसारः.................... ।'

इत्यादिनीत्या विकल्पस्तावत् सर्व एव हेयः, तदनेनापि विभागेनाभिहितेन कोऽर्थः ?—इत्याशङ्क्याह—

इदं विकल्पनं शुद्धविद्यारूपं स्फुटात्मकम् ॥ ११३ ॥
प्रतिहन्तीह मायीयं विकल्पं भेदभावकम् ।

स्फुटात्मकमिति—प्रागुक्तविकल्पसंस्क्रियाक्रमणेन साक्षात्कारतां प्राप्तमित्यर्थः, मायीयस्य विकल्पस्य प्रतीघाते भेदभावकत्वं हेतुः, अत एवाभेदभावकत्वादिदमुपादेयम्, इत्युक्तं स्यात् ॥ ११३ ॥

तच्च परामृश्यभेदादनेकप्रकारम्, इत्याह—

शुद्धविद्यापरामर्शो यः स एव त्वनेकधा॥ ११४ ॥
स्नानशुद्ध्यर्चनाहोमध्यानजप्यादियोगतः ।

ननु अयं शुद्धविद्यात्मा परामर्शः कथं नाम भेदनिष्ठं मायीयमेव विकल्पं

इसलिये अलम् = पर्याप्त होते हुये शुद्धविद्यात्मक कहा जाता है ।—यह पहले से सम्बन्ध जानना चाहिए ॥ ११२-११३ ॥

प्रश्न—

''समस्त विकल्प रूप-संसार''

इत्यादि नीति के द्वारा विकल्प तो सब का हेय है तो इस विभाग के कथन से क्या तात्पर्य ? यह शङ्का कर कहते हैं—

शुद्धविद्या रूप यह स्फुट विकल्प भेदभाव वाले मायीय विकल्प का नाश कर देता है ॥ -११३-११४- ॥

स्फुटात्मक = पूर्वोक्त विकल्प के संस्कार के क्रम से साक्षात्कारता को प्राप्त । मायीय विकल्प के प्रतिघात में भेदभावकता हेतु है, इसलिये अभेदभावक के कारण यह (= शुद्धविद्यारूप विकल्प) उपादेय—यह कहा गया है ॥ ११३-११४ ॥

और वह परामृश्य के भेद से अनेक प्रकार का है—यह कहते हैं—

जो शुद्धविद्या वाला परामर्श है वह स्नान, शुद्धि, अर्चना होम ध्यान जप आदि योग से अनेक प्रकार का है ॥ -११४-११५- ॥

प्रश्न—यह शुद्धविद्यारूप परामर्श भेदनिष्ठ मायीय विकल्प का ही नाश क्यों

प्रतिहन्यात्, यत्प्रयोजकीकाराय अस्यापि प्रकारान्तरासूत्रणम् ?—इत्याशङ्क्याह—

विश्वमेतत्स्वसंवित्तिरसनिर्भरितं रसात् ॥ ११५ ॥
आविश्य शुद्धो निखिलं तर्पयेदध्वमण्डलम् ।

इह खलु एवंपरामर्शवान् योगी वक्ष्यमाणक्रमेण स्वात्मचमत्कारपूर्णतया आदरातिशयात् विश्वमिदमाविश्य, अत एव परप्रमात्रेकरूपत्वात् शुद्धो निखिलमध्वमण्डलं तर्पयेत्—स्वात्मसंवित्तिरसनिर्भरतया साक्षात्कुर्यादित्यर्थः । अनेन च प्रतिनियतकल्पितबाह्यार्चनीयाद्यभावं कटाक्षयता योगाङ्गानुपयोगित्वानन्तर्येण उद्दिष्टस्य कल्पितार्चाद्यनादरस्य अवकाशो दत्तः ॥ ११५ ॥

ननु स्नानादेरपि भेदसंधायकत्वान्मायीयामर्शरूपत्वमेव युक्तं कथमस्य शुद्धविद्यापरामर्शकत्वमुक्तम् ?—इत्याशङ्क्याह—

उल्लासिबोधहुतभुग्दग्धविश्वेन्धनोदिते ॥ ११६ ॥
सितभस्मनि देहस्य मज्जनं स्नानमुच्यते ।

बाह्योन्मुखत्वादुल्लसनशीलः प्रमाणात्मा योऽसौ बोधः स एव प्रकाशत्वादग्निः, तेन दग्धं—स्वात्मसात्कृतं यन्नीलसुखादिरूपं विश्वं तदेव दाह्य-

---

करता है जिसको प्रयोजन बनाने के लिये इसका भी प्रकारान्तर से प्रारम्भ होता है ? यह शङ्का कर कहते हैं—

शुद्ध (योगी) स्वबोध के रस से पूर्ण इस विश्व में रस के कारण समाविष्ट होकर समस्त अध्वमण्डल को तृप्त करता रहता है ॥ -११५-११६- ॥

इस प्रकार के परामर्श वाला योगी वक्ष्यमाण क्रम से स्वात्मचमत्कारपूर्ण होने से आदरातिशय के कारण इस विश्व में आविष्ट होकर, इसलिये परप्रमाता रूप होने से शुद्ध हुआ समस्त अध्व-मण्डल को तृप्त करता है = स्वात्मसंवित्तिरस से पूरित होने के कारण साक्षात्कार करता है । इससे कल्पित बाह्य अर्चनीय आदि के अभाव को कटाक्षित करते हुए योगाङ्ग की अनुपयोगिता के बाद उद्दिष्ट कल्पित अर्चा आदि के अनादर को अवकाश दिया गया ॥ ११५-११६ ॥

प्रश्न—भेदसन्धायक होने के कारण स्नान आदि की भी मायीय आमर्शरूपता ही युक्त है तो फिर इसे शुद्धविद्या का परामर्शक कैसे कहा गया ? यह शंका कर कहते हैं—

उल्लसनशील संविद्रूपी अग्नि में विश्वरूपी इन्धन के जलने से उत्पन्न शुभ्र भस्म में शरीर को डुबो देना स्नान कहलाता है ॥ -११६-११७- ॥

बाह्य उन्मुख होने के कारण उल्लसनशील, प्रमाण रूप जो यह बोध वही

त्वादिन्धनं, तत उदितेतदुभयसङ्घट्टनेन लब्धप्रतिष्ठाने, सिते—निरुपाधिनि, भस्मनि—अपरिमितप्रमात्रेकरूपे परे तत्त्वे, देहादेः,—परिमितस्य प्रमातुर्यन्मज्जनं—स्वगुणीभावेन तत्रैव मुख्यतया समावेशः, तन्नाम स्नानमुच्यते, न पुनर्बाह्यजलादिरूपम्, इति अर्थसामर्थ्यलभ्यो व्यतिरेकः, यदभिप्रायेणैव

'यदि मुक्तिर्जलस्नानान्मत्स्यानां सा न किं भवेत्।'

इत्यादि अन्यत्रोक्तम् ॥ ११६ ॥

ननु बाह्येन स्नानेन नित्यादौ कर्मण्यधिकारो देहादौ च शुद्धिर्भवेत्, अस्य पुनरेवं विधस्य किं फलम् ?—इत्याशङ्क्याह—

इत्थं च विहितस्नानस्तर्पितानन्तदेवतः ॥ ११७ ॥
ततोऽपि देहारम्भीणि तत्त्वानि परिशोधयेत्।

ननु

'सर्वं खल्विदं ब्रह्म'

इत्यादिनीत्या सर्वमिदं—देहादि परब्रह्मात्मकशिवस्वभावमेव, इति का नाम तत्र शुद्धिरशुद्धिर्वा ?—इत्याशङ्क्याह—

प्रकाश होने के कारण अग्नि है, उससे दग्ध = स्वात्मसात्कृत, जो नील सुख आदि रूप विश्व वही दाह्य होने के कारण ईधन, उससे स्वच्छ = उपाधिरहित, भस्म के = अपरिमित प्रमातृरूप परतत्त्व के, उदित = उन दोनों के सङ्घट्ट से प्रतिष्ठा को प्राप्त, होने पर देह आदि परिमित प्रमाता का जो मज्जन = अपने को गौड बनाकर उसी में मुख्यरूप से समावेश, वही स्नान कहा जाता है न कि बाह्य जल आदि रूप । यह व्यतिरेक अर्थ के सामर्थ्य से प्राप्य है जिस अभिप्राय से ही

'यदि जलस्नान से मुक्ति होती है तो वह मछलियों को क्यों नहीं (प्राप्त) होती।'

इत्यादि अन्यत्र कहा गया ॥ ११६-११७ ॥

प्रश्न—बाह्य स्नान से नित्य आदि कर्म में अधिकार और देह आदि की शुद्धि होती है, किन्तु इस प्रकार के (स्नान का) क्या फल है ? यह शङ्का कर कहते हैं—

इस प्रकार स्नान करने वाला अनन्त देवताओं को तर्पित कर तत्पश्चात् देहारम्भक तत्त्वों का शोधन करे ॥ -११७-११८- ॥

प्रश्न—

"यह सब ब्रह्म ही है"

इत्यादि नीति से यह सब देह आदि परब्रह्मरूप शिवस्वभाव वाला ही है । फिर

शिवात्मकेष्वप्येतेषु बुद्धिर्या व्यतिरेकिणी ॥ ११८ ॥
सैवाशुद्धिः पराख्याता शुद्धिस्तद्धीविमर्दनम् ।

व्यतिरेकिणी—भेदात्मा, तद्धीः-व्यतिरेकिणीबुद्धिः, यदुक्तम्—

'अशुद्धं नास्ति तत्किंचित्सर्वं तत्र व्यवस्थितम् ।
यत्तेन रहितं किञ्चिदशुद्धं तेन जायते ॥' इति ॥ ११८ ॥

ततश्च किम्,—इत्याह—

एवं स्वदेहं बोधैकपात्रं गलितभेदकम् ॥ ११९ ॥
पश्यन्संवित्तिमात्रत्वे स्वतन्त्रे तिष्ठति प्रभुः ।

एवम्—उक्तेन प्रकारेण अनात्मन्यात्माभिमानन्यक्कारेण, आत्मनि स्वतन्त्रतादि-धर्मप्रयोजकीकारेण, संविन्मात्ररूपतां साक्षात्कुर्यादित्यर्थः ॥ ११९ ॥

एव स्नानादेरकल्पिततत्त्वमभिधायेतरेषामपि अर्चनाङ्गानां दर्शयति—

यत्किञ्चिन्मानसाह्लादि यत्र क्वापीन्द्रियस्थितौ॥ १२० ॥
योज्यते ब्रह्मसद्धाम्नि पूजोपकरणं हि तत् ।

उसमें शुद्धि अशुद्धि क्या ? यह शङ्का कर कहते है—

शिवस्वरूप इन तत्त्वों के विषय में जो विपरीत बुद्धि है वही परम अशुद्धि कही गयी है । उस बुद्धि का नाश ही शुद्धि है ॥-११८-११९- ॥

व्यतिरेकिणी = भेद वाली, वह धी = व्यतिरेकिणी बुद्धि । जैसा कि कहा गया—

"वह थोड़ा भी अशुद्ध नहीं है । वहाँ सब व्यवस्थित है । क्योंकि जो कुछ उससे रहित है । वह अशुद्ध होता है ॥ ११८-११९ ॥

इससे क्या ?—यह कहते हैं—

इस प्रकार भेदहीन संवित् के पात्र रूप (इस) अपने देह को स्वतन्त्र संविन्मात्र के रूप में देखने वाला प्रभु (= ऐश्वर्यसम्पन्न) हो जाता है ॥ -११९-१२०- ॥

एवम् = उक्त प्रकार से (योगी) अनात्मा में आत्माभिमान को हटा देने से, आत्मा में स्वतन्त्रतादि धर्म लगा देने से, संविन्मात्ररूपता का साक्षात्कार करता है ॥ ११९-१२० ॥

इस प्रकार स्नान आदि की अकल्पितता का कथन कर दूसरे पूजाङ्गों का भी (अकल्पितत्व) दिखलाते हैं—

जिस किसी इन्द्रिय में जो कुछ मन को प्रसन्न करने वाला है उसे

यस्यां कस्याञ्चिदिन्द्रियवृत्तौ, किञ्चित् अनियतं, मानसाह्लादि वस्तु, ब्रह्मरूपे शोभने सूर्याचन्द्रादिविलक्षणे तेजसि, योज्यते—बहीरूपतापरित्यागेन संविन्मात्रात्मना साक्षात्क्रियते, तन्नाम पूजोपकरणं—तावतैव पूजायाः परिपूर्तिर्भवेदित्यर्थः ॥ १२० ॥

ननु अश्रुतपूर्वमिदं पूजालक्षणम् ?—इत्याशङ्क्याह—

पूजा नाम विभिन्नस्य भावौघस्यापि सङ्गतिः ॥ १२१ ॥
स्वतन्त्रविमलानन्तभैरवीयचिदात्मना ।

विभिन्नस्यापि रूपरसादेर्भावौघस्य, देशकालाद्यनवच्छिन्ननिरुपाधिपूर्णपरसंविदात्मना, या सङ्गतिः—एकीकारः, सा पूजेति संभाव्यते—नैतदस्मदुपज्ञमेवेत्यर्थः, यदुक्तम्—

'पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढा ।
निर्विकल्पे महाव्योम्नि सा पूजा ह्यादराल्लयः ॥' इति ।

एवं होमादीनामपि पूजोपकरणत्वादेव ईदृक् रूपमर्थसिद्धम्, इति न साक्षादुक्तम्, तच्च प्राक् बहूक्तं, वक्ष्यते च, इति—तत एवावधार्यम् ॥ १२१ ॥

ब्रह्मरूपी सत्धाम में जोड़ देना ही पूजा का उपकरण है ॥-१२०-१२१-॥

जिस किसी इन्द्रियों की वृत्ति में जो कुछ = अनियत, मन को प्रसन्न करने वाली वस्तु ब्रह्मरूप शोभन सूर्य चन्द्र आदि से विलक्षण तेज से जोड़ी जाती है = बाह्यरूपता का परित्याग करके केवल संविद्रूप में साक्षात्कार की जाती है वह ही पूजा का उपकरण है = उसी से पूजा की पूर्ति होती है ॥ १२०-१२१ ॥

प्रश्न—यह पूजा का लक्षण पहले कभी नहीं सुना गया ?—यह शङ्का कर कहते हैं—

विभिन्न भावसमूह का स्वतन्त्र विमल अनन्त भैरवीय संविद् अग्नि के साथ जोड़ दिया जाना (= तादात्म्य स्थापित करना) ही पूजा है ॥ -१२१-१२२- ॥

भिन्न-भिन्न रूप रस आदि भावसमूह का देशकाल आदि से अनवच्छिन्न निरुपाधि पूर्ण संविद् रूप से, जो सङ्गति = एकाकारता, वह पूजा मानी जाती है । यह हमारा उपज्ञ नही है । जैसा कि कहा गया—

"पुष्प आदि से पूजा नहीं होती । बल्कि निर्विकल्प महाव्योम में जो दृढ़ विश्वास किया जाता है जो आदर के साथ लय है वह पूजा है ।"

इस प्रकार होम आदि का भी पूजा का उपकरण होने के कारण इस प्रकार का रूप अर्थात् सिद्ध है इसलिये साक्षात् नहीं कहा गया—यह पहले बहुत

ननु कथमन्यस्य अन्येनैकीकार एव भवेत् यदपि पूजादेर्लक्षणतयोच्येत ? इत्याशङ्क्याह—

तथाहि संविदेवेयमन्तर्बाह्योभयात्मना ॥ १२२ ॥
स्वातन्त्र्याद्वर्तमानैव परामर्शस्वरूपिणी ।

इयम्-उक्तस्वरूपा, संविदेव हि स्वस्वातन्त्र्यादन्तर्बहीरूपतया परिस्फुरति, इति—तदतिरिक्तमन्यत् नाम न किञ्चिद्वस्तुतोऽस्ति, इति युक्तमुक्तं—'विभिन्नस्यापि भावौघस्य चिदात्मनैकीकार' इति, ननु कथं नामास्या बहीरूपतावभासनेऽपि अहपरामर्शात्मकं स्वं रूपं स्यात्? इत्याशङ्क्योक्तं 'परामर्शस्वरूपिण्येव' इति, एवमप्यस्या न स्वरूपात्प्रच्याव इत्यर्थः ॥ १२२ ॥

इयदेव हि नामास्याः परामर्शरूपत्वं—यद्विश्वरूपतया प्रस्फुरति, इत्यत आह—

स च द्वादशधा तत्र सर्वमन्तर्भवेद्यतः ॥ १२३ ॥
सूर्य एव हि सोमात्मा स च विश्वमयः स्थितः ।
कलाद्वादशकात्मैव तत्संवित्परमार्थतः ॥ १२४ ॥

सः—परप्रमातृरूपः परामर्शश्च द्वादशधा विश्वरूपतयोल्लसेदित्यर्थः, अनेन

कहा गया और (आगे) कहा भी जायेगा—इसलिये वहीं से समझ लेना चाहिये ॥ १२१-१२२ ॥

प्रश्न—अन्य की अन्य के साथ एकता ही कैसे होती है जिसे पूजा का लक्षण कहते है—यह शङ्का कर कहते हैं—

इस प्रकार—यह परामर्शरूपिणी संविद् ही अपने स्वातन्त्र्य के कारण अन्तः बाह्य एवं दोनों (= अन्तर्बाह्य) रूपों में वर्त्तमान है ॥-१२२-१२३-॥

यह = उक्त स्वरूप वाली संविद् ही अपने स्वातन्त्र्य के कारण अन्तः एवं बाह्य रूप में स्फुरण करती है । उससे अतिरिक्त दूसरी कोई भी वस्तु नहीं है । इसलिये ठीक कहा गया है—भिन्न-भिन्न भावसमूह का चिदात्मा के साथ ऐकात्म्य । प्रश्न—बाह्यरूप से अवभासित होने पर भी इसका अपना रूप अहंपरामर्शात्मक कैसे है ? यह शङ्का कर कहा गया—'परामर्शस्वरूपिणी ही है । इस प्रकार भी इसका अपने रूप से स्खलन नहीं होता'—यह अर्थ है ॥ १२२-१२३ ॥

यही इसकी परामर्शरूपता है कि (यह) विश्वरूप में स्फुरित होती है । इसलिये कहते हैं—

वह (= परामर्श) बारह प्रकार का है । उसी में सबका अन्तर्भाव हो जाता है । सूर्य ही सोमरूप है और विश्वमय रूप में स्थित है । वह संवित् परमार्थतः बारह कलाओं वाली है ॥ -१२३-१२४ ॥

कल्पितार्चाद्यनादरानन्तर्येण अनुजोद्देशोद्दिष्टः संविच्चक्रोदयोऽप्युपक्रान्तः । ननु विश्वस्य प्रमातृप्रमेयादिरूपत्वेनापि बहुधात्वमस्ति, इति कथं—द्वादशकलात्मसूर्यरूपेण प्रमाणमात्रेणैवोपात्तेन तत्संग्रहः सिद्ध्येत् ? इत्याशङ्क्याह—'तत्रेत्यादि' सर्वमिति—प्रमातृप्रमेयादि, इह खलु

'योऽयं वह्निः परं तत्त्वं प्रमातुरिदमेव तत् ।'

इत्याद्युक्त्या परसंविदात्मा प्रमाता तावत् भेदेन्धनदाहकत्वादग्निः, स एव च अहंप्रतीतिमात्रस्वरूपः स्वस्वातन्त्र्यात् बुद्धीन्द्रियाद्यात्मना द्वादशधा प्रस्फुरन् प्रमाणदशामधिशयानः 'सूर्यः' इत्युच्यते, प्रमाणं च प्रमातुरेव बहिर्मुखं रूपम्, इति—तत्र प्रमाता तावदन्तर्भावमियात्, प्रमाणं नाम च ज्ञानं, तच्चोपाश्रयशून्यं न क्वचिदपि संभवति—इत्यवश्यमेव मेयाक्षेपेण वर्तते, इति, तदपि अत्रान्तर्भूतमेव, तदाह 'सूर्य एव' इत्यादि, 'सोमः' प्रमेयम्, यदुक्तं प्राक्

'सूर्यं प्रमाणमित्याहुः सोमं मेयं प्रचक्षते ।
अन्योन्यमवियुक्तौ तौ स्वतन्त्रावप्युभौ स्थितौ ॥' इति ।

विश्वमय इति विश्वस्य मेयात्मकत्वात्, अतश्च सर्वस्यैव अत्रान्तर्भावात् विश्वरूपतया प्रस्फुरन्त्याः परस्याः संविदो द्वादशात्मकत्वमेव वस्तुतः संभवति,

---

वह = परप्रमातृरूप परामर्श, विश्व के रूप में बारह प्रकार से उल्लसित होता है । इससे कल्पित पूजा आदि के अनादर के बाद अनुजोद्देशोदिष्ट संवित् चक्र के उदय का उपक्रम भी हो गया । प्रश्न—विश्व का प्रमाता प्रमेय आदि के रूप में भी अनेक प्रकार है फिर केवल प्रमाण से प्राप्त बारह कला वाले सूर्य के रूप में ही उसका संग्रह कैसे सिद्ध होता है ? यह शङ्का कर कहते हैं—'वहाँ ....।' सब = प्रमाता प्रमेय आदि ।

'जो यह परतत्त्व वह्नि है वह प्रमाता का ही (रूप) है ।'

इत्यादि उक्ति के द्वारा परसंविद्रूप प्रमाता भेदरूप ईधन का दाहक होने के कारण अग्नि है और अहंप्रतीति रूप वही अपने स्वातन्त्र्यवश बुद्धि इन्द्रिय आदि बारह प्रकार से स्फुरित होता हुआ प्रमाण दशा को प्राप्त होकर 'सूर्य' कहा जाता है । प्रमाण प्रमाता का ही बहिर्मुखी रूप है उसमें प्रमाता अन्तर्भाव को प्राप्त होता है । और प्रमाण ज्ञान है वह कभी भी आश्रयशून्य नहीं हो सकता इसलिये अवश्य ही प्रमेय का आक्षेप करके रहता है इसलिए वह (प्रमाण) भी (प्रमेय) में अन्तर्भूत है ।' वह कहते हैं—'सूर्य ही' इत्यादि, सोम = प्रमेय । जैसा कि पहले कहा गया—

"सूर्य को प्रमाण और चन्द्रमा को प्रमेय कहा गया है । वे दोनों एक दूसरे से वियुक्त न होते हुए भी स्वतन्त्र रूप में स्थित रहते हैं ।"

विश्वमय—क्योंकि विश्व प्रमेय है । इसलिये सभी का इसमें अन्तर्भाव होने से

इति युक्तमुक्तं 'स च द्वादशधा इति, अत एवाह—'कलाद्वादशकेत्यादि' कलाः—प्रमात्रादिरूपाः अंशाः ॥ १२३-१२४ ॥

ननु अस्यास्त्रयोदशात्मकत्वमपि अन्यैरुक्तं, तत् कथमिह द्वादशात्मकत्वमेवोच्यते ?—इत्याशङ्क्याह—

सा च मातरि विज्ञाने माने करणगोचरे।
मेये चतुर्विधं भाति रूपमाश्रित्य सर्वदा ॥ १२५ ॥

विज्ञाने इति मानविशेषणम्, अन्येषां हि बोधाबोधरूपमपि प्रमाणलक्षणं विवक्षितं, करणगोचरे इति—प्रमाणविषयतां प्राप्ते इत्यर्थः, अन्यथा हि मेयं नाम स्वात्मनि न किञ्चिदेवेति भावः, चो हेतौ, यतः, सा—पारमार्थिकी संवित् सृष्टिस्थितिसंहारानाख्यत्वेन चतुर्विधं रूपमाश्रित्य प्रमातरि प्रमाणे प्रमेये च सर्वदा भाति—अविच्छिन्नत्वेन एकैकत्र चातुरात्म्ये द्वादशधा प्रस्फुरतीत्यर्थः, यदुक्तम्—

'सोमार्कानलदीप्तीनां रूपं यः सर्वगोऽमितः ।
सृष्ट्यादिक्रमयोगेन व्यक्तां नयति स्फुटम् ॥

इति । तथा

'यस्यां यस्यां बोधभूमौ समाविशति तत्त्ववित् ।

विश्वरूप में स्फुरित होने वाली परासंविद् की द्वादशरूपता वस्तुतः सम्भव है । इसलिये यह ठीक कहा गया—'वह बारह प्रकार वाली' । इसलिये कहते हैं—'बारह कला इत्यादि' । कला = प्रमाता आदि रूप अंश ॥ १२४ ॥

प्रश्न—इसकी त्रयोदशात्मकता भी दूसरों के द्वारा कही गई है तो यहाँ द्वाद, शात्मकता ही कैसे कही जा रही है ? यह शङ्का कर कहते हैं—

और वह (= परमार्थ संवित्) प्रमाता प्रमाण और इन्द्रियों के विषयभूत प्रमेय में चार प्रकार के रूप को आधार बनाकर सर्वदा प्रकाशित होती रहती है ॥ १२५ ॥

विज्ञान में 'यह मान (= प्रमाण) का विशेषण है । दूसरे लोग प्रमाण का लक्षण बोधाबोध रूप भी मानते हैं । इन्द्रियविषयों के प्रमाणविषयता को प्राप्त होने पर—यह अर्थ है । अन्यथा स्वात्मा में प्रमेय नामक कोई भी चीज नहीं है । 'च' का प्रयोग कारण अर्थ में है । अर्थात् क्योंकि वह = पारमार्थिक संवित् सृष्टि स्थिति संहार और अनाख्या वाले चार प्रकार के रूप का आश्रय लेकर प्रमाता प्रमाण प्रमेय में सर्वदा आभासित होती है = अविच्छिन्न रूप में एक-एक जगह चार से संपृक्त बारह रूपों में प्रस्फुरण करती है । जैसा कि कहा गया ।

"चन्द्रमा सूर्य और अग्नि के प्रकाश का रूप जो कि सर्वव्यापी और अपरिमित है, सृष्टि आदि क्रम से (अपने को) स्पष्टतया व्यक्त करता है ।" तथा

तस्यां तन्मयतां प्राप्य चातुरात्म्यं प्रपद्यते ॥'

इति । ननु अस्याः परस्याः संविदोऽन्यैरनयैव भङ्ग्या त्रयोदशात्मकत्वमुक्तं, यदुक्तम्—

'एकं स्वरूपरूपं हि मानमेयप्रमातृताः ।
सर्गावतारसंहारमयीराक्रम्य वर्तते ॥
स्वस्वरूपानुगुण्येन प्रत्येकं कलनावशात् ।
सृष्टिस्थित्यादिभिर्भेदैश्चतुर्धा ता अपि स्थिताः ॥
कालग्रासान्तमुदयाच्चतुर्धा विभवो हि यः ।
तस्य विश्रान्तिरेकैव ततो देव्यस्त्रयोदश ॥
अनाख्यचक्रे प्राधान्यात्पूजनीयतया स्थिताः ।' इति ।

इह च द्वादशात्मकत्वमुच्यते इति किमेतत्? इति न जानीमः, अत्रोच्यते— इह खलु परैव संवित् स्वस्वातन्त्र्यात् यथोक्तयुक्त्या द्वादशधा प्रस्फुरिता इति तावदविवादः, तत्र यद्यसौ परैव संवित् तेभ्यो द्वादशभ्यो रूपेभ्यः पृथगवभासेत तदस्या भवेत्त्रयोदशत्वम्, अन्यथा तत् कस्यान्यस्य त्रयोदशत्वं स्यात्, संविदो हि अतिरिके द्वादश रूपाणि असंविद्रूपत्वात् न चकास्युरेव, इति—निराभासा संविदेकैव अवशिष्येत, इति को नाम त्रयोदशरूपत्वस्यावकाशः । अथातिरेकेऽपि संवित् सामान्यन्यायेन द्वादशापि रूपाण्यनुयन्ती स्वरूपेणापि अवभासते, इति

"तत्त्ववेत्ता जिस-जिस बोधभूमि में समावेश करता है उस-उस में तन्मयता को प्राप्त होकर चतुरात्मता को प्राप्त करता है ।"

प्रश्न—दूसरे लोगों ने इसी भङ्गिमा से इस परा संविद् को तेरह प्रकार का बतलाया है । जैसा कि कहा गया—

"एक अपना रूप सृष्टि स्थिति संहार वाली प्रमाण प्रमेय और प्रमातृता को व्याप्त करके वर्तमान है । अपने स्वरूप के अनुसार रचनावश वे (प्रमाण आदि) सृष्टि स्थिति आदि भेदों से चार रूपों में स्थित है । कालग्रासपर्यन्त उदय होने से जो चार प्रकार का विस्तार है उसकी विश्रान्ति एक ही है । इसलिये तेरह देवियाँ प्रधानता के कारण अनाख्याचक्र में पूजनीय रूप में स्थित हैं ।"

और यहाँ (उन्हें) बारह कहा जा रहा तो यह क्या है ? यह (हम) नहीं समझ पा रहे हैं ? इस विषय में कहा जाता है—परा संविद् ही अपने स्वातन्त्र्य के कारण उक्त युक्ति के अनुसार बारह प्रकार से प्रस्फुरित है—इसमें ऐकमत्य है । तो यदि यह परा ही संवित् उन बारह रूपों से अलग अवभासित होती तो यह तेरह हो जाती अन्यथा फिर कौन दूसरा तेरहवाँ होगा ? बारह रूप संविद् से अतिरिक्त होने पर असंविद्रूप होने के कारण प्रकाशित ही नहीं होंगे इसलिये आभासहीन संविद् एक ही अवशिष्ट रहेगी फिर (उसकी) तेरहरूपता का कहाँ अवसर रहेगा ।

स्थितमेव अस्यास्त्रयोदशत्वम् इति चेत्, असदेतत्, सामान्यं हि विशेषेभ्यो भिन्नं सत्ताननुगच्छति, येनगौर्गौरिति अभिन्नस्तदनुगतः प्रत्ययः स्यात्, संविदि पुनस्तानि तान्यपि रूपाणि प्रस्फुरन्ति, नातिरिच्यन्ते, तथात्वे हि तेषामवभास एव न स्यात्, तेन यन्नाम तानि तानि रूपाणि प्रस्फुरन्ति तदेवोच्यते 'संविदवभासते' इति, तत् किं केनानुगम्यते—दृष्टान्तस्य वैषम्यात्, यत्किञ्चिदेतत्, यदभिप्रायेणैव—

'भावा भान्तीति संवित्तावात्मा भातीति भासते।
आत्मा भातीति संवित्तौ भावा भान्तीति भासते ॥'

इत्यादि अन्यत्रोक्तम् । अथ परैवेयं संवित् द्वादशकात्मनारूषितेन रूपेण प्रस्फुरेत्, शुद्धसंविन्मात्रात्मना त्रयोदशेन चानारूषितेन ? इति चेत्, नैतत्, इह हि—निरुपाधिरनारूषिता निराभासा परैव शुद्धा संविदस्ति इति नः सिद्धान्तः, सा च स्वस्वातन्त्र्यमाहात्म्यात् स्वंरूपं गोपयित्वा विश्वरूपतामवभासयन्ती द्वादशकात्मनारूषितेनैव रूपेण प्रस्फुरेत्, नहि तदानीं तदतिरिक्तमनारूषितमपि अस्या रूपं भायात्, तथात्वे हि आरूषितमेव रूपं न चकास्यादित्युक्तं बहुशः । ननु

प्रश्न—भिन्न होने पर भी संविद् सामान्य न्याय से बारह रूपों का अनुसरण करती हुई अपने रूप में भी भासित होती है इसलिये यह निश्चित रूप से तेरह है ? यह (कथन) असत् है । सामान्य (गोत्व आदि) विशेषों से भिन्न होने पर उनका अनुगमन करता है जिससे यह गाय है यह गाय है—ऐसा अभिन्न उसका अनुयायी प्रत्यय होता है किन्तु संविद् में भिन्न-भिन्न रूप प्रस्फुरित होते हुए भी भिन्न नहीं होते क्योंकि वैसा होने पर उनका अवभास ही नहीं होगा । इसलिये जो भिन्न-भिन्न रूप स्फुरित होते हैं वही कहा जाता है कि संविद् प्रकाशित हो रही है । तो कौन किसके द्वारा अनुगत होता है ? 'क्योंकि दृष्टान्त ही भिन्न इस कारण यह कुछ है।' जिस अभिप्राय से—

"भाव भासित होते हैं ऐसा ज्ञान होने पर लगता है कि आत्मा भासित हो रहा है । आत्मा भासित हो रहा है ऐसा ज्ञान होने पर लगता है कि पदार्थ भासित हो रहे हैं ।"

इत्यादि अन्यत्र कहा गया है ।

प्रश्न—यह परा संवित् अपने बारह अनारूषित रूप से स्फुरित होती है और शुद्ध संविद् वाले अपने तेरहवें अनारूषित रूप से ? ऐसा नहीं है । इस विश्व में उपाधिशून्य, अनारूषित निराभास परा ही शुद्ध संविद् है—यह हमारा सिद्धान्त है । वह अपने स्वातन्त्र्य की महिमा से अपने रूप को छिपाकर विश्वरूपता को अवभासित करती हुई बारह आरूपित रूप से ही स्फुरित होती है । उस समय उसके अतिरिक्त उसका अनारूषित भी रूप आभासित नहीं होता । क्योंकि वैसा होने पर उसका आरूषित रूप ही प्रकाशित नहीं होगा—ऐसा कई बार कहा जा

विश्वमयत्वेऽप्यस्या विश्वोत्तीर्णमनारूषितं रूपं संभवेत्, अन्यथा हि अस्या जाड्यमापतेत्, नन्वस्य प्रश्नस्य क इवाशयः—किं विश्वमयत्वेऽप्यस्या गोशृङ्ग-न्यायेन तदरिक्तिमनारूषितं रूपं संभवेदिति, उत स्वस्वातन्त्र्याद्विश्वरूपतामव-भासयन्त्या अप्यस्याः संविदद्वयात्मनः स्वस्वरूपात् प्रच्यावो न जायते इति ? तत्राद्यः पक्षो दूषितप्रायः—नहि वैश्वरूप्यमतिक्रम्य अस्याः स्फुरत्तैव स्यादित्युक्त-मसकृत्, वक्ष्यति च—

'न खल्वेष शिवः शान्तो नाम कश्चिद्विभेदवान्।
सर्वेतराध्वव्यावृत्तो घटतुल्योऽस्ति कुत्रचित् ॥
महाप्रकाशरूपा हि येयं संविद्विजृम्भते ।
स शिवः शिवतैवास्य वैश्वरूप्यावभासिता ॥
तथाभासनयोगोऽतः स्वरसेनास्य जृम्भते ।' इति ।

अनेनैवाभिप्रायेण श्रीतपस्विनापि

'परतरतयादिरूपं यद्यत्कलयामि तत्तदधरं ते ।
अधरतरापि न कलना सा काचिद्यत्र न स्थितास्यभितः ॥'

इत्याद्युक्तम् । द्वितीयस्मिन् पक्षे पुनर्ववस्तुतोऽनारूषितत्त्वेऽपि स्वस्वातन्त्र्यो-ल्लासितेन तेन तेनारूषितेनैव रूपेण अस्या अवभासः, इति पुनरपि नास्यास्त्रयो-

---

चुका है । प्रश्न—विश्वमय होने पर भी उसका विश्वोत्तीर्ण निर्मलरूप सम्भव है अन्यथा यह जड हो जायेगी ? प्रश्न—इस प्रश्न का क्या आशय है ? क्या विश्वमय होने पर भी गोशृङ्ग न्याय से उससे भिन्न इसका निर्मल रूप सम्भत है अथवा अपने स्वातन्त्र्य के कारण विश्वरूपता का अवभासन करती हुई भी यह अपने संविद्द्वयात्मक रूप से च्युत नही होती ? इसमें पहला पक्ष दोषयुक्त है—विश्वरूपता को छोड़कर इसकी स्फुरत्ता ही नहीं है—यह कई बार कहा जा चुका है। आगे भी कहेंगे—

"भेदवान्, समस्त अन्य अध्वाओं से रहित घट के समान कोई शान्त शिव कहीं नहीं है । जो यह महाप्रकाश रूप संविद् भासित हो रही है वही शिव है । इसकी शिवता ही विश्वरूपता का आभास है । इसलिए उस प्रकार का आभास इस के स्वातन्त्र्य से स्फुरित होता है ।"

इसी अभिप्राय से तपस्वी ने भी—

"पर, परतर आदि जिस-जिस रूप की कलना (= आकलन) या कल्पना (मैं) करता हूँ वह तुम्हारी अपेक्षा निम्न है । निम्नतर भी वह कोई कल्पना नहीं होती जहाँ चारों ओर तुम स्थित नहीं हो ।'

इत्यादि कहा है । दूसरे पक्ष में वस्तुतः अनारूषित होने पर भी अपने स्वातन्त्र्य से उल्लासित उस-उस अनारूषितरूप से ही इसका अवभास होता है ।

दशरूपत्वं, तद्धि अयःशलाकाकल्पतया स्पर्धाबन्धेन परिस्फुरतोरनयोः स्यात्, यथाहि—नटस्तत्तद्भूमिकावलम्बनवेलायां वस्तुतो नटत्वेऽपि तत्तद्रूपतयैवावभासते, न पुनः नटत्वेनापि, तथैव च संविदपि वस्तुतः शुद्धसंविन्मात्रत्वेऽपि विश्वमयतायां द्वादशकात्मनैव रूपेणावभासते, न पुनः शुद्धसंविन्मात्रात्मना त्रयोदशेनापि रूपेणावभासते, इति यथोक्तमेव युक्तम्, तस्माद्विश्वरूपतामवभासयन्ती संवित् द्वादशधैव प्रस्फुरेत्, अन्यथा पुनरेकैवेति पर्यवसितम् । यदागमः—

'पृथक्पृथक्स्वकार्यस्था यावत्तिष्ठन्ति देवताः ।
तावत्क्रमकृता संज्ञा विद्यते नान्यथा पुनः ॥
एकीभावतया सर्वमनाख्यायां यदा स्थितम् ।
अक्रमस्तु तदा ज्ञेयः प्रोत्तीर्णः सर्वतो यतः ॥'

इति । एवं चैकत्वमपि द्वयप्रतिपक्षभूतम्, इति तद्विशेषणत्वमपि न सहते, इति संविदेवेति स्यात्, एवकारश्च अन्ययोगव्यवच्छेदकः, अन्यश्च कश्चिदपीह नास्ति, इति किं व्यवच्छिन्द्यात्, इति तद्योगमप्यसहमाना संविदित्येव स्यात्, संविच्च संवेद्यनिष्ठा, संवेद्यं नाम च स्वात्मातिरिक्तं न किञ्चिदप्यस्ति इति, तथा व्यपदेशमप्यलभमाना सर्वत्रैवाव्यपदेश्येति अनामकेति अनाख्येति चोद्धोष्यते, इत्यलं बहुना । ननु यद्येवं तत् कथमन्यत्र अस्यास्त्रयोदशरूपत्वमुक्तं युज्यते,

---

इसलिए फिर भी इसका तेरह रूप नहीं है वह (साइकिल के पहिये में लगी) लोहे की तीली के समान होने से स्पर्धाबन्ध के द्वारा परिस्फुरित होने वाले इन दोनों (द्वादश त्रयोदश रूपों) का होता है । जैसे नट भिन्न—भिन्न भूमिका के निर्वाह के समय वस्तुतः नट होते हुए भी उस-उस रूप में ही भासित होता है न कि नट के रूप में उसी प्रकार संविद् भी वस्तुतः शुद्ध संविन्मात्र (= अर्थात् एक) होते हुए भी विश्वमय अवस्था में बारह रूपों से ही भासित होती है न कि शुद्ध संविन्मात्र तेरहवें रूप से भी भासित होती है । इसलिए जैसा कहा गया वही ठीक है इसलिये विश्वरूपता को अवभासित करती हुई संविद् बारह प्रकार से ही स्फुरित होती है अन्यथा फिर एक ही है—यह निश्चित हुआ आगम भी—

"जब तक देवतायें पृथक् पृथक् अपने कार्य में स्थित होकर रहती है तब तक क्रमकृत संज्ञा रहती हैं अन्यथा नहीं । फिर जब एक रूप से सब अनाख्या में स्थित हो जाता है तब अक्रम जानना चाहिये क्योंकि (वह) सबसे परे है ।"

इस प्रकार एकत्व भी दो का प्रतिपक्ष (= विरोधी) है इसलिए उसका विशेषण नहीं होता । इसलिये एकमात्र संविद् ही है, एवकार से अन्ययोग का व्यवच्छेद होता है यहाँ अन्य कोई है नहीं फिर किसका व्यवच्छेद करेगा इसलिये उस (एवकार) के योग का सहन न करती हुई संवित् है । संविद् संवेद्य में रहती है और आत्मा से अतिरिक्त कोई संवेद्य है नहीं, इस कारण वैसा नाम न प्राप्त करने वाली वह सर्वत्र अव्यपदेश्या, अनामका अनाख्या कही जाती है—बस इतना पर्याप्त

नहि तन्नोपपद्यते इति वक्तुं शक्यम्—आगमात्मनो निर्बाधस्य प्रमाणस्य भावात्, तत् कथमेतत् प्रतिसमाधीयते इत्युच्यताम् ? उच्यते—इह भेदाधिवासिता माया-प्रमातारस्तावदुपदेश्या:, इति समानार्थचर्यावत् तदानुगुण्येन अत्र प्रवृत्त उपदेश: सुखेन प्ररोहमियात् इति विकल्पबलोपनतं भेदमाश्रित्य संविदस्त्रयोदशरूपत्वमुक्तम्, इह पुनर्वास्तवमभेदमेवावलम्ब्य एवमुपदेश:, इति सर्वमेव प्रतिसमाहितम् । ननु अस्या: परस्या: संविद:

'तस्य शक्तय एताश्च तिस्रो भान्ति परादिका: ।
सृष्टौ स्थितौ लये तुर्ये तेनैता द्वादशोदिता: ॥'

इत्याद्युक्त्या प्रागन्यथा द्वादशधोदय उक्त:, इह चान्यथा, इति पूर्वापरव्याहतत्त्वमापतेत्, इति किमेतत् ? अत्रोच्यते—इह यावता हि परस्या: संविदो द्वादशधोदयो विवक्षित: स चैवमस्तु, अनेवं वा—प्रक्रियाया विशेषे तस्याविशेषात्, एतदभिप्रायगर्भीकारेणैव च अन्यत्राप्यनेनैव

'ता एताश्चतस्र: शक्तय: स्वातन्त्र्यात्प्रत्येकं त्रिधैव वर्तन्ते—सृष्टौ स्थितौ संहारे च इति द्वादश भवन्ति ।'

है ।

प्रश्न—यदि ऐसा है तो अन्यत्र इसका उक्त तेरह रूप का कथन कैसे युक्त होता है । वह (कथन) समीचीन नहीं है—ऐसा नहीं कह सकते क्योंकि उसमें निर्बाध आगम प्रमाण है । तो इसका समाधान क्या है—यह बताइये ? कहते है—भेदभावना से अधिवासित मायाप्रमाता उपदेश्य हैं—ऐसी समानार्थकचर्या की भाँति उसके अनुसार यहाँ दिया गया उपदेश आसानी से बढ़ेगा । ऐसा विकल्प के बल से प्राप्त भेद का आश्रय लेकर संविद् के तेरह रूप कहे गये और यहाँ वास्तविक अभेद के आधार पर ऐसा उपदेश हुआ । इस प्रकार सबका समाधान हो गया । प्रश्न—

इस परा संविद् का—

"उसकी ये परा आदि तीन शक्तियाँ सृष्टि स्थिति प्रलय और तुरीय अवस्थाओं में प्रकाशित होती हैं । इसलिये ये बारह कही गई हैं ।"

इत्यादि उक्ति के द्वारा पहले बारह प्रकार का उदय कहा गया यहाँ दूसरे प्रकार का, यह तो पूर्वापर व्याघात हो जायेगा—यह क्या है—इस विषय में कहते हैं—चूँकि यहाँ परासंविद् का बारह प्रकार का उदय विवक्षित है तो वह ऐसा हो या ऐसा न हो क्योंकि प्रक्रिया के विशिष्ट होने पर उसमें कोई वैशिष्ट्य नहीं होता । इस अभिप्राय को भीतर रखकर ही अन्यत्र भी इन्होंने—

'ये चार शक्तियाँ स्वातन्त्र्य के कारण प्रत्येक तीन-तीन प्रकार की होती हैं—सृष्टि स्थिति और संहार में—इसलिये बारह होती हैं'

इत्याद्युक्त्या प्रक्रियान्तरेण अस्या द्वादशधोदय उक्तः, इति सर्वं निरवद्यम् ॥ १२५ ॥

नन्वेवंरूपत्वेनावभासमानाया अस्या वैशिष्ट्यमवश्याश्रयणीयम्, अन्यथानैक्यमेव न स्यात् तत् पुनः कुत्र कीदृक् ?—इत्याशङ्क्याह—

शुद्धसंविन्मयी प्राच्ये ज्ञाने शब्दनरूपिणी ।
करणे ग्रहणाकारा यतः श्रीयोगसञ्चरे ॥ १२६ ॥

इयं खलु परा संवित् प्राच्ये—प्रमातरि कथञ्चित्सङ्कोचोल्लासेऽपि प्रमातृरूपत्वात् शुद्धा, न पुनः प्रमाणादिवदशुद्धैव येयं संवित् संकुचितमविकल्पकं ज्ञानं तत्स्वभावा, बुद्धीन्द्रियाद्यात्मकरणलक्षणे प्रमाणे च शब्दनं—विकल्पस्तद्रूपिणी भेदामर्शमयीत्यर्थः, अत एव 'ग्रहणाकारा' इत्युक्तम्, ग्रहणं हि ग्राह्यग्राहकोभयापेक्षकम् । ननु प्रमाणदशायामपि परैव संवित् ग्रहणाकारा वर्तते, इत्यत्र किं प्रमाणम् ? इत्याशङ्क्याह—यत इत्यादि 'यतः श्रीयोगसञ्चरे' इति वक्ष्यमाणमुक्तमिति शेषः ॥ १२६ ॥

तदेवाह—

इत्यादि उक्ति के द्वारा प्रक्रियान्तर की दृष्टि से इसका बारह प्रकार का उदय कहा गया । इस प्रकार सब निर्दुष्ट हैं ॥ १२५ ॥

प्रश्न—इस रूप से अवभासमान इस (संविद्) का वैशिष्ट्य अवश्य मानना चाहिये अन्यथा अनैक्य ही नहीं होगा । फिर वह (अनैक्य) कहाँ कैसा है ? यह शङ्का कर कहते हैं—

परासंवित् प्राच्य (= प्रमाता) में शुद्ध संवित्रूपा, ज्ञान में शब्दरूपा और इन्द्रियों में ग्रहणरूपा है । क्योंकि योगसञ्चर में (ऐसा कहा गया है) ॥ १२६ ॥

यह परा संवित् प्राच्य = प्रमाता में किसी प्रकार सङ्कोच का उल्लास होने पर भी प्रमातृरूप होने से शुद्ध न कि प्रमाण आदि की भाँति अशुद्ध है जो यह संवित् = संकुचित अविकल्पक ज्ञान, उस स्वभाववाली, बुद्धि इन्द्रिय आदि आत्मकरणलक्षण वाले प्रमाण में, शब्दन = विकल्प, उस रूप वाली अर्थात् भेद आमर्श वाली इसलिये 'ग्रहण के आकार वाली' ऐसा कहा गया है । ज्ञान ग्राह्य ग्राहक दोनों की अपेक्षा वाला होता है । प्रश्न—प्रमाण दशा में भी परा ही संवित् ज्ञान के आकार वाली होती है । इसमें क्या प्रमाण है ? यह शङ्का कर कहते हैं—क्योंकि इत्यादि । 'क्योंकि श्री योगसचर में' यह आगे कहा जाने वाला (यहाँ) कहा गया ॥ १२६ ॥

वही कहते हैं—

ये चक्षुर्मण्डले श्वेते प्रत्यक्षे परमेश्वरि ।
षोडशारं द्वादशारं तत्रस्थं चक्रमुत्तमम् ॥ १२७ ॥

ये इति द्विवचनं गोलकद्वयापेक्षया, एवमुत्तरत्रापि ज्ञेयम्, ये श्वेते चक्षुर्मण्डले दृश्येते दृश्यमाने न तु रक्तमण्डलवद्गुप्ते तत्र विश्वक्रोडीकारादुत्तमं प्रमेयप्रमाण-प्रमातृप्रमाणां सर्वसर्वात्मकत्वात् षोडशारं चक्रं तिष्ठति—तद्रूपतया प्रस्फुरतीत्यर्थः, यदभिप्रायेणैव श्रीक्रमसद्भावभट्टारके 'अनाख्यचक्रे षोडशैव देव्यः पूज्यत्वेनोक्ताः', यदुक्तं तत्र

'षोडशातः समासेन शृणुष्वेकमना हर ।'

इत्यादि ।

'सा सत्ता लीयते यस्याः काली द्व्यष्टकला स्मृता ॥'

इत्यन्तम् । अत्र चानाख्यत्वेऽपि सृष्ट्यात्मनः प्रमेयस्य प्राधान्येनावस्थितेः सोमरूपत्वात् श्वेतत्वम् ॥ १२७ ॥

ननु यद्यत्र षोडशारं चक्रमवस्थितं, तत् कथं द्वादशारमपि ? इत्याशङ्क्याह—

प्रतिवारणवद्रक्ते तद्बहिर्ये तदुच्यते ।

हे परमेश्वरि जो दो श्वेत चक्षुर्मण्डल प्रत्यक्ष दिखायी पड़ते हैं उसमें षोडशार एवं द्वादशार उत्तम चक्र स्थित हैं ॥ १२७ ॥

'ये' यह द्विवचन ग (चक्षु) गोलक की दृष्टि से उक्त है । इसी प्रकार आगे भी जानना चाहिये । : दो श्वेत चक्षुर्मण्डल दिखलायी देते हैं न कि रक्तमण्डल की भाँति गुप्त है, उस. विश्व को छिपा लेने के कारण उत्तम प्रमेय प्रमाण प्रमाता एवं प्रमा के सर्वसर्वान्मव होने से सोलह अरों वाला चक्र स्थित है—उस रूप में प्रस्फुरण करता है—यह अर्थ है । जिस अभिप्राय से क्रमसद्भावभट्टारक में अनाख्या चक्र में सोलह ही देवियाँ पूज्य कही गई हैं' जैसा कि वहाँ कहा गया—

"हे शिव ! अब एकाग्रचित्त होकर संक्षेप में सोलह (कलाओं) को सुनो । यहाँ से लेकर—

"जिसकी वह सत्तालीन हो जाती है वह काली सोलह कला वाली कही गई है ।"

यहाँ तक अनाख्य होने पर भी सृष्ट्यात्मक प्रमेय के प्रधान रूप से स्थित होने के कारण सोमरूप होने से श्वेतता है ॥ १२७ ॥

प्रश्न—यदि यहाँ सोलह अरों वाला चक्र स्थित है तो बारह अरों वाला भी (वहाँ) कैसे है ? यह शङ्का कर कहते हैं—

द्वितीयं मध्यगे ये ते कृष्णश्वेते च मण्डले ॥ १२८ ॥
तदन्तर्ये स्थिते शुद्धे भिन्नाञ्जनसमप्रभे ।
चतुर्दले तु ते ज्ञेये अग्नीषोमात्मके प्रिये ॥ १२९ ॥
मिथुनत्वे स्थिते ये च चक्रे द्वे परमेश्वरि ।
संमिलनोन्मीलनं ते अन्योन्यं विदधातके ॥ १३० ॥

तद्बहिः—श्वेतमण्डलबाह्ये, प्रतिवारणवत्—प्रतिमण्डलन्यायेन, रक्ते ये मण्डले स्थिते, तत् द्वितीयं—श्रीसृष्टिकाल्यादिरूपं द्वादशारं चक्रमुच्यते, अनाख्यत्वेऽपि अत्र स्थित्यात्मनः प्रमाणस्य प्राधान्याद्रक्तत्वं, तद्धि प्रमेयोपरञ्जितमेव भवेत्, अतश्च प्रमेयस्य तदभेदेनैवावस्थानात् तद्गतस्य रूपचतुष्कस्य पृथगभावात् द्वादशारत्वम्, अत एवास्य प्रमेयान्तःकाराद्बहिरप्यवस्थानं, मध्यगे—श्वेतकृष्ण-मण्डलान्तर्गते, अत एव अन्तर्वर्तिना कृष्णेन मण्डलेन बहिष्ठेन च श्वेतेनाच्छुरणात् श्वेतकष्णे धूसरप्राये ये पुनर्मण्डले तत्प्रमाणस्य प्रमातरि विश्रान्तेः तद्गतस्यापि रूपचतुष्कस्य पृथगभावात् संहारात्मप्रमातृप्रधानं 'भैरवत्रयं, देवीत्रयं, कुलेश्वरः, कुलेश्वरी' चेत्यष्टारं चक्रमुच्यते—इत्यर्थावसेयम्, यद्वक्ष्यति—

'षोडशद्वादशाराभ्यामष्टारेष्वथ सर्वशः ।

(दोनों आँखों में) जो दो रक्तमण्डल (= लाल घेरा) हैं (वह श्वेत कृष्ण के) प्रतिवारक के रूप में (स्थित) है । वह बाहर की ओर कहा जाता है । बीच में वर्तमान जो कृष्ण श्वेत दो मण्डल हैं वे द्वितीय हैं । उसके भीतर घने काले अञ्जन के समान कान्ति वाले जो दो शुद्ध (मण्डल) हैं वे चतुर्दल एवं अग्नीषोमात्मक जानने चाहिये । हे परमेश्वरी, जो दो चक्र मिथुनी भाव में स्थित हैं, वे परस्पर संमीलन और उन्मीलन करते रहते हैं ॥ १२८-१३० ॥

उससे बाहर = श्वेत मण्डल से बाहर, प्रतिवारण के समान = प्रतिमण्डल न्याय से, जो दो रक्तमण्डल स्थित हैं, वह द्वितीय = श्री सृष्टिकाली आदि रूप वाला द्वादशार चक्र कहा जाता है । अनाख्य होने पर भी यहाँ स्थित्यात्मक प्रमाण की प्रधानता के कारण रक्तता है । वह प्रमेय से उपररञ्जित है इसलिये ये प्रमेय के उससे अभिन्न रूप से स्थित होने के कारण उसमें वर्त्तमान चार रूपों के पृथक् न होने से द्वादशार है । इसलिये इसके प्रमेय के भीतर किये जाने से बाहर भी स्थिति है। मध्यगामी = श्वेतकृष्ण मण्डल के अन्तर्गत । इसलिये अन्तर्वर्ती कृष्णमण्डल और बहिस्थ श्वेतमण्डल से कुछ-कुछ छुरित होने के कारण श्वेतकृष्ण = धूसरप्राय जो मण्डल उस प्रमाण के प्रमाता में विश्रान्ति के कारण उसके स्थित चार रूपों के पृथक् न होने से संहारात्मक प्रमातृप्रधान तीन भैरव, तीन भैरवी कुलेश्वर और कुलेश्वरी इन आठ अरों वाला चक्र कहा जाता है—यह अर्थात् जानना चाहिये । जैसा कि कहेंगे—

इति, तस्य—श्वेतस्यापि मण्डलस्यान्तर् अतीव कृष्णे—कुमारिकाशब्दव्यपदेश्ये, ये मण्डले स्थिते ते पुनः प्रमातुरपि प्रमायां विश्रान्तेः चतुर्दले ज्ञेये—देवीत्रयं श्रीमातृसद्भावश्चेति, प्रमामात्रसतत्त्वानाख्यचक्ररूपतया प्रस्फुरत इत्यर्थः, अत एव चात्र सर्वसंहारकत्वात् निर्विभागतया तमोरूपत्वात् कार्ष्ण्यं, तदेवं चक्षुषि प्रतिनियतावयवरूपत्वेन सृष्ट्यादिक्रमचतुष्टयमवस्थितमित्युक्तम्, तत्रापि अस्य यथासंभवं स्वरूपं निरूपयति 'अग्नीषोम' इत्यादिना, एतच्चक्रचतुष्टयस्य मध्यादग्नीषोमात्मके प्रमातृप्रमेयमये षोडशाराष्टारे भोक्तृभोग्योभयात्मकतया मिथुनरूपे ये द्वे चक्रे स्थिते ते परस्परं संमीलनोन्मीलने विदधाते एव--विदधातके, सङ्कोचविकासौ कुर्वाते इत्यर्थः, प्रमाता हि स्वात्मनि संमीलनमादधानः प्रमेयमुन्मीलयेत् प्रमेयं च संमीलयन् स्वात्मानमुन्मीलयेत्, एवं प्रमेयमपि-इत्यन्योन्यशब्दार्थः, एतदेव च सृष्टिसंहाररूपत्वमुच्यते, प्रमेयं च नाम प्रमाणोपारोहमन्तरेण प्रमातरि विश्रान्तिमेव न यायात्, इत्यत्र स्थितेरपि अर्थाक्षिप्तत्वम्, प्रमातापि प्रमेयौन्मुख्येन 'ज्ञातोऽयं मयार्थः' इति संतोषोत्पादान्निराकाङ्क्षः सन् स्वात्मनि विश्रान्तिमासादयेत्—इति प्रमातृप्रमेयसङ्घट्टादपि पर्णायाः परस्याः संविदः समुल्लासः स्यात् ॥ १२८-१३० ॥

अत आह—

"सोलह और बारह अरों के द्वारा सर्वशः आठ अरों में ।"

उस = श्वेत मण्डल के भीतर अत्यन्त कृष्ण = कुमारिका नाम वाले जो दो मण्डल स्थित है वे प्रमाता के भी प्रमा में विश्रान्ति के कारण चार दल वाले समझे जाने चाहियें—(वे चार दल है—) तीन देवियाँ और मातृसद्भाव । अर्थात् प्रमामात्र तत्त्व वाले अनाख्य चक्र के रूप में (वे दोनों) प्रस्फुरण करते है । इसलिये यहाँ सर्वसंहारक होने के कारण विभागरहित होने से तमोरूप होने के कारण कालिमा है। तो इस प्रकार आँख में निश्चित अवयवरूप से सृष्टि आदि चार क्रम अवस्थित है—यह कहा गया—'अग्नीषोम' इत्यादि के द्वारा । इनके स्वरूप का यथासम्भव निरूपण करते है । इस चार चक्र के मध्य से अग्नीषोमात्मक प्रमातृप्रमेय वाले सोलह और आठ अरों वाले भोक्ता-भोग्य और उभयात्मक होने से मिथुनरूप जो दो चक्र स्थित है । वे परस्पर संमीलन उन्मीलन करते ही है = सङ्कोच विकास करते है । प्रमाता अपने में समीलन करता हुआ प्रमेय को उन्मीलित करता है और प्रमेय संमीलन करता हुआ अपने को उन्मीलित करता है । इसी प्रकार प्रमेय भी—यह अन्योऽन्य शब्द का अर्थ है । यही सृष्टिसंहाररूपता कही जाती है । प्रमेय प्रमाण में आरोह के विना प्रमाता में विश्रान्त ही नहीं होगा—इससे स्थिति का अर्थात् आक्षेप होता है । प्रमाता भी प्रमेय की ओर उन्मुखता से 'मैंने यह अर्थ जान लिया'—ऐसा सन्तोष उत्पन्न होने के कारण निराकाङ्क्ष होता हुआ अपने में विश्रान्त हो जाता है । इस प्रकार प्रमाता और प्रमेय के सङ्घट्ट से भी पूर्ण परा संविद् का समुल्लास होता है ॥ १२८-१३० ॥

यथा योनिश्च लिङ्गं च संयोगात्स्त्रवतोऽमृतम् ।
तथामृताग्निसंयोगाद् द्रवतस्ते न संशयः ॥ १३१ ॥

'भोगसाधनसंसिद्धयै भोगेच्छोरस्य मन्त्रराट्।
जगदुत्पादयामास मायामाविश्य शक्तिभिः ॥'

इत्यादिनीत्या परस्परावेशलक्षणं संयोगमासाद्य योनिः—माया, लिङ्गं च—

'लिङ्गशब्देन विद्वांसः सृष्टिसंहारकारणम्।
लयादागमनाच्चाहुर्भावानां पदमव्ययम् ॥'

इत्याद्युक्त्या सृष्ट्यादिपञ्चविधकृत्यकारी परमेश्वरः, तौ यथा स्त्रवतः— सृष्टिं कुरुतः, तथा ते—षोडशाराष्टारे, निःसंशयममृतस्य सोमात्मनः प्रमेयस्य, अग्नेश्च प्रमातुः परस्परौन्मुख्यलक्षणात् संयोगादमृतम्—अकालकलितत्वात् अनादिनिधनं परं संवित्तत्वं द्रवतः—तद्रूपतया प्रसरत इत्यर्थः, संविदेव हि आश्यानीभूता नीलादिरूपतामधिशयाना प्रमाणोपारोहद्वारेण तद्रूपतां विलाप्य प्रमातरि विश्रान्तिमुपगच्छन्ती स्वेन प्रमात्रेकात्मना रूपेण प्रस्फुरतीत्याशयः ॥ १३१ ॥

इसलिये कहते हैं—

जैसे योनि और लिङ्ग परस्पर संयुक्त होने पर अमृत का स्त्रवण करते हैं उसी प्रकार वे दोनों (= माया और परमेश्वर) अमृत (= सोम) और अग्नि के संयोग से (अमृत = परासंवित् का) स्त्रवण करते हैं ॥ १३१ ॥

"भोगेच्छु इसके भोगसाधन की सिद्धि के लिये मन्त्रेश्वर ने माया में प्रवेश कर शक्तियों के द्वारा संसार को उत्पन्न किया ।"

इत्यादि नीति के द्वारा परस्पर आवेशलक्षण संयोग को प्राप्त कर योनि = माया, लिङ्ग =

"विद्वान् लोग, भावों (= पदार्थों अथवा भावनाओं) पदार्थों के लय एवं सृष्टि के कारण लिङ्ग शब्द से, सृष्टि-संहार के कारणभूत मुक्त अव्यय पद को बतलाते हैं (लि = लय, ग = गमना-गमन) ।"

इत्यादि उक्ति के द्वारा सृष्टि आदि पाँच प्रकार का कृत्य करने वाला परमेश्वर, उसके दोनों (माया और परमेश्वर) जिस प्रकार क्षरण करते हैं = सृष्टि करते हैं उसी प्रकार वे दोनों = षोडशार एवं अष्टार, निःसंदेह अमृत = सोम रूप प्रमेय और अग्नि = प्रमाता की परस्पर उन्मुखतालक्षण संयोग से अमृत = काल कवलित न होने से अनादि-निधन, पर संवित् तत्त्व का द्रवण करते हैं = उस रूप में प्रसारण करते हैं । संविद् ही क्षीण होकर नील आदि रूपता को प्राप्त करती हुई प्रमाण में उपारोह के द्वारा तद्रूपता को विलीन कर प्रामाता में विश्रान्त होती हुई अपने केवल प्रमातृ रूप से स्फुरण करती है ॥ १३१ ॥

ननु मातृमेयाद्यात्मा मायीयोऽयं व्यवहारः, तत् कथं तस्मिन् सत्यप्येवं भवेत् ?—इत्याशङ्क्याह—

तच्चक्रपीडनाद्रात्रौ ज्योतिर्भात्यर्कसोमगम् ।
तां दृष्ट्वा परमां ज्योत्स्नां कालज्ञानं प्रवर्तते ॥ १३२ ॥

तयोः—प्रमातृप्रमेयात्मकयोः षोडशाराष्टारयोश्चक्रयोः, पीडनात्—सारार्थाकर्षणलक्षणान्निष्पीडनात्, रात्रौ—मायायामपि सत्याम्, अर्कसोमगं प्रमाणप्रमेयाभ्यामप्यतिक्रान्तं, प्रमातृलक्षणं ज्योतिरवभासत एव, यत् प्रमाणाद्यपेक्षया परमं विश्वाप्यायकारित्वादिना ज्योत्स्नाशब्दव्यपदेश्यं, दृष्ट्वा—स्वात्मरूपतया निभाल्य

'भैरवरूपी कालः सृजति जगत्कारणादिकीटान्तम् ।'

इत्यादिनीत्या सृष्ट्याद्यात्मनो विश्वस्य कलनात्कालः—परप्रमात्रेकरूपः पूर्णः प्रकाशः, तस्य ज्ञानं प्रवर्तते—स एव तद्रूपतयावभासत इत्यर्थः ॥ १३२ ॥

ननु यद्येवं तत्, विश्वस्यावभास एव न स्यात् ?—इत्याशङ्क्याह—

सहस्रारं भवेच्चक्रं ताभ्यामुपरि संस्थितम् ।

प्रश्न—यदि प्रमाता प्रमेयात्मक यह व्यवहार माया के कारण है । तो उसके रहते हुए भी ऐसा कैसे होता है ?—यह शङ्का कर कहते हैं—

उन दोनों चक्रों के निष्पीडन से रात्रि में सूर्य और सोम में वर्त्तमान ज्योति चमकती हैं । उस परम ज्योत्स्ना को देखकर काल का ज्ञान होता है ॥ १३२ ॥

उन दोनों के = प्रमाता प्रमेय रूप षोडशार और अष्टार चक्रों के, पीडन से = तत्त्वार्थआकर्षणरूप निष्पीडन से, रात्रि = माया के होने पर भी, सूर्य सोमगामी = प्रमाण प्रमेय से भी अतिक्रान्त प्रमातृरूप ज्योति का आभासन होता ही है । प्रमाण आदि की अपेक्षा परम तथा विश्व का आपूरण करने के कारण ज्योत्स्ना शब्द से व्यवहार्य जिस (ज्योति) को देखकर = आत्मरूप में समझकर—

"भैरवरूपी काल जगत् कारण (ब्रह्मा) से लेकार कीट तक की सृष्टि करते हैं ।"

इत्यादि नीति से सृष्टि आदि रूप विश्व की कलना = (रचना) करने के कारण = परप्रमाता रूप पूर्ण प्रकाश, उसका ज्ञान होता है अर्थात वही उस रूप में भासित होता है ॥ १३२ ॥

प्रश्न—यदि ऐसा है तो विश्व का आभास ही नहीं होगा ? यह शङ्का कर कहते हैं—

उन दोनों से ऊपर सहस्रार चक्र स्थित रहता है ॥ १३३- ॥

ताभ्यां—षोडशाराष्टराभ्यामेव चक्राभ्यां सकाशात् सहस्रारं चक्रं—भूतभाव-भुवनादिरूपतयानन्तभेदं विश्वम्, उपरि संस्थितं भवेत्—व्यतिरिक्तायमानत्वेऽपि स्वसंलग्नमेव प्रस्फुरेदित्यर्थः ॥

ततोऽपि विश्वलक्षणाच्चक्रादवान्तराणि चक्राणि उद्भूतानि, इत्याह—

ततोश्चक्रात्समुद्भूतं ब्रह्माण्डं तदुदाहृतम्॥ १३३ ॥

ब्रह्माण्डमिति—प्रकृत्यण्डादीनामप्युपलक्षणम् ॥ १३३ ॥

ननु कथमनेकप्रकारमियदविच्छेदेनैव विश्वं प्रस्फुरेत् ?—इत्याशङ्क्याह—

तत्रस्थां मुञ्चते धारां सोमो ह्यग्निप्रदीपितः ।

यतः क्रियाशक्त्यात्मा सोमः परप्रमात्रेकरूपेणाग्निना स्वस्वातन्त्र्यात् प्रदीपितो —बाह्यौन्मुख्ये समुत्तेजितः सन्, तत्रस्थां—विश्वत्र वर्तमानां, धारां मुञ्चति—प्रमातृप्रमेयादिरूपत्वेनाविच्छिन्नेन प्रवाहेण परिस्फुरति, येनायम् इयान्विश्वस्फारः ॥

न केवलमयं साधारणमेव विश्वं सृजति, यावदसाधारणमपि, इत्याह—

सृजतीत्थं जगत्सर्वमात्मन्यात्मन्यनन्तकम्॥ १३४ ॥

आत्मन्यात्मनि इति वीप्सायांप्रत्यात्ममित्यर्थः ॥ १३४ ॥

उन दोनों के = षोडशार अष्टार चक्रों के पास से सहस्रारचक्र = भूत पदार्थ भुवन आदि के रूप में अनन्त भेद वाला विश्व, ऊपर स्थित है = भिन्न होते हुए भी उससे संलग्न ही स्फुरित होता है ॥ १३२-१३३ ॥

उस विश्वलक्षण से अवान्तर चक्र उद्भूत हुए है—यह कहते है—

उस चक्र से वह ब्रह्माण्ड (आदि) उत्पन्न कहा गया है ॥ -१३३ ॥

प्रश्न—अनेक प्रकार से भिन्न होते हुए भी अविच्छिन्न द्वारा विश्व की सृष्टि कैसे करता है ? यह शङ्का कर कहते हैं—

अग्नि से प्रदीपित सोमधारा को प्रवाहित करता है ॥ १३३ ॥

क्योंकि क्रियाशक्तिरूप सोम परप्रमातारूप अग्नि के द्वारा अपने स्वातन्त्र्य के कारण प्रदीपित हुआ = वाह्य उन्मुखता में समुत्तेजित होता हुआ, तत्रस्थ = सर्वत्र वर्त्तमान धारा को छोड़ता है = प्रमाता प्रमेय आदि रूप वाले अविच्छिन्न प्रवाह से प्रस्फुरित होता है जिससे इतना बड़ा यह विश्व का विस्तार है ॥ १३३-१३४ ॥

यह केवल साधारण ही विश्व की सृष्टि नहीं करता बल्कि असाधारण को भी—यह कहते है—

इस प्रकार (वह सोम) प्रत्येक आत्मा में अनन्त समस्त जगत् की सृष्टि करता है ॥ १३४ ॥

तच्च कथम् ? इत्याह—

षोडशद्वादशाराभ्यामष्टारेष्वथ सर्वशः ।
एवं क्रमेण सर्वत्र चक्रेष्वमृतमुत्तमम् ॥ १३५ ॥
सोमः स्रवति यावच्च पञ्चानां चक्रपद्धतिः ।

अष्टारेष्विति बहुवचनादाद्यर्थो लभ्यते, इति चतुरारस्यापि आक्षेपात् षोडशद्वादशाराभ्यां सह सर्वत्र सर्वेषु चतुर्ष्वप्येतेषु, चक्रेषु, एवम्—उक्तयुक्त्या अवरोहात्मना क्रमेण, सर्वशः—सर्वप्रकारम्, उत्तमममृतं—बहीरूपतात्मकं निजं सारं, क्रियाशक्त्यात्मा सोमः, अर्थात् तावत् स्रवति यावत् पञ्चप्रकारा बुद्धीन्द्रियादीनां चतुर्णां चक्राणां पद्धतिः—परिपाटी, पृथ्वीतत्त्वपर्यन्तं प्रमेयप्रकृतिना स्थूलेन रूपेण प्रस्फुरेदित्यर्थः । परमेश्वरो हि स्वस्वातन्त्र्याद्विश्वरूपतामवबिभासयिषुः संकुचितप्रमातृत्वाद्याभासनक्रमेण प्रमाणप्रमेयादिरूपतामधिशयानः कार्यकारणात्मपाञ्चभौतिकशरीरादिरूपतामवभासयति, इति भावः ॥ १३५ ॥

न केवलमयं जगत् सृजत्येव यावत्संहरत्यपि, इत्याह—

तत्पुनः पिबति प्रीत्या हंसो हंस इति स्फुरन् ॥ १३६ ॥
सकृद्यस्य तु संश्रुत्या पुण्यपापैर्न लिप्यते ।

अपने-अपने में (प्रयोग) वीप्सा अर्थ में है अर्थात् हर आत्मा में ॥ १३४ ॥

प्रश्न—और वह कैसे ? यह कहते हैं—

वही सोम षोडशार एवं द्वादशार के द्वारा अष्टार (एवं चतुरार) सभी चक्रों में क्रमशः उत्तम अमृत का स्रवण (तब तक) करता रहता है जब तक पाँच-पाँच की चक्रपद्धति (पूर्ण नहीं) हो जाती है ॥ १३५ ॥

'अष्टारेषु' इस बहुवचन से -'इत्यादि' अर्थ प्राप्त होता है इसलिये ये चतुरार का भी आक्षेप होने से षोडशारद्वादशार के साथ सर्वत्र इन सब चारो चक्रों में । एवम् = उक्तयुक्ति द्वारा अवरोह रूप क्रम से, सर्वशः = सब प्रकार का, उत्तम अमृत = बाह्यरूपतात्मक अपना तत्त्व क्रियाशक्तिरूप सोम अर्थात् तब तक क्षरण करता है जब तक पाँच प्रकार वाली बुद्धि इन्द्रिय आदि चार चक्रों की पद्धति = परिपाटी पृथिवी तत्त्व पर्यन्त प्रमेय स्वभाववाले स्थूल रूप से प्रस्फुरित नहीं होती । परमेश्वर अपने स्वातन्त्र्य के कारण विश्वरूपता के अवभासन की इच्छा वाला संकुचित प्रमाता आदि के अवभासन के क्रम से प्रमाण प्रमेय आदि रूपता को स्वीकार करता हुआ कार्यकारण रूप पाञ्चभौतिक शरीर आदि रूपता को अवभासित करता है ॥ १३५-१३६ ॥

यह संसार की केवल सृष्टि ही नहीं संहार भी करता है—यह कहते हैं ।

हंस (रूपी परमेश्वर) उस (संसार) का हं सः इस प्रकार (श्वास प्रश्वास

अहं परप्रमातृरूपोऽपि सविश्वस्फारः, सविश्वस्फारोऽपि वा अहमेव, इत्यकृत्रिमेण सृष्टिसंहारकारिणा स्वभावभूतेन विमर्शेन सातत्येन प्रवृत्तत्वादविच्छिन्नतया प्रस्फुरन्

'परमात्मा शिवो हंसः......................।'

इत्याद्युक्त्या 'हंसो' हानसमादानधर्मा अग्निशब्दव्यपदिष्टः परप्रमाता, तत्—प्रमातृप्रमेयाद्यात्मकं विश्वं, पुनः—सृष्ट्याद्युत्तरकालं, प्रीतिः—आनन्दः स्वातन्त्र्यं, तया पिबति—स्वात्मसात्करोति संहरतीत्यर्थः, यस्य परमात्मनो हंसस्य, सकृत—एकवारमपि, संश्रुत्या—साक्षात्कारेण, अर्थात् सर्वो जनः पुण्यपापैर्न लिप्यते—स्वकृतैरपि शुभाशुभैः कर्मभिर्भोगं दातुं न स्पृश्यते, अपि तु अपवृज्यत एवेत्यर्थः, तेन एतत्साक्षात्कारभाज एव जनस्य कार्तार्थ्यं, नेतरस्य, इत्युक्तं स्यात्, यदुक्तम्—

'अकृतार्थो नरस्तावद्यावद्धंसं न विन्दति।' इति ॥ १३६ ॥

एवमस्य प्रसङ्गापतितं संहारकारित्वमभिधाय प्रकृतमेवानुबध्नाति—

पञ्चारे सविकारोऽथ भूत्वा सोमस्रुतामृतात् ॥ १३७ ॥

के द्वारा) पान (= संहार) करता है । जिस (हंस) का एक बार श्रवण करने से मनुष्य पुण्य और पाप से लिप्त नहीं होता ॥ -१३६-१३७- ॥

'अहम्' परप्रमातारूप होते हुए भी विश्वस्फार वाला है और सविश्वस्फार होते हुए भी 'अहम्' ही है । इस प्रकार स्वाभाविक सृष्टिसंहारकारी स्वभावभूत विमर्श के कारण निरन्तर प्रवृत्त होने से अविच्छिन्न रूप से प्रस्फुरण करता हुआ

"परमात्मा शिव (ही) हंस है ...."

इत्यादि उक्ति से 'हंस' त्याग-उपादान धर्म वाला अग्नि शब्द से व्यपदिष्ट परप्रमाता ; उसका = प्रमातृ प्रमेय आदि रूप विश्व का, पुनः = सृष्टि आदि के बाद, प्रीति = आनन्द = स्वातन्त्र्य, उसके द्वारा, पान करता है = आत्मसात् करता है = संहार करता है । जिस परमात्मा हंस की सकृत् = एक बार भी संश्रुति से = साक्षात्कार से, अर्थात् सब लोग पुण्य-पाप से लिप्त नहीं होते = अपने द्वारा किये गये शुभाशुभ कर्मों के द्वारा भोग देने के लिये स्पृष्ट नहीं होता बल्कि छोड़ दिया जाता है । इससे इसके साक्षात्कार के भागी लोग ही कृतार्थ होते हैं न कि दूसरे—ऐसा कहा जाना चाहिये था । जैसा कि कहा गया है—

'वह आदमी तब तक अकृतार्थ है जब तक हंस को नहीं प्राप्त कर लेता" ॥ १३६-१३७ ॥

इस प्रकार प्रसङ्गात् आई हुई इसकी संहारकारिता का कथन कर प्रस्तुत को कहते हैं—

धावति त्रिरसाराणि गुह्यचक्राण्यसौ विभुः ।

अथासौ—हंसशब्दव्यपदेश्यो, विभुः—परमात्मा शिवः स्वस्वातन्त्र्याद् गृहीतसङ्कोचः, पञ्चारे—पाञ्चभौतिके शरीरे, समनन्तरोक्तयुक्त्या सोमस्रुतेनामृतेनाप्यायितत्वात् सविकारो भूत्वा, जन्मादिविकारयोगाद्वर्धमानः सन्, त्रिरसाराणि

'अम्बुवाहा वहेद्वामा मध्यमा शुक्रवाहिनी ।
दक्षस्था रक्तवाहा च....................... ॥'

इत्याद्युक्त्या त्रयोऽम्बुप्रभृतयो रसाः, तत्संख्या नाडिरूपाश्चारा येषां तथाविधानि, यद्वा वियुतत्त्वे त्र्यराणि, यामलत्वे षडराणि, अप्रकाशत्वाद् गुह्यानि, अत एव रहस्यरूपाणि जन्मस्थानप्रभृतीनि चक्राणि, धावति—जगत्सिसृक्षया तदौन्मुख्येन प्रवर्तते इत्यर्थः ॥ १३७ ॥

ननु यदि नामायं जगत्सिसृक्षुः, तत्तदौन्मुख्येन प्रवृत्त्यास्य कोऽर्थः ? इत्याशङ्क्याह—

यतो जातं जगल्लीनं यत्र च स्वकलीलया॥ १३८ ॥

यतो—येभ्यो गुह्यचक्रेभ्य एव, स्वकलीलया—स्वस्वातन्त्र्यात्, जगज्जातम्—

यह व्यापक (शिव) पाँच अरों वाले (इस शरीर) में सोम से च्युत अमृत के कारण विकारी बनकर तीन रसों रूप अरों वाले गुह्यचक्रों में दौड़ता रहता है ॥ -१३७-१३८- ॥

यह हंस शब्द से व्यवहार्य, व्यापक = परमात्मा शिव, अपने स्वातन्त्र्य के कारण सङ्कोच का ग्रहण करने वाला, पञ्चार में = पाञ्चभौतिक शरीर में पूर्वोक्त के द्वारा सोम से क्षरित अमृत से पूरित होने के कारण विकारी बनकर जन्म आदि विकार के योग से बढ़ता हुआ तीन रसरूप अरों वाले =

"बाँयीं नाडी अम्बुवाहा, मध्यमा शुक्र का वहन करने वाली और दाहिने स्थित नाड़ी रक्तवाहिनी है ।"

इत्यादि उक्ति के अनुसार तीन अम्बु आदि (= शुक्र और रक्त) ही रस है उस संख्या वाले नाड़ीरूप मार्ग हैं जिनके, उस प्रकार के, अथवा अलग होने पर तीन अरों वाले और यामल अवस्था में छः अरों वाले, अप्रकाशित होने के कारण गुह्य इसलिये रहस्यरूप जन्मस्थान आदि चक्रों में दौड़ता है = संसार को रचने की इच्छा से उसकी ओर उन्मुख होकर प्रवृत्त होता है ॥ १३७-१३८ ॥

प्रश्न—यदि यह संसार की रचना का इच्छुक है तो उसकी ओर प्रवृत्ति से इसका क्या तात्पर्य ?—यह शङ्का कर कहते हैं—

जहाँ से उसकी अपनी लीला से जगत् उत्पन्न होता है और जहाँ पर लीन होता है ॥ -१३८ ॥

अतिरेकायमाणतयोल्लसितं, तथात्वेऽपि अवभासनान्यथानुपपत्त्या तदनतिरिक्तमेवेत्युक्तम्—'यत्रैव च लीनमिति' एवमेतदेव जगत्सिसृक्षोः परमात्मनः परमेश्वरस्य परं कारणम्, इति तात्पर्यार्थः ॥ १३८ ॥

न केवलमेषां बाह्यौन्मुख्य एव साधकतमत्वं, यावत् स्वात्मविश्रान्तावपि, इत्याह—

तत्रानन्दश्च सर्वस्य ब्रह्मचारी च तत्परः ।
तत्र सिद्धिश्च मुक्तिश्च समं संप्राप्यते द्वयम् ॥ १३९ ॥

सर्वस्येतिंपामरादेरपीत्यर्थः, तत्परः—तदेकपरायणः, पुनः ज्ञानी योगी वा ब्रह्मचारी

'आनन्दो ब्रह्मणो रूपम् ....।'

इत्याद्युक्त्या आनन्दरूपं ब्रह्माचरति—परब्रह्मैकात्म्येन प्रस्फुरतीत्यर्थः, अत एव सिद्धिः—ऐहिक्यानन्दरूपा, मुक्तिः—ब्रह्मचारित्वरूपा, सममिति आनन्दस्यैव ब्रह्मरूपत्वात् ॥ १३९ ॥

ननु एवं विश्वसृष्टिरेकस्मादेव अस्माज्जन्मस्थानाख्याद् गुह्यचक्रात् अस्य सिद्ध्येत्, इति किमर्थं 'गुह्यचक्राणि' इति बहुवचनेनायं निर्देशः? इत्याशङ्क्याह—

जिससे = जिन गुह्य चक्रों से ही, अपनी लीला के द्वारा = अपने स्वातन्त्र्य से, (यह) संसार उत्पन्न हुआ = भिन्न रूप में उल्लसित हुआ, वैसा होने पर भी अवभासन की अन्यथा उपपत्ति न होने से उससे अभिन्न ही है इसलिये कहा गया—जहाँ लीन होता है । इस प्रकार यही जगत् सिसृक्षु परमात्मा परमेश्वर का परम कारण है—यह तात्पर्य है ॥ १३८ ॥

ये केवल बाह्य उन्मुखता में ही साधकतम नहीं है बल्कि स्वात्मविश्रान्ति में भी—यह कहते हैं—

उन चक्रों में सबको आनन्द (मिलता) है । उनमें लगा हुआ ब्रह्मचारी भोग और मोक्ष दोनों को तुल्यरूप में प्राप्त करता है ॥ १३९ ॥

सबका = मूर्ख आदि का भी, तत्पर = उन्हीं उसी में लगा हुआ । ज्ञानी योगी अथवा ब्रह्मचारी

"आनन्द ब्रह्म का रूप है ....।"

इत्यादि उक्ति के अनुसार आनन्द रूप ब्रह्म को प्राप्त करता है = परब्रह्म से अभिन्न होकर प्रस्फुरण करता है । इसलिये सिद्धि = लौकिक आनन्दरूपा, मुक्ति = ब्रह्मरूप प्राप्तिरूपा, समान है क्योंकि आनन्द ही ब्रह्म रूप है ॥१३९ ॥

प्रश्न—यदि इस (परमेश्वर) की विश्वसृष्टि एक ही इस जन्मस्थान नामक

अत ऊर्ध्वं पुनर्याति यावद् ब्रह्मात्मकं पदम् ।
अग्नीषोमौ समौ तत्र सृज्येते चात्मनात्मनि ॥ १४० ॥

अतो—यथोक्ताज्जन्मस्थानाख्याद्गह्यचक्रात्, पुनरूर्ध्वं—ब्रह्मात्मकं परं पदं द्वादशान्तावस्थितं, शक्तिव्यापिनीसमनात्मकारात्रययोगि विसर्गशब्दव्यपदेश्यं गुह्यचक्रं यावत्, याति तदौन्मुख्येन प्रवर्तते इत्यर्थः, चो हेतौ, तत्र हि आत्मना हंसशब्दव्यपदेश्येन परमेश्वरेणात्मनि—स्वभित्तौ, अहन्तेदन्तास्वभावौ प्रमातृप्रमेयात्मानावग्नीषोमौ समौ सृज्येते,

'सामानधिकरण्यं हि सद्विद्याहमिदंधियोः ॥'

इत्यादिन्यायेन तुल्यकक्ष्यतयावभास्येते इत्यर्थः ॥ १४० ॥

यदा पुनः सोमात्मनः प्रमेयस्योद्रेकस्तदा विश्वोल्लास इत्याह—

तत्रस्थस्तापितः सोमो द्वेधा जङ्घे व्यवस्थितः ।

तत्र—साम्यावस्थायामवस्थितः, प्रमेयात्मा सोमो, द्वेधा भासितो—भेदेन

गुह्यचक्र से सिद्ध हो जाती है तो 'गुह्यचक्राणि' यह बहुवचन निर्देश किस लिये किया गया ?

यह शङ्का कर कहते हैं—

(इसके बाद ब्रह्मचारी) इसके ऊपर ब्रह्मपद को प्राप्त करता है जहाँ अग्नि और सोम तुल्य रूप से अपने द्वारा अपने में सृष्ट होते हैं ॥ १४० ॥

यहाँ से = यथोक्त जन्मस्थान नामक गुह्यचक्र से, ऊर्ध्व = द्वादशान्त में स्थित ब्रह्मात्मक परमपद, शक्तिव्यापिनी और समना रूप तीन अरों वाले विसर्ग शब्द से व्यवहार्य गुह्यचक्र को, जाता है = उसकी ओर उन्मुख होकर प्रवृत्त होता है । 'च' हेतु अर्थ में (प्रयुक्त) है । वहाँ आत्मा के द्वारा = हंस शब्द से व्यपदेश्य परमेश्वर के द्वारा आत्मा में = अपनी भित्ति पर, अहन्ता-इदन्ता स्वभाव वाले प्रमाता प्रमेय रूप अग्नि और सोम समान रूप से रचे जाते हैं—

"शुद्ध विद्या और अहम्-इदम् बुद्धि का सामानाधिकरण्य है ।"

इत्यादि न्याय के अनुसार तुल्यकक्ष्य के रूप में भासित होते हैं ॥ १४० ॥

और जब सोमात्मक प्रमेय का उद्रेक होता है तब विश्व का उल्लास होता है—यह कहते हैं—

उस (= साम्यावस्था) में स्थित सोम तापित होने पर दो प्रकार से (भासित होता हुआ) जङ्घा (= पृथ्वी तक) में व्यवस्थित होता है ॥ १४१- ॥

समुत्तेजितः सन्, जङ्घे व्यवस्थितः—पृथ्वीतत्त्वपर्यन्तेन विश्वात्मना स्थूलेन रूपेणोल्लसित इत्यर्थः ॥

कथं चैतत् ? इत्याह—

अधस्तं पादयेदग्निरमृतं स्रवति क्षणात् ॥ १४१ ॥
गुल्फजान्वादिषु व्यक्तं कुटिलार्कप्रदीपिता ।
सा शक्तिस्तापिता भूयः पञ्चारादिक्रमं सृजेत्॥ १४२ ॥

अध इति—बहीरूपतायाम्, तमिति—सोमम्, अमृतं स्रवतीति—अर्थादग्नितापितः सोमो, यतः सा प्राणकुण्डलिनीरूपत्वात् कुटिला सोमात्मिका क्रियारूपा शक्तिः, अर्केण प्रमात्रैव प्रमाणदशामधिशयानेन, प्रदीपिता बहिरुल्लिलासयिषया प्रबोधिता, अत एव भूयः—पुनस्तापिता बहीरूपत्वेनैवोत्तेजिता सती, पञ्चारादिक्रमं सृजेत्—पञ्चभूतात्म विश्वमवभासयेदित्यर्थः ॥ १४२ ॥

एतदिन्द्रियान्तरेष्वपि अतिदिशति—

एवं श्रोत्रेऽपि विज्ञेयं यावत्पादान्तगोचरम् ।

पादान्तगोचरमित्यनेन कर्मेन्द्रियाणामप्येवंरूपत्वम्, इत्युक्तम् ॥

वही = साम्यावस्था में, अवस्थित प्रमेयरूप सोम दो प्रकार से भासित = भेद से समुत्तेजित होता हुआ, जङ्घा में व्यवस्थित है = पृथिवीतत्त्वपर्यन्त विश्वात्मक स्थूलरूप से उल्लसित है ॥ १४० ॥

यह कैसे है ?—यह कहते हैं—

उस (= सोम) को अग्नि नीचे गिरा देती है (फलतः वह सोम) एक क्षण में गुल्फ जङ्घा आदि में अमृत का स्पष्ट स्रवण करता है । वह कुटिलशक्ति सूर्य से उद्दीप्त होकर तापित हुई पुनः पाँच भूतों वाले (विश्व) की सृष्टि करती है ॥ -१४१-१४२ ॥

अधः = बाह्यरूपता में, उसको = सोम को, अमृत का स्रवण करता है = अर्थात् अग्नि से तापित सोम । चूँकि प्राणकुण्डलिनीरूप होने से कुटिल वह सोमात्मक क्रियारूप शक्ति अर्थ से = प्रमाणदशा को प्राप्त प्रमाण के द्वारा, प्रदीपित = बाहर उल्लासित करने की इच्छा से प्रबोधित, इसलिये भूयः = बार-बार तापित = बाह्यरूप से उत्तेजित होकर पञ्चारादि क्रम की सृष्टि करती है = पञ्चभूतात्मक विश्व को अवभासित करती है ॥ १४२ ॥

दूसरी इन्द्रियों में भी इसका अतिदेश करते हैं—

इसी प्रकार श्रोत्रेन्द्रिय और पादान्त (कर्मेन्द्रियों) के विषय में भी जानना चाहिये ॥ १४३- ॥

न केवलं प्रमाणरूपेष्विन्द्रियेष्वेवंरूपत्वमस्ति यावत्प्रमेयात्मसु पञ्चभूतेष्वपि, इत्याह—

पादाङ्गुष्ठात्समारभ्य यावद् ब्रह्माण्डदर्शनम् ॥ १४३ ॥

पादाङ्गुष्ठादारभ्य ब्रह्मरन्ध्रान्तं पञ्चभूतात्मके शरीरेऽप्येवं विज्ञेयम्, इति प्राच्येन संबन्धः । एवं मेयदशायामपि परैव संविद् ग्राह्याकारा वर्तते इत्यत्रापि एतदेव प्रमाणम् इत्यर्थसिद्धम्, अत एवोत्तरत्र संवादयिष्यते ॥ १४३ ॥

नन्विन्द्रियादीनामेवंरूपत्वेनाभिहितेन कोऽर्थः ?—इत्याशङ्क्याह—

इत्यजानन्नैव योगी जानन्विश्वप्रभुर्भवेत् ।
ज्वलन्निवासौ ब्रह्माद्यैर्दृश्यते परमेश्वरः ॥ १४४ ॥

ब्रह्माद्यैरिति—एतत्स्फार एव हि सर्वलोक इति भावः, अत्र चान्तरान्तरा-वस्थितोऽपि चर्याक्रमः सुस्पष्टत्वात् रहस्यत्वाच्च न तथा वितानितः—इति स्वयमेवावधार्यम् ॥ १४४ ॥

एवं संवादिते आगमे तात्पर्यार्थं व्याचष्टे—

'पादान्तगोचर' इस कथन से कर्मेन्द्रियों का भी यही रूप है—यह कहा गया ॥ १४२-१४३ ॥

केवल प्रमाणरूप इन्द्रियों में ही ऐसी रूपता (= स्थिति) नहीं है बल्कि प्रमेयात्मक पञ्चभूतों में भी है—यह कहते हैं—

पैर के अंगूठे से लेकर ब्रह्मरन्ध्रपर्यन्त ब्रह्माण्ड का दर्शन होता है ॥ -१४३ ॥

पैर के अंगूठे से लेकर ब्रह्मरन्ध्र तक पाञ्चभौतिक शरीर के विषय में भी ऐसा जानना चाहिये—ऐसा पहले से सम्बन्ध है । इस प्रकार प्रमेयदशा में भी परा ही संविद् बाह्य आकार वाली है—इस विषय में भी यही प्रमाण है—यह अर्थात् सिद्ध है । इसलिये (इसको) आगे बतायेंगे ॥ १४३ ॥

इन्द्रिय आदि को इस रूप में कहने से क्या तात्पर्य है ?—

यह शङ्का कर कहते हैं—

इसको न जानने वाला योगी नहीं होता । जानने वाला विश्व का स्वामी हो जाता है । ब्रह्मा आदि के द्वारा यह देदीप्यमान परमेश्वर (तुल्य) देखा जाता है ॥ १४४ ॥

ब्रह्मा आदि के द्वारा—समस्त लोक इसी की स्फुरत्ता है—यह भाव है । यहाँ बीच-बीच में स्थित भी चर्याक्रम स्पष्ट होने के कारण तथा रहस्य होने के कारण इस प्रकार से स्पष्ट नहीं किया गया । इसलिये स्वयं समझना चाहिये ॥ १४४ ॥

अत्र तात्पर्यतः प्रोक्तमक्षे क्रमचतुष्टयम् ।
एकैकत्र यतस्तेन द्वादशात्मकतोदिता ॥ १४५ ॥

एकैकत्राक्षे इति—समस्तेष्विन्द्रियेषु इति यावत्, तेन सृष्ट्यादिक्रमचतुष्टयस्य मातृमानमेयगतत्त्वेन प्रत्येकमवस्थानेन हेतुना, यतो—यस्मात्, एकैकत्राक्षे द्वादशात्मकतोदिता—एक मेकमिन्द्रियं द्वादशमरीचिरूपमित्यर्थः ॥ १४५ ॥

ननु तात्पर्यार्थव्याख्यानमेव कस्मात्कृतम् ?—इत्याशङ्क्याह—

न व्याख्यातं तु निर्भज्य यतोऽतिसरहस्यकम्।

न केवलं परैव संवित् प्रमाणदशायां ग्रहणाकारा यावत्प्रमेयदशायामपि ग्राह्याकारा, इत्याह—

मेयेऽपि देवी तिष्ठन्ती मासराश्यादिरूपिणी ॥ १४६ ॥

आदिशब्देन द्वादशसंख्यावच्छिन्नानां स्वरादीनां ग्रहणम्, यदुक्तम्—

'द्वादशैव स्वराः प्रोक्ता नपुंसकविवर्जिताः ।
आदित्या द्वादश प्रोक्ता द्वादशारव्यवस्थिताः ॥

इस प्रकार आगम के संवादित होने पर तात्पर्यार्थ की व्याख्या करते हैं—

चूँकि इन इन्द्रियों में तात्पर्य के अनुसार चार क्रम कहे गये हैं इस कारण एक-एक (इन्द्रियों) में बारह-बारह (रूप होते) हैं ॥ १४५ ॥

एक-एक इन्द्रिय में = समस्त इन्द्रियों में । उस कारण = सृष्टि आदि चारो क्रम के प्रमाता प्रमाण प्रमेय में स्थित होने से प्रत्येक के रहने के कारण । जिससे जिस कारण, एक-एक इन्द्रिय में द्वादशात्मकता कही गई है = एक-एक इन्द्रिय द्वादशमरीचिरूप है—यह अर्थ है ॥ १४५ ॥

प्रश्न—तात्पर्य का व्याख्यान ही क्यों किया गया ? यह शङ्का कर कहते हैं

चूँकि यह (विषय) अतिरहस्य वाला है अतः स्पष्ट रूप से नहीं कहा गया ॥ १४६- ॥

परा संवित् केवल प्रमाण दशा में ही ग्रहणाकार नहीं है । बल्कि प्रमेय दशा में भी ग्राह्याकार है—यह कहते हैं—

(वह परा संवित्) देवीमेय (पदार्थों) में भी मास राशि आदि के रूप में स्थित रहती है ॥ -१४६ ॥

आदि शब्द से द्वादश संख्या से अवच्छिन्न स्वरों का ग्रहण है जैसा कि कहा गया—

"नपुंसक (वर्ण = ऋ ॠ ऌ ॡ) रहित स्वर बारह ही कहे गये हैं । द्वादश

मासा द्वादश इत्युक्ताः कला द्वादशसंज्ञिताः ।' इति,

तन्मेयदशायामपि अस्या द्वादशात्मकत्वमेव, इति भावः ॥ १४६ ॥

एवमेकैवेयं परा संवित् तत्तद्रूपतया सर्वत्रावभासते, इत्याह—

अत एषा स्थिता संविदन्तर्बाह्योभयात्मना ।
स्वयं निर्भास्य तत्रान्यद्भासयन्तीव भासते ॥ १४७ ॥

अतो—यथोपपादितात् सर्वत्रैव अवस्थानाद्धेतोः, एषा—प्रत्यवमर्शात्मा परा संवित्, स्वमाहात्म्यादन्तर्बाह्योभयात्मना प्रमातृप्रमेयादिरूपतया स्वात्मानमवभास्य स्थितापि तत्र, अन्यद्व्यतिरिक्तमिवावभासयन्ती, भासते—सर्वस्यानुभवसिद्धोऽयमर्थ इत्यर्थः, यद्यपि वस्तुतः परा संविदेवावभासते तदतिरेके हि न किञ्चिद्भायात् तथाप्यामुखे तत्स्वातन्त्र्यादेव तदतिरिक्तमिव प्रमात्रादि अवभासते येनास्या द्वादशधात्वमुल्लसितम् ॥ १४७ ॥

तदेव चेदानीं विभज्य दर्शयन्, क्रमनयसोदरतामस्य दर्शनस्यावेदयति—

ततश्च प्रागियं शुद्धा तथाभासनसोत्सुका ।

अरों से व्यवस्थित सूर्य भी द्वादश कहे गये हैं । महीने भी द्वादश हैं और कलायें भी द्वादश है ।''

तो मेय दशा में भी यह बारह तत्त्वों वाली ही है—यह भाव है ॥ १४६ ॥

इस प्रकार यह एक ही परा संवित् भिन्न-भिन्न रूप में सर्वत्र भासित होती है—यह कहते हैं—

इसलिये यह संवित् अन्तर एवं बाह्य दोनों रूपों से स्थित है । अपने अन्दर स्वयं भासित होकर दूसरे (विषयों) को आभासित करती हुई विराजमान है ॥ १४७ ॥

अतः = यथोपपादित सर्वत्र ही स्थिति के कारण, यह = प्रत्यवर्शरूपा परा संवित् अपने माहात्म्य से अन्तः एवं बाह्य दोनों रूपों में प्रमातृ प्रमेय आदि रूप से अपने को अवभासित करके स्थित भी वहाँ = अपने में ही—अर्थात् प्रमाता प्रमेय आदि अतिरिक्त जैसे का आभासन करती हुई भासित होती है—यह अर्थ सबके अनुभव से सिद्ध है यद्यपि वस्तुतः परा संविद् ही आभासित होती है क्योंकि उसके भिन्न होने पर कुछ भी भासित नहीं होता तो भी प्रारम्भ में उसके स्वातन्त्र्य के कारण ही प्रमाता आदि मानो उससे भिन्न भासित होते हैं जिससे इसका बारह प्रकार उल्लसित है ॥ १४७ ॥

अब उसी को पृथक् कर दिखलाते हुए इस दर्शन की क्रमशास्त्रसोदरता (= तुल्यता) को दिखलाते हैं—

सृष्टिं कलयते देवी तन्नाम्नागम उच्यते ॥ १४८ ॥

ततः—परस्या एव संविदस्तत्तत्प्रमात्रादिरूपत्वेन परिस्फुरणाद्धेतोः,—तथात्वेन स्फुरणात्प्राक्, शुद्धा—प्रमात्रादिनियतरूपानारूषिता इयं 'श्रीकालसङ्कर्षिणी'—शब्दव्यपदेश्या परा संविद्देवी कालकलनाकलङ्कग्रसिष्णुतया द्योतमाना, तथा स्वात्मानतिरेकेऽपि अतिरेकायमाणतया यत् स्वातन्त्र्याद्भासनं, तत्र सोत्सुका सिसृक्षायोगिनी सती, सृष्टिं कलयते—बहिरासूत्रितप्रायं भावजातं विमृशति, अत एव तन्नाम्ना-अन्वर्थेन 'श्रीसृष्टिकाली' शब्देन, आगमे—श्रीपञ्चशतिकादौ, उच्यते—अभिधीयते इत्यर्थः, यदुक्तं तत्र

'मन्त्रोदया व्योमरूपा व्योमस्था व्योमवर्जिता ।
सर्वा सर्वविनिर्मुक्ता विश्वास्मिन्सृष्टिनाशिनी ॥
या कला विश्वविभवा सृष्ट्यर्थकरणक्षमा ।
यदन्तः शान्तिमायाति सृष्टिकालीति सा स्मृता॥' इति ।

श्रीक्रमस्तोत्रेऽपि—

'कौलार्णवानन्दघनोर्मिरूपामुन्मेषमेषोभयभाजमन्तः ।
निलीयते नीलकुलालये या तां सृष्टिकालीं सततं नमामि ॥'

इस कारण यह (= परासंवित्) पहले शुद्ध रूप में रहती है । बाद में स्फुरण के लिये उत्सुक हुई वह देवी सृष्टि करती है । आगमों में वह (= सृष्टि काली) नाम से कही जाती है ॥ १४८ ॥

इस कारण = परा संविद् के ही भिन्न—भिन्न प्रमाता आदि रूप से परिस्फुरण करने के कारण, उसरूप में स्फुरण करने के पहले शुद्ध = प्रमाता आदि नियत रूप से असंस्पृष्ट 'यह' = कालसङ्कर्षिणी शब्द से व्यवहार्य परासंविद देवी, काल की रचना के कलङ्क को ग्रसित करने की इच्छा से द्योतित होती हुई, उस प्रकार = स्वातन्त्र्य के कारण अपने से अतिरिक्त न होने पर भी अतिरिक्त की भाँति जो भासन, उसमें उत्सुक = सृष्टि करने की इच्छा से युक्त होती हुई सृष्टि की रचना करती है = बाहर प्रकटप्राय पदार्थ का विमर्श करती है । इसलिये अन्वर्थ उस नाम से = सृष्टि काली शब्द से, आगम में = पञ्चशतिक आदि में उक्त होती है = कही जाती है—यह अर्थ है । जैसा कि वहाँ कहा गया—

'जिससे मन्त्र का उदय होता है, जो व्योमरूपा, व्योमस्था, व्योमवर्जिता, सर्वमयी, सब से विनिर्मुक्त, विश्व में सृष्टि का नाश करने वाली है । जो सम्पूर्ण वैभव वाली, सृष्टि के अर्थ को करने में सक्षम कला जिसके भीतर शान्त हो जाती है वह सृष्टिकाली कही गई है ॥' क्रमस्तोत्र में भी—

"जो कौलमतरूपीसमुद्र की आनन्दभरी लहर के समान है, जो नीलकुलरूपी आलय में लीन हो जाती है, अपने अन्दर उन्मेष निमेष की भागिनी उस सृष्टिकाली

इति ॥ १४८ ॥

एवं प्रमेयगतं सृष्टिस्वरूपमभिधाय, स्थितिस्वरूपमप्यभिधातुमाह—

तथा भासितवस्त्वंशरञ्जनां सा बहिर्मुखी ।
स्ववृत्तिचक्रेण समं ततोऽपि कलयन्त्यलम्॥ १४९ ॥
स्थितिरेषैव भावस्य..................... ।

ततः—श्रीसृष्टिकाल्युदयानन्तरमपि, सा—परैव प्रमात्रेकरूपा संवित्, बहिर्मुखी—स्वस्वातन्त्र्यात् प्रमाणदशामधिशयाना, स्वमात्मीयं यच्चक्षुरादीन्द्रिय-संबन्धि रूपाद्यालोचनात्मकं वृत्तिचक्रं, तेन समं तथातिरेकायमाणतया भासितं यद्विश्वलक्षणं वस्तु, तस्य ये

'रूपादिपञ्चवर्गोऽयं विश्वमेतावदेव हि ।'

इत्याद्युक्त्या रूपाद्या अंशाः तत्कर्तृकां रञ्जनाम्, अलम्-अत्यर्थम्, आत्मविषयतयापि कलयन्ती, अविकल्पवृत्त्या जानाना सती 'मानं हि नाम मेयोपरञ्जितमेव भवेत्' इत्यविवादः, मानात्मना च बहिर्मुखेन रूपेण मातैव स्फुरेदिति, तस्यापि तद्द्वारेणैव मेयोपरञ्जनं, न पुनः—साक्षादिति भावः, एषैव रूपादेर्भावजातस्य स्थितः—अवभासनात्मिका व्यक्तिरित्यर्थः, मेयं हि नाम

को मैं निरन्तर प्रणाम करता हूँ'' ॥ १४८ ॥

प्रमेयगत सृष्टि के स्वरूप का कथन कर स्थिति के स्वरूप को भी बतलाने के लिये कहते हैं—

इसके बाद वह उससे भी (अधिक) बहिर्मुखी होकर अपने वृत्तिचक्र के साथ भासित वस्तु (= विश्व) को अत्यधिक स्पष्ट करती है । यही भाव की स्थिति (दशा) है ॥ १४९-१५०- ॥

उसके बाद = सृष्टिकाली के उदय के बाद भी, वह = परा केवल प्रमातृरूपा संवित्, बहिर्मुखी = अपने स्वातन्त्र्य के कारण प्रमाणदशा को प्राप्त करती हुई, स्व = अपना जो चक्षु आदि इन्द्रियों से सम्बद्ध रूप आदि का आलोचन रूप वृत्तिचक्र, उसके साथ भिन्न रूप से भासित होने वाली जो विश्वलक्षण वस्तु, उसके जो

''(जो) यह रूप आदि पञ्चवर्ग है इतना ही विश्व है ।''

इत्यादि उक्ति के अनुसार रूप आदि अंश, तत्कर्तृक रञ्जना को बहुत = अत्यधिक, अपने विषय के रूप में बनाती हुई = अविकल्पवृत्ति से जानती हुई, ''प्रमाण प्रमेय से उपरञ्जित ही होता है ।' यह सर्वसम्मत है, और प्रमाणात्मक बहिर्मुखरूप से प्रमाता ही स्फुरण करता है उसका भी उसके द्वारा ही मेयोपरञ्जन होता है न कि साक्षात्—यह भाव है । यही रूप आदि पदार्थसमूह की स्थिति है

स्वात्मनि न किञ्चिदिति प्रमाणोपारोहेणैव अस्य स्थितिः स्यात् इति—एव-काराशयः, एवंविधा चेयं मेये एवासक्त्या रक्तकालीशब्दव्यपदेश्या, इति अत्रापि तन्नाम्ना आगम उच्यते, इति प्राच्येन संबन्धः, तदुक्तं श्रीपञ्चशतिके—

'न चैषा चक्षुषा ग्राह्या न च सर्वेन्द्रियस्थिता ।
निर्गुणा निरहङ्कारा रञ्जयेद्विश्वमण्डलम् ॥
सा कला तु यदुत्पन्ना सा ज्ञेया रक्तकालिका ।' इति ।

श्रीक्रमस्तोत्रेऽपि—

'महाविनोदार्पितमातृचक्रवीरेन्द्रकासृग्रसपानसक्ताम् ।
रक्तीकृतां च प्रलयात्यये तां नमामि विश्वाकृतिरक्तकालीम् ॥'

इति । ननु सर्वत्रैवान्यत्र श्रीसृष्टिकाल्यनन्तरं श्रीस्थितिकाल्या अभिधानम्, यदुक्तं श्रीसार्धशतिके

'द्वादशारं महाचक्रं रश्मिरूपं प्रकीर्तितम् ।
नाम चैव प्रवक्ष्यामि रश्मीनां तु यदास्थितम् ॥
सृष्टिः स्थितिश्च संहारो रक्तकाली तथैव च ।
स्वकाली यमकाली च मृत्युकाली तथैव च ॥

= अवभासनात्मिका अभिव्यक्ति है । प्रमेय अपने आप में कुछ नहीं है इसलिये प्रमाण पर चढ़कर ही इसकी स्थिति होती है. यह एवकार का आशय है । इस प्रकार की यह प्रमेय (पदार्थों) में ही आसक्ति के कारण रक्तकाली शब्द से व्यवहार्य होती है । उस नाम से यहाँ भी आगम में कही जाती है—ऐसा पूर्व से सम्बन्ध है। पञ्चशतिक में कहा गया है—

"यह चक्षु से ग्राह्य नहीं है = और न सब इन्द्रियों में स्थित है । निर्गुण, निरहङ्कार (यह) विश्वमण्डल को रक्त करती है । वह कला जिससे उत्पन्न है वह रक्तकालिका कही जाती है ।"

क्रमस्तोत्र में भी

"महाविनोद के कारण अर्पित मातृचक्र के वीरेन्द्र के द्वारा रक्तपान में आसक्त तथा प्रलय समाप्त होने पर अनुरक्त उस विश्वाकृतिरक्तकाली को मैं प्रमाण करता हूँ ।"

प्रश्न—अन्यत्र सब जगह सृष्टिकाली के बाद स्थितिकाली का कथन है । जैसा कि सार्धशतिक में कहा गया है—

"द्वादशारमहाचक्र रश्मिरूप कहा गया है । रश्मियों का जो निश्चित नाम है (उसे मैं) कह रहा हूँ । सृष्टिकाली स्थितिसंहाररक्तकाली, स्वकाली, यमकाली, मृत्युकाली, रूद्रकाली, परमार्ककाली मार्तण्डकाली, कलाग्निरुद्रकाली और

रुद्रश्च परमार्कश्च मार्तण्डश्च ततः परः ।
कालाग्निरुद्रकाली च महाकाल्यभिधा पुनः ॥
महाभैरवशब्दश्च घोराशब्दस्ततः परः ।
चण्डकालीपदं चान्ते त्रयोदश उदाहृताः ॥'

इति, तत्कथमिह तदनन्तरं श्रीरक्तकाल्यादिनिर्देशः कृतः, एवं हि आगमविरोधः स्यात् ? सत्यं—किं तु आगमे संवित्क्रमगोपनार्थम् आलूनविशीर्णतयैवमभिधानं, यथा श्रीपञ्चशतिके स्थितिक्रमेऽपि, यदेव चानुसृत्य महागुरुभिः पूजाक्रमः प्रक्रान्तः, इह तु पूजाक्रमगोपनाय स्वशय्ययैव स्थापनं, यदधिकृत्य संवित्क्रमः परिनिष्ठितिमियात्, अत एवागमैकशरणतया प्रवृत्तेऽपि श्रीक्रमस्तोत्रे ग्रन्थकृतां संवित्क्रममेव प्रदर्शयितुं तद्विवृतौ श्रीसृष्टिकाल्यादिस्तुतिश्लोकव्याख्यानानन्तरं श्रीरक्तकाल्या भगवत्याः अतः परं स्थितिः संभाव्यते इत्याद्युक्तम्, इह पुनः संवित्क्रमाभिप्रायेणैव मुक्तकण्ठमेवमभिधानम्, इति न कश्चिद्दोषः ॥ १४९ ॥

एवं प्रमेयगतं स्थितिस्वरूपमभिधाय संहारस्वरूपमप्यभिधातुमाह—

......................तामन्तर्मुखतारसात् ।
संजिहीर्षुः स्थितेर्नाशं कलयन्ती निरुच्यते ॥ १५० ॥

सैव परा संविद्देवी, तां—प्रमाणरूपां रक्त्यपरपर्यायां स्थितिम्, अन्तः

महाकाली। महाभैरव शब्द और उसके बाद घोर शब्द और अन्त में तेरहवाँ चण्डकाली पद कहा गया है ।''

तो यहाँ फिर उसके बाद रक्तकाली आदि का निर्देश कैसे किया गया क्योंकि ऐसा करने पर आगम से विरोध होता है ? सत्य है । किन्तु आगम में संवित्क्रम को छिपाने के लिये कटे बिखरे की भाँति कथन कर दिया गया । जैसे कि पञ्चशतिक में स्थिति क्रम में भी जिसका अनुसरण कर महागुरुओं ने पूजा का क्रम चलाया है । यहाँ पूजा के क्रम को छिपाने के लिये अपनी शय्या (= व्यवस्था) से ही स्थापना की गई । जिसके आधार पर संवित्क्रम परिपूर्ण हो जाय । इसीलिये केवल आगम के शरण होने के कारण क्रम स्तोत्र के प्रवृत्त होने पर ग्रन्थकारों को संवित्क्रम को ही दिखलाने के लिये उसकी व्याख्या में सृष्टिकाली आदि की स्तुति वाले श्लोकों की व्याख्या के बाद रक्तकाली भगवती इसके बाद स्थिति सम्भव है— इत्यादि कहा गया है । और यहाँ संवित्क्रम के अभिप्राय से ही स्वतन्त्रतया ऐसा कथन है इसलिये कोई दोष नहीं है ॥ १४९ ॥

प्रमेयगत स्थिति के स्वरूप का कथन कर संहारस्वरूप को बतलाने के लिये कहते हैं—

उस (= स्थिति) की अन्तर्मुखता के आकर्षणवश संहरण की इच्छा वाली वह स्थिति का नाश करने वाली कही जाती है ॥ -१५० ॥

प्रमात्रेकात्मतायामौन्मुख्ये 'ज्ञातो मयार्थः' इति स्वात्मविश्रान्तिचमत्कारात्मनो रसात्, संहर्तुमिच्छुः—आत्मसाच्चिकीर्षुः, अत एव 'स्थितेर्नाशं कलयन्ती निरुच्यते' श्रीक्रमभट्टारकादौ स्थितिनाशकालीशब्दव्यपदेश्येत्यर्थः, यदुक्तं तत्र—

'वाजिद्वयस्वीकृतवातचक्र-
प्रकान्तसङ्घट्टगमागमस्थाम् ।
शुचिर्यस्तं गमितोऽर्चिषा तां
शान्तां नमामि स्थितिनाशकालीम् ॥' इति ।

श्रीपञ्चशतिकेऽपि—

'हासिनी पौद्गली येयं बालाग्रशतकल्पना ।
कल्पते सर्वदेहस्था स्थितिः सर्गस्य कारिणी ॥
यदुत्पन्ना तु सा देवी पुनस्तत्रैव लीयते ।
तां विद्धि देवदेवेश स्थितिकालीं महेश्वर ॥' इति ॥ १५० ॥

एवं प्रमेयगतं संहारस्वरूपं निरूप्य, अनाख्यस्वरूपमप्याह—

ततोऽपि संहाररसे पूर्णे विघ्नकरीं स्वयम् ।
शङ्का यमात्मिकां भागे सूते संहरतेऽपि च ॥ १५१ ॥

वही परा संवित् देवी उस = प्रमाणरूप रक्ति अपरपर्याय (= नाम) वाली स्थिति को अन्तः = प्रमाता के साथ एकात्मतारूप औन्मुख्य के होने पर 'मैंने अर्थ जान लिया' ऐसे स्वात्मविश्रान्तिचमत्कार रूप रस के कारण, संहार करने की इच्छा वाले = आत्मसात् करने की इच्छावाले, इसलिये स्थिति का नाश करने वाली कही जाती है = क्रमभट्टारक आदि में स्थितिनाशकाली शब्द से व्यवहार्य होती है । जैसा कि वहाँ कहा गया है—

"दो घोड़ों (= हंसः सोऽहं-रूपी प्राण अपान) के द्वारा स्वीकृतवातचक्र के द्वारा प्रारम्भ किये गये सङ्घट्ट के गमनागमन में स्थित, जिसके द्वारा अपनी किरण से शुचि (= प्राणरूपी सूर्य) अस्त को पहुँचाया गया उस शान्त स्थितिनाशकाली को (मैं) प्रणाम करता हूँ ॥"

पञ्चशतिक में भी—

"जो यह हास तथा पुद्गल वाली, बाल के सौवें अग्रभाग के (समान) कल्पना वाली, सब देह में स्थित, स्थिति एवं सृष्टि करने वाली वह देवी जहाँ से उत्पन्न होती है फिर वहीं लीन हो जाती है, हे देवदेवेश महेश्वर ! उसे स्थितिकाली जानो ॥"

प्रमेयगत संहारस्वरूप का निरूपण कर अनाख्यास्वरूप को कहते हैं—

इसके बाद संहाररस के परिपूर्ण होने पर (वह संवित्) स्वयं

ततः—श्रीस्थितिनाशकाल्युदयानन्तरमपि, एवमुक्तरूपस्य संहारस्य प्रमातृ-तात्मनि रसे, पूर्णे—परां धारामधिरूढे, सैव परिगृहीतपरिमितप्रमातृभूमिका संवित्, स्वयं—स्वस्वातन्त्र्यमहिम्ना, बहिरौन्मुख्यात्मन्येकस्मिन् भागे, यमयति 'इदं कार्यमिदं न' इति नियतावस्थापयति, इति यमो—विकल्पः, तदनुप्राणिता येयं शङ्का—शास्त्राणामानन्त्यात् कार्याकार्यविभागस्य विपर्ययेणापि दर्शनात् किङ्कर्तव्यतया मूढतात्मा विचिकित्सा, अत एव

'............................शङ्काया विघ्नभाजनम् ।'

इत्याद्युक्त्या स्वस्वरूपानुप्रवेशे विघ्नकरी, तां सूते—प्रमेयकक्ष्यापर्यन्त-मुल्लासयति, अन्तर्—औन्मुख्यात्मनि द्वितीयस्मिन्भागे च, संहरते—विगलित-नियतिसङ्कोचविधिनिषेधाविषयपरसंविदात्मना स्वेनैव विकस्वरेण रूपेण परिस्फुरति

'रासभ्या मूत्रकाले तु योनिः प्रस्पन्दते यथा।'

इत्याद्युक्तवदनवरतमेव सङ्कोचविकासमयतया अनियतेन रूपेणाख्यातुमशक्या, इत्येवं यमं कलयन्ती 'यमकालीति' निरुच्यते, इति पूर्ववदाक्षेपः, तदुक्तं श्रीपञ्चशतिके—

नियम-स्वरूप शङ्का को (अपने) एक अंश में उत्पन्न करती है (और फिर उसका) संहार (= समाधान) करती है ॥ १५१ ॥

उसके बाद = स्थिति नाशकाली के उदय के बाद भी, उक्तरूप संहार की प्रमातृता वाले रस के, पूर्ण होने पर = पर धारा में पहुँचने पर, वही = परिमित प्रमाता की भूमि का ग्रहण करने वाली, संवित्, स्वयं = अपने स्वातन्त्र्य की महिमा से, बाह्य उन्मुखता वाले एकभाग में, नियमन करती है = 'यह करना चाहिये यह नही, ऐसा नियति में स्थापित करती है । यम = विकल्प, उससे अनुप्राणित जो यह शङ्का = शास्त्रों के अनन्त होने के कारण कार्याकार्य विभाग का विपरीत रूप से भी दर्शन होने के कारण किंकर्त्तव्यता के कारण मूढ़ता रूप विचिकित्सा, इसलिये—

"..................शङ्का के कारण विघ्न का पात्र ।"

इत्यादि उक्ति के अनुसार अपने स्वरूप के अनुप्रवेश के बारे में विघ्न करने वाली उसको, उत्पन्न करती है = प्रमेय कक्ष्या तक उल्लासित करती है । भीतर = औन्मुख्यात्मक द्वितीय भाग में, संहार करती है = नियति के सङ्कोच को हटा कर विधिनिषेध के अविषय पर संविदात्मक अपने विकस्वर रूप से स्फुरित होती है—

"जैसे मूत्रत्याग के समय गधी की योनि हिलती है ।"

इत्यादि कथन के समान निरन्तर सङ्कोचविकासमय होने के कारण अनियत रूप से कहने में अशक्य, इस प्रकार के यम की रचना करने वाली 'यमकाली' कही जाती है—यह पहले से आक्षेप कर लेना चाहिये । वही पञ्चशतिक में कहा गया—

'यमरूपस्वरूपस्था रूपातीतस्वरूपगा ।
सा कला लीयते यस्यां यमकाली तु सा स्मृता ॥' इति ।

श्रीक्रमस्तोत्रेऽपि—

'सर्वार्थसङ्कर्षणसंयमस्य यमस्य यन्तुर्जगतो यमाय ।
वपुर्महाग्रासविलासरागात् सङ्कर्षयन्तीं प्रणमामि कालीम् ॥'

इति । एवं प्रमेयांशग्रासरसिकं सृष्ट्यादिदेवीचतुष्टयं निरूपितम् ॥ १५१ ॥

इदानीं तु प्रमाणांशभक्षणप्रवणं संहारादिदेवीचतुष्कं निरूपयति—

संहृत्य शङ्कां शङ्क्यार्थवर्जं वा भावमण्डले ।
संहृतिं कलयत्येव स्वात्मवह्नौ विलापनात् ॥ १५२ ॥

एवं यमात्मिकां शङ्कां संहृत्य शङ्कास्थानं वा शङ्क्यान्—कार्याकार्यरूपानर्थान्, परिहृत्य—उपसंहृत्य, तन्नान्तरीयकवृत्त्या सा परैव संविद्देवी स्वात्मवह्निसात्कारलक्षणाद्विलापनाद्धेतोः, निखिले भावमण्डले, संहृतिं कलयत्येव, येन—श्रीपञ्चशतिकादौ संहारकालीशब्दव्यपदेश्या, इति तन्नाम्ना आगम उच्यते, इति दूरेण संबन्धः, तदुक्तं तत्र—

"यमरूप स्वरूप में स्थित, रूपातीत स्वरूपगमिनी वह कला जिसमें लीन हो जाती है वह यमकाली कही गयी है ।"

क्रमस्तोत्र में भी—

"गमनशील संसार के नियमन के लिये समस्त अर्थ के सङ्कर्षण के संयम वाले यम के शरीर का, महाग्रास के विलास के राग के कारण सङ्कर्षण करने वाली काली को (मैं) प्रणाम करता हूँ ।"

इस प्रकार प्रमेयांश का ग्रास करने में रसिक सृष्टि आदि चार देवियों का निरूपण हुआ ॥ १५१ ॥

अब प्रमाणांश के भक्षण में कुशल संहार आदि चार देवियों का निरूपण करते हैं—

शङ्का अथवा शङ्कनीय अर्थ का संहार का आत्मवह्नि में विलय करने के कारण समस्त भाव मण्डल में संहार की लीला करती है ॥ १५२ ॥

इस प्रकार यमात्मिका शङ्का अथवा शङ्का के स्थान का संहार कर शङ्कनीय = कार्याकार्यरूप अर्थ, का परिहार कर = उपसंहार कर, उसकी नान्तरीयक वृत्ति से वह परा ही संविद् देवी स्वात्मवह्नि सात्कार लक्षण वाले विलापन के कारण, समस्त भावमण्डल में संहार करती ही है जिससे (वह) श्रीपञ्चशक्ति आदि में संहार काली शब्द से व्यवहार्य होती है = आगम में उसके नाम से कही जाती है—यह दूर से सम्बन्ध है । वही वहाँ कहा गया है—

'चण्डकाली शुद्धवर्णा यामृतग्रसनोद्यता ।
भावाभावविनिर्मुक्ता विश्वसंहाररूपिणी ॥
यत्र सा याति विलयं सा च संहारकालिका ।' इति।

श्रीक्रमस्तोत्रेऽपि—

'उन्मन्यनन्ता निखिलार्थगर्भा या भावसंहारनिमेषमेति ।
सदोदिता सत्युदयाय शून्यां संहारकाली मुदितां नमामि ॥'

इति ॥ १५२ ॥

कीदृक् चात्रोपसंह्रियमाणानां भावानां कलनम् ?—इत्याशङ्क्याह—

विलापनात्मिकां तां च भावसंहृतिमात्मनि ।
आमृशत्येव येनैषा मया ग्रस्तमिति स्फुरेत् ॥ १५३ ॥

स्वयमेव हि नाम भावानां संविद्विलीनतोत्पादनात्मा संहारो—यद्बहीरूपता-विलापनेन प्रमाणदशामधिशयानायां संवित्तावभेदेन परामर्शनं, यत एवेयं संवित् 'मयैतदर्थजातमात्मनि अभेदेनावभासितम्' इत्येवं स्फुरत्तारूपा भवेत्, इत्युक्तं— 'येनैषा मया ग्रस्तमिति स्फुरेदिति'

इयमेव हि संविदः प्रमाणरूपतायां सृष्टिः—यत् तत्तदर्थारूषिता चकास्या-

---

"चण्डकाली शुद्धवर्ण की है जो अमृत के ग्रसन में उद्यत है । (वह) भाव अभाव से रहित, विश्वसंहाररूपिणी है । वह जिसमें लीन होती है वह संहारकाली है ।"

क्रमस्तोत्र में भी—

"उन्मनी, अनन्त, समस्त पदार्थों को गर्भ में रखने वाली, जो भावसंहारनिमेष को प्राप्त करती है । जो सदा उदित होते हुए भी उदय के लिये (उद्यत रहती है उस) शून्य प्रसन्न संहारकाली को (मैं) प्रणाम करता हूँ ॥ १५२ ॥"

उपसंह्रियमाण पदार्थों की कैसी कलना होती है ?—यह शङ्का कर कहते हैं—

और उस विलापनरूपा भावसंहृति का अपने अन्दर परामर्श करती है जिस कारण यह (संविद्) मेरे द्वारा यह (भाव मण्डल) ग्रसित किया गया—इस रूप में स्फुरण करती है ॥ १५३ ॥

स्वयं ही पदार्थों की संविद्विलीनता को उत्पन्न करने वाला संहार = बाह्यरूपता के विलापन के कारण प्रमाण दशा को प्राप्त संविद् में अभेदेन परामर्श, जिस कारण यह संवित् 'मेरे द्वारा यह पदार्थसमूह अपने में अभिन्न रूप से अवभासित हैं' ऐसी स्फुरत्तारूपा होती है । इसलिये कहा गया—'जिस कारण यह 'मेरे द्वारा ग्रसित किया गया, ऐसा स्फुरण करती है ।

दिति ॥ १५३ ॥

एवं प्रमाणगतं सृष्टिस्वरूपमभिधाय, स्थितिस्वरूपमप्यभिधातुमाह—

संहार्योपाधिरेतस्याः स्वस्वभावो हि संविदः।
निरुपाधिनि संशुद्धे संविद्रूपेऽस्तमीयते ॥ १५४ ॥

एवं संहरणीये संहृतेऽपि, एतस्याः—प्रमाणमय्या निखिलार्थसंहर्तृत्वात् मृत्युरूपायाः संविदः, संहारणीयकार्याकार्याद्यर्थविच्छिन्नो, यः स्वः सर्वत एवासाधारणः स्वभावः, स स्वांशसंविद्विश्रान्तिमन्तरेण स्थितिमेव न यायात्, इति प्रमेयमिव प्रमाणे निरुपाधिनि—तत्तदर्थानारूषिते, अत एवं संशुद्धे—प्रमात्रात्मनि, संविद्रूपे 'अस्तमीयते'—तत्रैव रक्तिरूपां विश्रान्तिं गच्छेत् येनास्याः संहर्तृत्वमेव व्यवतिष्ठते, इत्येवं मृत्युरूपाया अपि संविदः कलनात् 'मृत्युकालिति' सर्वत्रेयमुद्धोष्यते, इत्यर्थत एतल्लब्धम्, तदुक्तं श्रीपञ्चशतिके—

'ओमित्येषा कुलेशानी मृत्युकालान्तपातिनी ।
मृत्युकालकला यस्याः प्रविशेद्विग्रहं शिव ॥
तदा सा मृत्युकालीति ज्ञेया गिरिसुताधव ।' इति ।

यही प्रमाणरूपता में संविद् की सृष्टि है कि (वह) भिन्न-भिन्न पदार्थों से आरूषित होकर प्रकाशित हो ॥ १५३ ॥

इस प्रकार प्रमाणगत सृष्टि के स्वरूप का कथन कर स्थिति के स्वरूप को बतलाने के लिये कहते हैं—

संहार्य की उपाधि इस संविद् का अपना स्वभाव है । (यह) उपाधिरहित शुद्ध संविद् रूप में लीन हो जाता है ॥ १५४ ॥

संहरणीय का संहार होने पर भी इसके = प्रमाणमयी के, समस्त पदार्थों की संहर्त्री होने के कारण मृत्युरूप संविद् का, संहरणीय कार्याकार्य आदि अर्थ से अवच्छिन्न जो अपना = सर्वतः असारण, स्वभाव वह अपने अंश संविद् की विश्रान्ति के विना स्थिति को ही प्राप्त नहीं होगा इसलिये प्रमेय के समान प्रमाण के भी उपाधिरहित = भिन्न-भिन्न अर्थ से अनारूषित, इसलिये शुद्ध प्रमातारूप संविद् रूप में अस्त होती है = उसी में रक्तिरूपविश्रान्ति को प्राप्त होती है जिससे इसकी संहर्तृता व्यवस्थित होती है । इस प्रकार मृत्युरूपा भी संविद् की कलना के कारण यह सवर्त्र मृत्युकाली कही में जाती है—यह अर्थात् ज्ञेय है । वही पञ्चशतिक में कहा गया है—

"हे गिरिसुता के पति ! हे शिव ! यह कुलेशानी मृत्युकालान्तपातिनी (जब) जिस (= व्यक्ति) के शरीर में मृत्युकालकला के रूप में प्रवेश करती है तब उसे मृत्युकाली समझना चाहिये ।"

श्रीक्रमस्तोत्रेऽपि—

'ममेत्यहङ्कारकलाकलापविस्फारहर्षोद्धतगर्वमृत्युः ।
ग्रस्तो यया घस्मरसंविदं तां नमाम्यकालोदितमृत्युकालीम् ॥'

इति ॥ १५४ ॥

एवं प्रमाणगतं स्थितिस्वरूपमभिधाय संहारस्वरूपमप्याह—

विलापितेऽपि भावौघे कञ्चिद्भावं तदैव सा।
आश्यानयेद्य एवास्ते शङ्कासंस्काररूपकः ॥ १५५ ॥
शुभाशुभतया सोऽयं सोष्यते फलसंपदम् ।

एवं हि निरुपाधिशुद्धप्रमातृसंविद्विश्रान्त्या संहृतेऽपि कार्यरूपे भावौघे, सा परा संवित् तद्विलापसमनन्तरमेव कञ्चित् प्रतिनियतरूपं भावमाश्यानयेत्—विलापितत्वेऽपि कथञ्चिद्भेदावभासात्मतया घनतामापादयेत्, य एवाश्यानीभूतः संस्काररूपतया वर्तमानः 'शङ्का आस्ते—तन्निमित्ततया अवतिष्ठते इत्यर्थः, यद्वशादेव विचित्राचारप्रदर्शकेष्वनन्तेषु शास्त्रेषु कार्याकार्यविभागनिश्चयमलभमानस्य प्रमातुः

'अधर्मं धर्ममिति या बुद्ध्यते तमसावृता ।'

क्रमस्तोत्र में भी

"जिसके द्वारा 'यह मेरा है'—ऐसा अहङ्कार कला के समूह के विस्फार से (उत्पन्न) हर्ष के कारण उद्धत गर्वरूप मृत्यु ग्रस्त कर ली जाती है उस घस्मर संविद् अकालोदित मृत्युकाली को (मैं) प्रणाम करता हूँ" ॥ १५४ ॥

इस प्रकार प्रमाणगत स्थितिस्वरूप का कथन कर संहारस्वरूप का भी कथन करते हैं—

भावसमूह के विलापित होने पर उसी समय वह (= परासंवित्) किसी भाव को घनीभूत कर देती है वही (= घनीभूत भाव) संस्काररूप में शङ्का बन जाता है । वह (= संस्कार) शुभ अशुभ रूप में फल को उत्पन्न करता है ॥ १५५-१५६- ॥

इस प्रकार निरुपाधि शुद्ध प्रमातृ संविद् की विश्रान्ति के द्वारा कार्यरूप भावसमूह के संहत होने पर भी वह परा संवित् उसके विलापन के बाद ही किसी प्रतिनियतरूप वाले भाव को क्षीण करती है = विलापित होने पर भी किसी प्रकार भेदावभासरूप से घनता को प्राप्त करती है । जो क्षीण हुआ संस्काररूप से वर्त्तमान 'शङ्का' है = उसके कारण के रूप में रहता हुआ जिसके वश विचित्र आचार के प्रदर्शक अनन्त शास्त्रों में कार्याकार्य विभाग के निश्चय को प्राप्त न करने वाले प्रमाता का

इत्यादिदृशा यदेव यथा हृदये प्ररोहति तदेव तस्य तथा फलेत्—इति स एवायं शङ्कानिमित्तं कार्याकार्यलक्षणप्रतिनियतभावाहितः संस्कारः प्रबुद्धः सन् शुभाशुभरूपां फलसंपदं जनयिष्यते, येनायं लोकः स्वर्निरयादिपात्रतया सुखदुःखादिभोक्तृतामियात् ॥ १५५ ॥

नन्वेवं शङ्कमानः प्रमाता कार्याकार्ययोर्निश्चयानुत्पादात् न किञ्चिदप्यनुतिष्ठेत्, इति किमस्य शुभाशुभतया फलेत् ?—इत्याशङ्क्याह—

पूर्वं हि भोगात्पश्चाद्वा शङ्केयं व्यवतिष्ठते॥ १५६ ॥

इह सर्वस्य लोकस्य नानात्वेन कार्याकार्ययोः श्रुतेः सुखदुःखाद्यनुभवात् पूर्वमेव तावच्छङ्का जायते 'किमनुष्ठेयं मया' इति, स्वसंस्कारप्रबोधतारतम्यात्तु कुत्रचिदेव कस्यचित्तन्निश्चयः समुत्पद्यते, तदनुष्ठानादस्य शुभाशुभफलभागितया सुखदुःखादौ भोक्तृता स्यात्, तदनन्तरं च दुःखाद्युपघातादेवमस्य शङ्का संप्रजायते 'यदकार्यमेव नूनं मया कार्यतयानुष्ठितं, येनैवमस्मि दुःखपराभूतो जातः' इति, ततश्च पूर्वं कृतमपि ब्राह्मणालम्भनादि तत्कालमेवेयं शङ्का शिथिलयति, येन तदनुशयवशाच्छुभमशुभं वा फलं दातुं न शक्नुयात् ॥ १५६ ॥

"तमोगुण (= असान) से आवृत जो अधर्म को धर्म समझती है ।"

इत्यादि दृष्टि से हृदय में जो भी जैसे उत्पन्न होता है उसको वही फल उस प्रकार से मिलता है—इस प्रकार वही यह शङ्का का कारण, कार्यअकार्यरूप निश्चित भाव से दृढ़ किया गया संस्कार प्रबुद्ध होकर शुभ अशुभ रूप फल सम्पदा को उत्पन्न करता है जिससे यह लोक स्वर्गनरक आदि के पात्र के रूप में सुख-दुःख आदि भोग को प्राप्त होता है ॥ १५५ ॥

प्रश्न—इस प्रकार से सन्देह में पड़ा हुआ प्रमाता कार्याकार्य के निश्चय के उत्पन्न न होने से कुछ भी नहीं करेगा तो कौन इसको शुभ अशुभ फल देगा ? यह शङ्का कर कहते हैं—

यह शङ्का भोग के पहले अथवा बाद में होती है ॥ -१५६ ॥

सब लोगों को, कार्य अकार्य के भिन्न-भिन्न रूप में सुनने के कारण सुख -दुःख आदि के अनुभव से पूर्व ही शङ्का उत्पन्न होती है 'मुझे क्या करना चाहिये ?' और अपने संस्कार के प्रबोध के तारतम्य से कहीं किसी को उसका निश्चय होता है, फिर उसके अनुष्ठान से इसको शुभाशुभफल का भागी होने के कारण सुख दुःख आदि का भोग मिलता है । उसके बाद दुःख आदि के उपघात के कारण इसको ऐसी शङ्का होती कि मैंने अकार्य को कार्य की भाँति (= कार्य समझ कर) किया जिससे इस प्रकार से पराभूत हुआ । इसके बाद पहले की गई ब्रह्महत्या आदि को तत्काल यह शङ्का शिथिल कर देती है जिससे उसके पश्चात्तापवश शुभ या अशुभ फल देने में समर्थ नहीं होता ॥ १५६ ॥

तदेवाह—

अन्यदाश्यानितमपि तदैव द्रावयेदियम् ।
प्रायश्चित्तादिकर्मभ्यो ब्रह्माहत्यादिकर्मवत्॥ १५७ ॥

न च मितः प्रमाता तदीयो वा चैतसिकः शङ्काख्यो धर्म एवं विधातुमुत्सहते, इत्याह—

रोधनाद् द्रावणाद्रूपमित्थं कलयते चितिः ।

एवं संस्कारात्मनावस्थितस्यापि अर्थस्य, रोधनाद् द्रावणाच्च इयं परा संविदुक्तेन प्रकारेण रूपं कलयन्ती श्रीक्रमसद्भावट्टारके 'रुद्रकालीति' व्यपदिष्टेत्यर्थः' तदुक्तं तत्र—

'इदं सर्वमसर्वं यत्संहारान्तं तु नित्यशः ।
कुटिलेक्षणरेखान्तग्रस्तमस्तमितं च यत् ॥
ततो बोधरसाविष्टा स्पन्दमाना निराकुला ।
दीधितीनां सहस्रं यद्वमेच्च पिबते भृशम् ॥
सा कला लीयते यस्यां रुद्रकालीति सा स्मृता ।'

इति, श्रीपञ्चशतिकादौ पुनरियं 'भद्रकाली' इत्युक्ता, इति नाम्नि भेदेऽपि

वही कहते है—

जैसे ब्रह्महत्या आदि कर्म को प्रायश्चित आदि के द्वारा (क्षीण किया जाता है उसी प्रकार) यह संवित् दूसरे घनीभूत (संस्कारों) को उसी क्षण क्षीणकर देती है ॥ १५७ ॥

परिमित प्रमाता या उसका मन में उत्पन्न शङ्का नामक धर्म ऐसा नहीं कर सकता—यह कहते हैं—

इस प्रकार (यह) संवित् रोधन और द्रावण के द्वारा सृष्टि करती रहती है अर्थात् (वह) घनीभूत को द्रावित और द्रावित को घनीभूत करती रहती है ॥ १५८- ॥

इस प्रकार संस्कार के रूप में स्थित भी पदार्थ के रोधन अथवा द्रावण के कारण यह परा संवित् उक्त प्रकार से रूप की रचना करती हुई 'क्रमसद्भावभट्टारक' में रुद्र काली कही गई है । वही वहाँ कहा गया है—

"जो यह सब या कुछ (= अंशमात्र) प्रतिदिन संहारपर्यन्त कुटिल दृष्टि की रेखा के अन्त से ग्रस्त है और जो अस्त होता है उसके बाद बोधरस से आविष्ट स्पन्दमान और निराकुल हजारों किरणें जिसका अत्यधिक वमन करती हैं और पान करती हैं वह कला जिसमें लीन होती है वह रुद्रकाली कही गई है ।"

वस्तुनि न कश्चिद्भेदो, यद्रुद्धं वार्थं द्रावयेद्भिन्नं वा, इत्युभयथापि अर्थानुगम इति, तदुक्तं तत्र—

'गमागमसुगम्यस्था महाबोधावलोकिनी ।
मायामलविनिर्मुक्ता विज्ञानामृतनन्दिनी ॥
सर्वलोकस्य कल्याणी रुद्रा रुद्र सुखप्रदा।
यत्रैव शाम्यति कला ॥
भेदस्य द्रावणाद्भद्रा भद्रसिद्धिकरीति या । इति ।

श्रीक्रमस्तोत्रेऽपि—

'विश्वं महाकल्पविरामकल्पभवान्तभीमभ्रुकुटिभ्रमन्त्या ।
याश्नात्यनन्तप्रभवार्चिषा तां नमामि भद्रां शुभभद्रकालीम् ॥'

इति ॥

न केवलमियमाश्यानीभावेन रुद्धमेवार्थं द्रावयेत्, यावद् द्रावितमपि रोधयेत्, इत्याह—

तदपि द्रावयेदेव तदप्याश्यानयेदथ ॥ १५८ ॥

श्रीपञ्चशतिक आदि में यह भद्रकाली कही गई है । इस प्रकार नाम का भेद होने पर भी वस्तु में कोई भेद नहीं है जो रुद्ध अथवा भिन्न अर्थ को द्रवित करे—इस तरह दोनो प्रकार से अर्थ का अनुगम होता है । वही वहाँ कहा गया है—

"गमागम (= आवागमन) के द्वारा सुगम्यमेस्था, महाबोध का अवलोक करने वाली, मायामल से रहित, विज्ञान अमृत से आनन्दित होने वाली, समस्त लोक का कल्याण करने वाली, रुद्र को सुख देने वाली रुद्रा कला जहाँ शान्त हो जाती है वह रुद्रकाली कही गई है भेद का द्रावण करने के कारण वह भद्रा है जो कि कल्याण की सिद्धि करने वाली है ॥"

क्रमस्तोत्र में भी—

"जो महाकल्पविराम के समान संसार के संहारार्थ भयङ्कर भ्रुकुटि के भ्रमण वाली, अनन्त प्रभव की अचिस् के द्वारा विश्व का भक्षण करती है उस भद्र शुभ भद्रकाली को (मैं) प्रणाम करता हूँ ॥ १५७ ॥

यह केवल आश्यान होकर रुद्ध अर्थ का द्रावण ही नहीं करती बल्कि द्रावित का रोधन भी करती है—यह कहते हैं—

(वह पराशक्ति) घनीभूत को द्रावित और द्रावित को घनीभूत करती रहती है ॥ -१५८ ॥

एवं चात्र प्रमाणरूपत्वेऽपि तत्तदर्थसंहारकारिणः प्रमातुरेव प्राधान्यं, येन ग्रन्थकृतो रुद्रशब्दे भरः ॥ १५८ ॥

एवं प्रमाणगतं संहारस्वरूपं निरूप्य, अनाख्यस्वरूपमपि निरूपयितुमाह—

इत्थं भोग्येऽपि संभुक्ते सति तत्करणान्यपि ।
संहरन्ती कलयते द्वादशैवाहमात्मनि ॥ १५९ ॥

एवमुपसंहृतेऽपि अर्थे तत्परिच्छेदकारीणि द्वादशापि करणानि संहरन्ती संवित् अहमात्मन्यहङ्कारे, कलयते—तत्रैव लीनतां नयेदित्यर्थः ॥ १५९ ॥

ननु कान्येतानि द्वादश करणानि, किं चैषां करणत्वम् ?—इत्याशङ्क्याह—

कर्मबुद्ध्यक्षवर्गो हि बुद्ध्यन्तो द्वादशात्मकः ।
प्रकाशकत्वात्सूर्यात्मा भिन्ने वस्तुनि जृम्भते ॥ १६० ॥

बुद्ध्यन्त इति—मनसा सह, प्रकाशकत्वादिति—अर्थालोचनात्मनः, सूर्यात्मेति—

'सूर्यं प्रमाणमित्याहुः.............।'

इस प्रकार यहाँ प्रमाणरूप होने पर भी भिन्न-भिन्न अर्थ के संहारकर्त्ता प्रमाता की ही प्रधानता है जिससे ग्रन्थकार को रुद्र शब्द से व्यामोह है ॥ १५ ॥

प्रमाणगत संहारस्वरूप का निरूपण कर अनाख्यस्वरूप का भी निरूपण करने के लिये कहते हैं—

इस प्रकार भोग्य के संभुक्त होने पर उसके बारह करणों को भी अहङ्कार में संहृत करती है ॥ १५९ ॥

इस प्रकार अर्थ का उपसंहार होने पर भी उसका परिच्छेद करने वाले बारहों करणों का संहार करने वाली संवित् अहमात्मक अहङ्कार में कलना करती है = वहीं पर लीन हो जाती है ॥ १५९ ॥

प्रश्न—ये बारह करण कौन से हैं और इसका करणत्व क्या है ? यह शङ्का कर कहते हैं—

(पाँच) कर्मेन्द्रिय (पाँच) ज्ञानेन्द्रिय मन एवं बुद्धि यह बारह प्रकाशक होने से सूर्यरूप हैं । ये भिन्न वस्तु (= प्रमेय) के विषय में प्रमाणरूपता को प्राप्त करते हैं ॥ १६० ॥

बुद्धिपर्यन्त—मन के साथ । प्रकाशक होने से अर्थालोचनरूप (प्रकाश करने से) । सूर्य रूप—

"सूर्य को प्रमाण कहते हैं...............।"

इत्याद्युक्त्या प्रमाणरूप इत्यर्थः, भिन्नं प्रमेयं परिच्छिन्दच्च प्रमाणमुच्यते इत्युक्तं 'भिन्ने वस्तुनि जृम्भते' इति ॥ १६० ॥

नन्वहङ्कारस्यापि अन्तःकरणान्तःपातः समस्ति, इति कथं 'द्वादशैव करणानि' इत्युक्तम् ?—इत्याशङ्क्याह—

अहङ्कारस्तु करणमभिमानैकसाधनम् ।
अविच्छिन्नपरामर्शी लीयते तेन तत्र सः ॥ १६१ ॥

अहङ्कारः पुनः 'अहं शृणोम्यहं पश्यामि' इत्याद्यभिमानैकसाधनत्वात् अविच्छिन्नतया प्रमात्रभेदेन विशेषानुपादानात् सर्वस्यार्थस्य परामर्शनशीलः करणम्, इत्यसौ द्वादशविधोऽपि करणवर्गः तत्राहङ्कारे लीयते—तदेकविश्रान्तो भवेदित्यर्थः ॥ १६१ ॥

ननु करणत्वाविशेषेऽपि बुद्ध्यादिरेव करणवर्गः कथङ्कारमहङ्कारे लीयते ? इत्याशङ्कां दृष्टान्तोपदर्शनेनोपशमयति—

यथाहि खड्गपाशादेः करणस्य विभेदिनः ।
अभेदिनि स्वहस्तादौ लयस्ताद्वदयं विधिः ॥ १६२ ॥

इत्यादि उक्ति से प्रमाणरूप भिन्न = प्रमेय का परिच्छेद करने वाला प्रमाण कहा जाता है । इसलिये कहा गया—भिन्न वस्तु में प्रकट होता है ।

प्रश्न—अहङ्कार का भी अन्तःकरणों के भीतर संग्रह सम्भव है फिर कैसे बारह ही करण है—ऐसा कहा गया ?—यह शङ्का कर कहते हैं—

अभिमान का एकमात्र साधन अहङ्कार अविच्छिन्न परामर्शशील (है तथा इन्द्रियसङ्घात का) करण है । इसलिये वह (= इन्द्रियवर्ग) उस (= अहङ्कार) में लीन हो जाता है ॥ १६१ ॥

'मैं सुनता हूँ; मै देखता हूँ' इत्यादि अभिमानमात्र का साधन होने से अहङ्कार निरन्तर प्रमाता से अभिन्न होने के कारण विशेष का उपादान न होने से सभी अर्थों का परामर्शनस्वभाव वाला करण है—इसलिये यह करणवर्ग बारह प्रकार का होते हुए भी उस अहङ्कार में लीन हो जाता है = उसी में विश्रान्त हो जाता है ॥ १६१ ॥

प्रश्न—करण होने पर भी बुद्धि आदि ही करणवर्ग अहङ्कार में क्यों लीन होता है ? इस आंशका को दृष्टान्त के द्वारा शान्त करते हैं—

जिस प्रकार भेदन करने वाले खड्ग, पाश आदि करण का भेदन न करने वाले, अपने हाथ आदि में लय होता है उसी प्रकार यह विधि है ॥ १६२ ॥

इह करणस्य व्यतिरिक्तत्वे किं प्रेयत्वं सर्वस्यापि तथा प्रसंङ्गः, प्रेर्यत्वे च प्रेरणक्रियायां कर्मत्वं स्यात्, न करणत्वम्, न च अकरणिका क्रिया भवेत्, इति तत्रापि करणान्तरेण भाव्यम्, इत्यनवस्था स्यात्, तद्व्यतिरिक्तस्यापि खड्गादेः करणस्य यथा कर्त्रभिन्नहस्ताद्यभेदभावनया करणत्वं घटते, तथा अहमंशस्पर्शितया प्रमात्रभेदिन्यहङ्कारेऽपि बुद्ध्यादेर्लयात्, इति युक्तमुक्तम्—अहङ्कारे बुद्धिर्लीयते इति ॥ १६२ ॥

एतदेव प्रकृते विश्रमयति—

तेनेन्द्रियौघमार्तण्डमण्डलं कलयेत्स्वयम् ।
संविद्देवी स्वतन्त्रत्वात्कल्पितेऽहंकृतात्मनि ॥ १६३ ॥

तेन—उक्तेन क्रमेण, स्वस्वातन्त्र्यात् स्वयं, न तु परिमितप्रमात्रादिव्यवधानेन, संविद्देवी द्वादशसंख्यावच्छिन्नं बुद्ध्यादीन्द्रियमार्तण्डमण्डलं देहादावभिनिवेशात्कल्पितेऽहंकृतात्मनि कलयेत्—तदेकमयतामापादयेत्, येन श्रीक्रमस्तोत्रादौ इयं 'मार्तण्डकाली' इत्युच्यते, तदुक्तं तत्र—

'मार्तण्डमापीतपतङ्गचक्रं पतङ्गवत्कालकलेन्धनाय ।
करोति या विश्वरसान्तकां तां मार्तण्डकालीं सततं प्रणौमि ॥'

करण के भिन्न होने पर (वह) प्रेर्य है या नहीं ? प्रेर्य न होने पर सब वैसे ही (= समान) होने लगेगें । और प्रेर्य होने पर प्रेरणक्रिया में कर्म होगा न कि करण, इस प्रकार क्रिया विना करण के होगी, फिर उसमें भी दूसरा करण चाहिये । इस प्रकार अनवस्था होगी । उससे भिन्न भी खड्ग आदि करण जैसे कर्त्ता से अभिन्न हस्त आदि से अभेद की भावना से करण होता है उसी प्रकार अहमर्श का स्पर्शी होने से प्रमाता से अभिन्न अहङ्कार में भी बुद्धि आदि का लय होने से—इसलिये ठीक कहा—बुद्धि अहङ्कार में लीन होती है ॥ १६२ ॥

इसी को प्रस्तुत में लगाते हैं—

इसलिये संवित् देवी (अपने) स्वातन्त्र्य के कारण अपने द्वारा कल्पित अहङ्कार में इन्द्रियसमूह रूप सूर्यमण्डल की स्वयं रचना करती है ॥ १६३ ॥

इससे = उक्त क्रम से, अपने स्वातन्त्र्य से स्वयं न कि परिमितप्रमाता आदि के व्यवधान के द्वारा संविद् देवी बारह संख्या वाले बुद्धि आदि इन्द्रिय सूर्य मण्डल को देह आदि में अभिनिवेश के कारण कल्पित अहङ्कारात्मा में कलित करती है = उससे अभिन्न कर देती है । जिससे क्रमस्तोत्र आदि में यह 'मार्तण्डकाली' कही जाती है । वही वहाँ कहा गया है—

"जो पूर्णरूप से पतङ्गचक्र (= इन्द्रिय वर्ग) का पान करने वाले मार्तण्ड को

इति । श्रीपञ्चशतिकेऽपि—

'शब्दब्रह्मपदातीता षट्त्रिंशान्तनवान्तगा ।
ब्रह्माण्डखण्डादुत्तीर्णा मार्तण्डी मूर्तिरव्यया ॥
सा कला लीयते यस्यां मार्तण्डी कालिकोच्यते ।' इति ॥१६३॥

एवं प्रमाणांशभक्षणप्रवणं देवीचतुष्टयं निरूपितम्, इदानीं प्रमात्रंशचर्वणाचतुरं देवीचतुष्टयं निरूपयति—

स एव परमादित्यः पूर्णकल्पस्त्रयोदशः ।
करणत्वात्प्रयात्येव कर्तरि प्रलयं स्फुटम् ॥ १६४ ॥

एवमहङ्कारनाम्नि परमादित्ये संहृतेषु बुद्ध्यादिषु द्वादशसु करणेषु स एवाहङ्कारनामा त्रयोदशः प्रमातृतोन्मुखीभावात् पूर्णकल्पः परमादित्यः करणत्वात् कर्तर्येव स्फुटं प्रलयं प्रयाति—तदेकरूपतामासादयेदित्यर्थः ॥ १६४ ॥

ननु द्विविधः कर्ता—संकुचितश्चसंकुचितश्च, तदयं कुत्र तावत् प्रलयं प्रयाति ?—इत्याशङ्क्याह—

कर्ता च द्विविधः प्रोक्तः कल्पिताकल्पितात्मकः ।
कल्पितो देहबुद्ध्यादिव्यवच्छेदेन चर्चितः ॥ १६५ ॥

पतङ्ग (= कीट) के समान कालकला के इन्धन (= प्रकाशन) के लिये बनाती है उस विश्वरस का अन्त करने वाली मार्तण्डकाली को प्रणाम करता हूँ ।''

पञ्चशतिक में भी—

''शब्द ब्रह्म के पद से परे छत्तीस (तत्त्व) के अन्त एवं नव वर्गों के अन्त को प्राप्त होने वाली ब्रह्माण्डखण्ड से उत्तीर्ण मार्तण्ड की अव्यय मूर्त्ति (है) वह कला जिसमें लीन होती है (उसे) मार्तण्ड काली कहा जाता है ॥ १६३ ॥''

इस प्रकार प्रमाणांश के भक्षण में दक्ष चार देवियों का निरूपण हुआ । अब प्रमाता के अंश की चर्वणा में चतुर चार देवियों का निरूपण करते है—

वही (= अहङ्कार) पूर्णसदृश तेरहवाँ परम आदित्य है । करण होने के नाते वह स्पष्टरूप से कर्त्ता में लीन हो जाता है ॥ १६४ ॥

अहङ्कार नामक परम आदित्य में बुद्धि आदि बारह करणों का संहार होने पर वही अहङ्कार नामक तेरहवाँ (करण) प्रमातृता की ओर उन्मुख होने के कारण पूर्ण जैसा परम सूर्य करण होने के कारण कर्त्ता में ही स्पष्टरूप से प्रलय को प्राप्त होता है अर्थात् उससे एक रूप हो जाता है ॥ १६४ ॥

प्रश्न—कर्त्ता दो प्रकार का है—संकुचित और असंकुचित । तो यह कहाँ प्रलय को प्राप्त होती है ? यह शङ्का कर कहते है—

कालाग्निरुद्रसंज्ञास्य शास्त्रेषु परिभाषिता ।
कालो व्यवच्छित्तद्युक्तो वह्निर्भोक्ता यतः स्मृतः ॥ १६६ ॥
संसाराक्लृप्तिक्लृप्तिभ्यांरोधनाद् द्रावणात्प्रभुः ।
अनिवृत्तपशूभावस्तत्राहंकृत्प्रलीयते ॥ १६७ ॥

अस्येति—देहबुद्ध्यादिव्यवच्छेदभाजः कल्पितस्य प्रमातुः, किं च अस्याः संज्ञायाः प्रवृत्तावत्र निमित्तम् ?—इत्याशङ्क्याह—'काल' इत्यादि, व्यवच्छित्—व्यवच्छेदः, तेन कालेन तद्व्यवच्छेदेन युक्तोऽग्निर्भोक्ता, स एव च किञ्चिद्भोग्य-संस्कारस्याप्रबोधात् 'ममैतन्मा भूत्' इति रुणद्धि, प्रबोधाच्च किञ्चिद् द्रावयति, भोगेन स्वात्मसात्करोति रुद्रः, अत एव भोग्यौन्मुख्यात् अनिवृत्तपशूभावः—प्रोन्मिषदभिलाषात्मकाणवमलयोग इत्यर्थः, तत्रेति—कालाग्निरुद्रसंज्ञे संकुचिते प्रमातरि, एवमहङ्कारनाम्नः परमार्कस्य परिमिते कालाग्निरुद्रसंज्ञे प्रमातरि, एवं-कलनात् श्रीक्रमस्तोत्रादावियं 'परमार्ककाली' इत्युच्यते, तदुक्तं तत्र—

'अस्तोदितद्वादशभानुभाजि यस्यां गता भर्गशिखा शिखेव ।
प्रशान्तधाम्नि द्युतिनाशमेति तां नौम्यनन्तां परमार्ककालीम् ॥'

कर्त्ता दो प्रकार का कहा गया है—कल्पित और अकल्पित । देह बुद्धि आदि से अवच्छिन्न (= सीमित कर्त्ता) कल्पित कहा गया है । शास्त्रों में इसको कालाग्निरुद्र नाम दिया गया है । काल ही व्यवच्छेदक है जिस कारण उससे युक्त अग्नि भोक्ता कहा गया है । संसार की अकल्पना और कल्पना के फलस्वरूप रोधन और द्रावण करने के कारण अनिवृत्त पशुभाव (= आणवमल) वाला वह (= कालाग्निरुद्र) प्रभु है । उसमें अहङ्कार लीन हो जाता है ॥ १६५-१६७ ॥

इसका = देह, बुद्धि आदि व्यवच्छेद के भागी कल्पित प्रमाता का, यहाँ इस संज्ञा का प्रवृत्तिनिमित्त क्या है ? यह शङ्का कर कहते है—'काल' इत्यादि । व्यवच्छित् = व्यवच्छेद । उस काल से = उस व्यवच्छेद से युक्त अग्नि भोक्ता है । और वही भोग्यसंस्कार का प्रबोध न होने से 'मुझे यह न हो'—ऐसा किसी का निरोध करता है । और प्रबोध होने से कुछ का द्रावण करता है = भोग के द्वारा आत्मसात् करता है, इसलिये रुद्र है । इसीलिये भोग्य के प्रति उन्मुखता के कारण (वह) अनिवृत्त पशु भाव वाला = उन्मिषित होते हुए आणवमल से युक्त है । वहाँ = कालाग्निरुद्र संज्ञा वाले संकुचित प्रमाता में । अहङ्कार नामक परमार्क के परिमित कालाग्निरुद्र नामक प्रमाता में, ऐसा होने से क्रमस्तोत्र आदि में यह परमार्ककाली कही जाती है । वही वहाँ कहा गया है—

"जिस प्रशान्त धाम में बारह सूर्य अस्त और उदित होते है तथा भर्गशिखा (अग्नि की) शिखा के समान च्युतिनाश को प्राप्त करती है उस अनन्तपरमार्क काली को प्रणाम करता हूँ ।"

१ त. द्वि.

इति । श्रीपञ्चशतिकेऽपि—

'एकाकिनी चैकवीरा सुसूक्ष्मा सूक्ष्मवर्जिता।
परमात्मपदावस्था परापरस्वरूपिणी ॥
सा कला पररूपेण यत्र संलीयते शिव ।
सा कला परमार्केति ज्ञेया भस्माङ्गभूषण ॥'

इति ॥ १६५-१६७ ॥

एवं प्रमातृगतं सृष्टिस्वरूपमभिधाय स्थितिस्वरूपमप्याह—

सोऽपि कल्पितवृत्तित्वाद्विश्वाभेदैकशालिनि ।
विकासिनि महाकाले लीयतेऽहमिदंमये ॥ १६८ ॥

एवमहङ्कारे ग्रस्ते, तद्ग्रसितुः—कालाग्निरुद्रशब्दव्यपदेश्यस्य कल्पितस्यापि प्रमातुर्ग्रासेन भाव्यम्, इति सोऽपि कल्पितः प्रमाता, कल्पितत्वादेव अहमिदंमये, अत एवाहन्तायामिदन्ताया विश्रान्तेः विश्वाभेदैकशालिनि, अत एव विकासिनि

'भैरवरूपी कालः सृजति जगत्कारणादि कीटान्तम् ॥'

इत्याद्युक्तस्वरूपे महाकाले लीयते—परस्मिन्नकल्पिते पूर्णाहंविमर्शमये प्रमातरि विश्रान्तो भवेदित्येवं परिमितप्रमात्रात्मनः कालाग्निरुद्रस्य कलनात् 'कालाग्निरुद्र-

---

पञ्चशतिक में भी—

"एक, एकवीरवाली, सूक्ष्म, सूक्ष्मरहित, परमात्मपद में स्थित, परापरस्वरूपिणी वह कला पररूप में जहाँ लीन हो जाती है, हे शिव ! हे भस्माङ्गभूषण उस कला को परमार्क काली समझना चाहिये" ॥ १६५-१६७ ॥

प्रमातृगत सृष्टि के स्वरूप का कथन कर स्थिति स्वरूप को भी कहते हैं—

वह (कालाग्नि रुद्र) भी कल्पितवृत्ति वाला होने के कारण विश्व में अभिन्न, अहं, इदं, से पूर्ण, विकास वाले महाकाल में लीन हो जाता है ॥ १६८ ॥

अहङ्कार के ग्रस्त होने पर उसका ग्रास करने वाले कालाग्निरुद्र शब्द से व्यवहार्य कल्पितप्रमाता का भी ग्रास होना चाहिये । इसलिये वह कल्पितप्रमाता भी कल्पित होने के कारण अहं इदं इसलिये अहन्ता में इदन्ता की विश्रान्ति के कारण विश्वभेद वाले इसलिये विकासयुक्त

"भैरवरूपी काल जगत्कारण (= ब्रह्मा) से लेकर कीटपर्यन्त की सृष्टि करता है ।"

इत्यादि उक्त स्वरूपवाले महाकाल में लीन हो जाता है = पर अकल्पित पूर्ण अहंविमर्शमय प्रमाता में विश्रान्त हो जाता है । इस प्रकार परिमित प्रमाता रूप

कालीति' श्रीपञ्चशतिकादावियम् उच्यते, यदुक्तं—

'वरदा विश्वरूपा च गुणातीता परा कला।
अघोषा सास्वरारावा कालाग्निग्रसनोद्यता ॥
निरामया निराकारा यस्यां सा शाम्यति स्फुटम् ।
कालाग्निरुद्रकालीति सा ज्ञेयामरवन्दित ॥' इति ।

श्रीक्रमस्तोत्रेऽपि—

'कालक्रमाक्रान्तदिनेशचक्रक्रोडीकृतान्ताग्निकलाप उग्रः ।
कालाग्निरुद्रो लयमेति यस्यां तां नौमि कालानलरुद्रकालीम् ॥'

इति ॥ १६८ ॥

एवं प्रमातृगतं स्थितिस्वरूपमभिधाय संहारस्वरूपमप्याह—

एतस्यां स्वात्मसंवित्ताविदं सर्वमहं विभुः ।
इति प्रविकसद्रूपा संवित्तिरवभासते ॥ १६९ ॥
ततोऽन्तः स्थितसर्वात्मभावभोगोपरागिणी ।
परिपूर्णापि संवित्तिरकुले धाम्नि लीयते ॥ १७० ॥

एवं कालाग्निरुद्र रूपे परिमिते प्रमातरि ग्रस्ते परिपूर्णाहंभावमयस्य परप्रमातुर्महाकालस्यापि स्वविमर्शविश्रान्त्यात्मना ग्रासेन भवितव्यम्, इत्येतस्यामुक्त-

---

कालाग्निरुद्र का ग्रसन करने से पञ्चशतिक आदि में यह कालाग्निरुद्रकाली कही जाती है जैसा कि वहाँ कहा गया है—

"वरदा, विश्वरूपा, गुणतीता, पराकला, अघोषा, स्वररहित स्वरवाली, कालाग्नि के ग्रसन मे उद्यत, निरामया, निराकारा वह जिसमें शान्त होती है हे देववन्दित ! उसे स्पष्टरूप से कालाग्निरुद्रकाली समझना चाहिये ।"

क्रमस्तोत्र में भी—

"कालक्रम को आक्रान्त करने वाले सूर्यमण्डल को गोद में रखने वाला अग्निसमूह उग्र कालाग्निरुद्र जिसमें लीन हो जाता है (मैं उस) कालाग्निरुद्रकाली को प्रणाम करता हूँ" ॥ १६८ ॥

प्रमातृगत स्थिति के स्वरूप का कथन कर संहार स्वरूप को भी कहते हैं—

इस स्वात्मसंवित्ति में 'इदं सर्वम्' अहंविभुः (= यह सब व्यापक मैं ही हूँ) ऐसी विकासशील संवित् भासित होती है । इसके बाद अन्तःस्थित सर्वात्मभाव के भोग को भोगने वाली परिपूर्ण संवित् अकुल धाम में लीन हो जाती है ॥ १६९-१७० ॥

इस प्रकार कालाग्निरुद्ररूप परिमित प्रमाता के ग्रस्त होंने पर परिपूर्ण

स्वरूपायां स्वात्मनो महाकालस्य संबन्धिन्यां संवित्तौ

'सर्वो ममायं विभवः ....।'

इत्याद्युक्तवत् सर्वमिदमहमेवेति विभुः—विश्वाभेदैकशालिनी, अत एव प्रविकसद्रूपा या परिमितप्रमातृचर्वणाचतुरा संवित्तिः—अनुभवविशेषोऽवभासते, सापि ततः एवमवभासानन्तरम्, अन्तः—प्रमात्रैकात्म्येन वर्तमानानाम्, अत एव सर्वसर्वात्मकत्वेन सर्वात्मरूपाणां भावानां यो भोगो—हठपाकक्रमेणालंग्रासयुक्त्या स्वात्मसात्कारः, तेनोपरागिणी—संहर्त्रेकस्वभावा, अत एव परिपूर्णा, अत एव कञ्चिदपि प्रति भोग्यत्वागमनाद्विदिक्रियाकर्तृतारूपा वित्तिः,

'अव्ययमकुलममेयं विगलितसदसद्विवेककल्लोलम् ।
जयति प्रकाशविभवस्फीतं काल्याः परं धाम ॥'

इत्याद्युक्तस्वरूपशालिन्यकुले धाम्नि लीयते—स्वात्मविश्रान्तिचमत्काररूपाहंपरामर्शदशाधिशायितामियादिति, एवं महाकालस्य कलनात् 'महाकालकालीति' श्रीक्रमस्तोत्रादावुच्यते, तदुक्तं तत्र—

'नक्तं महाभूतलये श्मशाने दिक्खेचरीचक्रग्रणेन साकम् ।
कालीं महाकालमलंग्रसन्तीं वन्दे ह्यचिन्त्यामनिलानलाभाम् ॥'

अंहभावमय परप्रमाता महाकाल का भी स्वविमर्शविश्रान्ति रूप ग्रास होना चाहिये । इसलिये इस = उक्त स्वरूपवाली, स्वात्म महाकाल सम्बन्धिनी संवित् में

"यह सब मेरा विभव है......."

इत्यादि कथन की भाँति 'यह सब मै ही हूँ' ऐसा व्यापक = विश्वाभेद वाली, इसलिये प्रविकसद्रूपा जो परिमित प्रमाता की चर्वणा में चतुर संवित्ति = अनुभवविशेष, (वह) अवभावसित होता है । वह भी तब = इस प्रकार के अवभास के बाद, अन्तः = प्रमाता से अभिन्न रूप से, वर्तमान इसलिये सर्वसर्वात्मक होने के कारण सर्वात्मरूप भावों का जो भोग = हठपाक के क्रम से अलंग्रास युक्ति के द्वारा स्वात्मसात्कार, उससे उपरागिणी = संहर्त्री एकस्वभाववाली इसलिये परिपूर्ण इसलिये किसी के भी प्रति भोग्यत्व का गमन न होने से विदिक्रिया की कर्तृतारूपा वित्ति,

"अव्यय, अकुल, अमेय, जहाँ सदसद् विवेक का कल्लोल विगलित हो गया है ऐसा प्रकाश विभव से स्फीत, काली का परम धाम सर्वोत्कृष्ट है ।"

इत्यादि उक्त स्वरूप वाले अकुल धाम में लीन हो जाता है = स्वात्मविश्रान्तिचमत्कार रूप अंहपरामर्शदशा में अधिशयन करता है । इस प्रकार महाकाल का ग्रसन करने से क्रमस्तोत्र आदि में (वह) महाकाली कही जाती है । वही वहाँ कहा गया है—

"रात्रि के समय यह भूतों के लय वाले श्मशान में दिक्चरी एवं खेचरी

इति । श्रीपञ्चशतिकेऽपि

'ऋतोज्ज्वला महादीप्ता सूर्यकोटिसमप्रभा ।
कलाकलङ्करहिता कालस्य कलनोद्यता ॥
यत्र सा लयमाप्नोति कालकालीति सा स्मृता।'

इति ॥ १६९-१७० ॥

एवं प्रमातृगतं संहारस्वरूपं निरूप्यानाख्यास्वरूपमपि निरूपयति—

प्रमातृवर्गो मानौघः प्रमाश्च बहुधा स्थिताः ।
मेयौघ इति यत्सर्वमत्र चिन्मात्रमेव तत् ॥ १७१ ॥
इयतीं रूपवैचित्रीमाश्रयन्त्याः स्वसंविदः ।
स्वाच्छन्द्यमनपेक्षं यत्सा परा परमेश्वरी ॥ १७२ ॥

तदेवमत्र—अहंपरामर्शात्मन्यकुले धाम्नि, प्रमेयं प्रमाणं प्रमाता प्रमा च इत्येतत्सर्वं नानारूपतयोज्जृम्भमाणं चिन्मात्रमेव—तदेकरसतयावभासते इत्यर्थः, तत्—तस्मादियतीं प्रामात्राद्यवच्छिन्नां रूपवैचित्रीमाश्रयन्त्याः स्वप्रकाशायाः परस्याः संविदो यदनपेक्षं

'तस्य देवातिदेवस्य परबोधस्वरूपिणः ।

चक्रसमूह के साथ महाकाल का अलंग्रास करने वाली अचिन्त्य, वायु और अग्नि के समान (कान्ति वाली) काली को प्रणाम करता हूँ ।''

पञ्चशतिक में भी—

''ऋतोज्ज्वला, महादीप्ता, करोड़ों सूर्य के समान कान्ति वाली, कला के कलङ्क से रहित, कला के ग्रसन में उद्यत वह (= महाशक्ति) जहाँ लय को प्राप्त होती है वह कालकाली कही गई है'' ॥ १६९-१७० ॥

इस प्रकार प्रमातृगत संहारस्वरूप का निरूपण कर अनाख्या के स्वरूप का निरूपण करते हैं—

यहाँ प्रमातृवर्ग, प्रमाणसमूह, अनेकरूपों में स्थित **प्रमावर्ग** और प्रमेयवर्ग यह जो कुछ है वह सब चिन्मात्र है । इतने **रूपवैचित्र्य** की आधारभूत अपनी संविद् का जो निरपेक्ष स्वातन्त्र्य है, वही **परापरमेश्वरी** है ॥ १७१-१७२ ॥

तो इस प्रकार यहाँ = अहंपरामर्शात्मक अकुल धाम में, प्रमेय प्रमाण, प्रमाता और प्रमा नामक नानारूप से प्रकाशमान यह सब चिन्मात्र ही है अर्थात् उस एकरस के रूप से भासित होता है तो = इस कारण इतनी प्रमाता आदि से अवच्छिन्न, रूपवैचित्र्य का आश्रयण करने वाली स्वप्रकाश परासंविद् का जो अनपेक्ष

विमर्शः परमा शक्तिः सर्वज्ञज्ञानशालिनी ॥'

इत्याद्युक्तस्वरूपमहंपरामर्शमये स्वाच्छन्द्यं, सा प्रमेयप्रक्रियया—प्रमातृपदेन महाभैरवशब्दस्य, मेयपदेन चण्डशब्दस्य, प्रमापदेनोग्रशब्दस्य, मानपदेन घोरशब्दस्य, चाक्षेपात् ' महाभैरवचण्डोग्रघोरकाली' या अस्मद्दर्शने पूर्णतया परा इति परमेश्वर्युक्ता, यदुक्तं श्रीपञ्चशतिके—

'दशसप्तविसर्गस्था महाभैरवभीषणा ।
संहरेद्भैरवान्सर्वान्विश्वं च सुरपूजित ॥
सान्तः शाम्यति यस्यां च सा स्याद्भरितभैरवी ।
महाभैरवचण्डोग्रघोरकाली परा च सा ॥' इति ।

श्रीक्रमस्तोत्रेऽपि—

'क्रमत्रयत्वाष्ट्रमरीचिचक्रसञ्चारचातुर्यतुरीयसत्ताम्
वन्दे महाभैरवघोरचण्डकालीं कलाकाशशशाङ्ककान्तिम् ॥'

इति ॥ १७१-१७२ ॥

ननु किं नामास्याः परत्वम् ?—इत्याशङ्क्याह—

इमाः प्रागुक्तकलनास्तद्विजृम्भोच्यते यतः ।

"परबोधस्वरूप उस देवाधिदेव का विमर्श (ही) सर्वज्ञज्ञानशालिनी परमाशक्ति है।"

इत्यादि उक्तस्वरूप वाला अहंपरामर्शमय स्वातन्त्र्य, वह प्रमेयप्रक्रिया के अनुसार—प्रमातृपद से महाभैरव शब्द का, मेयपद से चण्ड शब्द का, प्रमापद से उग्र शब्द का और मानपद से घोर शब्द का आक्षेप होने से 'महाभैरवचण्डोग्रकाली है, जो हमारे दर्शन में पूर्णता के कारण परा परमेश्वरी कही गई है । जैसा कि पञ्चशतिक में कहा गया है—

"हे सुरपूजित ! सत्रह विसर्गों में स्थित, महाभैरवभीषण (जो कि) सभी भैरवों और विश्व का संहार करती है वह जिसके भीतर शान्त होती है वह भरितभैरवी है । और वही परा महाभैरवचण्डोग्रघोर काली भी है । (अथवा वह महाभैरवचण्डग्रघोर काली परा है) ।'

क्रमस्तोत्र में भी कहा गया—

"क्रमत्रय अर्थात् क्रम कुल और त्रिक रूपी त्वष्टा अर्थात् अग्नि या सूर्य की किरणचक्र के सञ्चारकुशलता वाली चतुर्थ सत्तारूपा, कलारूपी आकाश के चन्द्रमा के समान कान्ति वाली महाभैरव घोरचण्डकाली को मैं प्रणाम करता हूँ" ॥ १७१-१७२ ॥

प्रश्न—इसका परत्व क्या है ? यह शङ्का कर कहते हैं—

अतस्तद्विजृम्भात्मकत्वादेवासां सर्वसर्वात्मकतया एकैकस्यामपि संविदि सर्वा एव संविदोऽनन्तरत्वेन वर्तन्ते, येनैकैकस्यामपि द्वादशात्मकत्वात् सञ्चारक्रमपूजायां चतुश्चत्वारिंशदधिकं शतं पूज्यत्वेनोक्तम्, यदागमः—

'द्वादशाराावियोगेन देवीं द्वादशधा यजेत्।' इति,

अत एव च त्रयोदशं रूपमभिधातुमवकाशलेशोऽपि नास्ति इति युक्तमुक्तं 'परमार्थतः संविद्द्वादशात्मैव' इति ॥

ननु क्रमदर्शने सर्वत्रैव श्रीसृष्ट्यादिदेवीनां मध्ये श्रीसुकाल्या भगवत्या अभिधानं, येनानाख्यचक्रे त्रयोदश देव्यः, अत एव श्रीमहाभैरवचण्डोग्रघोर-कालीभट्टारिकायाश्च त्रयोदशत्वम्, तदुक्तं श्रीपञ्चशतिके—

'डकला भीषणा रौद्रा कुलकालिनिराकुला ।
अलक्ष्या लक्ष्यनिर्लक्ष्या सुकाली नाम सिद्धिदा ॥' इति ।

श्रीतन्त्रराजभट्टारकेऽपि—

'सृष्टिकाली च संहारे सृष्टौ सा परमेश्वरी ।
स्थितिकाली तथा घोरा ततः संहारकालिका॥
रक्तकाली चर्वयन्ती रक्तौघमविभेदतः ।
सुकाली यमकाली च मृत्युकाली भयावहा ॥

ये पूर्वोक्त कलनाएँ उस (= परादेवी) का उल्लास हैं ॥ १७३- ॥

अतः उसके विजृम्भात्मक होने के कारण इनके सर्वसर्वात्मक होने से एक-एक संविद् में सभी संविद् अन्तर्भूत होकर रहती है । जिससे एक-एक में भी बारह होने के कारण सञ्चारक्रमपूजा में (१२ x १२) एक सौ चौवालिस (संविदायें) पूज्य कही गई हैं । जैसा कि आगम है—

"बारह अरों से युक्त देवी की बारह प्रकार से पूजा करनी चाहिये ।"

इसलिये तेरहवें रूप का कथन करने के लिये लेशमात्र भी अवकाश नहीं है । इसलिये ठीक कहा गया—परमार्थतः संविद् बारह ही है ॥ १७२-१७३ ॥

प्रश्न—क्रमदर्शन में सर्वत्र ही सृष्टिकाली आदि देवियों के मध्य सुकाली भगवती का कथन है जिससे अनाख्याचक्र में तेरह देवियाँ हैं और इसलिये महाभैरव चण्डोग्रघोरकालीभट्टारिका तेरहवीं है । वही पञ्चशतिक में कहा गया है—

"डकला, भीषणा, रौद्रा, कुलकालिनिराकुला, अलक्ष्या, लक्ष्य से अलक्ष्य तक व्याप्त सुकाली सिद्धि देने वाली है ।"

तन्त्रराजभट्टारक में भी—

"संहार होने पर सृष्टिकाली और सृष्टि होने पर परमेश्वरी स्थितिकाली फिर

भद्रकाली तथा चान्यापरमादित्यकालिका ।
मार्तण्डकाली कालाग्निरुद्रकालमहोल्बणा ॥
महाकालकुले काली महाभैरवकालिका ।
त्रयोदशविधा काली विज्ञेया नामभेदतः ॥'

इति, श्रीसार्धशतिकं तु समनन्तरमेव संवादितं, तदत्र क्रमनयसमानकक्ष्यत्व-विवक्षायामपि कथमेतद्विरुद्धमभिहितं 'द्वादशैव देव्यः' इति ? अत्रोच्यते, इह—क्रमदर्शने सर्वसर्विकया अनाख्यचक्रे त्रयोदशैव देव्यः पूज्यत्वेनाभिमताः, इति तावन्नास्ति नियमः, यतः श्रीक्रमसद्भावभट्टारके अनाख्यचक्रे सप्तदश देव्यः पूज्यत्वेनोक्ताः, यदुक्तं तत्र—

'कालोत्थिता महादेव सानन्दा नन्दिनी शिवा ।
चिद्घना युग्ममध्यस्था अक्षरा क्षरगोचरा ॥
अकुला कलयेन्नित्या कालकाली निराकुला ।
सा कला लीयते यस्यां सृष्टिकाली तु सा स्मृता ॥'

इत्याद्युपक्रम्य

'क्रमत्रयाणां यच्चक्रं घोरघोरतरं महत् ।
कालरूपं मरीच्याद्यं त्वाष्ट्रं कल्पान्तकान्तगम् ॥
आचरेत्तु महाचारचातुर्येणैव तत्र च ।
या कला घोरघोरोग्रा तस्याः सा तुर्यगा शिवा ॥

(स्थिति होने के बाद) संहारकाली, अभेदरूप से रक्तसमूह की चर्वणा करती हुई रक्तकाली, सुकाली, यमकाली, भयदायिनी मृत्युकाली, भद्रकाली, परमादित्यकाली, मार्तण्डकाली, कलाग्निरुद्रकाल से महोल्बणा, महाकालकुल में काली, महाभैरव काली इस प्रकार नामके भेद से तेरह प्रकार की काली को जानना चाहिये ।''

सार्धशतिक को तो अभी पीछे ही उद्धृत कर दिया है । तो यहाँ क्रमसिद्धान्त की समानकक्ष्यता की विवक्षा में भी कैसे यह विरुद्ध कथन किया गया कि 'बारह ही देवियाँ हैं । इस विषय में कहते हैं—यहाँ = क्रमदर्शन में, कुल मिलाकर अनाख्यचक्र में तेरह ही देवियाँ पूज्य मानी गयी हैं इस प्रकार कोई नियम नहीं है क्योंकि क्रमसद्भावभट्टारक में अनाख्यचक्र में सत्रह देवियाँ पूज्य मानी गयी है । जैसा कि वहाँ कहा गया है—

''हे महादेव ! कालोत्थिता, सानन्दा, नन्दिनी, शिवा, चिद्घना, युग्ममध्यस्था, अक्षरा, क्षरगोचरा, अकुला, नित्य ग्रसन करने वाली कालकाली, निराकुला, यह कला जिसमें लीन होती है वह सृष्टिकाली कही गई है ।''

इस प्रकार उपक्रम कर

तीन क्रमों का जो घोर घोरतर कालरूप, मरीचि आदि, त्वाष्ट्र, कल्पान्त-

महाभैरवघोरस्य चण्डरूपस्य सर्वतः ।
ग्रसते या महाकाली द्व्यष्टका कालनाशिनी ॥
सप्तदशी तु सा काली विद्धि सर्वार्थकारिणी ।'

इति, अत एव च 'एतदाशयेन श्रीस्तोत्रकारस्य पूजाक्रमः, इति न ग्राह्यम्, यदाहुः—

'श्रीक्रमसद्भावादिकशास्त्राशयतश्च पत्रिका अत्र ।
श्रीस्तोत्रकारभास्करकुलधरपूर्वासु संततिषु ॥' इति,

अस्य हि अनाख्यचक्रे त्रयोदश देव्यः पूज्यतया अभिमता द्वादश वा, यदधिकारेण अयं विचारः प्रक्रान्तः, एवमिह श्रीसुकालीं विना द्वादशैव देव्यः पूज्यतया यद्युक्ताः, तत्को दोषः, यदागमः—

'यत्सृष्टिस्थितिसंहाररक्तैश्च यममृत्युभिः ।
रुद्रमार्तण्डपरमादित्यकालाग्निरुद्रकैः ॥
पदैश्च समहाकालैः कालीशब्दान्तयोजितैः ।
महाभैरवचण्डोग्रघोरकालीपदं नयेत् ॥' इति ।

एवं क्रमकेलावप्येतद्गर्भीकारेण यदनेन ग्रन्थकृता व्याख्यातं तत्रापि अन्यथा न किञ्चित्संभाव्यं, यतोऽत्रास्य 'श्रीगोविन्दराज-श्रीभानुकादिक्रमेण' बहुशाखमेवं गुरूपदेशः समस्तीति, योऽद्यापि महात्मनां महागुरूणां हृदयपथे शतशः

कान्तगामी, महाचक्र है महाचारचातुर्य के साथ उसका आचरण करना चाहिये । वहाँ जो घोर घोरतर उग्रकला है उसकी जो चतुर्थगामिनी शिवा है महाभैरवघोर चण्डरूप का जो सोलहवीं कालनाशिनी महाकाली सर्वतः ग्रसन करती है उसे सर्वार्थकारिणी सत्रहवीं काली समझो ।''

इसलिये 'इस आशय से' स्तोत्रकार का पूजाक्रम है,—ऐसा नहीं समझना चाहिये । जैसा कि कहते हैं—

यहाँ श्रीस्तोत्रकार, श्रीभास्कर और श्रीकुलधर के पूर्व वाली परम्पराओं में क्रमसद्भाव आदि शास्त्र के आशय से पत्रिका अर्थात् लेख (मिलता) है ।''

इसके अनाख्यचक्र में तेरह या बारह देवियाँ पूज्य मानी गयी है । जिसके आधार पर यह विचार आया है । इस प्रकार यदि यहाँ सुकाली के विना बारह देवियाँ पूज्य कही गयी हैं तो क्या दोष है ?—जैसा कि आगम है—'सृष्टि, स्थिति, संहार, रक्त, यम, मृत्यु, रुद्र, मार्तण्ड, परमादित्य, कालाग्निरुद्र एवं महाकाल पदों के साथ काली शब्द को अन्त में जोड़कर महाभैरवचण्डोग्रघोरकाली पद को जोड़ना चाहिये ।''

क्रमकेलि में भी इसको ध्यान में रखकर इस ग्रन्थकार के द्वारा जो व्याख्यान किया गया वहाँ भी कोई अन्यथा सम्भावना नहीं करनी चाहिये । क्योंकि इस विषय

परिपोस्फुरीति, यदुक्तं तत्रैवानेन—यथैकः श्रीमान् वीरवरः सुगृहीतनामधेयो 'गोविन्दराजाभिधानः' 'श्रीभानुकाभिधानो' द्वितीयः श्रीमान् 'एरकसमाख्यः' तृतीयः सममेवोपदेशं पीठेश्वरीभ्य उत्तरपीठलब्धोपदेशात् श्रीशिवानन्दनाथाल्लब्धनुग्रहाभ्यः 'श्रीकेयूरवती-श्रीमदनिका-श्रीकल्याणिकाभ्यः प्राप्नुवन्तः । तत्राद्यः प्राप्तोपदेश एवैवं मनस्यकार्षीत्—एतावत्यधिगते किमिदानीं कृत्यमस्तीति, इत्थं च निष्ठितमना यावज्जीवमुपनतभोगातिवाहनमात्रव्यापार एतद्विज्ञानोपदेशपात्रशिष्टोपदेशप्रवणः शरीरान्तं प्रत्यैक्षिष्ट, स चेदं रहस्यं 'श्रीसोमानन्दाभिधानाय' गुरवे सञ्चारयांबभूव। द्वितीयोऽपि एवमेवास्त, तस्यैव चैषा 'श्रीमदुज्जटोद्भट्टादिनानागुरुपरिपाटीसंततिः, यत्प्रसादासादितमहिमभिरस्माभिरेतत् प्रदर्शितम् । 'श्रीमानेरकस्तु' सिद्धये प्रायतत, यावत्सिद्धः सन् एव मनसा समर्थयते स्म—किं भोगैः, यत—अयं महान् क्लेशो मयानुभूतः, कथमहं सब्रह्मचारिवद्यावज्जीवं प्रपन्नलोकोद्धरणमात्रपर एव नाभवम्, यतः

'श्रीमत्सदाशिवपदेऽपि महोग्रकाली
भीमोत्कटभ्रकुटिरेष्यति भङ्गभूमिः ।
इत्याकलय्य परमां स्थितिमेत्यकाल-
सङ्कर्षिणीं भगवतीं हठतोऽधितिष्ठत् ॥'

में गोविन्दराज, भानुक आदि के क्रम से अनेक प्रकार का गुरूपदेश सम्भव है जो आज भी महात्मा महागुरुओं के हृदयपथ पर सैकड़ों बार स्फुरित होता है । जैसा कि वहीं पर इन्होंने कहा है—

जैसे प्रथम श्रीमान् वीरवर सुगृहीत नामवाले गोविन्दराज, दूसरे भानुक, तीसरे एरक ने एक साथ उत्तरपीठ से उपदेश प्राप्त करने वाले शिवानन्द नाम वाले से अनुग्रह प्राप्त करने वाली केयूरवती मदनिका और कल्याणिका पीठेश्वरियों से उपदेश प्राप्त किये । उनमें से प्रथम गोविन्दराज ने उपदेश प्राप्त करने के बाद तुरन्त मन में सोचा—इतना जान लेने के बाद अब क्या कार्य है—इस प्रकार मन में निश्चय कर जीवनपर्यन्त प्राप्त भोगों में जीवन विताने वाले, इस ज्ञान के उपदेश के योग्य शिष्य को उपदेश देने में संलग्न होते हुए वे दिवङ्गत हो गये । उन्होंने इस रहस्य को सोमानन्द नामक गुरु के अन्दर सञ्चारित किया । दूसरे (भानुक) भी ऐसे ही थे। उद्भट्ट उद्भूष्ट आदि अनेक गुरुओं की परम्परा उन्हीं की (भानुक की) है । जिसकी कृपा से महिमा प्राप्त करने वाले हमने यह प्रदर्शित किया । एरक ने सिद्धि के लिये प्रयास किया । सिद्ध होकर मन में ऐसा सोचने लगे—भोगों से क्या लाभ ? जो मैंने यह महान् क्लेश का अनुभव किया । मैं ब्रह्मचारी के समान जीवनपर्यन्त विपन्न लोगों के उद्धार में तत्पर क्यों नहीं हुआ ? क्योंकि—

"भयङ्कर उत्कट भ्रुकुटिवाली भङ्गभूमि (= विनाश की हेतुभूता) महोग्रकाली श्रीसदाशिव के पद पर भी आयेगी ऐसा समझकर परम स्थिति को प्राप्त कर हठात् भगवती सङ्कर्षिणी का अधिष्ठान करना चाहिये ।"

तदिदानीमपि निजभावगतरहस्योपदेशं स्तोत्रमुखेनापि तावत्प्रसारयंल्लोकाननुगृह्णीयाम् इति, अतश्चास्य एवं गुरुक्रममजानानैरद्यतनैः

'श्रीभूतिराजनामाप्याचार्यश्चक्रभानुशिष्योऽन्यः ।
अभिनवगुप्तस्य गुरोर्यस्य हि कालीनये गुरुता॥'

इत्यादि यदुक्तं तत् स्वोत्प्रेक्षितमेव—इत्युपेक्ष्यम् । नहि श्रीचक्रभानुना प्रायः कस्यचिदपि एवमुपदिष्टं—तन्मूलतयैव इदानीमस्योपदेशस्य शतशो दर्शनात्, तत्रापि चात्र श्रीभूतिराजस्यान्यथा पूजाक्रम इति

'देवीपञ्चशताशयमाश्रित्य च भूतिराजपूर्वाणाम् ।'

इत्यभिदधद्भिर्भवद्भिरेवोक्तम्, अथात्र 'द्वादशैव देव्यः पूज्यतया स्थिताः' इत्यभिप्रेतं भवतस्तर्हि श्रीपञ्चशतिकार्थमपि न जानीषे—तद्गच्छ, स्वगुरुं पृच्छ, किमस्मदाविष्कृतेन, श्रीदेवीपञ्चशतिकेऽपि अस्य श्रीसोमानन्दभट्टपादेभ्यः प्रभृति त्रिकदर्शनवदेव गुरवः, इति न तत्राप्यस्य श्रीभूतिराजो गुरुत्वेन स्थितः, न च 'असावस्य न गुरुः' यद्वक्ष्यति—

'अथोच्यते ब्रह्मविद्या सद्यः प्रत्ययदायिनी ।
शिवः श्रीभूतिराजो यामस्मभ्यं प्रत्यपादयत् ॥' इति,

तो अब भी अपने भागवत रहस्य के उपदेश का स्तोत्र के द्वारा प्रसार करता हुआ लोक को अनुगृहीत करूँ । इसलिये इसके इस प्रकार के गुरुक्रम को न जानने वाले आज के लोग—

"चक्रभानु के एक दूसरे शिष्य भूतिराज नामक आचार्य भी हैं अभिनवगुप्त के जिस गुरु की कालीशास्त्र में गुरुता है ।"

इत्यादि जो कहे हैं वह अपनी बात है, इसलिये उपेक्षणीय है । क्योंकि चक्रभानु ने प्रायः ऐसा किसी को उपदेश नहीं दिया है । क्योंकि उन्हीं से अब इस उपदेश का शतशः दर्शन होता है । उसमें भी श्रीभूतिराज का पूजाक्रम दूसरा है ऐसा—

पाँच सौ देवियों के आशय का आश्रयण कर भूतिराज के पूर्ववर्त्ती लोगों का..

ऐसा कहने वाले आपके द्वारा ही कहा गया । यदि यहाँ बारह ही देवियाँ पूज्य हैं—आपको ऐसा मान्य है तो पञ्चशतिक का अर्थ भी नहीं जानते । तो जाओ अपने गुरु से पूछो । हमारे बतलाने से क्या ? देवीपञ्चशतिक में भी सोमानन्द से लेकर त्रिकदर्शन के समान ही इनके गुरु है । इसलिये वहाँ भी भूतिराज इनके गुरु नहीं है । यह (= भूतिराज) इनके (अभिवनगुप्त के) गुरु नहीं हैं—ऐसा नही है । जैसा कि कहेंगें—

"अब तत्काल प्रत्ययदायिनी ब्रह्मविद्या का कथन किया जाता है जिसको शिवस्वरूप भूतिराज ने हमें दिया ।"

'एतद्विद्यात्रयं श्रीमद्भूतिराजो न्यरूपयत् ।
यः साक्षादभजच्छ्रीमाञ्छ्रीकण्ठो मानुषीं तनुम् ॥'

इति च, किं त्वत्र नेति निश्चयः, किं च श्रीमदवतारकनाथेन श्रीककारदेवीवत् श्रीमदनिकाश्रीकल्याणिके चानुगृहीते, इत्यपि अतोऽवसितम्, तदेष

'क्रमकुलचतुष्टयाश्रयभेदाभेदोपदेशतो नाथः ।
सप्तदशैव शिष्यानित्थं चक्रे सवंशनिर्वंशान् ॥'

इति नियमो न न्याय्यः—शिष्यद्वयस्यास्यापरिगणनात् अन्यस्यापि कस्यचिच्छिष्यस्य संभाव्यमानत्वात्, एवं

'श्रीकेयूरवतीतः प्रभृति श्रीचक्रभानुशिष्यान्तम् ।
संततयोऽतिनयस्य प्रथिता इह षोडशैवेत्थम् ॥'

इत्यादावपि ज्ञेयम्, तथाहि—अत्र श्रीककारदेव्यास्तस्याः

प्रकृतमहानयशिष्याः प्रथितास्त्रयः सवंशास्तु ।'

इति त्रय एव शिष्याः इति न वाच्यं—श्रीगोविन्दराजश्रीभानुकयोरपि एतच्छिश्यत्वात् नवेरकनाथश्चास्या अपि शिष्यः, यदाहुः—

"इन तीनों विद्याओं का भूतिराज ने निरूपण किया जो साक्षात् श्रीकण्ठनाथ मनुष्य शरीर को धारण किये थे ।"

किन्तु यहाँ नहीं—यह निश्चय है । इसके अतिरिक्त अवतारकनाथ ने ककारदेवी (= केयूरवती) की भँति मदनिका और कल्याणिका को अनुगृहीत किया । यह भी इसी से निश्चित हुआ । तो

"क्रमकुल चतुष्टय के आश्रय के भेदाभेद के उपदेश से श्रीकण्ठनाथ ने इस प्रकार सत्रह सवंश शिष्यों को निर्वंश किया अर्थात् पितृपरम्परा से हटा कर गुरुपरम्परा से जोड़ दिया ।"

यह नियम न्याय्य नही हैं । क्योंकि इन दोनो शिष्यों की परिगणना नही है और अन्य भी कोई शिष्यसम्भावित हो सकता है । ऐसा ही—

"केयूरवती से लेकर चक्रभानु के शिष्य तक इस प्रकार अतिनय की सोलह ही सन्ततियाँ विस्तृत हुई ।"

इत्यादि के विषय में जानना चाहिये । वह इस प्रकार—उस ककार देवी केयूरवती के—

"तीन सवंश प्रस्तुत महाशास्त्र के शिष्य विख्यात हुए ।"

इस वचन के आधार पर तीन ही शिष्य है ऐसा नहीं कहना चाहिये क्योंकि गोविन्दराज और भानुक भी इसके शिष्य हैं और एरकनाथ इसके शिष्य नहीं हैं जैसा कि कहते हैं—

'यस्याः सदा खेचरिदृष्टिरोधात्सार्वात्मिकी भाति निरन्तरोक्ता ।
तामस्मि केयूरवतीं प्रसिद्धां नमामि देवीमनिकेतसंस्थाम् ॥'
'वन्दे ध्वस्तसमस्तभावविभवं श्रीमन्नवेराभिधं
तं यो यत्किरणौघपातविलसत्स्पर्शोदयो जृम्भते ।'

इति, श्रीह्रस्वनाथस्यापि

'श्रीवीरनाथपादैः पञ्च च देवीनये कृताः शिष्याः ।'

इति न पञ्चैव शिष्याः—श्रीभोजराजनाम्नः षष्ठस्यापि संभवात्, तदुक्तं स्वपारम्पर्यं व्याचक्षाणेन श्रीसोमराजेन—

'श्रीमद्वामनभानुः क्रमकमलविकासने चतुरः ।
जयति षडध्वप्रोज्झितपरनभसि निबद्धसंतानः ॥'
'येन ध्वस्तः समस्तो गहनतरमहामोहघोरान्धकारो
दत्तःसम्यक्प्रकाशः क्रमकमलवनोल्लासविश्रान्तिरूपः ।
प्राप्ता येनैव संविन्निरुपमसरसास्वादसंयोगभोगा
वन्दे श्रीभोजराजं गुरुवरमहितं पूज्यमर्हद्भिरन्तः ॥'

इति । एवमत्र अनेकप्रकारमासमञ्जस्यं संभवदपि अनङ्गत्वान्न प्रदर्शितम् ।

"जिसको सदा खेचरी दृष्टि के निरोध से निरन्तर पूर्णता का भान होता रहता है अनिकेतसंस्थिति वाली उस प्रसिद्ध केयूरवती को मैं नमस्कार करता हूँ।"

"जिसका समस्त भाववैभव ध्वस्त हो गया है ऐसे नवेरक नामक (गुरु) को मैं प्रणाम करता हूँ ।

ह्रस्वनाथ के भी—

"वीरनाथ ने देवीशास्त्र में पाँच शिष्यों को बनाया ।"

इसके अनुसार पाँच ही शिष्य नहीं थे । क्योंकि भोजनराज नामक छठें (शिष्य) की भी सम्भावना है । वही बात अपनी परम्परा की व्याख्या करते हुए सोमराज ने कही है—

"षडध्व से रहित पराकाश में निबद्धसन्तान वाले क्रमकमल के विकास में चतुर वामनभानु सर्वोत्कृष्ट हैं ।"

"जिनके द्वारा समस्त गहनतर महामोहान्धकार ध्वस्त कर दिया गया, क्रमकमलवन के उल्लास की विश्रान्ति (चरम सीमा) रूप सम्यक् प्रकाश प्रदान किया गया; जिनके द्वारा निरुपम सरस आस्वाद संयोग के भोगवाली संविद् प्राप्त की गयी, गुरुवर से आदृत, विद्वानों से अन्तःपूजित उस भोजराज की मैं वन्दना करता हूँ ।"

इस प्रकार अनेक रूप का सामञ्जस्य सम्भव होते हुए भी असम्बद्ध होने से

ननु एवं गुरुक्रमेऽप्यस्य कथङ्कारमिदं सङ्गच्छतां, यदत्र—द्वादशैव एता देव्य इति, यतः श्रीमदवतारकनाथस्यापि अत्र त्रयोदशैव विवक्षिताः यः श्रीगोविन्दराजादीनामपि परमगुरुत्वेन स्थितः, यदाह—

'एकं स्वरूपरूपं प्रसारस्थितिविलयभेदतस्त्रिविधम् ।
प्रत्येकमुदयसंस्थितिलयविश्रमतश्चतुर्विधं तदपि ॥
इति वसुपञ्चकसंख्यं विधाय सहजस्वरूपमात्मीयम् ।
'विश्वविवर्तावर्तप्रवर्तकं जयति ते रूपम् ॥'

इति ? सत्यमेतत्—को नामात्र विप्रतिपद्यते, किं तु 'अस्य द्वादशापि अभिप्रेताः' इत्यभिदध्मः, यदधिकारेण श्रीगोविन्दराजादीनामुपदेशः प्रवृत्तो योऽस्मत्पर्यन्तमपि प्राप्तः, यदाह—

'कालस्य कालि देहं विभज्य मुनिपञ्चसंख्यया भिन्नम् ।
स्वस्मिन्विराजमानं तद्रूपं कुर्वती जयसि ॥' इति,

अयमत्रार्थः—त्वमेवमुक्तस्वरूपे भगवति कालि ! परप्रकाशैकस्वभावस्वात्मा विभेदिनो

'भैरवरूपी कालः सृजति जगत्कारणादि कीटान्तम् ।'

इत्याद्युक्त्या विश्वकलनाहेतोः कालस्य रूपम्, एवं उक्तयुक्त्या,

---

नहीं दिखाया गया । प्रश्न—गुरुक्रम में भी इसकी सङ्गति कैसे हो ? क्योंकि यहाँ बारह ही देवियाँ हैं । जो गोविन्दराज आदि के भी परम गुरु थे उन अवतारकनाथ को भी इस विषय में तेरह ही देवियाँ विवक्षित है । जैसा कि कहते हैं—

(हे माता !) एक, स्वरूपरूपवाला और सृष्टि स्थिति संहार भेद से तीन रूप वाला, वह भी प्रत्येक सृष्टि स्थिति संहार और विश्राम भेद से चार प्रकार का (इस तरह ३ × ४ = १२ और एक उनका मूलरूप), इस प्रकार आठ + पाँच (= तेरह) संख्या वाला अपना सहज स्वरूप बनाकर विश्व के विवर्त्त एवं आवर्त्त का प्रवर्त्तक आपका रूप सबसे उत्कृष्ट है ।''?

यह सत्य है इसमें किसको आपत्ति है किन्तु इनको बारह (देवियाँ) भी मान्य हैं—(हम) यह कहते हैं जिसके अधिकार से श्री गोविन्दराज आदि का उपदेश प्रवृत्त हुआ जो हम तक आया । जैसा कि कहते हैं—

''हे कालि ! काल के शरीर का ७ + ५ = बारह संख्या से भिन्न भिन्न बांट कर अपने में विराजमान उस रूप को बनाने वाली (तुम) सर्वोत्कृष्ट हो ।''

यहाँ यह अर्थ है—मुक्तस्वरूप वाली भगवती काली तुम्हीं परप्रकाशैकस्वभाव स्वात्मविभेद वाले

''भैरवरूपीकाल अनन्तनाथ से लेकर कीटपर्यन्त की सृष्टि करता है ।''

मुनिपञ्चसंख्यया द्वादशधा विभज्य—बहिरेवं समुल्लास्य, पुनरपि अतिरिक्तमेव तद्रूपं स्वस्मिन् प्रकाशैकघने रूपे, विराजमानं कुर्वती—दर्पणप्रतिबिम्बवदनतिरिक्ततयैव अवभासयन्ती, जयसि—अतिदुर्घटकारिणैकेनैव अनाख्येन रूपेण सर्वकालं परिस्फुरसीति । नन्वेवमेतत्

'एकं स्वरूपरूपम् ....।'

इत्यादिना विरुद्धयेत्—यत्कथमेकत्रैव परस्याः संविदो द्वादशधोदयमभिधाय त्रयोदशधापि अभिदध्यादिति, तदत्र कर्तृतयावस्थिताया भगवत्या एव त्रयोदशरूपत्वमभिधातव्यं येनानयोरेकवाक्यत्वं स्यात् ? नैतत्—यदेवमभिधित्सितमपि उत्तरवाक्ये चतुर्दशं रूपमापतेत्, यदत्राप्यस्त्येव भगवत्याः कर्तृतयाऽवस्थानमिति, वस्तुतस्त्वेतत् उभयत्रापि विकल्पस्यैव दौरात्म्यं यत् 'राहोः शिरः' इति वदभिन्नमपि वस्तु भेदेनामृशतीति, तस्मात् द्वादशधात्वमेवात्र वक्तुमभिप्रेतं सिद्धपादानाम्—इत्यवगन्तव्यम्, विरोधस्तु उत्थानोपहत एव, यदत्र—'तेन तेन क्रमेण त्वमेव परिस्फुरसि' इत्येवं व्याप्तिपरमेतदभिधानमिति, तथा च—

'सदसद्विभेदसूतेर्दलनपरा कापि सहजसंवित्तिः ।
उदिता त्वमेव भगवति जयसि जयाद्येन रूपेण ॥'

इत्यादि उक्ति के द्वारा विश्वरचना के कारणभूत काल का रूप हो । इस प्रकार उक्त युक्ति से सात पाँच संख्या से बारह प्रकार से विभाग कर = बाहर ऐसा उल्लासित कर, पुनः अतिरिक्त उस रूप को प्रकाशैकघनरूप में विराजमान बनाती हुई = दर्पणप्रतिबिम्ब के समान अभिन्नरूप से अवभासित करती हुई, अति दुर्घटकारी एक ही अनाख्यरूप से सब समय स्फुरित हो रही हो ।

प्रश्न—इस प्रकार तो यह (कथन)

"एक अपना रूप ...."

इत्यादि के साथ विरुद्ध हो रहा है । क्योंकि एक ही जगह परा संविद् का बारह प्रकार का उदय बतलाकर तेरह प्रकार का भी कहते हैं । तो यहाँ कर्त्री रूप में अवस्थित भगवती की ही तेरहरूपता का कथन करना चाहिये जिससे इन दोनों में एकवाक्यता हो जाय ? ऐसा नहीं है । क्योंकि ऐसा कहने के लिये इष्ट भी उत्तर वाक्य में चौदह रूप होने लगेगा क्योंकि यहाँ भी भगवती की कर्त्रीरूप में अवस्थिति है । वस्तुतः दोनों जगह यह विकल्प की ही दुष्टता है कि 'राहु का शिर' इसके समान अभिन्न वस्तु को भी भिन्न के समान कहते हैं । इसलिए यहाँ सिद्ध लोगों को बारह रूप ही कहना इष्ट है ऐसा जानना चाहिये । विरोध तो उठते ही समाप्त हो गया । जो कि यहाँ उस-उस क्रम से तुम्हीं स्फुरित हो रही हो, ऐसा है—यह कथन व्याप्तिपरक है । और भी—

"भगवती ! सत् एवं असत् भेद की उत्पत्ति के नाश में तत्पर कोई (अद्भुत) सहज संवित् (रूप में) उदित तुम जया आदि रूप से स्फुरित हो रही है।"

इत्यादिना श्रीहस्तनयाभ्युदितेन जयाद्येनापि रूपेण त्वमेव परिस्फुरिता—इत्युक्तम्, अत्र पुनराद्यवर्णकलाचतुष्टयात्मना जयाद्येन रूपेणोदिता त्वं जयसि, इति—स्वक्रमांचितं व्याख्यानं युक्तम्, यदागमः—

'अथ ब्रह्म परं शुद्धमादिवर्णत्वमागतम् ।'

इत्याद्युपक्रम्य

'अम्बिकाधस्ततस्तिस्रो युगपच्छक्तयः पुनः ।
ज्येष्ठा रौद्री तथा वामा सुप्तनागेन्द्रसंनिभा ॥
रौद्री शृङ्गाटकाकारा ऋजुरेखा तथा परा ।
इत्येताः कारणं ज्ञेयाः सर्वमाभ्यः प्रवर्तते ॥
परापरपदप्राप्तौ शान्त्याद्याः परिकीर्तिताः ।
शान्तिर्विद्या प्रतिष्ठा च निवृत्तिश्चापरा स्मृता ॥
व्योमपञ्चकमाविष्टाः परमात्मपदास्पदाः ।
ता एवापररूपेण जयाद्या गुह्यशक्तयः ॥

इति, अयं च प्रथममेताभिरेव कामरूपे चरुकप्रधानेनानुगृहीतः इति गुरवः, जयनशीला त्वम्, आद्येन—पूर्वकोटिभाविना रूपेणोदिता जयसि इति तु पापात्पापीयः, एवं

'ऋतुमुनिसंख्यं रूपं विभज्य पञ्चप्रकारमेकैकम् ।

इत्यादि हस्तनय के द्वारा कथित जया आदि रूप से तुम्हीं परिस्फुरित हो—यह कहा गया । यहाँ पुनः आद्यवर्ण कलाचतुष्टयात्मक (= अ, इ उ, ऋ) जया आदि रूप से उदित तुम स्फुरित हो रही हो—ऐसा अपने क्रम के लिये उचित व्याख्यान-युक्त है—

जैसा कि आगम है—

"इसके बाद अम्बिका के नीचे तीन शक्तियाँ ज्येष्ठा रौद्री और वामा हैं । इनमें वामा सुप्त नागेन्द्र (= सिंह या विशाल हाथी या विशाल सर्प) के समान हैं । रौद्री शृङ्गाटक के आकार वाली है । दूसरी सरल रेखा के समान । इन्हें कारण समझना चाहिए । इन्हीं से सब प्रवृत्त होता है । परापर पद की प्राप्ति के लिये शान्ता आदि (= शान्त्यतीता) कही गयी है । शान्ता विद्या प्रतिष्ठा और निवृत्ति पाँच आकाश में आविष्ट (ये) परमात्मपद का स्थान कही गई है । वे ही दूसरे रूप से जया आदि गुह्य शक्तियाँ हैं ।"

और यह पहले इन्हीं के द्वारा कामरूप में चरुकप्रधान के द्वारा अनुगृहीत हुआ—ऐसा गुरुजन कहते हैं । 'जयनशीला तुम आद्य = पूर्वकोटिभावी रूप से उदित होकर स्फुरित होती हो—यह (व्याख्या) रद्दी से रद्दी है ।

"ऋतु और मुनि (६+७=१३) संख्या वाले रूप को एक-एक को पाँच प्रकार

दिव्यौघमुद्गिरन्ती जयति जगत्तारिणी जननी ॥'

इत्यादावपि ज्ञेयम् । तदेवम् एवंविधस्य गुरुक्रमस्य भावात् तात्त्विक एवायमस्योपदेशः इति स्थितम्, तत्रापि च मूलभूतं शास्त्रं स्वविमर्शात्मा युक्तिश्च, इत्युभयमपि समनन्तरमेव प्रदर्शितम्, इत्येवंप्रत्ययात्म अत्र परं निर्बाधं प्रमाणमुज्जृम्भते । ननु एतदस्तु, किं तु श्रीक्रमस्तोत्रमेवं व्याख्यां न सहते, यत्—तत्र संविदस्त्रयोदशधैवोदयो विवक्षितः, यतस्तत्र एकैकां देवीं प्रति एकैकेन श्लोकेन प्रक्रान्तायां स्तुतौ श्रीयमकालीभट्टारिकायाः श्लोकयुगलेन स्तुतौ क इवाशयः, तत् स्वकालीमित्यपास्य भवानीमित्यपपाठ एव, इत्यत्र विवरणकारान्तर-संमत एव पाठ इति ? अत्रोच्यते—इह तावदेकैकां देवीं प्रति एकैकेन श्लोकेन स्तुतिः प्रक्रान्ता—इति केनोक्तं, यत् श्रीरुद्रकालाग्निरुद्रकालीभट्टारिकाया अपि

'या सा जगद् ध्वंसयते समग्रं मृत्योर्वपुर्ग्रासयतीति विष्वक् ।
धामाग्निरूपीयसहस्रदीप्तां तां नौमि कालानलरुद्रकालीम् ॥'

इति द्वितीयेन श्लोकेन स्तुतिः समस्ति, इति श्रीयमकालीभट्टारिकायाः श्लोकयुगलेन स्तुतौ क इवायं संरम्भ इति, अथायमपि भवत्कल्पित एव श्लोकः, इति चेत् नैतत्—श्रीह्रस्वनाथेनापि स्वलिपिविवरणेऽस्य श्लोकस्य

से बाँट कर दिव्यौघ का उद्गिरण करने वाली जगत्तारिणी जननी जयनशील है ।''

इत्यादि के विषय में भी ऐसा जानना चाहिये । तो इस प्रकार के गुरुक्रम के होने से इसका यह उपदेश तात्त्विक ही है—यह निश्चित हो गया । उसमें भी शास्त्र एवं आत्मविमर्श रूपा युक्ति कारण हैं । इसलिये दोनों को पीछे दिखला दिया गया। इस प्रकार ऐसा विश्वासात्मक परम निर्बाध प्रमाण यहाँ प्रस्फुरित हो रहा है ।

प्रश्न—ऐसा हो किन्तु क्रमस्तोत्र इस प्रकार की व्याख्या नहीं मानता कि वहाँ संविद् का तेरह प्रकार का ही उदय विवक्षित है । क्योंकि वहाँ एक-एक देवी के प्रति एक-एक श्लोक से स्तुति प्राप्त होने पर यमकाली की दो श्लोकों से स्तुति होने में क्या आशय है ? तो 'स्वकालीम्' ऐसा छोड़ कर 'भवानीम्' ऐसा पाठ दूषित है । इसलिये यहाँ विवरणकारान्तरसम्मत ही पाठ ठीक है ? इस विषय में कहते हैं—एक-एक देवी की एक-एक श्लोक से स्तुति की गई है—ऐसा किसने कहा ? क्योंकि रुद्रकालाग्निरुद्रकाली की भी—

''जो समस्त जगत् का ध्वंस करती है, मृत्यु के शरीर को भी पूर्णरूप से ग्रसित करती है, सहस्रधामाग्निरूपीय (तेज) से दीप्त उस कालानलरुद्रकाली को प्रणाम करता हूँ ।''

इस द्वितीय श्लोक से स्तुति सम्भव है । फिर यमकाली की दो श्लोकों से स्तुति के विषय में क्यों यह आग्रह है ? यदि (यह कहें कि) यह भी श्लोक आपके द्वारा कल्पित है, तो ऐसा नहीं है क्योंकि ह्रस्वनाथ ने भी अपने लिपि-

दृष्टत्वात्, सर्वेषामेव च विवरणकृतामत्र प्रतिपदं पाठानां श्लोकानां व्यत्यासो दृश्यते, इत्यस्मद्दृष्ट एव पाठे क इवायं प्रद्वेषः, नन्वेवं तर्हि 'अयं पाठः साधुरयमसाधुः' इति विचारः किं नाश्रीयते—यद्य एव समूलः पाठः स एव साधुरितरस्तु इतरथेति, मूलं चात्रोभयत्रापि प्रदर्शितेन क्रमेण समानमुत्पश्यामः—इत्येकतरपरिग्रहे यथास्वं गुरूपदेश एव निबन्धनम् । यथोक्तमस्मत्परमगुरुभिः—

'यो यस्य गुर्वादेशः स तस्य मोचकः ।'

इति, तस्माददृष्टगुरुभिरपरिशीलितशास्त्रसंप्रदायैः स्वविमर्शशून्यैर्देवानांप्रियैर्यत् किञ्चिदत्रोच्यते तदुपेक्ष्यमेव, इत्यलमतिरहस्यप्रकटनमहासाहसेन ॥

किंचात्र कलनमुच्यते ?—इत्याशङ्क्याह—

क्षेपो ज्ञानं च संख्यानं गतिर्नाद इति क्रमात् ॥ १७३ ॥
स्वात्मनो भेदनं क्षेपो भेदितस्याविकल्पनम् ।
ज्ञानं विकल्पः संख्यानमन्यतो व्यतिभेदनात् ॥ १७४ ॥
गतिः स्वरूपारोहित्वं प्रतिबिम्बवदेव यत् ।
नादः स्वात्मपरामर्शशेषता तद्विलोपनात् ॥ १७५ ॥

विवरण में इस श्लोक को देखा है और सभी विवरणकारों का यहाँ श्लोकों के प्रतिपद पाठ का व्यत्यास भी देखा जाता है । फिर हमारे द्वारा देखे गये पाठ में यह द्वेष क्यों है ? प्रश्न—तो इस प्रकार 'यह पाठ साधु है यह असाधु' यह विचार क्यों नही मान लिया जाता कि जो समूल पाठ है वही साधु है दूसरा दूसरे प्रकार का (अर्थात् असाधु) है । और मूल दोनों जगह (हम) प्रदर्शित क्रम से समान देख रहे हैं, तो दोनो में से एक के ग्रहण में गुरु का उपदेश ही निश्चायक (कारण) होगा । जैसा कि हमारे परमगुरु—

"जिसके लिए गुरु का आदेश जो होता है वह उसका मोचन होता है ।"

इसलिये गुरु का दर्शन न करने वाले, शास्त्रसम्प्रदाय के परिशीलन से हीन, आत्मविमर्श से शून्य मूर्खों के द्वारा जो कुछ यहाँ कहा जाता है वह उपेक्ष्य है । अतिरहस्य प्रकट करने का महासाहस आगे नहीं करना चाहिये ॥ १७२॥

यहाँ कलना किसे कहते है ? यह शङ्का कर कहते हैं—

ये पूर्वोक्त कलनायें उस (= परादेवी) का उल्लास हैं जहाँ से क्षेप, ज्ञान संख्यान गति और नाद क्रमशः आविर्भूत होते हैं । अपना भेदन क्षेप है, भेदित का अविकल्पन (= अपने से अभिन्न मानना) ज्ञान है । दूसरे से निश्चित भिन्नता को बतलाना संख्यान है । स्वसंविद् में आरोहण गति है । यह (= आरोहण) प्रतिबिम्ब के समान है । उसका लोप होने से स्वात्मपरामर्शशेषता ही नाद है ॥ -१७३-१७५ ॥

'कल किल बिल क्षेपे' 'कल गतौ' 'कल सख्याने' 'कल शब्दे' इति धातुचतुष्टयस्य पञ्चधायमर्थो—यद्गतिर्ज्ञाने प्राप्तौ च वर्तते इति, एतदेव क्रमेण व्याचष्टे—क्रमादित्यादिना, भेदनमिति—बहिरुल्लासनम्, अविकल्पनमिति—स्वात्माभेदेन परामर्शः भेदितस्यैव प्रमातृप्रमेयादेरर्थस्य परस्परापोहनात् 'इदमिदं नानिदम्, इति प्रतिनियततयावस्थापनात् संख्यानं विकल्पः, गतिश्चात्र गत्युपसर्जना प्राप्तिस्तेन भेदितोऽर्थः—संविल्लक्षणं स्वरूपमारोहति प्राप्नोतीति स्वरूपारोही, तस्य भावस्तत्त्वम्, न चैतत् कट इव देवदत्तस्येत्युक्तं—प्रतिबिम्बवत् इति, प्रतिबिम्बस्य हि तदव्यतिरिक्तत्वेऽपि तद्व्यतिरिक्त्यैवावभासो भवेदिति भावः, स्वात्मपरामर्शशेषतेति नदनमात्ररूपत्वात्, तद्विलोपनादिति—तेषामविकल्पज्ञानादीनां विलोपनात्, अपहस्तनादित्यर्थः, एतद्धि भिन्नस्यैव भवेदिति भावः ॥ १७४-१७५ ॥

एतदेव प्रकृते विश्रमयति—

इति पञ्चविधामेनां कलनां कुर्वती परा ।
देवी काली तथा कालकर्षिणी चेति कथ्यते॥ १७६ ॥

परादेव्या एवैतदर्थानुगमादेवं व्यपदेशः, इत्याशयः ॥ १७६ ॥

'कल किल बिल' क्षेप अर्थ में, 'कल' जाने अर्थ में, 'कल' संख्या अर्थ में, 'कल' शब्द अर्थ में इन चारो धातुओं का यह पाँच प्रकार का अर्थ है—गति, ज्ञान और प्राप्ति अर्थ में है, इसी का 'क्रम से' इत्यादि के द्वारा क्रम से व्याख्यान करते हैं । भेदन = बाहर उल्लास । अविकल्पन = अपने से अभिन्न रूप से परामर्श । भेदित प्रमातृ प्रमेय आदि अर्थ के परस्पर छिपाने से 'यह यह है यह नहीं है' ऐसा निश्चित रूप से अवस्थापन के कारण संख्यान 'विकल्प' कहलाता है। यहाँ 'गति' गति उपसर्जन वाली 'प्राप्ति' है । उससे भेदित अर्थ संविल्लक्षणस्वरूप पर आरोहण करता है = प्राप्त करता है—इसलिए स्वरूपा से ही उसका भाव तत्त्व (= स्वरूपारोहित्व) । यह 'देवदत्त की चटाई के समान' (परस्पर भिन्न) नहीं है—इसलिये कहा गया—प्रतिबिम्बवत् । प्रतिबिम्ब का उससे अनतिरिक्त होने पर भी अतिरिक्त के रूप में अवभास होता है—यह भाव है । स्वात्मपरामर्शशेषता—क्योंकि (यह) नदनमात्ररूप है । उसका लोप होंने से = उन अविकल्पज्ञान आदि का लोप होने से अर्थात् अपहस्तन से । यह भिन्न का ही होता है—यह भाव है ॥१७४॥

इसी को प्रस्तुत में योजित करते हैं—

इस पाँच प्रकार की आकलनरचना को करने वाली परा देवी काली और कालकर्षिणी कही जाती है ॥ १७६ ॥

परादेवी के द्वारा ही इस अर्थ का अनुगम होने से ऐसा व्यवहार है—यह आशय है ॥ १७६ ॥

न केवलमस्या एते एव व्यपदेशा यावदन्येऽपि, इत्याह—

मातृसद्भावसंज्ञास्यास्तेनोक्ता यत्प्रमातृषु ।
एतावदन्तसंवित्तौ प्रमातृत्वं स्फुटीभवेत् ॥ १७७ ॥
वामेश्वरीतिशब्देन प्रोक्तं श्रीनिशिसञ्चरे ।

तेनास्याः—काल्यादिशब्दव्यपदेश्यायाः पराभट्टारिकायाः 'मातृसद्भाव' इति संज्ञोक्ता, यत् एतावदन्तं—द्वादशदेवीपर्यन्तं यथायथमुद्रेकमासादयन्त्यां संवित्तौ, सकलादिषु प्रमातृषु प्रमितिक्रियाकर्तृत्वलक्षणं प्रमातृत्वं स्फुटीभवेत्—स्वतन्त्रस्वप्रकाशपरसंविदेकरूपता स्यात् तन्मातृणां इति, यदुक्तं—

'सद्भावः परमो ह्येष मातृणां परिपठ्यते ।' इति,

श्रीनिशिसञ्चरे इति—श्रीनिशाटने, यदुक्तं तत्र—

'एषा तु कौलिकी विद्या सर्वसिद्धिप्रदायिका ।
सकाशाद्देवदेवस्य निर्याता शक्तिवर्त्मनि ॥
वामेश्वर्यवतारे तु प्रकाशत्वमुपागता ।' इति ॥ १७७ ॥

ननु सृष्ट्यादिरूपोपग्रहेणावभासभेदात् क्रमिकतया वैचित्र्यातिशयादस्याः कथमेकत्वं तात्त्विकं भेवत्, येन 'श्रीकालसङ्कर्षिणीति, श्रीमातृसद्भाव, इत्याद्येकतर

इसके केवल ये ही व्यपदेश नही हैं बल्कि दूसरे भी हैं—यह कहते हैं—

इसकी 'मातृसद्भाव' संज्ञा इसलिये कही गयी कि यह यहाँ तक (= बारह देवियों) की संवित्ति के विषय में प्रमाताओं में मातृभाव उत्पन्न करती है । श्रीनिशाटनशास्त्र में यह वामेश्वरी नाम से कही गयी है ॥ १७७-१७८- ॥

इसलिये इसकी = काली आदि शब्द से व्यपदेश्य पराभट्टारिका की, 'मातृसद्भाव' ऐसी संज्ञा कही गयी है । जो यहाँ तक = द्वाद्रश देवी पर्यन्त, संवित् क्रमशः उद्रेक को प्राप्त करने पर सकल आदि प्रमाताओं में प्रमितिक्रियाकर्तृत्वलक्षण प्रमातृता स्फुट हो जाती है = स्वतन्त्र स्वप्रकाश परसंविदेकरूपता होती है वह माताओं का सद्भाव है । जैसा कि कहा गया है—

"यह माताओं का सद्भाव कहा जाता है ।"

निशिसञ्चरण में = निशाटन में । जैसा कि वहाँ कहा गया—

"यह कौलिकी विद्या सर्बसिद्धि को देने वाली है । यह शक्तिपथ में देवदेव (= शिव) के पास से निकली वामेश्वरी के अवतार के रूप में प्रकाश को प्राप्त हुई" ॥ १७७ ॥

प्रश्न—सृष्टि आदि रूप के ग्रहण से अवभास का भेद होने के कारण क्रमिक रूप से वैचित्र्य के कारण इसका एकत्व कैसे तात्त्विक है जिससे 'कालसङ्कर्षिणी'

एव परामर्शः स्यादिति कथमेतदुक्तम् ?—इत्याशङ्क्याह—

इत्थं द्वादशधा संवित्तिष्ठन्ती विश्वमातृषु ॥ १७८ ॥
एकैवेति न कोऽप्यस्याः क्रमस्य नियमः क्वचित् ।
क्रमाभावान्न युगपत्तदभावात् क्रमोऽपि न ॥ १७९ ॥
क्रमाक्रमकथातीतं संवित्तत्त्वं सुनिर्मलम् ।

इत्थम्—उक्तेन प्रकारेण, परैव संविद्देवी, विश्वमातृष्विति बहुवचनादाद्यर्थो लभ्यते, इति प्रमाणादेरपि आक्षेपात् प्रमातृप्रमाणादिविषयतया द्वादशधात्वेन अवभासमानापि, एकैव—अद्वितीयेत्यर्थः—विश्वात्मत्वेन परिस्फुरन्त्या अप्यस्या न स्वस्वरूपात्प्रच्याव इत्याशयः, अत एवास्या न नियतः कश्चित् क्रमः, येन द्वादशधात्वेनैव परिस्फुरेदिति स्यात्, परस्याः संविदो हि सृष्ट्याद्युपाधिसंभेदेन परिस्फुरणेऽपि

'सकृद्विभातोऽयमात्मा..................।'

इत्यादिनीत्या स्वस्वरूपावभासाविच्छेदात् विद्युदादिवदन्तरान्तरा प्रकाशनायोगात् स्वात्मनि कालावच्छेद एव नास्ति इति को नाम तदात्मभूतस्य क्रमस्याप्यवकाशः, अत एव च नास्या यौगपद्यं, तद्धि स्पर्धाबन्धेन परिस्फुर-

---

'मातृ सद्भाव' इत्यादि एक ही परामर्श होता है यह कैसे कहा गया ? यह शङ्का कर कहते हैं—

इस प्रकार यह संवित् विश्व के प्रमाताओं में बारह प्रकार से विराजमान होते हुए भी एक ही है । इसलिये इसके क्रम का कोई नियम नहीं है । यह भी नहीं है कि क्रम न होने से युगपत् रहती है और ऐसा भी नहीं है कि यौगपद्य के अभाव के कारण क्रम है । यह संवित् तत्त्व क्रम और अक्रम की कथा से परे केवल निर्मलस्वभाव है ॥ -१७८-१८०- ॥

इत्थम् = उक्त प्रकार से, परा ही संविद् देवी, विश्वमाताओं में इस बहुवचन से आदि अर्थ प्राप्त होता है इसलिये प्रमाण आदि का आक्षेप होने से प्रमाता प्रमाण आदि विषय के रूप में बारह प्रकार से अवभासमान भी, एक ही अर्थात् अद्वितीय है । विश्वरूप से परिस्फुरण करने वाली भी इसका अपने स्वरूप से पतन नही होता—यह आशय है । इसीलिये इसका कोई निश्चित क्रम नहीं है जिससे यह बारह रूपों में ही स्फुरण करती है । परा संविद् का सृष्टि आदि उपाधि के भेद से परिस्फुरण होने पर भी

'यह आत्मा एक बार आभासित हुआ तो हुआ ।'

इत्यादि नीति से अपने स्वरूप के अवभास का विच्छेद न होने से विद्युत् आदि की भाँति बीच-बीच में प्रकाश न होने से आत्मा में कालावच्छेद ही नही है फिर तदात्मभूत क्रम का कहाँ अवकाश होगा । और इसीलिये इसका यौगपद्य भी

तोरयःशलाकाकल्पयोर्द्वयोः संभवति, न चैतदपेक्षया अन्यः कश्चित् स्पर्धावानस्ति, इति कस्य नाम युगपद्भावः, अत एवास्याः क्रमाक्रमाभ्यामपि न योगः, तदाह—क्रमाभावादित्यादि, ननु इहावश्यं क्रमाक्रमाभ्यां पदार्थानां योगः संभवेदिति कथमुक्तं 'संवित्तत्त्वं तदतीतम्' ?—इत्याह—सुनिर्मलमिति, अनिर्मल एव हि शून्यादिर्मायाप्रमाता जन्मादिक्रियावभासभेदादवस्थाभेदावभासक्रमेण कालावच्छेदवान् स्वात्मानं पूर्वावस्थाविनाशावभासापेक्षया अतीतोचितेनावभासेन पश्यन् तदतीतत्त्वानुरोधेन वर्तमानतयावभासयति, वर्तमानावभासापेक्षया च परिणामावभासादिरूपं भविष्यदवस्थान्तरं व्यवस्थापयति, स्वसत्ताकालभाविनं च नीलाद्यर्थविशेषं स्वापेक्षया युगपद्भावेनाभिमन्यते, इति तस्यैव क्रमयौगपद्यावभासः, यदुक्तम्—

'सर्वत्राभासभेदो हि भवेत्कालक्रमाकरः ।
विच्छिन्नभासः शून्यादेर्मातुर्भातस्य नो सकृत्॥'

इति ॥ १७८-१७९ ॥

ननु यद्येवं तदस्याः परस्याः संविदः कथं नामावाहनविसर्जनाद्यात्मकत्वात् क्रमानुप्राणिता पूजा भवेत् ?—इत्याशङ्क्याह—

नहीं है । वह तो स्पर्धाबन्ध से परिस्फुरण करने वाले, लौहशलाका के समान दो के बीच संभव है किन्तु (यहाँ) इसको छोड़कर दूसरा कोई स्पर्धावान् है नहीं फिर किसका युगपद्भाव । इसीलिये इसका क्रम और अक्रम से भी सम्बन्ध नही है । वही कहते हैं—क्रमाभाव के कारण इत्यादि ।

प्रश्न—यहाँ क्रम और अक्रम से पदार्थों का योग अवश्य सम्भव है फिर कैसे कहा गया कि संवित्तत्त्व उससे परे है ? इसके उत्तर में कहते हैं—सुनिर्मल, अनिर्मल ही शून्य आदि मायाप्रमाता जन्म आदि क्रिया के अवभास के भेद के कारण अवस्थाभेद के अवभास के क्रम से कालावच्छेद वाला होता हुआ अपने को पूर्व अवस्था के विनाश के अवभास की अपेक्षा से अतीतोचित अवभास से देखता हुआ उस अतीत के अनुरोध से वर्त्तमान रूप में अवभासित करता है । और वर्त्तमान अवभास की अपेक्षा से परिणामावभास आदि रूप भविष्यद् अवस्थान्तर की व्यवस्था करता है और अपने सत्ताकाल में होने वाले नील आदि अर्थविशेष को अपनी अपेक्षा युगपद्भाव से मानता है इसलिये उसी का क्रमयौगपद्यावभास होता है। जैसा कि कहा गया—'सर्वत्र आभास का भेद ही काल के क्रम का आकर अर्थात् मूल कारण है । शून्य प्रमाता के लिये यह विच्छिन्न भास वाला है । जिसको एक बार भान हो गया उसको फिर दुबारा आभास नहीं होता' ॥ १७८-१७९ ॥

प्रश्न—यदि ऐसा है तो इस परा संविद् का आवाहन विसर्जन आदि क्रमानुप्राणित पूजा कैसे होती है?—यहा शङ्का कर कहते हैं—

तदस्याः संविदो देव्या यत्र क्वापि प्रवर्तनम् ॥ १८० ॥
तत्र तादात्म्ययोगेन पूजा पूर्णैव वर्तते ।

यत्र क्वचन संविदवष्टम्भेनावस्थानं नाम मुख्या पूजा, न पुनरावाहनादिरूपेति तात्पर्यार्थः, यथोक्तम्—

'यस्मिन्यस्मिंश्चक्रवरे तत्स्पर्शाह्लादनिर्वृतिः ।
तदवष्टम्भयोगो यः स हि पूजाविधिः स्मृतः ॥'

इति ॥ १८० ॥

ननु 'अमन्त्रका तावत्पूजा न स्यात्' इति सर्वत्रैवोक्तं, मन्त्राश्च यदि संविदोऽतिरिक्ताः तत् 'संविदैकात्म्येनावस्थानं पूजा' इत्युक्तं हीयेत, अनतिरेके च तेषां पृथगुपदेश एव न कार्यः ? इत्याशङ्कागर्भीकारेण प्राप्तावसरं संविच्चक्रोदयानुस्यूतत्वेन अनुजोद्देशोद्दिष्टं मन्त्रवीर्यं प्रकाशयितुमाह—

परामर्शस्वभावत्वादेतस्या यः स्वयं ध्वनिः ॥ १८१ ॥
सदोदितः स एवोक्तः परमं हृदयं महत् ।

यः खलु परावाग्रूपः स्वरसोदितो ध्वनिः—अहंपरामर्शात्मा नादः

'नास्योच्चारयिता कश्चित्प्रतिहन्ता न विद्यते ।

इस संवित् देवी का जहाँ कहीं भी प्रवर्त्तन होता है वहाँ तादात्म्य के कारण पूजा पूर्ण ही हो जाती है ॥ -१८०-१८१- ॥

जहाँ कहीं भी संविद् को स्थिर कर के (अभिन्न रूप में) रहना ही मुख्य पूजा है न कि आवाहन आदि रूप वाली—यह तात्पर्य है । जैसा कि कहा गया है—

'जिस-जिस श्रेष्ठ चक्र में उस (= परमाशक्ति) के स्पर्श के आह्लाद की निर्वृति होती है जो उसके अवष्टम्भ (= अभेद) का योग है वही पूजाविधि मानी गयी है' ॥ १८०-१८१ ॥

प्रश्न—'बिना मन्त्र के पूजा नहीं होती' यह सर्वत्र ही कहा गया है । यदि मन्त्र संविद् से अतिरिक्त है तो संविद् के साथ तादात्म्येन अवस्थान ही पूजा है यह कथन खण्डित होता है और अभिन्न होने पर उनका पृथक् उपदेश ही नहीं करना चाहिये ? इस शङ्का को गर्भ में रखकर संविच्चक्र के उदय से अनुस्यूत अवसर-प्राप्त अनुजोद्देशोद्दिष्ट मन्त्रशक्ति को प्रकाशित करने के लिये कहते है—

परामर्शस्वभाव के कारण इस (= संविद्) की जो स्वयं ध्वनि सदा उठती रहती है वही परम व्यापक तत्त्व कहा गया है ॥ -१८१-१८२- ॥

जो परावाक् रूप स्वभावात् उत्पन्न ध्वनि = अहंपरामर्श रूप नाद है ।

''इसका न कोई उच्चारण करने वाला न रोकने वाला है । प्राणियों के हृदय

स्वयमुच्चरते देवः प्राणिनामुरसि स्थितः ॥'

इत्याद्युक्त्या, स्वयम्—अनन्यापेक्षत्वेन, अत एव सदा—नित्याविरतेन रूपेण, उदितः—उच्चरन्नास्ते, स एवैतस्याः परस्याः संविदः, परमं—सारभूतं, महत्—सर्वदा चाव्यभिचरितस्वरूपत्वाद् व्यापकं, हृदयं—तथ्यं रूपं, सर्वशास्त्रेषूक्तं, यस्मादैश्वर्यात्मा अहंपरामर्श एवास्याः स्वभावो, यन्माहात्म्याद्विश्वात्मना इयं परिस्फुरेत्, यदाहुः—

'चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदिता ।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः ॥
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी ।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ॥' इति ॥ १८१ ॥

न केवलमयहंपरामर्शः शास्त्रे हृदयतयेव उक्तो, यावत् स्पन्दादिरूपतयापि, इत्याह—

हृदये स्वविमर्शोऽसौ द्रावितशेषविश्वकः ॥ १८२ ॥
भावग्रहादिपर्यन्तभावी सामान्यसंज्ञकः ।
स्पन्दः स कथ्यते शास्त्रे स्वात्मन्युच्छलनात्मकः ॥ १८३ ॥

हृदये

में स्थित यह देव स्वयं उच्चरित होता है ।''

इत्यादि उक्ति से स्वयम् = अनन्यापेक्ष होने से, इसलिये सदा = नित्य अविरतरूप से, उदित = उच्चरित होता हुआ वर्त्तमान है । वही इस परा संविद् का परम = सारभूत, महत् = सर्वत्र और सर्वदा अव्यभिचरित होने के कारण व्यापक, हृदय = तथ्यरूप, सब शास्त्रों में कहा गया है । जिस कारण ऐश्वर्यरूप अहंपरामर्श ही इसका स्वभाव है जिसकी महिमा से यह विश्वरूप में परिस्फुरण करती है । जैसा कि कहते हैं—

''प्रत्यवमर्श रूप चैतन्य जो कि परावाक् है स्वभावतः उदित है । यह (उस) परमात्मा का स्वातन्त्र्य और मुख्य ऐश्वर्य है । देशकाल से रहित वह स्फुरत्ता महासत्ता है । तत्त्व होने के कारण यह परमेष्ठी का हृदय कही गयी है'' ॥ १८१-१८२ ॥

यह अहंपरामर्श शास्त्र में केवल हृदय के रूप में ही नहीं वरन् स्पन्द आदि के रूप में भी कहा गया है—यह कहते हैं—

बोध में उत्पन्न अपना विमर्श, जिसमें समस्त विश्व लीन हो जाता है, संसार की रचना से संहार तक रहने वाला 'सामान्य' कहलाता है । शास्त्र मे वह स्वात्मा में उच्छलत्तास्वरूप स्पन्द कहा जाता है ॥ -१८२-१८३ ॥

'हृदये बोधपर्यायः........................।'

इत्युक्त्या बोधे—स्वात्मभूते योऽसौ विमर्शः, स द्रावितं—बहीरूपतया प्रसारितम्, अथ च गालितम्—अन्तःशान्तीकृतमशेषं विश्वं येनासौ, अत एव भावग्रहस्य—विश्वात्मतास्वीकारस्या, आदौ—निर्मित्सावसरे, पर्यन्ते—संजिहीर्षासमये च भवनशीलः, अत एव स्वात्मविकाससङ्कोचमयतयोच्छलत्तारूपः, अत एव विशेषरूपताया अनुल्लासात् प्रशमाच्च सामान्यशब्दवाच्यः स्पन्दशास्त्रादौ 'स्पन्दः' कथ्यते—किंचिच्चलनात्मकोच्छलत्तारूपानुगमात् स्पन्दशब्दाभिधेयतयोच्यते इत्यर्थः ॥ १८२-१८३ ॥

ननु यद्येवं तद्बोधस्य किञ्चिच्चलनेन स्वस्वरूपप्रच्यावान्नित्यताहानिः स्यात्? इत्याशङ्क्याह—

किञ्चिच्चलनमेतावदनन्यस्फुरणं हि यत्।
ऊर्मिरेषा विबोधाब्धेर्न संविदनया विना ॥ १८४ ॥

किञ्चिच्चलनं हि नामैतदुच्यते—यद्बोधस्यानन्यापेक्षं स्फुरणं प्रकाशनं, परतोऽस्य न प्रकाशः अपि तु स्वप्रकाश एवेत्यर्थः, इदमेव हि नामास्य जडेभ्यो वैलक्षण्यं—यत् स्वयमेव तथा तथा प्रकाशते इति, एवमयमहंपरामर्शः स्पन्द-

---

हृदय में—

'हृदय बोध का पर्याय है ...

इस उक्ति से स्वात्मभूत बोध में जो यह विमर्श है वह द्रावित = बाह्य रूप में प्रसारित और गालित = भीतर शान्त, किया गया है समस्त विश्व जिसके द्वारा, यह इसीलिये भावग्रह के = विश्वात्मतास्वीकार के, आदि में = निर्मित्सा के अवसर पर, अन्त में = संजिहीर्षा के समय में भवनशील, अतएव स्वात्मविकास सङ्कोचमय होने के कारण उच्छलत्ता रूप, अतएव विशेषरूपता के अनुल्लास और प्रशम से सामान्यशब्दवाच्य = स्पन्दशास्त्र आदि में 'स्पन्द' कहा जाता है = किंचित् चलनात्मक उच्छलत्ता रूप का अनुगम होने से स्पन्द शब्द के अभिधेय के रूप में कहा जाता है ॥ १८२-१८३ ॥

प्रश्न—यदि ऐसा है तो बोध के कुछ चलने से अपने स्वरूप से च्युत होने के कारण नित्यता नहीं होगी?—यह शङ्का कर कहते हैं—

जो अनन्य स्फुरण है वही किंचिच्चलन है । यह बोधरूपी समुद्र की ऊर्मि है । इसके विना संवित् (का संवित्त्व) नहीं है ॥ १८४ ॥

किंचित्चलन उसे कहते हैं कि बोध का अनन्यापेक्ष स्फुरण = प्रकाशन । इसका दूसरे से प्रकाश नहीं है अपितु यह स्वप्रकाश ही है । यही जड़ों से इसकी विलक्षणता है कि स्वयं उस-उस (= भिन्न-भिन्न) रूप में प्रकाशित होता है । यह

शास्त्रादौ यथा स्पन्दत्वेनोक्तः तथैव श्रीमदूर्मिकीलावूर्मित्वेनापि इत्युक्तम् 'ऊर्मिरेषा विबोधाब्धेः' इति । ननु सर्वेषु शास्त्रेषु अत्रैव कस्माद्भरः ? इत्याशङ्क्याह—'न संविदनया विना' इति, इदमेव हि संविदः संवित्त्वं, यत्—सर्वमामृशतीति, अन्यथा हि अस्यास्तत्तदर्थोपरागेऽपि स्फटिकादिभ्यो वैलक्षण्यं न स्यात्, यदुक्तम्—

'स्वभावमवभासस्य विमर्शं विदुरन्यथा ।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः ॥' इति ।

एवं संविदः शुद्धत्वेऽपि तत्तदर्थोपरक्ततया परिस्फुरणं नाम मुख्यं रूपमित्युक्तं स्यात् ॥ १८४ ॥

ननु कथमेतद्युज्यते ? इत्याशङ्क्य दृष्टान्तयति—

निस्तरङ्गतरङ्गादिवृत्तिरेव हि सिन्धुता ।

एतदेवोपसंहरति—

सारमेतत्समस्तस्य यच्चित्सारं जडं जगत् ॥ १८५ ॥
तदधीनप्रतिष्ठत्वात्तत्सारं हृदयं महत् ।

अहंपरामर्श जिस प्रकार स्पन्दशास्त्र आदि में 'स्पन्द' कहा गया है उसी प्रकार ऊर्मिकील आदि में 'ऊर्मि' कहा गया है—यह विबोधरूपी समुद्र की तरङ्ग है । प्रश्न—सभी शास्त्रों में इसी के ऊपर क्यों बल दिया गया है?—यह शङ्का कर कहते हैं—इसके विना संविद् नहीं है । यही संविद् की संवित्ता है कि (यह) सबका आमर्शन करती है अन्यथा भिन्न-भिन्न पदार्थो का उपराग होने पर भी इसका स्फटिक आदि से वैलक्षण्य नहीं होगा । जैसा कि कहा गया है—

'प्रकाश का स्वभाव ही विमर्श माना गया है । अन्यथा उपरक्त अर्थ से प्रकाश होने पर भी स्फटिक आदि जड़ की भाँति हो जायगा ।'

इस प्रकार संविद् के शुद्ध होने पर भी भिन्न-भिन्न अर्थ से उपरक्त होकर परिस्फुरण इसका मुख्य रूप है—यह कहना चाहिये ॥ १८४ ॥

यह कैसे कहते है?—यह शङ्का कर दृष्टान्त देते हैं—

तरङ्गरहित और तरङ्ग आदि से युक्त होना ही समुद्र का समुद्रत्त्व है ॥ १८५- ॥

इसी का उपसंहार करते है—

यह समस्त जड चेतन जगत् का सार है । क्योंकि (इस जगत् की) प्रतिष्ठा उस (= संवित्) के अधीन है । वही हृदय तथा महत् सार है ॥ -१८५-१८६- ॥

एतद्विमर्शलक्षणं वस्तु, समस्तस्य—चेतनाचेतनात्मनो विश्वस्य, सारं—जीवस्थानीयं, यत:

'संविन्निष्ठा हि विषयव्यवस्थितय: ।'

इत्यादिनीत्या रूपाद्यात्मनो जडस्य जगतस्तावत् संवेद्यत्वान्यथानुपपत्त्या संविदेव प्रतिष्ठास्थानमित्यविवाद:, तस्याश्च चित: समनन्तरोक्तस्वरूपं हृदयमेव स्वात्मचमत्कृतिनिबन्धनत्वात् महत्सारं, यत:—तदधीनमेव अस्या: स्वात्मनि प्रतिष्ठानम्, अन्यथा हि जाड्यमेवापतेत्, इत्युक्तं बहुश: ॥ १८५ ॥

एतदेव प्रमेयान्तरगर्भीकारेणापि उपपादयति—

तथा हि सदिदं ब्रह्ममूलं मायाण्डसंज्ञितम् ॥ १८६ ॥
इच्छाज्ञानक्रियारोहं विना नैव सदुच्यते ।
तच्छक्तित्रितयारोहाद्भैरवीये चिदात्मनि ॥ १८७ ॥
विसृज्यते हि तत्तस्माद्बहिर्वाथ विसृज्यते ।

इदं हि ब्रह्ममूलं ब्रह्माण्डारम्भकम् अर्थाद्गर्भीकृतप्रकृत्यण्डेन मायाण्डेन प्राप्तसंज्ञं मायीयं विश्वं प्रतिभासमानत्वात् सत् विद्यमानमपि

यह विमर्शलक्षणवाली वस्तु समस्त = चेतन अचेतन रूप विश्व का, सार = जीवन है । क्योंकि

'विषय की व्यवस्थायें संविद् में ही रहती है ।'

इत्यादि नीति के द्वारा रूपाद्यात्मक जड़जगत् के संवेद्यत्व की अन्यथा अनुपपत्ति से संविद् ही (उसकी) प्रतिष्ठा का स्थान है—यह (सिद्धान्त) सर्वसम्मत है । और उस चैतन्य का पूर्वोक्तस्वरूप वाला हृदय ही, स्वात्मचमत्कृति के कारण, महत् सार है क्योंकि इसका स्वात्मा में प्रतिष्ठान उसी के अधीन है । अन्यथा जड़ता ही आ जायेगी—यह कई बार कहा जा चुका है ॥ १८५ ॥

इसी को प्रमेयान्तर के गर्भ में रखकर बतलाते हैं—

यह सत् (जगत्) ब्रह्म का कार्य है इसकी मायाण्ड संज्ञा है । इच्छा ज्ञान और क्रिया के अंकुरण के विना यह सत् नहीं कहा जाता । उन तीनों शक्तियों के अंकुरण के द्वारा भैरवीय चित्‌अग्नि में इस संसार की रचना होती है और उससे बाहर यह प्रकट सद्रूपता ही होता है ॥ -१८६-१८८- ॥

ब्रह्म से उत्पन्न ब्रह्माण्ड का आरम्भक अर्थात् गर्भीकृत प्रकृत्यण्ड और मायाण्ड से संज्ञा को प्राप्त यह मायीय विश्व प्रतिभासमान होने के कारण सत् = विद्यमान होते हुए भी—

'प्रतिभातोऽप्यर्थः परामर्शमन्तरेण अप्रतिभात एव प्रमातर्यविश्रान्तेः ॥

इत्याद्युक्तयुक्त्या जिज्ञासादिक्रमेण स्वातन्त्र्यात्मनो विमर्शशक्तेः पल्लवप्रायास्विच्छाज्ञानक्रियासु यावन्नारूढं तावत् तथात्वदार्ढ्याभावान्नैव सदुच्यते, इदमेतदिति व्यवहरणीयतां नैतीत्यर्थः । यतस्तद्विश्वमिच्छादिशक्तित्रयात्मनि विमर्शे लब्धप्ररोहं सत् परप्रमात्रात्मनि भैरवीये रूपे विसृज्यते तत्र विश्रान्तिं यायात्,—इति संहारक्रमः । अथवा सृष्टिक्रमेण—तस्माद्भैरवीयाद्रूपात् तद्विश्वं बहिर्विसृज्यते शक्तित्रयसोपानावरोहक्रमेण कलादिक्षितिपर्यन्तेन स्थूलेन रूपेणावभास्यत इत्यर्थः । अनेन संवित्क्रमानतिवर्तितामभिद्योतयितुं श्रीपराबीजस्यापि उभयथा व्याप्तिगर्भीकारेणोदय उक्तः । तथाहि—'ब्रह्ममूलं सत्' इत्यनेन सकारस्योद्धारः, यदाशयेनागमे

'तृतीयं ब्रह्म सुश्रोणि..............।' (परात्री० १० श्लो०)

इत्याद्युक्तम् । तस्यैव च 'मायाण्डसंज्ञितम्' इत्यनेन व्याप्तेः प्रदर्शनम् । स च स्वरं विनोच्चारयितुं न शक्यः, इति

'अस्मिंश्चतुर्दशे धाम्नि स्फुटीभूतत्रिशक्तिके ।'

इत्याद्युक्तेः इच्छादिनौकारस्योद्धारः, तस्य चेच्छादीनां शक्तित्वात्तदण्डव्याप्तेरपि

'प्रतिभात भी अर्थ परामर्श के विना अप्रतिभात ही है क्योंकि प्रमाता में (इसकी) विश्रान्ति नहीं है ।'

इत्यादि उक्त युक्ति से जिज्ञासादि क्रम से स्वातन्त्र्यात्मक विमर्शशक्ति की पल्लवप्राय इच्छाज्ञानक्रियाओं में जब तक आरूढ़ नहीं होता तब तक तथात्व की दृढ़ता के अभाव के कारण सत् नहीं कहा जाता = यह यह है'—इस प्रकार के व्यवहार को नहीं प्राप्त होता । क्योंकि वह विश्व इच्छा आदि तीन शक्तियों वाले विमर्श में प्ररोह को प्राप्त होकर परप्रमात्रात्मक भैरवीय रूप में विसृष्ट होता है = उसमें विश्रान्त हो जाता है—यह संहार का क्रम है अथवा सृष्टिक्रम से, वह विश्व उस भैरवीयरूप से बाहर विसृष्ट होता है = शक्तित्रयरूप (= इच्छा ज्ञान क्रिया रूप) सोपान पर अवरोह के क्रम से कला से लेकर पृथिवीपर्यन्त स्थूल रूप से अवभासित होता है । इससे संवित्क्रम की अनतिवर्त्तिता को दिखलाने के लिये पराबीज का भी दोनों प्रकार से व्याप्तिगर्भीकार से उदय कहा गया । इस प्रकार—'सत् ब्रह्म से उत्पन्न है' इससे सकार का उद्धार, जिस आशय से आगम में—

'हे सुश्रोणि ! तीसरा ब्रह्म...' (परात्री. १० श्लोक)

इत्यादि कहा गया है । 'मायाण्ड नामक' इसके द्वारा उसी की व्याप्ति का प्रदर्शन किया गया । उसका स्वर के बिना उच्चारण नहीं हो सकता इसलिये—

'तीन शक्तियाँ जहाँ स्फुट हो गई है (उस) चौदहवें धाम में'

प्रदर्शनम् । 'विसृज्यते' इत्यनेन विसर्गस्योद्धारः, तस्यैव च 'भैरवीये चिदात्मनि' इत्यनेन व्याप्तिः । यदुक्तम्—

'सार्णेनाण्डत्रयं व्याप्तं त्रिशूलेन चतुर्थकम्।
सर्वातीतं विसर्गेण पराया व्याप्तिरिष्यते॥' इति ॥ १८७ ॥

एतदेवोपसंहरति—

एवं सद्रूपतैवैषां सतां शक्तित्रयात्मताम् ॥ १८८ ॥
विसर्गः परबोधेन समाक्षिप्यैव वर्तते ।

एवं यथोक्तयुक्त्या, एषां ब्रह्माण्डादीनां, सतां विश्वरूपतया प्रतिभासमानानामेव, सद्रूपता परबोधेन सह शक्तित्रयात्मतां विसर्गं च समाक्षिप्यैव वर्तते, विसर्गोपारोहक्रमेण परप्रमात्रैकात्म्येन प्रस्फुरतीत्यर्थः । अनेन च सकारस्यैव औकारविसर्गक्रोडीकारेणाभिधानात् प्राधान्येनोक्तेः श्रीपराबीजस्य संहारक्रमेणोदयेऽपि सृष्टिप्राधान्यं दर्शितम् । यद्वक्ष्यति—

'................प्राच्यं सृष्टौ च हृन्मतम् ।' इति ॥ १८८ ॥

एवं संवित्क्रमेण श्रीपराबीजस्योदयमभिधाय एतत्समानस्कन्धताभिधित्सया

इत्यादि उक्ति से इच्छा आदि के द्वारा औकार का उद्धार है । इच्छा आदि उसकी शक्ति होने से उस अण्ड की व्याप्ति का भी प्रदर्शन है । 'विसृष्ट होता है' इसके द्वारा विसर्ग का उद्धार है । और उसी की 'भैरवीय चिदात्मा में' इसके द्वारा व्याप्ति है । जैसा कि कहा गया—

'सार्ण (संवर्ण) से तीन अण्ड व्याप्त है, त्रिशूल (औकार) से चौथा (अण्ड व्याप्त है) । सर्वातीत विसर्ग के द्वारा परा शक्ति की व्याप्ति मानी जाती है ॥ १८७ ॥'

इसी का उपसंहार करते हैं—

इस प्रकार इन सद् (ब्रह्माण्ड आदि) की सद्रूपता ही शक्तित्रयात्मता और विसृष्टि को परसंविद् से अभिन्न कर स्फुरित होती है ॥ -१८८-१८९- ॥

इस प्रकार उक्त युक्ति से विश्वरूप में प्रतिभासमान इन सत् ब्रह्माण्ड आदि की सद्रूपता और परबोध के साथ शक्तित्रयात्मता तथा विसर्ग का आक्षेप करके ही वर्त्तमान है । अर्थात् विसर्ग के उपारोह के क्रम से परप्रमाता के साथ तादात्म्य रूप से स्फुरण करता है । इससे सकार का ही, औकार और विसर्ग को अन्तर्हित कर कथन करने से, प्रधानरूप से निर्वचन होने के कारण संहारक्रम से उदय के विषय में भी परा बीज का ही सृष्टिप्राधान्य दिखलाया गया । जैसा कि कहेंगे—

'सृष्टि के विषय में हृदय का मत प्राचीन है' ॥ १८८ ॥

श्रीपिण्डनाथस्यापि उदयमभिधत्ते—

तत्सदेव बहीरूपं प्राग्बोधाग्निविलापितम् ॥ १८९ ॥
अन्तर्नदत्परामर्शशेषीभूतं ततोऽप्यलम् ।
खात्मत्वमेव संप्राप्तं शक्तित्रितयगोचरात् ॥ १९० ॥
वेदनात्मकतामेत्य संहारात्मनि लीयते ।

तत् विश्वं प्राग्बहीरूपतया प्रतिभासमानत्वेन सत् विद्यमानमेव, प्रतिभासमानत्वान्यथानुपपत्त्या बोधः प्रमाणात्मा संकुचितः प्रतिभासः, स एवाग्निः तेन विलापितं बहीरूपताया भस्मसात्कारेण स्वात्ममात्रपरमार्थतामापादितं सत्, अन्तः प्रमात्रैकात्म्येन नदन् इदन्तापरामर्शतिरस्कारेणोल्लसन् योऽसावहंपरामर्शः, तच्छेषीभूतं स्वस्वरूपपरिहारेण तदेकात्मतामापन्नमपि, अनन्तरमलं मानमेयाद्यात्मभेदसंस्कारस्यापि शून्यतापादनेन अत्यर्थं, खात्मत्वमेव संप्राप्तं परप्रमात्रात्मप्रकाशमात्ररूपतया प्रस्फुरितं सत्, क्रमात्क्रमं क्रियादिशक्तित्रयसोपानारोहेण वेदनात्मकतां विदिक्रियाकर्तृत्वात्मकस्वातन्त्र्यशक्तिरूपतामासाद्य, संहारात्मनि

'सर्वसंहारसंहारसंहारमपि संहरेत् ।
सा शक्तिर्देवदेवस्याभिन्नरूपा शिवात्मिका ॥'

संवित् क्रम से पराबीज के उदय को बतलाकर इसकी समानस्कन्धता को बतलाने की इच्छा से पिण्डनाथ के उदय को भी बतलाते हैं—

यह सत् विश्व पहले बाहर उल्लसित होता है फिर बोधरूपी अग्नि में भस्म हो जाता है फिर अन्तर्नाद से परामृष्ट होता है । उसके बाद परामर्शरूप शेष रह जाता है । उसके भी आगे वह शून्यता को प्राप्त हो जाता है। फिर तीनों शक्तियों के योग से वेदनात्मकता को प्राप्त कर संहारस्वरूप में लीन हो जाता है ॥ -१८९-१९१- ॥

वह = विश्व, पहले बाह्यरूप से प्रतिभासमान होने के कारण सत् = विद्यमान ही है । प्रतिभासमानता की अन्यथा अनुपपत्ति से जो प्रमाणात्मक बोध संकुचित प्रतिभास है वही अग्नि है । उसके द्वारा विलापित = बाह्यरूपता के भस्मसात्कार के द्वारा स्वात्ममात्रपरमार्थता को प्राप्त कराया गया, भीतर = प्रमाता के साथ अभिन्नरूप से, नाद करता हुआ = इदन्ता के परामर्श के तिरस्कार के कारण उल्लासित होता हुआ, जो यह अहंपरामर्श, उसका शेषभूत = अपने स्वरूप का परिहार कर उसके साथ एकात्मता को प्राप्त भी, अनन्तः अमल = प्रमाणप्रमेय आदि रूप भेदसंस्कार को भी शून्य बना देने से, स्वात्मता को प्राप्त = पर प्रमात्रात्मक प्रकाशमात्ररूप में स्फुरित होता हुआ, एक क्रम से दूसरे क्रम पर क्रियादि शक्तित्रयरूपी सोपान पर आरोहण के द्वारा वेदनात्मकता को = विदिक्रियाकर्तृत्वात्मक स्वातन्त्र्यशक्तिरूपता को, प्राप्तकर संहारात्मक—

इत्याद्युक्तस्वरूपे श्रीकालसङ्कर्षिणीधाम्नि लीयते तदैकात्म्येन प्रस्फुरतीत्यर्थः । अत्र च संवित्क्रमेणैव श्रीपिण्डनाथस्य व्याप्तिः,—इति तदनुसारेणैव तस्योद्धारः कृतः । तथा च—विश्वेन्धनदाहकत्वात् 'बोधाग्निना' इत्यनेन अग्निबीजस्य प्रमाणात्मनः संकुचितस्यापि बोधस्य मायाप्रमातरि लयः इति, 'नाद' इत्यादिना संहारकुण्डलिन्यात्मकस्यैतद्रूपलिपेः कूटवर्णस्य परप्रमातरि च मायाप्रमातृत्वस्याप्यभावः इति, 'खात्मत्वम्' इत्यादिना व्योमात्मनः, खवर्णस्य परस्यापि प्रमातुरिच्छाद्याः शक्तयः सतत्त्वम् इति, 'शक्तित्रितय' इत्यनेन तदात्मनो योनिबीजस्येच्छादीनां च शक्तीनां स्वातन्त्र्यशक्तौ पिण्डीभावः इति, 'वेदनात्मकताम्' इत्यनेन बिन्दोश्चोद्धारः । एवं च रेफादिबिन्द्वन्तवर्णपञ्चकरूपतया श्रीपञ्चपिण्डनाथोऽयम्—इत्यागमज्ञाः । अन्यत्र पुनरस्य

'शिवनभसि विगलिताक्षः कौण्डिल्युन्मेषविकसितानन्दः ।
प्रज्वलितसकलरन्ध्रः कामिन्या हृदयकुहरमधिरूढः ॥
योगी शून्य इवास्ते तस्य स्वयमेव योगिनीहृदयम् ।
हृदयनभोमण्डलगं समुच्चरत्यनलकोटिशतदीप्तम् ॥'

इत्यादिना भङ्ग्यन्तरेणोदय उक्तः ॥ १९० ॥

'सब संहार के संहार के संहार का भी जो संहरण करती है वह देवाधिदेव की अभिन्नरूप शिवात्मिका शक्ति है ।'

इत्यादि उक्त रूप वाले कालसङ्कर्षिणीधाम में लीन हो जाता है = उससे अभिन्न रूप से स्फुरित होता है । यहाँ = संवित्क्रम से ही पिण्डनाथ की व्याप्ति है—इसलिये उसके अनुसार ही उसका उद्धार किया गया । विश्वरूपी इन्धन का दाहक होने में कारण भूत 'बोधाग्नि के द्वारा' इससे संकुचित प्रमाणात्मक अग्निबीज बोध का माया प्रमाता लय हो जाता है अर्थात् प्रमेय का प्रमाण में और प्रमाण का प्रमाता में लय होता है । 'नाद' इत्यादि के द्वारा संहारकुण्डलिनी रूप इस रूपलिपि वाले कूटवर्ण का और पर प्रमाता में मायाप्रमातृत्व का भी अभाव होता है। 'खात्मता' इत्यादि के द्वारा व्योमात्मक खवर्ण का, परमप्रमाता की इच्छा आदि शक्तियाँ तत्त्व हैं 'शक्तित्रितय' इससे तदात्मक योनिबीज और इच्छा आदि शक्तियों का स्वातन्त्र्यशक्ति में पिण्डीभाव हो जाता है । और 'वेदनात्मकता को' इसके द्वारा बिन्दु का उद्धार होता है । इस प्रकार रेफ से लेकर बिन्दुपर्यन्त पाँच वर्णों के रूप में यह पाँच पिण्ड के नाथ हैं—ऐसा आगमविद् कहते हैं । अन्यत्र इसका हृदय,

'विगलित इन्द्रिय वाला, कुण्डलिनी के उन्मेष से विकसित आनन्दवाला, प्रज्वलित सकल रन्ध्रों वाला, कामिनी के हृदयगुहा में अधिरूढ़ योगी शिवरूपी आकाश में शून्य के समान निवास करता है । हृदय नभोमण्डलगामी, सैकड़ों करोड़ अग्नि के समान दीप्त उसका योगिनीहृदय स्वयं समुच्चरित होता है ।'

इत्यादि के द्वारा दूसरी भंङ्गिमा से कहा गया है ॥ १९०-१९१ ॥

एतदेवोपसंहरति—

इदं संहारहृदयं प्राच्यं सृष्टौ च हृन्मतम् ॥ १९१ ॥

इदमित्यनेन श्रीपिण्डनाथपरामर्शः । अस्य च श्रीपराबीजवत् सृष्टिक्रमेण संभवत्यपि उदये रेफादीनां वर्णानां भेदसंहारकत्वात् तत्प्राधान्येन निर्देशः 'संहारहृदयम्' इति । अत एव श्रीस्तोत्रभट्टारकेऽपि—

'कालानलाद् व्योमकलावसानं चिन्त्यं जगद्ग्रासकलालयेन ।
चक्रं महासंहृतिरूपमुग्रं गतं चिदाकाशपदस्थमित्थम् ॥'

इत्यादिना संहारक्रमेणैव अस्योदय उक्तः । प्राच्यमिति प्रागुपात्तं जीवपराबीजम् । अस्य च संहारक्रमेणोदयेऽपि

'तत एव सकारेऽस्मिन् स्फुटं विश्वं प्रकाशते ।
अमृतं च परं धाम योगिनस्तत्प्रचक्षते ॥'

इत्यादिपूर्वोक्तयुक्त्या विश्वाप्यायकारितया सृष्ट्यात्मनोऽमृतबीजस्य प्राधान्यात् तथा निर्देशः 'सृष्टौ हृत्' इति ॥ १९१ ॥

एतदेवान्यत्रापि अतिदिशति—

इसी का उपसंहार करते हैं—

यह प्राच्य (= पूर्वोपात्त पराबीज) जो कि संहार का हृदय है, सृष्टि के विषय में 'हृदय' माना गया है ॥ -१९१ ॥

'इदम्' इस पद से पिण्डनाथ का परामर्श है । पराबीज के समान सृष्टिक्रम से इसका उदय सम्भव होने पर भी रेफ आदि वर्णों का, भेदसंहारक होने के कारण उसका 'संहारहृदयम्' पद के द्वारा प्रधान रूप में निर्देश किया गया । इसीलिये स्तोत्रभट्टारक में भी—

'जगत् की कालानल से लेकर व्योमकलापर्यन्त ह्रासकला के लय के अनुसार चिन्ता करनी चाहिये । इस प्रकार महासंहाररूप चिदाकाशपदस्थ उग्र चक्र ज्ञात होता है ।'

इत्यादि के द्वारा संहारक्रम से ही इसका उदय कहा गया है । प्राच्य = पहले प्राप्त जीवपराबीज । उसका संहारक्रम से उदय होने पर भी—

'इसी कारण इस सकार में विश्व स्फुटतया प्रकाशित होता है और योगी लोग उसको अमृत परमधाम कहते हैं ।'

इत्यादि पूर्वोक्त युक्ति से विश्व का आप्यायनकारी होने से सृष्ट्यात्मक अमृतबीज (= स) की प्रधानता के कारण उस प्रकार का निर्देश किया गया— 'सृष्टि में हृदय' इत्यादि ॥ १९१ ॥

एतद्रूपपरामर्शमकृत्रिममनाविलम् ।
अहमित्याहुरेषैव प्रकाशस्य प्रकाशता ॥ १९२ ॥
एतद्वीर्यं हि सर्वेषां मन्त्राणां हृदयात्मकम् ।
विनानेन जडास्ते स्युर्जीवा इव विना हृदा ॥ १९३ ॥

एतद्रूपः—श्रीपराबीजादिविषयतया सृष्ट्यादिक्रमेणोदयमानः समनन्तरोक्तस्वभावो यः परामर्शस्तं स्वरसोदितत्वादकृत्रिमम्, अत एवेदन्तापरामर्शप्रतिपक्षभावात्मक-कालुष्याकलङ्कितत्वात् अनाविलम् 'अहमित्याहुः'—अहंपरामर्शात्मत्वेन कथयन्ती-त्यर्थः, अहंपरामर्शोऽपि हि—अनुत्तराद्धान्तं सृष्टिक्रमेण ततोऽपि अनुत्तगन्तं संहारक्रमेणोदेतीति भावः, यदुक्तं प्राक्—

'अनुत्तराद्या प्रसृतिर्हान्ता विश्वस्वरूपिणी।
प्रत्याहृताशेषविश्वानुत्तरे सा विलीयते ॥'

इति, एवं चास्य 'श्रीपराबीजपिण्डनाथाभ्यां समानकक्ष्यत्वम्' इत्युक्तं स्यात्, परस्याः हि संविदोऽनन्तविश्ववैचित्र्यलयोदयरूपतया परिस्फुरणं नाम परमार्थः, स चैषामविशिष्टः, इति किं नाम भिन्नकक्ष्यत्वे निमित्तं स्यात् ? ननु परा संवित् तत्तद्रूपतया किमिति परिस्फुरति ? इत्याशङ्क्योक्तम्—'एषैव प्रकाशस्य प्रकाशता'

इसी का अन्यत्र भी अतिदेश करते हैं—

इस प्रकार का परामर्श जो कि अकृत्रिम और मलरहित है (आचार्यगण उसे) 'अहम्' (परामर्श) कहते हैं । यही प्रकाश की प्रकाशता है । यह सभी मन्त्रों का हृदयस्वरूप बीज है । इसके विना वे (= मन्त्र) जड हो जाते हैं जैसे कि हृदय के विना जीव ॥ १९२-१९३ ॥

इस रूप—पराबीज आदि विषय के रूप में सृष्टि आदि के क्रम से उदीयमान पूर्वोक्त स्वभाववाला जो परामर्श उसको, स्वभावतः उदित होने के कारण अकृत्रिम, इसलिये इदन्तापरामर्श रूप प्रतिपक्ष की भावात्मक कलुषता से कलंकित न होने के कारण स्वच्छ को 'अहम् ऐसा कहते हैं = अहंपरामर्श रूप में कहते हैं । अहंपरामर्श भी अनुत्तर (= अकार) से लेकर 'ह' पर्यन्त सृष्टिक्रम से फिर उस (= ह) से अनुत्तर (= अकार) पर्यन्त संहारक्रम से उदित होता है । जैसा कि पहले कहा गया—

'अनुत्तर से लेकर हकारपर्यन्त विश्वस्वरूपिणी सृष्टि अशेष विश्व का प्रत्याहार करने वाली वह अनुत्तर में विलीन हो जाती है ।'

इस प्रकार इसकी पराबीज और पिण्डनाथ से तुल्यकक्ष्यता है—यह कहा गया है । परासंविद् का अनन्त विश्ववैचित्र्य के लय एवं उदयरूप से परिस्फुरण परमार्थ है और वह इनमें (= मन्त्रों में) समान है फिर भिन्नकक्ष्यता में क्या प्रमाण है ?

प्रश्न—परासंवित् भिन्न-भिन्न रूप में क्यों परिस्फुरण करती है?—यह शङ्का

इति, अन्यथा हि अस्य परस्य प्रकाशस्य जडाद् घटादेर्वैलक्षण्यं न स्यात्, यदुक्तं प्राक्—

'अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः ।
महेश्वरत्वं संवित्त्वं तदत्यक्ष्यद् घटादिवत् ॥ इति ।

ननु मन्त्राणां वीर्यमभिधातुमुपक्रान्तं तत् किमिति अकाण्ड एव परस्याः संविदः स्वरूपमुक्तम् ? इत्याशङ्क्याह—'एतदित्यादि', एतदिति—अहंपरामर्शानुस्यूतं संवित्तत्त्वं, सर्वेषामिति—न केवलं श्रीपराबीजपिण्डनाथयोरेवेति भावः, अनेनेति—अहंपरामर्शात्मना वीर्येण, जडा इति—स्फुरत्ताशून्यत्वादप्रयोजका इत्यर्थः, यदुक्तम्—

'आदिमान्त्यविहीनास्तु मन्त्राः स्युः शरदभ्रवत् ।'

इति ॥ १९२-१९३ ॥

न केवलमनेन वीर्येण मन्त्र एव वीर्यवन्तो, यावत्तदितरदपीत्याह—

अकृत्रिमैतद्धृदयारूढो यत्किञ्चिदाचरेत् ।
प्राण्याद्वा मृशते वापि स सर्वोऽस्य जपो मतः ॥ १९४ ॥

अकृतकाहंपरामर्शविश्रान्तो हि योगी तदनुवेधेन यत्किंचिद्बाह्यव्यवहारयोग्यं

कर कहा गया—यही प्रकाश की प्रकाशता है । अन्यथा इस परप्रकाश का जड़ घट आदि से वैलक्षण्य (= भिन्नत्व) नहीं होगा । जैसा कि पहले कहा गया—

'यदि महेश्वर एकरूप में रहते तो घट आदि के समान महेश्वरत्व और संवित्त्व को छोड़ देते ।'

प्रश्न—मन्त्रों की शक्ति का कथन करने के लिये प्रारम्भ किया फिर अनवसर पर परासंविद् का स्वरूप क्यों कहा गया ?—यह शङ्का कर कहते हैं—'एतत्...' यह = अहंपरामर्श से अनुस्यूत संवित्तत्त्व, सबका न कि केवल पराबीज एवं पिण्डनाथ का वीर्य है । इससे = अहंपरामर्शात्मक वीर्य से । जड़ = स्फुरत्ताशून्य होने से अप्रयोजक । जैसा कि कहा गया—

'प्रथम (= अ) और अन्त्य (= ह) (वर्णों) से विहीन मन्त्र शरत्कालीन बादल के समान (व्यर्थ) हैं ॥ १९२-१९३ ॥'

इस वीर्य से केवल मन्त्र ही वीर्यवान् नहीं है बल्कि दूसरे भी—यह कहते हैं—

इस अकृत्रिम हृदय (= अहंपरामर्श) पर आरूढ़ (साधक) जो कुछ करता है, श्वास लेता है अथवा विचार करता है वह सब इसका जप माना जाता है ॥ १९४ ॥

व्याहरेत् सोऽस्य सर्वो जपः—सर्वमेवास्य स्वात्मदेवताविमर्शानवरतावर्तनात्मत्वेन मन्त्ररूपतया परिस्फुरेदित्यर्थः, यदुक्तम्—

'श्लोकगाथादि यत्किंचिदादिमान्त्ययुतं यतः ।
तस्माद्विदंस्तथा सर्वं मन्त्रत्वेनैव पश्यति ॥'

इति, अत एव 'कथा जप': (शिव०सू० ३-२७)

इत्याद्यन्यत्रोक्तम्, यदभिप्रायेणैव इतो बाह्यैरपि—

'यो जल्पः स जपः ....।'

इत्याद्युक्तम्, अनेन च मन्त्रवीर्यानन्तर्येणानुजोद्देशोद्दिष्टं वास्तवं जपाद्युपक्रान्तम् ॥ १९४ ॥

तत्र जपस्य वास्तवं स्वरूपं तावदुक्तम्, इदानीमादिशब्देन स्वीकृतं वास्तवध्यानाद्यभिधातुमाह—

यदेव स्वेच्छया सृष्टिस्वाभाव्याद् बहिन्तरा ।
निर्मीयते तदेवास्य ध्यानं स्यात्पारमार्थिकम् ॥ १९५ ॥

एवंविधः खलु योगी सृष्ट्यादिपञ्चविधकृत्यकारित्वलक्षणात् स्वभावाद्धेतोः,

---

स्वाभाविक अहंपरामर्श में विश्रान्त योगी उसके अनुवेद्य से बाह्य व्यवहार के योग्य जो कुछ कहता है वह सब इसका जप होता है = इसका सब कुछ कथन स्वात्मदेवता के विमर्श के अनवरत आवर्त्तनात्मक होने से मन्त्र के रूप में परिस्फुरित होता है । जैसा कि कहा गया 'श्लोकगाथा आदि जो कुछ है वह चूँकि आदिम और अन्तिम वर्णों से युक्त है इस कारण वैसा जानता हुआ (योगी) सबके मन्त्र के रूप में देखता है ।'

इसलिये 'कथा जप है' (शि०सू० ३.२७) इत्यादि अन्यत्र कहा गया है । इसी अभिप्राय से इससे बाह्य लोगों के द्वारा भी—

'जो जल्प है वह जप है ...'

इत्यादि कहा गया है । इस मन्त्रवीर्य के आनन्तर्य से अनुजोद्देशोद्दिष्ट वास्तविक जप प्रस्तुत हुआ ॥ १९४ ॥

जप का वास्तविक स्वरूप कहा गया । अब आदि शब्द से स्वीकृत वास्तविक ध्यान आदि का कथन करने के लिये कहते हैं—

(वह योगी) स्वेच्छा से सृष्टि के स्वभाववश बाहर या भीतर से कुछ रचना करता है वही इसका पारमार्थिक ध्यान है ॥ १९५ ॥

इस प्रकार का योगी आदि पाँच प्रकार के कृत्य लक्षण वाले स्वभाव के कारण

यदेव स्वेच्छया बहिरन्तर्वा नीलसुखादि अवभासयति, तदेव नामास्य संविन्मात्ररूपत्वात् पारमार्थिकं ध्यानं, न तु नियतं दशभुजादि अन्यत्किंचिदित्यर्थः ॥ १९५ ॥

ननु यद्येवं तद्दशभुजादि नियताकारं ध्यानादि किमिति उक्तम् ? इत्याशङ्क्याह—

निराकारे हि चिद्धाम्नि विश्वाकृतिमये सति ।
फलार्थिनां काचिदेव ध्येयत्वेनाकृतिः स्थिता॥ १९६ ॥

निराकार इति—नियताकाररहिते, इत्यर्थः ॥ १९६ ॥

ननु विश्वाकृतिचेच्चिद्धाम, तत् कथम् अस्याकारान्तराभासपरिहारेण नियताकारतयाभासः स्यात् ?—इत्याशङ्क्याह—

यथा ह्यभेदात्पूर्णेऽपि भावे जलमुपाहरन् ।
अन्याकृत्यपहानेन घटमर्थयते रसात् ॥ १९७ ॥
तथैव परमेशाननियतिप्रविजृम्भणात् ।
काचिदेवाकृतिः काञ्चित् सूते फलविकल्पनाम्॥ १९८ ॥

यथाहि—अभेदात्—परस्पराविभागेनावभासात्, मृत्त्वकाञ्चनत्वघटत्वादि-

---

स्वेच्छा से बाहर अथवा अन्दर नील सुख आदि जो कुछ अवभासित करता है, संविद्रूप होने के कारण वही इसका पारमार्थिक ध्यान है न कि नियत दशभुजा आदि दूसरे कुछ का ध्यान ध्यान है ॥ १९५ ॥

प्रश्न—यदि ऐसा है तो दशभुजा आदि निश्चित आकार वाला ध्यान आदि क्यों कहा गया ?—यह शङ्का कर कहते हैं—

निराकार चित्धाम जब विश्वाकृतिमय हो जाता है तो फल चाहने वाले लोगों के लिये कोई भी आकृति ध्येय हो जाती है ॥ १९६ ॥

निराकार = निश्चित आकार से रहित ॥ १९६ ॥

प्रश्न—यदि चिद्धाम विश्व आकृति वाला है तो यह आकारान्तर के आभास को छोड़कर निश्चित आकार में क्यों भासित होता है?—यह शङ्का कर कहते हैं—

जिस प्रकार अभेद के कारण भाव के पूर्ण होने पर भी जल लाने वाला व्यक्ति अन्य आकृति (= सुवर्णमयत्व मृत्तिकामयत्व आदि) को छोड़कर आवश्यकता के अनुसार केवल घट की इच्छा करता है उसी प्रकार परमेश्वर की नियति के उल्लासवश कोई एक आकृति किसी एक फल की कल्पना करती है ॥ १९७-१९८ ॥

जैसे अभेद से = परस्पर विभागरहित अवभास से, अवभास के कारण,

भिराभासैः, पूर्णे, अनेकाभाससंभिन्ने घटादौ भावे, जलमुपाहरन्—उदकाहरणात्मनियतार्थक्रियार्थी प्रमाता, काञ्चनत्वाद्याकारान्तराभासमपहाय अर्थितातारतम्यात्मकाद्रसात्, तत्तदर्थक्रियाक्षमं घटमर्थयते—तत्त्वेनास्य अवभासो जायते इत्यर्थः, तथैव विश्वकृतित्त्वेऽपि चिद्धाम्नः पारमेश्वरनियतिशक्तिमाहात्म्यादाकृत्यन्तरपरिहारेण काचिदेवाकृतिः—अर्थात् कस्यचित् एव काञ्चिदेव फलविकल्पनां सूते, इति युक्तमुक्तं 'फलार्थिनां काचिदेवाकृतिः ध्येयत्वेन स्थिता' इति ॥ १९७-१९८ ॥

यस्तु न नियतार्थक्रियार्थी तस्यानवच्छिन्नमेव रूपमवभासते, इत्याह—

यस्तु संपूर्णहृदयो न फलं नाम वाञ्छति ।
तस्य विश्वाकृतिर्देवी सा चावच्छेदवर्जनात् ॥ १९९ ॥

तेन बुभुक्षोर्नियताकारं ध्यानं, मुमुक्षोस्तु अनियताकारमिति विषयविभागः, यद्वक्ष्यति—

'साधकानां बुभुक्षूणां विधिर्नियतियन्त्रितः ।
मुमुक्षूणां तत्त्वविदां स एव तु निरर्गलः ॥' इति ॥ १९९ ॥

एवं ध्यानस्य वास्तवं स्वरूपमभिधाय, मुद्राया अप्यभिधत्ते—

मृदात्व, काँचनत्व घटत्व आदि आभासों से पूर्ण = अनेक आभासों से संभिन्न, घट आदि भाव में जल को लाने वाला = जलाहरणरूप निश्चित अर्थक्रिया वाला प्रमाता, काञ्चनत्व आदि दूसरे आकारों को छोड़कर अर्थी के तारतम्यरूप वासना के कारण तत्तद् अर्थक्रिया में सक्षम घट को चाहता है = उस रूप में इसको अवभास होता है उसी प्रकार चिद्धाम के विश्वाकारात्मक होने पर भी परमेश्वर की नियति शक्ति की महिमा से दूसरी आकृतियों को छोड़कर कोई एक आकृति अर्थात् किसी को कोई फल विकल्पना देती है । इसलिये ठीक कहा गया—कोई एक ही आकृति फलार्थियों के ध्येय के रूप में स्थित होती है ॥ १९७-१९८ ॥

जो नियत अर्थक्रिया को नहीं चाहता उसको अनवच्छिन्न ही रूप भासित होता है—यह कहते हैं—

जो व्यक्ति परिपूर्ण आमर्श वाला होता हुआ किसी फल की इच्छा नहीं करता उसके लिये देवी सम्पूर्ण आकृतिमयी है और वह भी असीम रूप में ॥ १९९ ॥

इसलिये भोगार्थी का ध्यान निश्चित आकार का होता है और मोक्षार्थी का अनियताकार—ऐसा विषय का विभाग है । जैसा कि कहेंगे—

'भोगार्थी साधकों की विधि नियति से नियन्त्रित है और तत्त्ववेत्ता मुमुक्षुओं की वह (= विधि) निरर्गल है' ॥ १९९ ॥

ध्यान के वास्तविक स्वरूप का कथन कर मुद्रा के भी (स्वरूप का) कथन

कुले योगिन उद्रिक्तभैरवीयपरासवात् ।
घूर्णितस्य स्थितिर्देहे मुद्रा या काचिदेव सा ॥ २०० ॥

कुले—शरीरे सत्यपि, प्राप्तपरमेश्वरैकात्म्यस्य योगिनः, अत एव तत्रैव दार्ढ्याद्विस्मृतदेहभावस्य, या काचन—उत्थितत्वादिरूपा, देहे स्थितिः सैव चिच्छक्तिप्रतिकृतिरूपा वास्तवी मुद्रा, न तु नियतकरादिनिर्वर्त्यसंनिवेशादिरूपा इत्यर्थः । यदुक्तम्—

'नादो मन्त्रः स्थितिर्मुद्रा.......................।' इति,

यदभिप्रायेणैवेतो बाह्यैरपि

'.......................मुद्राया काचिदास्थितिः ।'

इत्याद्युक्तम् ॥ २०० ॥

इदानीं होममपि वास्तवेन रूपेणाभिधातुमाह—

अन्तरिन्धनसंभारमनपेक्ष्यैव नित्यशः ।
जाज्वलीत्यखिलाक्षौघप्रसृतोग्रशिखः शिखी ॥ २०१ ॥
बोधाग्नौ तादृशे भावा विशन्तस्तस्य सन्महः ।
उद्रेचयन्तो गच्छन्ति होमकर्मनिमित्तताम् ॥ २०२ ॥

करते हैं—

योगी के कुलअवस्था से युक्त होने पर उद्रिक्त भैरवीय परम सुरा से घूर्णित (उस योगी) की शरीर में जो कोई स्थिति होती है वह मुद्रा है ॥ २०० ॥

कुल = शरीर, के रहने पर भी परमेश्वर के साथ तादात्म्य को प्राप्त, इसीलिये उसी में दृढ़ता के कारण देहभाव के विस्मरण वाले योगी के देह में जो कोई = उत्थितत्व आदि रूप वाली स्थिति होती है वही चित्शक्ति की प्रतिकृतिरूपा वास्तविक मुद्रा है न कि निश्चित कर आदि से बनने योग्य संविनेश आदि रूपा । जैसा कि कहा गया—

'(योगी का) नाद ही मन्त्र है (और उसकी) स्थिति मुद्रा' ।

जिस अभिप्राय से ही इससे बाह्य लोगों के द्वारा भी

'जो कोई स्थिति मुद्रा है—' इत्यादि कहा गया ॥ २०० ॥

अब होम को भी वास्तविक रूप से बतलाने के लिये कहते हैं—

समस्त इन्द्रियसमूह के प्रसार से उग्रशिखा वाला अग्नि प्रतिदिन अन्दर ही अन्दर जलता है । इस प्रकार की बोधरूपी अग्नि में प्रवेश करने वाले

यदुक्तम्—

'सप्तेन्द्रियशिखाजालजटिले जातवेदसि ।
बोधाख्ये भाववर्गस्य भस्मीभावोऽग्नितर्पणम् ॥' इति ।

यदभिप्रायेणैव अस्मद्गुरुभिरपि—

'शश्वद्विश्वमनश्वरप्रकृतयो विश्वस्तचित्ता भृशं
ये विज्ञानतनूनपाति विततोन्मेषा वषट् कुर्वते ।
तेषां संततसर्वमेययजनक्रीडामहायज्वनां
नो मन्येऽवभृथक्षणः क्षणमपि क्षीणस्थितिर्लक्ष्यते ॥'

इत्याद्युक्तम् ॥ २०२ ॥

न केवलमेतत् परस्वरूपावेशकारित्वादात्मन्येवोपयोगि, यावत्परत्रापि, इत्याह—

यं कश्चित्परमेशानशक्तिपातपवित्रितम् ।
पुरोभाव्य स्वयं तिष्ठेदुक्तवद्दीक्षितस्तु सः ॥ २०३ ॥

यं कश्चित्—

सारे भाव उस (= बोधअग्नि) के सत् तेज को और उद्दीप्त करते हुए होमकर्म के कारण बनते हैं ॥ २०१-२०२ ॥

जैसा कि कहा गया है—

'सात इन्द्रियों की शिखा के जाल से जटिल बोध नामक अग्नि में भावसमूह का भस्म हो जाना ही अग्नि का तर्पण (= होम) है ।'

इसी अभिप्राय से हमारे गुरु ने भी—

अनश्वरप्रकृति विश्वस्तचित्त एवं प्रशस्तउन्मेष वाले जो (योगी) विज्ञानरूपी अग्नि में निरन्तर अत्यधिक वषट् करते रहते हैं, निरन्तर समस्त प्रमेय की यागक्रीड़ा को करने वाले महायोगी उन लोगों का अवभृथस्नानमहोत्सव एक क्षण के लिये भी विराम नहीं लेता ।'

इत्यादि कहा है ॥ २०१-२०२ ॥

परस्वरूपावेशकारी होने के कारण यह अपने बारे में ही उपयोगी नहीं है बल्कि दूसरे के बारे में भी है—यह कहते हैं—

परमेश्वर के शक्तिपात से पवित्र हुए जिस किसी व्यक्ति का सामने ध्यान कर जो स्वयं, उक्तवत् (= परमेश्वर के शक्तिपात से दीक्षित जैसा) रहता है वह दीक्षित हो जाता है ॥ २०३ ॥

जिस किसी को—

'न मे प्रियश्चतुर्वेदो मद्भक्तः श्वपचोऽपि वा ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ॥'

इत्याद्युक्तेरनियतं पारमेश्वरेणैव शक्तिपातेन पवित्रीकृतम्, अनुग्राह्यतया अग्रे भावयित्वा, उक्तवत् यथोक्तवास्तवजप्यादिनिष्ठतया, स्वयं—स्वस्वरूप एव तिष्ठेत्, येनासौ दीक्ष्यः—

'......................भुजङ्गवद्गरलसंक्रामः ।'

इत्याद्युक्तया तत्स्वरूपसंक्रमात्

'........................दीपाद्दीपमिवोदितम् ।'

इतिन्यायेन दीक्षितः,—पशुवासनाक्षैण्येन लब्धपरतत्त्वाधिगमो भवेदित्यर्थः ॥ २०३ ॥

नन्वकैकस्मादेव वास्तवाज्जप्यादेः स्वरूपविश्रान्तिः सिद्ध्येत् इति किं जप्यादिभिर्बहुभिरेवमुपदिष्टैः ?—इत्याशङ्क्याह—

जप्यादौ होमपर्यन्ते यद्यप्येकैककर्मणि ।
उदेति रूढिः परमा तथापीत्थं निरूपितम् ॥ २०४ ॥

'मुझे चारों वेदों का पण्डित प्रिय नहीं है । चाण्डाल भी मेरा भक्त है । उसे (ज्ञान) देना चाहिए और उससे (ज्ञान) लेना चाहिये । वह (उसी प्रकार) पूज्य है जैसे कि मैं ।'

इत्यादि उक्ति से अनिश्चित, परमेश्वरशक्तिपात से विचित्र किये गये को अनुग्राह्य होने के कारण आगे करके उक्त के समान = यथोक्त जप्य आदि में संलग्न होकर स्वयं अपने स्वरूप में ही स्थित होता है जिससे यह दीक्ष्य—

'सर्प के समान विष का संक्रमण'

इत्यादि उक्त युक्ति से उस स्वरूप का संक्रमण होने से

'दीप से जलाये गये दीप के समान'

इस न्याय से दीक्षित, पशुवासना के क्षीण होने से परतत्त्व की प्राप्तिवाला हो जाता है ॥ २०३ ॥

प्रश्न—किसी एक वास्तविक जप आदि से स्वरूपविश्रान्ति की प्राप्ति हो जाती है फिर इस प्रकार के उपदिष्ट अनेक जपादि से क्या लाभ ?—यह शङ्का कर कहते हैं—

यद्यपि जप से लेकर होमपर्यन्त एक-एक कर्म में रूढ़ि (= स्वरूपविश्रान्ति) उत्पन्न होती है तो भी (रुचि और पात्रता को ध्यान में रखकर) ऐसा कहा गया ॥ २०४ ॥

इत्थमिति—जप्यादीनां बहुधात्वेन ॥ २०४ ॥

ननु जप्यादीनां बहूनां कस्मान्निरूपणं कृतम्, इति प्रश्निते तदेवोत्तरीकृतम्, इति किमेतत् ?—इत्याशङ्क्याह—

यथाहि तत्र तत्राश्वः समनिम्नोन्नतादिषु ।
चित्रे देशे वाह्यमानो यातीच्छामात्रकल्पिताम् ॥ २०५ ॥
तथा संविद्विचित्राभिः शान्तघोरतरादिभिः ।
भङ्गीभिरभितो द्वैतं त्याजिता भैरवायते ॥ २०६ ॥

यथाहि तत्र तत्र समनिम्नोन्नतादिषु भूभागेषु वाहकेल्यात्मनि कर्कशपांसुलादौ चित्रे देशे कटकमण्डलादिना वाह्यमानोऽश्वो वाहकस्येच्छामात्रकल्पिताम्—इच्छामात्रविधेयतां याति, तथा संविदपि शान्तघोरतरात्मभिः—अघोर-घोर-घोरतरात्मकपरादिशक्तित्रयैकात्म्येन निरूप्यमाणाभिः अत एव विचित्राभिर्जप्यादिभिर्भङ्गीभिरभितः समन्ततः, तत्—द्वैतं त्याजिता, भैरवायते—भेदापहस्तनपूर्वमनुत्तरपरसंविद्रूपतया परिस्फुरतीत्यर्थः ॥ २०५-२०६ ॥

एतदेव हृदयङ्गमीकर्तुं दृष्टान्तान्तरप्रदर्शनेनाप्युपपादयितुमाह—

यथा पुरःस्थे मुकुरे निजं वक्त्रं विभावयन् ।

इस प्रकार = जप आदि के अनेक होने से ॥ २०४ ॥

प्रश्न—जप आदि अनेक का निरूपण क्यों किया—ऐसा प्रश्न होने पर वही उत्तर दिया—ऐसा क्यों ? यह शङ्का कर कहते हैं—

जिस प्रकार (सवार के द्वारा) समतल नीचे ऊँचे आदि तथा (घास, कङ्कड़, पत्थर आदि से भरे) विचित्र देश में दौड़ाया जाने वाला घोड़ा इच्छा मात्र से कल्पित (स्थिति) को प्राप्त करता है उसी प्रकार संवित् भी शान्त घोर घोरतर आदि विचित्र भंगियों के द्वारा सब प्रकार से द्वैतभाव को छोड़कर भैरवरूपता को प्राप्त करती हैं ॥ २०५-२०६ ॥

जिस प्रकार सम नीची ऊँची भूमि पर वाहक के खेलवाले कड़ी धूलवाले देश में सैन्यमण्डल आदि के द्वारा दौड़ाया जाने वाला घोड़ा सवार की इच्छा के अनुसार चलता है उसी प्रकार संविद् भी शान्त घोरतर = अघोर घोर घोरतररूप परा आदि तीन शक्तियों से अभिन्न रूप से निरूप्यमाण इसलिये विचित्र जप्य आदि भंगियों से चारो ओर से द्वैत का त्याग कर भैरवस्वरूप हो जाती है = भेद हटाकर अनुत्तर पर संविद् के रूप में स्फुरण करती है ॥ २०५-२०६ ॥

इसी को हृदयङ्गम करने के लिय दूसरा दृष्टान्त दिखाकर उपपादन करने के लिये कहते हैं—

भूयो भूयस्तदेकात्म वक्त्रं वेत्ति निजात्मनः ॥ २०७ ॥
तथा विकल्पमुकुरे ध्यानपूजार्चनात्मनि ।
आत्मानं भैरवं पश्यन्नचिरात्तन्मयीभवेत् ॥ २०८ ॥

यथाहि कश्चिन्निजं वक्त्रं पुरोवर्तिनि मुकुरे, भूयो भूयो विभावयन्—यत्नेन निरीक्षमाणो, निजात्मनः संबन्धि बिम्बभूतं तद्वक्त्रं तदेकात्म वेत्ति—मामकमेवेदं वक्त्रमिति निश्चयोत्पादात् प्रतिबिम्बाभेदेनैव मन्यते, तथैव पूजाद्यात्मन्यनेकस्मिन् विकल्पमुकुरे बहुशः स्वात्मानं भैरवतया पश्यन्, अचिरेणैव कालेन तन्मयीभवेत्—तदैवैकात्म्यं प्राप्नुयादित्यर्थः ॥ २०७-२०८ ॥

तन्मयीभावो नाम किंस्वरूपः ? इत्याह—

तन्मयीभवनं नाम प्राप्तिः सानुत्तरात्मनि ।

अनुत्तरात्मनि प्राप्त्यापि किं भवेत् ?—इत्याशङ्क्याह—

पूर्णत्वस्य परा काष्ठा सेत्यत्र न फलान्तरम् ॥ २०९ ॥

सा—अनुत्तरात्मनि प्राप्तिः, सर्वतो नैराकाङ्क्ष्यात् 'पूर्णत्वस्य परा काष्ठा'

जिस प्रकार सामने वर्त्तमान दर्पण में अपने मुख को बार-बार देखता हुआ व्यक्ति दर्पण में वर्त्तमान प्रतिबिम्ब मुख को अपने मुख से अभिन्न समझता है उसी प्रकार ध्यान पूजा अर्चन आदि विकल्परूपी दर्पण में अपने को भैरव समझने वाला व्यक्ति शीघ्र ही भैरवमय हो जाता है ॥ २०७-२०८ ॥

जैसे कोई व्यक्ति अपने मुख के सामने स्थित दर्पण में बार-बार यत्नपूर्वक देखता हुआ अपने बिम्बभूत मुख को उस (प्रतिबिम्ब मुख) से अभिन्न समझता है = मेरा ही यह मुख है ऐसा निश्चय उत्पन्न होने से प्रतिबिम्ब से अभिन्न समझता है उसी प्रकार पूजा आदि रूप अनेक विकल्प दर्पण में अपने को भैरव के रूप में अनेक बार देखने वाला शीघ्र ही तन्मय हो जाता है = उससे अभिन्न हो जाता है।

प्रश्न—तन्मयीभाव का क्या स्वरूप है ? = यह कहते हैं—

तन्मयीभाव का अर्थ है—प्राप्ति और वह (भी) अनुत्तर रूप (शिवभाव की) ॥ २०९- ॥

प्रश्न—अनुत्तरात्मा में प्राप्ति से भी क्या होता है ?—यह शङ्का कर कहते हैं—

यह पूर्णत्व की अन्तिम सीमा है । इसके अतिरिक्त और कोई फल (की प्राप्ति शेष) नहीं रहता है ॥ -२०९ ॥

वह = अनुत्तरात्मा में प्राप्ति । सब ओर से निराकाङ्क्ष होने के कारण पूर्णता

इति, नात्र अन्यत् किञ्चित् फलं संभवेत्, नहि अत्र साकाङ्क्षत्वस्य नामाप्यवशिष्यते येन फलान्तरमपि मृग्यं भवेदिति भावः, साकाङ्क्षो हि प्रमाता तत्फलमर्थयमानः प्रथमं तावत्साधनमन्विष्यति, यथोदकाहरणार्थी घटं तत्साधनं च प्राप्य तत्तत्फलमासादयेत्, इति नैराकाङ्क्ष्यस्योत्पादात् औदासीन्यमवलम्बमानः स्वात्मन्येव तिष्ठेत्, किं तु न तत् पूर्णं नैराकाङ्क्ष्यं—क्षणान्तरेणाकाङ्क्षान्तरस्यापि उल्लासात्, अत एव न तत् पारमार्थिकं—साकाङ्क्षत्वेऽपि तस्य तथाकल्पनात्, अतश्च तत्रोत्पन्नेऽपि फले फलान्तरं संभाव्यम्—आकाङ्क्षान्तरस्यापि भावात्, यत्पुनः पारमार्थिकं पूर्णत्वं, तत्र न फलान्तरं संभवेत्—सर्वत एव साकाङ्क्षत्वस्य संक्षयात् ॥ २०९ ॥

तदाह—

फलं सर्वमपूर्णत्वे तत्र तत्र प्रकल्पितम् ।
अकल्पिते हि पूर्णत्वे फलमन्यत्किमुच्यताम् ॥ २१० ॥

पूर्णत्व इति—पूर्णत्वनिमित्तम्, तत्रेति—सर्वस्मिन् फले ॥ २१० ॥

एतदेव सप्रशंसमुपसंहरति—

एष यागविधिः कोऽपि कस्यापि हृदि वर्तते ।

की पराकाष्ठा यहाँ दूसरा कोई फल सम्भव नहीं है । यहाँ साकाङ्क्षता का नाम भी नहीं बचता जिससे कोई दूसरा फल खोजा जाय । साकाङ्क्ष ही प्रमाता उस फल को चाहता हुआ पहले साधन को खोजता है जैसे कि जलानयन चाहने वाला घट और उसके साधन को प्राप्त कर तत्तत् फल को प्राप्त करता है इस प्रकार निराकाङ्क्षा की उत्पत्ति के कारण उदासीन होता हुआ अपने में स्थित होता है किन्तु वह पूर्ण निराकाङ्क्ष नहीं है क्योंकि एक क्षण के बाद दूसरी आकाङ्क्षा भी उठती है । इसलिए वह पारमार्थिक नहीं है क्योंकि साकाङ्क्ष होने पर भी दूसरा उसकी वैसी कल्पना होती है । इसलिए वहाँ फल के उत्पन्न होने पर भी दूसरा फल संभावित है क्योंकि दूसरी आकाङ्क्षा भी है । किन्तु जो पारमार्थिक पूर्णता होती है वहाँ = फलान्तर सम्भव नहीं होता क्योंकि आकाङ्क्षा सब ओर से नष्ट हो गयी होती है ॥ २०९ ॥

वह कहते हैं—

समस्त फल अपूर्णता की अवस्था में होता है । अकल्पित के विषय में स्थान-स्थान पर (फल की) कल्पना की जाती है । पूर्णता होने पर और कौन सा फल (प्राप्त होने को) कहा जाय ॥ २१० ॥

पूर्णता = पूर्णता का कारण । वहाँ = सब फल में ॥ २१० ॥

इसी का प्रशंसा के साथ उपसंहार करते हैं—

यस्य प्रसीदेच्चिच्चक्रं द्रागपश्चिमजन्मनः ॥ २११ ॥

नन्वेवंविधस्य यागविधेरधिगममात्रादेव किं नामानन्यसामान्यत्वमस्य भवेत् यदेवमुक्तम् ?—इत्याशङ्क्याह—

अत्र यागे गतो रूढिं कैवल्यमधिगच्छति ।
लोकैरालोक्यमानो हि देहबन्धविधौ स्थितः ॥ २१२ ॥

अत्र—एवंविधे यागे, लब्धप्ररोहः कश्चिदपश्चिजन्मा देहबन्धविधौ स्थितोऽपि—जीवन्नपि, लोकैः—बद्धात्मभिरन्यैः

'ग्राह्यग्राहकभावो हि सामान्यः सर्वदेहिनाम् ।'

इत्याद्युक्त्या समानकक्ष्यतयैव व्यवहरन्नालोक्यमानः, कैवल्यमधिगच्छति—ग्राह्यग्राहकभावाद्यात्मकभेदापहस्तनेन प्रत्यभिज्ञातशिवस्वभावस्वात्ममात्ररूपतया प्रस्फुरतीत्यर्थः, अयमेव हि समानेऽपि व्यवहारे बद्धमुक्तयोर्विशेषो—यन्मुक्तस्य स्वाङ्गरूपतया भावा अवभासन्ते, बद्धस्य तु स्वरूपतः परस्परतश्चात्यन्तं भेदेनेति, यदुक्तम्—

'मेयं साधारणं मुक्तः स्वात्माभेदेन मन्यते ।

यह अद्‌भुत यागविधि अन्तिम जन्म वाले जिस व्यक्ति के ऊपर चित्-चक्र झट से प्रसन्न होता है ऐसे किसी (पुण्यवान्) के हृदय में सम्पन्न होती है ॥ २११ ॥

प्रश्न—इस प्रकार की यागविधि के जान लेने से ही इसका (= ज्ञाता का) क्या असाधारण हो जाता है जो ऐसा कहा गया?—यह शङ्का कर कहते हैं—

इस याग के विषय में रूढ़ भावना को प्राप्त (पुरुष) यद्यपि सामान्य लोगों के द्वारा देहबन्धन में पड़ा हुआ दीखता है तो भी (वह) कैवल्य को प्राप्त हुआ रहता है ॥ २१२ ॥

यहाँ = इस प्रकार के याग में, उत्थान को प्राप्त होने वाला कोई अन्तिम जीवन वाला देहबन्ध की विधि में स्थित भी = जीवित रहते हुए भी, लोगों के द्वारा = अन्य बद्ध आत्माओं के द्वारा

'ग्राह्यग्राहक भाव सब शरीरधारियों के लिये सामान्य है ।'

इत्यादि उक्ति के अनुसार समान रूप से व्यवहार करता हुआ दिखलाई पड़ने वाला कैवल्य को प्राप्त करता है = ग्राह्यग्राहक भाव रूप भेद को हटाकर प्रत्यभिज्ञात शिवस्वभाव स्वात्ममात्ररूप से स्फुरण करता है । समान व्यवहार होने पर भी बद्ध मुक्त में यही अन्तर है कि सांसारिक भाव समूह मुक्त आत्मा को अपने अङ्ग के रूप में भासित होते हैं और बद्ध को स्वरूपतः और परस्पर अत्यन्त भिन्न । जैसा कि कहा गया है—

महेश्वरो यथा बद्धः पुनरत्यन्तभेदवत् ॥ इति ॥ २१२ ॥

अत एव जीवन्मुक्तविषयतया भगवानपि एवमभ्यधात्, इत्याह—

अत्र नाथः समाचारं पटलेऽष्टादशेऽभ्यधात् ।

अष्टादशे पटले—प्रकृतत्वात् श्रीमालिनीविजयसत्के ॥

अत्रत्यमेव ग्रन्थं पठति—

नात्र शुद्धिर्न चाशुद्धिर्न भक्ष्यादिविचारणम् ॥ २१३ ॥
न द्वैतं नापि चाद्वैतं लिङ्गपूजादिकं न च ।
न चापि तत्परित्यागो निष्परिग्रहतापि वा ॥ २१४ ॥
सपरिग्रहता वापि जटाभस्मादिसंग्रहः ।
तत्त्यागो न व्रतादीनां चरणाचरणं च यत् ॥ २१५ ॥
क्षेत्रादिसंप्रवेशश्च समयादिप्रपालनम् ।
परस्वरूपलिङ्गादि नामगोत्रादिकं च यत् ॥ २१६ ॥
नास्मिन्विधीयते किञ्चिन्न चापि प्रतिषिध्यते।
विहितं सर्वमेवात्र प्रतिषिद्धमथापि च ॥ २१७ ॥
किं त्वेतदत्र देवेशि नियमेन विधीयते ।
तत्त्वे चेतः स्थिरीकार्यं सुप्रसन्नेन योगिना ॥ २१८ ॥

'मुक्तपुरुष मेय को साधारण अर्थात् अपने से अभिन्न मानता है जैसे कि बद्ध महेश्वर (मेय को) अत्यन्त भेदयुक्त' समझता है ॥ २१२ ॥

इसीलिये जीवन्मुक्त विषय की दृष्टि से भगवान् ने भी ऐसा कहा—यह कहते हैं—

परमेश्वर ने इस विषय में (मालिनीविजयतन्त्र के) अठारहवें पटले में विचार प्रकट किया है ॥ २१३- ॥

अठारहवें अध्याय में = प्रस्तुत होने से मालिनीविजय में ॥ २१२-२१३ ॥

वहीं के ग्रन्थ को पढ़ते हैं—

इस (= शैवभाव की अवस्था) में न शुद्धि न अशुद्धि, न भक्ष्याभक्ष्य का विचार, न द्वैत न अद्वैत, न लिङ्ग आदि की पूजा, न उसका परित्याग, न अपरिग्रह न परिग्रह, न जटा भस्म आदि का संग्रह, न उनका त्याग, न व्रत आदि का अनुष्ठान, क्षेत्र आदि में प्रवेश, समय (= नियम) आदि का परिपालन, दूसरा वेष लिङ्ग आदि नाम गोत्र आदि (कुछ करणीय) नहीं रहता । इसमें न तो किसी का विधान किया जाता है न निषेध । इस अवस्था में सब विहित है अथवा सब प्रतिषिद्ध है । हे

तच्च यस्य यथैव स्यात्स तथैव समाचरेत् ।
तत्त्वे निश्चलचिन्मत्तु भुञ्जानो विषयानपि ॥ २१९ ॥
न संस्पृश्येत दोषः स पद्मपत्रमिवाम्भसा ।
विषापहारिमन्त्रादिसंनद्धो भक्षयन्नपि ॥ २२० ॥
विषं न मुह्यते तेन तद्वद्योगी महामतिः ।

अनेन च वास्तवजप्यादिसामनन्तर्येण अनुजोद्देशोद्दिष्टस्य विधिनिषेधतुल्यत्वस्याप्युपक्षेपः कृत् ॥ २१३-२२० ॥

एतच्च बहुक्षोदक्षमत्वेन वैषम्यात् स्वयमेव व्याचष्टे—

अशुद्धं हि कथं नाम देहाद्यं पाञ्चभौतिकम् ॥ २२१ ॥
प्रकाशतातिरिक्ते किं शुद्ध्यशुद्धी हि वस्तुनः ।

यन्नाम हि पाञ्चभौतिकं देहाद्यं

'रूपादिपञ्चवर्गोऽयं विश्वमेतावदेव हि ।'

इत्याद्युक्तयुक्त्या निखिलमेव जगदुदरवर्ति पदार्थजातं, तत् कथमिवाशुद्धम्

देवेशि ! किन्तु इतना विधान अवश्य है कि योगी सुप्रसन्न होकर तत्त्व में चित्त को स्थिर करे । वह (= चित्तस्थिरीकरण) जिसका जिस प्रकार हो उसे वैसे ही करना चाहिये । तत्त्व में चित्त को स्थिर करने वाला विषयों का भोग करता हुआ भी दोषों से उसी प्रकार अस्पृष्ट रहता है जैसे पानी से कमल का पत्ता । जैसे विषहरण करने वाले मन्त्र को सिद्ध करने वाला व्यक्ति विष का भक्षण करने पर भी उससे मूर्च्छित नहीं होता उसी प्रकार महा बुद्धिमान् योगी भी (विषयों का भोग करने पर भी दोष से लिप्त नहीं होता) ॥ -२१३-२२१- ॥

इससे वास्तविक जप्य आदि के समनन्तर अनुजोद्देशोद्दिष्ट विधिनिषेध की तुल्यता का भी उपक्षेप किया गया ॥ २१३-२२० ॥

बहुत विचारसह होने से विषम होने के कारण स्वयं इसकी व्याख्या करते हैं—

पाञ्चभौतिक देह आदि पदार्थ कैसे अशुद्ध हो सकते हैं । प्रकाशता के अतिरिक्त वस्तु की शुद्धि अशुद्धि (नाम की कोई विशेषता) नहीं होती है ॥ -२२१-२२२- ॥

जो यह पाञ्चभौतिक शरीर आदि

'जो रूप आदि यह पाँच वर्ग है, इतना ही यह विश्व है ।'

इत्यादि उक्ति के अनुसार संसार के उदर में वर्त्तमान जो समस्त पदार्थसमूह है

अर्थात् शुद्धं वा, यतः—किं शुद्ध्यशुद्धी प्रकाशतातिरिक्ते बहिः सत्यपि वस्तुनि नीलानीलादिन्यायेन प्रतिभासविकारकारित्वाभावात् वस्तुधर्मतया न भवत इत्यर्थः, अतश्च यस्य यो न धर्मः स तथा न भवेदिति 'इदं शुद्धमिदमशुद्धम्' इति विभागो दुष्येत्, ननु अनुभवापह्नवोऽयं—लोके निर्बाधस्य शुद्ध्यशुद्धिव्यवहारस्य दर्शनात् ? नैतत्—नहि वयं शुद्ध्यशुद्धिव्यवहारमपह्नुमहे, किं तु 'ते वस्तुधर्मतया न भवतः' इत्युच्यते, प्रमाता हि व्यवस्यति—इदं शुद्धमिदमशुद्धमिति, वस्तुधर्मत्वे हि अनयोरशुद्धं न कदाचिदपि शुद्ध्येत् शुद्धमपि वा नाशुद्धं स्यात्, नहि नीलमनीलमपि कदाचिद्भवेत्—स्वभावस्यान्यथाकर्तुमशक्यत्वात्, तथात्वे च

'तैजसानां मणीनां च सर्वस्याश्ममयस्य च ।
भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः ॥'

इत्यादिश्रुतीनां युक्तिबाधितत्त्वं स्यात् ॥ २२१ ॥

एवं प्रमातृधर्मत्वेऽशुद्धं चेद्वस्त्वन्तरेण शोध्यते, तत् किं शुद्धेनाशुद्धेन वा? इत्याह—

अशुद्धस्य च भावस्य शुद्धिः स्यात्तादृशैव किम् ॥ २२२ ॥

वह अशुद्ध अथवा शुद्ध कैसे ? क्योंकि क्या शुद्धि और अशुद्धि प्रकाश से भिन्न है? वस्तु के बाह्य होने पर भी वे नीलानील आदि न्याय (= नील कभी भी अनील नहीं हो सकता इस न्याय) से प्रतिभासविकारकारी न होने के कारण वस्तु के धर्म नहीं हैं । इसलिये जो जिसका धर्म नहीं होता वह वैसा नहीं होता । इस प्रकार 'यह शुद्ध है यह अशुद्ध' ऐसा विभाग दूषित हो जायगा ।

प्रश्न—यह तो अनुभव का अपलाप है क्योंकि लोक में शुद्धि अशुद्धि का व्यवहार निर्बाध दिखलायी देता है ? (उत्तर में कहते हैं—) ऐसा नहीं है । हम शुद्धि अशुद्धि के व्यवहार का अपलाप नहीं करते किन्तु 'वे वस्तु के धर्म नहीं हैं—यह कहते हैं । प्रमाता निश्चित करता है कि यह शुद्ध है यह अशुद्ध । वस्तु का धर्म होने पर इन दोनों में से अशुद्ध न तो कभी शुद्ध होगा और न शुद्ध अशुद्ध । नील कभी अनील नहीं होता क्योंकि स्वभाव को बदला नहीं जा सकता। वैसा होने पर—

'तैजस (= सोने आदि से बने आभूषण आदि) मणियों और पत्थर के बने समस्त पदार्थ की शुद्धि मनीषियों ने भस्म जल और मिट्टी से कही है ।'

इत्यादि श्रुतियाँ युक्तिबाधित हो जायेंगी ॥ २२१ ॥

इस प्रकार प्रमाता का धर्म होने पर यदि अशुद्ध वस्तु दूसरी (वस्तु) से शुद्ध की जाती है तो वह शोधन शुद्ध (वस्तु के द्वारा होता है) या अशुद्ध के द्वारा ? यह कहते हैं—

अन्योन्याश्रयवैयर्थ्यानवस्था इत्थमत्र हि ।

तत्राशुद्धस्य पृथिव्यादेर्भावस्य तादृशेनैवाशुद्धेन जलादिना भावान्तरेण शुद्धिः स्यात्—नैष पक्षो युज्यते इत्यर्थः, अत्र हि इत्थं—वक्ष्यमाणेन प्रकारेण अन्योन्याश्रयतादिदूषणजालमापतेत् ॥ २२२ ॥

तदाह—

पृथिवी जलतः शुद्ध्येज्जलं धरणितस्तथा ॥ २२३ ॥
अन्योन्याश्रयता सेयमशुद्धत्वेऽप्ययं क्रमः ।
अशुद्धाज्जलतः शुद्ध्येद्धरेति व्यर्थता भवेत् ॥ २२४ ॥
वायुतो वारिणो वायोस्तेजसस्तस्य वान्यतः ।

अशुद्धादेव हि जलादेरशुद्धस्य पृथिव्यादेः शुद्धावुभयोरविशेषात् परस्परमपि स्यात्—इतीदमन्योन्याश्रयत्वम्, एवमशुद्धस्यापि अशुद्धेनैवाशुद्धिश्चेत् क्रियते तदुभयोरप्यविशेषात् अन्योन्याश्रयत्वम् इत्युक्तम् 'अशुद्धत्वेऽप्ययं क्रम' इति, एवं वैयर्थ्याद्यपि योज्यम्, अथाशुद्धस्य पृथिव्यादेरशुद्धादेव जलादेः शुद्धिः तत्तस्या-शुद्धत्वाविशेषात् स्वयमेवास्तु, किमन्येनापि अशुद्धेन जलादिना—इति वैयर्थ्यम्,

---

अशुद्ध पदार्थ की वैसे (= अशुद्ध पदार्थ) से शुद्धि क्या है ? इस प्रकार तो अन्योऽन्याश्रय, वैय्यर्थ्य और अनवस्था दोष आ जाता है ॥ -२२२-२२३- ॥

अशुद्ध पृथिव्यादि पदार्थ की उसी प्रकार के अशुद्ध जल आदि पदार्थान्तर से शुद्धि होती है—यह पक्ष ठीक नही है । यहाँ ऐसा = वक्ष्यमाण प्रकार से, अन्योऽन्याश्रय दोष आने लगेगा ॥ २२२ ॥

वह कहते हैं—

पृथिवी जल से शुद्ध होती है उसी प्रकार जल पृथ्वी से शुद्ध होता है। यह तो अन्योऽन्याश्रयता दोष हुआ । अशुद्धता में भी यही क्रम है । अशुद्ध जल से धरा शुद्ध होती है—यह व्यर्थ है । उसी प्रकार वायु से जल की तेज से वायु की अथवा उस (= तेज) की अन्य से शुद्धि व्यर्थ है ॥ -२२३-२२५- ॥

अशुद्ध जल से अशुद्ध पृथिवी आदि की शुद्धि होने पर दोनों के समान होने से (शुद्धत्वं) भी परस्पर होगा—यह अन्योऽन्याश्रय है । इसी प्रकार अशुद्ध की अशुद्ध से ही अशुद्धि की जाती है तो दोनों के समान होने से अन्योऽन्याश्रय होता है - कहा गया—अशुद्धि में भी यह क्रम है । इसी प्रकार व्यर्थता आदि समझनी चाहिये । यदि अशुद्ध पृथिवी आदि की अशुद्ध ही जल आदि से शुद्धि होती है तो उसकी अशुद्धि समान होने से (अशुद्धि) स्वयं ही रहे अन्य अशुद्ध जल आदि से

अथ पृथिवी जलाच्छुद्धयेत्, जलमपि वायोः, सोऽपि तेजसः, तदप्यन्यस्मादाकाशादेः, तदप्यन्यतः—इत्यनवस्थानम्, एवमशुद्धस्य पृथिव्यादेर्भावस्य अशुद्धादन्यतो जलादेः शुद्धिर्वा न घटते, इत्युक्तं स्यात् ॥ २२३-२२४ ॥

एवं तर्हि अन्यस्माच्छुद्धादेव शुद्धिः स्यात्, इत्याह—

बहुरूपादिका मन्त्राः पावनात्तेषु शुद्धता ॥ २२५ ॥

पावनादिति—अर्थात् स्वभावतः ॥ २२५ ॥

नन्वाकाशादिभूतपञ्चकगुणभूतशब्दात्मका मन्त्रा यदि स्वभावत एव शुद्धाः, तत् किमिति स्वयमेव पृथिव्यादयोऽपि स्वभावत एव शुद्धा न स्युः ? इत्याह—

मन्त्राः स्वभावतः शुद्धा यदि तेऽपि न किं तथा ।

ननु मन्त्राणां पावनत्वे शिवात्मतालक्षणं निमित्तान्तरमस्ति ? इत्याशङ्क्याह—

शिवात्मता तेषु शुद्धिर्यदि तत्रापि सा न किम् ॥ २२६ ॥

ननु यदि नाम मन्त्राणां शिवात्मता पावनत्वे निमित्तं तत् तत्रापि भूतपञ्चके

क्या—यही व्यर्थता है । यदि पृथ्वी जल से शुद्ध होती है, जल वायु से, वह तेज से और वह भी अन्य आकाश आदि से, वह भी दूसरे से—तो इस प्रकार अनवस्था होती है । इस प्रकार अशुद्ध पृथिवी आदि भाव की अशुद्ध अन्य जल आदि से शुद्धि घटित नहीं होती—यह कहना चाहिये था ॥ २२३-२२४ ॥

तो अन्य शुद्ध से ही शुद्धि हो—यह कहते हैं—

मन्त्र अनेक प्रकार के होते हैं स्वभावतः पवित्र होने के कारण उनमें शुद्धता रहती है ॥ -२२५ ॥

पवित्र होने से—अर्थात् स्वभावतः पवित्र होने से ॥ २२५ ॥

प्रश्न—यदि आकाश आदि पाँच भूतों के गुणभूत शब्द वाले मन्त्र स्वभावतः ही शुद्ध हैं तो पृथिवी आदि भी स्वभावतः ही क्यों नहीं शुद्ध हैं ?—यह कहते हैं—

प्रश्न है कि यदि मन्त्र स्वभावतः शुद्ध हैं तो वे (पृथिवी आदिभूत) भी स्वभावतः क्यों नहीं शुद्ध होते ? ॥ २२६- ॥

प्रश्न—मन्त्रों की पवित्रता में शिवात्मता लक्षण वाला कारणान्तर है ?—यह शङ्का कर कहते हैं—

यदि उन (मन्त्रों) में शिवात्मता शुद्धि है तो क्या वहाँ (= पृथिव्यादि में) वह (= शिवात्मता) नहीं हैं ॥ -२२६ ॥

यदि पवित्रता के विषय में मन्त्रों की शिवात्मता कारण है तो उन पाँच भूतों में

सा न किं भवेत्, शिवात्मता हि प्रकाशरूपत्वमुच्यते, तेन विना च न किंचिदपि स्फुरति, इति प्रकाशमानत्वान्यथानुपपत्त्या अस्त्येवैषां तदात्मत्वम् ॥ २२६ ॥

अथ समानेऽपि शिवात्मत्वे मन्त्राणां मननत्राणधर्मकतया तथात्वेन परिज्ञानमस्ति, न धरादीनाम्, इति तद्वैलक्षण्येन मन्त्राणामेव शुद्धत्वमिति मतम्, इत्याह—

शिवात्मत्वापरिज्ञानं न मन्त्रेषु धरादिवत् ।
ते तेन शुद्धा इति चेत्तज्ज्ञप्तिस्तर्हि शुद्धता ॥ २२७ ॥

एवं तर्हि शिवात्मत्वेन ज्ञप्तिर्नाम शुद्धतोच्यते, इत्याह—'तज्ज्ञप्तिः' इति ॥ २२७ ॥

सा च धरादिष्वपि समाना—इत्याह—

योगिनं प्रति सा चास्ति भावेष्विति विशुद्धता।

पशुप्रायाणां हि मन्त्रेष्वपि शिवात्मत्वेन परिज्ञानं नास्ति,—इति तान् प्रति तेषां स्वकार्यकारित्वाभावात् संभावनीयमपि अशुद्धत्वम् । धरादीनां च योगिनं प्रति तत्परिज्ञानमस्ति,—इति तेषामपि विशुद्धत्वम् । एतदेव हि नाम योगिनो योगित्वं

भी वह क्यों नहीं होती । शिवात्मता प्रकाशरूपता को कहते हैं । उसके विना किसी का स्फुरण नहीं होता । इसलिये प्रकाशमानता की अन्यथा अनुपपत्ति से इनकी तदात्मता है ही ॥ २२६ ॥

प्रश्न—शिवात्मता समान रहने पर भी मन्त्रों के मनन त्राणधर्म वाला होने के कारण उस रूप में परिज्ञान है किन्तु पृथिवी आदि का नहीं है । इस विलक्षणता के कारण मन्त्रों की ही शुद्धता है—यह कहते हैं—

जिस प्रकार पृथिवी आदि में शिवात्मत्व का परिज्ञान है उस प्रकार मन्त्रों में नहीं है । वे (= मन्त्र) यदि उस (शिवात्मता) के ज्ञान, के कारण शुद्ध हैं तो ज्ञप्ति ही शुद्धता है ॥ २२७ ॥

तो शिवात्म रूप में ज्ञान ही शुद्धता कही जाती है इसलिए कहते हैं—वह ज्ञान ॥ २२७ ॥

और वह पृथिवी आदि में भी समान है—यह कहते हैं—

और योगी के लिये भावों (= पृथिव्यादि) में भी वह (= शिवात्मक ज्ञान) है इसलिये (उनके लिये) भावों में शुद्धता है ॥ २२८- ॥

पशुप्रायः लोगों का मन्त्रों के विषय में भी शिवात्मरूप से ज्ञान नहीं है इसलिये उनके प्रति उनके स्वकार्यकारी न होने से अशुद्धि की सम्भावना हो सकती है लेकिन पृथिवी आदि का योगियों को ज्ञान है इसलिये वे शुद्ध हैं । योगी का

यत् निखिलमिदं विश्वं शिवात्मतया परिजानाति इति । यथोक्तम्—

'यः पुनः सर्वतत्त्वानि वेत्त्येतानि यथार्थतः।
स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः ॥' इति ।

अतश्च यथोक्तयुक्तिबलाद्भावानां स्वात्मनि शुद्ध्यशुद्धिविभागो न सिद्ध्येत्—इत्युक्तं स्यात् ॥

ननु केनोक्तं यद्भावानां युक्तिबलेन शुद्ध्यशुद्धिविभाग—इति, स हि शास्त्रेण व्यवस्थाप्यते, इत्याह—

ननु चोदनया शुद्ध्यशुद्ध्यादिकविनिश्चयः ॥ २२८ ॥

चोदना विधायकं वाक्यम्, यदाहुः—

'चोदनेति क्रियायाः प्रवर्तकं वचनम् ।' इति ।

तया यच्छुद्धतया विहितं तच्छुद्धम्, अन्यथा त्वन्यत् । यत् स्मृतिः—

'ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः।
यान्यधःस्थान्यमेध्यानि देहाच्चैव मलाश्च्युताः ॥' इति ।

आदि ग्रहणेन भक्ष्याभक्ष्यादि ॥ २२८ ॥

योग यही है कि वह समस्त विश्व को शिवरूप में जानता है । जैसा कि कहा गया है—

'जो इन समस्त तत्त्वों को यथार्थ रूप से जानता है वह गुरु मेरे समान मन्त्रवीर्य का प्रकाशक कहा गया है ।'

इसलिये उक्तयुक्ति के बल से पदार्थों का अपने में शुद्धि-अशुद्धि का विभाग सिद्ध नहीं होता—यह कहना चाहिये ॥ २२८ ॥

प्रश्न—कौन कहता है कि पदार्थों की शुद्धि-अशुद्धि का विभाग युक्ति के बल से है । वह तो शास्त्र से व्यवस्थापित होता है—यह कहते हैं—

प्रश्न है कि शुद्धि अशुद्धि आदि का निश्चय तो विधिवाक्य से होता है (न कि तन्त्र अर्थात् युक्ति या तर्क से) ? ॥ -२२८ ॥

चोदना = विधायक वाक्य । जैसा कि कहते हैं—

'चोदना क्रिया में प्रवृत्ति कराने वाला वचन है ।'

उस (चोदना) के द्वारा जो शुद्ध कहा गया वह शुद्ध और नहीं तो दूसरा (अर्थात् अशुद्ध)। जैसा कि स्मृति कहती है—

'नाभि के ऊपर जितने छिद्र हैं वे सम्पूर्णतया शुद्ध हैं । जो नीचे हैं वे अशुद्ध। क्योंकि मल शरीर से गिरते हैं ।'

ननु यदि नाम शुद्ध्यशुद्धिविभागे चोदनैव निमित्तं, तदस्तु को दोषः, किंतु तदविभागेऽपि एषा शिवोदिता चोदनैव निमित्तं 'नात्र शुद्धिर्न चाशुद्धिः' इति, तदाह—

इत्थमस्तु तथाप्येषा चोदनैव शिवोदिता ।

नन्वेवमुभयोरपि चोदनात्वाविशेषे का नाम तावत् प्रमाणभूता भवेत्, यदाश्रयणेन शुद्ध्यशुद्ध्यादिविनिश्चयं विधास्यामः ? इत्याशङ्क्याह—

का स्यात्सतीति चेदेतदन्यत्र प्रवितानितम् ॥ २२९ ॥

अन्यत्रेति, इह पुनर्ग्रन्थविस्तरभयात्र प्रवितानितमिति भावः । इह खलु समयोपस्कृतस्य शब्दस्यार्थावबोधमात्रे स्वातन्त्र्यम्, अर्थतथात्वेतरपरिनिश्चये पुरुषमुखप्रेक्षित्वात् पारतन्त्र्यमपरिहार्यम्; तेनाप्तोक्तत्वादेव असौ प्रमाणीभवति, अन्यथा पुनरप्रमाणमेव,—इति निश्चयः । ततश्च वैदिक्यामस्यां वा चोदनायां साक्षात्कृतनिखिलधर्मा सकलजगदुद्दिधीर्षापर एक एव परमेश्वरः प्रामाण्यनिबन्धनं, तदुपदिष्टत्वात् सर्वशास्त्रणाम् । न च वैदिक्यां चोदनायामकर्तृत्वं वक्तुं (शक्यं), रचनावत्त्वात्, सर्वरचनानां कर्तृपूर्वकत्वात्; अतश्चोभयोरपि चोदनयोः सत्त्वम-

---

आदि ग्रहण से भक्ष्याभक्ष्य आदि को समझना चाहिए ॥ २२८ ॥

प्रश्न—यदि शुद्धि अशुद्धि के विभाग में चोदना ही कारण है तो रहे क्या हर्ज है । किन्तु उनके अविभाग में भी चोदना ही कारण है—'यहाँ न कोई शुद्धि है न अशुद्धि ।' यह कहते हैं—

उत्तर—यह ठीक है फिर भी यह विधिवाक्य भी शिवोक्त ही हैं ॥ २२९- ॥

प्रश्न—दोनों (विधिवाक्यों) में चोदना के समान होने से कौन प्रमाण है जिसके आधार पर शुद्धि अशुद्धि-आदि का निश्चय करे?—यह शङ्का कर कहते हैं—

(वैदिक एवं तान्त्रिक दोनों प्रकार के विधिवाक्यों में) कौन समीचीन है, यदि यह प्रश्न पूछा जाय तो इसका उत्तर अन्यत्र दिया गया है ॥-२२९ ॥

अन्यत्र = यहाँ ग्रन्थविस्तार के भय से नहीं कहा गया । समय से प्राप्त शब्द अर्थबोध में स्वतन्त्र है किन्तु अर्थान्तर के निश्चय में पुरुषमुखप्रेक्षी होने के कारण पारतन्त्र्य अनिवार्य है । इसलिये आप्तपुरुष से कथित होने के कारण ही यह प्रमाण होता है अन्यथा अप्रमाण ही है—यह निश्चय है । इस कारण वेदवाली अथवा इस (= तान्त्रिकी) चोदना में समस्त धर्म का साक्षात्कार करने वाले समस्त संसार का उद्धार करने में तत्पर एक परमेश्वर ही प्रमाण का कारण है । क्योंकि समस्त शास्त्र उनके द्वारा उपदिष्ट हैं । वैदिकी चोदना कर्तृत्वविहीन है—ऐसा नहीं कह सकते क्योंकि (वह भी) रचना है और सभी रचनायें कर्तृपूर्वक होती हैं । इसलिये दोनों

विशिष्टम्,—इति किमाश्रयणेन तावच्छुद्ध्यादिविवेकं कुर्मः,—इति न जानीमः ।

न च अनयोः परस्परं बाध्यबाधकभावो युक्तः तुल्यबलत्वात्, एकतरत्र च दौर्बल्यनिमित्तानुलम्भात् । ननु अस्त्येव एकतरत्र दौर्बल्यनिमित्तं यद्वेदबाह्यत्वं नाम श्रुत्यन्तराणाम्, यदाहुः—

'वेदवर्त्मानुवर्ती च प्रायेण सकलो जनः ।
वेदबाह्यस्तु यः कश्चिदागमो वञ्चनैव सा ।' इति ।

अतश्च वेदकर्तृक एवागमान्तराणां बोधः—इति तदाश्रयेणैव युक्तः शुद्ध्यादिविभागः ॥ २२९ ॥

ननु यद्येवं तदितो बाह्यत्वाद्वैदिकीनां चोदनानामनयापि बाधः किं न भवेत् समानन्यायत्वात्, नहि एकतरत्र बलवत् किञ्चित्कारणमुत्पश्यामो, येन अन्यत्र नियमेन बाधः स्यात् ? तदाह—

वैदिक्या बाधितेयं चेद्विपरीतं न किं भवेत् ।

ननु यद्येवं तत्परस्परव्याहतत्वादुभयमपीदमप्रमाणम्,—इति न किञ्चित्

चोदनाओं का सत्त्व समान है । तो फिर किस के आधार पर शुद्धि आदि का भेद करें—यह (हम) नहीं जानते ।

इन दोनों (= वैदिकी एवं तान्त्रिकी चोदनाओं) में बाध्यबाधक भाव भी ठीक नहीं है क्योंकि दोनों समान बलवाली हैं और एकत्र कहीं दुर्बलता का कारण उपलब्ध नहीं होता । प्रश्न—एक ओर दुर्बलता का कारण है कि दूसरी श्रुतियाँ वेदबाह्य हैं । जैसा कि कहते हैं—

'प्रायः सभी लोग वैदिक मार्ग का अनुसरण करने वाले हैं । जो कोई आगम वेद से बाहर है वह धोखा है ।'

इसलिये दूसरे आगमों का बाध वेदकर्तृक ही है इसलिये शुद्धि अशुद्धि आदि का विभाग उसके आधार पर ही समीचीन है ॥ २२९ ॥

प्रश्न—यदि ऐसा है तो इससे बाह्य होने के कारण वैदिकी चोदनाओं का इसके द्वारा भी बाध क्यों नहीं होता क्योंकि तुल्यन्याय है । एक पक्ष में कोई बलवान् कारण (हम) नहीं देखते जिससे अन्यत्र नियमपूर्वक बाध हो—यह कहते हैं—

यदि कहें कि वैदिकी चोदना से यह (= तान्त्रिकी चोदना) बाधित हो जायगी ? तो (हम कहते हैं कि) विपरीत क्यों नहीं होता ? (= तान्त्रिकी चोदना वैदिकी चोदना का बाध क्यों नहीं करती ?) ॥ २३०- ॥

प्रश्न—यदि ऐसा है तो परस्पर व्याहत होने से यह दोनों अप्रमाण है—फिर

सिद्ध्येत् ? नैतत् ईश्वरप्रणीतत्वाख्यस्य बलवतः प्रामाण्यकारणस्योभयत्रापि सद्भावात् । तर्हि सुतरामिदमप्रामाण्यकारणं—यदेकस्मिन्नपि उपदेष्टरि परस्परव्याहतत्वं नामेति ? नैतत्—अधिकारिभेदेन तथोपदेशात् । भगवता हि शुद्ध्यादि सामान्येन सर्वपुरुषविषयतया चोदितं, विशिष्टविषयतया त्विदम्, इति न कश्चिदनयोरप्रामाण्यपर्यवसायी दोषः, तत् उभयोरपि चोदनयोर्भिन्नविषयत्वेनावस्थितेः सत्त्वमविशिष्टमेव—इति सिद्धम् ॥

ननु कथमनयोरविशिष्ट सत्त्वं शुद्ध्यादिविधेः सर्वपुरुषविषयतया प्रवृत्तावपि क्वचिद्विषये बाधात् ? इत्याशङ्क्याह—

सम्यक्चेन्मन्यसे बाधो विशिष्टविषयत्वतः ॥ २३० ॥
अपवादेन कर्तव्यः सामान्यविहिते विधौ ।

यदि नाम बाधावृत्तं सम्यगवबुद्ध्यसे, तत्र कस्या अपि चोदनायाः सत्त्वहानिः । तथा हि निरवकाशत्वाद्विशेषात्मा अपवादविधिः सर्वत्र लब्धावकाशं सामान्यात्मकमुत्सर्गविधिं बाधते, इति वाक्यविदः । सर्वविषयावष्टम्भेन लब्धप्रतिष्ठोऽपि हि उत्सर्गविधिरपवादविधेर्विशिष्टं विषयं परिकल्प्य विषयान्तरे

कुछ भी सिद्ध नहीं होगा ?—ऐसा नहीं है क्योंकि ईश्वरप्रणीतत्व नामक बलवान् प्रामाण्यकारण दोनों ओर है । प्रश्न—तो यह आसानी से अप्रामाण्य का भी कारण है कि एक भी उपदेष्टा के विषय में परस्पर व्याघात हो? ऐसा नहीं है क्योंकि अधिकारी के भेद से वैसा उपदेश है । भगवान् ने शुद्धि आदि को सामान्य रूप से सबलोगों के लिये बनाया और इसे विशिष्ट विषय के रूप में, इस प्रकार इन दोनों में अप्रमाण्यपर्यवसायी कोई दोष नहीं है । इसलिये दोनों चोदनाओं का सत्त्व, भिन्न विषय के रूप में स्थित होने से, समान है—यह सिद्ध हुआ ॥ २३० ॥

प्रश्न—इन दोनों का सत्त्व अविशिष्ट क्यों है ? क्योंकि शुद्धि आदि विधि के सबलोगों के लिये प्रवृत्त होने पर भी किसी विषय में बाध होता है ?—यह शङ्का कर कहते हैं—

यदि आप विशिष्टविषयक होने से बाध को सम्यक् मानते हैं तो सामान्य रूप से विहित विधि में अपवाद के द्वारा बाध करना चाहिये ॥ -२३०-२३१- ॥

यदि आप बाध के आवृत्त को अच्छी तरह जानते है तो किसी भी चोदना के सत्त्व की हानि नहीं है । वह इस प्रकार—निरवकाश होने के कारण विशेष अपवाद विधि सर्वत्र अवसर को प्राप्त करने वाली सामान्यात्मक उत्सर्गविधि का बाध करती है ऐसा वाक्यवेत्ता (= मीमांसक) कहते हैं । समस्त विषय को अधिकृत करने के कारण प्रतिष्ठा को प्राप्त भी उत्सर्ग विधि अपवाद विधि के विशिष्ट विषय को

निर्वाधमभिनिविष्टो भवेत् । यदाह चूर्णिकाकारः—

'प्रकल्प्यापवादविषयं तत उत्सर्गोऽभिनिविशते ।' इति ।

अत एवास्य क्वचिद्बाध्यत्वेऽपि अप्रामाण्यं नाशङ्कनीयं विषयान्तरे प्रमाणरूपत्वेन प्रतिष्ठानात् । स च द्विधा बाधः समानकार्यकारित्वाद्विरोधाद्वा तत्र।

'चमसेनापः प्रणयेत् ।'

इति चमसेनापां प्रणयनं सामान्येन विहितम् ।

'गोदोहनेन पशुकामस्य प्रणयेत् ।'

इति पशुकामात्मविशिष्टविषयत्वेन अपवादात्मा गोदोहनविधिः अप्प्रणयन-लक्षणसमानकार्यकारित्वाद्बाधते ।

'अष्टाश्रिर्यूपो भवति।'

इति सामान्येन सर्वक्रतुकविषयतया विहितोऽपि अष्टाश्रिर्यूपः

'वाजपेयस्य चतुरश्रः ।'

इत्यनेन अपवादविधिना विरोधाद्बाध्यते ॥ २३० ॥

छोड़कर विषयान्तर में निर्बाध अभिनिविष्ट होती है । जैसा कि चूर्णिकाकार कहते हैं—

'अपवाद विषय को छोड़कर उत्सर्ग कार्यान्वित होता है ।'

इसलिये कहीं इसके बाध्य होने पर भी (इसके) अप्रामाण्य की शङ्का नहीं करनी चाहिये । क्योंकि विषयान्तर में (इसकी) प्रमाण रूप से प्रतिष्ठा है । यह बाध दो प्रकार का होता है—समान कार्यकारी होने से अथवा विरोध से । उनमें—

'चमस से जल को ले जाना चाहिये ।'

इस वाक्य से चमस के द्वारा जल का ले जाना सामान्य रूप से विहित है ।

'पशु की इच्छा वाला गोदोहन पात्र से ले जाय ।'

इस वाक्य से पशुकामरूप विशिष्ट विषय होने से अपवादरूप गोदोहन विधि, जलनयनलक्षण वाला समान कार्यकारी होने से बाध करती है ।

यूप आठ अश्रि (पहल, कोण) वाला होना चाहिये ।'

इस प्रकार सामान्य रूप से सब याग के विषय के रूप में विहित भी अष्टाश्रि यूप

'वाजपेय याग का चतुरश्र होना चाहिये ।'

इस अपवाद विधि के द्वारा विरोध के कारण बाधित होता है ॥ २३० ॥

ननु एवमपि प्रकृते किम् ?—इत्याशङ्क्याह—

शुद्ध्यशुद्धी च सामान्यविहिते तत्त्वबोधिनि ॥ २३१ ॥
पुंसि ते बाधिते एव तथा चात्रेति वर्णितम् ।

वैदिक्या चोदनया सामान्येन सर्वपुरुषविषयतया विहिते अपि ते शुद्ध्यशुद्धी तत्त्वज्ञविषये अर्थाद्विरोधेन बाधिते एव, न न बाधिते भवत इत्यर्थः । अत्र हेतुः 'तथा चात्रेति वर्णितम्' इति,

'नात्र शुद्धिर्न चाशुद्धिः.............. ।'

इत्यपवादात्म तत्त्वज्ञविषयं विधिवाक्यमुक्तमित्यर्थः ॥ २३१ ॥

ननु नात्र विधिवाक्यत्वं वक्तुं युक्तं निर्बाधस्य शुद्ध्यशुद्धिविभागस्य लोक दर्शनात्, प्रत्यक्षादिप्रमाणान्तरविरुद्धत्वात्, तेनावश्यमनेन अर्थवादेन भाव्यं, तद्धि भूम्ना विध्येकवाक्यतयोच्यते; अतश्च तदर्थेनैव अस्यार्थवत्त्वं न स्वतः; अत एवास्य स्वरूपपरत्वाभावान्न प्रमाणान्तरविरोधः । अर्थवादवाक्याद्धि विधौ श्रद्धातिशयो जायते, येन तत्र सादरं प्रवर्तते लोकः । यदाहुः—

'विधिशक्तिरवसीदति तां प्राशस्त्यज्ञानं समुत्तभ्नाति ।' इति ।

प्रश्न—इससे भी प्रस्तुत में क्या हुआ ? यह शङ्का कर कहते हैं—

शुद्धि और अशुद्धि का विधान सामान्य जनों के लिये है । तत्त्ववेत्ता पुरुष के विषय में वे बाधित हैं यह तथ्य, 'तथा चात्र' (श्लो० २१३) में वर्णित है ॥ -२३१-२३२- ॥

वैदिकी चोदना के द्वारा सामान्यतया सब पुरुषों के लिये विहित भी वे शुद्धि और अशुद्धि तत्त्वज्ञानी के विषय में अर्थात् विरोध के कारण बाधित ही हैं, नहीं बाधित हैं ऐसा नहीं है । इसमें कारण—'तथा चात्रेति वर्णितम्' यह है ।

'यहाँ न शुद्धि न अशुद्धि ...'

यह अपवादरूप तत्त्वज्ञविषयक विधिवाक्य कहा गया ॥ २३१ ॥

प्रश्न—इसे विधिवाक्य कहना ठीक नहीं क्योंकि लोक में निर्बाध शुद्ध्यशुद्धि विभाग देखा जाता है, और (वह) प्रत्यक्ष आदि दूसरे प्रमाणों से विरुद्ध हैं । इसलिये अवश्य यह अर्थवाद है । वह अत्यधिक, विधि के साथ एक वाक्य रूप में कहा जाता है । इसलिये उसके ही अर्थ से इसकी अर्थवत्ता है स्वतः नहीं । इसीलिये स्वरूपपरक न होने से इसका प्रमाणान्तर से विरोध नहीं है । अर्थवादवाक्य के कारण विधि के विषय में अत्यन्त श्रद्धा उत्पन्न होती है जिससे लोग उसमें आदर के साथ प्रवृत्त होते हैं । जैसा कि कहते हैं—

'विधि शक्ति रुकती है उसको प्राशस्त्य ज्ञान उत्प्रेरित करता है ।'

तेन

'मृच्छैलधातुरत्नादिभवं लिङ्गं न पूजयेत् ।
यजेदाध्यात्मिकं लिङ्गं यत्र लीनं चराचरम् ॥'

इत्यादेः श्रूयमाणस्य सर्वनिर्विकल्पेन योगिना भाव्यम्,—इत्यादेः परिकल्प्यमानस्य वा विधेः प्ररोचनाकारितया शेषभूतोऽयमर्थवाद एव ?—इत्याशङ्क्याह—

नार्थवादादिशङ्का च वाक्ये माहेश्वरे भवेत् ॥ २३२ ॥

यदुक्तम्—

'विधिवाक्यमिदं तन्त्रं नार्थवादः कदाचन ।
झटिति प्रत्यवायेषु सत्क्रियाणां फलेष्वपि ॥' इति ।

तथा

'......................नार्थवादः शिवागमः ।' इति ।

माहेश्वर इति विशेषणद्वारेण महेश्वरप्रणीतत्वं हेतुरुक्तः; यन्नाम हि बुद्धिमान् प्रयुङ्क्ते तन्न कदाचिद्व्यर्थं भवेदिति भावः ॥ २३२ ॥

यत् पुनर्बद्धिमता न प्रयुक्तं तत्रैवं संभावना भवेत्,—इत्याह—

उससे—

'मिट्टी, पत्थर, धातु, रत्न आदि से निर्मित लिङ्ग की पूजा नहीं करनी चाहिए। बल्कि आध्यात्मिक लिङ्ग का यजन करना चाहिये जिसमें चर अचर लीन है ।'

इत्यादि श्रूयमाण के (आधार पर) योगी को सर्वनिर्विकल्पक होना चाहिये । अथवा—इत्यादि परिकल्प्यमान विधि का, प्ररोचनाकारी होने के कारण शेषभूत यह अर्थवाद है ? यह शङ्का कर कहते हैं—

महेश्वरोक्त वाक्य में अर्थवाद आदि की भी शङ्का नहीं है ॥ -२३२ ॥

जैसा कि कहते हैं—

झट से (उत्पन्न) प्रत्यवाय या सत्क्रियाओं के फलों के विषय में यह तन्त्र विधिवाक्य है कभी भी अर्थवाद नहीं है । तथा

'................शिवागम अर्थवाद नहीं है ।'

'माहेश्वर' इस विशेषण के द्वारा महेश्वर से रचित होना कारण कहा गया । बुद्धिमान् जिसका प्रयोग करता है वह कभी भी व्यर्थ नहीं होता ॥ २३२ ॥

जो (वाक्य) बुद्धिमान् के द्वारा प्रयुक्त नहीं हैं वहीं ऐसी सम्भावना होती है—यह कहते हैं—

अबुद्धिपूर्वं हि तथा संस्थिते सततं भवेत् ।
व्योमादिरूपे निगमे शङ्का मिथ्यार्थतां प्रति ॥ २३३ ॥

इह खलु निगमे वेदशास्त्रे, सततं विधिवाक्यानामर्थवादवाक्यानां वा श्रुतिकाले, मिथ्यार्थतां प्रति असदर्थत्वविषये प्रेक्षापूर्वकारिणां शङ्का भवति—इति संभाव्यं; यतः स परमते घनगर्जितवदबुद्धिपूर्वम् अबुद्धिमत्कर्तृकत्वेन तथा विध्यर्थवादरूपतया संस्थितः; अत एवानर्थक्येन शून्यप्रायत्वात् 'व्योमादिरूपे' इत्युक्तम् । यदभिप्रायेणैव—

'आप्तं तमेव भगवन्तमनादिमी-
शमाश्रित्य विश्वसिति वेदवचस्तु लोकः ।
तेषामकर्तृकतया तु न कश्चिदेव
विस्रम्भमेति मतिमानिति वर्णितं प्राक् ॥'

इत्याद्यन्यत्रोक्तम् ॥ २३३ ॥

यत्र पुनरवच्छिन्नविज्ञानात्मा परमेश्वर एव शास्त्ररूपेणावस्थितः, तत्र का नाम मिथ्यार्थत्वं प्रति शङ्का भवेत् ?—इत्याह—

अनवच्छिन्नविज्ञानवैश्वरूप्यसुनिर्भरः ।

उस प्रकार (= विधि अर्थवाद आदि रूप में) स्थित, आकाश के समान निगम के विषय में (उनकी) मिथ्यार्थता के प्रति शङ्का अज्ञानपूर्वक होती है ॥ २३३ ॥

निगम = वेदशास्त्र के विषय में निरन्तर विधिवाक्यों अथवा अर्थवादवाक्यों के श्रवणकाल में, मिथ्यार्थता के प्रति = असदर्थता के विषय में, विचारकों को शङ्का होती है—ऐसा समझना चाहिये । क्योंकि वह परमत में घनगर्जन के समान अबुद्धिपूर्वक = अर्बुद्धिमत्कर्तृक के रूप में, उस प्रकार = विधि अर्थवाद आदि के रूप में, स्थित है । इसलिये अनर्थक होने से शून्यप्राय होने के कारण 'व्योमादिरूप में' ऐसा कहा गया । जिस अभिप्राय से ही—

'उस आप्त अनादि भगवान् ईश्वर के आधार पर पर लोक अर्थात् सांसारिक जन वेद की वाणी में विश्वास करता है । यदि वे (वेदवाक्य) कर्तृशून्य हो तो कोई भी बुद्धिमान् उसमें विश्वास नहीं करेगा—यह पहले कहा गया ।'

इत्यादि अन्यत्र कहा गया ॥ २३३ ॥

जहाँ अनवच्छिन्न विज्ञानस्वरूप परमेश्वर ही शास्त्ररूप में स्थित है वहाँ मिथ्यार्थता के प्रति क्या शङ्का हो सकती है—यह कहते हैं—

किन्तु असीम अखण्ड विज्ञान की विश्वरूपता से परिपूर्ण देव

शास्त्रात्मना स्थितो देवो मिथ्यात्वं क्वापि नार्हति॥ २३४ ॥

'मिथ्यात्वं क्वापि नार्हति' इत्यत्र पूवार्धं हेतुः ॥ २३४ ॥

नन्वीश्वरः सर्वशास्त्राणां प्रणेता—इत्यधिगतमस्माभिः, न तु स एव तदात्मनावस्थितः,—इत्यपूर्वमिदं किमुच्यते ?—इत्याशङ्क्याह—

इच्छावान्भावरूपेण यथा तिष्ठासुरीश्वरः ।
तत्स्वरूपाभिधानेन तिष्ठासुः स तथा स्थितः॥ २३५ ॥

यथा खलु परमेश्वरः स्वेच्छामाहात्म्याद्वाच्यात्मप्रमातृप्रमेयादिभावरूपेण स्थातुमिच्छुः सन्, तथा वाच्यात्मविश्वरूपतया स्थितः; तथाशब्दस्यावृत्त्या तथा तद्वदेव तस्य प्रमातृप्रमेयात्मनो वाच्यस्य विश्वस्य यत् स्वम् अन्यापोढं रूपं तस्याभिधानेन वाचकतया स्थातुमिच्छुः सन् तथा वाचकात्मशास्त्ररूपतया स्थितः इत्यर्थः ॥ २३५ ॥

एवमपि यद्यस्य क्वचिन्मिथ्यार्थत्वं स्यात् तदापि न कश्चिद्दोषः, इत्याह—

अर्थवादोऽपि यत्रान्यविध्यादिमुखमीक्षते ।

तन्त्रशास्त्र के रूप में स्थित है । इसलिये वहाँ कहीं भी मिथ्यात्व नहीं है ॥ २३४ ॥

मिथ्यात्व कहीं नहीं हो सकता इसमें पूर्वार्द्ध कारण है ॥ २३४ ॥

प्रश्न—ईश्वर सब शास्त्रों का प्रणेता है—यह हमने जान लिया । किन्तु वह उस रूप में स्थित नहीं है । फिर यह अपूर्व क्यों कहते हैं ? यह शङ्का कर कहते हैं—

जिस प्रकार परमेश्वर इच्छावान् होने पर भावरूप में स्थित होना चाहता है उसी प्रकार (उस भाव के) स्वरूप के वाचक के रूप में स्थित होने की इच्छा वाला वह उस प्रकार स्थित है ॥ २३५ ॥

जिस प्रकार परमेश्वर अपनी इच्छा की महिमा से वाच्यरूप प्रमातृप्रमेय आदि पदार्थों के रूप में स्थित होने का इच्छुक होता हुआ उस प्रकार वाच्यात्मक विश्वरूप में स्थित है तथा शब्द की आवृत्ति से, तथा = उसी प्रकार, उस प्रमातृप्रमेयात्मक वाच्य विश्व का जो स्व = अपना = अन्यापोढरूप है उसके कथन से = वाचक के रूप में स्थित होने का इच्छुक (वह) उस प्रकार = वाचक शास्त्र के रूप में, स्थित है ॥ २३५ ॥

ऐसा होने पर भी यदि कहीं मिथ्या हो तो भी कोई दोष नहीं है—यह कहते हैं—

तत्रास्त्वसत्यः स्वातन्त्र्ये स एव तु विधायकः ॥ २३६ ॥

यत्र खलु स्तुतिनिन्दादिरूपोऽर्थवादोऽन्यस्य विधिनिषेधात्मनो विधिवाक्यस्याङ्गभावमियात् तत्र स्वरूपपरत्वाभावादसावसत्योऽस्तु न कश्चिद्दोषः; नहि अस्य यथाश्रुतोऽर्थः प्रतिपाद्यः, किंतु विधेयो निषेध्यो वा, यदस्याङ्गभावेन प्रतिष्ठानम्; अत एव विधिवाक्यैकवाक्यतयैव अस्य प्रामाण्यम्—इति वाक्यविदः । यदाहुः—

'इत्यर्थवादा विधिनैकवाक्यभावात्प्रमाणत्वममी भजन्ते॥' इति ।

तथाहि—

'बर्हिषि रजतं न देयम् ।'

इत्यस्य विधेः शेषभूतस्य

'सोऽरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वम्,

इत्यादेरर्थवादस्य न रुद्ररोदनादि प्रतिपाद्यं, किन्तु

'बर्हिषि यो रजतं ददाति पुरास्य संवत्सराद् गृहे रोदनं भवति।'

इति 'बर्हिषि रजतं न देयम्' इति । स एव पुनरर्थवादो यद्यन्याङ्गभावं

अर्थवाद भी जहाँ अन्य विधि आदि की अपेक्षा रखता है वहाँ भले ही असत्य हो जाय किन्तु स्वतन्त्र रूप से तो वह विधायक ही है ॥ २३६ ॥

स्तुतिनिन्दारूप अर्थवाद जहाँ किसी दूसरे विधिनिषेधात्मक विधिवाक्य का अङ्ग होता है वहाँ स्वरूपपरक न होने से यह (= अर्थवाद वाक्य) असत्य हो जाय कोई दोष नहीं है । क्योंकि इसका यथाश्रुत अर्थ प्रतिपाद्य या निषेध्य नहीं है किन्तु विधेय अथवा निषेध्य अर्थ प्रतिपाद्य है । वही इसकी अङ्गरूप से प्रतिष्ठा है । इसलिये विधिवाक्य के साथ एकवाक्यता होने से ही इसकी प्रामाणिकता है—ऐसा वाक्यवेत्ता (= मीमांसक) कहते हैं । जैसा कि कहते हैं—'इसलिये ये अर्थवाद विधिवाक्य के साथ एकवाक्यता के कारण प्रामाणिक होते हैं ।'

वह इस प्रकार—

'यज्ञ में चाँदी दान नहीं करना चाहिये ।'

इस विधि के अङ्गभूत—

'वह अग्नि रोया; जो रोया वही रुद्र का रुद्रत्व है ।'

इत्यादि अर्थवाद का रुद्र रोदन आदि प्रतिपाद्य नहीं है किन्तु

'जो यज्ञ में रजत का दान करता है एक वर्ष के भीतर उसके घर में रोदन होता है ।'

यह है । इसलिये 'यज्ञ में रजतदान नहीं करना चाहिये ।' वही अर्थवाद यदि

यायात् तदा विधायको यथाश्रुतार्थप्रतिपादको भवेदित्यर्थः ।

'सोऽरोदीत्' इत्यादावर्थवादवाक्ये हि
'रुद्रो रुरोद तस्य यदश्रु अशीर्यत तद्रजतमभवत्।'

इति-वृत्तप्रतिपादनं सत्यार्थमेवेदम्, एवं प्रायाणां बहूनामितिवृत्तानां सत्यत्वेनेष्टेः। तदुक्तम्—

'यद्वा स्वरूपपरतामपि संस्पृशन्तः
प्रमाण्यवर्त्मन इमे न परिच्यवन्ते ।
नैयायिका हि पुरुषातिशयं वदन्तो
वृत्तान्तवर्णनमपीह यथार्थमाहुः ॥' इति ॥ २३६ ॥

न केवलमस्य स्वातन्त्र्य एव सत्यार्थत्वं यावत्पारतन्त्र्येऽपि—इत्याह—

विधिवाक्यान्तरे गच्छन्नङ्गभावमथापि वा ।
न निरर्थक एवायं संनिधेर्गजडादिवत्॥ २३७ ॥

यद्वा विधिनिषेधात्मनो विधिवाक्यस्याङ्गभावं गच्छन्नपि अयमर्थवादः संनिहितत्वान्ननिर्थक एव भवेत् अत्र दृष्टान्तः 'गजडादिवत्' इति । यथाहि पदाद्यङ्गत्वेन संनिहिता वर्णा न निरर्थकाः तथायमपीति वर्णानामानर्थक्ये हि वर्णव्यत्यये-

---

अङ्ग न बनता तो विधायक (होकर) यथाश्रुत अर्थ का प्रतिपादक होता ।

'वह रोया' इत्यादि अर्थवादवाक्य में 'रुद्र रोया उसके जो आँसू (भूमि पर) गिरे वे रजत हो गये ।'

इस इतिहास के प्रतिपादन की सत्यता के लिये ही यह (कहा गया) । क्योंकि इस प्रकार के बहुत से इतिवृत्त सत्य माने जाते हैं । वही कहा गया है—

'अथवा स्वरूपरता का स्पर्श करने वाले भी ये (अर्थवाद) प्रामाण्य के रास्ते से च्युत नहीं होते । नैयायिक लोग पुरुष के आतिशय को कहते हुए वृतान्तवर्णन को यथार्थ मानते है ॥ २३६ ॥'

केवल स्वातन्त्र्य में ही इसकी सत्यार्थता नहीं है बल्कि पारतन्त्र्य में भी है—यह कहते हैं—

यह (= अर्थवाद) विधिवाक्य के अन्दर अङ्गभाव को प्राप्त होता हुआ भी सन्निधि के कारण निरर्थक नहीं है जैसे कि 'गजड' आदि शब्द ॥ २३७ ॥

अथवा विधिनिषेधात्मक विधिवाक्य का अङ्ग होते हुए भी यह अर्थवाद सन्निहित होने के कारण निरर्थक नहीं हैं । इसमें दृष्टान्त है—गजडादिवत् । जैसे पद आदि के अङ्ग के रूप में सन्निहित वर्ण निरर्थक नहीं होते उसी प्रकार यह भी है । वर्णों

ऽर्थान्तरगमनं न स्यात्, यथा गजः जडः षोडः (?) इति । सङ्घातस्यापि अर्थवत्त्वं न स्यात्—अवयवानामानर्थक्ये हि समुदायोऽप्यनर्थक एव भवेत्, यथा एकस्या अपि सिकतायास्तैलदानासामर्थ्ये तत्समुदायो राशिरप्यसमर्थः—इति । एवमर्थवादस्यापि आनर्थक्ये तत्संनिधानेन विधीयमाने निषिध्यमाने वार्थे सादरं प्रवृत्तिर्निवृत्तिर्वा न स्यात् । 'सोऽरोदीत्' इत्यादौ हि रोदनप्रभवं रजतं निन्दितुमेवमुक्तं येन बर्हिषि तद्दानात् सादरं निवृत्तिर्भवेत् । लोकेऽपि खलु 'इयं गौः क्रेतव्या' इत्यतो न तथा क्रेतारः प्रवर्तन्ते, यथा 'एषा बहुस्निग्धक्षीरा सुशीला स्त्र्यपत्यानघप्रजा च' इत्येवमादिभ्यः स्तुतिपदेभ्यः,—इति स्वानुभवसाक्षिकोऽयमर्थः ॥ २३७ ॥

अत आह—

स्वार्थप्रत्यायनं चास्य स्वसंवित्त्यैव भासते ।
तदपह्नवनं कर्तुं शक्यं विधिनिषेधयोः ॥ २३८ ॥

अथ यद्येतत् बलात्कारेणापह्नूयते तत् विधिनिषेधात्मनो विधिवाक्यस्यापि अर्थापह्नवः कर्तुं शक्यः,—इत्याह 'तदपह्नवनम्' इत्यादि ॥ २३८ ॥

के निरर्थक होने पर वर्ण के उलटफेर होने पर अर्थान्तर का ज्ञान नहीं होगा जैसे—गज, जड, षोड (श) । समूह की भी अर्थवत्ता नहीं होगी क्योंकि अवयवों के निरर्थक होने पर समुदाय भी निरर्थक हो जाता है । जैसे एक बालू के कण के तेलदान में असमर्थ होने पर उसका समुदाय अर्थात् राशि भी असमर्थ होता है । इस प्रकार अर्थवाद के भी अनर्थक होने पर उसके सन्निधान से विधीयमान या निषेध्यमान अर्थ में सादर प्रवृत्ति या निवृत्ति नहीं होगी । 'वह रोया' इत्यादि में रोदन से उत्पन्न रजत की निन्दा करने के लिये ऐसा कहा गया जिससे यज्ञ में उसके दान से (लोगों की) सादर निवृत्ति हो । लोक में भी 'यह गाय क्रेतव्य है' ऐसा कहने ये खरीददार उस तरह प्रवृत्त नहीं होते जिस तरह कि 'यह बहुत अच्छा दूध देती है' सीधी सादी है, नीचे बछिया है और इसकी सन्तान में कोई दोष नहीं है, इत्यादि प्रशंसावाक्यों से—यह तथ्य अपने अनुभव का है ॥ २३७ ॥

इसलिये कहते हैं—

इसका (= विधिवाक्य का) स्वार्थबोधन भी अपनी संवित्ति के द्वारा ही होता है । 'ऐसा न होने पर' विधि और निषेध का भी अपह्नव किया जा सकता है ॥ २३८ ॥

यदि इसे जबर्दस्ती छिपाते हैं तो विधिनिषेध में से विधिवाक्य के भी अर्थ का अपह्नव किया जा सकता है—यह कहते हैं—'उसका अपह्नवन' इत्यादि ॥ २३८ ॥

न केवलमत्र स्वसंवित्तिरेव साधकं प्रमाणमस्ति, यावद्युक्तिरपि—इत्याह—

युक्तश्चात्रास्ति वाक्येषु स्वसंविच्चाप्यबाधिता।
या समग्रार्थमाणिक्यतत्त्वनिश्चयकारिणी ॥ २३९ ॥

युक्तिरिति समनन्तरोक्ता ॥ २३९ ॥

ननु भवतु नामेदमर्थवादवाक्यं विधिवाक्यं वा किमनया नश्चिन्तया, तत्रापि वेदशास्त्रोक्तः शुद्ध्यादिविभागस्तावत् यथोक्तयुक्त्या बाधितः, अनेन च न किञ्चिच्छुद्धं विहितं नाप्यशुद्धं तृतीयश्च राशिर्नास्ति,—इति शुद्ध्यशुद्धिविधानमेव न सिद्ध्येत् ?—इत्याशङ्क्याह—

मृतदेहेऽथ देहोत्थे या चाशुद्धिः प्रकीर्तिता।
अन्यत्र नेति बुद्ध्यन्तामशुद्धं संविदश्च्युतम् ॥ २४० ॥
संवित्तदात्म्यमापन्नं सर्वं शुद्धमतः स्थितम् ।

वेदशास्त्रे हि मृतदेहे देहाच्च्युते मलादौ च यदशुद्धिरुक्ता अन्यत्र जीवद्देहे देहस्थ एव मलादौ च न,—इत्यतः संवित्सहभावासहभावनिबन्धनाद्धेतोः संविदः

इस विषय में केवल अपना अनुभव ही साधक प्रमाण नहीं है वरन् युक्ति भी है—ऐसा कहते हैं—

वाक्यों के विषय में युक्ति भी है और अपनी अबाधित संवित् भी । जो (= संवित्) समग्र अर्थरूपी माणिक्य के तत्त्व (= यथार्थता) का निश्चय कराती है ॥ २३९ ॥

'युक्ति' समनन्तरोक्त है ॥ २३९ ॥

प्रश्न—यह विधिवाक्य हो या अर्थवाद वाक्य, हम इसकी चिन्ता क्यों करें । वहाँ भी वेद शास्त्र में कहा गया शुद्धि आदि का विभाग उक्त युक्ति से बाधित है । इसने न तो किसी को शुद्ध बनाया न अशुद्ध । और तीसरा पक्ष है ही नहीं । इस प्रकार शुद्धि और अशुद्धि का विधान ही सिद्ध नहीं होगा—यह शङ्का कर कहते हैं—

मृत शरीर अथवा देह से निकले मल आदि के विषय में जो अशुद्धि (शास्त्रों में) कही गयी वह अन्यत्र (= जीवित शरीर आदि) में नहीं है । इसलिये जो संविद् से च्युत है उसे अशुद्ध समझना चाहिये । इस प्रकार यह निश्चित हो गया कि जो संवित् से तादात्म्य को प्राप्त है वह सब शुद्ध है ॥ २४०-२४१- ॥

वेदशास्त्र में मृतशरीर और शरीर से निकले मल आदि के विषय में जो अशुद्धि कही गयी है, और दूसरी ओर जीवित शरीर और शरीररस्थ मल आदि के

सकाशात् यत् च्युतं भिन्नं तदाशुद्धं बुद्ध्यन्तां विशेषानुपादानात् सर्व एवावगच्छन्त्वित्यर्थः । अत एव च यत्किंचित् संविदैक्यमापन्नं तत् सर्वं शुद्धमिति; तेन संविदैकात्म्यानैकात्म्याभ्यां सर्वत्र शुद्ध्यशुद्धिविभागः,—इति स्थितं सिद्धम् ॥ २४० ॥

न च एतद्युक्तिमात्रेणैव सिद्धं यावदागमेनापि,—इत्याह—

श्रीमद्वीरावलौ चोक्तं शुद्ध्यशुद्धिनिरूपणे ॥ २४१ ॥

तदेव शब्दद्वारेण पठति—

सर्वेषां वाहको जीवो नास्ति किञ्चिदजीवकम् ।
यत्किंचिज्जीवरहितमशुद्धं तद्विजानत ॥ २४२ ॥

जीवयति निखिलमिदं भूतजातं ज्ञानक्रियोत्तेजनेन प्राणयति—इति जीवः परप्रकाशः, स सर्वेषां प्रमातृप्रमेयात्मनो विश्वस्य वाहयति संधारयति—इति वाहकः स्वात्मसंलग्नतयावभासक इत्यर्थः । अत्र हेतुः 'नास्ति किञ्चिदजीवकम्' इति, नहि प्रकाशातिरिक्तं किञ्चिदपि भायादिति भावः । यत् पुनः किञ्चिज्जीवरहितं तदैकात्म्येनासंवेद्यमानं, तदशुद्धं विजानत अनुपपत्त्यवस्करदूषितत्त्वात्

विषय में नहीं—अतः संवित् के सहभाव और असहभावरूपी कारण से जो संविद् से गिरा हुआ = भिन्न है, उसे अशुद्ध समझा जाय = विशेष का ग्रहण न होने से सभी लोग समझें यह अर्थ है । इसलिये जो कुछ संविद् के साथ एकता को प्राप्त है वह सब शुद्ध है । इससे संविद् के ऐकात्म्य और अनैकात्म्य से सर्वत्र शुद्धि और अशुद्धि का विभाग है—यह स्थित = सिद्ध है ॥ २४०-२४१॥

यह बात केवल युक्ति से ही नही बल्कि आगम से भी सिद्ध है—यह कहते हैं—

श्रीमद्वीरावलि में भी शुद्धि अशुद्धि के निरूपण में वह कहा गया है ॥ -२४१ ॥

उसी को शब्द के द्वारा कहते हैं—

जीव ही सबका धारक है । जीव के विना कुछ नहीं है । और जो कुछ जीवरहित है उसे अशुद्ध जानो ॥ २४२ ॥

जो जीवित करता है = इस समस्त भूतसमूह को ज्ञान और क्रिया की उत्तेजना से प्राणित करता है वह जीव = पर प्रकाश है । वह सबका प्रमातृ प्रमेयात्मक विश्व का, जो वाहन करता है = धारण करता है वह वाहक = स्वात्मसंलग्न के रूप में अवभासक है । इसमें कारण है—'कुछ भी विना जीव के नही है ।' प्रकाश के अतिरिक्त कुछ भी आभासित नहीं होता । और जो कुछ जीवरहित = उससे अभिन्न

परिहरणीयतयावगच्छतेत्यर्थः । एवं संविदतिरिक्तस्याशुद्धत्वेनाभिधानात् इतरत् पुनः शुद्धमेव—इत्यर्थसिद्धम् ॥ २४२ ॥

तदाह—

तस्माद्यत्संविदो नातिदूरे तच्छुद्धिमावहेत् ।

तदुक्तं तत्रैव—

'अशुद्धं नास्ति तत्किञ्चित्सर्वं तत्र व्यवस्थितम् ।
यत्तेन रहितं किञ्चिदशुद्धं तेन जायते ॥' इति ॥

नन्वेवं शुद्ध्यशुद्धिविभागो न कैश्चिन्महात्मभिः परिगृहीतः—इति कथमत्र सतां समाश्वासः स्यात् ?—इत्याशङ्क्याह—

अविकल्पेन भावेन मुनयोऽपि तथाभवन् ॥ २४३ ॥

तथेति संविदैकात्म्यानैकात्म्याभ्यां शुद्ध्यशुद्धिविभागभाज इत्यर्थः । तदुक्तं तत्र

'ऋषिभिर्भक्षितं पूर्वं गोमांसं च नरोद्भवम् ।' इति ।

रूप में असंवेद्यमान है । उसे अशुद्ध समझो = अनुपपत्ति रूपी गन्दगी (= विष्ठा) से दूषित होने के कारण परिहरणीय समझो । इस प्रकार संविद् से अतिरिक्त को अशुद्ध कह देने से दूसरा शुद्ध ही है = यह अर्थात् सिद्ध है ॥ २४२ ॥

वह कहते हैं—

इस कारण जो संविद् से दूर नहीं है वह शुद्ध है ॥ २४३- ॥

वही वहाँ कहा गया—

'सब कुछ उसमें स्थित है इसलिये कुछ अशुद्ध नहीं है जो कुछ उससे रहित है इसलिये अशुद्ध हो जाता है ॥ २४३ ॥

प्रश्न—इस प्रकार का शुद्धि अशुद्धि का विभाग किन्हीं महात्माओं नें नहीं माना है—फिर इस विषय में सज्जनों का विश्वास कैसे हो ?—यह शङ्का कर कहते हैं—

मुनि लोग भी निर्विकल्पक भाव के कारण उसी प्रकार के हो गये ॥ -२४३ ॥

तथा = संविद् की एकात्मता और अनेकात्मता के द्वारा शुद्धि अशुद्धि विभागवाले । वही वहाँ कहा गया'—

'प्राचीन काल में मनुष्य के द्वार लाये गये गोमांस और नरमांस को ऋषियों ने खाया ।'

यदि नाम हि ते—द्रव्याणां संविदैकात्म्यमेव शुद्धिः—इति न जानीयुः, तत् कथं शास्त्रबहिष्कृतं लोकविरुद्धं गोमांसादि भक्षयेयुः; अत एव हि बाह्यचर्यायाम्

'यद्द्रव्यं लोकविद्विष्टं यच्च शास्त्रबहिष्कृतम्।
यज्जुगुप्स्यं च निन्द्यं च वीरैराहार्यमेव तत् ॥'

इत्याद्युक्त्या विकल्पप्रहाणाय लोकशास्त्रविरुद्धं द्रव्यजातमभिहितम् । यन्नाम सर्वद्रव्याणां लोकविरुद्धत्वादि न वास्तवं रूपं, किंतु परा संविदेव,—इति किं नाम जुगुप्स्यं निन्द्यं वा, सर्वत्रैव संविद्रूपत्वाविशेषात्; अत एव तत्र चित्त-प्रत्यवेक्षामात्रमेव प्रयोजनं—किं संविदेकाग्रीभूतं चित्तं न वा—इति । यदुक्तम्—

'न चर्या भोगतः प्रोक्ता या ख्याता भीमरूपिणी ।
स्वचित्तप्रत्यवेक्षातः स्थिरं किं वा चलं मनः ॥' इति ॥ २४३ ॥

ननु यद्येवं तन्मुनिभिर्गोमांसादि कथमभक्ष्यतयोपदिष्टम् ?—इत्याशङ्क्याह—

लोकसंरक्षणार्थं तु तत्तत्त्वं तैः प्रगोपितम् ।

एवमुपदिष्टे हि अलब्धसंविदैकात्म्योऽपि लोको लोभलौल्याभ्यां यत्तत् कुर्वाणो

यदि वे ऋषिगण—द्रव्यों की संविद् के साथ एकात्मता ही शुद्धि है—यह नहीं जानते तो शास्त्रबहिष्कृत लोकविरुद्ध गोमांस आदि का भक्षण कैसे करते । इसलिये बाह्यचर्या में—

'जो द्रव्य लोक में घृणित है ओर जो शास्त्र में बहिष्कृत है, जो जुगुप्स्य और निन्द्य है वीर साधकों को उसी का आहार करना चाहिये ।'

इत्यादि उक्ति के अनुसार विकल्प के त्याग के लिये लोक एवं शास्त्र से विरुद्ध द्रव्यसमूह कहा गया है । जो सब द्रव्यों का, लोकविरुद्धत्व आदि वास्तविक रूप नहीं है किन्तु पर संविद् ही है—फिर उस स्थिति में क्या जुगुप्स्य अथवा निन्द्य होगा क्योंकि सर्वत्र ही संविद्रूपता समान ही है । इसलिये वहाँ केवल चित्त की प्रत्यवेक्षा ही प्रयोजन है—क्या चित्त संविद् के साथ एकाग्र हुआ है अथवा नहीं । जैसा कि कहा गया—

'जो चर्या भीमरूपिणी (= कठिन) कही गई है वह भोग से (सिद्ध होने वाली) नहीं कही गई है । (प्रत्युत) अपने चित्त की प्रत्यवेक्षा से होती है । मन स्थिर है या चञ्चल' (ऐसी अविक्षा करनी चाहिए) ॥ २४३ ॥

प्रश्न—यदि ऐसा है तो मुनियों ने गोमांस आदि को अभक्ष्य क्यों कहा ?—यह शङ्का कर कहते हैं—

लोक की रक्षा के लिये उन लोगों ने उस तत्त्व को छिपा दिया ॥ २४४- ॥

लोकयात्रामुच्छिन्द्यात्—इति, तत् तत्त्वं संविदद्वैतात्म पारमार्थिकं रूपं तैः प्रकर्षेण तत्तद्द्रव्यदूषणादिद्वारेण गोपितं न प्रकाशितमित्यर्थः । यदुक्तं तत्रैव—

'ज्ञात्वा समरसं सर्वं दूषणादि पुनः कृतम् ।' इति ।

यदभिप्रायेणैव

'यत्ते कुर्युर्न तत्कुर्याद्यद्ब्रूयुस्तत्समाचरेत ।'

इत्यादि अन्यत्रोक्तम् ।

नन्विदं भावजातं बहीरूपतया चेन्न संभवति तत् कस्य शुद्ध्यशुद्धी स्यातां, यदधिकारेणापि अयं विचार आरभ्यते; अथ यदि संभवति, तद्यथैव संभवति तथैव भवेत्, किं तस्य प्रमातृसंबन्धिना परिज्ञानेन ?—इत्याशङ्क्याह—

बहिः सत्स्वपि भावेषु शुद्ध्यशुद्धी न नीलवत् ॥ २४४ ॥
प्रमातृधर्म एवायं चिदैक्यानैक्यवेदनात् ।

बहीरूपतयाभ्युपगम्यमानेष्वपि भावेषु नीलादिन्यायेन प्रतिभासविकारकारित्वाभावात् शुद्ध्यशुद्धी न वस्तुनो धर्मः, किंतु प्रमातुः; प्रमाता हि चिदैक्या-

---

ऐसा उपदेश होने पर संविदैकात्म्य को न प्राप्त करने वाला भी व्यक्ति लोभ एवं आसक्ति के कारण मानमानी करता हुआ लोकयात्रा (= सांसारिक व्यवहार) का उच्छेद कर देगा । इसलिये वह तत्त्व = संविद् अद्वैतात्मक पारमर्थिक रूप, उन लोगों के द्वारा, प्र = प्रकर्ष के साथ = भिन्न-भिन्न द्रव्य के दूषण आदि के द्वारा, छिपाया गया = प्रकाशित नहीं किया गया । जैसा कि वहीं कहा गया है—

'सबको समरस जानकर फिर दूषण आदि किया गया ।'

जिस अभिप्राय से ही—

'वे (योगी लोग) जो करते हैं वह नहीं करना चाहिये वे जो कहते हैं उसका आचरण करना चाहिये ।'

इत्यादि अन्यत्र कहा गया है ॥ २४४ ॥

प्रश्न—यह पदार्थसमूह यदि बाह्य रूप से सम्भव नहीं है तो किसकी शुद्धि अशुद्धि होगी जिसके आधार पर यह विचार आरब्ध होगा ? और यदि सम्भव है तो जैसे सम्भव होगी वैसे ही होगा फिर उसके प्रमातृसम्बन्धी परिज्ञान से क्या ?—यह शङ्का कर कहते हैं—

बाह्यरूप में वर्त्तमान भी पदार्थों में शुद्धि और अशुद्धि नील गुण आदि की भाँति नहीं रहती । यह (= शुद्धि और अशुद्धि) संविद् के ऐक्य अथवा अनेक्य के कारण ही प्रमाता का धर्म है ॥ -२४४-२४५- ॥

पदार्थों को बाह्यरूप में मान लेने पर भी नील आदि न्याय से प्रतिभास

नैक्यवेदकतया सातिशस्यः संस्तथा व्यवस्यति 'इदं शुद्धमिदमशुद्धम्' इति; अत एव शुद्धयशुद्धी न नियते, कस्यचिद्धि यदशुद्धं तत्रान्यस्येति । वस्तुधर्मत्वे हि भवेन्नाम अयं नियमो—यदिदं शुद्धमिदमशुद्धम्—इति. नहि कस्यचित् नीलमप्यनीलं भवेत् ॥ २४४ ॥

ननु प्रमातुस्तत्तद्वस्तुदर्शनेनैव हि मनः प्रसीदेद्विचिकित्स्याच्च,—इति कथं न शुद्धयशुद्धी वस्तुनो धर्मः?—इत्याशङ्क्याह—

यदि वा वस्तुधर्मोऽपि मात्रपेक्षानिबन्धनः ॥ २४५ ॥
सौत्रामण्यां सुरा होतुः शुद्धान्यस्य विपर्ययः ।

यदि नाम शुद्धयशुद्धयोर्वस्तुधर्मत्वमभ्युपेयते, तदपि प्रमातृपारतन्त्र्यमेव अत्र निबन्धनं भवेत् । यथाहि—यमेव प्रमातारमपेक्ष्य द्वित्वबुद्धिरुपजायते तस्यैव तद्ग्रहो भवेत् नेतरस्य, तत्र तस्यैकत्वादिबुद्ध्युपजननस्यापि संभाव्यमानत्वात्; एवं येनैव प्रमात्रा यच्छुद्धतया गृहीतं तस्यैव तच्छुद्धं नापरस्य । तथाहि—एकैव सुरा सौत्रामण्यां होतुर्याजकस्य शुद्धा अवघ्राणभक्षणादौ योग्येत्यर्थः ।

'सुराया अवघ्राणः कर्तव्यः ।' इति ।

विकारकारी न होने से शुद्धि अशुद्धि वस्तु के (धर्म) नहीं किन्तु प्रमाता के धर्म हैं। प्रमाता ही संविद् की एकता एवं अनेकता का ज्ञाता होने से सातिशय होता हुआ ऐसा निश्चय करता है कि—यह शुद्ध है यह अशुद्ध । इसलिये शुद्धि एवं अशुद्धि निश्चित नहीं है । जो किसी के लिये शुद्ध है वह दूसरे के लिये नहीं है । वस्तुधर्म होने पर यह नियम हो जाता कि यह शुद्ध है यह अशुद्ध । नील किसी के लिये अनील नहीं होता ॥ २४४ ॥

प्रश्न—प्रमाता का भिन्न-भिन्न वस्तु को देखने से मन प्रसन्न और खिन्न होता है फिर शुद्धि-अशुद्धि मन के धर्म क्यों नही है ?—यह शङ्का कर कहते हैं—

अथवा यदि उसे वस्तु का धर्म मानते हैं तो वह भी प्रमाता की अपेक्षा के कारण हैं । सौत्रामणी यज्ञ में सुरा होता के लिये शुद्ध होती है दूसरों के लिये अशुद्ध ॥ -२४५-२४६- ॥

यदि शुद्धि अशुद्धि को वस्तु का धर्म माना जाता है तो भी इसमें कारण प्रमाता का पारतन्त्र्य ही होगा । जैसे कि जिस प्रमाता के मन में द्वित्व की बुद्धि उत्पन्न होगी उसी को उस (= द्वित्व बुद्धि) का ज्ञान होगा दूसरे को नहीं । क्योंकि उसको वहाँ एकत्व बुद्धि भी उत्पन्न हो सकती है । इसी प्रकार जिस प्रमाता ने जिसको शुद्ध मान लिया उसी के लिये वह शुद्ध है दूसरे के लिये नहीं । जैसे एक ही सुरा सौत्रामणी (याग) में होता याजक के लिये शुद्ध है = सूँघने पीने के योग्य है ।

अन्यस्य सौत्रामण्यामयाजकस्य पुनरशुद्धा अवघ्राणादावयोग्येत्यर्थः । यत्स्मृतिः—

'ब्राह्मणस्य रुजः कृत्या घ्रातिरघ्रेयमद्ययोः ।
जैह्म्यं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम् ॥' इति ।

तस्मात् वस्तुधर्मत्वेऽपि अनयोर्मात्रपेक्षानिबन्धनत्वं यदि न स्यात्, तत् सर्वानेव प्रति सुरायाः शुद्धत्वमेव भवेदशुद्धत्वमेव वेति । एवं सुरायाः सामान्येनाशुद्धत्वं विहितं, सौत्रामणीहोतृविषयत्वेन विशेषश्रुत्या विरोधाद्बाधित-मित्यवगन्तव्यम् ॥ २४५ ॥

ननु उक्तवच्छैव्या चोदनया यदि वैदिकीचोदना बाधिता तद्यावदास्तां, वैदिक्या पुनश्चोदनया स्वेनैव सर्वं बाध्यते—इत्येतन्न यौक्तिकमिव नः प्रतिभासते ? इत्याशङ्क्याह—

अनेन चोदनानां च स्ववाक्यैरपि बाधनम् ॥ २४६ ॥
क्वचित्संदर्शितं ब्रह्महत्याविधिनिषेधवत् ।

'स्ववाक्यैः' इति अपवादरूपैः । 'क्वचित्' इति उत्सर्गविषये । 'संदर्शितम्'

'सुरा को सूँघना चाहिये ।'

दूसरे के लिये = सौत्रामणी के अयाजक के लिये अशुद्ध = सूँघने के अयोग्य है । जैसी कि स्मृति है—

'कृत्या (= विश्वासघात) अघ्रेय पदार्थ और मद्य का सूँघना ब्राह्मण के लिये रोगकारी है । कुटिलता और पुरुष के साथ मैथुन ब्राह्मण को अपनी जाति से भ्रष्ट करने वाला कहा गया है ।'

तो वस्तु का धर्म होने पर भी दोनों प्रमाता की अपेक्षा यदि कारण न होते तो सबके प्रति या तो सुरा शुद्ध होती या अशुद्ध । सुरा साधारणतया अशुद्ध मानी गई है किन्तु सौत्रामणी होता के विषय में विशेष श्रुति से विरोध होने के कारण इसका अशुद्धत्व बाधित है—ऐसा समझना चाहिये ॥ २४५ ॥

प्रश्न—उक्त (निदर्शन) के समान शैवी चोदना के द्वारा यदि वैदिकी चोदना बाधित होती है तो हो, किन्तु वैदिकी चोदना के द्वारा अपने से ही अपना बाध हो रहा है—यह हमे युक्ति युक्त नहीं प्रतीत होता ?—यह शङ्का कर कहते हैं—

इससे विधिवाक्यों का भी अपने (= विधि) वाक्यों के द्वारा बाध कहीं-कहीं दिखाया गया है । जैसे कि ब्रह्महत्या के बारे में विधि और निषेध ॥ -२४६-२४७- ॥

अपने वाक्यों से अपवादरूपों से । कहीं = उत्सर्ग के विषय में । दिखलाया

इत्यनेन यथोक्तयुक्त्या नैवमयौक्तिकत्वपर्यवसायी कश्चिद्दोषः—इति प्रकाशितम् । अपिशब्देन न केवलं शास्त्रन्तरीयैर्वाक्यैः,—इत्युक्तम् । अतश्च नास्माभिरपूर्वं किञ्चिदुत्प्रेक्षितं—यन्नामोक्तं 'शैव्या विशेषचोदनया सामान्यात्मिका वैदिकी चोदना बाधिता' इति । न च एतत् प्रामादिकम् अपितु भूम्ना,—इति दर्शयितुं 'ब्रह्महत्याविधिनिषेधवत्' इति दृष्टान्तितम् । एवं यथा—

'ब्राह्मणो न हन्तव्यः ।'

इति सामान्येन ब्रह्महत्यानिषेधो विहितः

'ब्राह्मणो ब्राह्मणमालभेत ।'

इति विशेषश्रुत्या बाधितः, तथा सुराया अपि अशुद्धत्वमित्यर्थः ॥ २४६ ॥

एवं शुद्ध्यशुद्धिविषये कृतं विचारमन्यत्रापि अतिदिशति—

भक्ष्यादिविधयोऽप्येनं न्यायमाश्रित्य चर्चिताः ॥ २४७ ॥

'न भक्ष्यादिविचारणम्' इत्यत्र 'नात्र भक्ष्यं न चाभक्ष्यम्' इत्यादयोऽर्थसामर्थ्यलभ्या विधयोऽपि अनेनैव न्यायेन गतार्थाः,—इत्यर्थः ॥ २४७ ॥

गया इससे यथोक्तयुक्ति के द्वारा कोई अयौक्तिकत्व पर्यवसायी दोष नहीं है यह बतलाया गया । 'अपि' शब्द से—न केवल शास्त्रान्तरीय वाक्यों के द्वारा यह कहा गया । इसलिये हमने कुछ अपूर्व नहीं समझा जो कह दिया 'कि शैवी विशेष चोदना के द्वारा सामान्य वैदिकी चोदना बाधित होती है ।' यह प्रमाद कथन भी नहीं है बल्कि अत्यधिक (ध्यान) से (कहा गया है) यह दिखलाने के लिये 'ब्रह्महत्या के विधि निषेध की भाँति' यह दृष्टान्त दिया गया । जैसे—

'ब्राह्मण की हत्या नहीं करनी चाहिये ।'

इस सामान्य विधि के द्वारा ब्रह्महत्या का निषेध किया गया ।

'ब्राह्मण ब्राह्मण को मारे ।'

इस विशेषश्रुति से (वह निषेध) बाधित है । उसी प्रकार सुरा की भी अशुद्धता समझनी चाहिये ॥ २४६ ॥

शुद्धि अशुद्धि के विषय में इस प्रकार के किये गये विचार को अन्यत्र भी अतिदिष्ट करते हैं—

भक्ष्य आदि की विधियाँ भी इसी न्याय के आधार पर निश्चित की गयी हैं ॥ -२४७ ॥

'भक्ष्य आदि का विचार नहीं हैं', यहाँ 'यहाँ न भक्ष्य है और न अभक्ष्य' इत्यादि अर्थसामर्थ्य से लभ्य विधियाँ भी इसी न्याय से गतार्थ हैं—यह अर्थ है ॥ २४७ ॥

ननु यथा शैव्या विशेषचोदनया सामान्यात्मिका वैदिकी चोदना बाध्यते, तथा वैदिक्यापि शैवी चोदना किं न वा ? इत्याशङ्कां गर्भीकृत्य आगमार्थमेव दर्शयितुमुपक्रमते—

सर्वज्ञानोत्तरादौ च भाषते स्म महेश्वरः।

तदेवार्थद्वारेण पठति—

नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम् ॥ २४८ ॥
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम् ।

नरोक्तस्य ऋष्युक्तं बाधकं, यावद्विष्णूक्तस्य रुद्रोक्तम्, तदाह—'पूर्वपूर्वप्रबाधकम्' इति । अत्र उत्तरोत्तरवैशिष्ट्यं हेतुः । सामान्यस्य हि विशेषेण बाधो न्याय्यः, इति भावः ॥ २४८ ॥

अत एव विपर्ययेण बाधो न भवेदित्याह—

न शैवं वैष्णवैर्वाक्यैर्बाधनीयं कदाचन ॥ २४९ ॥
वैष्णवं ब्रह्मसंभूतैर्नेत्यादि परिचर्चयेत् ।

'ब्रह्मसंभूतैः' वेदवाक्यैरित्यर्थः । यच्छ्रुतिः—

प्रश्न—जिस प्रकार शैवी विशेष चोदना के द्वारा सामान्य वैदिकी चोदना बाधित होती है उस प्रकार वैदिकी के द्वारा भी क्या शैवी चोदना बाधित होती है ?—यह शङ्का मन में रखकर आगमार्थ को ही दिखाने का उपक्रम करते हैं—

सर्वज्ञानोत्तर आदि (ग्रन्थों) में महेश्वर कहते हैं ॥ २४८- ॥

उसी का अर्थ कहते हैं—

मनुष्य ऋषि देवता ब्रह्मा विष्णु और रुद्र आदि के वचनों में उत्तरोत्तर के विशिष्ट होने के कारण वह पूर्व-पूर्व का बाधक होता है ॥ -२४८-२४९- ॥

ऋषि के द्वारा उक्त (वचन) नरोक्त (वचन) का बाधक होता है—इसी प्रकार रुद्र के द्वारा उक्त वचन विष्णु कथित वचन का । वही कहते हैं—पूर्व-पूर्व का बाधक होता है । इस विषय में उत्तरोत्तर की विशिष्टता कारण है । सामान्य का विशेष से बाध उचित ही है ॥ २४८ ॥

इसीलिये विपरीत क्रम से बाध नहीं होता—यह कहते हैं—

वैष्णव वाक्यों के द्वारा शैव वाक्य का बाध कभी नहीं करना चाहिये । और ब्रह्मा के वाक्यों के द्वारा विष्णुवाक्य (का बाध नहीं होना चाहिये) इत्यादि की चर्चा करनी चाहिये ॥ -२४९-२५०- ॥

'प्रजापतिना चत्वारो वेदा असृज्यन्त ।' इति ।

यत्र च वैष्णवं वेदवाक्यैर्न बाध्यते तत्र शैवबाधने का वार्ता,—इत्यर्थसिद्धम्। आदिशब्दाद् ब्रह्मसंभूतानामपि देववाक्यैर्न बाधः,—इत्यादि ग्राह्यम् । यदुक्तं तत्र—

'न पुंभिरार्षवाक्यं च वैदिकं चर्षिभिस्तथा।
न देवैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मजैः ॥
न शैवं विष्णुवचनैर्बाध्यते तु कदाचन ।' इति ॥ २४९ ॥

ननु विपर्ययेणापि बाधे को दोषः ?—इत्याशङ्क्याह—

बाधते यो वैपरीत्यात्स मूढः पापभाग्भवेत्॥ २५० ॥

वैपरीत्यं पूर्वेणोत्तरस्य बाधः । यदुक्तं तत्र—

'यो हि बाधयते पापः स मूढो नष्टचेतनः ।
उत्तरोत्तरवैशिष्ट्यं सर्वेषां परिकीर्तितम्॥' इति ॥ २५० ॥

एवं सर्वोत्कृष्टत्वाच्छैव एव शास्त्रे मुख्यया वृत्त्या निष्ठा कार्या, नान्यत्रेत्याह—

'ब्रह्मसंभूत' = वेदवाक्य । जैसी कि श्रुति है—

'प्रजापति के द्वारा चार वेद बनाये गये ।'

जब वैष्णव (वाक्य) ही वेद वाक्यों से बाधित नहीं होते तो शैव (वाक्यों के) बाध की बात ?—यह अर्थात् सिद्ध है । आदि शब्द से ब्रह्मरचित (वाक्यों) का देववाक्यों से बाध नही होता—इत्यादि समझना चाहिये । जैसा कि वहाँ कहा गया—

'पुरुषों के द्वारा ऋषिवाक्य, ऋषियों के द्वारा वैदिक, देवताओं के द्वारा ब्रह्मा का वाक्य, ब्रह्मा से उत्पन्न (वाक्यों) के द्वारा विष्णु का और विष्णुवाक्यों के द्वारा शिव का वचन कभी भी बाधित नहीं होता' ॥ २४९ ॥

प्रश्न—विपरीत क्रम से बाध होने में क्या दोष है ?—यह शङ्का कर कहते हैं—

विपरीत क्रम से जो बाध करता है वह मूर्ख पाप का भागी होता है ॥ -२५० ॥

विपरीतता = पूर्व के द्वारा उत्तर का बाध । जैसा कि वहाँ कहा गया—

'जो पापी (विपरीत क्रम से) बाध करता है वह मूर्ख और नष्टचेतना वाला है। सब का उत्तरोत्तर वैशिष्ट्य कहा गया है ।'

इस प्रकार सर्वोत्कृष्ट होने के कारण शैवशास्त्र में मुख्यवृत्ति से निष्ठा करनी

तस्मान्मुख्यतया स्कन्द लोकधर्मान्न चाचरेत् ।

निष्ठाशून्यतया तु गौण्या वृत्त्या लोकसंरक्षणार्थं लोकधर्मानाचरतो न कश्चिद्दोषः,—इति भावः । तदुक्तं तत्र—

'ये तु वर्णाश्रमाचाराः प्रायश्चित्ताश्च लौकिकाः ।
संबन्धान्देशधर्मांश्च प्रसिद्धान्न विचारयेत् ॥
गर्भाधानादितः कृत्वा यावदुद्वाहमेव च ।
तावत्तु वैदिकं कर्म पश्चाच्छैवे ह्यनन्यभाक् ।
न मुख्यवृत्त्या वै स्कन्द लोकधर्मान्समाचरेत् ॥' इति ।

अत एव

'अन्तः कौलो बहिः शैवो लोकाचारे तु वैदिकः ।
सारमादाय तिष्ठेत नारिकेलफलं यथा ॥'

इत्यादि अन्यत्रोक्तम् ॥

ननु मुख्यया वृत्त्या यदि लोकधर्मान्नानुतिष्ठेत् तच्छैवशास्त्राङ्गभावेन किं न वा ?—इत्याशङ्क्याह—

चाहिये अन्यत्र नहीं—यह कहते हैं—

इसलिये हे स्कन्द ! लोकधर्मों का आचरण मुख्य रूप से नहीं करना चाहिए ॥ २५०- ॥

निष्ठाशून्य होकर गौणी वृत्ति से लोकरक्षा के लिये लोकधर्म का आचरण करने वाले को कोई दोष नहीं होता । वही वहाँ कहा गया है—

'जो वर्णाश्रम के आचार है और लौकिक प्रायश्चित हैं उनको तथा प्रसिद्ध सम्बन्धों एवं देशधर्मों के (विषय में) विचार नहीं करना चाहिये ।'

गर्भाधान से लेकर जहाँ तक विवाह है वहाँ तक वैदिक कर्म करना उचित है । बाद में शैवाचार में (एकनिष्ठ होना चाहिये) । हे स्कन्द ! लोकधर्मों का आन्चरण मुख्य वृत्ति से नहीं करना चाहिये ।

इसीलिये—

'भीतर से कौल, बाहर से शैव, लोकाचार में वैदिक होना चाहिये । जिस प्रकार नारियल का फल (भीतर मधुरतत्त्वयुक्त होता है उसी प्रकार (योगी) तत्त्व का ग्रहण कर संसार में स्थित रहे ।'

इत्यादि अन्यत्र कहा गया है ।

प्रश्न—यदि (योगी) मुख्यवृत्ति से लोक धर्मों का अनुष्ठान न करे तो क्या शैवशास्त्र के अङ्ग के रूप में (करे) या न करे ?—यह शङ्का कर कहते हैं—

नान्यशास्त्रसमुद्दिष्टं स्रोतस्युक्तं निजे चरेत् ॥ २५१ ॥

'निजे स्रोतसि—आत्मीये शास्त्रे

'आ कण्ठतः पिबेन्मद्यम् .... ।'

इत्याद्युक्तमेवार्थं 'चरेत्' अनुतिष्ठेत्, न पुनस्तमपास्य

'सुरा न पेया ।'

इत्यादि शास्त्रान्तरोद्दिष्टम् । भगवता हि पृथगधिकारिभेदेन परस्परविलक्षणानि शास्त्राण्युपदिष्टानि,—इत्यन्यं प्रति उपदिष्टं कथमन्यस्यानुष्ठेयं स्यात् । तदुक्तं तत्र

'नान्यशास्त्रसमुद्दिष्टं न चान्यां देवतां स्मरेत् ।
विशुद्धभावनायुक्तः शिवैकगतमानसः ॥' इति ।

एतच्च समानतन्त्रापेक्षयापि योज्यं; यतस्तान्यपि क्रियादिभेदाद्भिन्नान्येव,—इत्यागमविदः । यदाहुः—

'क्रियादिभेदभेदेन तन्त्रभेदो यतः स्मृतः ।
तस्माद्यत्र यदेवोक्तं तत्कार्यं नान्यतन्त्रतः ॥ इति ।

और अन्यशास्त्र में कहे गये का अपने शास्त्र में आचरण नहीं करना चाहिये ॥ -२५१ ॥

अपने स्रोत में—अपने शास्त्र में ।

'कण्ठपर्यन्त मद्यपान करना चाहिये..........।'

इत्यादि उक्त अर्थ का आचरण करना चाहिये = अनुष्ठान करना चाहिये न कि उसको छोड़कर

'सुरा नहीं पीनी चाहिये ।'

इत्यादि दूसरे शास्त्रों में वर्णित का (अनुष्ठान करना चाहिये) परमेश्वर ने अलग-अलग अधिकारी के भेद से परस्पर विलक्षण शास्त्रों का उपदेश किया है—इसलिये दूसरे के लिये उपदिष्ट शास्त्र दूसरे के लिये अनुष्ठेय कैसे हो सकते हैं । वही वहाँ कहा गया है—

'न अन्य शास्त्र का उपदेश और न अन्य देवताओं का स्मरण करना चाहिये । विशुद्ध भावना से युक्त और शिवमात्र में लीनचित्त वाला होना चाहिये ।'

समानतन्त्र के साथ भी इसे जोड़ना चाहिये क्योंकि वे भी क्रिया आदि के भेद से भिन्न ही हैं—ऐसा आगमवेत्ता कहते हैं ।

जैसा कि कहते हैं—

'चूँकि क्रिया आदि के भेद से तन्त्र भिन्न भेद कहा गया है, इसलिये जो जहाँ

अपेक्षायां पुनरुत्पन्नायां शास्त्रान्तरादपेक्षणीयम्, अन्यथा हि तत्तदितिकर्त्तव्यताकलापस्यापरिपूर्तिः स्यात् । तथाहि श्रीपूर्वशास्त्रे—

'तत्र द्वारपतीनिष्ट्वा महास्त्रेणाभिमन्त्रितम् ।
पुष्पं विनिक्षिपेद्ध्यात्वा ज्वलद्विघ्नप्रकाशान्तये ॥'

इत्यादौ द्वारपतीनां कथमिष्टिः?—इत्यपेक्षायां समानतन्त्रात् श्रीत्रिशिरोभैरवात्

'ततो मूले उत्तरते नन्दिरुद्रं च जाह्नवीम् ।
महाकालं सदंष्ट्रं च यमुनां चैव दक्षिणे ॥'

इत्याद्यपेक्षणीयम् । अत्रैव च 'ज्वलत्पुष्पं कथं विनिक्षिपेत्' इत्यपेक्षायां समानतन्त्रे तत्क्षेपस्य सुस्पष्टमनभिधानात् समानकल्पाच्छ्रीस्वच्छन्दशास्त्रात्—

'भैरवास्त्रं समुच्चार्य पुष्पं संगृह्य भावितः ।
सप्ताभिमन्त्रितं कृत्वा ज्वलदग्निशिखाकुलम् ॥
नाराचास्त्रप्रयोगेण प्रविशेद् गृहमध्यतः ।'

इत्याद्यपेक्षणीयम् । नाराचास्त्रस्य च प्रयोगः कीदृक् ?—इत्यपेक्षायां समानकल्पेऽपि शास्त्रे तदनुपलम्भात् अत्यन्तमसमानात् अनन्तविजयाख्यात्

कहा गया है वही करना चाहिये न कि अन्य तन्त्र मे अन्य तन्त्र के अनुसार ।'

आवश्यकता होने पर दूसरे शास्त्र से अपेक्षित का (ग्रहण) करना चाहिये । अन्यथा भिन्न-भिन्न इति कर्त्तव्यताओं की पूर्त्ति नहीं होगी । श्रीपूर्वशास्त्र में—

'वहाँ द्वारपतियों का पूजन और ध्यान कर विघ्न की शान्ति के लिये महाअस्त्र से अभिमन्त्रित जलता हुआ पुष्प फेंकना चाहिये ।'

इत्यादि में द्वारपतियों की पूजा कैसे हो?—ऐसी अपेक्षा होने पर समानतन्त्र त्रिशिरोभैरव से

'इसके बाद मूल में उत्तर भाग में और नन्दिरुद्र एवं जाह्नवी की तथा दंष्ट्रायुक्त महाकाल, और यमुना को दक्षिण में (पूजना चाहिये) ।'

इत्यादि का अध्याहार करना चाहिये । यहीं पर 'जलते हुए पुष्प को कैसे फेंकना चाहिये' यह अपेक्षा होने पर समान तन्त्र में उसके फेंकने का स्पष्ट कथन न होने से समान स्तर वाले स्वच्छन्दतन्त्र से

'भैरव अस्त्र का उच्चारण कर, भावपूर्वक पुष्प का ग्रहण कर जलती हुई अग्निशिखा से युक्त (उसे) नाराच अस्त्र के प्रयोग से सात बार अभिमन्त्रित कर घर के मध्य से फेंकते हुए प्रवेश करना चाहिये ।'

इत्यादि का अध्याहार करना चाहिए । नाराच अस्त्र का प्रयोग कैसा होता है ?—इस अपेक्षा में समानकल्प शास्त्र में उसकी प्राप्ति न होने पर अत्यन्त असमान

सिद्धान्तशास्त्रात्—

'उत्तानं तु करं कृत्वा तिस्रोऽङ्गुल्यः प्रसारयेत्।
मध्यमाङ्गुष्ठकौ लग्नौ चालयेत मुहुर्मुहुः॥
नाराचः कीर्तितो ह्येवम् ....।'

इत्याद्यपेक्षणीयम् । अपेक्षानिवृत्तिर्हि नः फलं, सा च यत एव भवेत् तदेवापेक्षणीयं, किं समानत्वासमानत्वदुर्ग्रहेण । एवमपेक्षायां सत्यां समानादसमानाद्वा शास्त्रान्तरात् तावदपेक्षणीयं यावदपेक्षाया निवृत्तिः स्यात्, तदभावे पुनर्निर्निबन्धनमेव शास्त्रान्तरोक्तस्यापेक्षणीयत्वे सर्वस्यैव तत्प्रसङ्गादनवस्थितमेव शास्त्रार्थानुष्ठानं स्यात् । यदाहुः—

'सापेक्षत्वेऽप्यपेक्षैव मानं यावदपेक्षते।
तावदेवान्यतः कार्यं नान्यत्स्यादनवस्थितेः॥' इति ॥ २५१ ॥

ननु निखिलमिदं शास्त्रजातं भगवतैव सकलजगदुद्दिधीर्षयोपदिष्टं, तत्तदुक्तार्थानुष्ठानमवश्यकार्यं येन संसारमोहः शाम्येत्,—इति तद्यथास्तु, किमनेन विचारेण ?—इत्याशङ्क्याह—

यतो यद्यपि देवेन वेदाद्यपि निरूपितम् ।
तथापि किल सङ्कोचभावाभावविकल्पतः ॥ २५२ ॥

अनन्तविजय नामक सिद्धान्तशास्त्र से—

'हाथ को उत्तान कर तीन उंगलियों को फैलाना चाहिये । मध्यमा और अंगूठे को मिलाकार बार-बार चलाना चाहिये । इस प्रकार नाराच कहा गया है ।'

इत्यादि का अध्याहार करना चाहिये । अपेक्षा की पूर्ति हमारा लक्ष्य है वह जहाँ से हो जाय उसी का अध्याहार करना चाहिये । समान और असमान (शास्त्र) के दुराग्रह से क्या लाभ ? इस प्रकार अपेक्षा होने पर समान अथवा असमान अन्य शास्त्र से तब तक अध्याहार करते रहना चाहिये जब तक अपेक्षा की पूर्ति न हो जाय । उस (= अपेक्षा) का अभाव होने पर बिना किसी कारण के शास्त्रान्तरोक्त का अध्याहार करने पर सबकी ही अपेक्षा होने से शास्त्र के विषय के अनुष्ठान में अनवस्था हो जायगी । जैसा कि कहते हैं—

'सापेक्ष होने पर भी अपेक्षा ही प्रमाण है । जब तक अपेक्षा होती है तभी तक अन्यत्र से (अपेक्षा) करनी चाहिये । अन्यथा नहीं क्योंकि अनवस्था हो जायगी' ॥ २५१ ॥

प्रश्न—यह समस्त शास्त्रसमूह भगवान् के द्वारा ही समस्त संसार के उद्धार की इच्छा से उपदिष्ट हैं तो उनके द्वारा उनमें उक्त अर्थ का अनुष्ठान अवश्य करना चाहिये जिससे संसार का मोह शान्त हो जाय । तो वह जैसे भी हो, इस विचार से क्या ? यह शङ्का कर कहते हैं—

वेदादीनां सर्वशास्त्राणां परमेश्वर एवोपदेष्टा,—इति नास्ति विवादः; किंतु तेन सङ्कोचभावाभेदेन द्विधा शास्त्राण्युपदिष्टानि—कानिचिद्भेदप्रधानानि कानिचिदभेदप्रधानानि—इति । तत्र भेदप्रधानानि वेदादीनि शास्त्राणि, अभेदप्रधानानि च शैवादीनि ॥ २५२ ॥

तदाह—

सङ्कोचतारतम्येन पाशवं ज्ञानमीरितम् ।
विकासतारतम्येन पतिज्ञानं तु बाधकम् ॥ २५३ ॥

'सङ्कोचो' भेदप्रथा । पशूनामिदं 'पाशवं' वेदादि । 'विकासः' सङ्कोचाभावादभेदप्रथा, अत एव भेदप्रथाया बाध्यत्वादिदं बाधकम् । भेदो हि संसारः, स च सर्वेषामेवोच्छेद्यः,—इत्यविवादः । एवं च बाध्यबाधकयोः साङ्कर्येणानुष्ठानं दुष्येत्,—इति यथोक्तमेव युक्तम् । अत एवान्यत्र—

'पाशवं ज्ञानमुज्झित्वा पतिशास्त्रं समाश्रयेत् ।'

इत्याद्युक्तम् ॥ २५३ ॥

यद्यपि परमेश्वर ने ही वेद आदि का निरूपण किया है तो भी वह सङ्कोच के भाव और अभाव के विकल्प के अनुसार किया गया है ॥ २५२ ॥

वेद आदि सब शास्त्रों का उपदेशक परमेश्वर ही है—इसमें कोई विवाद नहीं है। किन्तु उन्होंने सङ्कोच के भाव एवं अभाव के भेद से शास्त्रों का उपदेश दो प्रकार से किया—कुछ भेदप्रधान कुछ अभेदप्रधान । उनमें वेद आदि शास्त्र भेदप्रधान हैं और शैव आदि अभेदप्रधान ॥ २५२ ॥

वह कहते हैं—

सङ्कोच के तारतम्य से उत्पन्न होने वाला ज्ञान पाशव (ज्ञान) कहा गया है । विकास के तारतम्य से उत्पन्न होने वाला पतिज्ञान (पाशव ज्ञान का) बाधक है ॥ २५३ ॥

सङ्कोच = भेदविस्तार । पशुओं के लिये यह = पाशव = वेद आदि । विकास = सङ्कोच के अभाव के कारण अभेद का विस्तार । इसलिये भेदप्रसार के बाध्य होने के कारण यह (= अभेदप्रथा) बाधक है । संसार ही भेद है और वह सबके लिये उच्छेद्य है—यह सिद्धान्त सर्वसम्मत है । इस प्रकार बाध्यबाधक का मिश्रित अनुष्ठान दोषयुक्त हो जायगा इसलिये यथोक्त ही ठीक है । इसीलिये अन्यत्र—

'पाशव ज्ञान को छोड़कर पतिशास्त्र का आश्रयण करना चाहिये ।'

इदानीं 'न द्वैतं नापि चाद्वैतम्' इति व्याचष्टे—

इदं द्वैतमिदं नेति परस्परनिषेधतः ।
मायीयभेदक्लृप्तं तत्स्यादकाल्पनिके कथम् ॥ २५४ ॥

यन्नाम किञ्चनेदं द्वैतं नानारूपत्वं तदपास्य ऐकात्म्यलक्षणमद्वैतमाश्रयेत्,—इत्यादि यदन्यत्रोक्तं, तदकाल्पनिके कवलीकृततत्तत्कल्पनाकलापे स्वात्ममात्रस्फुरत्तारूपे परे तत्त्वे कथं स्यात्, न युज्यते इत्यर्थः । यतस्तत् अन्यापोहरूपत्वेन परस्परप्रतिक्षेपात् 'माया' स्वरूपगोपनात्मिका पारमेश्वरी इच्छाशक्तिः, तत आगतो योऽसौ 'भेदः' तेन 'क्लृप्तम्' अनुप्राणितं कल्पनामात्रसतत्त्वमित्यर्थः ॥ २५४ ॥

किं चात्र प्रमाणम् ?—इत्याशङ्क्याह—

उक्तं भर्गशिखायां च मृत्युकालकलादिकम् ।
द्वैताद्वैतविकल्पोत्थं ग्रसते कृतधीरिति ॥ २५५ ॥

इह खलु अविकल्पकपरसंविदावेशवशात् कृतार्था 'धीः' ज्ञानं यस्यासौ प्राप्तपरसंविदैकात्म्यो योगी, 'द्वैताद्वैतविकल्पात्' उत्थितं भेदानुप्राणनयोल्लसितं,

---

इत्यादि कहा गया है ॥ २५३ ॥

अब 'न द्वैत और न अद्वैत' इसकी व्याख्या करते हैं—

'यह द्वैत है' 'यह नहीं' इस प्रकार परस्पर निषेध के रूप में उत्पन्न ज्ञान मायीय भेद के द्वारा उत्पन्न होता है । अकाल्पनिक ज्ञान के विषय में यह कैसे हो सकता है ॥ २५४ ॥

जो कुछ द्वैत = अनेकरूपता, है उसको छोड़कर ऐकात्म्यलक्षण वाले अद्वैत को मानना चाहिये—इत्यादि जो अन्यत्र कहा गया वह अकाल्पनिक के विषय में = तत्तत् कल्पनासमूह को ग्रसने वाले स्वात्ममात्रस्फुरत्तारूप परतत्त्व के विषय में, कैसे होगी = उचित नहीं है । क्योंकि वह—अन्यापोहरूप होने से परस्पर प्रतिक्षेप के कारण मायास्वरूपगोपनवाली पारमेश्वरी इच्छाशक्ति, उससे आया हुआ जो यह भेद उससे क्लृप्त = अनुप्राणित कल्पनामात्र है ॥ २५५ ॥

इसमें क्या प्रमाण है ?—यह शङ्का कर कहते हैं—

भर्गशिखा में कहा गया है कि मृत्यु, काल, कला आदि द्वैत-अद्वैत के विकल्प से उत्पन्न ज्ञान को कृतार्थ (योगी) आत्मसात् कर लेता है ॥ २५५ ॥

विकल्परहित परासंविद् के आवेश के कारण कृतार्थ हो गई है धी = ज्ञान जिसकी वह, पर संविद् के साथ तादात्म्य प्राप्त करने वाला योगी, द्वैत अद्वैत के

नात्र काचिज्जन्ममरणादिका मानमेयादिरूपा च कल्पनास्तीत्यर्थः । यदुक्तं तत्र—

'मृत्युं च कालं च कलाकलापं विकारजातं प्रतिपत्तिजालम् ।
ऐकात्म्यनानात्मवितर्कजातं तदा स सर्वं कवलीकरोति ॥'

इति ॥ २५५ ॥

अथ 'लिङ्गपूजादिकं न च' इति व्याकुरुते—

सिद्धान्ते लिङ्गपूजोक्ता विश्वाध्वमयताविदे ।
कुलादिषु निषिद्धासौ देहे विश्वात्मताविदे ॥ २५६ ॥
इह सर्वात्मके कस्मात्तद्विधिप्रतिषेधने ।

'विश्वः' षट्त्रिंशत्तत्त्वात्मको' योऽसौ 'अध्वा' तद्रूपतां वेत्तुं 'सिद्धान्ते' भेददर्शने लिङ्गपूजाविधिर्विहितः । पारमेश्वरं हि लिङ्गं गर्भीकृतनिखिलाध्वा-प्रपञ्चम्,—इति तत्पूजनेन समग्रमेवेदं जगत्साक्षात्कृतं भवेदिति भावः । यदाहुः—

'लिङ्गे परमशिवान्तां व्याप्तिं पीठे सदाशिवप्रान्ताम् ।
ब्रह्मशिलायां मायापर्यन्तां भावयद्भिरिमैः ॥'

इति, 'इष्टेन शिवलिङ्गेन विश्वं संतर्पितं भवेत् ।'

विकल्प से उठा हुआ = भेद के अनुप्राणन से उल्लसित, मृत्युकाल-कला आदि को ग्रसता है = आत्मसात् करता है अर्थात् यहाँ कोई प्रमाता प्रमेय आदि तथा जननमरण आदि कल्पना नहीं है । जैसा कि वहाँ (=भर्गशिखा में) कहा गया है—

'उस समय वह मृत्यु, काल, कलासमूह, विकारजात, ज्ञानसमूह, ऐकात्म्य नानात्म वितर्कसमूह (इन) सबका ग्रसन कर लेता है' ॥ २५५ ॥

अब 'लिङ्गपूजा आदि नहीं' इसकी व्याख्या करते हैं—

विश्वाध्वमयता को बतलाने वाले 'शैवसिद्धान्त' दर्शन में लिङ्गपूजा का विधान है । देह को समस्त अध्वाओं का प्रतिरूप मानने वाले कौल दर्शन में वह निषिद्ध है । इस सर्वात्मक दर्शन में उसकी विधि और प्रतिषेध क्यों ? ॥ २५६-२५७- ॥

विश्व = छत्तीस तत्त्वों वाला जो यह अध्वा, उस रूपता को जानने के लिये सिद्धान्त में = भेदवाले शैवसिद्धान्त दर्शन में लिङ्गपूजा की विधि विहित है । परमेश्वर का लिङ्ग समस्त, अध्वप्रपञ्च को अपने गर्भ में किये हुए है । इसलिये उसकी पूजा से इस समस्त जगत् का साक्षात्कार होता है । जैसा कि कहते हैं—

'लिङ्ग में परमशिवपर्यन्त पीठ में सदाशिव पर्यन्त और ब्रह्मशिला में मायापर्यन्त भावना करने वाले इनके द्वारा (परम शिव का साक्षात्कार किया जाता है) ।'

और

इति च । 'कुलादौ' अद्वयदर्शने पुनरसौ लिङ्गपूजा 'निषिद्धा' यतो देह एव सर्वाध्वमयः,—इति तत्रैव तत्साक्षात्कारः सुलभः,—इति किमनुपपत्तिना बाह्येन लिङ्गादिना फलम् । यदुक्तम्—

'यजेदाध्यात्मिकं लिङ्गं बाह्यं लिङ्गं न पूजयेत् ।' इति ।

तथा

'हृदयगुहागे गतं सर्वज्ञं सर्वगं परित्यज्य ।
प्रणमति मितमतिरशिवं शिवाशयाश्मादिमश्लाघ्यम् ॥' इति ।

इह पुनः परमाद्वयरूपे त्रिकदर्शने तद्विधिना तन्निषेधेन वा न किंचित्प्रयोजनम्,—इत्युक्तं 'नात्र लिङ्गपूजा नापि तत्परित्यागः' इति । यत इदं सर्वात्मकं, यावता हि पारमेश्वरपरसंवित्स्फाररूपतया इदं जगत्परिज्ञेयं, तच्च सर्वस्यैव संवित्स्फाररूपत्वात् देहनिष्ठतया अस्तु, अन्यथा वा, किं नाम सार्वात्म्यप्रतिपत्तिविघ्नभूतेन देहबाह्याद्यभिमानेन भवेत्,—इति भावः । यदाहुः—

'न क्वापि गत्वा हित्वा वा न किञ्चिदिदमेव ये ।
भव त्वद्धाम पश्यन्ति भव्यास्तेभ्यो नमो नमः ॥'

इति ॥ १५६ ॥

'शिवलिङ्ग के पूजित होने से विश्व तर्पित हो जाता है ।'

कुल आदि में = अद्वय वाले दर्शन में यह लिङ्गपूजा निषिद्ध है क्योंकि शरीर ही सर्वाध्वमय है । इसलिये उसी में उस (विश्व) का साक्षात्कार सुलभ है । इसलिये असमीचीन बाह्य लिङ्ग आदि से क्या लाभ ? जैसा कि कहा गया है—

'आध्यात्मिक लिङ्ग की पूजा करनी चाहिये । बाह्य लिङ्ग को नहीं पूजना चाहिये ।'

तथा—

'हृदयगुहा रूपीघर में स्थित सर्वज्ञ सर्वगामी (आत्मदेव) को छोड़कर मन्दबुद्धि (पुरुष) शिव की आशा से निन्द्य अशिव पत्थर आदि को प्रणाम करता है ।'

यहाँ अर्थात् परमाद्वय रूप त्रिकदर्शन में उसके विधान अथवा उसके निषेध से कोई प्रयोजन नहीं है । इसलिये कहा गया—'न यहाँ लिङ्ग पूजा (का विधान है) न उसका परित्याग । चूँकि यह सर्वात्मक = यह जगत्, परमेश्वर की परासंवित् के स्फार के रूप में परिज्ञेय है तो वह सबके ही संवित्स्फार रूप होने से देहनिष्ठ हो या अन्यथा, सार्वात्म्यज्ञान के विघ्नभूत देह बाह्य आदि के अभिमान से क्या होता है ।' जैसा कि कहते हैं—

'हे भव! जो भव्य लोग न कहीं जाकर न कुछ छोड़कर इस तुम्हारे धाम को ही देखते हैं उन्हें नमस्कार है' ॥ २५६ ॥

इदानीं जटाभस्मादिसंग्रहादि आचष्टे—

नियमानुप्रवेशेन तादात्म्यप्रतिपत्तये ॥ २५७ ॥
जटादि कौले त्यागोऽस्य सुखोपायोपदेशतः ।

'नियमाः'

'जटी मुण्डी शिखी दण्डी पञ्चमुद्राविभूषितः।
प्रमादान्मैथुनं कृत्वा मम द्रोही महेश्वरि ॥'

इत्याद्युक्त्या वैराग्यादयः, तत्र 'अनुप्रवेशोऽभ्यासः, तेन या 'तादात्म्यप्रतिपत्तिः' पारमेश्वरस्वरूपसमावेशः, तन्निमित्तं सिद्धान्ते बहुक्लेशसाध्यं जटाभस्मादि विहितम् । यदुक्तम्—

'कलातत्त्वपवित्राणुशक्तिमन्त्रेशसंख्यया ।
विभज्य केशान्संपात्य प्रत्यंशं संहिताणुभिः ॥
व्रतेश्वरस्य पुरतो बध्नीयाच्छिवतेजसा ।' इति ।

तथा

'व्रतिनो जटिनो मुण्डास्तेष्वग्र्या भस्मपाण्डुराः ।
तिलकैः पुण्ड्रकैः पट्टैर्भूषिता भूमिपादयः ॥' इति ।

अब जटा भस्म आदि के संग्रह इत्यादि को कहते हैं—

(परमेश्वर के साथ) तादात्म्य भाव के लिये नियमानुप्रवेश के साथ जटा आदि (का विधान) है किन्तु कौलमत में सुखोपाय का उपदेश होने के कारण उन (जटा आदि) का त्याग विहित है ॥ -२५७-२५८- ॥

'नियम'

'हे महेश्वरि ! जटी, मुण्डी, शिखी, दण्डी, पाँच मुद्राओं से विभूषित (व्यक्ति) प्रमादवश भी मैथुन कर मेरा द्रोही होता है ।'

इत्यादि उक्ति के अनुसार वैराग्य आदि ही नियम हैं । उसमें अनुप्रवेश = अभ्यास, उससे जो तादात्म्य का ज्ञान = पारमेश्वर स्वरूप का समावेश, उसके लिये सिद्धान्त में बहुत कष्टसाध्य जटा, भस्म आदि का विधान किया गया है । जैसा कि कहा गया—

कला, तत्त्व, पवित्र अणु, शक्ति, मन्त्रेश की संख्या के अनुसार बालों को अलग कर, उनको संहित अणुओं के द्वारा प्रत्यंश गिराकर व्रतेश के सामने शेवतेज से युक्त (जटा का) बन्धन करे ।

'व्रती, जटाधारी, मुण्डी, इनमें भस्मपाण्डुर (साधक) अग्रगण्य हैं । तिलक, पुण्ड्रक और पद से राजा आदि भूषित होते हैं ।'

'कौले' कुलदर्शने पुनः 'अस्य' जटाभस्मादेः 'त्यागो' निषेधो विहितः,—इत्यर्थः । यदुक्तम्—

'जटाभस्मादिचिह्नं च ध्वजं कापालिकं व्रतम् ।
शूलं खट्वाङ्गमत्युग्रं धारयेद्यस्तु भूतले ॥
न तस्य सङ्गमं कुर्यात्कर्मणा मनसा गिरा ।' इति ।

यतोऽत्र

'यत्र यत्र मिलिता मरीचयस्तत्र तत्र विभुरेव जृम्भते ।'

इत्युक्त्या विषयासङ्गेऽपि पारमेश्वरस्वरूपापत्तेः, 'सुखेन' अयत्नेन 'उपायस्योपदेशः' यदुक्तम्—

'पूर्वैर्निरोधः कथितो वैराग्याभ्यासयोगतः ।
अस्माभिस्तु निरोधोऽयमयत्नेनोपदिश्यते ॥' इति ।

निष्परिग्रहतादि पुनः पृथङ् न व्याख्यातम् अनेनैव गतार्थत्वात्, प्रथमतुर्यपादाभ्यामेव हि एतदर्थोऽभिहितः,—इति भावः । इह पुनः सार्वात्म्यात् तद्विधिप्रतिषेधने न भवतः,—इति प्राच्येन संबन्धः । इह हि संविदैकात्म्यं नामोपेयम्, तत्र च यदेव यदा संनिकृष्टं तदेव तदा ग्राह्यम्, इतरत् तु त्याज्यम्,—

कौल में = कुलदर्शन में, इसका = जटा भस्म आदि का, त्याग = निषेध, विहित है । जैसा कि कहा गया—

'जो व्यक्ति पृथ्वी पर जटा, भस्म आदि चिह्न, ध्वज, कापालिक व्रत, शूल, उग्र खट्वाङ्ग धारण करता है (कौल साधक को) मन, वाणी और कर्म से उसका साथ नहीं करना चाहिये ।'

क्योंकि यहाँ

'जहाँ-जहाँ किरणें मिली हैं वहाँ-वहाँ परमात्मा ही प्रकाशित है ।'

इत्यादि उक्ति के अनुसार विषय की आसक्ति में भी परमेश्वर के स्वरूप की आपत्ति उपलब्धि है । सुख से = विना प्रयास के । उपास्य का उपदेश जैसा कि कहा गया—

'पूर्ववर्ती (पतञ्जलि आदि) ने अभ्यास एवं वैराग्य के द्वारा निरोध कहा है और हमलोग इस निरोध को बिना प्रयास के कहते हैं ।'

असंग्रह आदि की पृथक् चर्चा नहीं की गयी क्योंकि वह (= असङ्ग आदि) इसी से गतार्थ है । उपर्युक्त श्लोक के प्रथम एवं चतुर्थ पादों से यह अर्थ कह दिया गया । सर्वात्मकता के कारण यहाँ उसका विधान या प्रतिषेध नहीं होता—ऐसा पूर्व (प्रकरण) से सम्बन्ध है । यहाँ संविद् की एकात्मता उपेय है, उसमें जो जब संनिकृष्ट हो उसे तभी ग्रहण कर लेना चाहिये अन्य को छोड़ देना चाहिये ।

इति जटादेर्विधिरस्तु निषेधो वा किमनेन नः प्रयोजनम् । यद्वक्ष्यति—

'परतत्त्वप्रवेशे तु यमेव निकटं यदा ।
उपायं वेत्ति स ग्राह्यस्तदा त्याज्योऽथ वा क्वचित् ॥' (४।२७९)

इति ॥ २५७ ॥

अथ व्रतादीनां चरणाचरणं व्याचष्टे—

व्रतचर्या च मन्त्रार्थतादात्म्यप्रतिपत्तये ॥ २५८ ॥
तन्निषेधस्तु मन्त्रार्थसार्वात्म्यप्रतिपत्तये ।

चशब्दात् सिद्धान्ते उक्ता,—इत्यनुवर्तनीयम् 'मन्त्रार्थो नियतो वाच्यदेवतादिः, 'तन्निषेधः' अर्थात्कौले । 'सार्वात्म्यं' विश्वाभेदः । इह पुनस्तस्या न विधिर्निषेधो वा,—इत्येतत् सर्व पूर्वमेव व्याख्यातम्, इति न पुनरायस्तम् ॥ २५८ ॥

अथ क्षेत्रादिसंप्रवेशं व्याख्यातुमाह—

क्षेत्रपीठोपपीठेषु प्रवेशो विघ्नशान्तये ॥ २५९ ॥
मन्त्राद्याराधकस्याथ तल्लाभायोपदिश्यते ।

'क्षेत्रं' मेलापस्थानं, 'पीठं' कामरूपादि 'उपपीठं' देवीकोट्टादि । 'तल्लाभाय'

इसलिये जटा आदि का विधान हो या निषेध इससे हमें क्या लेना-देना है । जैसा कि कहेंगे—

'परतत्त्व में प्रवेश के सम्बन्ध में जिस किसी उपाय को निकटवर्त्ती जानते हो तब वही ग्राह्य अथवा कभी त्याज्य है ॥ २५७ ॥'

अब व्रत आदि के आचरण को कहते हैं—

व्रत का आचरण मन्त्र के अर्थ के साथ तादात्म्य भाव के लिये है और उसका निषेध मन्त्रार्थ के साथ सर्वात्मभाव के लिये है ॥ -२५८-२५९ ॥

'च' शब्द से 'सिद्धान्त में कही गई'—इसका अध्याहार करना चाहिये । मन्त्रार्थ = निश्चित वाच्य देवता आदि । उसका निषेध कौल दर्शन में । 'सार्वात्म्य = विश्व के साथ अभेद । यहाँ उस (= सार्वात्म्यप्रतिपत्ति) का न तो विधान है न निषेध—यह सब पहले ही कह दिया गया अतः पुनः विस्तार नहीं किया गया ॥ २५८ ॥

अब क्षेत्र आदि में प्रवेश की व्याख्या करने के लिये कहते हैं—

क्षेत्र पीठ और उपपीठ में प्रवेश विघ्न की शान्ति के लिये किया जाता है । और मन्त्र आदि के आराधक के लिये (यह प्रवेश) उस (= सिद्धि आदि) के लाभ के लिये कहा जाता है ॥ -२५९-२६०- ॥

इति तस्य मन्त्रादेः प्रियमेलापादिक्रमेण सिद्धादेर्लभः, तन्निमित्तं वा । यदुक्तम्—

'क्षेत्रोपक्षेत्रसंदोहाद्याश्रयान्निर्मलो भवेत् ॥' इति ॥ २५९ ॥

अन्यत्र चात्र निषेधः कृतः—इत्याह—

क्षेत्रादिगमनाभावविधिस्तु स्वात्मनस्तथा ॥ २६० ॥
वैश्वरूप्येण पूर्णत्वं ज्ञातुमित्यपि वर्णितम् ।

आदिशब्दात् पीठादेर्ग्रहणम् । 'तथा' इति प्रागुक्तेन प्रकारेण ।

तदुक्तम्—

'नातः किञ्चिदपास्यं प्रक्षेप्तव्यं च नात्र किञ्चिदपि।
परिपूर्णे सत्यात्मनि किं नु क्षेत्रादिपर्यटनैः ॥' इति ।

इह पुनरेतदुभयमपि नास्तीति प्रागेवोक्तम्, इत्याह—'इत्यपि वर्णितम्' इति ।

तदुक्तम्—

'इह सर्वात्मके कस्मात्तद्विधिप्रतिषेधने ।'
(४।२५७) इति ॥ २६० ॥

क्षेत्र = मिलाने का स्थान । पीठ = कामरूप आदि । उपपीठ = देवीकोट्ट आदि । उसके लाभ के लिये—उस = मन्त्र आदि का प्रतिमिलन आदि क्रम से सिद्धि आदि का लाभ या उसका हेतु । जैसा कि कहा गया—

'क्षेत्र उपक्षेत्र सन्दोह आदि के आश्रय से (साधक) निर्मल होता है' ॥ २५९ ॥

अन्यत्र इसका निषेध किया गया है—यह कहते हैं—

क्षेत्र आदि के गमन के निषेध का नियम उस पूर्वोक्त प्रकार से विश्वरूपता के द्वारा पूर्णता के ज्ञान के लिये है यह भी कहा गया है ॥ -२६०-२६१- ॥

'आदि' शब्द से पीठ आदि का ग्रहण है । तथा = पूर्वोक्त प्रकार से ।

वही कहा गया है—

'न तो इससे कुछ हटाना है और न इसमें कुछ जोड़ना है । सत्यात्मा के परिपूर्ण होने पर क्षेत्र (= तीर्थ) आदि के भ्रमण से क्या लाभ ।'

यहाँ यह दोनों नहीं है—ऐसा पहले ही कह चुके हैं—यह कहते हैं—'इत्यपि वर्णितम्' ।

वही कहा गया है—

इस सर्वात्मक में विधि प्रतिषेध किस कारण से और कैसे सम्भव

अथ समयादिप्रपालनमाचष्टे—

समयाचारसद्भावः पाल्यत्वेनोपदिश्यते ॥ २६१ ॥
भेदप्राणतया तत्तत्त्यागात्तत्त्वविशुद्धये ।
समयादिनिषेधस्तु मतशास्त्रेषु कथ्यते ॥ २६२ ॥
निर्मर्यादं स्वसंबोधं संपूर्णं बुद्ध्यतामिति ।

इदं कुर्यादिदं न कुर्यात्,—इत्येवमात्मा समयाचारः । 'भेदप्राणतया' इति किञ्चित् हि त्यक्त्वा किञ्चिदुपादीयते इत्येवमात्मा भेदः, यथा शास्त्रान्तरत्यागेन स्वशास्त्रे प्ररोहः । यद्वक्ष्यति—

'अन्यस्तमन्त्रो नासीत सेव्यं शास्त्रान्तरं च नो।
अप्ररूढं हि विज्ञानं कम्पेतेतरभावनात् ॥' (२५।५६३)

इति । समविषमलक्षणेषु 'मतशास्त्रेषु' पुनः 'समयादेर्निषेधो' विहितः । तथा च तत्रत्यो ग्रन्थः इत्याह—'निर्मर्यादमित्यादि' । तद्धि परं तत्त्वं 'स्वसंबोधं' स्वप्रकाशम्, अत एवानन्यापेक्षत्वात् 'सम्पूर्णम्,' अत एव चानियत-रूपत्वात् 'निर्मर्यादं' निर्यन्त्रणं 'बुध्यताम्' अनुभूयतामित्यर्थः । तदेवम् एवंविधे

है ॥ २६० ॥

समय आदि के पालन की व्याख्या करते हैं—

समयाचार के पालन का उपदेश, भेदप्रधान के रूप में तत्तत् के त्याग के द्वारा तत्त्व की शुद्धता के लिये किया जाता है । मत शास्त्रों मे समयाचार आदि का निषेध है । (उसका विचार है कि) असीम स्वसंबोध को पूर्णरूप में जानना चाहिये ॥ -२६१-२६३- ॥

'यह करना चाहिये यह नहीं करना चाहिये' इस प्रकार का (विधिनिषेध) समयाचार (कहा जाता है) । भेदात्मक रूप से—यहाँ कुछ छोड़कर कुछ लिया जाता है—इस प्रकार भेद । जैसे कि दूसरे शास्त्रों का त्याग करने से अपने शास्त्र में निष्ठा । जैसा कि कहेंगे—'विना न्यास के मन्त्र का अनुष्ठान नहीं करना चाहिये। दूसरे शास्त्र को नहीं मानना चाहिये । दृढ़तारहित विज्ञान दूसरे की भावना से कम्पित होता है ।'

समविषम लक्षण वाले मतशास्त्रों में समय आदि का निषेध विहित है । वहाँ का ग्रन्थ कहते हैं—निर्मर्यादम् ... ।

वह पर तत्त्व स्वसम्बोध = स्वप्रकाश है । इसलिए अनन्यापेक्ष होने के कारण सम्पूर्ण है । और इसीलिए अनियत रूप वाला होने से उसे निर्मर्याद = बिना किसी रोक टोक के, समझा जाय = अनुभव किया जाय । परतत्त्व के ऐसा होने पर त्याग ग्रहण आदि हजारों अपेक्षाओं से युक्त समयाचार शुद्धि का कारण कैसे

परे तत्त्वे कथं नाम हानोपादानाद्यपेक्षासहस्रसंभिन्नः समयाचारः शुद्धिनिमित्तम्, इति भावः ॥ २६२ ॥

अथ 'परस्वरूपलिङ्गादि नामगोत्रादिकं च यत्' इति व्याख्यातुकामः क्रमेण परकीयं स्वकीयं च रूपाद्याचष्टे—

परकीयमिदं रूपं ध्येयमेतत्तु मे निजम् ॥ २६३ ॥
ज्वालादिलिङ्गं चान्यस्य कपालादि तु मे निजम्।

'एतत्' इति ध्यातृस्वभावम् । 'ज्वालादि' इति बाह्यैषणादिसमुत्थत्वात् परकीयम् । 'निजम्' इति स्वशरीरावस्थितम् ॥ २६३ ॥

'लिङ्गादि' इत्यादिशब्दार्थमाह—

आदिशब्दात्तपश्चर्यावेलातिथ्यादि कथ्यते ॥ २६४ ॥

'तपः' चान्द्रायणादि, 'चर्या' चर्यापादोक्त आचारः, 'वेला' मध्याह्नार्धरात्रादिरूपा, 'तिथिः' प्रतिपदारूपा ॥ २६४ ॥

नाम —क्तिशिवाद्यन्तमेतस्य मम नान्यथा।

'एतस्य' सैद्धान्तिकस्य साधकस्य, व्रतपरिग्रहादौ पुष्पपातादिक्रमेण क्रियमाणं

हो सकता है—यह भाव है ॥ २६२ ॥

अब 'जो पर स्वरूप लिङ्ग आदि और ना गोत्र आदि है'—इसकी व्याख्या करने के इच्छुक क्रमशः परकीय और स्वकीय रूप आदि को कहते हैं—

ध्यान के योग्य जो यह परकीय रूप है वह मेरा अपना (रूप) है ज्वाला आदि जो अन्य का लिङ्ग है (वह भी अपना है) और (मेरे) कपाल आदि तो मेरे हैं ही (ऐसा ध्यान करना चाहिये) ॥ -२६३-२६४- ॥

यह = ध्याता के स्वभाव वाला । ज्वाला आदि—बाह्य इच्छा आदि से उत्पन्न होने के कारण परकीय । निज = अपने शरीर में वर्त्तमान ।

'लिङ्ग आदि' यहाँ आदि शब्द के अर्थ को कहते हैं—

(उक्त श्लोक में) 'आदि' पद से तपस्, चर्या, वेला, आतिथ्य आदि कहा जाता है ॥ -२६४ ॥

तपः = चान्द्रायण आदि । चर्या = चर्यापाद में कहा गया आचार । वेला = मध्याह्न आधीरात आदि । तिथि = प्रतिपदा आदि ।

इसके (= शैव सिद्धान्त) के अनुसार शक्ति शिव से लेकर अन्त तक मेरा ही नाम है अन्य का नहीं (ऐसा समझना चाहिये) ॥ २६५- ॥

इसके = सैद्धान्तिक साधक के, व्रत परिग्रह आदि में पुष्पपात आदि क्रम से

नाम शक्तिशिवाद्यन्तं स्यात् । तेन शिखाशक्तिः, ईशानशिवः; आदिशब्दाद्गणाद्यन्तं, यथा कवचगणः । तदुक्तम्—

'स्रजं विमोचयेन्नाम दीक्षितानां तदादिकम् ।
शिवान्तकं द्विजेन्द्राणामितरेषां गणान्तकम् ॥' इति ।

तथा

'शिशुना क्षिप्तमकामान्निपतेद्यत्र नाम तत्पूर्वम् ।
शक्त्यन्तं नारीणां शिवशब्दान्तं नृणां कुर्यात् ॥
एवं विप्रक्षत्रियविशां शूद्राणां तु भवेद्गणप्रान्तम्॥' इति ।

'अन्यथा' इति बोध्याद्यन्तम्, स्वस्वसंततिक्रमेणौवल्ल्यन्तं हि पूजा नाम भवेत्,—इति रहस्यशास्त्रविदः,

तदुक्तम्—

'बोधिः प्रभुस्तथा योगी आनन्दः पाद आवलिः ।
वीराणां वीरपत्नीनां कल्प्यं नामैतदन्तकम् ॥' इति ।

तेन सत्यबोधिः विश्वप्रभुरित्यादि ॥

किया जाने वाला नाम शक्ति शिव आदि शब्दान्त वाला होता है । इस प्रकार शिखा शक्ति, ईशान शिव; आदि शब्द से गण आदि अन्तवाला होता है—जैसे कवचगण । वही कहा गया है—

'दीक्षितों के लिये तदादिक (= शक्त्यादिक) माला फेंकनी चाहिये । द्विजों के लिये शिवान्तक और दूसरों (= शूद्रों) के लिये गणान्तक नाम करे ॥'

तथा—

'शिशु के द्वारा निराकाङ्क्ष फेंका गया (पुष्प) जहाँ गिरे तत्पूर्वक नामकरण करना चाहिये । नारियों का शक्त्यन्त और पुरुषों का शिवान्त इस प्रकार ब्राह्मण, क्षत्रिय, वैश्यों का (नामकरण करना चाहिये) । शूद्रों का गणान्त (नाम होना चाहिये) ।'

अन्यथा = बोध्य आदि शब्द अन्त में होना चाहिये । अपनी-अपनी परम्परा के क्रम से ओवल्यन्त पूजा नाम होता है—ऐसा रहस्य शास्त्र को जाने वाले कहते हैं ।

वही कहा गया है—

'वीरों का और वीरपत्नियों का नाम बोधि, प्रभु, योगी, आनन्द, पाद और आवलि (इनमें से किसी एक शब्द के) अन्तवाला रखना चाहिये ।'

इस प्रकार—सत्यबोधि, विश्वप्रभु इत्यादि ॥ २६४-२६५ ॥

गोत्रं च गुरुसंतानो मठिकाकुलशब्दितः॥ २६५ ॥

तस्य मठिकेति कुलमिति चाभिधानद्वयम् ॥ २६५ ॥

तत्र का मठिका ?—इत्याह—

श्रीसंततिस्त्र्यम्बकाख्या तदर्धामर्दसंज्ञिता ।
इत्यमर्धचतस्रोऽत्र मठिकाः शाङ्करे क्रमे ॥ २६६ ॥
युगक्रमेण कूर्माद्या मीनान्ता सिद्धसंततिः ।

न केवलमर्धचतस्र एव मठिका यावदन्या अपीत्याह—'युगेत्यादि' । आद्यशब्दस्तन्त्रेण व्याख्येयः; तेन कूर्मस्य त्रेतायुगावतारकस्य श्रीकूर्मनाथस्याद्यः कृतयुगावतारकः श्रीखगेन्द्रनाथः स आद्यो यस्याः सा तथेति । कुलशब्दस्य गुरुकुलमित्यादौ लोकप्रसिद्धेः पृथग्व्याख्यानं कृतम् ॥ २६६ ॥

'गोत्रादि' इत्यादिशब्दार्थमाह—

आदिशब्देन च घरं पल्ली पीठोपपीठकम् ॥ २६७ ॥
मुद्रा छुम्मेति तेषां च विधानं स्वपरस्थितम्।

'घरम्' इति षण्णां साधिकाराणां राजपुत्राणां भिन्नं भिन्नमाश्रमस्थानम् ।

गोत्र गुरुपरम्परा (को कहते हैं) वह 'मठिका' और 'कुल' शब्दों से कहा जाता है ॥ -२६५ ॥

उसमें मठिका या कुल ये दो नाम हैं ॥ २६५ ॥

उसमें मठिका क्या है ?—यह कहते हैं—

(प्रथम आह्निक की आठवीं कारिका में उक्त) यह गुरुपरम्परा त्र्यम्बक नाम वाली है । उसका आधा (आर्मद) नाम वाली है । इस प्रकार इस शैव क्रम में साढ़े चार मठिकायें है । सिद्धों की परम्परा युग के क्रम से 'कूर्म' से लेकर 'मन' संज्ञा पर्यन्त है ॥ २६६-२६७- ॥

केवल साढ़े चार मठिकायें ही नहीं बल्कि और भी है—यह कहते हैं—युग...। आद्य शब्द की तन्त्र से व्याख्या करनी चाहिये । इससे कूर्म का = त्रेतायुग में अवतरित श्री कूर्मनाथ का, आद्य = सत्ययुगावतारक = खगेन्द्रनाथ, वे प्रथम है जिसके वह उस प्रकार की मठिका है । कुल शब्द की, 'गुरुकुल' इत्यादि में लोकप्रसिद्धि के कारण, पृथक् व्याख्या नहीं की गई ॥ २६६ ॥

'गोत्र आदि'—यहाँ आदि शब्द के अर्थ को कहते हैं—

(पूर्वश्लोक में) आदि शब्द से 'घर', 'पल्ली', 'पीठ', 'उपपीठ', 'मुद्रा', 'छुम्मा' आदि उनका नाम अपनी-अपनी सन्तति के क्रम से रखा गया है ॥ -२६७-२६८- ॥

'पल्ली' भिक्षास्थानम् । यद्वक्ष्यति—

'एते हि साधिकाराः पूज्या येषामियं बहुविभेदा ।
संततिरनवच्छिन्ना चित्रा शिष्यप्रशिष्यमयी ॥
आनन्दावलिबोधिप्रभुपादान्ताथ योगिशब्दान्ता ।
एता ओवल्ल्यः स्युर्मुद्राषट्कं क्रमात्त्वेतत् ॥
दक्षाङ्गुष्ठादिकनिष्ठान्तमथ सा कनीयसी वामात् ।
द्विदशान्तोर्ध्वगकुण्डलिबैन्दवहृन्नाभिकन्दमिति छुम्माः ॥
शवराडबिल्लखट्टिल्लाः करबिल्लाम्बिलशरबिल्लाः ।
अडवी-डोम्बी-दक्षिणपल्ली कुम्भारभिल्लिकाक्षरपल्ली ॥
देवीकोट्टकुलाद्रित्रिपुरीकामाख्यमट्टहासश्च ।
दक्षिणपीठं चैतत्षट्कं घरपल्लिपीठगं क्रमशः ॥'
(२९।३९) इति ।

'स्वपरस्थितम्' इति स्वस्वसंततिक्रमेण भिन्नं भिन्नमित्यर्थः ॥ २६७ ॥

ननु गुरुसंतानादेरेवमुपदेशे किं प्रयोजनम् ?—इत्याशङ्क्याह—

तादात्म्यप्रतिपत्त्यै हि स्वं संतानं समाश्रयेत् ॥ २६८ ॥
भुञ्जीत पूजयेच्चक्रं परसंतानिना नहि ।

घर = छः साधिकार राजपुत्रों का भिन्न-भिन्न आश्रमस्थान । पल्ली = भिक्षास्थान । जैसा कि कहेंगे—

'ये साधिकार पूज्य हैं जिनकी, यह अनेक भेदों वाली, अनवच्छिन्न विचित्र शिष्यप्रशिष्यमयी सन्तिति है ।

आनन्द, अवलि, बोधि प्रभु एवं पाद अन्तवाले एवं योगी अन्तवाली ये ओवलियाँ हैं । छः मुद्रायें क्रमशः ये हैं'—

दायें अंगूठे से लेकर कनिष्ठा तक और बायीं कनिष्ठा (ये छः हैं) द्वादशान्त, ऊर्ध्व कुण्डली, बैन्दव, हृदय, नाभि और कन्द ये छः छुम्मा हैं ।

शबराड, बिल्ल, खट्टिल्ल, करबिल्ल, अम्बिल, शरबिल्ल (ये छः घर हैं)

अडवी, डोम्बी, दक्षिणपल्ली, कुम्भार, भिल्लिका एवं अक्षर (ये छः पल्लियाँ हैं) ।

देवीकोट्ट, कुलाद्रि, त्रिपुरी, कामाख्या, अट्टहास, और दक्षिणपीठ (ये छः पीठ हैं) ।

स्वपरस्थित = अपनी सन्तिति के क्रम से भिन्न-भिन्न हैं ॥ २६७-२६८ ॥

प्रश्न—गुरु सन्तान आदि के इस प्रकार के उपदेश में क्या प्रयोजन है ? यह शङ्का कर कहते हैं—

'स्वं संतानम्' इति श्रीमदमरनाथादिक्रमेण यस्य यथा संभवेत् । 'पर:' श्रीवरदेवादि: 'संतानो' ऽस्यास्तीति ॥ २६८ ॥

एतच्च अन्यत्र निषिद्धमित्याह—

एतच्च मतशास्त्रेषु निषिद्धं खण्डना यत: ॥ २६९ ॥
अखण्डेऽपि परे तत्त्वे भेदेनानेन जायते ।

'अनेन' इति समनन्तरोक्तेन हेयोपादेयरूपेण स्वपरसंतानादिनेत्यर्थ: । नहि अखण्डे परे तत्त्वे काचन एवंविधा हेयोपादेयरूपा खण्डना युज्यते—इत्याशय: ॥ २६९ ॥

एवमर्थमुखेन ग्रन्थं व्याख्याय समन्वयसङ्गत्यापि योजयति—

एवं क्षेत्रप्रवेशादि संताननियमान्तत: ॥ २७० ॥
नास्मिन्विधीयते तद्धि साक्षान्नौपयिकं शिवे।

'एवं' पूर्वोक्तनीत्या 'क्षेत्रप्रवेशादि' गोत्रशब्दोक्तसंताननियमान्तम् 'अस्मिन्' प्रस्तुते शास्त्रे 'न किचिद्विधीयते' क्षेत्रादि प्रवेष्टव्यमित्यादिविधिर्न क्रियते—इत्यर्थ: । यतस्तत् न शिवे साक्षादुपाय: । एतच्च बहुश: प्राङ्निर्णीतम्—इति न पुनरायस्तम् ॥

तादात्म्यभाव के लिये अपने सन्तान का आश्रयण करना चाहिये । दूसरी परम्परा वालों के साथ न तो भोग करना चाहिये न चक्रपूजा ॥ -२६८-२६९- ॥

'अपना सन्तान' = अमरनाथ आदि के क्रम से जिसका जैसा सम्भव हो । पर = इसके श्रीवरदेव आदि सन्तान हैं' ॥ २६८ ॥

मतशास्त्र में इसका निषेध किया गया है क्योंकि अखण्ड परतत्त्व में भी इस भेद के कारण (उसका) खण्डन होता है ॥ -२६९-२७०- ॥

इस = पूर्वोक्त हेयोपादेयरूप स्वपरसन्तान के कारण अखण्ड परतत्त्व में कोई इस प्रकार की हेयोपादेय रूपा खण्डना युक्त नहीं है ॥ २६९ ॥

अर्थमुख से ग्रन्थ की व्याख्या कर समन्वय की दृष्टि से भी योजना करते हैं—

इस प्रकार अनुपाय वाले त्रिकशास्त्र में क्षेत्रप्रवेश से लेकर सन्तान-नियम तक का विधान नहीं है ॥ -२७०-२७१- ॥

एवं = पूर्वोक्त नीति से, क्षेत्रप्रवेश से लेकर गोत्रशब्दोक्त सन्ताननियम पर्यन्त, इसमे = प्रस्तुत शास्त्र में, कुछ भी विहित नहीं है = 'क्षेत्र आदि में प्रवेश करना चाहिये' इत्यादि विधि नहीं की जाती । क्योंकि शिव के विषय में वह साक्षात् उपाय नहीं है । यह पहले कई बार कहा गया हैं अत: फिर विस्तार नहीं किया

ननु यदि नामात्र क्षेत्रप्रवेशादेर्न विधिः तर्हि तस्य निषेध एव पर्यवस्येत्? इत्याशङ्क्याह—

न तस्य च निषेधो यत्र तत्तत्त्वस्य खण्डनम् ॥ २७१ ॥

'यत्' यस्मात्, 'तत्' क्षेत्रप्रवेशादि, विश्वात्मनः परस्य 'तत्त्वस्य न खण्डनं' तदपेक्षया हि बहिः क्षेत्राद्येव नास्ति,—इति कुत्र प्रवेशाद्यपि भवेत्, इति तद्विषयोऽयं विधिर्निषेधो वा क्रियमाणो विकल्पमात्रवृत्तित्वात् नास्य स्वरूप-खण्डनायालम्—इति भावः ॥ २७१ ॥

अत आह—

विश्वात्मनो हि नाथस्य स्वस्मिन्रूपे विकल्पितौ ।
विधिर्निषेधो वा शक्तौ न स्वरूपस्य खण्डने ॥ २७२ ॥

अत एव चात्र सर्वमेव विहितं प्रतिषिद्धं च,—इत्यर्थगर्भीकारात् नैकत्रैव ग्रहः कार्यः,—इति तात्पर्यार्थः ॥ २७२ ॥

ननु यद्येवं तत् परतत्त्वविविक्षायाम् 'इदमुपादेयमिदं हेयम्' इत्यवश्याश्रयणीयो विभागः कथं सिद्ध्येत् ?—इत्याशङ्क्याह—

गया ॥ २७० ॥

प्रश्न—यदि यहाँ क्षेत्रप्रवेश आदि की विधि नहीं है तो उसका निषेध ही हो ?—यह शङ्का कर कहते हैं—

उसका निषेध नहीं है क्योंकि उस तत्त्व का खण्डन (अवयव, क्षेत्र, भेद आदि) नहीं है ॥ -२७१ ॥

यत् = जिस कारण, वह = क्षेत्रप्रवेश आदि । विश्वात्मक परतत्त्व का खण्डन नहीं है, उसकी अपेक्षा बाहर क्षेत्र आदि ही नहीं है तो प्रवेश आदि कहाँ होगा । इसलिये उस विषय में किया जाने वाला यह विधि अथवा निषेध केवल विकल्प में रहने के कारण इसके स्वरूप के खण्डन के लिये पर्याप्त नहीं हैं ॥ २७१ ॥

इसलिये कहते हैं—

विश्वमय परमेश्वर के अपने रूप में विकल्प रूप वाला होने पर विधि एवं निषेध उसके अपने स्वरूप का खण्डन (= भेद) करने में समर्थ नहीं हो सकते ॥ २७२ ॥

इसीलिये यहाँ विहित प्रतिषिद्ध सब—यह अर्थ गर्भ में रखने के कारण एक ही जगह ग्रहण (= उपादान) नहीं करना चाहिये ॥ २७२ ॥

प्रश्न—यदि ऐसा है तो परतत्त्व की विवक्षा में 'यह ग्राह्य है यह त्याज्य है'—ऐसा अवश्य आश्रयणीय भाग कैसे सिद्ध होगा ?—यह शङ्का कर कहते हैं—

परतत्त्वप्रवेशे तु यमेव निकटं यदा ।
उपायं वेत्ति स ग्राह्यस्तदा त्याज्योऽथ वा क्वचित् ॥ २७३ ॥
न यन्त्रणात्र कार्येति प्रोक्तं श्रीत्रिकशासने ।

इह परं प्रविविक्षुणा योगिना तत्र तावच्चेतः स्थिरीकार्यम्,—इति नास्ति विमतिः । तत्र पुनर्य एव यदा क्वचित् 'निकटो' हठपाकक्रमेण सहसैव परस्वरूपापत्तिनिमित्ततया संनिकृष्ट उपायः परिज्ञायते, स एव तदा ग्राह्योऽथवा अन्यथा त्याज्यो; न पुनर् इदमुपादेयमेव इदं त्याज्यमेव,—इत्येवमात्मा यन्त्रणा अत्र कार्या । तेन विषयासङ्गेऽपि कदाचित् परतत्त्वानुप्रवेशो भवेत् । क्वचिदित्य-नेन च 'संनिकृष्टत्वमसंनिकृष्टत्वं च उपायानां न प्रतिनियतम्' इति प्रकाशितम् । अनेन च 'किंत्वेतत्' इत्यादिको ग्रंथस्तात्पर्यतो व्याख्यातः । नन्वेवमपूर्वार्थकथने किं प्रमाणम्? इत्याशङ्क्योक्तम्—'इति प्रोक्तं श्रीत्रिकशासने' इति ॥ २७३ ॥

तत्रत्यमेव ग्रन्थं पठति—

समता सर्वदेवानामोवल्लीमन्त्रवर्णयोः ॥ २७४ ॥
आगमानां गतीनां च सर्वं शिवमयं यतः ।

'ओवल्ल्यो' बोध्यादयः षट् ज्येष्ठादिभेदभिन्ना ज्ञानसंततयः । 'गतीनां'

(योगी) परतत्त्व में प्रवेश के लिये जिस उपाय को निकट पाये उस समय उसी का ग्रहण कर ले । अथवा कहीं (आत्मप्रवेश में बाधक उपाय का) त्याग कर दे । इस विषय में आत्मपीडन नहीं करना चाहिये—ऐसा त्रिकशास्त्र में कहा गया है ॥ २७३-२७४- ॥

परतत्त्व में प्रवेश का इच्छुक योगी उसमें चित्त को स्थिर करे—इस विषय में किसी को विरोध नहीं है । वहाँ जो हो जब कहीं निकट = हठपाक के क्रम से सहसा परस्वरूपापत्ति के कारण के रूप में निकटवर्त्ती उपाय ज्ञात हो वही उस समय ग्राह्य है, अथवा = अन्यथा, त्याज्य है । न कि 'यह उपादेय है, यह त्याज्य है—ऐसी यन्त्रणा (= नियम) करनी चाहिये । इससे कभी विषय की आसक्ति होने पर भी परतत्त्व में अनुप्रवेश हो जाता है । कहीं—इससे उपायों की निकटता अथवा दूरता निश्चित नहीं है—यह प्रकाशित हुआ । इससे 'किन्तु यह'—इतना ग्रन्थ तात्पर्य रूप से व्याख्यात हो गया । प्रश्न—इस प्रकार अपूर्व अर्थ के कथन में क्या प्रमाण है ? यह शङ्का कर कहा गया—त्रिक शासन में ऐसा कह गया है ॥ २७३ ॥

वहाँ का ग्रन्थ ही पढ़ते हैं—

समस्त देवों की, ओवल्ली, मन्त्र, वर्ण, आगमों और गतियों की समानता है क्योंकि सब शिवमय है ॥ -२७४-२७५- ॥

भाववृत्तिद्रव्यभूमिकादिरूपाणां प्रकाराणामित्यर्थः । अत्र हेतुः 'सर्वं शिवमयं यतः' इति । यदुक्तम्—

'समता सर्वभावानां वृत्तीनां चैव सर्वशः ।
समता सर्वदृष्टीनां द्रव्याणां चैव सर्वशः ॥
भूमिकानां च सर्वासामोवल्लीनां तथैव च।
समता सर्वदेवीनां वर्णानां चैव सर्वशः ॥' इति ॥ २७४ ॥

ननु को नाम सर्वं शिवमयं जानाति, यस्यैवमुपदेशः प्ररोहमियात् ? इत्याशङ्क्याह—

स ह्यखण्डितसद्भावं शिवतत्त्वं प्रपश्यति ॥ २७५ ॥
यो ह्यखण्डितसद्भावमात्मतत्त्वं प्रपद्यते ।

आत्मज्ञानमेव शिवतत्त्वसाक्षात्कारे निमित्तम्,—इत्यभिदधता नात्र दर्शनान्तरवत् व्यतिरिक्तोपायान्वेषणाद्यायाससाध्यत्वम्,—इत्यावेदितम् ॥ २७५ ॥

न च अत्र सर्व एव पात्रं, किं तु कश्चिदेव तीव्रतमशक्तिपातपवित्रितः,—इत्याह—

केतकीकुसुमसौरभे भृशं भृङ्ग
एव रसिको न मक्षिका ।

ओवल्लियाँ = ज्येष्ठा आदि भेद से भिन्न बोध्य आदि छः ज्ञानपरम्परायें । गतियों का = भाव वृत्ति द्रव्य भूमिका आदि रूपों वाले प्रकारों का । इसमे कारण हैं—क्योंकि सब शिवमय है । जैसा कि कहा गया है—

'सभी भावों, सभी वृत्तियों, सब द्रव्यों, दृष्टियों, भूमिकाओं, ओवल्लियों, देवियों और वर्णों की सब प्रकार से समता समझनी चाहिए' ॥ २७४-२७५ ॥

प्रश्न—कौन सबको शिवमय जानता है जिसके अन्दर यह उपदेश अंकुरित होगा ?—यह शङ्का कर कहते हैं—

जो (योगी) अखण्डित सद्भाव वाले आत्मतत्त्व को प्राप्त हो जाता है वह अखण्डित सद्भाव वाले शिवतत्त्व का साक्षात्कार कर लेता है ॥ -२७५-२७६- ॥

आत्मज्ञान ही शिवतत्त्व के साक्षात्कार में कारण है—यह कहने वाले ने यह कहा कि दूसरे दर्शनों की भाँति यहाँ अतिरिक्त उपाय के अन्वेषण आदि स्वरूप परिश्रम से साध्य होने की बात नहीं है ॥ २७५-२७६ ॥

और यहाँ (इस विषय में) सभी लोग पात्र नहीं है बल्कि तीव्रतम शक्तिपात से पवित्र किया गया कोई विरल व्यक्ति ही है—यह कहते हैं—

भैरवीयपरमाद्वयार्चने कोऽपि
रज्यति महेशचोदितः ॥ २७६ ॥

नन्वत्रासक्त्या किं स्यात् ?—इत्याशङ्क्याह—

अस्मिंश्च यागे विश्रान्तिं कुर्वतां भवडम्बरः ।
हिमानीव महाग्रीष्मे स्वयमेव विलीयते ॥ २७७ ॥

अत्र च सामान्येनोपक्रान्तमधिकारिणमुपसंहारभङ्‌ग्या विशेषेण निर्देष्टुमाह—

अलं वातिप्रसङ्गेन भूयसातिप्रपञ्चिते ।
योग्योऽभिनवगुप्तोऽस्मिन्कोऽपि यागविधौ बुधः ॥ २७८ ॥

अथ वा याज्ययाजकादावेवं बहुशाखम् 'अतिप्रपञ्चिते' पौनःपुन्यपरीक्षणलक्षणेन 'अतिप्रसङ्गेनालम्'; यतोऽस्मिन्' समनन्तरोक्तस्वरूपे 'यागविधौ' अभितो ग्राह्यग्राहकाद्यनन्तभेदसंभिन्ने जडाजडवर्गे, यो 'नवः' अनवच्छिन्नज्ञत्वकर्तृत्वात्मकगुणपरामर्शनरूपः स्वात्मस्तवः, तेन 'गुप्तो' मायाव्यामोहमुषितत्त्वेऽपि परिरक्षितसार्वात्म्यमयनिजवैभवः, अत एव च 'कोऽपि' अलौकिकः; अथ च एवंविधोऽयमेव ग्रन्थकारोऽत्र योग्य इत्यर्थः ॥ २७८ ॥

केतकीपुष्प के सुगन्ध में भ्रमर ही रसिक होता है मक्खियाँ नहीं । उसी प्रकार भैरवीय परम अद्वय तत्त्व की पूजा में महेश की प्रेरणा (कृपा) वाला कोई विरलपुरुष ही रक्त होता है ॥ २७६ ॥

प्रश्न—इसमें आसक्ति से क्या होता है?—यहा शङ्का कर कहते हैं—

इस (माहेश्वर) याग में विश्राम करने वालों के लिये संसार का विस्तार स्वयं (उसी में) लीन हो जाता है जैसे कि महाग्रीष्म ऋतु में बर्फ ॥ २७७ ॥

यहाँ—सामान्य रूप से उपक्रान्त अधिकारी का उपसंहारभङ्गी के द्वारा विशेषरूप से निर्देश करने के लिये कहते हैं—

अथवा इस विषय में बहुत कहने से क्या लाभ ? अत्यन्त विस्तृत इस यागविधि में कोई योग्य विद्वान् (अभिनवगुप्त के समान) अभिनव (= परमेश्वर) के द्वारा गुप्त (= रक्षित, निर्मल) हो जाता है ॥ २७८ ॥

अथवा याज्ययाजक आदि में इस प्रकार अनेक शाखा के साथ अतिविस्तृत = पौनः पुन्य परीक्षण वाले अतिप्रसङ्ग से क्या लाभ ? क्योंकि इस = पूर्वोक्त स्वरूप वाली, यागविधि में अभितः = ग्राह्यग्राहक आदि अनन्त भेदसम्भिन्न जडाजडवर्ग में जो नव = अनवच्छिन्न ज्ञानकर्तृतात्मक गुण के परामर्शरूप अपनी स्तुति, उससे गुप्त = मायामोह के हट जाने पर भी परिरक्षितसर्वात्मकता रूप आत्मवैभव वाला, इसलिये कोई = अलौकिक । इसलिये ऐसा ग्रन्थकार ही इसमें

एतदेव श्लोकस्य प्रथमार्धेनोपसंहरति—

इत्यनुत्तरपदप्रविकासे शाक्तमौपयिकमद्य विविक्तम् ॥

॥ इति श्रामदाचार्याभिनवगुप्तपादविरचिते श्रीतन्त्रालोके शाक्तोपायप्रकाशनं नाम चतुर्थमाह्निकम् ॥ ४ ॥

'अद्य' इत्यनेन आह्निकशब्दार्थस्तात्त्विकः,—इति प्रकाशितम्, इति शिवम् ॥

शाक्तसमावेशवशप्रोन्मीलितसद्विकल्पविभवेन ।
निरणायि जयरथेन प्रस्फुटमिदमाह्निकं तुर्यम् ॥

॥ इति श्रामदाचार्याभिनवगुप्तपादविरचिते, श्रीजयरथाचार्यकृत-प्रकाशाख्यव्याख्योपेते श्रीतन्त्रालोके शाक्तोपाय-प्रकाशनं नाम चतुर्थमाह्निकम् ॥ ४ ॥

योग्य है ॥ २७८-२७९ ॥

श्लोक के पूर्वार्ध से इसका उपसंहार करते हैं—

इस प्रकार अनुत्तरपद के विकास के लिये शाक्तोपाय यहाँ बतलाया गया ।

॥ इस प्रकार श्रीमदाचार्यअभिनवगुप्तपादविरचित श्रीतन्त्रालोक के चतुर्थ आह्निक की डॉ० राधेश्याम चतुर्वेदी कृत 'ज्ञानवती' हिन्दी टीका सम्पूर्ण हुई ॥ ४ ॥

'अद्य' इसके द्वारा तात्त्विक आह्निकशब्दार्थ प्रकाशित किया गया ।

शाक्त समावेश के कारण प्रोन्मीलित सद्विकल्प वैभव वाले जयरथ ने चतुर्थ आह्निक का स्पष्ट निर्णय (टीका) किया ।

॥ इस प्रकार आचार्यश्रीजयरथकृत श्रीतन्त्रालोक के चतुर्थ आह्निक की 'प्रकाश' नामक व्याख्या की डॉ० राधेश्याम चतुर्वेदी कृत 'ज्ञानवती' हिन्दी टीका सम्पूर्ण हुई ॥ ४ ॥

पञ्चममाह्निकम्

* विवेक *

यो नाम घोरनिनदोच्चारवशाद्भीषयत्यशेषजगत् ।
स्वस्थानध्यानरतः स जयत्यपराजितो रुद्रः ॥ १ ॥

इदानीं प्राप्तावसरमाणवोपायमपरार्धेन निरूपयितुमुपक्रमते

आणवेन विधिना परधाम प्रेप्सतामथ निरूप्यत एतत् ॥ १ ॥

'विधिना' इत्युच्चारादिरूपेण । 'एतत्' इति वक्ष्यमाणमाणवोपायलक्षणम्॥१॥

ननु शाक्तोपायेनैव सर्वं सिद्ध्येदिति किमर्थम् एतन्निरूप्यते?—इत्याशङ्कां गर्भीकृत्याह—

---

* ज्ञानवती *

जो घोर नाद के उच्चारण से समस्त संसार को भयभीत करता है अपने स्थान ध्यान में रत वे अपराजितरुद्र जयशील हैं ।

अब अवसरप्राप्त आणवोपाय का उत्तरार्ध के द्वारा निरूपण करने के लिये प्रारम्भ करते हैं—

अब आणवोपाय के द्वारा परधाम को प्राप्त करने की इच्छा वालों के लिये उपक्रम किया जा रहा है ॥ १ ॥

विधि के द्वारा = उच्चार आदि रूप से । यह = वक्ष्यमाण आणवोंपाय लक्षण वाला ॥ १ ॥

प्रश्न—शाक्तोपाय से ही सब सिद्ध हो जाता है फिर इस (आणवोपाय) का निरूपण किसलिये किया जा रहा है ?—इस शङ्का को गर्भ में रखकर कहते हैं—

विकल्पस्यैव संस्कारे जाते निष्प्रतियोगिनि ।
अभीष्टे वस्तुनि प्राप्तिर्निश्चिता भोगमोक्षयोः ॥ २ ॥

विरुद्धविकल्पान्तरोदयाभावात् 'विकल्पस्य' शाक्तोपायनिरूपितनीत्या 'जात' एव स्फुटतमविकल्पस्वरूपासादनात्मनि 'संस्कारे' भोगमोक्षयोर्मध्यादेकतरत्र 'अभीष्टे वस्तुनि निश्चिता' नियमवती 'प्राप्तिः' भवेत्—इत्याह्निकान्तरम् इदमनारम्भणीयमेव—इति तात्पर्यार्थः ॥ २ ॥

ननु यद्यप्येवं तथापि विकल्पस्य द्वयी गतिः, स हि कस्यचिदुपायान्तर-निरपेक्षतया स्वस्वातन्त्र्यादेव संस्कृतः स्यात्, कस्यचित्तु अन्यथा । तत्र पूर्वः प्रकारः शाक्तोपाये निरूपितः; इतरः पुनराणवोपाये निरूपयिष्यते;—इति युक्त एवाह्निकान्तरारम्भः, तदाह—

विकल्पः कस्यचित्स्वात्मस्वातन्त्र्यादेव सुस्थिरः ।
उपायान्तरसापेक्ष्यवियोगेनैव जायते ॥ ३ ॥
कस्यचित्तु विकल्पोऽसौ स्वात्मसंस्करणं प्रति ।
उपायान्तरसापेक्षस्तत्रोक्तः पूर्वको विधिः ॥ ४ ॥

'पूर्वको विधिरुक्त' इत्युपादानादपरो वक्ष्यते—इत्यर्थसिद्धम् ॥ ३-४ ॥

विकल्प का ही संस्कार हो जाने पर प्रतियोगीरहित अभीष्टवस्तु में भोग और मोक्ष की प्राप्ति निश्चित होती है ॥ २ ॥

दूसरे विरुद्ध विकल्पों का उदय न होने से शाक्तोपायनिरूपित नीति के अनुसार विकल्प, स्फुटतम विकल्पस्वरूप प्राप्ति वाले संस्कार के उत्पन्न होने पर भोगमोक्ष में से एक इष्ट वस्तु की प्राप्ति निश्चित हो जाती है—इसलिये दूसरे आह्निक का आरम्भ नहीं करना चाहिये—यह तात्पर्य है ॥ २ ॥

प्रश्न—यद्यपि ऐसा है तथापि विकल्प की दो गति है—किसी का (विकल्प) बिना किसी उपाय के अपने स्वातन्त्र्य से ही संस्कृत हो जाता है और किसी का दूसरी तरह । इनसे से पहला प्रकार शाक्तोपाय में निरूपित हुआ, दूसरे का आणवोपाय में निरूपण किया जायगा । इस प्रकार दूसरे आह्निक का प्रारम्भ उचित ही है । यह कहते हैं—

किसी (साधक) का विकल्प अपने स्वातन्त्र्य से ही सुस्थिर (= संस्कृत) हो जाता है । इसमें उपायान्तर की आवश्यकता नहीं होती । और किसी के विकल्प का संस्कार उपायान्तरसापेक्ष होता है इन दोनों प्रकारों में पहला प्रकार कहा जा चुका है ॥ ३-४ ॥

'पहली विधि कह दी गई'—इस कथन से दूसरी (विधि) कही जायगी—यह अर्थात् सिद्ध है ॥ ३-४ ॥

ननु विकल्पोऽपि अर्थावभासरूपत्वात् निर्विकल्पवच्चिदात्मैवेति को नाम तत्र संस्कारः । संस्कारो हि अतिशयः, स च न संविदि युज्यते—इति कस्य नामोपायान्तरं प्रति सापेक्षत्वमनपेक्षत्वं च स्यात् ?—इत्याशङ्क्याह—

विकल्पो नाम चिन्मात्रस्वभावो यद्यपि स्थितः ।
तथापि निश्चयात्मासावणोः स्वातन्त्र्ययोजकः ॥ ५ ॥

'यद्यप्येवं तथापि असौ विकल्पो' नायमघटो भवतीत्यन्यापोहेन घटोऽयमिति निश्चयात्मकत्वात् 'अणोः' संकुचितस्य प्रमातुः स्वातन्त्र्यं योजयति, विकल्प्यमानेऽर्थे तस्यैव स्वातन्त्र्योपपत्तेः । अत एव क्षेत्रज्ञव्यापारो विकल्पः—इत्युक्तम् । तथाहि घटावभासेऽनवभातमपि घटविपर्ययं व्यवहारोपयोग्यतया स्वस्वातन्त्र्यादेव प्रमाता प्रतिपद्यते; अन्यथा हि मायापदे परस्परपरिहारप्रतीतिं विना ग्राह्यग्राहकभावाद्यात्मा व्यवहार एव न सिद्ध्येत् । अतश्च चिदेकरूपत्वेऽपि विकल्पोऽन्यापोहरूपत्वात् भेदमयः—इति तदपसारणाय स्वात्मनि संस्कारमपेक्षते, यदाधानायापि क्वचिदुपायमुखप्रेक्षित्वमस्य—इति युक्तमुक्तं 'विकल्पोऽसौ स्वात्मसंस्करणे प्रति । उपायान्तरसापेक्ष' इति । संस्कारश्चास्य अस्फुटत्वादिक्रमेण स्फुटतमत्वापत्तिपर्यन्तं पारमार्थिकस्वात्मप्रत्ययरूपनिर्विकल्पकज्ञानात्मत्वासादनम् । यदुक्तं प्राक्

प्रश्न—विकल्प भी अर्थावभासरूप होने के कारण विकल्परहित चिदात्मा ही है फिर उसमें संस्कार क्या? संस्कार अतिशय को कहते हैं । वह संविद् के विषय में उचित नहीं फिर कौन उपायान्तर के प्रति सापेक्ष या निरपेक्ष होगा ?—यह शङ्का कर कहते हैं—

यद्यपि विकल्प चित् का स्वभाव है तथापि निश्चय स्वरूप वाला वह अणु के स्वातन्त्र्य का प्रयोजक होता है ॥ ५ ॥

'यद्यपि ऐसा है तथापि यह विकल्प' यह अघट नहीं है इस प्रकार दूसरे का निषेध कर 'यह घट है'—ऐसा निश्चयात्मक होने से, अणु = संकुचित प्रमाता का स्वातन्त्र्य बतलाता है क्योंकि विकल्प्यमान अर्थ के विषय में उसी का स्वातन्त्र्य सिद्ध होता है । इसीलिये 'क्षेत्रज्ञ का व्यापार विकल्प है'—ऐसा कहा गया । वह इस प्रकार—घट का अवभास होने पर प्रमाता अनाभात घटविपर्यय को अपने स्वातन्त्र्य से ही व्यवहार के योग्य समझता है । अन्यथा माया के स्तर पर परस्पर निषेध के ज्ञान के बिना ग्राह्यग्राहकभाव रूप व्यवहार ही सिद्ध नहीं होगा । इसलिये चिद्रूप होने पर भी अन्यापोहरूप होने के कारण विकल्प भेदमय होता है । इसलिये उसको हटाने के लिये अपने में संस्कार की आवश्यकता होती है जिसके आधान के लिये भी कहीं इसे उपाय की आवश्यकता होती है—इसलिये ठीक कहा गया—'यह विकल्प अपने संस्कार के प्रति उपायान्तर की अपेक्षा रखता है ।' और इसका संस्कार है—अस्फुटत्वादि क्रम से स्फुटतमत्व की प्राप्ति तक पारमार्थिक

'ततः स्फुटतमोदारताद्रूप्यपरिबृंहिता ।
संविदभ्येति विमलामविकल्पस्वरूपताम् ॥' (तं० ४।६)

इति ॥ ५ ॥

तत्संस्काराधाने च वक्ष्यमाणनीत्या ध्यानादयो बहव उपायाः—इति तद्भेदात् तस्याप्यनैक्यम्—इत्याह

निश्चयो बहुधा चैष तत्रोपायाश्च भेदिनः ।
अणुशब्देन ते चोक्ता दूरान्तिकविभेदतः ॥ ६ ॥

बहुधात्वे हेतुः 'तत्रोपायाश्च भेदिन' इति । तद्भेदेऽपि हेतुः 'दूरान्तिकविभेदत' इति । केचिद्धि उपायाः संविदि संनिकृष्टाः, केचिच्च विप्रकृष्टाः । तथा च

'प्राक् संवित् प्राणे परिणता ।'

इति नीत्या बुद्ध्याद्यपेक्षया तत्र प्राणस्यान्तरङ्गत्वात् तद्गतमुच्चारादि संनिकृष्टं, तदपेक्षया च बुद्धिगं ध्यानादि विप्रकृष्टं, ततोऽपि देहगतं करणादि—इति । एते चोपाया अत्रैव संभवन्ति न पुनः शाक्ते—इति कुतोऽवगम्यते, ?—इत्याशङ्क्योक्तम्—'अणुशब्देन ते चोक्ता' इति । तेनाणुषु भेदिषूपायेषु भवः,

---

स्वात्मप्रत्ययरूप निर्विकल्पक ज्ञानरूपता की प्राप्ति । जैसा कि पहले कहा गया—

'इसके बाद स्फुटतम उदार तद्रूपता से परिपुष्ट संवित् निर्मल निर्विकल्परूपता को प्राप्त करती है' ॥ ५ ॥

उस संस्कार के आधान में वक्ष्यमाण नीति से ध्यान आदि अनेक उपाय हैं—इसलिये उसके भेद से वह भी अनेक है—यह कहते हैं—

यह (पूर्वोक्त) निश्चय अनेक प्रकार का है इसलिये उसके उपाय भी अनेक हैं । अणुशब्द से उक्त वे (उपाय) दूर अन्तिक भेद से (अनेक प्रकार के हैं) ॥ ६ ॥

बहुप्रकारता में हेतु बतलाते हैं— उसमें भेद वाले उपाय' । उसके भी भेद में हेतु कहते हैं—दूर अन्तिक भेद से । कुछ उपाय संविद् के निकटवर्त्ती है और कुछ दूरवर्त्ती । इस प्रकार

'पहले संवित् प्राणरूप में परिणत हुई ।'

इस नीति से बुद्धि आदि की अपेक्षा प्राण के अन्तरङ्ग होने से उसमें स्थित उच्चार आदि भी सन्निकृष्ट हैं और उसकी अपेक्षा बुद्धि में वर्त्तमान ध्यान आदि दूरवर्त्ती हैं । उससे भी (दूरवर्त्ती हैं) देहगत करण आदि ।

प्रश्न—ये उपाय यहीं सम्भव होते हैं शाक्त में नहीं—यह कहाँ से ज्ञात होता

इत्याणवः ॥ ६ ॥

ननु प्राणादयो जाड्यादपारमार्थिकाः, तत्कथं तद्गतमुच्चारादि पारमार्थिकस्वरूपलाभनिमित्तं स्यात् ?—इत्याशङ्क्याह—

तत्र बुद्धौ तथा प्राणे देहे चापि प्रमातरि ।
अपारमार्थिकेऽप्यस्मिन् परमार्थः प्रकाशते ॥ ७ ॥

'प्रमातरि' इति बुद्ध्यादौ सर्वत्रैव योज्यम् । 'अपारमार्थिके' इति बुद्ध्यादेर्वस्तुतो वेद्यरूपत्वेऽपि तथा परिकल्पनात् ॥ ७ ॥

ननु यदेव प्रश्नितं तदेवोत्तरीकृतम्—इति किमेतत् ?—इत्याशङ्क्याह—

यतः प्रकाशाच्चिन्मात्रात् प्राणाद्यव्यतिरेकवत् ।

एवं चिदव्यतिरेकात्प्राणादीनामपि पारमार्थिकत्वमेव—इति भावः । यदभिप्रायेणैव

यद्यप्यर्थस्थितिः प्राणपुर्यष्टकनियन्त्रिते ।
जीवे निरुद्धा तत्रापि परमात्मनि सा स्थिता ॥'

(अ.प्र.सि. २० श्लो०)

है ?—यह शङ्का कर कहा गया—'वे अणुशब्द से कहे गये हैं । जो अणु = भेदवाले उपायों में होने वाला है वह आणव है ॥ ६ ॥

प्रश्न—प्राण आदि जड़ होने के कारण पारमार्थिक नहीं हैं तो तद्गत उच्चार आदि पारमार्थिकस्वरूप के लाभ का कारण कैसे होंगे ?—यह शङ्का कर कहते हैं—

बुद्धि प्राण देह आदि अपारमार्थिक वस्तुओं में भी यह प्रमाता (= जीव) परमार्थ ही देखता है ॥ ७ ॥

'प्रमातरि' इस पद को सभी 'बुद्ध्यादौ' इत्यादि के साथ जोड़ना चाहिये है । अपारमार्थिक—बुद्धि आदि के वस्तुतः वेद्यरूप होने पर भी वैसी कल्पना करने के कारण ॥ ७ ॥

प्रश्न—जो प्रश्न किया गया उसी को उत्तर बना दिया गया—यह क्या है ?—यह शङ्का कर कहते हैं—

क्योंकि प्राण आदि भी प्रकाशस्वरूप चिन्मात्र से भिन्न नहीं है ॥ ८- ॥

इस प्रकार चैतन्य से अभिन्न होने के कारण प्राण आदि भी पारमार्थिक ही है—यह भाव है । जिस अभिप्राय से—

'यद्यपि अर्थ की स्थिति प्राणपुर्यष्टक से नियन्त्रित जीव में निरुद्ध है तो भी परमात्मा में वह स्थित है ।'

इत्यादि अन्यत्रोक्तम् ॥

ननु प्राणादेर्नीलादेश्च चिदव्यतिरेकात् तुल्यमनेन पारमार्थिकत्वं, नास्त्यत्र काचिदस्माकं विमतिः; किंतु मायापदे प्राणादेर्जाड्येऽपि कथं चित्त्वं सङ्गच्छते ? —इत्याशङ्क्याह—

तस्यैव तु स्वतन्त्रत्वाद्द्विगुणं जडचिद्वपुः ॥ ८ ॥

तु-शब्दो हेतौ । यतस्तस्यैव चिदात्मनः प्रकाशस्य स्वातन्त्र्यात्, अर्थात् तत् प्राणादि जडचिद्रूपत्वात् 'द्विगुणं' जडत्वचित्त्वलक्षणगुणद्वययोगि—इत्यर्थः । परमेश्वर एव हि मायीयसर्गचिकीर्षायां स्वस्वातन्त्र्येण बहिरवभासितभावराशिमध्यात् कांश्चिज्जडानपि प्राणादीन् स्वगताहन्तात्मककर्तृत्वाभिषेकेण ग्राहकीभावयति, कांश्चिदपि शब्दादीन् इदन्तापात्रतया चिद्रूपतातिक्रमेण ग्राह्यतामापादयति; तेन प्राणादीनां जाड्येऽपि परमेश्वरस्वातन्त्र्यादेव चित्त्वम्—इति ॥ ८ ॥

न केवलमेतद्युक्तित एव सिद्धं यावदागमतोऽपि—इत्याह—

उक्तं त्रैशिरसे चैतद्देव्यै चन्द्रार्धमौलिना ।

तदेव पठति—

इस प्रकार अन्यत्र कहा गया है ॥ ८- ॥

प्रश्न—प्राण आदि और नील आदि के चित् से अभिन्न होने के कारण पारमार्थिकता समान है—इस विषय में हमें कोई मतभेद नहीं है किन्तु मायास्तर पर प्राण आदि के जड़ होने पर भी इसको चित् कैसे माना जाय?—यह शङ्का कर कहते हैं—

उसी (= परा संविद्) की स्वतन्त्रता के कारण जड और चेतन शरीर विरुद्ध गुणों वाला है ॥ -८ ॥

तु शब्द कारणवाची है । क्योंकि उसी चित्स्वरूप प्रकाश के स्वातन्त्र्य के कारण । अर्थात् वह प्राण आदि जडचिद्रूप होने के कारण जडत्व चित्त्वरूप दो गुणों वाला है—यह अर्थ है । परमेश्वर ही मायीय सृष्टि करने की इच्छा होने पर अपने स्वातन्त्र्य से बाहर अवभासित भावराशि में से कुछ जडप्राण आदि को भी अपने में स्थित अहन्तात्मक कर्तृत्व के अभिषेक के द्वारा ग्राहक बनाता है । और कुछ शब्द आदि को इदन्ता के पात्र के रूप में चिद्रूपता से रहित ग्राह्य बना देता है । प्राण आदि जड होने पर भी परमेश्वर के स्वातन्त्र्य के कारण चित् है ॥ ८ ॥

यह केवल युक्ति से ही नहीं बल्कि आगम से भी सिद्ध है—यह कहते हैं—

त्रिशिरो भैरव (= आगमग्रन्थ) में चन्द्रार्धचूडामणि ने देवी (पार्वती) से कहा ॥ ९- ॥

जीवः शक्तिः शिवस्यैव सर्वत्रैव स्थितापि सा ॥ ९ ॥
स्वरूपप्रत्यये रूढा ज्ञानस्योन्मीलनात्परा ।

यद्यपि 'शिवस्यैव' चिन्मात्रात्मनः परस्य प्रकाशस्य संबन्धिनी 'परा' विश्वस्फाररूपा 'शक्तिः' 'सर्वत्र जडे प्राणघटादाववस्थिता तद्रूपतया परिस्फुरिता तथापि 'सा' अर्थात् प्राणादिरूपाहन्तात्मककर्तृतारूपस्य 'ज्ञानस्योन्मीलनात्' स्वस्यात्मनो रूपस्य च नीलादेः 'अहमिदं जानामि' इत्येवंरूपः संकुचितप्रमातृव्यापारस्वभावो विकल्पात्मा यः 'प्रत्ययः' 'तत्र 'रूढा' प्ररोहं प्राप्ता सती 'जीवः' प्राणबुद्ध्यादिप्रमातृरूपतया व्यपदिश्यते—इत्यर्थः ॥ ९ ॥

तथापि अत्र परमार्थप्रकाशनं कथम् ?—इत्याशङ्क्याह—

तस्य चिद्रूपतां सत्यां स्वातन्त्र्योल्लासकल्पनात् ॥ १० ॥
पश्यञ्जडात्मताभागं तिरोधायाद्वयो भवेत् ।

'तस्य' जडस्य चिद्वपुषः प्राणादेर्जडरूपमेकं 'भागं तिरोधाय' तत्राहन्ताभिमानमभिभूय स्वातन्त्र्योल्लासनाद्धेतोश्चिद्रूपतामेव परमार्थिकीं 'पश्यन्' अकृत्रिमपराहन्तास्पदत्वेनानुभवन् 'अद्वयो भवेत्' संविन्मात्ररूपतया परिस्फुरेत्—इत्यर्थः । तदुक्तम्—

वही (ग्रन्थ) पढ़ते हैं—

जीव शिव की ही शक्ति है । वह परा (शक्ति) सर्वत्र स्थित है । ज्ञान के उन्मीलन से वह स्वरूप में प्रत्यय में आरूढ़ है ॥ -९-१०- ॥

यद्यपि शिव की ही = चिन्मात्र रूप पर प्रकाश सम्बन्धिनी परा = विश्वस्फार रूप शक्ति, सर्वत्र = जड प्राण घट आदि में स्थित है = उस रूप से स्फुरित हो रही है तो भी वह प्राण आदि रूप अहन्तात्मक कर्तृता रूप ज्ञान के उन्मीलन से अपने रूप नील आदि का—'मैं यह जानता हूँ' इस प्रकार का संकुचित प्रमातृव्यापार स्वभाव वाला विकल्परूप जो प्रत्यय उसमें रूढ़ = विकास को प्राप्त होकर जीव प्राण बुद्धि आदि प्रमाता के रूप में व्यवहृत होती है ॥ ९-१० ॥

तो भीं इसमे परमार्थ का प्रकाश कैसे होता है ?—यह शङ्का कर कहते हैं—

उसके स्वातन्त्र्य के उल्लास की कल्पना के द्वारा उसकी सत्य चिद्रूपता को जानने वाला (इस विश्व में) जडात्मता भाग को तिरोहित कर अद्वय हो जाता है ॥ -१०-११- ॥

उसके = जड चित्शरीर वाले प्राण आदि के जडरूप एक भाग को छिपाकर = उसमें अहन्ता के अभिमान को अभिभूत कर स्वातन्त्र्य के उल्लासन के कारण पारमार्थिकी चिद्रूपता को देखता हुआ = अकृत्रिमपराहन्तास्पद के रूप में अनुभव करता हुआ (साधक) अद्वय हो जाता है = संविद्मात्र रूप में स्फुरित होता है ।

'बुद्धौ प्राणे तथा देहे देशे या जडता स्थिता।
तां विरोधाय मेधावी संविद्रश्मिमयो भवेत् ॥'

इति । एवमत्र प्राणादेर्जाड्येऽपि चिद्रूपतैव परमार्थः—इत्येषां पारमार्थिकस्वरूपलाभे निमित्तत्वम्—इत्युक्तं स्यात् ॥ १० ॥

एतदेव पक्षान्तरेणाप्याह—

तत्र स्वातन्त्र्यदृष्ट्या वा दर्पणे मुखबिम्बवत्॥ ११ ॥
विशुद्धं निजचैतन्यं निश्चिनोत्यतदात्मकम् ।

अथवा यथायं लोकः स्वमुखप्रतिबिम्बमागमापायित्वात् दर्पणातिरिक्तं निश्चिनोति, एवमसौ योगी 'तत्र' प्राणादौ स्वस्वातन्त्र्यमाहात्म्यात् 'विशुद्धं' वेद्यताद्यकलङ्कितम् । अत एव—

'नाहं प्राणो नैव शरीरं न मनोऽहम् ।' (ह.स्तो. श्लो. ३६)

इत्याद्युक्तेः 'अतदात्मकम्' अप्राणादिरूपं ततोऽतिरिक्तं निजं स्वाभाविकमेव चिद्रूपत्वम् इत्येवम् अस्य परमार्थिकस्वरूपलाभो भवेत्—इति ॥ ११ ॥

वही कहा गया है—

'बुद्धि प्राण देह तथा देश में जो जडता स्थित है, मेधावी उसको छिपाकर संविद्रश्मिमय हो जाता है ।'

इस प्रकार यहाँ प्राण आदि के जड होने पर भी चिद्रूपता ही परमार्थ है । इस प्रकार ये पारमार्थिक स्वरूप के लाभ में कारण है—यह कहा गया ॥१०-११॥

इसी को पक्षान्तर से भी कहते हैं—

दूसरे शब्दों में (वह) अपनी स्वतन्त्र दृष्टि के द्वारा दर्पण में मुख के प्रतिबिम्ब के समान उस (दर्पण) से भिन्न अपने विशुद्ध चैतन्य की अवधारणा करती है ॥ -११-१२- ॥

अथवा जैसे यह संसार आगमापायी (= उत्पत्तिविनाशशाली) होने के कारण अपने मुख के प्रतिबिम्ब को दर्पण से भिन्न समझता है उसी प्रकार यह योगी 'वहाँ' = प्राण आदि के विषय में अपने स्वातन्त्र्य की महिमा से विशुद्ध = वेद्यता आदि कलङ्क से रहित, इसलिये—

मैं न प्राण शरीर और न मन ही हूँ ।

इत्यादि उक्ति से अतदात्मक = अप्राणादि रूप उससे भिन्न अपनी स्वाभाविक चिद्रूपता को (जानता है) । इस प्रकार इसको पारमार्थिक स्वरूप की प्राप्ति होती है ॥ ११-१२ ॥

ननु यथा दर्पणादतिरेकेण प्रतिबिम्बस्य सत्ता नास्ति, एवं संविदतिरेकेणापि प्रमातृप्रमेयाद्यात्मनो विश्ववैचित्र्यस्यास्य—इति प्राङ्निर्णीतं, तत् कथमिह अन्यथोच्यते ? इत्याशङ्क्याह—

बुद्धिप्राणादितो भिन्नं चैतन्यं निश्चितं बलात् ॥ १२ ॥
सत्यतस्तदभिन्नं स्यात्तस्यान्योन्यविभेदतः ।

बुद्ध्यादिभ्यो बलादनुपपन्नेन क्रमेण 'भिन्नम्' अतिरिक्तं 'निश्चितमपि चैतन्यं' वस्तुतस्तदनतिरिक्तमेव भवेत्; यतस्तस्य बुद्ध्यादेरेव परस्परमस्ति भेदः, प्रातिस्विकेन प्रतिनियतेन रूपेण चेत्यमानत्वात्; चैतन्यं पुनर्बुद्ध्याद्यनुस्यूतमेव भायात् अन्यथा हि बुद्ध्यादीनां चेत्यमानत्वमेव न स्यात् ॥ १२ ॥

नन्वेकमेव चैतन्यं कथमनन्तबुद्ध्यादिरूपाविभिन्नं भवेत् ?—इत्याशङ्क्याह—

विश्वरूपाविभेदित्वं शुद्धत्वादेव जायते॥ १३ ॥
निष्ठितैकस्फुरन्मूर्तेर्मूर्त्यन्तरविरोधतः ।

इह खलु परप्रकाशात्मनश्चैतन्यस्य 'शुद्धत्वात्' प्रतिनियतस्वाकारकलङ्कितत्वेन अनवभास्यत्वात् स्वप्रकाशत्वलक्षणात् नैर्मल्यातिशयात् 'विश्वैः' निखिलैर्बुद्ध्यादि-

---

प्रश्न—जैसे प्रतिबिम्ब की दर्पण से भिन्न सत्ता नहीं है । उसी प्रकार प्रमातृ प्रमेय आदि रूप इस विश्ववैचित्र्य की संविद् से भिन्न (सत्ता नहीं है) यह पहले कहा जा चुका है तो यहाँ फिर इसे क्यों कहते हैं ?—यह शङ्का कर कहते हैं—

चैतन्य को बलपूर्वक प्राण आदि से भिन्न माना गया है । उस (= बुद्धि आदि) के परस्पर भिन्न होने पर भी वे सब सत्य से अभिन्न है ॥ -१२-१३- ॥

बुद्धि आदि से हठात् अनुपपन्न क्रम से भिन्न = अतिरिक्त निश्चित भी चैतन्य वस्तुतः उससे अनतिरिक्त ही है क्योंकि उस बुद्धि आदि का परस्पर भेद है क्योंकि वे प्रातिस्विक = प्रतिनियमरूप से चेतनयुक्त है । और चैतन्य बुद्धि आदि में अनुस्यूत होकर ही भासित होता है अन्यथा बुद्धि आदि चेत्यमान नहीं होंगे ॥ १२-१३ ॥

प्रश्न है कि एक ही चैतन्य अनन्त बुद्धि आदि रूप से अभिन्न कैसे होगा ? —यह शङ्का कर कहते हैं—

(परासंवित् के) शुद्ध होने के कारण ही (यह) विश्वरूप से अभिन्न (= विश्वमय) हो जाता है । क्योंकि परिनिष्ठित एक स्फुरणशील मूर्त्ति (= परासंविद्) का मूर्त्यन्तर से विरोध नहीं है ॥ -१३-१४- ॥

प्रकाशरूप चैतन्य शुद्ध होने के कारण = निश्चित स्वाकार से कलंकित होने से अनवभास्य होने से स्वप्रकाशलक्षण अतिशय निर्मलता के कारण, विश्व =

भिराकारैः 'अविभेदित्वं जायत एव' न न जायते—इत्यर्थः । एतदेव हि नामस्य शुद्धत्वं यत् दर्पणादिवत् तत्तदनेकाकारधारितया प्रस्फुरति—इति । न च एवं विरोधः कश्चित्; यतो 'निष्ठिता' देशकालादिसङ्कोचान्नैयत्येन प्राप्तप्रतिष्ठाना, अत एव 'एका' सर्वतो व्यावृत्तत्वात् निःसहाया 'स्फुरन्ती' तथात्वेन भासमाना मूर्तिः' यस्य तस्य बुद्ध्यादेः 'मूर्त्यन्तरेण' प्राणादिसंबन्धिना 'विरोधो' मूर्तस्य मूर्त्यन्तरानुप्रवेशायोगात् ॥ १३ ॥

ननु—

'वर्तमानावभासनां भावानामवभासनम् ।
अन्तः स्थितवतामेव घटते वहिरात्मना॥' (ई. प्र. १।५।१)

इत्यादिनीत्या प्रमात्रैकात्म्येनावस्थितानामेव भावानां बहिरवभासनं भवेत्—इति सर्वत्रैव उपपादितं, तत् बुद्ध्यादेरपि प्रमातुरन्तरवस्थितानामेव अर्थानां किं बहिरवभासनं भवेन्नवा ? इत्याशङ्क्याह—

अन्तः संविदि सत्सर्वं यद्यप्यपरथा धियि ॥ १४ ॥
प्राणे देहेऽथवा कस्मात्संक्रामेत्केन वा कथम् ।
तथापि निर्विकल्पेऽस्मिन्विकल्पो नास्ति तं विना ॥ १५ ॥
दृष्टेऽप्यदृष्टकल्पत्वं विकल्पेन तु निश्चयः ।

समस्त बुद्धि आदि आकारों से अभिन्न होता ही है—नहीं होता ऐसा नहीं है । इस (= चैतन्य) की यही शुद्धता है कि यह दर्पण आदि की भाँति तत्तत् अनेक आकार धारण करने वाले के रूप में स्फुरित होता है । इस प्रकार कोई विरोध भी नहीं है । क्योंकि निष्ठित = देश काल आदि के सङ्कोच के कारण निश्चितरूप से प्रतिष्ठित, इसलिये एक = सर्वतोव्यावृत्त होने के कारण सहायकरहित, होकर स्फुरित होने वाली = उस रूप में भासमान मूर्त्तिवाली बुद्धि आदि का दूसरी मूर्त्तियों से अर्थात् प्राण आदि से सम्बन्धित से विरोध के कारण = एक मूर्त्त पदार्थ का दूसरे मूर्त्त पदार्थ में अनुप्रवेश न होने के कारण (विरोध नहीं होता) ॥ १३-१४ ॥

प्रश्न—वर्त्तमानकालिक अवभासरूप भावों का जो अवभासन (होता) है (परमेश्वर) अपने अन्दर स्थित ही भावों को बाह्यरूप में घटित करता है ॥

इत्यादि नीति के अनुसार प्रमाता के साथ तादात्म्यभाव से स्थित ही भावों का बाह्यरूप में अवभासन होता है—ऐसा सर्वत्र कहा गया है । तो बुद्धि आदि प्रमाता के अन्दर स्थित पदार्थों का बाहर अवभासन होगा या नहीं ?—यह शङ्का कर कहते हैं—

संविद् के भीतर समग्र विश्व सत् है अन्यथा बुद्धि प्राण अथवा देह में (वह) कहाँ से, क्यों और किसके द्वारा संक्रमण करती । इस निर्विकल्पक (संविद्) में विकल्प नहीं है । और उस (= विकल्प) के बिना दृष्ट पदार्थ

'यद्यपि संविद्यन्तर्' ऐकात्म्येन 'सर्वम्' इदं भावजातं संभवेत्, अन्यथा बुद्ध्यादौ प्रमातरि सर्वमिदं 'कस्मात्' संविदतिरिक्तात्मकात् 'केन वा' स्वातन्त्र्यव्यतिरिक्तेन हेतुना 'कथं' केन वा अहन्तेदन्तादिपरामर्शातिरिक्तेन प्रकारेण 'संक्रामेत्' प्रतिबिम्बकल्पतयावभासेत—इत्यर्थः । अन्यथा हि बुद्ध्यादेरपि तत्तदर्थावभासो न भवेत्—इति भावः । 'तथापि अस्मिन्' बुद्ध्यादौ प्रमातरि—

'तस्यां निर्विकल्पकदशायामैश्वरो भावः पशोरपि ।'

इत्याद्युक्तयुक्त्या सर्वभावाविभेदावभासात्मनि 'निर्विकल्पे'ऽन्तस्तथात्वेन निश्चायको 'विकल्पो नास्ति' येन सर्वमेवेदम् अविभेदनावभासमानं स्यात्; यतो—

'दृष्टमपि अविमृष्टमदृष्टमेव ।'

इत्याद्युक्त्या विकल्पमन्तरेण 'दृष्टेऽपि अदृष्टकल्पत्वं' यथैव दृष्टं तथैव न प्ररूढम्—इत्यर्थः । तु-शब्दो हेतौ; यतो 'विकल्पेनैव' इदमित्थमित्येवमात्मा 'निश्चयः' स्यात् । स च विकल्पः सङ्कुचितस्य प्रमातुर्व्यापारः—इत्यंशांशिकया भेदेनैव निश्चिनुयात्, न तु अभेदेन—इति नास्ति बुद्ध्यादीनां सर्वभावाविभेदेनावभासः—इति युक्तमुक्तं 'तस्यान्योन्यविभेदतः' इति ॥ १५ ॥

नन्वेवं बुद्ध्यादेरपारमार्थिकत्वेऽपि ध्यानादिद्वारेण यथा परमार्थप्रकाशने

भी अदृष्टतुल्य होगा क्योंकि निश्चय तो विकल्प से होता है ॥ -१४-१६-॥

यद्यपि संविद् के अन्दर एकात्मभाव से यह समस्त पदार्थसमूह सम्भव है क्योंकि ऐसा न मानने पर बुद्धि आदि प्रमाता में यह सब किस = संविद् से भिन्न, किस कारण से = स्वातन्त्र्य से भिन्न कारण से, किस प्रकार से = 'अहन्ता' 'इदन्ता' आदि परामर्श से भिन्न प्रकार से, संक्रामित होगा = प्रतिबिम्ब के रूप में अवभासित होगा । अन्यथा बुद्धि आदि को भी तत्तत् अर्थों का अवभास नहीं होगा—यह तात्पर्य है—तथापि इसमें = बुद्धि आदि प्रमाता में, 'उस निर्विकल्पक दशा में पशु भी ईश्वर भाव से युक्त हो जाता है ।' इत्यादि उक्त युक्ति के अनुसार समस्त भावों के अभिन्न रूप से अवभास रूप निर्विकल्पक में = भीतर उस रूप में निश्चायक विकल्प नहीं है जिसके कारण यह सब अभिन्न रूप से अवभासमान हो ।

क्योंकि 'दृष्ट भी (यदि) अविमृष्ट है तो अदृष्ट ही हो जाता है ।' इत्यादि उक्ति के अनुसार विकल्प के बिना दृष्ट भी अदृष्ट जैसा ही होता है अर्थात् जैसा देखा गया वैसा समझा नहीं गया । श्लोक में 'तु' शब्द 'कारण' अर्थ में प्रयुक्त है । क्योंकि विकल्प के द्वारा ही 'यह ऐसा' है इस प्रकार का निश्चय होता है । वह विकल्प संकुचित प्रमाता का व्यापार है । इसलिये (प्रमाता) अंश अंशी वाले भेद रूप में ही निश्चय करेगा न कि अभेद रूप में । अतः बुद्धि आदि का समस्त भावों से अभिन्न रूप में अवभास नहीं होता—इसलिये ठीक कहा गया—'उसके परस्पर भिन्न होने के कारण (श्लोक १२-१३)' ॥ १५ ॥

निमित्तत्वमुक्तं, तथा शून्यस्यापि कथं न ?—इत्याशङ्क्याह—

बुद्धिप्राणशरीरेषु पारमेश्वर्यमञ्जसा ॥ १६ ॥
विकल्प्यं शून्यरूपे न प्रमातरि विकल्पनम् ।

इह खलु बुद्ध्यादौ प्रमातरि अहन्तास्पदत्वात् ज्ञत्वकर्तृत्वलक्षणं 'पारमेश्वर्यमञ्जसा विकल्प्यं' तत्तदवच्छेदमुखेन स्फुटं कृत्वा निश्चेयं, येन तद्गतं ध्यानादि पारमार्थिकस्वरूपलाभनिमित्तं स्यात् । 'शून्यरूपे' पुनः 'प्रमातरि' वस्तुतः संभवेऽपि पारमेश्वर(र्य)स्य नियतावच्छेदायोगात् तद्विकल्पयितुमेव न शक्यम्—इति कथं नामास्य परमार्थप्रकाशने निमित्तत्वं भवेत् ।

एवं बुद्ध्यादीनां त्रयाणामेव अत्र निमित्तत्वम्—इत्युक्तं स्यात् ॥ १६ ॥

नन्वेषां बुद्ध्यादीनां किं नाम तदस्ति, यदवलम्बनेनापि पारमार्थिकस्वरूपलाभो भवेत् ?—इत्याशङ्क्याह—

बुद्धिर्ध्यानमयी तत्र प्रांण उच्चारणात्मकः ॥ १७ ॥

प्रश्न—बुद्धि आदि के पारमार्थिक न होने पर भी ध्यान आदि के द्वारा जैसे वह परमार्थ के प्रकाश का कारण कारण बनती है उसी प्रकार शून्य भी (कारण) क्यों नहीं ?—यह शङ्का कर कहते हैं—

बुद्धि प्राण और शरीररूपी प्रमाता में (ज्ञत्वकर्तृत्वरूप) पारमेश्वर्य तुरन्त निश्चित हो जाता है किन्तु शून्य प्रमाता में विकल्प (की संभावना) नहीं रहती ॥ -१६-१७- ॥

बुद्धि आदि प्रमाताओं में अहन्तास्पद होने के कारण ज्ञत्व कर्तृत्व रूप पारमेश्वर भाव झट से विकल्प्य हो जाता है अर्थात् तत्तद् अवच्छेद के रूप में स्पष्ट रूप से निश्चय के योग्य हो जाता है जिस कारण उस (= बुद्धि आदि) में रहने वाला ध्यान आदि पारमार्थिक स्वरूपलाभ का कारण बन जाता है । 'शून्यरूपप्रमाता में पारमेश्वर्य के सम्भव होने पर भी (उसके) नियत अवच्छेद न होने से उस (पारमेश्वर्य) को नियत विकल्प का रूप नहीं दिया जा सकता । फिर यह परमार्थ-प्रकाशन का निमित्त कैसे बन सकता है ?

इस प्रकार बुद्धि आदि तीन (बुद्धि, प्राण और शरीर) ही इसमें कारण बनते हैं—यह तात्पर्य है ॥ १६-१७ ॥

प्रश्न—इन बुद्धि आदि में ऐसा क्या है जिसका अवलम्बन कर पारमार्थिक स्वरूप का लाभ हो जाता है ?—यह शङ्का कर कहते हैं—

बुद्धि ध्यानमयी होती है और उसमें प्राण उच्चारणात्मक होता है ॥ -१७ ॥

'ध्यानमयी' इति अनुसंधानप्राधान्यात् ॥ १७ ॥

उच्चारणं लक्षयति—

उच्चारणं च प्राणाद्या व्यानान्ताः पञ्च वृत्तयः ।

पञ्चेति । यदुक्तम्—

'प्राणोऽपानः समानश्च उदानो व्यान एव च ।' इति ॥

ननु द्विधा प्राणीया वृत्तिरस्ति—यदेका पञ्चानामपि प्राणादीनां भित्तिभूता सामान्यप्राणीया, अपरा च विशिष्टप्राणात्मिका—इति; तत् पञ्च वृत्तय उच्चारणम्—इति कथमुक्तम् ? इत्याशङ्क्याह—

आद्या तु प्राणनाभिख्यापरोच्चारात्मिका भवेत् ॥ १८ ॥

'प्राणनाभिख्या' इत्यान्तरोद्योगरूपा जीवनापरपर्याया प्राणनामात्रस्वभावा—इत्यर्थः । यद्वक्ष्यति—

'इयं सा प्राणना शक्तिरान्तरोद्योगदोहदा ।
स्पन्दः स्फुरत्ता विश्रान्तिर्जीवो हृत्प्रतिभा मतिः ॥
सा प्राणवृत्तिः प्राणाद्यै रूपैः पञ्चभिरात्मसात् ।
देहं यत्कुरुते संवित्पूर्णस्तेनैष भासते ॥' (तं. ६।१२)

बुद्धि ध्यानमयी इसलिये कि उसमें अनुसन्धान की प्रधानता रहती है ॥ १७ ॥

उच्चारण को बतलाते हैं—

प्राण से लेकर व्यान पर्यन्त पाँच वृत्तियाँ ही उच्चारण हैं ॥ १८- ॥

पाँच (वृत्तियाँ) जैसा कि कहा गया—

प्राण, अपान, समान, उदान और व्यान (ये पाँच) ही (वृत्तियाँ) है ॥१७-१८॥

प्रश्न—प्राण की दो ही वृत्तियाँ है—एक प्राण आदि पाँचों की आधारभूत सामान्य प्राणवृत्ति और दूसरी विशिष्ट प्राण वाली फिर पाँच वृत्तियाँ उच्चारण हैं—ऐसा कैसे कहा गया ?—यह शङ्का कर कहते हैं--

इन (वृत्तियों में से) पहली वृत्ति प्राणना कही जाती है और अन्य (चार) उच्चार (नाम से जानी जाती) है ॥ -१८ ॥

प्राणना नाम वाली = (शरीर के) अन्दर होने वाली उद्योगरूपा वृत्ति है जिसका दूसरा नाम जीवन है और प्राणन जिसका स्वभाव है । जैसा कि कहेंगे—

'यह वह प्राणना शक्ति है जो आन्तरिक उद्योगरूपा है । (इसके दूसरे नाम) स्पन्द, स्फुरत्ता, विश्रान्ति, जीवन, हृदय, प्रतिभा और मति है । वह प्राणवृत्ति प्राण (अपान) आदि पाँच रूपों के द्वारा जब शरीर को आत्मसात् कर लेती है तो उससे

इति । तदत्र विशिष्टा एव प्राणादिवृत्तयो विवक्षिताः—इति युक्तमुक्तं—पञ्च वृत्तय उच्चारणम्—इति । एतत्स्वरूपं च पुरस्ताद्भविष्यति इति नेहायस्तम् ॥ १८ ॥

एवं बुद्धिप्राणयोरसाधारणं रूपमभिधाय शरीरस्याप्यभिधत्ते—

शरीरस्याक्षविषयैतत्पिण्डत्वेन संस्थितिः ।

'अक्षाणि' इन्द्रियाणि 'विषयाः' कार्याणि 'एते' प्राणादयः तेषां 'पिण्डत्वेन' एकीभावेन 'संस्थिति' नाम देहप्रमातुरसाधारणं रूपम्—इत्यर्थः ॥

इदानीमधिकारिनिरूपणानन्तरं ध्यानादेः स्वरूपं वक्तुमुपक्रमते—

तत्र ध्यानमयं तावदनुत्तरमिहोच्यते ॥ १९ ॥

तदेवं बहूपायसाध्यत्वेऽपि 'ध्यानं' प्रकृतं मूलकारणं यस्यैवंविधम् 'अनुत्तरं' पारमार्थिकं रूपम् 'इह उच्यते' सांप्रतं प्राप्तावसरमभिधीयते—इत्यर्थः । अत एव तावच्छब्दः क्रमद्योतकः, अनुजोद्देशे हि बुद्धिध्यानमित्याद्युपक्रमः ॥ १९ ॥

तदाह—

यह (= बुद्धि आदि प्रमाता) संवित् से पूर्ण भासित होता है ।'

इसलिये यहाँ विशिष्ट ही प्राणवृत्तियाँ विवक्षित हैं । इसलिये ठीक ही कहा गया—'पाँच वृत्तियाँ ही उच्चारण है ।' इसका स्वरूप आगे बताया जायेगा इसलिये यहाँ विस्तार नहीं किया गया ॥ १८ ॥

इस प्रकार बुद्धि और प्राण के असाधारण रूप का कथन कर शरीर (के भी असाधारण रूप) का कथन करते हैं—

इन्द्रियों के विषय (और) इस प्राण आदि के पिण्ड (= आश्रय) के रूप में शरीर की स्थिति है ॥ १९- ॥

अक्ष—इन्द्रियाँ । विषय = कार्य । ये = प्राण आदि । उनका पिण्ड के रूप में = एक रूप में । संस्थिति ही देहप्रमाता का असाधारण रूप है ॥ १८-१९ ॥

अधिकारी का निरूपण करने के बाद ध्यान आदि के स्वरूप का निर्वचन करने का उपक्रम करते हैं—

उस (शरीर) में जो ध्यानमय है वह अनुत्तर कहा जाता है ॥ -१९ ॥

(आत्मज्ञान के) अनेक उपायों से साध्य होने पर ध्यान प्रधान मूलकारण है जिसका ऐसा पारमार्थिक रूप, यहाँ कहा जायगा = अब अवसर प्राप्त होने पर कहा जायगा । (श्लोक में) 'तावत्' शब्द क्रम का द्योतक है । अनुजोद्देश में बुद्धि ध्यान यही क्रम कहा गया है ॥ १९ ॥

यः प्रकाशः स्वतन्त्रोऽयं चित्स्वभावो हृदि स्थितः ।
सर्वतत्त्वमयः प्रोक्तमेतच्च त्रिशिरोमते ॥ २० ॥

'योऽयं चित्स्वभावो'ऽर्कादिप्रकाशविलक्षणोऽत एव स्वप्रकाशत्वात् 'स्वतन्त्रो'-ऽत एव च 'सर्वतत्त्वमयः' तत्तद्रूपतया परिस्फुरन् प्रकाशो हृदि' स्वपरामर्शे

'साक्षं सर्वमिदं देहं यद्यपि व्याप्य संस्थितः ।
तथाप्यस्य परं स्थानं हृत्पङ्कजसमुद्रकम् ॥'

इत्यादिनीत्या हृदयेऽवस्थितः, तत्रैव तत्त्वविदां साक्षात्कार्यः—इत्यर्थः । नन्वत्र किं प्रमाणम्—इत्युक्तम् 'एतच्च त्रिशिरोमते प्रोक्तम्' इति ॥ २० ॥

तत्रत्यमेव ग्रन्थं पठति—

कदलीसंपुटाकारं सबाह्याभ्यन्तरान्तरम् ।
ईक्षते हृदयान्तःस्थं तत्पुष्पमिव तत्त्ववित् ॥ २१ ॥

इह खलु आत्मज्ञः 'तत्' स्वतन्त्रप्रकाशात्म परं ब्रह्म आनन्दातिशयदायितया परमोपादेयत्वेन 'पुष्पमिव'

'......................हृदि ध्येयो मनीषिणाम् ।'

उसे कहते हैं—

जो स्वतन्त्र चित्स्वभाव वाला प्रकाश हृदय में स्थित है वह सर्वतत्त्वमय है—ऐसा त्रिशिरोभैरव का मत है ॥ २० ॥

जो यह चित्स्वभाव = सूर्य आदि के प्रकाश से विलक्षण, इसलिये स्वप्रकाश होने से स्वतन्त्र, इसलिये सर्वतत्त्वमय = तत्तद्रूप से स्फुरित होने वाला, प्रकाश हृदय में = स्वपरामर्श में—

'यद्यपि यह (परम तत्त्व) इन्द्रिय सहित समस्त शरीर को व्याप्त कर स्थित है तो भी इसका मुख्य स्थान हृदय कमल से युक्त महासमुद्र ही है ।'

इत्यादि नीति के अनुसार हृदय में अवस्थित है । तत्त्वज्ञ साधकों के लिये वहीं साक्षात् करने योग्य (स्थान) है । इसमें क्या प्रमाण है—इसका उत्तर देते हैं—यह त्रिशिरो भैरव में कहा गया है ॥ २०-२१ ॥

वहीं का ग्रन्थ पढ़ते हैं—

तत्त्ववेत्ता उसे केले के सम्पुट के आकार वाला, बाह्य एवं आभ्यान्तर का भी आभ्यन्तर तथा हृदय के अन्दर स्थित पुष्प के समान देखता है ॥ २१ ॥

आत्मज्ञानी उसको = स्वतन्त्र प्रकाशस्वरूप पर ब्रह्म अतिशय आनन्द दायक

इत्याद्युक्त्या 'हृदयान्तःस्थमीक्षते' साक्षात्कुर्यात्—इत्यर्थः । यतस्तत् 'कदल्या' योऽसौ 'संपुटः' परस्परमन्तर्बहीरूपतया मिलितानां दलानां संनिवेशः, तद्वदोतप्रोतत्वेनावस्थितैर्भूततन्मात्रेन्द्रियादिभिस्तत्त्वैः संविलित 'आकारो' यस्य तत्; अत एव 'बाह्यं' साधारणं तत्त्वजातम् 'आभ्यन्तरम्' असाधारणं तयोः साकल्यं 'सबाह्याभ्यन्तरं' तस्य 'आन्तरं' परप्रमात्रेकरूपम्—इत्यर्थः । इदमुक्तं भवति यथा कश्चित् कदल्या बाह्यं निःसारं दलमपास्य, शनैः शनैरान्तरमान्तरमाददानः पर्यन्ते परमोपादेयं पुष्पमादत्ते, तथैव तत्त्वविद् बाह्यं बाह्यं शारीरं तत्त्वजातं परित्यज्य, हृदयान्तः परिस्फुरन्तं स्वात्मानं साक्षात्कुर्यात्—इत्यर्थः ॥ २१ ॥

नन्वात्मनः सर्वदेहव्यापकत्वेऽपि कथं हृदय एवं साक्षात्कारो भवेत् ? इत्याशङ्क्याह—

सोमसूर्याग्निसङ्घट्टं तत्र ध्यायेदनन्यधीः ।

यतः 'तत्र' हृदये सावधानो योगी प्राणापानोदानात्मनां 'सोमसूर्याग्नीनां सङ्घट्टं ध्यायेत्' कुम्भकवृत्त्योन्मीलनामनुसंदध्यात्—इत्यर्थः ॥

ननु तत्रैवमनुध्याययतः किं फलम् ?—इत्याशङ्क्याह—

होने से परम उपादेय होने के कारण पुष्प के समान '... मनीषियों के लिये हृदय मे ध्यान करने योग्य है ।' इत्यादि उक्ति के अनुसार हृदय के भीतर साक्षात्कार करते है । क्योंकि वह, केले का जो सम्पुट = परस्पर अन्तर्बाह्य रूप में मिलित पंखुड़ियों का सन्निवेश, उसके समान ओतप्रोत होने से अवस्थित पाञ्चभूततन्मात्र इन्द्रिय आदि तत्त्वों से सम्बलित आकार वाला इसलिये बाह्य = साधारण तत्त्व-समूह, आभ्यन्तर = असाधारण तत्त्वसमूह उन दोनों की एकता का आन्तरिक तत्त्व जो कि पर प्रमाता रूप है, की उपासना तत्त्वज्ञ लोग करते हैं । तात्पर्य यह कहा जाता है कि जिस प्रकार कोई व्यक्ति केले की बाहरी सारहीन पंखुड़ियों को हटाकार धीरे-धीरे पर्त्त दर पर्त्त आन्तरिक तत्त्वों का ग्रहण करता हुआ अन्त में परम उपादेय पुष्प को प्राप्त करता है उसी प्रकार तत्त्ववेत्ता बाहरी-बाहरी शारीरिक तत्त्व- समूह का परित्याग करता हुआ हृदय के भीतर परिस्फुरित होने वाले अपने आत्मतत्त्व का साक्षात्कार करता है ॥ २१ ॥

प्रश्न—आत्मा के सर्वदेह व्यापी होने पर भी क्यों हृदय में ही साक्षात्कार होता है ?—यह शङ्का कर कहते हैं—

एकाग्रचित्त वाला (योगी) वहाँ सोम सूर्य और अग्नि के सङ्घट्ट का ध्यान करे ॥ २२- ॥

क्योंकि वहाँ = हृदय में, सावधान योगी प्राण अपान उदान रूप चन्द्र सूर्य और अग्नि के 'सङ्घट्ट' का ध्यान करता है अर्थात् कुम्भक वृत्ति के द्वारा उन्मीलन का अनुसन्धान करता है ॥ २१ ॥

तद्ध्यानारणिसंक्षोभान्महाभैरवहव्यभुक्   ॥ २२ ॥
हृदयाख्ये महाकुण्डे जाज्वलन् स्फीततां व्रजेत् ।

'तत्' समनन्तरोक्तं सोमसूर्याग्निसङ्घट्टात्म यत् 'ध्यानं' तदेव 'अरणिः' तस्याः सम्यक् प्राणापानगतित्रोटनेन निर्विकल्पतया मध्यधामानुप्रवेशात्मा यः 'क्षोभः' ततो हेतोः हृत्कुण्डे पारिमित्यतिरस्कारेणात्यर्थं ज्वलन् महाभैरवाग्निः 'स्फीततां व्रजेत्' पूर्णप्रमातृरूपतया स्वात्मसाक्षात्कारो भवेदित्यर्थः । तदुक्तम्—

'न व्रजेन्न विशेच्छक्तिर्मरुद्रूपा विकासिते।
निर्विकल्पतया मध्ये तया भैरवरूपधृत्॥' (वि.भै. २६ श्लोक)

इति ॥ २२ ॥

नन्वेतावतैव कथमेवं स्यात् ?—इत्याशङ्क्याह—

तस्य शक्तिमतः स्फीतशक्तेर्भैरवतेजसः ॥ २३ ॥
मातृमानप्रमेयाख्यं धामाभेदेन भावयेत् ।

यतः 'तस्य' स्वातन्त्र्यशालिनो भैरवात्मनः परस्य प्रकाशस्य मितप्रमात्रादि-

---

प्रश्न—वहाँ इस प्रकार के अनुसन्धान का क्या फल है ?—यह शङ्का कर कहते हैं—

उस ध्यान रूपी अरणि के संक्षोभ से हृदय रूपी महाकुण्ड में अतिशय जलने वाली महा भैरवरूपी अग्नि और तीव्र हो जाती है ॥ -२२-२३- ॥

उसके = अनन्तरोक्त सोमसूर्य अग्नि के, सङ्घट्ट का जो ध्यान वही अरणि है । प्राण अपान की गति को रोकने से निर्विकल्पक रूप में सुषुम्ना में अनुप्रवेश रूप जो क्षोभ इसके कारण हृदयकुण्ड में सङ्कोच के तिरस्कार से अत्यन्त प्रकाशमान महाभैरव-रूप अग्नि स्फीतता को प्राप्त करती हैं अर्थात् पूर्णप्रमाता के रूप में आत्मसाक्षात्कार हो जाता है । वही कहा गया—

'मरुत् रूपिणी शक्ति विकास को प्राप्त होने पर न कहीं जाती है न कहीं प्रवेश करती है किन्तु निर्विकल्पक रूप से मध्यधाम में भैरव रूप धारण कर स्फुरित होती रहती है' ॥ २२ ॥

प्रश्न—इतने से ही ऐसा कैसे हो जाता है ?—यह शङ्का कर कहते हैं—

(योगी को चाहिये कि वह) शक्तिमान् तीव्र शक्ति वाले उस भैरव तेज के प्रमाता प्रमाण और प्रमेय नामक तेज की ऐकात्म्य रूप से भावना करे ॥ -२३-२४- ॥

क्योंकि उसकी = स्वातन्त्र्य वाले भैरव रूप पर प्रकाश की, मित प्रमाता आदि

धामत्रयम् 'अभेदेन भावयेत्' तत्साद्भूतमनुसंदध्यात् । येन पारिमित्यतिरस्कारेण परप्रमात्रैकात्म्यमुदियात् ॥ २३ ॥

ननु सोमसूर्याग्निसङ्घट्टात्म ध्यानं परप्रमातृतापत्तौ निमित्तम्—इत्युक्तं तत्कथमिदानीमेव तदभेदेन मितमात्रादेर्भावमप्युच्यते—इत्याशङ्क्याह—

वह्न्यर्कसोमशक्तीनां तदेव त्रितयं भवेत् ॥ २४ ॥

'तत्' प्रमात्रादि त्रितयं वह्न्यादिशक्तीनामेव संबन्धि तद्रूपमेवेत्यर्थः ॥ २४ ॥

न केवलमेतत् वह्न्यादिशक्तिरूपमेव यावत् परादिरूपमपि—इत्याह—

परा परापरा चेयमपरा च सदोदिता ।

'सदा' सृष्टिस्थितिसंहाराख्यदशासु 'उदिता' इति प्रत्येकमभिसंबन्धः ॥

अत आह—

सृष्टिसंस्थितिसंहारैस्तासां प्रत्येकतस्त्रिधा ॥ २५ ॥

ननु आसां सदोदितत्वादनाख्यदशायामपि उदयः संभवेत्—इति कथं

तीन धाम के साथ अभेद रूप में भावना की जाती है जिससे सङ्कोच का तिरस्कार होकर पर प्रमाता के साथ तादात्म्य का उदय होता है ॥ २३-२४ ॥

प्रश्न—सोमसूर्य अग्नि के सङ्घट्ट का ध्यान पर प्रमातृता की प्राप्ति में कारण है, ऐसा कहा जा चुका है । तो फिर कैसे अभी उससे अभिन्न रूप में परिमित प्रमाता आदि की भावना भी कही जाती है ?—यह शङ्का कर कहते हैं—

अग्नि, सूर्य और सोम शक्तियों का भी वही (= प्रमातृ प्रमाण और प्रमेय) तीन शून्य है ॥ -२४ ॥

वह = प्रमाता आदि तीन, अग्नि आदि शक्तियों से ही सम्बद्ध हैं अर्थात् तद्रूप ही हैं ॥ २४ ॥

यह केवल वह्नि आदि शक्तिरूप ही नही अपितु परा आदि रूप भी है—यह कहते हैं—

यही सदा उदित परा परापरा और अपरा (शक्तियाँ) हैं ॥ २५- ॥

सदा = सृष्टि स्थिति संहार नामक दशाओं में । उदित रहती है । इसका प्रत्येक से सम्बन्ध है ॥ २४-२५ ॥

इसलिये कहते हैं—

उनमें से प्रत्येक सृष्टि स्थिति और संहार भेद से तीन-तीन प्रकार की हैं ॥ -२५ ॥

सृष्ट्यादिरूपतया प्रत्येकं त्रित्वमेवोक्तम् ?—इत्याशङ्क्याह—

चतुर्थं चानवच्छिन्नं रूपमासामकल्पितम् ।

'अनवच्छिन्नं' सृष्ट्याद्यवच्छेदशून्यम्, अत एवं 'अकल्पितं' तात्त्विकमित्यर्थः॥

एतदेव सङ्कलयति—

एवं द्वादश ता देव्यः सूर्यबिम्बवदास्थिताः ॥ २६ ॥
एकैकमासां वह्न्यर्कसोमतच्छान्तिभासनम् ।

'ताः' पराद्याः । अत्रैव हृदयङ्गमीकरणाय पुनः एकैकम् इत्यादिः हेतुः । एतच्च अनन्तराह्निक एव वितत्य निर्णीतम्—इति न पुनरिहायस्तम् ॥ २६ ॥

सर्वस्य चैतदनुभवसिद्धं न तु अपूर्वं किञ्चित्—इति दर्शयितुमाह—

एतदानुत्तरं चक्रं हृदयाच्चक्षुरादिभिः ॥ २७ ॥
व्योमभिर्निःसरत्येव तत्तद्विषयगोचरे ।

'एतत्' समनन्तरोक्तं द्वादशात्मकम् 'आनुत्तरं चक्रं हृदयात्' तत्स्थात्

प्रश्न—इनके सदा उदित होने से अनारख्या दशा में भी उदय हो सकता है फिर सृष्टि आदि के रूप में प्रत्येक का त्रित्व ही क्यों कहा गया ?—यह शङ्का कर कहते हैं—

इनका चतुर्थरूप अनवच्छित्र और अकल्पित है ।। २६- ।।

अनवच्छित्र = सृष्टि आदि अवच्छेद से शून्य । इसीलिये अकल्पित = तात्त्विक है ॥ २५ ॥

उसी का संकलन करते हैं—

इस प्रकार ये बारह देवियाँ सूर्य बिम्ब के समान स्थित है । उनमें से एक-एक वह्नि सूर्य सोम और उनके शान्ति रूप में भासित होती है ।। -२६-२७- ।।

वे = परा आदि । इसी में हृदयङ्गम करने के लिये 'एक-एक' यह हेतु है । इसको पिछले आह्निक में विस्तार से कहा गया इसलिये पुनः यहाँ विस्तार से नहीं कहा गया ॥ २६-२७ ॥

यह सबके अनुभव से सिद्ध है न कि कोई अपूर्व है—यह दिखलाने के लिये कहते हैं—

यही आनुत्तर चक्र चक्षु आदि (इन्द्रियों) के व्योम मार्ग से निकलकर तत्तद् विषयों तक पहुँचता है ॥ -२७-२८- ॥

यह = अनन्तरोक्त, द्वादश अरों वाला आनुत्तर चक्र, हृदय से = उसमें स्थित

परमेश्वररूपात् आत्मनश्चक्षुरादीन्द्रियव्योमवर्त्मना तत्तद्रूपादिविषयस्वीकारनिमित्तं तत्तद्वृत्तिरूपतया 'निःसरत्येव,' ननु न कदाचिन्निःसरतीत्यर्थः । इदमुक्तं भवति—यन्नाम प्रबुद्धस्याप्रबुद्धस्य वा स्वरसत एव चक्षुरादीन्द्रियवृत्तिद्वादशकं रूपाद्यर्थालोचनाय प्रसरद्वर्तते, तदेव इदमानुत्तरं चक्रम्—इति, किंतु अप्रबुद्धस्य तथात्वेनापरिज्ञायमानत्वात् बन्धकं, प्रबुद्धस्य तु मोचकम्—इति विशेषः । यथोक्तम्—

'सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका ॥'(स्प.का. ४।१८)

इति । तथा

'येन येन निबध्यन्ते जन्तवो रौद्रकर्मणा ।
सोपायेन तु तेनैव मुच्यन्ते भवबन्धनात् ॥'

इति ॥ २७ ॥

न केवलमेतत् अत्रैव यावदर्थेऽपि—इत्याह—

तच्चक्रभाभिस्तत्रार्थे सृष्टिस्थितिलयक्रमात् ॥ २८ ॥
सोमसूर्याग्निभासात्म रूपं समवतिष्ठते ।

'तस्य' समनन्तरोक्तस्य दृगादिदेवीद्वादशकात्मनः 'चक्रस्य' तत्तद्वृत्तिरूपाभिः

परमेश्वर रूप आत्मा से, चक्षु आदि इन्द्रिय मार्ग से तत्तद् रूप आदि विषय को स्वीकार करने के कारण तत्तद् वृत्ति के रूप में, निकलता ही है—कभी नहीं निकलता, ऐसा नहीं है । कहने का तात्पर्य यह है—ज्ञानी अथवा अज्ञानी के चक्षु आदि की बारह वृत्तियाँ रूप आदि विषयों के आलोचन के लिये प्रसृत होती है वही यह आनुत्तर चक्र है । अज्ञानी के लिये उस रूप में परिज्ञायमान होने से वह बन्धन का कारण होता है और ज्ञानी के लिये मुक्तिदायक—यही अन्तर है । जैसा कि कहा गया—

'शिव की यह क्रियात्मिका शक्ति पशु में रहने पर बन्धन कराती है । और अर्थात् स्वात्म में रहने पर = ज्ञाता होने पर सिद्धि देती है' तथा

'जिस-जिस रौद्र कर्म से पशु बन्धन से पड़ते हैं उपाय के साथ होने पर (वे ही कर्म) भवबन्धन से मुक्त कराते हैं' ॥ २७-२८ ॥

यह (आनुत्तर चक्र) केवल यहीं नहीं इन्द्रियों के विषयों में भी है—यह कहते है—

पहले कथित बारह करणेश्वरी रूप चक्र की किरणों के द्वारा भिन्न-भिन्न विषयों में सृष्टि, स्थिति एवं संहार रूप का अवलम्बन कर सोम, सूर्य एवं अग्नि के क्रम से प्रमेय प्रमाता आदि रूप में भी प्रस्फुरित होती है ॥ -२८-२९- ॥

'भाभिः', 'तत्रार्थे' तत्र तत्र विषये सृष्टिस्थितिसंहाराख्यरूपतामवलम्ब्य सोमाद्यात्ममेयमानमातृस्फारलक्षणं 'रूपं' सम्यक् स्वस्वरूपाविभेदेन 'अवतिष्ठते' किञ्चित् सङ्कुचत्तया बहिर्मुखत्वेन प्रस्फुरतीत्यर्थः । प्रमाता हि प्रथममवभास्यमानतया अर्थं सृजति, तदनु तत्रैव प्रशान्तनिमेषं कञ्चित्कालमनुरज्यन् परिस्थापयति, पश्चात् 'ज्ञातोऽयं मयार्थः' इति संतोषाभिमानात् स्वात्मनि विमृशन्नुपसंहरति, अनन्तरं हठपाकक्रमेण अलङ्ग्रासयुक्त्या पूर्णत्वापादनेन चिदग्निसाद्भावमापादयति—इति अर्थोऽपि दृगादिदेवीवच्चातूरूप्यमश्नुवानः सर्वस्य सर्वात्मकत्वात् तत्तादात्म्यमेवोपलभते । इति ॥ २८ ॥

अतश्च यत्र क्वापि एतच्चक्षुरादिमरीचिचक्रं निपतेत्, तत्रैतद्रूपतामेव विमृशेत् येन स्वात्मध्यानं सिद्ध्येत्, तदाह—

एवं शब्दादिविषये श्रोत्रादिव्योमवर्त्मना ॥ २९ ॥
चक्रेणानेन पतता तादात्म्यं परिभावयेत् ।

ननु शब्दादि श्रोत्रादिनियतवृत्तिवेदनीयम्—इति कथमेकैकत्र तत्र निखिलमेव श्रोत्रादिवृत्तिचक्रं निपतेत्—इति किमेतदुक्तम्? इत्यशङ्क्याह—

उसकी = पहले कथित बारह करणेश्वरी रूप चक्र की, तत्तद् वृत्ति रूप किरणों के द्वारा भिन्न-भिन्न विषयों में सृष्टि स्थिति संहार रूप का अवलम्बन कर सोम आदि वाले प्रमेय प्रमाता आदि का स्फार वाला रूप सम्यक् = स्वस्वरूप से अभिन्न होकर स्थित होता है । अर्थात् कुछ संकुचित होकर बहिर्मुखरूप से स्फुरित होता है। प्रमाता अवभास्यमान होने से पहले अर्थ की सृष्टि करता है उसके पश्चात् उसी में निमेषरहित होकर अनुरक्त होता हुआ कुछ काल तक स्थिति को प्राप्त करता है। उसके बाद 'मैंने इस विषय को जान लिया है' इस प्रकार के सन्तोष रूप ज्ञान का अपने में ही विमर्श करता हुआ उपसंहार करता है । पुनः हठपाक के क्रम से अलंग्रास युक्ति द्वारा पूर्णता की प्राप्ति कर (उस विषय के) चित् अग्नि रूप बना देता है । इस प्रकार विषय भी करणेश्वरी वर्ग की भाँति चार रूपों को प्राप्त करता हुआ 'सब सर्वात्मक है' इस सिद्धान्त के कारण उसके साथ तादात्म्य प्राप्त करता है ॥ २८-२९ ॥

इसलिए जहाँ कहीं भी यह चक्षु आदि मरीचिचक्र गिरे वहाँ पर इस रूपता का ही विमर्श करना चाहिए जिससे कि अपनी आत्मा का ध्यान सिद्ध हो । वही कहते हैं—

इस प्रकार शब्द आदि के विषय में श्रोत्र आदि छिद्रों के रास्ते पहुचने वाले इस चक्र के द्वारा नादात्मा की भावना करनी चाहिए ॥ -२९-३०- ॥

प्रश्न—शब्द आदि श्रोत्र आदि की निश्चित वृत्ति के द्वारा जाने जाते हैं तो कैसे एक-एक जगह समस्त श्रोत्र आदि वृत्तिसमूह जाएगा—इसलिए ये यह क्या कह दिया गया ?—यह शङ्का कर कहते हैं—

अनेन क्रमयोगेन यत्र यत्र पतत्यदः ॥ ३० ॥
चक्रं सर्वात्मकं तत्तत्सार्वभौममहीशवत् ।

तत्तदेतत् 'चक्रं'—

'समुदायवृत्ताः शब्दा अवयवेष्वपि वर्तन्ते ।'

इति नीत्या श्रोत्रादिलक्षणमेकैकं चक्रावयवं 'यत्र यत्र' शब्दादौ विषये 'पतति' अर्थात् तत्र तत्र 'अनेन' समनन्तरोक्तेन सृष्ट्यादिक्रमसम्बन्धेन सर्वस्य सर्वात्मकत्वात् चक्रात्मकम् अशेषवृत्त्यन्तरागूरणेन स्वस्वविषयोपभोगं करोतीत्यर्थः । अत्रैव दृष्टान्तः 'सार्वभौममहीशवत्' इति । यथा सार्वभौमो राजा यत्र कुत्रचन परराष्ट्रे निपतति तत्रास्य राजान्तराणि साहायकार्थमवश्यमनुपतन्ति; एवमेकैकापि चिद्वृत्तिर्यत्र क्वाप्यर्थे प्रसरति तत्रैव वृत्त्यन्तराण्यपि अनुधावन्तीति । यदुक्तम्—

'एकैकापि च चिद्वृत्तिर्यत्र प्रसरति क्षणात् ।
सर्वास्तत्रैव धावन्ति ताः पुर्यष्टकदेवताः ॥' इति ॥ ३० ॥

नन्वेवं सर्वस्य सर्वात्मकत्वोपदेशेन किम् ?—इत्याशङ्क्याह—

इत्थं वश्वाध्वपटलमयत्नेनैव लीयते ॥ ३१ ॥
भैरवीयमहाचक्रे संवित्तिपरिवारिते ।

इस क्रम से यह चक्र जहाँ-जहाँ जाता है वह-वह सार्वभौम सम्राट् के समान सर्वात्मक होता है ॥ -३०-३१- ॥

भिन्न-भिन्न यह चक्र—

'समुदाय में वर्त्तमान शब्द अवयवों में भी रहते हैं ।'

इस सिद्धान्त के अनुसार श्रोत्र आदि लक्षण वाला एक-एक चक्रावयव जहाँ-जहाँ शब्द आदि के विषय में जाता है वहाँ-वहाँ पीछे कहे गए सृष्टि आदि क्रम के सम्बन्ध के कारण सबके सर्वात्मक होने से दूसरी सभी वृत्तियों की सहमति के कारण चक्रात्मक अपने-अपने विषयों का उपभोग करता है । इस विषय में दृष्टान्त है—सार्वभौम सम्राट् के समान । जैसे सार्वभौम राजा दूसरे राष्ट्र में जहाँ कहीं भी जाता है वहाँ दूसरे राजा सहायता के लिए अवश्य पीछे-पीछे पहुँचते हैं उसी प्रकार एक चित्तवृत्ति जिस किसी विषय में बनती है वहीं पर पीछे-पीछे दूसरी वृत्तियाँ भी बनती हैं । जैसा कि कहा है—

एक क्षण में एक भी चित्तवृत्ति जहाँ पहुँचती है वे सभी पुर्यष्टक देवतायें वहीं दौड़कर पहुँच जाती हैं ॥ ३० ॥

प्रश्न—'सब में सब है' इस प्रकार के उपदेश से क्या (लाभ) ?—यह शङ्का कर कहते हैं—

इस प्रकार सम्पूर्ण अध्वसमूह संवित् से घिरे हुए भैरवी महाचक्र में

'इत्थम्' उक्तेन प्रकारेण ध्यायतश्चक्षुरादिसंवित्तिदेवीचक्रपरिवार्यमाणे 'भैरवीये' परप्रमात्रात्मनि चक्रेश्वरे 'विश्वं' षड्विधम् 'अध्वपटलम् अयत्नेनैव लीयते' तत्साद्भवतीत्यर्थ: । एकैकशो हि भावानामानन्त्यात् युगसहस्त्रैरपि संविदि विलयनं न सिद्ध्येत्—इति सर्वस्य सर्वात्मकत्वात् एकस्मिन्नेव भावे संविदि लीने विश्वमेवाक्रमेण सुखोपायं लीनं स्यात्—इत्ययत्नशब्दार्थ: ॥ ३१ ॥

नन्वेवमपि किम् ?—इत्याशङ्क्याह—

ततः संस्कारमात्रेण विश्वस्यापि परिक्षये ॥ ३२ ॥
स्वात्मोच्छलत्तया भ्राम्यच्चक्रं सञ्चिन्तयेन्महत् ।

'ततो'ऽनन्तरं 'संस्कारमात्रेणापि' अवस्थितस्य 'विश्वस्य' परित: समन्तात् बहीरूपतया 'क्षये' जाते सति व्यतिरिक्तवस्तुग्रासीकारात् 'स्वात्मोच्छलत्तया' स्वात्मनैव (उल्लसत्तया) 'महत्' कृत्वा 'भ्राम्यत्' सर्वत: प्रविजृम्भमाणं चक्षुरादीन्द्रियसंवित्तिरूपं 'चक्रं' सम्यक् विश्वक्रोडीकारेण चिन्तयेदित्यर्थ: ॥ ३२ ॥

ननु संनिहितेऽपि बाह्येऽर्थजाते चक्षुरादीन्द्रियवृत्त्यात्म संविच्चक्रमुदियात्—इत्यविवाद: । तदेव चेत् परिक्षीणं तत् कथमेतत् चक्रमपि स्वात्मन्युल्लसेत्—

लीन हो जाता है ।। -३१-३२- ।।

इस प्रकार = उक्त प्रकार से, ध्यान करने वाले का चक्षु आदि संवित्ति देवीचक्र के द्वारा घिरे हुये भैरवीय = पर प्रमाता रूप चक्रेश्वर में, विश्व = छहों प्रकार का, अध्वसमूह बिना प्रयत्न के ही लीन हो जाता है = वैसा ही हो जाता है—यह तात्पर्य है । पदार्थों के अनन्त होने के कारण एक-एक के क्रम से विलयन हजारों युगों में भी सिद्ध नहीं होगा । इसलिए सब के सर्वात्मक होने से, एक भाव के संविद् में लीन होने पर (सम्पूर्ण) विश्व एक साथ सुखपूर्वक लीन हो जाता है—यह अयत्न शब्द का अर्थ है ॥ ३१ ॥

प्रश्न—इससे भी क्या ?—ऐसी शङ्का कर कहते हैं—

इसके बाद संस्कार रूप में भी (स्थित) विश्व का क्षय होने पर स्वोच्छलत्ता के साथ तीव्र घूमने वाले चक्र का ध्यान करना चाहिए ।। -३२-३३- ।।

ततः = इसके बाद, संस्कारमात्र से भी स्थित विश्व का परित: = चारो ओर से, बाध्य रूप में क्षय होने पर (अपने से) भिन्न वस्तु को ग्रस लेने से अपनी उच्छलत्ता के कारण = अपने द्वारा (उल्लासित होने कारण) महत् करके घूमते हुए = चारों ओर फैले हुये चक्षु आदि इन्द्रिय संवित् रूप चक्र का सम्यक् = सबकों आत्मसात् करके ध्यान करना चाहिये ॥ ३२ ॥

प्रश्न—बाह्य अर्थ के निकट रहने पर भी चक्षु आदि इन्द्रियों की वृत्तिवाला

इति किमेतदुक्तम् ?—इत्याशङ्क्याह—

ततस्तद्दाह्यविलयात्   तत्संस्कारपरिक्षयात् ॥ ३३ ॥
प्रशाम्यद्भावयेच्चक्रं ततः शान्तं ततः शमम् ।

'ततः' तस्मात् समनन्तरोक्तात् 'दाह्यस्य' बाह्यस्यार्थजातस्य संक्षयात् हेतोः तच्चक्रं प्रशाम्यदवस्थं ध्यायेत्; ततोऽनन्तरं 'तत्संस्कारस्यापि परिक्षयात् शान्तं' यावदन्ते 'शमं' तच्चक्रप्रशान्त्या शुद्धमेव संविन्मात्रमनुसंदध्यादित्यर्थः ॥ ३३ ॥

एतदेव सङ्कलयति—

अनेन ध्यानयोगेन विश्वं चक्रे विलीयते ॥ ३४ ॥
तत्संविदि ततः संविद्विलीनार्थैव भासते ।

ननु यद्येवं विलीनार्था संविदेवावभासते तत् विद्युदुद्द्योतन्यायेन प्रमातृप्रमेयात्म विश्वं भायात्—इति सर्वदैव प्रलयोदयः स्यात् ?—इत्याशङ्क्याह—

चित्स्वाभाव्यात् ततो भूयः सृष्टिर्यच्चिन्महेश्वरी ॥ ३५ ॥

ननु चितः को नाम अयमेवंविधः स्वभावो येनास्या भूयोऽपि सृष्ट्यादौ कर्तृत्वम्—इत्याशङ्क्योक्तं 'यच्चिन्महेश्वरीति' ॥ ३५ ॥

संवित् चक्र उदित हो जाएगा—यह विवादरहित है । यदि वही क्षीण हो गया तो यह चक्र भी आत्मा में कैसे उल्लसित होगा—इसलिए यह क्या कहा गया ?-ऐसी शङ्का कर कहते हैं—

उसके बाद उस दाह्य का विलय होने से चक्र को शान्त होता हुआ ध्यान करना चाहिए । और उसके बाद उसका संस्कार क्षीण हो जाने पर शान्त और उसके बाद शम का (ध्यान करना चाहिए) ॥ -३३-३४- ॥

ततः = उस पहले कहे गए दाह्य = बाह्य पदार्थसमूह का क्षय होने के कारण उस चक्र का शान्त होने की अवस्था वाले रूप में ध्यान करना चाहिए । उसके बाद उसके संस्कार का भी क्षय होने से शान्त और अन्त में शम (अर्थात्) उस चक्र की शान्ति के कारण केवल शुद्ध ही संवित् का अनुसन्धान करना चाहिए ॥ ३३ ॥

यही संग्रहरूप में कहते हैं—

इस ध्यान के द्वारा (सम्पूर्ण) विश्व चक्र में लीन हो जाता है वह (= चक्र) संविद् में (लीन होता है ।) उसके बाद संविद् विलीन हो गया है अर्थ जिसमें (उस रूप में) भासित होती हैं ॥ -३४-३५- ॥

प्रश्न—यदि इस प्रकार विलीनार्था संविद् ही भासित होती है तो विद्युत् उद्योतन्याय से प्रमातृ प्रमेयात्मक विश्व आभासित होगा—फलतः प्रलय और उदय

नन्वेवं विश्वस्य प्रलयोदयचिन्तनेन ध्यायतः कोऽर्थः ?—इत्याशङ्क्याह—

एवं प्रतिक्षणं विश्वं स्वसंविदि विलापयन् ।
विसृजंश्च ततो भूयः शश्वद्भैरवतां व्रजेत् ॥ ३६ ॥

न केवलमेतदेव चक्रं योगिना ध्येयं यावच्चक्रान्तराण्यपि—इत्याह—

एवं त्रिशूलात् प्रभृति चतुष्पञ्चारकक्रमात् ।
पञ्चाशदरपर्यन्तं चक्रं योगी विभावयेत् ॥ ३७ ॥
चतुष्षष्टिशतारं वा सहस्रारमथापि वा ।
असंख्यारसहस्रं वा चक्रं ध्यायेदनन्यधीः ॥ ३८ ॥

एतच्च पुरस्तादेव गतार्थम्—इति न पुनरिहायस्तम् ॥ ३७-३८ ॥

नन्वसंख्यारत्वे किं निमित्तम् ?—इत्याशङ्क्याह—

संविन्नाथस्य महतो देवस्योल्लासिसंविदः ।

सर्वदा होगा—यह शङ्का कर कहते हैं—

चित् (शक्ति) के स्वभाव के कारण फिर सृष्टि होती है क्योंकि चित् महेश्वरी (= सब कुछ करने में समर्थ) है ॥ -३५ ॥

चित् का कौन सा ऐसा स्वभाव है जिसके कारण यह पुनः सृष्टि आदि करती है ?—ऐसी शङ्का कर कहा गया—क्योंकि चित् (शक्ति) महेश्वरी है ॥ ३५ ॥

प्रश्न—इस प्रकार विश्व के प्रलय और उदय के चिन्तन से ध्याता का क्या लाभ ?—ऐसी शङ्का कर कहते हैं—

इस प्रकार प्रतिक्षण विश्व को अपनी संविद् में विलीन करता हुआ और पुनः सृष्टि करता हुआ (साधक) शश्वद् भैरवता को प्राप्त हो जाता है ॥ ३६ ॥

योगी के द्वारा केवल इसी चक्र का ध्यान नहीं अपितु दूसरे चक्रों का भी (ध्यान) किया जाना चाहिए—यह कहते हैं—

इस प्रकार योगी त्रिशूल से लेकर चतुःशूल पञ्चशूल और इसी क्रम से पचास तक शूल वाले चक्र का ध्यान करें ॥ ३७ ॥

एकनिष्ठ (योगी) चौंसठ अथवा सहस्त्र शूल अथवा असंख्य शूल वाले चक्र का ध्यान करे ॥ ३८ ॥

यह पहले ही बतला दिया गया है इस कारण यहाँ विस्तारपूर्वक नहीं कहा गया ॥ ३७-३८ ॥

प्रश्न—असंख्य शूल होने में क्या निमित्त है ?—यह शङ्का कर कहते हैं—

नैवास्ति काचित्कलना विश्वशक्तेर्महेशितुः ॥ ३९ ॥

नन्वत्र किं प्रमाणम् ? इत्याशङ्क्याह—

शक्तयोऽस्य जगत् कृत्स्नं शक्तिमांस्तु महेश्वरः ।
इति माङ्गलशास्त्रे तु श्रीश्रीकण्ठो न्यरूपयत् ॥ ४० ॥

यदुक्तं तत्र—

'शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते ।
शक्तयश्च जगत्सर्वं शक्तिमांश्च महेश्वरः ॥' इति ॥ ४० ॥

न चैतत् स्वोपज्ञमेवास्माभिरुक्तम्—इत्याह—

इत्येतत् प्रथमोपायरूपं ध्यानं न्यरूपयत् ।
श्रीशम्भुनाथो मे तुष्टस्तस्मै श्रीसुमतिप्रभुः ॥ ४१ ॥

एतदेव अन्यत्राप्यतिदिशति—

अनयैव दिशान्यानि ध्यानान्यपि समाश्रयेत् ।
अनुत्तरोपायधुरां यान्यायान्ति क्रमं विना ॥ ४२ ॥

'अन्यानि' इति शास्त्रान्तरोक्ततत्तच्चक्ररूपाणि ॥ ४२ ॥

संवित् के स्वामी, महान्, उल्लासपूर्ण संविद् वाले महेश्वर की विश्वशक्ति की कोई गणना नहीं है (अर्थात् उसकी अनन्त अरारूप कलनायें हो सकती हैं) ॥ ३९ ॥

प्रश्न—इस विषय में क्या प्रमाण है—यह शङ्का कर कहते हैं—

महेश्वर शक्तिमान् हैं (और) इसकी शक्तियां ही निखिल विश्व हैं—ऐसा श्री श्रीकण्ठ ने माङ्गलशास्त्र में कहा है ॥ ४० ॥

जैसा कि वहाँ कहा गया है—

"शक्ति और शक्तिमान् दो पदार्थ कहे जाते हैं । शक्तियाँ समस्त संसार हैं और शक्तिमान् परमेश्वर हैं" ॥ ४० ॥

ऐसा मैने अपनी बुद्धि से ही नहीं कहा है—वहीं कहते हैं—

मेरे ऊपर प्रसन्न हुए श्री शम्भुनाथ ने इस प्रथम उपाय रूप ध्यान का निरूपण किया और उन (शम्भुनाथ) को श्री सुमतिनाथ प्रभु ने (उपदेश दिया था) ॥ ४१ ॥

इसी को अन्यत्र भी अतिदिष्ट करते हैं—

इसी रीति से (उन) दूसरे ध्यानो का भी आश्रयण करना चाहिए जो कि बिना क्रम के अनुत्तरोपाय धुरा को प्राप्त होते हैं ॥ ४२ ॥

एवं ध्यानस्वरूपं निरूप्य तदनन्तरोद्दिष्टं प्राणतत्त्वसमुच्चारं वक्तुमुपक्रमते—

अथ प्राणस्य या वृत्तिः प्राणनाद्या निरूपिता ।
तदुपायतया ब्रूमोऽनुत्तरप्रविकासनम् ॥ ४३ ॥

तदेवाह—

निजानन्दे प्रमात्रंशमात्रे हृदि पुरा स्थितः ।
शून्यतामात्रविश्रान्तेर्निरानन्दं विभावयेत् ॥ ४४ ॥
प्राणोदये प्रमेये तु परानन्दं विभावयेत् ।
तत्रानन्तप्रमेयांशपूराणापाननिर्वृतः ॥ ४५ ॥
परानन्दगतस्तिष्ठेदपानशशिशोभितः ।
ततोऽनन्तस्फुरन्मेयसङ्घट्टैकान्तनिर्वृतः ॥ ४६ ॥
समानभूमिमागत्य ब्रह्मानन्दमयो भवेत् ।
ततोऽपि मानमेयौघकलनाग्रासतत्परः ॥ ४७ ॥
उदानवह्नौ विश्रान्तो महानन्दं विभावयेत् ।

इह खलु योगी 'पुरा' प्रथमं

अन्यानि = दूसरे शास्त्रों में कहे गये भिन्न-भिन्न चक्ररूप ॥ ४२ ॥

इस प्रकार ध्यान के स्वरूप का निरूपण कर उसके बाद कहे गये प्राणतत्त्व के समुच्चार को बतलाने के लिये उपक्रम करते हैं—

इस प्राण की जो प्राणन आदि वृत्ति कही गई उसके उपाय के रूप में अनुत्तर—विकास को (हम) बतला रहे हैं ॥ ४३ ॥

वही कहते हैं—

(योगी को चाहिए कि वह) सर्वप्रथम शून्यता मात्र में विश्रान्ति लाभ के बाद हृदय में केवल प्रमातृरूप निजानन्द में स्थित होकर निरानन्द की भावना करें ॥ ४४ ॥

(बाद में) प्राण का उदय होने पर प्रमेय में परानन्द की भावना करें । वहाँ पर अनन्त प्रमेयांश (कर्तृक) पूरण रूप अपान के द्वारा निष्पादित एवं अपान रूपी चन्द्रमा से शोभित परानन्द में स्थित रहे । उसके बाद स्फुरित होने वाले प्रमेय के सङ्घट्ट के द्वारा पूर्ण रूप से निर्वृत होकर समान भूमि को प्राप्त होकर (योगी) ब्रह्मानन्दमय हो जाय । उसके पश्चात् प्रमाणप्रमेय-समूह की कलना के विलायन में तत्पर (योगी) उदान अग्नि में विश्रान्त होकर महानन्द की भावना करे ॥ ४५-४८- ॥

योगी पुरा = पहले

'अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते ।
अभावः स समुद्दिष्टो यत्र भावाः क्षयं गताः ॥'

(स्व.तं. ४।२९१)

इत्यादिना निरूपितस्वरूपे संविदेकात्मनि 'शून्यतामात्रे' विश्रान्तिमाश्रित्य प्राणाद्युदयविश्रामधामनि 'हृदि' विषये 'निजो' निरुपाधित्वात् स्वभावभूत 'आनन्दो' यस्यैवंविधे प्रमेयाद्यंशान्तरापेक्षया 'प्रमात्रंशमात्रे स्थितः' स्वात्मानमेव केवलतया साक्षात्कुर्वन्नवस्थितः सन्, अनन्तरं

'प्राक्संवित् प्राणे परिणता ।'

इति नीत्या प्रमाणात्मनः 'प्राणस्य' हृदयात् द्वादशान्तं रेचकक्रमेण 'उदये' कथंचिब्दहिरौन्मुख्यात् 'निरानन्दं' निजात्प्रमातृसंमतादानन्दात् निष्क्रान्तं दशाविशेषं 'विभावयेत्' लक्षयेदित्यर्थः । अपानात्मनि 'प्रमेये' पुनरुदयति 'परेण' प्रमेयेण कृतम् 'आनन्दं विभावयेत्'; यतः 'तत्र' तस्यां प्रमेयोदयदशायाम्, असौ परानन्दनिष्ठस्तिष्ठेत्; यतो 'अनन्ताः' ये प्रमात्राद्यपेक्षया प्रमेयलक्षणा 'अंशाः' तत्कर्तृका येयं 'पूरणा' तत्तदर्थग्रहणेन नैराकाङ्क्ष्यं सैव 'पानं' पीतिः तेन 'निर्वृतः' स्वात्ममात्रविश्रान्तो, यस्मात् 'अपान' एवाप्यायकारितया 'शशी' तेन 'शोभितः' पूरकक्रमेण द्वादशान्ताद्धृदयं यावत् तद्दशामधिशयान इत्यर्थः । ततोऽपि हृदये

''अशून्य को शून्य कहा गया है । शून्य अभाव को कहते हैं । अभाव उसे कहा गया है जहाँ कि भाव विलय को प्राप्त हो गए हों ।'' (स्व. ४।२९१)

इत्यादि के द्वारा निरूपितस्वरूप वाले संविद्स्वरूप शून्यता मात्र में विश्रान्त होकर प्राण आदि के उदय और विश्राम के स्थल—हृदय में निजी = उपाधिरहित होने से स्वभावभूत आनन्द है जिसका इस प्रकार के प्रमात्रंश मात्र,जो कि प्रमेय आदि अंश से शून्य है, में स्थित होकर आत्मा का ही केवली रूप में साक्षात् करते हुए स्थित होकर, बाद में

'संविद् पहले प्राण के रूप में परिणत हुई'

इस नीति से प्रमाण रूप प्राण का हृदय से द्वादशान्त तक रेचक के क्रम से उदय होने पर किसी प्रकार बाह्य औन्मुख्य के कारण निरानन्द = अपने प्रमातृ—संमत आनन्द से निष्क्रान्त दशाविशेष की भावना करनी चाहिए = देखना चाहिये । अपान रूप प्रमेय के पुनः उदित होने पर 'पर' = प्रमेय के द्वारा रचे गए आनन्द की भावना करनी चाहिए । क्योंकि वहाँ = उस प्रमेयोदय दशा में यह (= योगी) परानन्दनिष्ठ होकर रहे । क्योंकि प्रमाता आदि की अपेक्षा अनन्त प्रमेयस्वरूप अंश उनके द्वारा की गई जो यह पूरणा = उन-उन विषयों के ग्रहण के कारण निराकाङ्क्षता, वही पान अर्थात् पीति उसके द्वारा निर्वृत = अपने आप में विश्रान्त। क्योंकि अपान ही पूरणकर्त्ता होने के कारण चन्द्रमा है, उसके द्वारा

कुम्भकवृत्त्या क्षणं विश्रम्य तेषां समनन्तरोक्तानां नीलसुखादिरूपतया 'अनन्तानाम्' प्रतिभासमानानां 'मेयानाम्' अन्योन्यमेलनात्मा योऽसौ 'सङ्घट्टः' तेन 'एकान्तेन' अव्यभिचारेण 'निर्वृतः' सन्, सममेव समग्रमेयस्वीकारात् समानभूमिमासाद्य मेयेन संभूय कृतत्वाद् बृंहितेन ब्रह्मरूपो योऽसावानन्दः, तन्मयो भवेत्, परानन्ददशातोऽपि विशिष्टामानन्ददशामनुभवेदित्यर्थः । तदनन्तरमपि 'मानमेययोः' सूर्यसोमात्मनोः प्राणापानयोर्य 'ओघः' प्रवाहस्तस्य याः

'षट् शतानि वरारोहे सहस्राण्येकविंशतिः ।' (वि०भै० १५६)

इत्यादिना निरूपितस्वरूपाः 'कलनाः' तासां 'ग्रासतत्परः' तद्‌घट्टनपरायणो योगी मध्यमार्गेणोर्ध्वगामिनी 'उदानवह्नौ' उत्कर्षकक्रमेण परिहृतप्राणाद्यवान्तरक्षोभतया 'विश्रान्तो महान्तं' प्रमाणादिदशाधिशायिनिरानन्दादिवैलक्षण्यादुत्कृष्टं प्रमातृसंमतम् 'आनन्दं विभावयेत्' स्वात्ममात्रविश्रान्तिरूपतया विमृशेदित्यर्थः ॥ ४७ ॥

नन्वेवं परामर्शेनास्य किं स्यात् इत्याशङ्क्याह—

तत्र विश्रान्तिमभ्येत्य शाम्यत्यस्मिन्महार्चिषि ॥ ४८ ॥

'तत्र' महानन्दे विश्रान्तिमागत्य 'अस्मिन् महार्चिषि' प्रमात्रात्मन्युदानवह्नौ

शोभित = पूरक क्रम से द्वादशान्त से हृदय तक उस दशा में विश्राम करता हुआ। उसके बाद हृदय में कुम्भक के द्वारा थोडी देर तक विश्राम कर, पहले कहे गए, नील सुख आदि के रूप में वर्त्तमान अनन्त प्रतिभासमान प्रमेय पदार्थों का एक के साथ दूसरे को मिलाने से बना हुआ जो सङ्घट्ट उसके द्वारा एकान्त रूप से = पूर्णतया निर्वृत होता हुआ साथ ही समग्र प्रमेय के स्वीकार के कारण समान भूमि को प्राप्त कर मेय से मिलाकर करने के कारण बढ़ने से ब्रह्मरूप में जो यह आनन्द, तन्मय हो जाना चाहिए अर्थात् परमानन्द दशा से भी विशिष्ठ दशा का अनुभव करना चाहिए । उसके बाद भी प्रमाण और प्रमेय जो कि सूर्य और सोम रूप हैं 'प्राण और अपान है उन दोनो का ओघ' = प्रवाह, उसकी जो

'हे वरारोहे (पार्वति) इक्कीस हजार छः सौ'

इत्यादि के द्वारा जिनका स्वरूप निरूपित है ऐसी कलनायें, उनके ग्रास में लगा हुआ = उनके घट्टन में परायण, योगी सुषुम्ना के द्वारा ऊर्ध्वगामी उदान वहि में उत्कर्ष के क्रम से परिहृत प्राण आदि अवान्तर के क्षोभ के कारण विश्रान्त महान् = प्रमाण आदि दशा में विश्राम करने वाले, निरानन्द आदि से विलक्षण होने के कारण उत्कृष्ट, प्रमातृसम्मत आनन्द की भावना करनी चाहिए अर्थात केवल आत्मा में विश्रान्ति रूप से विमर्श करना चाहिए यह अर्थ है ॥ ४४-४७ ॥

प्रश्न—इस प्रकार के परामर्श से क्या होगा ?—यह शङ्का कर कहते हैं—

(योगी) वहाँ इस विश्रान्ति को प्राप्त कर इस महातेज में मिल जाता है ॥ -४८ ॥

'शाम्यति' तदेकसाद्भवतीत्यर्थः ॥ ४८ ॥

ननु तत्र का नामास्य शान्तिरुच्यते ?—इत्याशङ्क्याह—

निरुपाधिर्महाव्याप्तिर्व्यानाख्योपाधिवर्जिता ।
तदा खलु चिदानन्दो यो जडानुपवृंहितः ॥ ४९ ॥

सा च शान्तिः 'निरुपाधिः' निष्क्रान्ता भेदेन स्फुरिता मातृमानमेयात्मान 'उपाधयो' यस्याः सा तथा, अत एव कलादिक्षित्यन्तं व्याप्यावस्थानात् 'महाव्याप्तिः' अत एव सर्वत्र व्यापकतयाननात् 'व्यानाख्या' व्यानदशामधिशयानेत्यर्थः । एवं सर्वमयत्वेऽपि सर्वोत्तीर्णेत्युक्तम् 'उपाधिवर्जिता' इति । अत एव 'तदा' तस्यां दशायां चिद्रूप एवानन्दः । नहि तदानीं मेयाद्यात्मनामचिताम् अवकाशोऽस्तीत्युक्तं 'यो जडानुपवृंहित' इति ॥ ४९ ॥

अत्रैव हेतूपन्यासः—

नह्यत्र संस्थितिः कापि विभक्ता जडरूपिणः ।

'विभक्ता' इति अविभागेन पुनरेषामस्त्येव सद्भावः—इति भावः । यदुक्तम्—

तत्र = महानन्द में विश्रान्ति को प्राप्त कर इस महातेज में = प्रमातृरूप उदान वह्नि में, शान्त हो जाता है = उसी रूप का हो जाता है ॥ ४८ ॥

प्रश्न—इसकी शान्ति किसे कहते हैं—ऐसी शङ्का कर कहते हैं—

(वह शान्ति) उपाधिरहित, महाव्याप्तिस्वरूप तथा व्यान नामक उपाधि से रहित है । उस समय चिदानन्द (की स्थिति रहती है) जो कि जड़ से अस्पृष्ट है ॥ ४९ ॥

और वह शान्ति निरूपाधि = निष्क्रान्त है भेदपूर्वक स्फुरित होने वाली माता मान और मेयरूप उपाधियाँ जिससे वह उस प्रकार की है । इसलिए कला से लेकर पृथिवीपर्यन्त व्याप्त होकर रहने से महाव्याप्ति है । अत एव सर्वत्र व्यापक रूप से प्राणन करने के कारण व्यान नाम वाली अर्थात् व्यान दशा में विश्राम करने वाली । इस प्रकार सर्वमय होने पर भी सर्वोत्तीर्ण है—इसलिए कहा गया कि—उपाधिरहित । इसीलिए उस समय = उस दशा में, चिद्रूप ही आनन्द है । उस समय प्रमेय आदि जड़ (पदार्थों) की सत्ता नहीं रहती इसलिए कहा गया—जो जड़ से अनुपवृंहित है ॥ ४९ ॥

इसी विषय में हेतु दिया गया—

इस स्थिति में कोई अलग जड़ रूपी सत्ता नहीं रहती ॥ -५०-५१-॥

'विभक्त' कहने का तात्पर्य है कि अविभक्त रूप में इनकी सत्ता रहती ही है । जैसा कि कहा गया है—

'स्वात्मेव स्वात्मना पूर्णा भावा भान्त्यमितस्य तु ।'

(ई०प्र० २।१।७) इति ॥

ननु निरुपाधित्वादनवच्छिन्नं प्रमात्रात्म परं तत्त्वम्—इत्युक्तं तत् कथमत्र अविभागेनापि व्यवच्छेदका भावाः संस्युः ?—इत्याशङ्क्याह—

यत्र कोऽपि व्यवच्छेदो नास्ति यद्विश्वतः स्फुरत्॥ ५० ॥
यदनाहतसंवित्ति परमामृतबृंहितम् ।
यत्रास्ति भावनादीनां न मुख्या कापि सङ्गतिः ॥ ५१ ॥
तदेव जगदानन्दमस्मभ्यं शंभुरूचिवान् ।

'यत्र न कोऽपि' न कश्चिदपि 'व्यवच्छेदोऽस्ति'; यत एतत् 'विश्वतः' सर्वेण रूपेण 'स्फुरत्,' नहि एतदतिरिक्तमन्यत् किञ्चित् संभवेत्; यतोऽस्य व्यवच्छेदोऽपि भवेदिति भावः । अत एव 'यत्, अनाहता' प्रमातृप्रमेयाद्यात्मना सर्वतः प्रस्फुरन्ती 'संवित्तिः' यस्य तत्, अत एव स्वातन्त्र्यलक्षणेन 'परमेणामृतेन बृंहितं' पूर्णमनन्यापेक्षम्—इति यावत् । अत एव प्रतिनियतरूपत्वाभावात् 'यत्र भावनादीनां न मुख्या' काचित् 'सङ्गतिः' साक्षादुपायता नास्तीत्यर्थः । यदुक्तम्—

'तेनावधानप्राणस्य भावानादेः परे पथि ।
भैरवीये कथङ्कारं भवेत् साक्षादुपायता ॥' (तं. २।१३)

''सीमा से रहित (ईश्वर अथवा योगी) को (सारे पदार्थ) अपनी आत्मा के समान स्वयं पूर्ण प्रतीत होते हैं ॥'' (ई०प्र०वि० २।१।७)

प्रश्न—उपाधिरहित होने के कारण अनवच्छिन्न प्रमातृ आत्मा परम तत्त्व है—ऐसा कहा गया है, तो यहाँ कैसे अविभक्त रूप में व्यवच्छेदक भाव स्थित रहेंगे ?—ऐसी शङ्का कर कहते हैं—

जहाँ कोई भी व्यवच्छेद नहीं है; जो सब ओर से स्फुरित हो रहा है; जो अनाहत बोध रूप है; परम अमृत से बृंहित है, और जहाँ भावना आदि की कोई मुख्य सङ्गति नहीं है वही जगदानन्द हैं—ऐसा हम लोगों से श्रीशम्भुनाथ ने कहा ॥ -५०-५२- ॥

जहाँ पर कोई भी व्यवच्छेद नहीं है, जो यह विश्वतः = सभी रूपों में, स्फुरित हो रहा है । इससे अतिरिक्त दूसरा कुछ सम्भव नहीं है जिससे कि इसका पार्थक्य भी हो । इसीलिए जो, अनाहत = प्रमातृ प्रमेय आदि के रूप में सब ओर से स्फुरित होती हुई संवित् है जिसकी, वह है, इसीलिए स्वातन्त्र्य लक्षण परम अमृत से रहित = पूर्ण = अनन्यापेक्ष है । इसीलिए प्रतिनियत रूप के न होने से जहाँ भावना आदि की कोई मुख्य सङ्गति = साक्षात् उपायता, नहीं है—यह अर्थ है । जैसा कि कहा है—

'इसलिए जहाँ अवधान मुख्य है ऐसे भावना आदि, भैरवीय परम पथ के

तदेतत् प्रमात्रात्म चिदेकरूपं परं तत्त्वं जगता निजानन्दाद्यात्मना विश्वेन रूपेणानन्दो यत्र यतश्चेति जगदानन्दशब्दवाच्यम् अस्मभ्यं श्रीशंभुनाथ आदिशत्, न पुनरेतदस्माभिः स्वोपज्ञमेवोक्तमित्यर्थः ॥ ५१ ॥

नचैतदुपदेशमात्रादेव विरन्तव्यम्—इत्याह—

तत्र विश्रान्तिराधेया हृदयोच्चारयोगतः ॥ ५२ ॥

'हृदयानाम्' उक्तवक्ष्यमाणानां सृष्ट्याद्यात्मनां हृदयाच्चोच्चारः ॥

नन्वत्र विश्रान्त्या किं स्यात् ?—इत्याशङ्क्याह—

या तत्र सम्यग्विश्रान्तिः सानुत्तरमयी स्थितिः ।

एतदेवोपसंहरति—

इत्येतद्धृदयाद्येकस्वभावेऽपि स्वधामनि ॥ ५३ ॥
षट्प्राणोच्चारजं रूपमथ व्याप्त्या तदुच्यते ।

यद्यपि स्वात्मतेजसो हृदादावेक एव स्वभावः, नहि हृदयाद् द्वादशान्तं ततोऽपि वा हृदयमपक्रान्तस्य कश्चिद्विशेषः । यदुक्तम्—

विषय में कैसे साक्षात् उपाय हो सकते हैं ।' (तं०आ० २।१३)

वह यह प्रमातृस्वभाववाला चिदेकरूप परमतत्त्व जगत् अथात् निजानन्द आदि विश्वरूप से आनन्द हैं जहाँ और जहाँ से—ऐसा जगदानन्द शब्द का वाच्य हमें श्री शम्भुनाथ ने बतलाया, न कि हमने इसे अपनी बुद्धि से ही कहा है—यह अर्थ है ॥ ५०-५१ ॥

केवल इतने ही उपदेश से शान्त नहीं हो जाना चाहिए—यह कहते हैं—

हृदयोच्चार योग से वहाँ विश्रान्ति करनी चाहिए ॥ -५२ ॥

हृदयों का = कहे गए और आगे कहे जाने वाले सृष्टि आदि का हृदय से उच्चार ॥ ५२ ॥

प्रश्न—इसमे विश्राम करने से क्या होगा ?—यह शङ्का कर कहते हैं—

वहाँ जो सम्यक् विश्रान्ति है वह अनुत्तरमयी स्थिति है ॥ ५३- ॥

उसी का उपसंहार करते हैं—

अपने धाम के हृदय आदि एक स्वभाव रूप होने पर भी यह रूप छः प्राणों के उच्चार से उत्पन्न हैं । अब इसे विस्तार से कहते हैं ॥ -५३-५४- ॥

यद्यपि आत्मतेज का हृदय आदि में एक ही स्वभाव है । हृदय से लेकर

'चलित्वा यास्यते कुत्र सर्वं शिवमयं यतः ।'

(स्व०तं० ४।३१०)

इति । यदभिप्रायेणैव—

'चक्राधाराटव्यां भ्रमन्त्यसत्यां परिच्युतविवेकाः ।'

इत्याद्यन्यैरुक्तम्, तथापि सङ्कोचतारतम्येन भेदोल्लासात् सामान्यविशेषरूपतया षट्प्रकारस्य प्राणस्य यः प्राणनापाननाद्यात्मोच्चारः, ततो जातं निरानन्दाद्यात्मकम् एतद्रूपम् 'इति' अनन्तरोक्तेन प्रकारेणोक्तमिति शेषः । इदानीमेतदेव मन्त्रव्याप्ति-मुखेनाप्यभिधीयते—इत्याह 'अथ' इत्यादि ॥ ५३ ॥

तदेवाह—

प्राणदण्डप्रयोगेन पूर्वापरसमीकृतेः ॥ ५४ ॥
चतुष्किकाम्बुजालम्बिलम्बिकासौधमाश्रयेत् ।
त्रिशूलभूमिं क्रान्त्वातो नाडित्रितयसङ्गताम् ॥ ५५ ॥
इच्छाज्ञानक्रियाशक्तिसमत्वे प्रविशेत् सुधीः ।

इह खलु योगी मत्तगन्धसङ्कोचादिक्रमेण प्राणस्य तिर्यक्प्रवाहनिरोधात्

द्वादशान्त तक अथवा वहाँ से लेकर हृदय तक लौटने वाले (उच्चार) में कोई वैशिष्ट्य नहीं होता । जैसा कि कहा है—

'चल कर कहाँ जायेगा क्योंकि सब तो शिवमय है ।' (स्व. ४।३१०)

इसी अभिप्राय से दूसरे लोगों के द्वारा कहा गया कि—

'विवेकभ्रष्ट होकर असत्य (अनन्त) चक्राधार रूपी घने जङ्गल में घूमते रहते हैं ।'

तथापि सङ्कोचतारतम्य के द्वारा भेद का उल्लास होने से सामान्य तथा विशेष रूप से छ प्रकार के प्राण का जो प्राणन अपानन आदि आत्मोच्चार, उससे उत्पन्न निरानन्द आदि यह रूप पूर्वोक्त प्रकार से कहा गया इतना जोड़ लेना चाहिए ।

अब यही बात मन्त्रव्याप्ति के द्वारा कही जा रही है—

यह कहते हैं—अथ इत्यादि ॥ ५३ ॥

वही कहते हैं—

प्राणरूपी दण्ड के प्रयोग के द्वारा पूर्वापर का समीकरण करने से चतुष्किका और अम्बुज के आधार वाली लम्बिका, जो कि अमृत का आधार हैं, का आश्रयण करना चाहिए । इसके बाद तीन नाडियों की सङ्गमरूप त्रिशूल भूमि को पार कर योगी इच्छा ज्ञान क्रिया शक्तियों के समभाव में प्रवेश करे ॥ -५४-५६- ॥

कुण्डलतापरिहारेण यो 'दण्डप्रयोगः'

'यथा दण्डाहतः सर्पो दण्डाकारः प्रजायते ।
सा तथैव विबुद्ध्येत गुरुणा प्रतिबोधिता ॥'

इत्यादिनीत्या प्रबुद्धभावेन दण्डाकारतासादनं, तेन 'पूर्वापरयोः' प्राणापानवाहयोः 'समीकृतेः' विषुवद्रूपावलम्बनेन मध्यधामानुप्रवेशात् 'चतुष्किका' ब्रह्मरन्ध्राधोवर्ती चतुष्पथरूपश्चिन्तामण्यभिधान आधारः 'अम्बुजं' भ्रूमध्यवर्ती विद्याकमलनामाधारः, ते 'आलम्बते' ऊर्ध्वाधोवर्तितया स्वीकरोति तच्छीला येयं 'लम्बिका' तदूर्ध्वे सुधाया आधारः, सौधः' तं सुधाधारम् । अथ च सुधाया इदं 'सौधं' सकारम् 'आश्रमयेत् तत्र विश्रान्तिं कुर्यादित्यर्थः । 'अतो'ऽनन्तरमपि 'सुधीः' योगी नाडीत्रयसङ्घट्टात्मकत्वात् त्रिशूललक्षणां ब्रह्मरन्ध्रोर्ध्ववर्तिनीं नाड्याधाराभिधां 'भूमिम्' आक्रम्य—

'तच्छक्तित्रितयारोहात् भैरवीये चिदात्मनि ।
विसृज्यते हि तत्......................... ॥' (५।१८७)

इत्याद्युक्तयुक्त्या 'इच्छाज्ञानक्रियाशक्तीनां समत्वे' तन्निर्भरे विसर्गादिशब्दव्यपदेश्ये भैरवीये रूपे प्रकर्षेण शूलवर्णपरामर्शगर्भीकारेण 'विशेत्'

योगी मत्तगन्ध सङ्कोच (गुदामार्ग के सङ्कोच) आदि के क्रम से प्राण के तिर्यक् प्रवाह को रोककर कुण्डलता के हटाने से जो दण्डप्रयोग,

जैसे डंडे से मारा गया सर्प डंडे के आकार का हो जाता है उसी प्रकार गुरु के द्वारा प्रतिबोधित वह (= कुण्डलिनी) उसी प्रकार (= दण्डाकार रूप में) जग जाती है ।'

इत्यादि रीति से प्रबोध के द्वारा दण्ड के आकार में लाना, उसके द्वारा = प्राण और अपान मार्गों, के समीकरण से = विषुवद्रूप अवलम्बन के द्वारा, सुषुम्णा में प्रवेश के कारण, चतुष्किका = ब्रह्मरन्ध्र के नीचे वर्त्तमान चतुष्पथरूप चिन्तामणि नामक अमृत का आधार, अम्बुज = भ्रूमध्य में रहने वाला विद्याकमल नामक आधार उन दोनो का आलम्बन करती है अर्थात् ऊर्ध्ववर्त्ती एवं अधोवर्त्ती रूप में स्वीकार करती है इस स्वभाव वाली जो यह लम्बिका, उसके ऊपर अमृत का आधार—सौध, उस सुधाधार को । सुधा-सौध से सम्बद्ध को कहते हैं । उसका आश्रयण करना चाहिये अर्थात् वहाँ विश्राम करना चाहिए । इसके बाद भी सुधी = योगी, तीनों नाडी के सङ्घट्ट के कारण त्रिशूल लक्षण वाली, ब्रह्मरन्ध्र के ऊपर वर्त्तमान नाड्याधार नामक भूमि पर चढ़कर

"उन तीनो शक्तियों पर आरूढ होने से भैरवीय चिदात्मा में उसका विसर्ग (= संहारक्रमपूर्वक अवस्थान) होता है............." (तं० आ० ४।१०७)

इत्यादि कही गई युक्ति से इच्छा ज्ञान क्रिया शक्तियों की समता, जिसे विसर्ग

तत्समावेशभाग्भवेदित्यर्थः ॥ ५५ ॥

ननु कथमेतावतैवात्रानुप्रवेशः सिद्ध्येत् ?—इत्याशङ्क्याह—

एकां विकासिनीं भूयस्त्वसंङ्कोचां विकस्वराम् ॥ ५६ ॥
श्रयेद्भ्रूबिन्दुनादान्तशक्तिसोपानमालिकाम् ।

तु—शब्दो भिन्नक्रमो हेतौ । यतः प्रथमम् 'एकां' दुर्भेद्यत्वात् प्रधानां भ्रुवि बिन्दुः 'भ्रूबिन्दुः' इत्यनेन भ्रूपृष्ठादारभ्य बिन्दुनादनादान्तशक्तिव्यापिनीसमना एवं ऊर्ध्वोर्ध्वपदारोहोपायत्वात् 'सोपानानि' तेषां 'मालिकां श्रयेत्' ऊर्ध्वकुण्डलिनी-पदसमासादनौत्सुक्यात् उद्घातक्रमेणाक्रामेदित्यर्थः । ननु—

'समनान्तं वरारोहे पाशजालमनन्तकम् ।' (स्व०तं० ४।२७)

इत्यादिनीत्या बिन्द्वादीनां सङ्कुचितमेव रूपं संभवेत्, तत् कथं नामैतत् नित्योदितत्वात् सततमेव विकस्वरामानन्दसंपदमवाप्तुमुपायतां यायात् ?—इत्या-शङ्क्योक्तं—'विकासिनीम्' इत्यादि । अनेन हि एषां यथायथं विकासतारतम्य-सद्भावात् नित्यविकस्वरेऽपि पदे युक्तमुपायत्वम्—इत्युक्तं स्यात् ॥ ५६ ॥

आदि शब्दों से कहा जाता है, उस भैरवीय रूप में प्रकर्ष = शूल वर्ण के परामर्श के साथ प्रवेश करे = उसमें समावेश का भागी बने—यह अर्थ है ॥ ५५ ॥

प्रश्न—इतने से ही इसमें प्रवेश कैसे हो जाता है ?—यह शङ्का कर कहते हैं—

(योगी) पुनः भ्रू से लेकर बिन्दु नादान्त शक्ति तक वर्त्तमान एक विकासयुक्त, सङ्कोचरहित, विकासशील सोपानपरम्परा का आश्रयण करें ॥ -५६-५७- ॥

तु शब्द भिन्न क्रम वाला है । (यहाँ इसका प्रयोग) हेतु अर्थ में है । क्योंकि पहले एक = दुर्भेद्य होने के कारण प्रधान, भ्रू में वर्त्तमान बिन्दु को भ्रूबिन्दु (कहते हैं) । इसके भ्रूपृष्ठ से प्रारम्भ कर बिन्दु, नाद, नादान्त, शक्ति, व्यापिनी, समना ही ऊपरी-ऊपरी स्थानों पर आरोह का उपाय होने से सोपान है, उनकी मालिका (= क्रमिकता परम्परा) का आश्रयण करना चाहिए । ऊर्ध्वकुण्डलिनीपद को प्राप्त करने की उत्सुकता के कारण उछल-उछल कर पहुँचना चाहिए—यह अर्थ है । प्रश्न—

हे सुन्दर आरोह वाली ! यह अनन्त पाशजाल समना है । (स्व. त. ४।२७)

इत्यादि रीति से बिन्दु आदि का संकुचित ही रूप सम्भव है तो कैसे यह नित्योदित होने से निरन्तर विकस्वर आनन्द सम्पत् की प्राप्ति का उपाय हो सकता है ?—यह शङ्का कर कहा गया—विकासिनी इत्यादि । इससे यह कहा गया कि—ये क्रमिक विकासतारतम्य वाली होने से नित्यस्वर पद के लिए यह उचित ही

ननूर्ध्वकुण्डलिनीपदसमासादनेनापि किं स्यात् ?—इत्याशङ्क्याह—

तत्रोर्ध्वकुण्डलीभूमौ स्पन्दनोदरसुन्दरः॥ ५७ ॥
विसर्गस्तत्र विश्राम्येन्मत्स्योदरदशाजुषि ।

यतस्तत्र औन्मनसे पदे 'स्पन्दनस्य' स्वात्मोच्छलत्ताया 'उदरम्' अनन्य-स्फुरणात्मा सारस्तेन 'सुन्दरः' स्पृहणीयो 'विसर्गो' विसिसृक्षात्मकं परं पारमेश्वरं रूपं बिन्दुद्वयं चास्तीति, 'तत्र' विसर्गे 'विश्राम्येत्' तदैकात्म्येन प्रस्फुरेदित्यर्थः । 'स्पन्दनोदरसुन्दरः' इत्यनेनैव अस्योक्तेऽपि स्वरूपे 'मत्स्योदरदशाजुषि' इत्यनेन सर्वदैव अयं स्पन्ददशाधिशायी न तु कदाचिदेव—इत्युक्तं स्यात् ॥ ५७ ॥,

ननु तत्रापि विश्रान्त्या किं स्यात् ? इत्याशङ्कां दृष्टान्तप्रदर्शनेन उपशमयति—

रासभी वडवा यद्वत्स्वधामानन्दमन्दिरम् ॥ ५८ ॥
विकाससङ्कोचमयं प्रविश्य हृदि हृष्यति ।
तद्वन्मुहुर्लीनसृष्टभावव्रातसुनिर्भराम् ॥ ५९ ॥
श्रयेद्विकाससङ्कोचरूढभैरवयामलाम् ।

उपाय है ॥ ५६ ॥

प्रश्न—ऊर्ध्व कुण्डलिनी पद प्राप्त करने से भी क्या लाभ होगा?—यह शङ्का कर कहते हैं—

मत्स्योदरी दशा से युक्त उस ऊर्ध्व कुण्डल भूमि में स्पन्दन तत्त्व वाला सुन्दर विसर्ग है । वहाँ विश्राम करना चाहिए ॥ -५७-५८- ॥

क्योंकि वहाँ = उन्मना वाली भूमि में, स्पन्दन का = आत्मोच्छलत्ता का, उदर = अनन्यस्फुरण रूप तत्त्व, उसके कारण सुन्दर = स्पृहणीय, विसर्ग = विसिसृक्षारूप परमपारमेश्वर रूप दो विन्दु हैं । उस विसर्ग में विश्राम करना चाहिए अर्थात् उससे अभिन्न रूप में स्फुरित होना चाहिए । 'स्पन्दनोदरसुन्दरः' इतना कहने से ही इसका स्वरूप उक्त होने पर 'मत्स्योदरदशाजुषि' इस (कथन) से यह सर्वदा स्पन्ददशा वाला है न कि कदाचित्—यह कहा गया ॥ ५७ ॥

प्रश्न—वहाँ पर भी विश्राम करने से क्या होगा—इस आशङ्का को उदाहरण देकर शान्त करते हैं—

जिस प्रकार गदही या खच्चरी विकाससङ्कोच वाले, आनन्द के स्थान भूत अपने योनिप्रदेश में प्रवेश करके हृदय में प्रसन्नता का अनुभव करती है उसी प्रकार बार-बार प्रलय और सृष्टि के समूह से युक्त, विकास सङ्कोच की पराकाष्ठा रूप भैरव यामल दशा का आश्रयण करना चाहिए ॥ -५८-६०- ॥

यथा रासभी वडवा वा मूत्रादिकाले 'विकाससङ्कोचमयं' बहिरन्तर्मुखतयानवरतं स्पन्दमानं वराङ्गलक्षणं 'स्वमानन्दमन्दिरं धाम प्रविश्य' तदेकमना भूत्वा 'हृदि हृष्यति' स्वात्मन्यानन्दातिशयमनुभवति, तथा 'मुहुर्लीनाः' स्वात्मन्युपसंहृताः 'सृष्टाः' बहिरुल्लासिताश्च प्रमातृप्रमेयाद्यात्मानः सर्वे 'भावाः' तैः सुष्ठु 'निर्भराम्' अनन्याकाङ्क्षाम्, अत एव यथायोगं 'विकाससङ्कोचयोः' सृष्टिसंहारयोः 'रूढं' तथात्वेन स्फुरितं 'पुमान् स्त्रिया' (पा०सू० १।२।६७) इत्येकशेषे 'भैरवस्य भैरव्याश्च यामलं' द्वन्द्वं यस्यामेवंविधां विसर्गभुवं 'श्रयेत्' स्वानन्दसंवित्तिनिमित्तं समाविशेदित्यर्थः । तदेव हि नाम अस्य परस्य प्रकाशस्यानन्यसारधारणं रूपं, यत् सदैव सृष्टिसंहारकारित्वम्—इति, अन्यथा हि अस्य जडेभ्यो वैलक्षण्यं न स्यात्, इत्युपपादितं बहुशः । एवं सृष्टौ शक्तेः प्ररोहः , संहारे तु शक्तिमतः । यदुक्तम्—

स्वशक्तिप्रचयोऽस्य विश्वम् । (शि०सू० ३।३०) इति ।
त्रितयभोक्ता वीरेशः । (शि०सू० १।११) इति च ॥ ५९ ॥

एतदेव सङ्कलयति—

एकीकृतमहामूलशूलवैसर्गिके हृदि ॥ ६० ॥

जिस प्रकार गदही अथवा खच्चरी मूत्रत्याग के समय, विकाससङ्कोचमय = बाहर और भीतर की ओर निरन्तर स्पन्दनशील योनिप्रदेशरूप अपने आनन्द—मन्दिर अर्थात् स्थान में प्रवेश कर अर्थात् तन्मय होकर अतिशय आनन्द का अनुभव करती है उसी प्रकार मुहुर्लीन = आत्मा में उपसंहृत, स्पष्ट = बाहर उल्लासित, प्रमातृ प्रमेय रूप सभी पदार्थ, उनके द्वारा सुष्ठु निर्भरा = अन्य की इच्छा से रहित, इसीलिए भोग के अनुसार विकास और सङ्कोच = सृष्टि और संहार में रूढ = उस रूप में स्फुरित, "पुमान् स्त्रिया" (पा० सू० १।२।६७) इस (सूत्र) से एकशेष होने पर भैरव और भैरवी का यामल = द्वन्द्व, है जिसमें उसी प्रकार की विसर्गभूमि का आश्रयण करना चाहिए अर्थात् आत्मानन्दसंवित्ति के निमित्त समाविष्ट होना चाहिए । इस परप्रकाश का अनन्यसाधारण रूप वही है कि सदैव सृष्टिसंहारकारी होना । अन्यथा इसका जड (पदार्थो)से भेद नहीं होगा—ऐसा अनेक बार कहा जा चुका है । इस प्रकार—सृष्टि में शक्ति का प्ररोह है और संहार में शक्तिमान् का । जैसा कि कहा है—

इस (परमेश्वर) का अपनी शक्ति का प्रचय (ही) विश्व है । (शि० सू० ३।२०) और

तीनों (= सृष्टि स्थिति संहार) का भोक्ता वीरेश है ।।५९।। (शि०सू० १।११)

इसी को संग्रहरूप में कहते हैं—

(योगी) सबका आपूरण करने के कारण, जहाँ पर महामूल शूल

परस्मिन्नेति विश्रान्तिं सर्वापूरणयोगतः ।

'एकीकृतं' संविन्मात्रात्मनावस्थापितं पिण्डीभूतं च 'महामूलं' परमकारणत्वात् माया

'तत एव सकारेऽस्मिन् स्फुटं विश्वं प्रकाशते ।' (तं० ३।१६५)

इत्याद्युक्त्या विश्वप्रतिष्ठास्थानत्वात् सकारश्च 'शूलम्' इच्छादिशक्तित्रयमौकारश्च 'वैसर्गिकम्' ऊर्ध्वकुण्डलिनीस्थानं बिन्दुद्वयं च यत्रैवंविधे 'परस्मिन्' परप्रमात्रात्मनि संहारहृदादिविलक्षणे च 'हृदि' बोधे पराबीजे च सर्वस्यान्तर्बहिर्वा यत् 'आपूरणं' स्वात्मसात्कारो भेदोल्लासश्च, तस्य 'योगो' युक्तिस्तस्मात् 'विश्रान्तिमेति' पराहंभावरूपतया स्वात्ममात्रनिष्ठस्तिष्ठेदित्यर्थः । अहंपरामर्शमात्ररूपत्वमेव हि गर्भीकृताशेषविश्वतया परं विश्रान्तिधाम—इति नः सिद्धान्त ॥ ६० ॥

अत आह—

अत्र तत्पूर्णवृत्त्यैव विश्वावेशमयं स्थितम् ॥ ६१ ॥
प्रकाशस्यात्मविश्रान्तावहमित्येव दृश्यताम् ।

और विसर्ग एक कर दिए गए हैं—ऐसे परम हृदय मे विश्रान्तिलाभ करता है ॥ -६०-६१- ॥

एकीकृत = केवल संविद्रूप मे स्थापित और पिण्डीमूल जो महामूल = परम कारण होने से माया

'इसीलिए इस सकार में सौः स् = ३१ तत्त्व, औ = शुद्ध विद्या से सदाशिव तक के तत्त्व, विसर्ग = शिव शक्ति इस प्रकार सौः = ३६ तत्त्व वाला विश्व स्फुट रूप से भासित होता है ।' (तं. आ. ३।१६५)

इत्यादि कथन के द्वारा विश्वप्रतिष्ठा का स्थान होने के कारण सकार, शूल = इच्छा आदि तीन शक्तियाँ और औकार, वैसर्गिक = ऊर्ध्व कुण्डलिनी का स्थान दो बिन्दु जहाँ हैं—इस प्रकार के परप्रमाता रूप, संहार हृदय से विलक्षण हृदय = बोध = पराबीज में सबके बाहर अथवा भीतर जो आपूरण = आत्मसात्कार और भेद का उल्लास, उसका योग = युक्ति, उसके कारण, विश्रान्ति को प्राप्त करता है = पर अहंभाव के रूप में केवल अपने मे स्थित रहता है । अहंपरामर्शमात्ररूपता ही सम्पूर्ण विश्व को अपने में गूहित करा लेने के कारण अन्तिम विश्रामस्थल है—यह हमारा सिद्धान्त है ॥ ६० ॥

इसलिए कहते हैं ।

यहाँ विश्व को आत्मसात् करके पूर्ण वृत्ति के साथ वहीं स्थित रहता है। प्रकाश की आत्मविश्रान्ति में 'अहम्' को ही समझना चाहिए ॥ -६१-६२- ॥

'अत्र' ऊर्ध्वकुण्डलिनीभूमावशेषविश्वक्रोडीकारेण पूर्णया वृत्त्या 'तदेव' अहंपरामर्शात्म परं हृदयं विश्रान्तिधामतयावस्थितं, यतः प्रकाशस्यात्मनि न तु प्रकाश्ये देहादौ विश्रान्तिधामतयावस्थितं, यतः प्रकाशस्यात्मनि न तु प्रकाश्ये देहादौ विश्रान्तावहमित्येव परामर्शो दृश्यतां निरूप्यतामित्यर्थः । नहि अत्र प्रकाशातिरिक्तमन्यत् किञ्चिदपोह्यमपि सम्भवेत्—इति का कथा परामर्शान्तरस्येति भावः ॥ ६१ ॥

नन्वनुत्तरं शान्तं परं ब्रह्मैवास्ति—इति तत्र को नामायम् अहंपरामर्शो यस्यापि विश्रान्तिधामता स्यात् ?—इत्याशङ्कां शमयितुं प्राणतत्त्वसमुच्चारानन्तर्येणानुजोद्देशोद्दिष्टं चिदात्मनोच्चारमवतारयति—

अनुत्तरविमर्शे प्राग्व्यापारादिविवर्जिते ॥ ६२ ॥
चिद्विमर्शपराहंकृत् प्रथमोल्लासिनी स्फुरेत् ।

'प्राक्' पूर्वकोटौ उल्लिलसिषाद्यात्मभिर्व्यापारैरनुपहिते निस्तरङ्गजलधिप्रख्ये 'अनुत्तरात्मनि विमर्शे' परस्मिन् प्रकाशे प्रथममुल्लसनशीला, अत एव व्यतिरिक्तविमृश्याभावात् 'चिद्विमर्शपरा' स्वात्ममात्रपरामर्शनतत्परा 'अहंकृत्' अहं परामर्शः स्फुरेत् येनास्य सर्वत्रैव स्वातन्त्र्यमुदियात्; स्वस्वातन्त्र्यमाहात्म्यादेव हि अनुत्तरप्रकाशात्मा परमेश्वरः स्वं स्वरूपं गोपयित्वा प्रमाणादिदशामधिशयानः पृथग्भावजातमाभासयेत् ॥ ६२ ॥

यहाँ = ऊर्ध्व कुण्डलिनी भूमि में, अशेष विश्व को अपने में समाहित करके पूर्ण वृत्ति के साथ अहंपरामर्श वाला पर हृदय विश्रान्तिस्थल के रूप में स्थित है। क्योंकि प्रकाश की, आत्मा मे न कि प्रकाश्य देह आदि में विश्रान्ति होने पर 'अहम्' यही परामर्श देखना चाहिए = निरूपित करना चाहिए । प्रकाश को छोड़कर यहाँ कुछ अपोह्य भी सम्भव नहीं है । इसलिए दूसरे परामर्श की क्या बात यह तात्पर्य है ॥ ६१ ॥

प्रश्न—अनुत्तर शान्त तो परम ब्रह्म ही है तो फिर वहाँ यह अहंपरापर्श क्या है जो कि विश्रान्तिधाम होगा?—इस शङ्का को शान्त करने के लिए प्राणतत्त्व के समुच्चार के बाद अनुजोद्दिष्ट चिदात्मा के द्वारा उच्चार को प्रस्तुत करते हैं—

प्राग्व्यापार आदि से रहित अनुत्तर विमर्श में प्रथमोल्लासिनी चिद्विमर्शपर अहङ्कार स्फुरित होता है ॥ -६२-६३- ॥

प्राक् = पूर्वकोटि में उल्लसित होने की इच्छा आदि रूप व्यापार से रहित निस्तरङ्ग जलधि के समान अनुत्तरात्मा विमर्श में = पर प्रकाश में सबसे पहले उल्लासन स्वभाववाली, स्वात्ममात्र परामर्शन में तत्पर अहंकृत् = अहंपरामर्श, स्फुरित होता है जिससे इसका सर्वत्र स्वातन्त्र्य प्रकट होता है । अपने स्वातन्त्र्य की महिमा से ही अनुत्तरप्रकाशस्वरूप परमेश्वर अपने रूप को छिपाकर प्रमाण आदि

तदाह—

तत उद्योगसक्तेन स द्वादशकलात्मना ॥ ६३ ॥
सूर्येणाभासयेद्भावं पूरयेदथ चर्चयेत् ।

'ततो' ऽहंपरामर्शस्फुरणाद्धेतोः स परः प्रकाशः सङ्कुचितप्रमातृभूमिकावभासनपुरस्सरम् 'उद्योगः' अर्थावबिभासयिषा, तत्र 'सक्तेन' सदैव बहिर्मुखेन 'द्वादश' षण्ठवर्जमकारादिविसर्गान्ता याः 'कलाः' परामर्शास्तत्स्वभावेन प्राप्तपरिपूर्णस्वरूपेण प्रमाणात्मना 'सूर्येण' एकैकं भावम् आ ईषत्सङ्कुचितेन नीलसुखादिना रूपेण 'भासयेत्' बहिः सृजेत्, 'पूरयेत्' तथात्वेनैव कञ्चित्कालं स्थापयेत्, 'चर्चयेत्' स्वात्मसात्कारेण संहरेदित्यर्थः । यः कश्चनार्थक्रियार्थी हि प्रमाता प्रमाणोपारूढमेवार्थजातं प्रथममालोचयेत्, अनन्तरम् 'इदमित्थम्' इति विकल्पयेत्, तदनु 'ज्ञातोऽयं मयार्थः' इति संतोषाभिमानाद् बहीरूपताविलापनेन स्वात्मन्येव विश्रमयेत्—इत्यनुभवसाक्षिकोऽयमर्थः ॥ ६३ ॥

नन्वेव मवभासनादिरूपतामापन्नं भावजातं किं कुर्यात् ?—इत्याशङ्क्याह—

अथेन्दुः षोडशकलो विसर्गग्रासमन्थरः॥ ६४ ॥

दशा को प्राप्त होता हुआ पृथक् तत्त्वसमूह को आभासित करता है ॥ ६२ ॥

वही कहते हैं—

इसी कारण वह उद्योग में लगे हुए द्वादश कलात्मक सूर्य के द्वारा तत्त्व को आभासित करता है फिर पूरित करता है और संहृत करता है ॥ -६३-६४- ॥

ततः = अहंपरामर्श के स्फुरण के कारण, वह = पर प्रकाश, संकुचित प्रमाता की भूमिका के अवभासन के बाद उद्योग = तत्त्वों को आभासित करने की इच्छा, उसमें सक्त = सदा बहिर्मुख बारह = षण्ठ (वर्णों ऋ ॠ ऌ ॡ) को छोड़कर अकार से लेकर विसर्ग तक, जो कलायें = परामर्श वह स्वभाव है जिसका अर्थात् प्राप्त परिपूरणरूप प्रमाणात्मक सूर्य के द्वारा, एक-एक भाव को आ = थोड़े संकुचित नील सुख आदि के रूप मे भासित करता है = बाह्य रचना करता है । पूरण करता है = उसी रूप में कुछ देर तक स्थापित करता है । चर्चित करता है = आत्मसात् कर संहृत करता है । जो कोई अर्थक्रिया चाहने वाला प्रमाता प्रमाण को प्राप्त पदार्थों का पहले आलोचन करता है फिर 'यह ऐसा है' इस प्रकार विकल्प करता है, उसके बाद 'मैने यह पदार्थ जान लिया' इस प्रकार सन्तुष्ट होकर बाह्यरूपता को मिटा कर अपने में ही विश्रान्त हो जाता है । यह विषय अनुभव—साक्षिक है ॥ ६३ ॥

प्रश्न—इस प्रकार अवभासन आदि रूपता को प्राप्त पदार्थसमूह क्या करेगा ?—यह शङ्का कर कहते हैं—

सञ्जीवन्यमृतं बोधवह्नौ विसृजति स्फुरन् ।
इच्छाज्ञानक्रियाशक्तिसूक्ष्मरन्ध्रस्रुगग्रगम् ॥ ६५ ॥
तदेवम(तद)मृतं दिव्यं संविद्देवीषु तर्पकम् ।

'अथ' प्रमोपारोहानन्तरं 'स्फुरन्' स्वेन रूपेणावभासमानोऽत एव 'षोडश' अकाराद्या बुद्धीन्द्रियाद्याश्च 'कला' यस्यासौ प्राप्तनिजपूर्णस्वरूपोऽत एव उच्छून-रूपतापत्त्या 'विसर्गस्य ग्रासः' तद्रूपतिरस्कारात्मान्तः, तेन 'मन्थरो' विस्रब्धो देहादिमेयरूप इन्दुः, 'सञ्जीवनी'—

'पुरुषे षोडशकले तामाहुरमृतां कलाम् ।'

इत्याद्युक्त्या विश्वसञ्जीवनहेतुरमाख्या सप्तदशी कला कलाषोडशकाप्याय-कारिधातुविशेषात्मकम् 'अमृतं बोधवह्नौ' परिमिते प्रमातरि 'विसृजति' प्रमातृ-प्रमेयाद्यात्मना स्थूलेन रूपेण समुल्लसतीत्यर्थः । तदुक्तेन प्रकारेणोल्लसितम् एतन्नीलसुखाद्यात्मना चिरस्य लब्धप्ररोहममृतम्, इच्छादय एव स्रुक्, तदग्रगं दिव्यं कृत्वा 'संविद्देवीषु तर्पकं' रूपादिविषयरसास्वादेन दृगादिदेवीः सर्वात्ममात्रविश्रान्ता विदध्यादित्यर्थः । सूक्ष्माणि रन्ध्राणि गोलकरूपाणीन्द्रियद्वाराणि । इदमुक्तं भवति —यत्किञ्चिद्भावजातं तदेषणीयतासमासादनपुरस्सरम् इन्द्रियद्वारोपारोहेण ज्ञेयता-मासाद्य तत्तदर्थक्रियाकारितया सर्वात्ममात्रविश्रान्त्युपजननेन संविदः पूर्णता-

---

इसके बाद स्फुरित होने वाला सोलह कला से युक्त तथा विसर्ग के ग्रास से मन्थर चन्द्र सञ्जीवनी अमृत को ज्ञान रूपी अग्नि में छोड़ता है । इच्छा ज्ञान क्रिया शक्ति सूक्ष्म रन्ध्र रूपी स्रुक् के आगे वर्तमान वह दिव्य अमृत संविद् देवी का तर्पक होता है ॥ -६४-६६- ॥

अथ = प्रभा पर आरूढ़ होने के बाद, स्फुरित होता हुआ = अपने रूप में अवभासित होने वाला, इसीलिए सोलह = अकार आदि तथा ज्ञानेन्द्रिय आदि, कलायें हैं जिसकी वह अर्थात् अपने पूर्ण स्वरूप को प्राप्त इसीलिए उच्छूनता को प्राप्त होने के कारण, विसर्ग का ग्रास = उस रूप का तिरस्कार, उसके कारण मन्थर = विस्रब्ध का अर्थात् देह आदि मेय रूप चन्द्रमा, सञ्जीवनी

'सोलह कला वाले पुरुष में उसे अमृता कला कहते हैं ।'

इत्यादि उक्ति से विश्व के सञ्जीवन का कारण अमा नामक सत्रहवीं कला, सोलह कलाओं का आपूरण करने वाले विशिष्ट धातु वाले अमृत को बोध अग्नि में = परिमित प्रमाता में, विसृष्ट करती है = प्रमाता प्रमेय आदि स्थूल रूप से समुल्लसित करती है । इच्छा इत्यादि ही स्रुवा है, उसके अग्रभाग में वर्त्तमान (नील सुख आदि) को दिव्य बना कर, संविद् देवियों की तुष्टिद्वारा चक्षु आदि देवियों को अपने स्वरूप में विश्रान्त बनाता है । सूक्ष्म रन्ध्र = गोलारूप इन्द्रियों के द्वारा ऐसा कहा जाता है—(इस विश्व में) जो कुछ पदार्थसमूह है वह पहले एषणीयता को

मावहतीति ॥ ६५ ॥

नन्वेवं संविद्देवीतर्पणेन कोऽर्थः—इत्याशङ्क्याह—

विसर्गामृतमेतावद् बोधाख्ये हुतभोजिनि ॥ ६६ ॥
विसृष्टं चेद्भवेत्सर्वं हुतं षोढाध्वमण्डलम् ।

यद् गुरुवरः—

'सर्वभावमयभावमण्डलं विश्वशक्तिमयशक्तिबर्हिषि ।
जुह्वतो मम समोऽस्ति कोऽपरो विश्वमेधमययज्ञयाजिनः ॥'

इति । अत्रामृतबीजाद्युद्धारः प्राग्व्याख्ययैव गतार्थः—इत्यतिरहस्यत्वात् नेह पुनरायस्तम् ॥ ६६ ॥

ननु यदि नामैतावत् विसर्गामृतं परप्रमात्रात्मना परामृष्टं, तावता षड्विधस्याध्वमण्डलस्य किमायातं यदेवमुक्तम् ?—इत्याशङ्क्याह—

यतोऽनुत्तरनाथस्य विसर्गः कुलनायिका ।
तत्क्षोभः कादिहान्तं तत्प्रसरस्तत्त्वपद्धतिः ॥ ६७ ॥

प्राप्त होता है फिर इन्द्रियरूपी द्वार पर आरूढ़ हो ज्ञेयता को प्राप्त होता है फिर उन-उन अर्थक्रियाओं को करने के कारण (बाद में) अपने आप में विश्रान्ति को उत्पन्न कर संविद् की पूर्णता को बनाता है ॥ ६५ ॥

प्रश्न—इस प्रकार संविद् देवी को तृप्त करने से क्या लाभ है—यह शङ्का कर कहते हैं—

यदि बोधात्मक अग्नि में यह विसर्गामृत परित्यक्त होता है तो समस्त षडध्वसमूह का हवन हो जाता है ॥ -६६-६७- ॥

जैसा कि गुरुवर (कहते हैं)—

"विश्वशक्तिमय शक्ति की आग में समस्त भावों से युक्त भावसमूह का हवन करने वाला विश्वमेधमय यज्ञ को करने वाले मेरे से अतिरिक्त और कौन है ।"

यहाँ पर अमृतबीज आदि का उद्धार पहले की गई व्याख्या से ही गतार्थ हो गया इसलिए यहाँ विस्तार नही किया गया ।

प्रश्न—यह इतना विसर्गामृत पर प्रमाता के द्वारा परामृष्ट होता है तो उससे छ प्रकार के अध्व मण्डल का क्या सम्बन्ध जो ऐसा कहा ?—यह शङ्का कर कहते हैं—

क्योंकि कौलिकी शक्ति अनुत्तरनाथ का विसर्ग है, क से लेकर ह तक उसका क्षोभ है और उस (विसर्ग) का तत्त्वपद्धति है अर्थात् इन्हीं बीजों में सारे तत्त्व निहित हैं ॥ -६७ ॥

'कुलनायिका' इति कौलिकी शक्तिः । यदुक्तं प्राक्—

'अनुत्तरं परं धाम तदेवाकुलमुच्यते ।
विसर्गस्तस्य नाथस्य कौलिकी शक्तिरुच्यते ॥' (३।१४४)

'कादिहान्तमिदं प्राहुः क्षोभाधारतया बुधाः ।' (३।१८०) इति । 'तत्क्षोभ' इति तस्य विसर्गस्य क्षोभः, क्षोभाधार इत्यर्थः । यदुक्तम्—

इति । 'तत्प्रसर' इति तस्य कादिहान्तस्य क्षोभाधारस्य 'प्रसरः' प्रपञ्च इत्यर्थः । यदुक्तम्—

'पृथिव्यादीनि तत्त्वानि पुरुषान्तानि पञ्चसु ।
क्रमात् कादिषु वर्गेषु मकारान्तेषु सुव्रते ॥
वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम् ।
तदूर्ध्वं शादिविख्यातं पुरस्ताद्ब्रह्मपञ्चकम् ॥
अमूला तत्क्रमाज्ज्ञेया क्षान्ता सृष्टिरुदाहृता ।' (प०त्री० ७)

इति ॥ ६७ ॥

ननु यदि नामननुत्तरनाथस्य विसर्गः कौलिकी शक्तिः, तन्मातृकोदये किमेवं प्रदर्शितं न वा ?—इत्याशङ्क्याह—

कुल नायिका = कौलिकी शक्ति । जैसा कि पहले कहा है—

"(जो) अनुत्तर परमधाम है वही अकुल कहा जाता है । उस परमात्मा का विसर्ग कौलिकी शक्ति कही जाती है ।" (३।१४४)

तत्क्षोभ = उस = विसर्ग का क्षोभ अर्थात् क्षोभ का आधार—यह अर्थ है । जैसा कि कहा है—

विद्वान् लोग इस 'क' से लेकर 'ह' पर्यन्त को क्षोभ का आधार कहते हैं ।"

तत्प्रसर = उसका = 'क' से लेकर 'ह' पर्यन्त वाले क्षोभाधार का, प्रसर = प्रपञ्च (= विस्तार)। जैसा कि कहा है—

"हे सुव्रते ! पृथिवी से लेकर पुरुष पर्यन्त तत्त्व 'क' से लेकर 'म' पर्यन्त पाँच वर्गों में क्रमशः (स्थित है) । वायु (= य), अग्नि (= र), सलिल (= ल), और इन्द्र (= व) इनमें चार धारणायें (क्रमश राग, विद्या, कला और माया) स्थित है । उसके ऊपर श से लेकर (क्ष वर्ण पर्यन्त) पहले के पाँच ब्रह्म (= महामाया, शुद्ध विद्या, ईश्वर सदाशिव और शक्ति) हैं । 'अ' इस सृष्टि का मूल है और (यह सृष्टि) क्ष वर्ण तक कही गई है" ॥ ६७ ॥ (प. त्री. ६.७-१।२)

प्रश्न—यदि अनुत्तरनाथ का विसर्ग ही कौलिकी शक्ति है तो मातृका के उदय में क्या ऐसा दिखलाया गया है या नहीं?—यह शङ्का कर कहते हैं—

अंअ इति कुलेश्वर्या सहितो हि कुलेशिता ।

यदुक्तम्—

'अत्र प्रकाशमात्रं यत्स्थिते धामत्रये सति ।
उक्तं बिन्दुतया शास्त्रे शिवबिन्दुरसौ मत: ॥'
(तं०आ० ३।१३४) इति ।

'अस्यान्तर्विसिसृक्षासौ या प्रोक्ता कौलिकी परा।
सैव क्षोभवशादेति विसर्गात्मकतां ध्रुवम् ॥' (तं० ३।१३७)

इति च ॥

ननु 'शक्तिमत: खलु शक्तिरनन्या' इत्याद्युक्तयुक्त्या शक्तिमत: शक्तेश्च विश्लेषो नास्ति—इति कथमनयोर्भेदेनोदय: प्रदर्शित: ?—इत्याशङ्क्याह—

परो विसर्गविश्लेषस्तन्मयं विश्वमुच्यते ॥ ६८ ॥

विसर्गस्य 'विश्लेषो' विश्लिष्टो विसर्ग इत्यर्थ: । अत एव शक्तिमतो भेदित्वात् पर:—इत्युक्तम् । तत्स्फार एव च विश्वमित्युक्तं 'तन्मयं विश्वमुच्यते' इति । तदुक्तम्—

'शक्तिश्च शक्तिमांश्चेति पदार्थद्वयमुच्यते ।

अं अ: यह कुलेश्वरी के सहित रहना ही कुलेशिता है ॥ ६८- ॥

जैसा कि कहा है—

तीनों धामों के स्थित होने पर जो यहाँ प्रकाशमात्र बिन्दु कहा गया है । शास्त्र में उसे शिव बिन्दु माना गया है । (तं. आ. ३।१३४)

उसके अन्दर यह सृष्टि करने की इच्छा जो कि परा कौलिकी कही गई हैं, वही क्षोभ के कारण निश्चित रूप से विसर्गात्मकता को प्राप्त होती हैं । (तं. आ. ३।१३७)

प्रश्न—'शक्ति शक्तिमान् से अभिन्न हैं' इत्यादि उक्त युक्ति के द्वारा शक्तिमान् और शक्ति का भेद तो है नहीं तो फिर इन दोनों का भेदपूर्वक उदय कैसे कहा गया ?—यह शङ्का कर कहते हैं—

विसर्ग का विश्लेष ही पर है । जो उससे व्याप्त हैं उसे विश्व कहा जाता है ॥ -६८ ॥

विसर्ग का विश्लेष अर्थात् विश्लिष्ट विसर्ग । इसीलिए शक्तिमान् से भिन्न होने के कारण 'पर' कहा गया है । उसका स्फार ही विश्व है—इसलिए कहा गया— 'तन्मय विश्व कहलाता है ।'

वही कहा है—

शक्तयोऽस्य जगत् कृत्स्नं शक्तिमांस्तु महेश्वरः ॥'

इति । एवं विसर्गामृते परप्रमात्रात्मतया परामृष्टे षड्विधोऽपि अध्वा तत्सादेव भवेत्—इति युक्तमुक्तं 'हुतं षोढाध्वमण्डलं भवेत्' इति ॥ ६८ ॥

अतश्च तदधिकारेणैव सर्वमिदं बाह्यमर्चनादि विधेयम् ?—इत्याह—

वित्प्राणगुणदेहान्तर्बहिर्द्रव्यमयीमिमाम् ।
अर्चयेज्जुहुयाद्ध्यायेदित्थं सञ्जीवनीं कलाम् ॥ ६९ ॥

'इत्थम्' उक्तेन प्रकारेणेमामेव निखिलजगदाप्यायकारिणीममाख्यां सञ्जीवनीकलामाश्रित्य सार्वात्म्यप्रतिपत्तितत्त्वमर्चनादि विदध्यात्; यतो विद्याज्या परा संवित्, प्राणबुद्धिदेहात्मानः प्रमातारश्च याजकाः, तदपेक्षया अन्तर्बहीरूपाणि रत्नपञ्चकतत्प्रतिनिधिरूपकुङ्कुमाद्यात्मकानि यागसाधनभूतानि द्रव्याणि च प्रकृतिर्यस्यास्तां तत्स्फारसारामित्यर्थः ॥ ६९ ॥

नन्वेवमर्चनादि सिद्ध्येत् यद्येषा विसर्गभूरासाद्येत, तदासादन एव हि महान् संरम्भो यो युगसहस्रैरपि पारं न यायात्—इत्यपर्यवसितमेव शास्त्रार्थानुष्ठानं स्यात् ?—इत्याशङ्क्याह—

शक्ति और शक्तिमान् दो पदार्थ कहे जाते हैं । सम्पूर्ण संसार इसकी शक्ति है और महेश्वर शक्तिमान् हैं ।

इस प्रकार पर प्रमाता के रूप में विसर्गामृत का परामर्श होने पर छ हों प्रकार का अध्वा उसी रूप का हो जाता है—इस प्रकार ठीक ही कहा—छ अध्वमण्डल हुत हो जाता है ॥ ६८ ॥

इसलिए उसके अधिकार से ही यह बाह्य अर्चन आदि करना चाहिए—यह कहते हैं—

इस प्रकार इस सञ्जीवनी कला का विद्या, प्राण, गुण देह के रूप मे तथा अन्तर और बाह्य द्रव्य के रूप में ध्यान अर्चन एवं हवन करना चाहिए ॥ ६९ ॥

इत्थम् = उक्त प्रकार से, इसी = सम्पूर्ण जगत् का पूरण करने वाली अमा नामक सञ्जीवनी कला को आधार बनाकर सर्वात्मता के ज्ञान का सारभूत अर्चन आदि करना चाहिए । क्योंकि परा संवित् ही याज्य है; प्राणबुद्धि देहरूपी प्रमाता लोग याजक है, और उसकी अपेक्षा अन्दर और बाह्य रूप पाँचरत्न उसके प्रतिनिधिरूप कुंकुम आदि याग के साधनस्वरूप द्रव्य है प्रकृति जिसकी, उसकों अर्थात् उसके स्फाररूप तत्त्व वाली (की पूजा करनी चाहिये) ॥ ६९ ॥

प्रश्न—इस प्रकार का अर्चन आदि तब सिद्ध हो जब यह विसर्गभूमि प्राप्त हो। उसका प्राप्त होना ही बहुत कठिन कार्य है जो कि हजारों युगों मे भी पार न

आनन्दनाडीयुगलस्पन्दनावहितौ स्थितः ।
एनां विसर्गनिःष्यन्दसौधभूमिं प्रपद्यते ॥ ७० ॥

आनन्दप्रधानं यत् सिद्धयोगिनीसंबन्धि वराङ्गलक्षणं 'नाडीयुगलं' तस्य यत् 'स्पन्दनं' रिरंसया परस्परौन्मुख्यं तत्र 'अवहितिः' षडरमुद्राप्रवेशादिक्रमेण तदेकाग्रता तत्र 'स्थितः' प्ररोहं प्राप्तः सन् एनां सञ्जीवनीं कलां 'विसर्गस्य' विसिसृक्षात्मकस्य पारमेश्वरस्य रूपस्य चरमधातोश्च 'निःष्यन्दः' प्रसरस्तस्य 'सौध-भूमिं' विश्रान्तिस्थानं स एव आनन्दातिशयकारित्वात् 'सौधं' सुधासमूहस्तस्य 'भूमिम्' आकरस्थानं प्रपद्यते, तदैकात्म्यमासादयेदित्यर्थः । एतदुक्तं भवति—इह खलु सर्वेषां ग्राम्यधर्मसेवनं तावदनुक्तसिद्धं, तत्रैव युक्तिलेशमाश्रित्य अवधान-मात्रमेव चेत् कृतं तदयत्नेनैव विसर्गभूः समासादिता भवेत्—इति को नामात्र संरम्भो यदसिद्ध्या शास्त्रर्थानुष्ठानमप्यपर्यवसितं स्यादिति ॥ ७० ॥

नन्वस्तु नाम अस्योपायस्य सुखसाधनत्वं, किन्तु यत्रोपायजालमपि भग्नशक्ति संवृत्तं, तत्र किमनेनैककेनैव कार्यम् ?—इत्याशङ्क्याह—

शाक्ते क्षोभे कुलावेशे सर्वनाड्यग्रगोचरे ।

पाया जा सके । इस प्रकार शास्त्र के विषय का अनुष्ठान अधूरा ही रहेगा?—यह शङ्का कर कहते हैं—

योगी दोनों आनन्द नाडियों (= लिङ्ग और योनि) के स्पन्दन की एकाग्रता में स्थित होकर इस विसर्ग निःष्यन्द की विश्रान्तिस्थली को प्राप्त करता है ॥ ७० ॥

आनन्द की प्रधानता वाला जो सिद्धयोगिनी से सम्बद्ध वराङ्गलक्षण नाडीद्वय, उसका जो स्पन्दन = रमण करने की इच्छा से परस्पर उन्मुखता, उस विषय में अवधान = षडरमुद्रा प्रवेश आदि के क्रम से उन दोनो की एकाग्रता, उसमें स्थित = प्ररोह को प्राप्त होता हुआ उस सञ्जीवनी कला को जो कि विसर्ग का = त्यागात्मक पारमेश्वररूप चरमधातु का निःष्यन्द = प्रसर, उसकी सौधभूमि = आकर स्थान, को प्राप्त होता है अर्थात् उसके साथ एकाकार हो जाता है । ऐसा कहा है—इस संसार में सभी लोगों के लिए ग्राम्य धर्म (= स्त्रीपुरुष मैथुन) का सेवन स्वतः सिद्ध है । उसी में थोड़ी सी युक्ति का आश्रय लेकर थोड़ा अवधान यदि कर दिया गया तो बिना प्रयास के विसर्ग भूमि प्राप्त हो जाती है । इसलिये इसमें कहाँ अधिक प्रयास है जिसके सिद्ध न होने से शास्त्रोक्त अनुष्ठान भी पूरा नहीं होगा ॥ ७० ॥

प्रश्न—यह उपाय सुख का साधन बने (यह तो ठीक है) किन्तु जहाँ उपायों के समूह की भी शक्ति भग्न हो जाती है वहाँ यह एक उपाय क्या करेगा?—यह शङ्का कर कहते हैं—

व्याप्तौ सर्वात्मसङ्कोचे हृदयं प्रविशेत्सुधी ॥ ७१ ॥

'शाक्ते क्षोभे' इति बाह्यशक्तिसंभोगे । यदुक्तम्—

'शक्तिसङ्गमसंक्षुब्धशक्त्यावेशावसानिकम् ।
यत्सुखं ब्रह्मतत्त्वस्य तत्सुखं स्वाक्यमुच्यते ॥'
(वि०भै० ६९ श्लो०) इति ।

'कुलावेश' इति बाह्यशक्त्यभावेऽपि 'कुलस्य' शाक्तस्य स्वरूपस्य 'आवेशे' स्मरणपुरस्सरं भावनातिशयात् तन्मयीभावे इत्यर्थः । तदुक्तम्—

'लेहनामन्थनाकोटैः स्त्रीसुखस्य भरात् स्मृतेः ।
शक्त्यभावेऽपि देवेशि भवेदानन्दसंप्लवः ॥'
(वि० भै० ७० श्लो०) इति ।

'सर्वनाडीनामग्रगोचरे' प्रधाने पार्यन्तिके वा विषये द्वादशान्ते । यदुक्तम्—

'यथा यथा यत्र तत्र द्वादशान्ते मनः क्षिपेत् ।
प्रतिक्षणं क्षीणवृत्तेर्वैलक्षण्यं दिनैर्भवेत् ॥'
(वि०भै० ५१ श्लो०) इति ।

शाक्त क्षोभ होने पर, कुल का आवेश हो जाने पर, सभी नाडियों के प्रान्त देश में व्याप्ति होने पर, सर्वात्मना सङ्कोच होने के पश्चात् विद्वान् हृदय में प्रवेश कर जाता है ॥ ७१ ॥

शाक्त क्षोभ होने पर = बाह्य शक्ति का संभोग होने पर—जैसा कि कहा गया है—

जो शक्ति के सङ्गम से संक्षुब्ध है तथा जिसका अवसान शक्ति के आवेश में होता है, ऐसा जो ब्रह्म तत्त्व का सुख वही अपना सुख कहलाता है ॥ (वि०भै० ६९)

कलावेश होने पर अर्थात् बाह्य शक्ति (= स्त्री) कि अभाव में भी कुल का = शाक्त अपने रूप का, आवेश होने पर = स्मरणपूर्वक अत्यधिक भावना के कारण तन्मयीभाव होने पर । वही कहा है

'स्त्री के अभाव में भी हे देवेशि! चुम्बन से लेकर मैथुनी क्रिया तक के सभी सुख के स्मरण के भार से आनन्द का प्रवाह होता है ॥' (वि०भै० ७०)

सब नाड़ियों के अग्रगोचर में = प्रधान अथवा पार्यन्तिक विषय = द्वादशान्त, में । जैसा कि कहा गया है—

"जिस किसी प्रकार जहाँ कहीं भी द्वादशान्त में मन को लगाना चाहिए । इस प्रकार प्रतिक्षण क्षीणवृत्ति वाले (साधक) को (वैलक्षण्य की प्रतीति होने लगती है)" (वि. भै. ५१)

यद्वा 'अग्रगोचरे' प्रान्तदेशे यत्र कक्षादाविवाङ्गुलीभिर्मृदुप्रचोदनेन महानानन्दो जायते । यदुक्तम्—

'कुहनेन प्रयोगेन सद्य एव मृगेक्षणे ।
समुदेति महानन्दो येन तत्त्वं विभाव्यते ॥'
(वि०भै० ६६ श्लो०) इति ।

'व्याप्तौ' इति सार्वात्म्यप्रतिपत्त्या सर्वाक्षेपकारिणि विकाससमाधावित्यर्थः । यदुक्तम्—

'सर्वज्ञः सर्वकर्ता च व्यापकः परमेश्वरः ।
स एवाहं शैवधर्मा इति दार्ढ्याच्छिवो भवेत् ॥'
(वि०भै० १०९ श्लो०) इति ।

'जलस्येवोर्मयो वह्नेर्ज्वालाभङ्गा प्रभा रवेः ।
ममैव भैरवस्यैता विश्वभङ्ग्यो विभेदिताः ॥'
(वि०भै० ११० श्लो०)

इति च । 'सर्वात्मसङ्कोच' इति सर्वेणात्मना बाह्यस्य सङ्कोचे 'नैतद्वस्तु सत् किञ्चित्' इति भावनायामित्यर्थः । यदुक्तम्—

'निराधारं भवेज्ज्ञानं निर्निमित्तं भ्रमात्मकम् ।
तत्त्वतः कस्यचिन्नैतदेवं-भावी शिवः प्रिये ॥'
(वि०भै० ९९ श्लो०) इति ।

अथवा अग्रगोचर = प्रान्त देश मे जहाँ कक्ष (स्कन्ध का अधोभाग-काँख-) आदि मे अङ्गुलियों के द्वारा गुदगुदाने से महान् आनन्द होता है । जैसा कि कहा है—

हे मृगनयनि ! कुहन (= स्पर्श करना गुदगुदाना आदि) एवं प्रयोग (आलिङ्गन आदि मैथुनी क्रिया) के द्वारा महान् आनन्द उत्पन्न होता है जिससे ब्रह्म तत्त्व का अनुभव किया जाता है । (वि. भै. ६६)

व्याप्ति होने पर = सर्वात्मक ज्ञान होने पर, सभी का आक्षेप करने वाली विकास समाधि होने पर । जैसा कि कहा गया है—

'(जो) सर्वज्ञ सर्वकर्त्ता और व्यापक है (वही) परमेश्वर हैं । शैव धर्म वाला मैं भी वही हूँ'—इस प्रकार की दृढता होने से (साधक) शिव हो जाता है ॥ (वि. भै. १०९) और भी

'जैसे लहरें जल की, ज्वाला अग्नि की और प्रभा सूर्य की भङ्गिमायें हैं उसी प्रकार ये भिन्न-भिन्न विश्व भङ्गियाँ मुझ भैरव की हैं ।' (वि. भै. ११०)

सर्वात्म सङ्कोच होने पर = समस्तरूप में बाह्य का सङ्कोच होने पर अर्थात् यह

तथा

'इन्द्रजालमयं विश्वं न्यस्तं वा चित्रकर्मवत् ।
भ्रमाद्वा ध्यायतः सर्वं पश्यतश्च सुखोदयः ॥'
(वि०भै० १०२ श्लो०) इति ।

एवमादौ विषये 'सुधीः' पूर्णज्ञानो यः कश्चिदपश्चिमजन्मा स 'हृदयं प्रविशेत्' विसर्गभुवमधिशेत इत्यर्थः ॥ ७१ ॥

ननु यद्येवमत्रानेके उपायाः संभवन्ति तत् कथं शाक्तस्यैव क्षोभस्य प्राधान्येन निर्देशः कृतः ?—इत्याशङ्क्याह—

सोमसूर्यकलाजालपरस्परनिघर्षतः ।
अग्नीषोमात्मके धाम्नि विसर्गानन्द उन्मिषेत् ॥ ७२ ॥

'सोमसूर्ययोः' मेयमानयोर्यच्छब्दाद्यात्म श्रोत्रादिरूपं च 'कलाजालं' तस्य योऽसौ ग्राह्यग्राहकभावात्मा परस्परं सङ्घट्टः, ततस्तदुभयक्रोडीकारात् चक्रानुचक्रदेवीरूपं 'कलाजालं' तस्य परस्परं मेलनात्मा सङ्घर्षः, ततः—

कुछ भी वस्तु सत् नहीं है—ऐसी भावना होने पर । जैसा कि कहा गया है—

"(साधक को) बिना किसी कारण और बिना किसी आधार के ज्ञान उत्पन्न होता है । (प्रथम स्थिति मे) यह भ्रमात्मक होता है । किसी को यह तात्त्विक ज्ञान नहीं होता । यदि किसी को ऐसा ज्ञान हो जाय तो हे प्रिये ! वह शिव हो जाता है ।"

तथा

"यह संसार इन्द्रजालमय है अथवा चित्रकर्म की भांति किया गया है । अथवा भ्रम है—ऐसा ध्यान करने वाले की या ऐसी दृष्टि रखने वाले का सुख मिलता है ॥"

इस प्रकार के विषय में सुधी = पूर्ण ज्ञान वाला, जो कोई अन्तिम जन्म वाला है वह हृदय में प्रवेश करता है = विसर्ग भूमि में पहुँच जाता है ॥ ७१ ॥

प्रश्न—यदि इस प्रकार इस विषय में अनेक उपाय संभव हैं तो फिर शाक्त ही क्षोभ का मुख्य रूप में क्यों निर्देश किया गया ?—यह शङ्का कर कहते हैं—

सोमसूर्यात्मक कलाजाल के परस्पर घर्षण से अग्नीषोमात्मक धाम में विसर्ग के आनन्द का उन्मेष होता है ॥ ७२ ॥

सोम सूर्य का = प्रमेय और प्रमाण का जो शब्दादि रूप और श्रोत्र आदि रूप कलाजाल उसका जो ग्राह्यग्राहक सम्बन्ध रूप परस्पर सङ्घट्ट उससे = उन दोनों के एक हो जाने से, चक्रानुचक्र देवी रूप कलाजाल उसका परस्पर मेलन रूप सङ्घर्ष, उससे

'शुचिर्नामाग्निरुद्भूतः सङ्घर्षात् सोमसूर्ययोः ।'

इत्याद्युक्त्या अग्नीषोमात्मके मध्यमे धाम्नि अनुप्रवेशेन 'विसर्गानन्द उन्मिषेत्' मुख्यया वृत्त्या चरमधातुप्रक्षेपात्म परं सामरस्यमुदियात्, यदनुकल्पतया पुनरन्यत्रानन्द उपचर्यते येन तदपि परसंविदनुप्रवेशे निमित्ततां यायात् ॥ ७२ ॥

एतदेवोपसंहरति—

अलं रहस्यकथया गुप्तमेतत्स्वभावतः ।
योगिनीहृदयं तत्र विश्रान्तः स्यात्कृती बुधः ॥ ७३ ॥

यत एतद्योगिनीनां 'हृदयं' परमं विश्रान्तिस्थानम्, अत एव स्वभावतो गुप्तमित्यभिहितम्, यदभिप्रायेणैव—

'एतन्नायोगिनीजातो नारुद्रश्चापि विन्दति ।' (प०त्री० १० श्लो०)

इत्याद्यन्यत्रोक्तम् । 'तत्र' इति योगिनीहृदयात्मनि विसर्गोन्मेषे, 'बुध' इत्यनेनात्र ज्ञानित्वस्यैव प्राधान्यम्—इति कटाक्षितम् ॥ ७३ ॥

नन्वत्र विश्रान्तस्य किं नामाभिज्ञानम् ?—इत्याशङ्क्याह—

'सोम और सूर्य के संघर्ष से शुचि नामक अग्नि उत्पन्न होता है ।'

इत्यादि उक्ति के द्वारा अग्नीषोमात्मक मध्यधाम में अनुप्रवेश के द्वारा, विसर्गानन्द का उन्मेष होता है = मुख्य वृत्ति के द्वारा वीर्यप्रक्षेपरूप परमसामरस्य का उदय होता है जिसके अनुकला के रूप में दूसरी जगह आनन्द का उपचार होता है जिससे वह (= दूसरा विषय) भी परासंवित् के अनुप्रवेश में निमित बनता है ॥ ७२ ॥

इसी का उपसंहार करते हैं—

अब रहस्य की कथा रहने दीजिए । यह योगिनीहृदय स्वभावतः गुप्त है । ज्ञानी यहाँ विश्रान्तिलाभ कर कृतकृत्य हो जाता है ॥ ७३ ॥

चूँकि यह योगिनियों का हृदय = परम विश्रान्ति स्थान है । इसीलिए इसे स्वभावतः गुप्त कहा गया है। । जिस अभिप्राय से कि—

जो योगिनीभू नहीं है और न रुद्र है वह इसे नहीं प्राप्त करता ।
(परात्री. १०)

इत्यादि (बातें) अन्यत्र गयी हैं । तत्र = योगिनीहृदय रूप विसेर्गान्मेष म । 'बुधः' इस (पद) से इस विषय में ज्ञान का ही प्राधान्य है—ऐसा कटाक्ष किया गया है ॥ ७३ ॥

प्रश्न—यह विश्रान्तिलाभ करने वाले की पहचान क्या है ?—यह शङ्का कर कहते हैं—

हानादानतिरस्कारवृत्तौ रूढिमुपागतः ।
अभेदवृत्तितः पश्येद्विश्वं चितिचमत्कृतेः ॥ ७४ ॥

हेयोपादेयविषययोर्हानादानयोः

'मा किञ्चित्त्यज मा गृहाण ।' (अनु० ७ श्लो०)

इत्याद्युक्तिवशात् यस्तिरस्कारः, तत्र येयं निर्विकल्पात्मिका वृत्तिः, तत्र 'चितिचमत्कृतेः चिदैकात्म्यविमर्शात् प्ररोहं प्राप्तः सन् विश्वमभेदवृत्तितः 'पश्येत्' स्वात्मैकात्म्येन जानीयादित्यर्थः । तेनेदमेवास्य मुख्यं लक्षणं परतत्त्वान्तःप्रवेशे यत् हानादानतिरस्कारेण स्वात्ममात्र एवावस्थानमिति । अत एवानेन चिदात्मोच्चारानन्तर्येणानुजोद्देशोद्दिष्टः परतत्त्वान्तःप्रवेशोऽपि निर्णेतुमुपक्रान्तः । भेदेऽपि हि सति हेयोपादेयविभागः, स एव यस्य विगलितस्तस्य किं नाम हेयं किं वोपादेयम्— इति पूर्णैवास्य परा संविदुल्लसेत् ॥ ७४ ॥

तदाह—

अर्थक्रियार्थितादैन्यं त्यक्त्वा बाह्यान्तरात्मनि ।
स्वरूपे निर्वृतिं प्राप्य फुल्लां नाददशां श्रयेत् ॥ ७५ ॥

हान और उपादान के तिरस्कार की वृत्ति में रूढि को प्राप्त (योगी) चैतन्य के चमत्कार के कारण विश्व को अभेद की अवधारणा से देखता है ॥ ७४ ॥

हेय और उपादेय विषयों के त्याग और ग्रहण का

'न कुछ छोड़ो न कुछ लो' (अनुत्तरा ७)

इत्यादि उक्ति के कारण जो तिरस्कार उस विषय में जो निर्विकल्पात्मक वृत्ति, उसमें चित् के चमत्कार से = चित् के साथ एकात्मता का विमर्श होने से, प्ररोह को प्राप्त होता हुआ विश्व की अभेदवृत्ति से प्ररोह को प्राप्त होता हुआ, विश्व को अभेद वृत्ति से देखता है अपने साथ एक रूप सा जानता है—यह अर्थ है । इस प्रकार इसका मुख्य लक्षण यही है कि, परतत्त्व के अन्दर प्रवेश होने के बाद जो हान और उपादान के तिरस्कार के साथ स्वात्ममात्र में स्थित होना । इसलिए इसके द्वारा चिदात्मा के उच्चार के बाद अनुजोद्दिष्ट परतत्वान्तःप्रवेश के भी निर्णय के लिए उपक्रम हो गया । भेद होने पर ही हेय और उपादेय का विभाग होता है। जिसका वही (= भेद ही) विगलित हो गया उसके लिए क्या हेय और क्या उपादेय? इस प्रकार उसके लिए तो पूर्ण परा संवित् ही उल्लंसित होती है ॥ ७४ ॥

वही कहते है—

अर्थक्रिया की आकाङ्क्षा की दीनता को छोड़कर बाह्य और आन्तर

इह खलु तत्त्वान्तरनुप्रविष्टो योगी बाह्यान्तरस्वभावे नीलसुखादावर्थजाते हेयोपादेयविभागाभावात् तत्तत्प्रतिनियतार्थक्रियाकाङ्क्षादैन्यमपहाय सर्वभावानां संह्रियमाणत्वात् आकाशबीजस्योद्धारः । तदनु तस्यैव प्ररोहाद्विकस्वरां 'नाददशां श्रयेत्' इति विमर्शात्मिकां विश्वोत्तीर्णा संविदमासादयेदित्यर्थः । एवं च प्रथमं विश्वसंहारस्योपक्रान्तत्वात् आकाशबीजस्योदयः, तदनु तस्यैव प्ररोहात् संहारकुण्डलिनीबीजस्य—इति श्रीपिण्डनाथसंबन्ध्याद्यवर्णद्वयमपि अनेनोद्धृतम् ॥ ७५ ॥

नन्वेवमासादितयापि अनया कोऽर्थः स्यात् ?—इत्याशङ्क्याह—

वक्रमन्तस्तया सम्यक् संविदः प्रविकासयेत् ।
संविदक्षमरुच्चक्रं ज्ञेयाभिन्नं ततो भवेत् ॥ ७६ ॥

'तया' विश्वोत्तीर्णसंविद्रूपया नाददशया सम्यक् विश्वोपसंहारपुरस्सरं भेदतिरस्कारेण मार्गशुद्धिमादधानया विश्वोत्तीर्णत्वेऽपि विश्वमय्याः परस्याः संविदो 'अन्तर्वक्त्रम्' अन्तर्मुखं रूपम् एवंविधो योगी 'प्रविकासयेत्' विकासयोग्यं विदधातीत्यर्थः । 'ततः' संविदो विकासयोग्यताधानाद्धेतोः 'संविदां' नीलादि-

---

स्वभाव वाले (विषयों की) स्वरूप में निर्वृति को प्राप्त कर पूर्ण विकास वाली नाद दशा को प्राप्त करना चाहिए ॥ ७५ ॥

इस अवस्था में वर्त्तमान तत्त्वान्तर में अनुप्रविष्ट योगी बाह्य एवं आन्तर स्वभाव वाले नील (= घट इत्यादि) तथा सुख आदि विषयसमूह का हेयोपादेयविभाग न होने के कारण उन-उन प्रतिनियत अर्थक्रिया की आकांक्षा की दीनता को छोड़कर समस्त पदार्थों के संहृत हो जाने के कारण आकाशबीज (= हं) का उद्धार होने के बाद उसी के प्ररोह से विकस्वर नाद दशा का आश्रयण करे अर्थात् विमर्शात्मक और विश्वोत्तीर्ण संविद् की प्राप्ति करे । और इस प्रकार पहले विश्वसंहार का उपक्रम होने से आकाश बीज का उदय होता है, उसके बाद उसी के प्ररोह से संहारकुण्डलिनीबीज का (उदय होता है) इस प्रकार श्री पिण्डनाथ सम्बन्धी प्रथम दो वर्ण भी इसी के द्वारा उद्धृत हो गए ॥ ७५ ॥

प्रश्न—इस प्रकार आसादित भी इसके द्वारा क्या लाभ होगा ?—ऐसी शङ्का कर कहते हैं—

(योगी) उसके द्वारा संविद् के अन्तर्मुख को विकसित करता है । इस कारण संविद् इन्द्रियाँ एवं प्राणों का चक्र ज्ञेय से अभिन्न हो जाता है ॥ ७६ ॥

उसके द्वारा = विश्वोत्तीर्ण संविद् रूप नाददशा के द्वारा, सम्यक् = विश्व के संहार के साथ भेदनिवारण के द्वारा मार्गशुद्धि को बनाती हुई, विश्वोत्तीर्ण होने पर भी विश्वमयी परासंविद् का, अन्तर्वक्त्र = अन्तर्मुख रूप, इस प्रकार का योगी, प्रविकासित करता है = विकास के योग्य बनाता है । इससे = संविद् में विकास

ज्ञानानाम् 'अक्षाणां' तदुत्पत्तिनिमित्तभूतानामिन्द्रियाणां 'मरुतां' तत्सामान्यवृत्त्यात्मनां प्राणादिरूपाणां यत् मातृमानमेयस्वभावं चक्रं, तत् शून्यप्रमात्रपेक्षया विश्व भावरूपं यज्ज्ञेयं, तदभिन्नमकिञ्चिद्रूपं भवेत् ॥ ७६ ॥

नन्वेवमपि भावसंस्कारस्य विद्यमानत्वात् एकान्ततो भेदविगलनं न वृत्तम्— इति कथं संविन्मात्रात्मन्यनुप्रवेशः सिद्ध्येत् ?—इत्याशङ्क्याह—

तज्ज्ञेयं संविदाख्येन वह्निना प्रविलीयते ।
विलीनं तत् त्रिकोणेऽस्मिञ्शक्तिवह्नौ विलीयते ॥ ७७ ॥

'तत्' अभावात्म ज्ञेयं परप्रमात्रात्मना संविदाख्येन वह्निना प्रकर्षेण निःसंस्कारं 'विलीयते' विगलति, संविदग्निरेवावशिष्यत इत्यर्थः । अनेनाभावस्यापि विलापनादग्निबीजस्योद्धारः कृतः । एवं 'विलीनं' संविन्मात्रात्मतामापन्नमपि तज्ज्ञेयं संवित्त्वान्यथानुपपत्त्या अस्मिन् इच्छादिशक्तित्रयात्मनि 'त्रिकोणे शक्तिवह्नौ' सर्वशक्तिक्रोडीकारिण्यां स्वातन्त्र्यशक्तौ 'विलीयते' तन्मात्रसारतया प्रस्फुरतीत्यर्थः । एवमनेन संविन्मात्र एव विश्रान्तेः शक्तिबीजस्याप्युद्धारः कृतः । इह खलु इदमेव संविदः संवित्त्वं यत् परप्रष्टृत्वं नाम, यस्य विमर्शः स्पन्दो हृदयं विसर्गः—

की योग्यता के आधान के कारण, संविदों का = नील आदि विज्ञानों का, अक्षों का = उस (विज्ञानो) की उत्पत्ति के कारणभूत इन्द्रियों का, मरुतों का = उनकी सामान्य वृत्ति वाले प्राण आदि रूपों का, जो प्रमाता प्रमाण और प्रमेय रूप चक्र है वह शून्य प्रमाता की अपेक्षा विश्वभाव रूप जो ज्ञेय उससे अभिन्न अर्थात् अकिञ्चिद्रूप हो जाता है ॥ ७६ ॥

प्रश्न—ऐसा होने पर भी भावसंस्कार के विद्यमान रहने से भेद का ऐकान्तिक नाश तो नहीं हुआ तो फिर कैसे संविन्मात्र में प्रवेश सिद्ध होगा?—यह शङ्का कर कहते हैं—

संविद् रूपी अग्नि के द्वारा वह ज्ञेय विलीन हो जाता है । और विलीन हुआ वह (= ज्ञेय) इस त्रिकोणशक्ति रूपी अग्नि में विलीन हो जाता है ॥ ७७ ॥

वह = अभावात्मक, ज्ञेय परप्रमाता रूप संविद् नामक अग्नि के द्वारा, प्रकर्ष के साथ = संस्काररहित रूप में, विलीन हो जाता है = गल जाता है अर्थात केवल संविद् अग्नि शेष रहती है । इसके द्वारा अभाव का भी विलापन होने से अग्निबीज का उद्धार कर दिया गया । इस प्रकार विलीन = संविद्स्वरूपता को प्राप्त भी वह ज्ञेय संवित्त्व की अन्यथा अनुपपत्ति के द्वारा इन इच्छादि शक्तित्रितय रूप 'त्रिकोणशक्तिवह्नि' के सभी शक्तियों को आत्मसात् कर लेने वाली स्वातन्त्र्य शक्ति में विलीन हो जाता है अर्थात् केवल उसी रूप में स्फुरित होता है । इस प्रकार इसके द्वारा केवल संवित् में विश्रान्ति के कारण शक्तिबीज का भी उद्धार कर

इत्यादयः सहस्रशो व्यपदेशाः । यदुक्तम्—

'तस्य देवातिदेवस्य परबोधस्वरूपिणः ।
विमर्शः परमा शक्तिः सर्वज्ञा ज्ञानशालिनी ॥' इति ॥ ७७ ॥

अतश्च मुख्यया वृत्त्या तत्रैव विश्रमणीयं येन साक्षात् परतत्त्वान्तरनुप्रवेशः सिद्ध्येत् ?—इत्याह—

तत्र संवेदनोदारबिन्दुसत्तासुनिर्वृतः ।
संहारबीजविश्रान्तो योगी परमयो भवेत् ॥ ७८ ॥

तत्रैवं स्थिते सति परप्रमात्रात्मनः 'संवेदनस्य' संवेदकत्वाधानात् 'उदारा' महती येयं 'बिन्दुसत्ता' विदिक्रियाकर्तृत्वात्मिका परा परामर्शदशा, तया सुष्ठु नैराकाङ्क्ष्येण 'निर्वृतः' स्वात्मचमत्कारातिशयशाली, अत एव 'संहारबीजे' परप्रमात्रात्मनि बिन्दोरपि उदयात् श्रीपिण्डनाथे च 'विश्रान्तः' तदैकात्म्यमापन्नोऽत एव 'परमयो योगी भवेत्' परतत्त्वैक्यभाक् भवतीत्यर्थः ॥ ७८ ॥

ननु संविदपेक्षयापि विमर्शस्यैव विश्रान्तिस्थानत्वं प्राधान्येन कस्मादुक्तम् ? इत्याशङ्क्याह—

अन्तर्बाह्ये द्वये वापि सामान्येतरसुन्दरः ।
संवित्स्पन्दस्त्रिशक्त्यात्मा सङ्कोचप्रविकासवान् ॥ ७९ ॥

दिया गया । संविद् का संवित्त्व यही है कि परामर्शक होना जिसका कि विमर्श, स्पन्द, हृदय,विसर्ग इत्यादि हजारों नाम है । जैसा कि कहा गया है—

उस परबोध रूपी देवों के भी देवता का विमर्श ही परमा शक्ति है जो कि सर्वज्ञा और ज्ञानवती है ॥ ७७ ॥

इसलिए मुख्य वृत्ति के द्वारा उसी में विश्राम करना चाहिए जिससे साक्षात् परतत्त्व के भीतर प्रवेश हो जाय । वही कहते हैं—

ऐसा होने पर संविद् की उदार विन्दुसत्ता के द्वारा निर्वृत होता हुआ संहार बीज में विश्रामलाभ करने वाला योगी परमय हो जाता है ॥ ७८ ॥

तत्र = ऐसा होने पर, प्रमाता रूप संवेदन के संवेदकत्व का आधान होने के कारण उदारा = महती, जो यह बिन्दुसत्ता = ज्ञान क्रिया करने वाली परा परामर्श-दशा, उसके द्वारा भली भाँति निराकाङ्क्ष होकर निर्वृत = स्वात्मचमत्कारातिशय वाला, इसीलिए संहार बीज = पर प्रमाता रूप में, बिन्दु का भी उदय होने से श्री पिण्डनाथ में विश्रान्त = उसके साथ एकात्मता को प्राप्त, इसलिए योगी परमय हो जाता है = परतत्त्व के साथ एकता वाला हो जाता है ॥ ७८ ॥

प्रश्न—संविद् की अपेक्षा विमर्श को ही प्रधानतया विश्रान्तिधाम क्यों कहा गया ?—यह शङ्का कर कहते हैं—

स एव हि संवित्स्पन्दो 'अन्तः' परप्रमात्रात्मनि शिवतत्त्वे सर्वविशेषस्वीकारात् सामान्यात्मा, अत एव प्रविकासवान् अहमिति, 'बाह्ये' मायातः क्षित्यन्तं भेदोल्लासाद्विशेषात्मा, अत एवान्योन्यव्यावृत्त्या सङ्कोचवान् इदमिति; 'द्वये' अन्तर्बहीरूपे विद्यापदे समधृततुलापुटन्यायेन 'अहमिदम्' इति सामान्यविशेषात्मा, अत एव सङ्कोचप्रविकासवान्, अत एवाशेषविश्वोल्लासकारित्वात् इच्छादिशक्तित्रयात्मा—इति स एव परं विश्रान्तिस्थानम्—इति तत्रैवावधेयम् ॥ ७९ ॥

ननु यद्येवं तर्ह्यस्य सङ्कोचविकासवत्त्वेन नानात्वात् जाड्यमापतेत्—इति समाप्तं विश्रान्तिस्थानत्वम् ?—इत्याशङ्क्याह—

असङ्कोचविकासोऽपि तदाभासनतस्तथा ।

वस्तुतः संविदेकस्वभावत्वात् असङ्कोचविकासोऽपि असौ संवित्सपन्दः स्वस्वातन्त्र्येण तथा सङ्कोचादिरूपतया अवभासते, इति तथा 'सङ्कोचविकासवान्' इत्युच्यते न तु वस्तुतस्तथा समस्तीति भावः ॥

ननु यदि नाम सङ्कोचविकासाद्यस्य वस्तुतो नास्ति, तत् तदवभासने किं

संवित्स्पन्द जो कि अन्तरीण एवं बाहरी दोनो में सामान्य एवं विशेष रूप होने के कारण सुन्दर है, सङ्कोच एवं विकास वाला तथा तीन शक्तियों वाला वह (अन्तिम विश्रान्तिस्थल है) ॥ ७९ ॥

वही संवित्स्पन्द अन्तः = पर प्रमाता रूप शिवतत्त्व में समस्त विशेषों का स्वीकार करने के कारण सामान्य रूप, इसलिए विकासवान् 'अहम्' है । बाहरी = माया से लेकर पृथ्वी पर्यन्त भेद का उल्लास होने से विशेष रूप, इसलिए एक के द्वारा दूसरे की व्यावृति होने के कारण सङ्कोचवान् 'इदम्' है । दोनो में = अन्तरीण एवं बाह्य रूप विद्याभूमि में, समधृततुलापुटन्याय के द्वारा 'अहम् इदम्' ऐसा सामान्य विशेष रूप, इसलिए सम्पूर्ण विश्व का उल्लासक होने के कारण इच्छा आदि तीन शक्तियों वाला—इस प्रकार वही विश्रान्ति का स्थान है—ऐसा वहीं से समझ लेना चाहिए ॥ ७९ ॥

प्रश्न—यदि ऐसा है तो सङ्कोच विकास वाला होने के कारण अनेक होने से वह जड़ हो जायगा फलतः उसकी विश्रान्तिस्थानता नहीं रहेगी ?—ऐसी शङ्का कर कहते हैं—

सङ्कोचविकासरहित होने पर भी (वह) वैसा आभासित होने के कारण वैसा (समझा जाता है) ॥ ८०- ॥

वस्तुतः केवलज्ञानस्वभाव होने के कारण सङ्कोचविकासहीन भी वह संविद्स्पन्द अपने स्वातन्त्र्य के कारण उस प्रकार = सङ्कोचविकासवान् कहलाता है न कि वस्तुतः वैसा है ।

निमित्तम् ?—इत्याशङ्क्याह—

अन्तर्लक्ष्यो बहिर्दृष्टिः परमं पदमश्नुते ॥ ८० ॥

इह हि 'बहिः' इदन्तापरामृश्ये देहघटादौ

'तत्तद्रूपतया ज्ञानं बहिरन्तः प्रकाशते ।
ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत् ॥
नहि ज्ञानादृते भावाः केनचिद्विषयीकृताः ।
ज्ञानं तदात्मतां यातमेतस्मादवसीयते ॥'

इत्यादिश्रीकालिकाक्रमोक्त्या संवित्स्फारसारा एवैते, इत्येवमात्मदृष्टिः अत एव 'अन्तः' अहंपरामर्शात्मनि संवित्तत्त्वे सावधानो बाह्यविषयासङ्गेऽपि स्वरूपपरामर्शपरत्वात् भैरवमुद्रानुप्रविष्टो योगी 'परमं पदमश्नुते' विमर्शदशामधिशेते इत्यर्थः । तेन 'अविद्यैव विद्योपायः' इत्यादिन्यायेन सङ्कुचितमपि बाह्यं रूपं विकस्वरस्वरूपापत्तौ निमित्ततां यायात्—इत्युक्तं स्यात् । तत्र चोचितेन विमर्शेन भाव्यम्—इति विशेषात्मन इदमिति परामर्शस्यापि उल्लासः—इति युक्तमुक्तं 'तथाभासनतस्तथा' इति ॥ ८० ॥

प्रश्न—यह इसका सङ्कोच विकास वस्तुतः नहीं है तो उस प्रकार के आभासन में क्या कारण है ?—यह शङ्का कर कहते हैं—

जिसका लक्ष्य अन्दर हो और दृष्टि बाहर हो (अर्थात् शाम्भवीमुद्रा वाला योगी हो वह) परम पद का अनुभव करता है ॥ -८० ॥

यहाँ बाहर = इदं के रूप में परामर्श के योग्य देह घट आदि के विषय में ।

"ज्ञान उन-उन रूपों मे बाहर और भीतर प्रकाशित होता है । ज्ञान के बिना अर्थ की सत्ता नहीं है । इस कारण यह जगत् ज्ञानरूप हैं ।

ज्ञान के बिना किसी ने भी पदार्थों को विषय नहीं बनाया । इससे यह निश्चित होता है कि ज्ञान ही तदात्मता (= भावरूपता) को प्राप्त हुआ ।"

इत्यादि श्री कालिकाक्रम की उक्ति के अनुसार ये (= पदार्थ) संविद् के उल्लासमात्र हैं—यही आत्मदृष्टि है । इसीलिए अन्तः = अहंपरामर्शरूप संवित् तत्त्व मे ध्यान करने वाला योगी बाह्य विषयों के साथ आसक्त होने पर भी स्वरूप के परामर्श में तल्लीन रहने के कारण भैरवमुद्रा में अनुप्रविष्ट हुआ, परम पद का अनुभव करता है = विमर्शदशा में विश्राम करता है । इसलिए 'अविद्या ही विद्या का उपाय है' इत्यादि सिद्धान्त के अनुसार संकुचित भी बाह्य रूप विकस्वर स्वरूप के लाभ का कारण बनता है—ऐसा कहा गया है । ऐसी स्थिति में विमर्श को समीचीन होना चाहिए—इस कारण विशेष रूप 'इदम्' परामर्श का भी उल्लास होता है । इसलिए ठीक ही कहा है—रूप में आभासित होने के कारण उस प्रकार का है ॥ ८० ॥

अत आह—

ततः स्वातन्त्र्यनिर्मेये विचित्रार्थक्रियाकृति ।
विमर्शनं विशेषाख्यः स्पन्द औन्मुख्यसंज्ञितः ॥ ८१ ॥

'ततः' समनन्तरोक्ताद्धेतोः स्वस्वातन्त्र्योत्थापिते तत्तदर्थक्रियाकारिणि भावजाते यदिदमिति विमर्शनं स विशेषाख्यः स्पन्दस्तत्तदर्थक्रियार्थितातारतम्येन प्रवृत्तेः 'औन्मुख्यसंज्ञितः' औन्मुख्यशब्दव्यपदेश्यः स्यादित्यर्थः ॥ ८१ ॥

न च अत्रैव विश्रमणीयम्—इत्याह—

तत्र विश्रान्तिमागच्छेद्यद्वीर्यं मन्त्रमण्डले ।
शान्त्यादिसिद्धयस्तत्तद्रूपतादात्म्यतो यतः ॥ ८२ ॥

तत्र—

'इदमित्यस्य विच्छिन्नविमर्शस्य कृतार्थता ।
या स्वस्वरूपे विश्रान्तिर्विमर्शः सोऽहमित्ययम् ॥'

(अ०प्र०सि० १५ श्लोक)

इत्याद्युक्त्या इदंविमर्शविश्रान्तिधामनि अहंपरामर्शे विश्रान्तिं कुर्यात्, यत् न केवलमत्र यावन्मन्त्रमण्डलेऽपि वीर्यं, यतोऽहंपरामर्शानुविद्धमन्त्रमण्डलैकात्म्यादेव

इसलिए कहा—

इस कारण स्वातन्त्र्य के द्वारा निर्मेय एवं विचित्र अर्थक्रिया करने वाले (पदार्थों) के विषय मे (जो) विमर्श होता है (वह) विशेष नाम वाला स्पन्द है और उसकी औन्मुख्य संज्ञा (भी) है ॥ ८१ ॥

ततः = अव्यवहित पूर्व कहे गए कारण से अपने स्वातन्त्र्य के द्वारा उपस्थापित भिन्न-भिन्न अर्थक्रिया करने वाले पदार्थसमूह के विषय मे जो 'इदम्' विमर्श है वह विशेष नामवाला स्पन्द है । (और वही) भिन्न-भिन्न अर्थक्रिया वाले अर्थों के क्रम से प्रवृत्त होने के कारण 'औन्मुख्य संज्ञा वाला है = औन्मुख्य शब्द से व्यवहृत होता है ॥ ८१ ॥

यही पर विश्राम नहीं करना चाहिए—यह कहते हैं—

जो मन्त्र मण्डल में वीर्य है उसी में विश्रान्ति करनी चाहिए । क्योंकि उन-उन रूपों के तादात्म्य से शान्ति आदि सिद्धियाँ प्राप्त होती हैं ॥८२॥

वहाँ—

जो अपने स्वरूप में विश्रान्त है यही 'सोऽहम्' विमर्श है । यही 'इदम्' इस विच्छिन्न विमर्श की कृतार्थता है । (अज. प्र. सि. १५)

इत्यादि उक्ति के द्वारा इदं विमर्श की विश्रान्ति वाले धाम अहं परामर्श में

तत्फलभूता विचित्रेतिकर्तव्यताकाः शान्त्यादिसिद्धयो भवेयुरित्यर्थः । संविद्विश्रान्तिमन्तरेण हि न किञ्चिदेव भवेदिति भावः । यद्वक्ष्यति—

'यत्तत्र नहि विश्रान्त तन्नभःकुसुमायते ।' (तं० ८।३)

इति ॥ ८२ ॥

न केवलमेतदेवं यावदिन्द्रियाण्यपि—इत्याह—

दिव्यो यश्चाक्षसङ्घोऽयं बोधस्वातन्त्र्यसंज्ञकः ।
सोऽनिमीलित एवैतत् कुर्यात्स्वात्ममयं जगत् ॥ ८३ ॥

इह खलु बाह्यर्थोन्मुख्येऽपि अन्तर्लक्ष्यत्वाद्दिव्योऽत एव शुद्धबोधैकरूपत्वात् बोधस्वातन्त्र्यशब्दाभ्यां न तु बुद्धीन्द्रियकर्मेन्द्रियशब्दाभ्यां व्यपदेश्यो योऽयमिन्द्रियसमूहः स बहिः 'अनिमीलितो' व्यापृत एव सन् भैरवमुद्रानुप्रवेशक्रमेण एतज्जगत् 'स्वात्ममयं कुर्यात्' संविन्मात्रसारतया परामृशेदित्यर्थः ॥ ८३ ॥

ननु कथमेवं भवेत् ?—इत्याशङ्क्याह—

महासाहससंयोगविलीनाखिलवृत्तिकः ।
पुञ्जीभूते स्वरश्म्योघे निर्भरीभूय तिष्ठति ॥ ८४ ॥

विश्राम करना चाहिये । जो कि न केवल यहीं अपितु मन्त्रमण्डल में भी वीर्य हैं । जिससे = अहंपरामर्शानुविद्ध मन्त्रमण्डल के साथ तादात्म्य होने से ही उसकी फलस्वरूप विचित्र इतिकर्तव्यता वाली शान्ति आदि सिद्धियाँ होती हैं । संविद्विश्रान्ति के बिना कुछ भी नहीं होता यह तात्पर्य है । जैसा कि कहेंगे—

"जिसने वहाँ विश्राम नहीं किया वह आकाशकुसुम की भाँति हैं ॥ (त. आ. ८।३) ॥ ८२ ॥

केवल यही ऐसा नहीं है किन्तु इन्द्रियाँ भी वैसी हैं—वही कहते हैं—

जो दिव्य इन्द्रियसमूह हैं, जिसका नाम बोध अथवा स्वातन्त्र्य है । वह बिना बन्द हुए ही इस जगत् को आत्ममय कर लेता है ॥ ८३ ॥

बाह्य पदार्थों की ओर उन्मुखता होने पर भी लक्ष्य भीतर की ओर होने के कारण दिव्य अत एव शुद्धबोध मात्र होने के कारण बोध एवं स्वातन्त्र्य शब्दों के द्वारा, न कि बुद्धीन्द्रिय एवं कर्मेन्द्रिय शब्दों के द्वारा, व्यवहार किए जाने योग्य जो यह इन्द्रियसमूह, वह बाहर, अनिमीलित अर्थात् लगे हुए भी भैरवमुद्रा में अनुप्रवेश क्रम से इस जगत् को स्वात्ममय कर लेता है = संवित् मात्र तत्त्व के रूप में परामर्श करता है ॥ ८३ ॥

प्रश्न—ऐसा कैसे होता है ?—यह शङ्का कर कहते हैं—

महा साहस के संयोग से जिसकी सभी वृतियाँ विलीन हो चुकी हैं

अकिंचिच्चिन्तकस्तत्र स्पष्टदृग्याति संविदम् ।
यद्विस्फुलिङ्गाः संसारभस्मदाहैकहेतवः ॥ ८५ ॥

महासाहसशब्दाभिधेयचकितमुद्रानुप्रवेशेन 'विलीना' बाह्याद्विगलिताः प्रत्यावृत्ता निखिला इन्द्रियवृत्तयो यस्य स तथा, अत एव 'अकिञ्चिच्चिन्तको' बहिरौन्मुख्याभावात् निरवधानोऽत एव 'स्वरश्म्योघे' तत्तदिन्द्रियमरीचिचक्रे 'पुञ्जीभूते' भेदविगलनात् स्वात्मन्येव सङ्कुटितेऽत एव 'निर्भरीभूय' पूर्णतामासाद्य तिष्ठति सति, तत्र अन्तरहंपरामर्शात्मनि प्रमातृतत्त्वे 'स्पष्टदृक्' प्रस्फुटावबोधः 'संविदं याति' परतत्त्वान्तरनुप्रविशेत् यत्स्फारमात्रादयत्नत एव संसारापकृतिः सिद्ध्येत् ॥ ८४-८५ ॥

न चैवमस्माभिः स्वोत्प्रेक्षितमेवोक्तमित्याह—

तदुक्तं परमेशेन त्रिशिरोभैरवागमे ।

तदेव पठति—

शृणु देवि प्रवक्ष्यामि मन्त्रभूम्यां प्रवेशनम् ॥ ८६ ॥

(वह साधक) पुञ्जीभूत अपनी रश्मियों के समूह के होने पर पूर्णता को प्राप्त करके स्थित रहता है । कुछ न सोचने वाला तथा स्पष्ट दृष्टि वाला (वह, उस) संविद् को प्राप्त होता है जिसका विस्फुलिङ्ग संसार को भस्म करने वाली अग्नि का एक मात्र हेतु है ॥ ८४-८५ ॥

महा साहस शब्द के द्वारा कही जाने वाली चकित मुद्रा मे प्रवेश के द्वारा, विलीन = बाहर से विगलित अर्थात् लौट चुकी है समस्त इन्द्रियवृत्तियाँ जिसकी वह उस प्रकार का, इसीलिए अकिञ्चित्चिन्तक = बाह्य औन्मुख्य के अभाव के कारण अवधानरहित इसलिए, अपनी रश्मियों के समूह के = उन-उन इन्द्रिय किरणों के समूह के, पुञ्जीभूत होने पर = भेद नष्ट हो जाने के कारण आत्मा मे ही सङ्कुटित होने पर, इस कारण, निर्भर होकर = पूर्णता को प्राप्त होकर स्थित होने पर, उस (भूमिका) में अन्दर-अन्दर अहंपरामर्श रूप प्रमातृ तत्त्व के विषय में, स्पष्टदृक् = स्फुट अवबोध वाला (योगी) संविद् को प्राप्त होता है = पर तत्त्व के अन्दर प्रविष्ट हो जाता है जिसके स्फार मात्र से बिना प्रयास के संसार का नाश सिद्ध हो जाता है ॥ ८४-८५ ॥

ऐसा हमने अपनी बुद्धि से नहीं कहा है—वही कहते हैं—

यही (बात) परमेश्वर ने त्रिशिरोभैरव (नामक) आगम में कही हैं ।

वही पढ़ रहे हैं—

हे देवि सुनो । (मैं) मन्त्र भूमि में प्रवेश का वर्णन करूँगा ॥ ८६ ॥

'मन्त्रभूम्याम्' इति परतत्त्वान्तः ॥ ८६ ॥

किं तत् ?—इत्याशङ्क्याह—

मध्यनाड्योर्ध्वगमनं तद्धर्मप्राप्तिलक्षणम् ।
विसर्गान्तपदातीतं प्रान्तकोटिनिरूपितम् ॥ ८७ ॥

यन्नाम 'विसर्गान्तपदं' द्वादशान्तपदमतिशयेन इतं प्राप्तं तदवधिकं 'मध्यनाड्या' उदानवाहक्रमेण 'ऊर्ध्वगमनं' तन्मन्त्रभूम्यां प्रवेशनमुच्यते—इत्यर्थाक्षिप्तम् । यतस्तस्याः संवित्तत्त्वात्मिकाया मन्त्रभूमेर्ये निरावरणत्व-निर्विकल्पत्वादयो 'धर्माः' तेषां 'प्राप्तिः' तदैकात्म्येन स्फुरत्ता तद्रूपम्, अत एव प्रान्तकोटित्वेन निरूपितं सर्वत्रैव परा काष्ठा—इत्युद्घोष्यते इत्यर्थः । यदुक्तम्—

'यन्निरावरणं संवित्सतत्त्वं कल्पनोज्झितम् ।
तत् परं पुत्रि कथितं सा काष्ठा सा परा गतिः ॥'

इति ॥ ८७ ॥

तच्च कथं स्यात् ?—इत्याशङ्क्याह—

अधःप्रवाहसंरोधादूर्ध्वक्षेपविवर्जनात् ।
महाप्रकाशमुदयज्ञानव्यक्तिप्रदायकम् ॥ ८८ ॥

मन्त्रभूमि में = पर तत्त्व के भीतर ॥ ८६ ॥

वह क्या है ?—यह शङ्का कर कहते हैं—जो द्वादशान्त पद के द्वारा अतिशय को प्राप्त है वहाँ तक सुषुम्ना के द्वारा ऊपर की ओर जाना उस (मन्त्र भूमि) मे प्रवेश (कहा जाता है क्योंकि) उसके धर्मों की प्राप्ति लक्षण वाली वह प्रान्तकोटि कही गयी है ॥ ८७ ॥

जो विसर्गान्तपद = द्वादशान्तपद, को अत्यधिक रूप में प्राप्त है उस सीमा तक, मध्यनाडी के द्वारा = उदानवाह क्रम से, ऊर्ध्व गमन है वह मन्त्रभूमि में प्रवेश कहा जाता है—इतना अर्थात् आक्षिप्त है । क्योंकि उस संवित् तात्मत्मक मन्त्रभूमि के जो निराकरण निर्विकल्पत्व आदि धर्म हैं उनकी, प्राप्ति = उनके साथ एकात्मक होकर स्फुरित होना, तत्त्वरूप, इसलिए प्रान्त कोटि के रूप में निरूपित हैं अर्थात् सर्वत्र पराकाष्ठा कही जाती है । जैसा कि कहा है—"हे पुत्रि ! जो आवरणहीन और कल्पना से रहित संवित् तत्त्व है वह पर कहा गया है, वह काष्ठा है; वह परा गति है" ॥ ८७ ॥

वह कैसे होगा ?—यह शङ्का कर कहते हैं—

अधःप्रवाह को रोकने तथा ऊर्ध्व क्षेप का तिरस्कार करने से सुषुम्णा मे मात्रा की आवृत्ति के द्वारा, नित्योदित (आत्म) ज्ञान की

अनुभूय परे धाम्नि मात्रावृत्त्या पुरं विशेत् ।

'अधःप्रवाहस्य' अपानस्य 'ऊर्ध्वक्षेपस्य' प्राणस्य चापहस्तनात् तदुभयघट्टनेन परे मध्यमे धाम्नि—

'पीत्वाकुलामृतं दिव्यं पुनरेव विशेत् कुले ।
पुनरेवाकुलं गच्छेन्मात्रायोगेन पार्वति ॥
सा च प्राणवहा ख्याता तन्त्रेऽस्मिन् पारमेश्वरे ।'

इत्यादिना निरूपितस्वरूपा या मात्रा तस्या 'आवृत्त्या' आवर्तनेन पुनःपुनर्गणनया

'उद्गच्छन्तीं तडिद्रूपां प्रतिचक्रं क्रमात्क्रमम् ।
ऊर्ध्वं मुष्टित्रयं यावत्तावदन्ते महोदयः ॥'

(वि०भै० २९ श्लो०)

इत्याद्युक्तयुक्त्या तत्तच्चक्रोल्लङ्घनक्रमेण द्वादशान्तभुवि 'सकृद्विभातोऽयमात्मा' इति न्यायेन अवभासनक्रियाविच्छेदाभावात् उदयप्रधानं नित्योदितं यदात्मज्ञानं तस्य 'व्यक्तिप्रदायकं' तद्रूपतयावभासमानं परप्रमातृरूपं 'महाप्रकाशमनुभूय पुरं विशेत्' मन्त्रभूमिरूपां पूर्णां स्वात्मवृत्तिमासादयेदित्यर्थः ॥ ८८ ॥

अभिव्यक्ति को देने वाले प्रकाश का यहाँ अनुभव कर (योगी) पुर में प्रवेश करता है ॥ ८८-८९- ॥

अधःप्रवाह = अपान, और ऊर्ध्वक्षेप = प्राण, के अपहस्तन से = उन दोनो के सङ्घट्टन से, पर = मध्यम धाम में

"हे पार्वति ! दिव्य कुलामृत का पान कर पुनः कुल में प्रवेश करना चाहिए । फिर मात्रायोग के द्वारा अकुल में प्रवेश करना चाहिए । इस पारमेश्वर तन्त्र में वह (= मध्यनाडी) प्राणवहा कही गई है ॥"

इत्यादि के द्वारा जिसका स्वरूप बतलाया गया है (ऐसी) जो मात्रा उसकी आवृति = आवर्तन के द्वारा, पुनः पुनः = गणना के द्वारा,

"विद्युत् के रूप वाली (वह) क्रमशः एक-एक चक्र को ऊपर-ऊपर करती हुई तीन मुट्ठी तक पहुँचती है उसके बाद अन्त में महान् उदय होता है ॥" (वि.भै. २९)

इत्यादि उक्त युक्ति के द्वारा उन-उन चक्रों को क्रमशः लाँघते हुए द्वादशान्त भूमिका में 'यह आत्मा एक बार आभासित होती है' इस न्याय से अवभासन क्रिया का विच्छेद न होने से उदय ही जहाँ प्रधान है ऐसा नित्य उदित जो आत्मज्ञान, उसकी 'अभिव्यक्ति को देने वाला' उस रूप में अवभासमान परप्रमाता रूप महाप्रकाश का अनुभव कर पुर में प्रवेश करता है अर्थात् मन्त्रभूमिरूप पूर्ण आत्म

सा च किंविधा ?—इत्याशङ्क्याह—

निस्तरङ्गावतीर्णा सा वृत्तिरेका शिवात्मिका ॥ ८९ ॥
चतुष्षड्द्विर्द्विगुणितचक्रषट्कसमुज्ज्वला ।
तत्स्थं(त्स्थो) विचारयेत् खं खं खस्थं खस्थेन संविशेत् ॥९० ॥
खं खं त्यक्त्वा खमारुह्य खस्थं खं चोच्चरेदिति ।
खमध्यास्याधिकारेण पदस्थाश्चिन्मरीचयः ॥ ९१ ॥

सा च स्वात्मरूपा वृत्तिर्निःशेषविश्वोपशमात् 'निस्तरङ्गा' स्वात्ममात्रविश्रान्त्या शान्तरूपेत्यर्थः । अत एवैकेत्युक्तम् । न चैवमस्या विश्वोत्तीर्णमेव रूपं संभवति, अपितु तथात्वेऽपि विश्वमयीत्याह—'अवतीर्णा' इति, तत्तद्रूपतया बहिरुल्लसितेत्यर्थः । अत एव तत्रत्यबहुग्रन्थार्थगर्भीकारेणाह—'चतुष्षड्द्विर्द्विगुणितचक्रषट्कसमुज्ज्वला' इति । यदुक्तं प्राक्—

'चतुष्षड्द्विर्द्विगणनायोगात् त्रैशिरसे मते ।
षट्चक्रेश्वरता नाथस्योक्ता चित्रनिजाकृतेः ॥' (१।११४) इति ।

वृत्ति को प्राप्त करता है ॥ ८८ ॥

वह (= मन्त्र भूमि) कैसी है ?—यह शङ्का कर कहते हैं—

वह वृत्ति तरङ्गरहित एक अवतीर्ण (तथा) चार और छः को दो गुना और फिर उनका दो गुना और फिर उनका दो गुना (= चार, आठ और सोलह तथा छ; बारह और चौबीस) इस प्रकार छः चक्रों से दीप्यमान ख शिवात्मिका है । उन (चक्रों) में रह कर (योगी) ख का विचार करे । पुनः ख में वर्तमान के द्वारा ख में वर्तमान ख में प्रवेश करे । पुनः दोनो ख को छोड़कर ख में आरूढ़ होकर ख में स्थित ख का उच्चार करे । पुनः अधिकार के साथ ख को आक्रान्त कर ख में प्रवेश करे । इस प्रकार चित् की मरीचियाँ पद में स्थित हो जाती हैं ॥ -८९-९१ ॥

वह स्वात्मरूपा वृत्ति समस्त विश्व का विगलन हो जाने से निस्तरङ्ग = अपने में ही विश्रान्ति के कारण शान्त रूप, है । इसलिए 'एक' ऐसा कहा गया है । इस प्रकार इसका विश्वोतीर्ण ही रूप संभव है ऐसी बात नहीं है बल्कि वैसा (= विश्वोतीर्ण) होने पर भी (वह) विश्वमयी है—यही कहते हैं—अवतीर्णा, अर्थात् भिन्न-भिन्न रूपों में बाहर उल्लसित । इसलिए वहाँ के बहुत ग्रन्थों के अर्थ को गर्भ में रखकर कहते हैं—चार और छः के दो गुने का दो गुना वाले छ चक्रों से समुज्ज्वल है । जैसा कि पहले कहा गया है—

त्रिशिरोभैरव के मत में चित्र विचित्र अपनी आकृति वाले स्वामी की, चार और छः के दोगुने के दोगुना की गणना के योग से छ चक्रों का स्वामित्व कहा गया है ।"(त. आ. १।११४)

एवमपि नास्याः स्वस्वरूपात् प्रच्यावः—इत्युक्तं 'शिवात्मिका' इति । तेनास्या बहीरूपतया स्फुरत्तायामपि परप्रमात्रात्मनि स्वस्वरूपे एव विश्रान्तिः—इत्युक्तं स्यात्, यदभिप्रायेणैव भैरवमुद्राया अभिधानम् । एतच्च अतिरहस्यत्वात् गोपनीयम्—इत्याशयेन भगवान्निगूढार्थतयाभिधत्ते—'खस्थम्' इत्यादिना ।

इह खलु योगी भूतिशब्दवाच्यमैश्वर्यात्मस्वातन्त्र्यलक्षणं 'खमारुह्य' अवलम्ब्य स्वस्वरूपं गोपयित्वा दिक्कालादिना सङ्कुचत्तामवभास्य अणुशब्दव्यपदेश्ये खे स्थितं सङ्कुचिततात्मतया स्फुरितं 'खम्'—

'परमात्मस्वरूपं तु सर्वोपाधिविवर्जितम् ।
चैतन्यमात्मनो रूपं सर्वशास्त्रेषु पठ्यते ॥' (ने०तं० ८।१८)

इत्याद्युक्त्या पूर्णप्रथात्मकमवश्यज्ञेयमात्मानं 'विचारयेत्' किमस्य सङ्कुचितमेव तात्त्विकं रूपं न वेति विमर्शपदवीं नयेदित्यर्थः । एवं हि पारमार्थिकस्य रूपस्य लाभो भवेदिति भावः । तदुक्तं तत्रैव—

'खं हि यद्भैरवं ज्ञेयं सर्वमार्गान्तिमन्तगम् ।
विचारयेत्तु यो धीमान् करणव्याप्तिमध्यगः ॥
भूमिकास्थो हि चक्रस्थो विन्दते परमार्थतः ।' इति ।

इतना होने पर भी इसका अपने स्वरूप से पतन (= राहित्य) नहीं है, इसलिए कहा गया—शिवात्मिका, इससे यह कहा गया कि इस (= स्वात्मरूपा वृत्ति) की बाह्य रूप में स्फुरत्ता होने पर भी परप्रमातृरूप अपने स्वरूप में ही विश्रान्ति है जिस अभिप्राय से ही भैरवमुद्रा का कथन किया गया है । यह अतिरहस्य होने के कारण गोपनीय है इस आशय से भगवान् इस गूढ़ अर्थ को 'खस्थम्'—इत्यादि के द्वारा कहते हैं । भूति शब्द के वाच्य ऐश्वर्य रूप अपने स्वातन्त्र्य स्वरूप 'ख' पर आरूढ़ होकर = उसके सहारें, अपने स्वरूप का गोपन कर दिक् काल आदि के रूप में सङ्कोच का अवसान कर अणु शब्द से व्यवहृत होने योग्य 'ख' में स्थित = संकुचित रूप में स्फुरित 'ख' को

''समस्त उपाधियों से रहित परमात्मरूप चैतन्य ही समस्त शास्त्रों में आत्मा का रूप कहा जाता है'' (ने. तं. च २०) ॥

इत्यादि उक्ति के द्वारा पूर्ण विस्तार वाले अवश्य जानने योग्य आत्मा का योगी को विचार करना चाहिए अर्थात् क्या इसका संकुचित रूप ही वास्तविक है अथवा नहीं? इस प्रकार का विमर्श करना चाहिए । ऐसा करने पर पारमार्थिक रूप का लाभ होता है—यह भाव है । वही पर कहा गया है—

'ख' जो कि भैरव है (उसे) सभी मार्गों का अन्त और अन्तिम तक जाने वाला समझना चाहिए । जो बुद्धिमान् ऐसा विचार करता है वह करणव्याप्ति के मध्य में पहुँचा हुआ तथा भूमिका और चक्र में स्थित (= चिन्तन करने वाला

तच्च कथम् ?—इत्याशङ्क्योक्तं—'खस्थेन खस्थं खं चोच्चरेदिति' । च शब्दो हेतौ । 'खे' रतावविष्ठमानेन तदासक्तेन सावधानेन चेतसा 'खे' कुलमूले शक्त्युत्पत्त्यात्मनि जन्माधारे स्थितं 'खं' प्राणरूपां शक्तिमुच्चरेत्—

'आमूलात् किरणाभासां सूक्ष्मसूक्ष्मपरात्मिकाम् ।
चिन्तयेत्तां द्विषट्कान्ते शाम्यन्तीं भैरवोदयः ॥'

(वि०भै० २८ श्लो०)

इत्याद्युक्त्या मध्यधामप्रवेशक्रमेण ऊर्ध्वं द्वादशान्तं नयेत् येन क्रियाशक्त्यात्मनि 'खे' गतं दृश्यं तदुपरक्तां क्रियाशक्तिं प्रमेयभुवं तथा 'खे' ज्ञानशक्तावविस्थितं द्रष्टारं तदुपरक्तां ज्ञानशक्तिं प्रमाणभुवं त्यक्त्वा प्रमाणप्रमेयात्मव्यवहारपरत्वेऽपि तदासङ्गमपहायेत्यर्थः । यद्यपि अत्रोभयत्रापि द्रष्टृदृश्योपरागः संभवति तथापि प्राधान्यादेवमुक्तम् । तथा 'खं' द्रष्टृदृश्याद्युपाधिवर्जितां स्वविमर्शमात्ररूपामिच्छाशक्तिम्, 'अधिकारेण अध्यास्य स्वावष्टम्भबलेनाक्रम्य चितिशब्दाभिधेयं 'खं'—

'विमर्शधाम तुर्यं च व्यापकं चोर्ध्वमध्यमः ।

साधक) परमार्थ को प्राप्त करता है ।'

यह कैसे होगा?—यह शङ्का कर कहते हैं—'ख में स्थित के द्वारा ख् में स्थित होकर और ख का उच्चार करना चाहिए । यहाँ 'च' शब्द हेतु अर्थ में (प्रयुक्त है) । चूँकि ख = रति में स्थित उसमें आसक्त (और) सावधान चित्त के द्वारा, ख में = कुल मूल में = शक्ति की उत्पत्ति वाले जन्माधार में स्थित, ख = प्राणरूपिणी शक्ति का उच्चार करना चाहिये ।

'भैरव अवस्था के उदय वाला (साधक) किरण के समान प्रकाश वाली, सूक्ष्म-सूक्ष्म परा स्वरूप शान्त होती हुई उस (= भावावृत्ति) का मूलाधार से लेकर द्वादशान्त तक चिन्तन करे ।'

इत्यादि उक्ति के द्वारा मध्यधाम में प्रवेश के क्रम से ऊपर द्वादशान्त तक (प्राण शक्ति को) ले जाय जिससे क्रियाशक्ति रूप 'ख' में वर्त्तमान दृश्य और उससे उपरक्त क्रियाशक्ति, जो कि प्रमेय भूमि है, को, तथा 'ख' में = ज्ञानशक्ति में, स्थित द्रष्टा और उससे उपरक्त ज्ञानशक्ति, जो कि प्रमाण भूमि हैं, को, छोड़कर अर्थात् प्रमाणप्रमेयव्यवहारपरक होने पर भी उसकी आसक्ति को छोड़कर । यद्यपि यहाँ दोनो जगह द्रष्टा और दृश्य का उपराग सम्भव हैं, तो भी प्रधानता के कारण ऐसा कहा गया है । तथा ख को = द्रष्टृ एवं दृश्य की उपाधि से रहित केवल आत्म विमर्श रूप इच्छा शक्ति को, अधिकार के द्वारा अध्यासित कर = अपने अवष्टम्भ के बल से आक्रान्त कर, चितिशब्द के द्वारा कहे जाने वाले 'ख' को

'जो विमर्श का स्थान, चतुर्थ, व्यापक, ऊर्ध्व तथा मध्य में सुन्दर छिद्र वाला

सुशिरं तत्त्वराजानं पराकाशं प्रकीर्तितम् ॥'

इत्यादिनीत्या श्रीत्रिशिरोभैरवोक्त्या निरूपितस्वरूपं परतत्त्वलक्षणं तुर्यातीतपदं सम्यग्भैरवमुद्रानुप्रवेशक्रमेण 'विशेत् समावेशभाक् भवेदित्यर्थः । एवं च 'चिन्मरीचयः' तत्तदिन्द्रियवृत्तयो बहिरौन्मुख्याभावात्' 'पदस्थाः' तुर्यातीतदशामधिशयाना एव भवन्तीत्यर्थः ॥ ९१ ॥

एवमप्यत्राप्रमत्तेन भाव्यम्—इत्याह—

भावयेद्भावमन्तःस्थं भावस्थो भावनिःस्पृहः ।
भावाभावगती रुद्धा भावाभावावरोधदृक् ॥ ९२ ॥

एवमपि 'भावाभावगतीरुद्धा' प्राणापानक्षोभमपहाय 'अन्तःस्थं भावम्' = आन्तरीं सत्तां, योगी 'भावयेत्' मध्यधामानुप्रवेशक्रमेण पौनःपुन्येन तत्रैव आसक्तिं कुर्यात् येन व्युत्थानेऽपि अतः प्रच्यावो न स्यात्, अत एव स 'भावस्थो' ग्राह्यग्राहकसंक्षोभेऽपि बाह्यान्तःकरणवर्गेणालुप्तसंवित्तिः स्वात्ममात्रपरिनिष्ठित एवेत्यर्थः । यदुक्तं तत्रैव

'ऊर्ध्वाधोगमविक्षेपरहितः करणेच्छया ।

तथा तत्त्वों का राजा है, उसे पराकाश कहा गया है ।'

इत्यादि त्रिशिरोभैरव मे कही गई नीति के द्वारा जिसका स्वरूप निरूपित है, ऐसे परतत्त्व लक्षण वाले तुर्यातीत पद में, सम्यक् भैरवमुद्रा के अनुप्रवेश के क्रम से, प्रवेश करना चाहिए अर्थात् समावेश वाला होना चाहिए । इस प्रकार, ज्ञान की किरणें = भिन्न-भिन्न इन्द्रियों की वृत्तियाँ, बाह्य औन्मुख्य के न होने से, पदस्थ = तुर्यातीत दशा में अधिष्ठित ही हो जाती है ॥ ९१ ॥

इतना होने पर भी इस (दशा) में प्रमत्त नहीं रहना चाहिये । यह कहते हैं—

(योगी) भाव और अभाव की गति को रोक कर अन्तःस्थ भाव की भावना करे । भाव में स्थित वह भाव एवं अभाव के अवरोध का साक्षात्कार करने वाला (फलतः) भावों के प्रति निःस्पृह हो जाता है ॥ ९२ ॥

योगी, भाव और अभाव की गतियों को रोककर = प्राण और अपान के क्षोभ को छोड़कर, अन्तःस्थ भाव की, = आन्तरिक सत्ता की, भावना करे अर्थात् सुषुम्ना में प्रवेश के द्वारा बार-बार वहीं पर आसक्ति करें जिससे व्युत्थान दशा में भी वहाँ से अलगाव न हो सकें । इसीलिए वह (= योगी), भावस्थ = ग्रह्य और ग्राहक का क्षोभ, होने पर भी, बाह्य और अन्तः करणवर्गो के द्वारा ज्ञान का लोप न होने के साथ-साथ स्वरूप मात्र में परिनिष्ठित ही रहता है । जैसा कि वहीं पर कहा गया है—

रूपं यस्य न हीयेत भावस्थो भावभासकः ॥
स्वरूपप्रतिपन्नोऽसावन्तःकरणवर्जितः ।
भावस्थं तं विजानीयाद् ग्राह्यग्राहकविप्लवे ॥'

इति । अत एव 'भावाभावयोः' प्राणापानयोर्मध्यधामानुप्रवेशेन निस्तरङ्गतया साम्यात्मा योऽसौ 'अवरोधः' तं पश्यति साक्षात्करोतीत्यर्थः ।

यदुक्तं तत्रैव

'प्राणापानौ समौ यस्य साम्यावस्थानमागतौ ।
निस्तरङ्गप्रकारेण भावाभावावरोधदृक् ॥'

इति । अत एव बहिरौन्मुख्याभावात् 'भावनिःस्पृहः' स्वस्वरूपनिष्ठ एवेत्यर्थः । यदुक्तं तत्रैव—

'स्वरूपस्थितिसंयोगलक्षवृत्तिरतस्य च ।
भावनिःस्पृहमेतद्धि तत्पदत्यागवर्तिनः ॥' इति ॥ ९२ ॥

ननु खशब्दस्य स्वरूपाविशेषेऽपि कुतस्त्योऽयं दशधा भिन्नोऽर्थः ?—इत्याशङ्क्याह—

'जो प्राण और अपान के ऊर्ध्वाधोगमन के विक्षेप से रहित है; इन्द्रियों की इच्छा से जिसका मनविचलित नहीं होता; जो भावस्थ और भाव का अवभासक है फलतः स्वरूप को उपलब्ध कर लिया है तथा अन्तःकरण की क्रिया से रहित है, ग्राह्यग्राहक के विप्लव के विषय में उसे भावस्थ जानना चाहिये ।'

इसलिए भाव और अभाव = प्राण और अपान, के मध्यस्थान में प्रवेश के द्वारा तरङ्गरहित होकर शान्त आत्मा वाला जो यह अवरोध, उसको, देखता है = साक्षात्कार करता है ।

जैसा कि वहीं कहा है—"जिसके प्राण और अपान सम हैं अर्थात् साम्यावस्था की प्राप्त हो चुके हैं, निस्तरङ्ग होने के कारण वह भाव और अभाव के अवरोध का साक्षात्कार करने वाला है ।"

इसलिए बाह्य औन्मुख्य न होने के कारण पदार्थों के प्रति निःस्पृह (= इच्छारहित अर्थात्) = स्वरूपनिष्ठ (रहता है) ।

जैसा कि वहीं कहा गया है—

स्वात्मरूप में स्थिति प्राप्त करने, जीव का शिव मे संयोजन करने, अपने लक्ष्यवेध मे संलग्न रहने वाले तथा उस पद का त्याग करने वाले की यही भाव निष्पृहता है ॥ ९२ ॥

प्रश्न—'ख' शब्द तो एक ही है फिर दश प्रकार का भिन्न अर्थ कहाँ से आया?—यह शङ्का कर कहते हैं—

आत्माणुकुलमूलानि शक्तिभूतिश्चिती रतिः ।
शक्तित्रयं द्रष्टृदृश्योपरक्तं तद्विवर्जितम् ॥ ९३ ॥
एतत्खं दशधा प्रोक्तमुच्चारोच्चारलक्षणम् ।

आत्मा परमात्मा, अणुः सङ्कुचित आत्मा, कुलमूलं प्राणशक्तेः प्रभवस्थानं जन्माधारः, शक्तिर्मध्यमप्राणवाहिनी, भूतिः स्वातन्त्र्यलक्षणमैश्वर्यम्, चितिस्तुर्यातीत-पदात्मिका परसंवित्, रतिरासक्तिः, शक्तित्रयं द्रष्टृउपरक्ता ज्ञानशक्तिर्दृश्योपरक्ता क्रियाशक्तिस्तद्विवर्जितेच्छाशक्तिः, प्रोक्तमिति श्रीत्रिशिरोभैरवे । यदुक्तम्—

'खमात्मा केवलं विद्यात् खमणुः सर्वदिक्कतः ।
कुलमूलं तु खं ज्ञेयं खं शक्तिः परिपठ्यते ॥
एकं तु खमिहोद्धाव्यं खद्वयं भूतिचिद्रतिः ।
द्रष्टृदृश्योपरक्तं च शक्तित्रितयं खं विदुः ।'
निष्पन्नपरिणामेन खमभूत्तत्त्वलक्षणम् ।'

इति उच्चारोच्चारलक्षणमिति यथायथं भावनाप्रकर्षेण परसंविदासादक-मित्यर्थः ॥ ९३-९४ ॥

न केवलमत्र खशब्देनैव दशधा भिन्नोऽयमर्थ उच्यते यावच्छब्दान्तरेणापि—इत्याह—

आत्मा, अणु, कुलमूल, शक्ति, भूति, चैतन्य, रति, दृष्टा और दृश्य से उपरक्त और उनसे रहित तीनो शक्तियां ये दश प्रकार के उच्चारोच्चार लक्षण वाला ख कहा गया है ॥ ९३-९४- ॥

आत्मा = परमात्मा, अणु = सङ्कुचित आत्मा, कुलमूल = प्राण शक्ति का उत्पत्ति स्थान = जन्म का आधार, शक्ति = मध्यम प्राण मे प्रवाहित होने वाली, भूति = स्वातन्त्र्यलक्षण ऐश्वर्य, चिति = तुर्यातीत पद वाली परा संवित्, रति = आसक्ति, तीन शक्तियाँ = द्रष्टा से उपरक्त ज्ञानशक्ति दृश्य से उपरक्त क्रियाशक्ति और उन दोनो से रहित इच्छाशक्ति । कहा गया है—त्रिशिरोभैरव में । जैसा कि कहा है—

'ख' को केवल आत्मा जानना चाहिए । 'ख' को सब ओर से अणु, (जानना चाहिए) । कुलमूल को ख समझना चाहिए । 'ख' शक्ति को कहा जाता है । एक 'ख' और दो 'ख' यहाँ भूति, चित् और रति को जानना चाहिए । द्रष्टा और दृश्य से उपरक्त तथा (उन दोनो से परे) तीन शक्तियों को 'ख' माना गया है । निष्पन्न हुए परिणाम के कारण 'ख' तत्त्व लक्षण वाला हो गया ॥

उच्चार-उच्चार लक्षण (का अभिप्राय है) क्रमशः भावना के प्रकर्ष के द्वारा परासंवित् को प्राप्त कराने वाला ॥ ९३-९४ ॥

केवल 'ख' शब्द के द्वारा ही यह दश प्रकार का भिन्न अर्थ नहीं कहा जाता

धामस्थं धाममध्यस्थं धामोदरपुटीकृतम् ॥ ९४ ॥
धाम्ना तु बोधयेद्धाम धाम धामान्तगं कुरु ।
तद्धाम धामगत्या तु भेद्यं धामान्तमान्तरम् ॥ ९५ ॥

इह खलु योगी 'धाम्नो' भूतेः स्वातन्त्र्यस्य यत् 'उदरं' सतत्त्वं तेन 'पुटीकृतं' सर्वतः संवलितं नित्यावियुक्तम्, अत एव 'धाम्नि' अणौ स्थितं सङ्कुचितात्मतया स्फुरितं 'धाम' आत्मानं बोधयेत् तद्बोधे समर्थमाचरेदित्यर्थः । तत्समर्थाचरणमेवाह—'धाममध्यस्थं धाम धाम्ना धामान्तगं कुरु' इति । 'धाम्नः' कुलमूलस्य जन्माधारस्य मध्ये स्थितं 'धाम' प्राणशक्तिं 'धाम्ना' रत्या तदासक्त्या 'धाम्नः' चितेस्तुर्यातीतपदस्य 'अन्तः' पराकाष्ठा तद्गतं कुरु तदेकरूपतया साक्षात्कुर्यादित्यर्थः । 'तत्' तस्मात् परतत्त्वसाक्षात्काराद्धेतोः 'धाम्नो' दृश्योपरक्तायाः क्रियाशक्तेः प्रमेयभुवो गत्या 'धाम' दृष्टृपरक्ता ज्ञानशक्तिः 'भेद्यं' भेदनीयं त्याज्यमित्यर्थः । यथाहि प्रमेयभूः सर्ववादिषु त्याज्यत्वेन सिद्धा तथा प्रमाणभूतमपि ज्ञानं त्याज्यमेवेति भावः । तुशब्दो भिन्नक्रमो हेतौ । ततश्च 'आन्तरं' प्रमात्रैकात्म्यमापन्नं 'धामान्तम्' अन्त्यं धाम द्रष्टृदृश्याद्युपाधिशून्यां

बल्कि दूसरे शब्द से भी—वही कहते हैं—

(योगी) स्वातन्त्र्य के उदर के द्वारा संपुटित किए गए, (फलतः) धाम (= अणु) में स्थित धाम (= आत्मतत्त्व) का बोध करे । जन्माधार के मध्य में स्थित प्राणशक्ति की रति के द्वारा तुरीयातीत पद की पराकाष्ठा तक पहुँचना चाहिए । इस कारण क्रियाशक्ति की गति के द्वारा ज्ञान शक्ति का उद्बोध करना चाहिए । उसके बाद आन्तरिक धामान्त अर्थात् इच्छाशक्ति (का आश्रयण करना चाहिए) ॥ -९४-९५ ॥

योगी धाम का = भूति का = स्वातन्त्र्य का, जो उदर = तत्त्व, उसके द्वारा पुटीकृत = चारा ओर से घिरा हुआ = नित्य संश्लिष्ट,इसलिए धाम में = अणु में, स्थित = संकुचित रूप से स्फुरित, धाम = आत्मा, का बोधन करे = उसके बोध के अनुकूल आचरण करें । उसके योग्य आचरण को बतला रहे हैं—धाम मध्यस्थ... कुरु । धाम के = कुलमूल के = जन्माधार के, मध्य में स्थित, धाम = प्राण शक्ति को, धाम की = चिति की = तुर्यातीत पद की, जो अन्तः = पराकाष्ठा, उसमें लगाओ अर्थात् उसके साथ एकरूप होकर साक्षात्कार करो । इस प्रकार = उस परतत्त्व साक्षात्कार के कारण, धाम की = दृश्य से उपरक्त क्रियाशक्ति की = प्रमेय भूमि की, गति के द्वारा, धाम = द्रष्टा से उपरक्त ज्ञानशक्ति का भेदन करना चाहिए अर्थात् परित्याग करना चाहिए । तात्पर्य यह है कि जैसे सभी वादियों के मत मे प्रमेय भूमि त्याज्य मानी गई हैं उसी प्रकार प्रमाणभूत ज्ञान भी त्याज्य हैं । 'तु' शब्द का क्रम भिन्न है और (वह) हेतु अर्थ में है । इसके बाद आन्तर = प्रमाता के साथ एकात्मता को प्राप्त, धामान्त = अन्तिम

स्वविमर्शमात्ररूपामिच्छाशक्तिम् अर्थात् आश्रयेत् येन तत्रैव प्ररोहमियात्—इति शब्दार्थसङ्गतिः । वाक्यार्थस्तु प्राग्वत् स्वयमेवाभ्यूह्यः ॥ ९५ ॥

नन्वन्येऽपि परतत्त्वान्तःप्रवेशे बहव उपायाः संभवन्ति तत्कथमस्यैव रहस्यत्वं येन गोपनीयत्वेन निगूढार्थतयैवमुपदेशः ?—इत्याशङ्क्याह—

भेदोपभेदभेदेन भेदः कार्यस्तु मध्यतः ।

यः पुनरन्यो भेदोपभेदात्मोपायभेदः संभवति स मध्यतः कार्यो मध्यमो नैवंविध उत्तम इत्यर्थः ॥

एतदेवोपसंहरति—

इति प्रवेशोपायोऽयमाणवः परिकीर्तितः॥ ९६ ॥
श्रीमहेश्वरनाथेन यो हृत्स्थेन ममोदितः।

न केवलमेतदिहैवोक्तं यावदन्यत्रापि—इत्याह—

श्रीब्रह्मयामले चोक्तं श्रीमान् रावो दशात्मकः ॥ ९७ ॥
स्थूलः सूक्ष्मः परो हृद्यः कण्ठ्यस्तालव्य एव च।
सर्वतश्च विभुर्योऽसौ विभुत्वपददायकः ॥ ९८ ॥

धाम = द्रष्टा दृश्य आदि की उपाधि से रहित केवल आत्मविमर्शरूप इच्छाशक्ति का आश्रयण करे जिससे वहीं पर प्ररोह को प्राप्त हो सके—इस प्रकार शब्दार्थ की सङ्गति है । वाक्यार्थ तो पहले की भाँति स्वयं समझ लेना चाहिए ॥ ९४-९५ ॥

प्रश्न—परतत्त्व में प्रवेश के विषय में और भी बहुत उपाय संभव हैं तो फिर इसी को रहस्य क्यों (कहा गया) जिससे गोपनीय के रूप में अर्थ को छिपाकर उपदेश (किया गया) ?—यह शङ्का कर कहते हैं—

जो भेद और उपभेद के द्वारा भेद हैं उसे मध्य से करना चाहिए ॥ ९६- ॥

जो कि दूसरा भेदोपभेद वाला उपाय संभव है वह मध्य से किया जाना चाहिए अर्थात् वह मध्यम (श्रेणी का उपाय) है न कि इस प्रकार उतम ॥ ९६ ॥

इसी का उपसंहार करते हैं—

इस प्रकार (मेरे) हृदय में स्थित महेश्वरनाथ के द्वारा जो कहा गया (वह) यह आणवप्रवेशोपाय (मेरे द्वारा) वर्णित किया गया ॥ -९६-९७- ॥

यह (उपाय) केवल यही नहीं बल्कि अन्यत्र भी कहा गया है—वह कहते हैं—

श्री ब्रह्मयामल में श्रीमान् राव दश प्रकार का कहा गया है जो स्थूल सूक्ष्म, पर, हृद्य, कण्ठ्य और तालव्य और सब प्रकार से व्यापक वह

श्रीमानिति विमर्शरूपतया प्रकाशस्यापि जीवितभूतत्वात् । इहास्य परवाग्रूपस्य अहंविमर्शात्मनो रावस्य प्रथमं तावद्धृदादिभवत्वात् पश्यन्तीमध्यमावैखरीरूपतया त्रैविध्यं, प्रत्येकं च स्थूलसूक्ष्मपरत्वेन त्रैविध्ये नवधात्वम्, एषां नवानामपि भित्तिभूतः परवागात्मा दशमः, स एव हि स्वस्वातन्त्र्यादेवमवभासयेत् । अत उक्तं 'सर्वतश्च विभुः' इति । स एव च विश्रान्तिस्थानम्—इत्युक्तं 'विभुत्वपददायकः' इति । एतच्च प्राक्

'तस्य प्रत्यवमर्शो यः परिपूर्णोऽहमात्मकः ।
स स्वात्मनि स्वतन्त्रत्वाद्विभागमवभासयेत् ॥
विभागाभासने चास्य त्रिधा वपुरुदाहृतम् ।
पश्यन्ती मध्यमा स्थूला वैखरीत्यभिशब्दितम् ॥
तासामपि त्रिधा रूपं स्थूलसूक्ष्मपरत्वतः ।' (३।२३७)

इत्यादिना—

'तत्परं त्रितयं तत्र शिवः परचिदात्मकः ।' (३।२४८)

इत्यन्तेन निर्णीतप्रायम्—इति तत एवैतत्सतत्त्वमवधारणीयम् ॥ ९८ ॥

तदेवमत्रैव परमवधातव्यं येन परमार्थिकस्वरूपलाभो भवेत्—इत्याह—

जितरावो महायोगी संक्रामेत्परदेहगः ।
परां च विन्दति व्याप्तिं प्रत्यहं ह्यभ्यसेत तम् ॥ ९९ ॥

विभुत्व पद को देने वाला है ॥ -९७-९८ ॥

विमर्श रूप होने के कारण प्रकाश का भी जीवन (= कारण) होने के कारण (यह) श्रीमान् है । इस परावाक् रूप अहंविमर्शस्वरूप राव का पहला प्रकार पश्यन्ती मध्यमा वैखरी तीन (रूपों वाला) है क्योंकि, पहले हृदय आदि (= नाभि, कण्ठ) में उत्पन्न होते हैं । फिर प्रत्येक का स्थूल सूक्ष्म और पर भेद से तीन-तीन प्रकार होने से नव प्रकार हुआ । उन नव का आधारभूत परावाक् रूप (राव) दशवां है । वही अपने स्वातन्त्र्य के कारण इस प्रकार अवभासन करता है । इसलिये कहा गया—'सब प्रकार से व्यापक है ।' और वही विश्रान्ति का स्थान है इसलिये कहा गया है—विभुत्वपद को देने वाला है । यह (बात) पहले—"उसका जो.........उनका भी तीन रूप" (तं. आ. ३।२३७) इत्यादि के द्वारा

'वह तीनो पर है उनमें शिव परचिदात्मक है ।' (तं. आ. ३।२४८)

यहाँ तक प्रायः निर्णीत है । इसीलिए इसको सतत्त्व समझना चाहिए ॥ ९८ ॥

तो इस प्रकार यहीं पर परम तत्त्व का निश्चय करना चाहिए जिससे पारमार्थक स्वरूप की पाप्ति हो जाय—यह कहते हैं—

राव को वश में करने वाला महायोगी (क्रमशः) उत्कृष्ट देह में रहकर

तावद्यावदरावे सा रावाल्लीयेत राविणी ।

'जित' आक्रान्तो वशीकृत उत्तरोत्तरो रावो येनासावेवंविधो महायोगी अर्थादुत्तरोत्तरत्यागेनोर्ध्वमूर्ध्वं रावं संक्रामेत् येन 'परदेहगो' यथायथमुत्कृष्टोत्कृष्टराव-स्वरूपनिष्ठः 'परां व्याप्तिं विन्दति' पारमार्थिकं स्वरूपं लभते इत्यर्थः । यदुक्तम्—

'नदते दशधा सा तु दिव्यानन्दप्रदायिका ।
चिनीति प्रथमः शब्दश्चिञ्चिनीति द्वितीयकः ॥
चीरवाकी तृतीयस्तु शङ्खशब्दश्चतुर्थकः ।
तन्त्रीघोषः पञ्चमश्च षष्ठो वंशरवस्तथा ॥
सप्तमः कांस्यतालस्तु मेघशब्दरवस्तथा ।
नवमो दावनिर्घोषो दशमो दुन्दुभिस्वनः ॥
नव शब्दान् परित्यज्य दशमो मोक्षदायकः ।
अनेन विधिना येन व्याहरेद्दशधा रवम् ॥'

इति । अतश्च तावदत्र प्रतिदिनमभ्यासः कार्यो यावत् सा परवागात्मा विमर्शशक्तिस्तत्तद्रावरूपतया प्रस्फुरणात् राविणी रावादेकमेकं रावं विलाप्य विभाग-विगलनात् 'अरावे'ऽहंपरामर्शरूपे स्वात्मनि 'लीयेत' विश्राम्यतीत्यर्थः ॥ ९९ ॥

संक्रमण करता है और पर व्याप्ति को प्राप्त करता है । उसे चाहिए कि वह उसका प्रतिदिन तब तक अभ्यास करे जब तक वह राविणी (= विमर्श शक्ति) राव से अराव में न लीन हो जाय ॥ ९९-१००- ॥

जीत लिया गया = आक्रान्त (अथवा) वश में कर लिया गया है उत्तरोत्तर राव (= शब्द) जिसके द्वारा वह, उस प्रकार का महायोगी अर्थात् उत्तरोत्तर त्याग के द्वारा ऊपरी-ऊपरी राव को संक्रान्त करे जिससे परदेह को प्राप्त अर्थात् क्रमशः उत्कृष्ट राव के स्वरूप में तत्पर हुआ, परव्याप्ति को प्राप्त करता है अर्थात् पारमार्थिक स्वरूप का लाभ करता है । जैसा कि कहा है—

दिव्य आनन्द को देने वाली वह (परावाक् अथवा विमर्श शक्ति) दश प्रकार से बजती है । 'चिन्' इस प्रकार का पहला शब्द है । चिन्-चिन् यह दूसरा । तीसरा शब्द चीरवाकी (सम्भवतः कपड़ा फटने की आवाज) है और चौथा शंख शब्द है । पाँचवा वीणा का शब्द और छठाँ वंशी का शब्द है । सातवाँ काँसे के वर्तन का (आठवाँ) बादल का शब्द नवाँ दावाग्नि का शब्द और दशवाँ मोक्षदायक है । इस प्रकार से दश प्रकार के शब्द का व्यवहार करना चाहिये ।

इसी प्रकार प्रतिदिन (तब-तक) अभ्यास करना चाहिए जब तक कि परावाक् रूप विमर्शशक्ति भिन्न-भिन्न राव के रूप में प्रस्फुरित होने के कारण राविणी होकर राव के द्वारा एक-एक राव को विलीन कर अर्थात् विभाग को नष्ट कर अराव में = अहं परामर्श रूप आत्मा में, लीन न हो जाय = विश्रान्त न हो जाय ॥ ९९॥

एवं परतत्त्वान्तःप्रवेशं निर्णीय तदानन्तर्योद्दिष्टानि तत्पथलक्षणान्यपि लक्षयितुमाह—

अत्र भावनया देहगतोपायैः परे पथि ॥ १००॥
विविक्षोः पूर्णतास्पर्शात्प्रागानन्दः प्रजायते ।
ततोऽपि विद्युदापातसदृशे देहवर्जिते ॥ १०१ ॥
धाम्नि क्षणं समावेशादुद्भवः प्रस्फुटं प्लुतिः ।
जलपांसुवदभ्यस्तसंविद्देहैक्यहानितः ॥ १०२ ॥
स्वबलाक्रमणाद्देहशैथिल्यात् कम्पमाप्नुयात् ।
गलिते देहतादात्म्यनिश्चयेऽन्तर्मुखत्वतः ॥ १०३ ॥
निद्रायते पुरा यावन्नरूढः संविदात्मनि ।

अत्र समनन्तरोक्ते उपायविशेषे या 'भावना' अभ्यासस्तया तथोक्तवक्ष्यमाणैरुच्चारकरणादिभिः 'देहगतैरुपायैः परे पथि' परतत्त्वान्तर्वेष्टुमिच्छोर्न तु तत्र प्रविष्टस्य, तस्य हि पूर्णतैव भवेदिति भावः पूर्णतायाः 'स्पर्शात्' औन्मुख्यमात्रात् न तु तदावेशात् प्रथमम् 'आनन्दः' चमत्कारविशेषः प्रकर्षेण स्वात्मविषयीकारेण 'जायते' अनुभवपदवीमासादयेदित्यर्थः । तत आनन्दादप्यनन्तरं 'विद्युदापातसदृशे'

इस प्रकार पर तत्त्व में प्रवेश का निर्णय कर उसके बाद कहे गये उसके पथ के लक्षणों को भी बतलाने के लिए कहते हैं—

इस (उपाय) में भावना के द्वारा एवं देहगत उपायों के द्वारा परम पथ में प्रवेश चाहने वाले को पूर्णता के स्पर्श के पहले आनन्द का लाभ होता है । इसके बाद बिजली गिरने के समान शरीर ज्ञान से रहित पर तत्त्व में क्षण मात्र समावेश होने से स्पष्टरूप से उद्‌भव अर्थात् ऊर्ध्व की ओर उन्नति होती है । उसके पश्चात् जल एवं धूल के समान अभ्यास के द्वारा प्राप्त संवित् और शरीर की एकता का नाश होने से अपने बल के आक्रमण से देह की शिथिलता के कारण योगी कम्पन को प्राप्त करता है। तत्पश्चात् देह के साथ (आत्मा के) तादात्म्य के नष्ट हो जाने पर अन्तर्मुखता के कारण (योगी) पहले निद्रा का अनुभव (तब तक) करता है जब तक संविदात्मा में रूढ नहीं हो जाता ॥ -१००-१०४- ॥

यहाँ = पहले कहे गए उपायविशेष में जो भावना = अभ्यास, उसके द्वारा इस प्रकार कहे गए तथा आगे कहे जाने वाले उच्चार करण आदि देह में सम्पन्न होने वाले उपायों के द्वारा परमपथ में = परतत्त्व में, प्रवेश करने की इच्छा वाले न कि उसमें प्रविष्ट को; क्योंकि तब तो उसकी पूर्णता ही हो जायगी; पूर्णता के स्पर्श से, जो कि औन्मुख्यमात्र होता है न कि उसमें आवेश रूप, पहले आनन्द = चमत्कार विशेष, प्रकृष्ट रूप में = आत्मा को विषय बनाकर, उत्पन्न होता है =

यथा विद्युति पतितायां सर्व स्वरूपत्यागेन तन्मयीभवति, एवं 'धाम्नि' परे तत्त्वे समावेशात् प्रस्फुटं कृत्वा देहादावात्मग्रहविगलनेनाधस्तनदशाविश्लेषात् परधामाधिरोहात्मकः 'उद्भवः प्लुतिः' ऊर्ध्वं गमनं भवेदित्यर्थः । अत एव 'देहवर्जिते' इत्युक्तम् । क्षणमिति, चिरस्य हि समावेशे पारिपूर्ण्यमेव भवेदिति भावः । एवं पांसूदकवदनेकजन्माभ्यस्तस्य संविद्देहैक्यस्य या 'हानिः' विभागेन ज्ञप्तिः, ततः क्षणं संविदात्मनः स्वस्य यत् 'बलम्' अहन्तालक्षणं वीर्यं तस्य 'आक्रमणात्' आत्मन्येवाभिमानोदयात् अनात्मन्यात्माभिमानः शिथिलीभवेत्—इति देहादीनां भङ्गुरायमाणत्वात् 'कम्पमाप्नुयात्' तत्र दार्ढ्यं जह्यादित्यर्थः । एवं 'पुरा' पूर्वं प्रथमं देहस्य संविदैक्याभिनिवेशे निवृत्ते सति संविदौन्मुख्यमात्रात् 'निद्रायते' बाह्यवृत्तिव्युपरमात् आन्तरस्य च कस्यचिदनुभवस्य स्फुटमनुदयात् निद्रायमाण आस्ते इत्यर्थः । कियत्कालमेवमास्ते, इत्याह 'यावन्न रूढः संविदात्मनि' इति । तत्रास्य प्ररोहे हि लक्षणान्तरमुदियादिति भावः ॥ १०३ ॥

तदाह—

ततः सत्यपदे रूढो विश्वात्मत्वेन संविदम् ॥ १०४ ॥

अनुभूत होता है । उसके बाद = आनन्द के भी बाद, विद्युत् आपात के सदृश = जैसे बिजली के गिरने पर सब कुछ अपने रूप का त्याग कर विद्युन्मय हो जाता है, उसी प्रकार, धाम में = परतत्त्व में, समावेश होने से स्पष्ट रूप से देह आदि में आत्मा की अवधारणा का नाश होने से नीचे की दशा से अलग हो जाने के कारण, पर धाम में आरोहण स्वरूप उद्भव = प्लुति = ऊर्ध्व गमन होता है । इसीलिए 'देहरहित' कहा गया । क्षणमात्र के लिए—कहने का भाव यह है कि बहुत देर तक समावेश होने पर पूर्णता ही हो जायगी । इस प्रकार धूल और पानी के समान (= जैसे धूलधूसरित व्यक्ति ऊपर से पानी में कूदे तो धूल धुल जाती है वैसे) अनेक जन्मों से अभ्यास के द्वारा प्राप्त संविद् और शरीर की एकता की जो हानि = पृथक् रूप में ज्ञान, उससे एक क्षण के लिए संविद्स्वरूप जो अपना बल = अहन्तालक्षण वीर्य, उसके आक्रमण = अपने अन्दर ही अभिमान के उदय से, अनात्मा में आत्मा का बोध शिथिल हो जाता है । इस प्रकार शरीर आदि के भग्न जैसा होने के कारण (योगी) कम्प को प्राप्त करता है = उस विषय में दृढता को छोड़ देता है । इस प्रकार पहले देह की संवित् के साथ ऐक्यभावना के हट जाने पर केवल संविद् की ओर उन्मुखता रहने से निद्रा का अनुभव करता है अर्थात् बाह्य वृत्तियों के शान्त होने से तथा आन्तरिक किसी अनुभव का स्पष्टतया उदय न होने से निद्रालु जैसा पड़ा रहता है । कब तक ऐसा रहता है?—उसको बतलातें हैं—कि जब तक संविदात्मा में रूढ नहीं हो जाता । उस (आत्मा) मे इस (योगी) का आरोहण होने में (योगी के अन्दर) दूसरे लक्षणों का उदय होने लगेगा—यह तात्पर्य है ॥ १००-१०३ ॥

संविदन् घूर्णते घूर्णिर्महाव्याप्तिर्यतः स्मृता ।

'ततो' अनन्तरं परसंविदात्मनि 'सत्यपदे' प्राप्तप्ररोहः सन् निखिलस्यास्य देहघटाद्यात्मनो जगतः संविदेव सतत्त्वं न पुनस्तदतिरिक्तं नामैतत् किञ्चित्—इति साक्षात्कुर्वन् 'घूर्णते' भ्रमति, चलति स्पन्ददशाधिशायी भवेदित्यर्थः । एतद्दशाधिशायिनो हि योगिनः सदैव सृष्टिसंहारकारित्वेन परं पारमेश्वर्यमुदियात्—इत्युक्तं 'घूर्णिर्महाव्याप्तिर्यतः स्मृता' इति ॥ १०४ ॥

ननु—

'दशावस्थाश्विनोत्यन्तः शक्तितेजोपवृंहितः ।
कम्पो भ्रमस्तथा घूर्णिः प्लवनं स्थिरतापि च ॥
चित्प्रकाशस्तथानन्दो दिव्यदृष्टिश्चमत्कृतिः ।
अवाच्यो दशमो भावः शिवतत्त्वे प्रवेशनात् ॥
संस्पर्शः प्राप्यते यावत्तावन्मुक्तो भवार्णवात् ।'

इत्याद्युक्त्या परतत्त्वान्तर्विविक्षोर्लक्षणान्तराण्यपि संभवन्ति—इति यावत् तानि नोदितानि तावत्कथमेतावतैव तदनुप्रवेशो भवेत् ?—इत्याशङ्क्याह—

आत्मन्यनात्माभिमतौ सत्यामेव ह्यनात्मनि ॥ १०५ ॥

उसके बाद सत्य पद पर आरूढ़ हुआ (योगी) संविद् का विश्वरूप में अनुभव करता हुआ घूर्णन करता है । क्योंकि घूर्णि महाव्याप्ति कही गई है ॥ -१०४-१०५- ॥

ततः = बाद में, परसंविद्रूप सत्यपद में आरूढ़ होकर (योगी) इस सम्पूर्ण देहघटादि रूप जगत् का तत्त्व संविद् ही है उसके अतिरिक्त दूसरा नहीं—ऐसा साक्षात् जानता हुआ घूर्णन करता है = भ्रमण करता है = चलता है अर्थात् स्पन्द दशा में रहता है । उस दशा में अधिष्ठित योगी के सदा सृष्टिसंहारकारी होने से परम परमेश्वरता का उदय होता है—इसलिए कहा—क्योंकि घूर्णि महाव्याप्ति कही गई है ॥ १०४ ॥

प्रश्न—अन्तःशक्ति के तेज से समृद्ध (योगी) दश अवस्थाओं को प्राप्त होता है । (वे अवस्थायें हैं)—कम्प भ्रम, धूर्णि, प्लवन, स्थिरता, चित्प्रकाश,आनन्द, दिव्यदृष्टि, चमत्कार और अवाच्य दशम भाव (जिसका) शिव तत्त्व में प्रवेश के कारण तब तक संस्पर्श प्राप्त होता रहता है जब तक संसार समुद्र से मुक्त नहीं हो जाता ।

इत्यादि उक्ति के द्वारा पर तत्त्व के भीतर प्रवेश चाहने वाले के दूसरे भी लक्षण होते हैं, इस कारण जब तक वे (योगी) के अन्दर उदित न हों तब तक इतने (= मूल कारिका मे कहे गये) से ही उसमें प्रवेश कैसे हो जायगा?—यह शङ्का कर कहते हैं—

आत्माभिमानो देहादौ बन्धो मुक्तिस्तु तल्लयः ।

इह खलु द्विधा बन्ध आत्मन्यनात्माभिमानोऽनात्मन्यात्माभिमानश्च—इति तदेव चाणवं मलमुच्यते । यदाहुः—

'स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता ।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः ॥' (ई०प्र० ३।२।४)

इति । तदेव च कार्ममायीयहेतुत्वात् इयतः संसारस्य मूलभूतम् । यदुक्तम्—

'मलः कर्म निमित्तं तु नैमित्तिकमतः परम् ।' (स्व०तं० ३।१७६)

इति । अतश्च 'स एष मूले निहितः कुठारः' इतिवत् तत्रैव यदितव्यं येनाशेषबन्धव्युपरमो भवेदिति भावः । तदेवेह प्राधान्येनोक्तम्, अतश्च मुख्यया वृत्त्या स एव बन्धस्तल्लय एव च मुक्तिरिति संक्षेपार्थः ॥ १०५ ॥

तल्लश्च किमक्रमेणैव भवेदुतान्यता ?—इत्याशङ्क्याह—

आदावनात्मन्यात्मत्वे लीने लब्धे निजात्मनि ॥ १०६ ॥

आत्मा में अनात्मा का अभिमान होने पर ही अनात्मा देह आदि में आत्माभिमान बन्धन है और उसका लय हो जाना मुक्ति है ॥ -१०५-१०६- ॥

बन्धन दो प्रकार का है—(१) आत्मा में अनात्माभिमान और (२) अनात्मा में आत्माभिमान । यही आणवमल कहा जाता है । जैसा कि कहते हैं—

"बोध के स्वातन्त्र्य की हानि तथा स्वातन्त्र्य का बोध न होना (यह) दो प्रकार का आणव मल अपने स्वरूप की हानि के कारण होता है ।" (ई. प्र. का. ३।२।४)

और वही कार्म और मायीय मलों का हेतु होने के कारण संसार का मूल है । जैसा कि कहा है—

मल कर्म का निमित्त है इसके अतिरिक्त (शेष) नैमित्तिक (= मलके कार्य) है । (स्व. तं. ३।१७६)

इस प्रकार 'यह तो मूल मे ही कुठाराघात है' के समान वहीं (= आणव मल के निरसन में) प्रयास करना चाहिये जिससे समस्त बन्धन का नाश हो जाय । वही यहाँ मुख्य रूप से कहा गया है । इसलिये मुख्य रूप में वही (= आणव मल ही) बन्ध है और उसका लय ही मुक्ति है—यह संक्षिप्त अर्थ है ॥ १०५ ॥

उसका लय क्रम से होता है या दूसरी प्रकार ?—यह शङ्का कर कहते हैं—

पहले अनात्मा जब आत्मा में लीन हो जाता है तथा अपना स्वरूप

आत्मन्यनात्मतानाशे महाव्याप्तिः प्रवर्त्तते ।

प्रथमं हि 'अनात्मनि' देहादावात्माभिमानस्य विलये सति आत्मन्यनात्मत्वाभिमानस्य नाशो भवेत् येन संविल्लक्षणे स्वस्मिन्नेवात्मन्यभिमानोदये सति महाव्याप्तिः प्रवर्त्तते, परं पारमेश्वर्यमुदियादित्यर्थः ॥ १०६ ॥

एवं प्रथमं विशिष्टापूर्वस्पर्शोदयात् आनन्दमात्रानुभवो न तु द्विविधस्यापि बन्धस्य व्युपरमः । तदनु देहादावात्माभिमानविगलनेन आत्मन्येवात्माभिमान उदेति किं तु क्षणमात्रं, पुनरपि व्युत्थानादौ तादवस्थ्यादनन्तरं देहादावात्माभिमानस्य साक्षाद्विलयः, तदनु तत्संस्कारस्यापि यावदन्ते यथायथमात्मन्येवात्माभिमानस्य प्ररोहान्महती व्याप्तिः प्रवर्तते—इति पञ्चभिरेव लक्षणैः पर्याप्तम्—इति तान्येवोपात्तानि न पुनरन्यानि तेषामत्रैवान्तर्भावात् ॥ १०६ ॥

यदभिप्रायेणैवागमोऽपि—इत्याह—

आनन्द उद्भवः कम्पो निन्द्रा घूर्णिश्च पञ्चकम् ॥ १०७ ॥
इत्युक्तमत एव श्रीमालिनीविजयोत्तरे ।

यदुक्तं तत्र—

उपलब्ध हो जाता है उसके बाद आत्मा के विषय में अनात्मज्ञान का नाश होने पर महाव्याप्ति होती है ॥ -१०६-१०७- ॥

पहले अनात्म देह आदि में आत्माभिमान का विलय होने पर आत्मा के बारे मे अनात्मभावना का नाश हो जाता है जिससे संविद्रूप अपनी आत्मा में अभिमान का उदय होने पर महाव्याप्ति का लाभ होता है अर्थात् परम परमेश्वरता का उदय होता है ॥ १०६ ॥

इस प्रकार पहले विशिष्ट अपूर्व स्पर्श का उदय होने के कारण आनन्द मात्र का अनुभव होता है न कि दोनों प्रकार के बन्धनों का नाश होता है । उसके बाद देह आदि में आत्मभाव के नष्ट होने से आत्मा में ही आत्मभाव उदित होता है किन्तु यह क्षण मात्र के लिये होता है । क्योकिं बाद मे व्युत्थान आदि में वैसी ही अवस्था रहती है । बाद मे देह आदि के विषय में आत्माभिमान का साक्षाद् विलय हो जाता है । उसके बाद उसके संस्कार का भी (विलय हो जाता है) । अन्त में क्रमशः आत्मा मे ही आत्मा की भावना का उदय होने से महाव्याप्ति का उदय होता है—ये पाँच लक्षण ही पर्याप्त है । इसलिये उन्हीं का ही उल्लेख किया गया न कि अन्य का । क्योंकि उनका इन्हीं (पाँच) में अन्तर्भाव हो जाता है ॥ १०६॥

इसी अभिप्राय से आगम भी है—वही कहते हैं—

इसीलिये मालिनी विजयोत्तरतन्त्र में आनन्द, उद्भव, कम्प, निद्रा और घूर्णि ऐसा कहा गया जैसा कि वहाँ कहा गया ॥ -१०७-१०८- ॥

'अनया शोध्यमानस्य शिष्यस्यास्य महामतिः ।
लक्षयेच्चिह्नसङ्घातमानन्दादिकमादरात् ॥
आनन्द उद्भवः कम्पो निद्रा घूर्णिश्च पञ्चकम् ।'

(मा०वि० ११।३५)

इति ॥ १०७ ॥

ननु योगिनः समग्रलक्षणोदये महाव्याप्तिर्भवेत्—इत्युक्तं, यदा पुनरेकैकमेव लक्षणमुदियात् तदास्य किं भवेत् ?—इत्याशङ्क्याह—

प्रदर्शितेऽस्मिन्नानन्दप्रभृतौ पञ्चके यदा ॥ १०८ ॥
योगी विशेत्तदा तत्तच्चक्रेशत्वं हठाद् व्रजेत् ।

यदा पुनरानन्दप्रभृतौ समनन्तरोक्ते पञ्चके योगी 'विशेत्' युगपत्तत्प्रवेशविरोधात् एकैकमेव लक्षणमनुभवेत् तदास्य हठात् स्वरसत एव तत्र तत्र नियते चक्रे त्रिकोणादावीशत्वं भवेत्, तत्तच्चक्रजयो जायते इत्यर्थः ॥ १०८ ॥

ननु पूर्णतास्पर्शादिवमनुभवोदयः—इति पूर्णे सर्वस्य भावात् कथं नैयत्येनैवं भवेत्?—इत्याशङ्क्याह—

यथा सर्वेशिना बोधेनाक्रान्तापि तनुः क्वचित् ॥ १०९ ॥

"महाबुद्धिमान् गुरु इस (शक्ति) के द्वारा शोध्यमान इस शिष्य के अन्दर आनन्द आदि चिह्नसमूह को लक्षित करे । आनन्द उद्भव कम्प निद्रा और घूर्णि पाँच (चिह्न) है ।" (मा. वि. ११।३५) ॥ १०७ ॥

प्रश्न—योगी के अन्दर समस्त लक्षणों का उदय होने पर महाव्याप्ति होती है—ऐसा कहा गया । किन्तु जब एक-एक हो लक्षण प्रकट होते हैं तब इसका क्या होता है?—यह शङ्का कर कहते हैं—

जब इस ऊपर कहे गये पाँच आनन्द आदि में (योगी) प्रवेश करता है तो भिन्न-भिन्न चक्रेश्वरत्व को हठात् प्राप्त करता है ॥ -१०८-१०९- ॥

जब पहले कही गई आनन्द आदि (पाँच भूमिकाओं) में योगी प्रवेश करता है (अर्थात्) एक साथ उनमें प्रवेश न हो सकने के कारण एक-एक ही लक्षण का अनुभव करता है तब इसको हठात् = स्वभावतः ही उस-उस निश्चित त्रिकोण आदि चक्र में ईश्वरता प्राप्त हो जाती है अर्थात् उन-उन चक्रों पर विजय प्राप्त होती है ॥ १०८ ॥

प्रश्न—पूर्णता का स्पर्श होने पर ही उस प्रकार का अनुभव होता है तो उस प्रकार पूर्ण मे सबके होने से क्यों निश्चित रूप से ऐसा (एक-एक लक्षण प्रकट) होता है ?—यह शङ्का कर कहते हैं—

जैसे सर्वत्र वर्त्तमान बोध से व्याप्त भी शरीर किसी एक स्थल में कुछ

किञ्चित्कर्तुं प्रभवति चक्षुषा रूपसंविदम् ।
तथैव चक्रे कुत्रापि प्रवेशात्कोऽपि संभवेत् ॥ ११० ॥

यद्वत् सर्वव्यापिना बोधेन 'आक्रान्ता' तदभेदमापन्नापि तनुः क्वचिदेव किञ्चिदेव कर्तुं प्रभवति चक्षुषा रूपस्येव न तु गन्धादेः, अर्थात् संनिकृष्ट एव देशे न तु विप्रकृष्टे संविदम्; एवं कुत्रापि त्रिकोणादौ प्रतिनियते चक्रे प्रवेशात् कोऽपि आनन्दादिरेकैक एवानुभवविशेषः संभवेत् न तु सर्वः—इति युक्तमुक्तं 'तत्तच्चक्रेशत्वं हठाद्व्रजेत्' इति ॥ ११० ॥

ननु किं कस्य चक्रम् ?—इत्याशङ्क्याह—

आनन्दचक्रं वह्न्यश्रि कन्द उद्भव उच्यते ।
कम्पो हृत्तालु निद्रा च घूर्णिः स्यादूर्ध्वकुण्डली ॥ १११ ॥

'वह्न्यश्रि' इति त्रिकोणं योगिनीवक्त्रमित्यर्थः । 'ऊर्ध्वकुण्डली' इति द्वादशान्तः । एषां चाभेदोपचारात् सामानाधिकरण्येन निर्देशः ॥ १११ ॥

नन्वेषामेवं प्रतिनियमे किं प्रमाणम् ?—इत्याशङ्क्याह—

करने में समर्थ होता है—जैसे रूप का ज्ञान आँख से । इसी प्रकार चक्र मे कहीं भी प्रवेश होने से कोई एक ही (लाभ) सम्भव होता है ॥ -१०९-११० ॥

जिस प्रकार सर्वव्यापी बोध के द्वारा आक्रान्त = उसके साथ अभेद को प्राप्त, भी शरीर कहीं ही कुछ ही करने में समर्थ होता है (जैसे) चक्षु के द्वारा रूप का ही (ज्ञान होता है) न कि गन्ध आदि का अर्थात् सन्निकृष्ट ही देश में न कि दूर देश में ज्ञान होता है उसी प्रकार कहीं त्रिकोण आदि निश्चित चक्र में प्रवेश होने से आनन्द आदि कोई एक ही अनुभवविशेष सम्भव होता है न कि सब । इस प्रकार ठीक ही कहा—हठात् उन-उन चक्रेश्वरत्व को प्राप्त होता है ॥ १०९-११० ॥

प्रश्न—किसका कौन सा चक्र है?—यह शङ्का कर कहते हैं—

आनन्द चक्र वह्नि = तीन, अश्र = कोण अर्थात् त्रिकोणात्मक है । कन्द को उद्भव कहते हैं । कम्प हृदय और तालु है तथा निद्रा और घूर्णि ऊर्ध्वकुण्डली मे होता है ॥ १११ ॥

वह्न्यश्रि = त्रिकोण अर्थात् योगिनी का मुख । ऊर्ध्वकुण्डली = द्वादशान्त । इनका अभेद होने से समान विभक्ति (प्रथमा) का प्रयोग कर बतलाया गया है ॥ १११ ॥

प्रश्न—इनकी इस प्रकार की व्यवस्था में क्या प्रमाण है ?—यह शङ्का कर कहते हैं—

एतच्च स्फुटमेवोक्तं श्रीमन्त्रैशिरसे मते ।

तत्र चैतत् षष्ठसप्तमयोरेवानन्तप्रमेयपुरःसरीकारेण बहुना ग्रन्थेन कटाक्षितम्, इति ग्रन्थविस्तरभयात् न संवादितम्—इति तत एवावधार्यम् ॥

तदेवमियतोपायजातेन समासादनीयस्य परस्य तत्त्वस्य नैमित्तिकं व्यपदेशान्तरमप्यस्ति—इत्याह—

एवं प्रदर्शितोच्चारविश्रान्तिहृदयं परम् ॥ ११२ ॥
यत्तदव्यक्तलिङ्गं नृशिवशक्त्यविभागवत् ।

'एवम्' उक्तेन प्रकारेण प्रदर्शिता येयमुच्चारादीनां विश्रान्तिः, तस्या यत् 'परं हृदयं' योगिनीहृदयादिशब्दव्यपदेश्यमहंपरामर्शमयं संवित्स्पन्दात्मकं प्रकृष्टं सतत्त्वं तन्नरशक्तिशिवाविभागवत्त्वादव्यक्तलिङ्गमुच्यते—इत्यर्थः ॥ ११२ ॥

नन्वेवं व्यपदेशस्य किं निमित्तम् ?—इत्याशङ्क्याह—

अत्र विश्वमिदं लीनमत्रान्तःस्थं च गम्यते॥ ११३ ॥
इदं तल्लक्षणं पूर्णशक्तिभैरवसंविदः ।

और यह (बात) त्रिशिरोभैरव मत में स्पष्ट कही गई हैं ॥ ११२- ॥

वहाँ छठें और सातवें को ही अनन्त प्रमेय मानकर प्रचुर ग्रन्थ के द्वारा कटाक्ष किया गया है । ग्रन्थ के विस्तार के भय से (यहाँ उसे) नहीं कहा गया इसलिए वहीं से समझना चाहिए ॥ १११ ॥

तो इस प्रकार इतने उपायों के द्वारा प्राप्य परतत्त्व का दूसरा नाम नैमित्तिक भी है—यह कहते हैं—

इस प्रकार (ऊपर) बतलाए गए उच्चार की विश्रान्ति का जो परम हृदय नर शिव और शक्ति के तादात्म्य वाला है वह अव्यक्त लिङ्ग है ॥ -११२-११३- ॥

एवम् = उक्त प्रकार से, प्रदर्शित जो यह उच्चार आदि की विश्रान्ति, उसका जो परम हृदय = योगिनीहृदय आदि शब्दों के द्वारा व्यवहार्य अहंपरामर्शमय संवित् का स्पन्दरूप प्रकृष्ट तत्त्व, वह नर शक्ति और शिव से अविभक्त होने के कारण अव्यक्त लिङ्ग कहा जाता है ॥ ११२ ॥

प्रश्न—इस प्रकार के व्यवहार का क्या कारण है ?—यह शङ्का कर कहते हैं—

चूँकि उसमें यह विश्व लीन रहता है और इसके अन्दर स्थित हुआ जाना जाता है । (अतः) यही पूर्णशक्तिभैरवसंविद् का वह लक्षण है ॥ -११३-११४- ॥

चशब्दो भिन्नक्रमो हेतौ । यतो 'त्र' अहंपरामर्शमये परस्मिन् हृदये नरशक्तिशिवात्मकम् 'इदं विश्वं लीनम्' अविभागेनावस्थितम्—इति यावत् । न चैतज्जतुकाष्ठवत् अपि तु क्षीरनीरवदित्युक्तम् 'अत्रान्तःस्थं च गम्यते' इति, ऐकात्म्यमापन्नं सत् प्रतीयते इत्यर्थः । इदमेव हि तन्निरूपितस्वरूपायाः परस्याः संविदो लक्षणं यत् तत एव विश्वमुदेति तत्रैव च विलीयते इति । यदुक्तम्—

'लिङ्गशब्देन विद्वांसः सृष्टिसंहारकारणम् ।
लयादागमनाच्चाहुर्भावनां पदमव्ययम् ॥' इति ॥ ११३ ॥

नन्विह त्रिविधं लिङ्गमुक्तं व्यक्तं व्यक्ताव्यक्तमव्यक्तं च—इति, तत्राव्यक्तं परैव संवित्—इत्युक्तम् । अन्यद् द्वयं पुनः किं तस्या एव स्फारो न वा ? इत्याशङ्क्याह—

देहगाध्वसमुन्मेषे समावेशस्तु यः स्फुटः ॥ ११४ ॥
अहन्ताच्छादितोन्मेषिभावेदंभावयुक् स च ।
व्यक्ताव्यक्तमिदं लिङ्गं मन्त्रवीर्यं परापरम् ॥ ११५ ॥
नरशक्तिसमुन्मेषि शिवरूपाद्विभेदितम् ।

'देहगाध्वसमुन्मेषे' देहादावात्माभिमाने सत्यपि यः पुनरपरिम्लानः

च शब्द का क्रम दूसरा है और वह हेतु (अर्थ) मे (प्रयुक्त) है । चूंकि इस = अहंपरामर्श वाले परम हृदय में नर शक्ति शिवात्मक यह विश्व लीन = अपृथक् रूप में स्थित है । यह (= लीनता) लाख और काष्ठ की भाँति (एकदेशेन संयुक्त) नहीं अपितु दूध और पानी की तरह (सर्वावयवेन) है । इसलिए कहा गया कि इसमें स्थित समझा जाता है अर्थात् तादात्म्य को प्राप्त प्रतीत होता है । उसके द्वारा निरूपितस्वरूप वाली परा संविद् का यही लक्षण है कि उसी से (इस) विश्व का विकास होता है और उसी में (यह) विलीन होता है । जैसा कि कहा है—

"विद्वान् लोग पदार्थों के लय और आगमन के कारण सृष्टि और संहार के कारणभूत अव्यय पद को लिङ्ग शब्द से व्यवहृत करते हैं" ॥ ११३ ॥

प्रश्न—लिङ्ग तीन प्रकार का कहा गया है—व्यक्त, व्यक्ताव्यक्त और अव्यक्त । उनमें अव्यक्त परासंविद् ही है—ऐसा कहा गया है । शेष दो क्या उसी के स्फार है या नहीं ?—यह शङ्का कर कहते हैं—

देह में वर्त्तमान अध्वा का उन्मेष होने पर अहन्ता से आच्छादित (बाह्य) उल्लास वाले भावों का इदंभाव से युक्त जो स्पष्ट समावेश है वह व्यक्ताव्यक्त लिङ्ग होता है । यह परापर (होने के कारण) मन्त्रवीर्यात्मक है । नर और शक्ति के द्वारा उन्मेषणशील है । अतः शिवरूप से भिन्न है ॥ -११४-११६- ॥

देहस्थ अध्वा का उन्मेष होने पर = देह आदि में आत्माभिमान होने पर, भी

परतत्त्वान्तःसमावेशः तदिदं व्यक्ताव्यक्तं लिङ्गम्—इति संबन्धः । ननु यद्येवं तदव्यक्तादस्य को विशेष ? इत्याशङ्क्याह—अहन्तेत्यादि । अहन्ताच्छादित 'उन्मेषिषु' बहिरुल्लसत्सु भावेषु योऽसौ 'इदंभाव' इदन्ता तेन युज्यते, इदमहमितिप्रतीतिरूप इत्यर्थः । अत एवास्य विद्यादशावदहन्तेदन्तयोः सामानाधिकरण्यात् व्यक्ताव्यक्तत्वम्, अत एव शुद्धाहंपरामर्शरूपत्वाभावात् शिवरूपाद्विभेदितं सत् नरशक्तिभ्यां समुन्मेषणशीलं, नरशक्तिरूपमिति यावत् । एवमपि परापरं शक्तिप्रधानमित्यर्थः । नरप्रधानं हि व्यक्तं लिङ्गं भविष्यतीत्याशयः । अत एव मन्त्रवीर्यम् । एतद्दशामधिशयानो हि मन्त्रः स्वोचितफलदानसामर्थ्यभाग्भवतीति भावः । यदुक्तम्—

> न पुंसि न परे तत्त्वे शक्तौ मन्त्रं नियोजयेत् ।
> पुंस्तत्त्वे जडतामेति परे तत्त्वे तु निष्फलः ॥
> शक्तौ मन्त्रो नियुक्तस्तु सर्वकर्मफलप्रदः । इति ॥ ११५ ॥

न केवलं व्यक्ताव्यक्तमेव लिङ्गमस्याः स्फारो यावत् व्यक्तमपि—इत्याह—

यन्न्यक्कृतशिवाहन्तासमावेशं विभेदवत् ॥ ११६ ॥

जो स्वच्छ परतत्त्वान्तःप्रवेश है वही यह व्यक्ताव्यक्त लिङ्ग है—ऐसा सम्बन्ध (समझना चाहिए) ।

प्रश्न—यदि ऐसा है तो अव्यक्त से इसका क्या अन्तर है?—यह शङ्का कर कहते हैं—अहन्ता इत्यादि । अहन्ता से आच्छादित उन्मेष वाले = बाहर उल्लसित होने वाले पदार्थों के विषय में जो इदंभाव = इदन्ता, उससे युक्त होने वाला अर्थात् 'इदम् अहम्' ऐसी प्रतीति वाला । इसीलिए शुद्धविद्यादशा के समान अहन्ता और इदन्ता का सामानाधिकरण्य होने से यह व्यक्ताव्यक्त है । इसीलिये शुद्ध अहंपरामर्शरूप न होने से शिवरूपता से भिन्न होते हुए जड और शक्ति के कारण उन्मेषशील है अर्थात् जडशक्तिरूप है । ऐसा होने पर भी परापर अर्थात् शक्ति की प्रधानता वाला है । तात्पर्य यह है कि जडप्रधान व्यक्त लिङ्ग हो जायगा । इसीलिए (वह) मन्त्रवीर्यात्मक है । स्पष्टार्थ यह है कि इस दशा में अधिष्ठित मन्त्र अपने उचित फल को देने के सामर्थ्य वाला हो जाता है । जैसा कि कहा गया है—

'मन्त्र को न पुरुष (= जडजगत्) और न परतत्त्व में अपि तु शक्ति में नियोजित करना चाहिए । क्योंकि पुरुष तत्त्व में (लगाने पर मन्त्र) जडता को प्राप्त हो जाता है और परतत्त्व में (लगाने पर) निष्फल हो जाता है । शक्ति में लगाया गया मन्त्र सब कर्मों के फल को देने वाला होता है' ॥ ११५ ॥

केवल व्यक्ताव्यक्त ही लिङ्ग इस (परासंविद्) का स्फार नहीं है बल्कि व्यक्त भी है—यह कहते हैं—

जो, शिवअहन्तासमावेश को गौण कर देने वाला भेद वाला

विशेषस्पन्दरूपं तद् व्यक्तं लिङ्गं चिदात्मकम्

यन्नाम गुणीकृतपराद्वयरूपाहन्तापरामर्शम्, अत एव 'विभेदवत्' बहीरूपतया स्फुरत् विशेषस्पन्दरूपम्—इति विमर्शनं तद् व्यक्तं लिङ्गमुच्यत इत्यर्थः । एवमपि चिदात्मकम्, अन्यथा हि एतन्न किञ्चिद्भवेदिति भावः ॥ ११६ ॥

न केवलमेषां स्वरूपत एव भेदो यावत् फलतोऽपि—इत्याह—

व्यक्तात्सिद्धिप्रसवो व्यक्ताव्यक्ताद् द्वयं विमोक्षश्च ।
अव्यक्ताद् बलमाद्यं परस्य नानुत्तरे त्वियं चर्चा ॥ ११७ ॥

यदुक्तम्—

'प्रतिमापूजनाद्भुक्तिर्मुक्तिर्लिङ्गार्चनात् सदा ।
मुखलिङ्गार्चनात्पुंसां भुक्तिमुक्ती प्रसिद्ध्यतः ॥' इति ।

'बलमाद्यं परस्य' इति अव्यक्तं व्यक्ताव्यक्तस्य तद् व्यक्तस्य । ननु यद्येवं तदेतद्भित्तिभूते सर्वसर्वात्मकेऽनुत्तरे धाम्नि पुनः का वार्ता ?—इत्याशङ्क्याह—'नानुत्तरे त्वियं चर्चा' इति । तत्र हि पारिपूर्ण्येन नैराकाङ्क्ष्योत्पादात् को नाम

तथा विशेष स्पन्द रूप है वह व्यक्त लिङ्ग है तथा चिदात्मक है ॥ -११६-११७- ॥

जो पराद्वयरूप अहन्तापरामर्श को गौण बना देने वाला इसलिए भेदवाला = बाह्यरूप में स्फुरित होता हुआ विशेष स्पन्दरूप विमर्श है वह अव्यक्त लिङ्ग कहा जाता है । ऐसा होने पर भी (वह) चिदात्मक है अन्यथा यह कुछ भी नहीं होगा ॥ ११६ ॥

इनका केवल स्वरूपगत ही भेद नहीं है अपितु फलगत भी है—वही कहते हैं—

व्यक्त से सिद्धि और (उसका) प्रसव होता है । व्यक्ताव्यक्त से दोनों (= सिद्धि और प्रसव) तथा मोक्ष (का लाभ) होता है । अव्यक्त से दूसरे को प्रथम बल (मिलता है) और अनुत्तर के विषय में यह चर्चा ही नहीं (होती) ॥ ११७ ॥

जैसा कि कहा गया है—

पुरुषों को प्रतिमा की पूजा से सदा भोग, (अव्यक्त) लिङ्ग की पूजा से मोक्ष तथा मुख (= व्यक्ताव्यक्त) लिङ्ग की पूजा से भोग और मोक्ष दोनो मिलता है ।

दूसरे का प्रथम बल है (का स्पष्टार्थ है कि) अव्यक्तव्यक्ता व्यक्त का और वह (= व्यक्ताव्यक्त) अव्यक्त का (बल है) प्रश्न—यदि ऐसा है तो इनके आधारभूत सर्वसर्वात्मक अनुत्तर धाम के विषय में क्या बात है ?—यह शङ्का कर कहते हैं—

सिद्ध्यादिप्रविभागः—इति भावः ॥ ११७ ॥

नन्वाद्यमेव परस्य विश्रान्तिस्थानं न तु विपर्ययः—इत्यत्र किं निबन्धनम् ?—इत्याशङ्क्याह—

आत्माख्यं यद् व्यक्तं नरलिङ्गं तत्र विश्वमर्पयतः ।
व्यक्ताव्यक्तं तस्माद् गलिते तस्मिंस्तदव्यक्तम् ॥ ११८ ॥

यन्नाम समनन्तरोक्तस्वरूपं नरप्रधानत्वात् आत्माख्यमिदंविमर्शास्पदं व्यक्तं लिङ्गं तत्र आत्माख्ये लिङ्गे 'यदिदं तदहमेव' इत्येवंरूपतया विश्वं विलापयतो योगिनोऽहन्तेदन्तयोः सामानाधिकरण्येन स्फुरणात् व्यक्ताव्यक्तं लिङ्गं, तस्माव्यक्ताव्यक्तादपि लिङ्गात् तस्मिन् विश्वस्मिन् 'गलिते' अहंपरामर्शशेषतामापन्ने तदव्यक्तं लिङ्गं भवेदित्यर्थः ॥ ११८ ॥

नन्वनेन किमुक्तम् ?—इत्याशङ्क्याह—

तेनात्मलिङ्गमेतत् परमे शिवशक्त्यणुस्वभावमये ।
अव्यक्ते विश्राम्यति नानुत्तरधामगा त्वियं चर्चा ॥ ११९ ॥

अनुत्तर के बारे में यह चर्चा नहीं है । क्योकिं वहाँ पूर्णता होने से निराकाङ्क्षा की उत्पत्ति होने के कारण सिद्धि आदि का विभाग कैसा ?—यह तात्पर्य है ॥११७ ॥

प्रश्न—पहला ही पर (= बाद वाले) का विश्रान्ति स्थान है अन्य नहीं इसमें क्या कारण है?—यह शङ्का कर कहते हैं—

आत्मा नामक जो अव्यक्त (तत्त्व) हैं उसमें नर लिङ्ग वाले विश्व को विलीन करने वाले (योगी) के (अन्दर) व्यक्त और अव्यक्त (समान रूप से स्फुरित होते हैं) फिर उस (व्यक्ताव्यक्त) के कारण वह (विश्व) जिसमें विलीन हो जाता है वह अव्यक्त है ॥ ११८ ॥

जो अभी पहले कहे गए स्वरूप वाला, जड़प्रधान होने से आत्मा नामक इदंविमर्श का आधारभूत व्यक्त लिङ्ग है उस आत्मा नामक लिङ्ग में 'जो यह है वही मैं हूँ' इस प्रकार विश्व का विलयन करने वाले योगी के मन में अहन्ता और इदन्ता का समान रूप से स्फुरण होने के कारण वह व्यक्ताव्यक्त लिङ्ग है । पुनः उस व्यक्ताव्यक्त लिङ्ग से उस विश्व का विगलन होने पर जब अहंपरामर्श शेष रह जाता है तो यह अव्यक्त लिङ्ग हो जाता है ॥ ११८ ॥

प्रश्न—इससे क्या कहा गया ?—यह शङ्का कर कहते हैं—

इसलिए यह आत्मलिङ्ग परम शिवशक्तिअणुस्वभाव वाले अव्यक्त में विश्राम करता है । किन्तु यह चर्चा अनुत्तरधाम से सम्बद्ध ही नहीं है ॥ ११९ ॥

इत्थम् 'एतत्' नरप्रधानं व्यक्तमात्मलिङ्गम् अर्थात् नरशक्तिप्रधाने व्यक्ताव्यक्ते लिङ्गे विश्रान्तिमासाद्य, शिवप्राधान्येऽपि गर्भीकृतावान्तररूपत्वात् नरशक्तिशिवात्मनि, अत एव 'परमे' लिङ्गान्तरवैलक्षण्यादुत्कर्षभाजि अव्यक्ते लिङ्गे 'विश्राम्यति' तत्तादात्म्येन प्रस्फुरतीत्यर्थः। ननु यथा व्यक्तादिलिङ्गद्वयमव्यक्ते विश्राम्यति तथैव तदप्यनुत्तरे धाम्नि—इति कस्मान्नोक्तम् ?—इत्याशङ्क्याह—'नानुत्तरधामगा त्वियं चर्चा'—इति । तद्धि अनुत्तरमेव धामाव्यक्तादिलिङ्गत्रयात्मना प्रस्फुरति—इति सदैव तत्र तद्विश्रान्तमन्यथा ह्यस्य भवनमेव न स्यात् ॥ ११९ ॥

अत एवाह—

एकस्य स्पन्दनस्यैषा त्रैधं भेदव्यवस्थितिः ।

इह खलु 'एकस्य' प्रधानस्यानुत्तरात्मनो योगिनीहृदयादिशब्दव्यपदेश्यस्य 'स्पन्दनस्यैषा' व्यक्तादिलिङ्गात्मिका त्रिविधेन भेदेन 'व्यवस्थितिः' परिस्फुरणं न तु तदतिरिक्तमेतत् किञ्चिदित्यर्थः ॥

अतश्च व्यक्तादिलिङ्गपरिहारेणात्रैव विश्रान्तिः कार्या—इत्याह—

अत्र लिङ्गे सदा तिष्ठेत् पूजाविश्रान्तितत्परः ॥ १२० ॥

इस प्रकार यह = जडप्रधान (अत एव) व्यक्त आत्मलिङ्ग अर्थात् नर शक्ति की प्रधानता होने पर भी भीतर अन्यरूपों को भी धारण करने के कारण नर शक्ति शिव स्वरूप है इसीलिए परम मे = दूसरे लिङ्ग से विलक्षण होने के कारण उत्कर्ष वाले अव्यक्त लिङ्ग में, विश्राम करता है = उसके साथ एकाकार होकर स्फुरित होता है । प्रश्न—जिस प्रकार व्यक्त आदि दो लिङ्ग अव्यक्त में विश्राम करते हैं उसी प्रकार वह (= अव्यक्त) भी अनुत्तर धाम में (विश्राम करता है) ऐसा क्यों नहीं कहा गया ?—यह शङ्का कर कहते हैं—यह चर्चा अनुत्तर धाम के विषय में नहीं हैं । क्योंकि वह अनुत्तर ही धाम अव्यक्त आदि तीन लिङ्गों के रूप में स्फुरित होता है—अतः वह (= लिङ्गत्रय) उसमें सदा विश्रान्ति वाला है । अन्यथा इसकी सत्ता ही न होती ॥ ११९ ॥

इसीलिए कहते हैं—

एक ही स्पन्दन की यह तीन प्रकार की व्यवस्था है ॥ १२०- ॥

एक ही प्रधान अनुत्तर आत्मा, जो कि योगिनीहृदय आदि शब्दों से व्यवहार्य है, स्पन्दन की यह व्यक्त आदि लिङ्ग रूप तीन प्रकार के भेद से व्यवस्थिति = परिस्फुरण है न कि उससे अतिरिक्त यह कुछ है ॥ १२० ॥

इसलिए व्यक्त आदि लिङ्ग को छोड़कर यहीं विश्राम करना चाहिए—कहा गया है—

इस लिङ्ग में पूजा और विश्रान्ति से युक्त हो कर सदा रहना

यदुक्तम्—

'मृच्छैलधातुरत्नादिभवं लिङ्गं न पूजयेत् ।
यजेदाध्यात्मिकं लिङ्गं यत्र लीनं चराचरम् ॥
बर्हिर्लिङ्गस्य लिङ्गत्वमनेनाधिष्ठितं यतः ।' (मा०वि.१८।४२)

इति ॥ १२० ॥

नन्वत्र विश्रान्त्या किं स्यात् ?—इत्याशङ्क्याह—

योगिनीहृदयं लिङ्गमिदमानन्दसुन्दरम् ।
बीजयोनिसमापत्त्या सूते कामपि संविदम् ॥ १२१ ॥

इदं स्पन्दनात्म योगिनीहृदयाभिधेयमानन्दमयं लिङ्गं बीजयोन्यात्मक-शिवशक्त्यैकात्म्येन 'कामपि संविदं सूते' परसंविदावेशमाविष्कुर्यादित्यर्थः। अथ च चर्याक्रमेणाप्येवं परसंविदनुप्रवेशो भवेदित्यपि कटाक्षितम् ।

यदुक्तम्—

'त्रिकोणमण्डलं पूज्यं शक्तित्रयसमन्वितम् ।
तन्मध्ये चेतनं चिन्त्यं लिङ्गं वै पश्चिमामुखम् ॥' इति यथा
'आनन्दस्यन्दि यद् गीतं सर्वप्रसवकारणम् ।
उपस्थाख्येयमेतत्तु सौषुम्नं रूपमुच्यते ॥' इति ॥१२१ ॥

चाहिये ॥ -१२० ॥

जैसा कि कहते हैं—

मिट्टी, पत्थर, धातु, रत्न आदि से बने हुए लिङ्ग की पूजा नहीं करनी चाहिए। बल्कि उस आध्यात्मिक लिङ्ग की अर्चा करनी चाहिए जिसमें समस्त चर एवं अचर लीन हैं । क्योंकि बाहरी लिङ्ग की लिङ्गता इसी से अधिष्ठित हैं । (मा० वि० १८।४२) ॥ १२० ॥

प्रश्न—यहाँ विश्रान्ति करने से क्या होगा ?—यह शङ्का कर कहते हैं—

यह योगिनीहृदय लिङ्ग आनन्द से सुन्दर हैं । यह बीज और योनि के तादात्म्य के द्वारा अनिर्वचनीय संवित् को उत्पन्न करता है ॥ १२१ ॥

यह स्पन्दन रूप योगिनीहृदय नामक आनन्दमय लिङ्ग बीजयोनिस्वरूप शिवशक्ति की एकात्मता के द्वारा किसी भी (= अद्भुत) संवित् को उत्पन्न करता है अर्थात् पर संवित् के आवेश का आविष्कार करता है । चर्याक्रम के द्वारा भी इस प्रकार का परसंवित् में प्रवेश होता है—यह व्यंग्य हैं । जैसा कि कहा गया है—

"तीन शक्ति से युक्त त्रिकोणमण्डल पूजनीय है । उसके मध्य में पश्चिमाभिमुख चेतन लिङ्ग चिन्तनीय (= चिन्तन के द्वारा शुभ प्रदान करता) हैं" । तथा—

नन्वत्रैव विश्रान्त्या कथमेवं स्यात्? इत्याशङ्क्याह—

अत्र प्रयासविरहात् सर्वोऽसौ देवतागणः ।
आनन्दपूर्णे धाम्न्यास्ते नित्योदितचिदात्मकः ॥ १२२ ॥

यदुक्तम्—

'त्रिकोणे देवताः सर्वा ब्रह्मविष्णुमहेश्वराः ।' इति ॥ १२२ ॥

न केवलमत्र सर्व एव देवतागण आस्ते यावत् पारमेश्वरी शक्तिरपि—इत्याह—

अत्र भैरवनाथस्य ससङ्कोचविकासिका ।
भासते दुर्घटा शक्तिरसङ्कोचविकासिनः ॥ १२३ ॥

अत्रानन्दपूर्णे धाम्नि 'असङ्कोचविकासिनो' निस्तरङ्गजलधिप्रख्यस्य पूर्णस्य प्रकाशस्य 'ससङ्कोचविकासिका' सदैव सृष्टिसंहारमयी, अत एव दुर्घटकारिणी स्वातन्त्र्याख्या शक्तिः 'भासते स्वात्मैकात्म्येन प्रथते यन्माहात्म्यादियान् विश्वस्फारः सदैव सृष्टिसंहारदशाधिशायितामेतीत्यर्थः ॥ १२३ ॥

तदाह—

"जिसे आनन्द का जनक कहा गया है और जो सबकी उत्पत्ति का कारण है यह उपस्थ नामक (इन्द्रिय) सुषुम्ना का रूप कहा जाता है" ॥ १२१ ॥

प्रश्न—इसी में विश्रान्ति के द्वारा ऐसा कैसे होता है?—यह शङ्का कर कहते हैं—

प्रयास न होने से सभी देवगण इस आनन्दपूर्ण धाम में नित्य उदित चैतन्य युक्त होकर रहते हैं ॥ १२२ ॥

जैसा कि कहा है—

"त्रिकोण में ब्रह्मा विष्णु और रुद्र सभी देवता रहते हैं" ॥ १२२ ॥

यहाँ केवल सब देवता ही नहीं अपितु परमेश्वर की शक्ति भी रहती है—यह कहते हैं—

यहाँ पर सङ्कोचविकासरहिंत भैरवनाथ की सङ्कोचविकास वाली दुर्घट शक्ति (भी) रहती हैं ॥ १२३ ॥

इस आनन्दपूर्ण धाम में सङ्कोचविकासरहित निस्तरङ्ग जलधि के समान शोभावाले प्रकाश की सङ्कोचविकासयुक्त = सदा सृष्टिसंहार वाली, इसलिए दुर्घटकारिणी स्वातन्त्र्य नामक शक्ति भासित होती हैं = अपनी आत्मा के साथ एक होकर विकसित होती हैं जिसकी महिमा से इतना बड़ा विश्व का विस्तार सदा सृष्टि और संहार की दशा में वर्त्तमान रहता है ॥ १२३ ॥

एतल्लिङ्गसमापत्तिविसर्गानन्दधारया ।
सिक्तं तदेव सद्विश्वं शश्वन्नवनवायते॥ १२४ ॥

एतस्मिन्ननुत्तरधामात्मनि समनन्तरोक्ते 'लिङ्गे समापत्तिः' ऐकात्म्यं यस्यैवंविधो यो 'विसर्गः' स्वातन्त्र्याख्या कौलिकी शक्तिस्तस्य या 'आनन्दधारा'—

'विसर्गता च सैवास्या यदानन्दोदयक्रमात् ।
स्पष्टीभूतक्रियाशक्तिपर्यन्ता प्रोच्छलत्स्थितिः ॥' (तं० ३।१४४)

इत्याद्युक्त्यानन्दोदयक्रमेणोच्छलत्ता तया 'सिक्तं' बहिरुच्छूनतामापादितं सत् तत्कालमेव शश्वद्विश्वं 'नवनवायते' सदैव सृष्टिसंहारपात्रतामासादयतीत्यर्थः । अथ च चर्याक्रमेण एतयोर्वज्रपद्मादिशब्दव्यपदेश्यरूपयोर्लिङ्गयोः 'समापत्त्या' संभोगेन विसर्गरूपा येयमानन्दधारा तया 'सिक्तं' दत्तबीजं सत् स्त्रीपुमाद्यात्म विश्वमनवरत-मुत्पद्यत इत्यर्थः ॥ १२४ ॥

ननु भेदप्राणविकल्पसंस्काराधायित्वाद् बुद्धिध्यानादीनां स्पष्टमेवाणवो- पायत्वम् —इति युक्तमत्र तदभिधानं, परतत्त्वान्तःप्रवेशलक्षणः पुनरयमुपायो निर्विकल्प-स्वरूपत्वान्न तथा—इति कथमस्यात्राभिधानम्? इत्याशङ्क्याह—

वही कहते हैं—

इस लिङ्ग के साथ एकात्मता वाले विसर्ग के आनन्द की धारा से सिक्त वही वर्त्तमान विश्व निरन्तर नवीन होता जाता है ॥ १२४ ॥

इस अनुत्तर धाम वाले पहले कहे गए लिङ्ग में समापत्ति = एकात्मता है जिसकी उस प्रकार का जो विसर्ग = स्वातन्त्र्य नामक कौलिकी शक्ति, उसकी जो आनन्द धारा

इसकी विसर्गता यही है कि यह आनन्द के उदय के क्रम से स्पष्ट हुई क्रियाशक्तिपर्यन्त उच्छलत्ता की स्थिति वाली है ॥ (तं. आ. ३।१४४)

इत्यादि उक्ति के द्वारा आनन्द के उदयक्रम से उच्छलत्ता, उसके द्वारा सिक्त = बाह्य उच्छूनता को प्राप्त होकर विश्व तत्काल ही नवीन होता जाता है = सदा सृष्टि संहार का पात्र होता है । उधर चर्याक्रम से इन दोनो वज्र एवं पद्म आदि शब्द से व्यवहार्य लिङ्ग और योनि की समापत्ति = संभोग से विसर्गरूप जो यह आनन्दधारा उसके द्वारा सिक्त = बीज का आधान, होने पर स्त्रीपुंरुषरूप विश्व निरन्तर उत्पन्न होता रहता है ॥ १२४ ॥

प्रश्न—भेदप्राण विकल्प और संस्कार का आधायक होने से बुद्धि ध्यान आदि स्पष्टतया आणवोपाय हैं इसलिए यहाँ उस (= उपाय) का कथन तो ठीक है किन्तु परतत्त्व के अन्दर प्रवेश वाला यह उपाय निर्विकल्पकस्वरूप होने के कारण वैसा नहीं हैं इसलिए उस (= उपाय) का यहाँ कथन कैसे हैं?—यह शङ्का कर कहते हैं—

अनुत्तरेऽभ्युपायोऽत्र ताद्रूप्यादेव वर्णितः ।
ज्वलितेष्वपि दीपेषु घर्मांशुः किं न भासते॥ १२५ ॥

'अत्र' आणवोपायप्रकाशनपरेऽप्याह्निके साक्षादनुत्तरनिमित्तं परतत्त्वान्तः-प्रवेशात्मायम् 'अभ्युपायस्ताद्रूप्यात्' अनुत्तराभ्युपायरूपत्वादेवोक्तः । अत्र दृष्टान्तः, यथा तत्तदर्थप्रकाशनाय परिमितप्रकाशेषु दीपादिषु सत्स्वपि महाप्रकाशस्य घर्मांशोरवस्थाने न कश्चिद्दोषः, एवमत्रापीति तात्पर्यार्थः ॥ १२५ ॥

नन्वेवं त्रयाणामप्याणवादीनामुपायानां साङ्कर्येणैवोपदेशः कार्यः—इति किं पृथक् पृथगाह्निकपरिकल्पनेन ?—इत्याशङ्क्याह—

अर्थेषु तद्भोगविधौ तदुत्थे
दुःखे सुखे वा गलिताभिशङ्कम् ।
अनाविशन्तोऽपि निमग्नचित्ता
जानन्ति वृत्तिक्षयसौख्यमन्तः ॥ १२६ ॥

'अर्थेषु' नीलादिषु 'तद्भोगविधौ' नीलादिबुद्धौ 'तदुत्थे' नीलादिकृते दुःखे सुखे वेत्येवमर्थक्रियापर्यन्तं प्राप्तप्रतिष्ठाने बाह्येऽर्थजाते 'निमग्नचित्ताः' तत्तद्धाना-दानादि कुर्वाणा अपि तत्र 'गलिताभिशङ्कमनाविशन्तः' स्वप्नार्थवदसदेवेदमिति

यहाँ अनुत्तर के विषय में तद्रूपता होने के कारण ही उपाय का वर्णन किया गया है । दीपों के जलने पर भी क्या सूर्य प्रकाशित नहीं होता ॥ १२५ ॥

आणवोपायप्रकाशनपरक इस आह्निक में साक्षात् अनुत्तरनिमित्तक परतत्त्वान्तः—प्रवेशरूप यह उपाय चिद्रूपता = अनुत्तर अवस्था, को प्राप्त करने का उपाय होने के कारण ही कहा गया । इस विषय में दृष्टान्त हैं—जिस प्रकार भिन्न-भिन्न पदार्थों को प्रकाशित करने के लिए परिमित प्रकाश वाले दीप के रहने पर भी महाप्रकाश सूर्य के रहने में कोई दोष नहीं हैं उसी प्रकार यहाँ भी हैं ॥ १२५॥

प्रश्न—इस प्रकार आणव आदि तीनों उपायों का सम्मिलित ही उपदेश करना चाहिए पृथक्-पृथक् आह्निक की कल्पना से क्या (लाभ)?—यह शङ्का कर कहते हैं—

पदार्थ, उनकी भोगविधि अथवा उनसे उत्पन्न सुख और दुःख में निमग्नचित्त वाले (योगी) शङ्कारहित होकर उसमें आविष्ट न होते हुए भी भीतर-भीतर वृत्तिक्षय के सुख का अनुभव करते हैं ॥ १२६ ॥

अर्थ के विषय में = घट आदि के विषय में, उनकी भोगविधि में = घट आदि के ज्ञान में, उससे उत्पन्न = घट आदि के द्वारा किए गए दुःख अथवा सुख के विषय में इस प्रकार अर्थक्रियापर्यन्त प्रतिष्ठा को प्राप्त बाह्य पदार्थसमूह में

निःसंदेहं तद्वैवश्यमभजमाना योगिनो वृत्तिक्षयसौख्यमन्तर्जानन्ति—

'अन्तर्लक्ष्यो बहिर्दृष्टिः परमं पदमश्नुते ।'

इत्याद्युक्तयुक्त्या बहिस्तत्तदव्यवहारपरत्वेऽपि स्वात्ममात्रविश्रान्त्या परं चमत्कारातिशयमनुभवन्तीत्यर्थः । अतश्च भेदमयत्वेऽप्यभेदरूपत्वमस्य इत्यामुखे भेदस्यावस्थानादिहैतदभिधानम्—इति न कश्चिद्दोषः । एतदेव हि योगिनः परं विस्फूर्जितं यद् भेदमयत्वेऽप्यभेदरूपतयावस्थानमिति ॥ १२६ ॥

तदाह—

सत्येवात्मनि चित्स्वभावमहसि स्वान्ते तथोपक्रियां
तस्मै कुर्वति तत्प्रचारविवशे सत्यक्षवर्गेऽपि च ।
सत्स्वर्थेषु सुखादिषु स्फुटतरं यद् भेदवन्ध्योदयं
योगी तिष्ठति पूर्णरश्मिविभवस्तत्तत्त्वमाचीयताम् ॥ १२७ ॥

इह खलु चित्स्वभावत्वादर्कादिप्रकाशविलक्षणे परप्रमातृरूपे पूर्णे आत्मन्येव सति स्वात्मसाक्षात्कारावसरे चिदेकरूपत्वादविभागतया तथा 'तस्मै' निरूपित-

---

निमग्नचित्त वाले = उन-उन का त्याग और ग्रहण करने वाले, भी उनके विषय में निःशङ्क होकर प्रवेश न करने वाले = स्वाप्न पदार्थ के समान यह असत् है—ऐसा निःसन्देह उसकी विवशता को अस्वीकार करने वाले, योगी अन्दर-अन्दर वृत्तिक्षय के सुख को जानते हैं ।

'(जिसका) लक्ष्य अन्दर और दृष्टि बाहर की ओर हैं (वह शाम्भवी मुद्रा वाला योगी) परम पद का अनुभव करता है ।'

इत्यादि उक्त युक्ति के द्वारा बाहर भिन्न-भिन्न व्यवहार में लगे होने पर भी अपनी आत्मा में विश्रान्ति के द्वारा परम चमत्कारातिशय का अनुभव करते हैं । इसलिए यह भेदमय होते हुए भी अभेदमय है इस कारण प्रारम्भ में भेद की स्थिति होने से यहाँ इसका कथन किया गया । इसलिए कोई दोष नहीं हैं । योगी का यही सबसे बड़ा वर्चस्व है कि (वह) भेदमय होते हुए भी अभेद रूप में स्थित रहता है ॥ १२६ ॥

वही कहते हैं—

चित्स्वभावरूप तेज वाले आत्मतत्त्व के रहने पर, अपने अन्तःकरण में उसके (= चित्स्वभाव के आत्मतत्त्व के) लिये उपकार करने पर, और उसके प्रचार में विवश इन्द्रियवर्ग के रहने पर तथा सुख आदि पदार्थों के रहने पर भी जो स्पष्टतर भेदरहित है और जिसमें योगी पूर्णरश्मि विभव वाला होकर स्थित रहता है उस तत्त्व का चयन करना चाहिए ॥ १२७ ॥

चित्स्वभाव वाले तथा सूर्य आदि से विलक्षण प्रकाश वाले परप्रमातारूप पूर्ण

स्वरूपायात्मने सङ्कुचत्तावभासनेन नियतज्ञत्वकर्तृत्वलक्षणाम् 'उपक्रियां' कुर्वति 'स्वान्ते'ऽन्तःकरणवर्गे सति बुद्धिप्रमातृदशायामासूत्रितविभागतया तथा 'तस्य' स्वान्तस्य योऽसौ 'प्रचार' इत्थमहमिदं वेद्मीत्याद्यात्म प्रकृष्टं चरणं 'तद्विवशे' तदायत्ते इत्यर्थः । यन्नाम न हि बुद्ध्यादावुपारूढं तत्र बाह्येन्द्रियाणि किं विदध्युरित्यभिप्रायः । एवंरूपे चक्षुरादीन्द्रियकलापे सति देहादिप्रमातृदशायां विभक्ततया विद्यमानेषु सुखादिषु इष्टानिष्टरूपेष्वर्थेषु—इत्येवमभेदभेदाभेदभेदात्मनि कक्ष्यात्रयेऽपि स्फुटतरं कृत्वा 'भेदवन्ध्योदयं' निर्विशेषं यद्योगी तिष्ठति तदेव नाम भैरवमुद्रानुप्रवेशात्म 'तत्त्वं' पारमार्थिकं रूपमाचीयतां, ग्राह्यग्राहकाद्यात्मकबाह्यक्षोभमयत्वेऽपि तदासङ्गमपहाय स्वात्ममात्रनिष्ठ एवावतिष्ठेदित्यर्थः । अत एव बाह्याकाङ्क्षासंक्षयात् सदैव प्रक्षीणनिखिलेन्द्रियवृत्तितया 'पूर्णरश्मिविभव' इत्युक्तम् । यद्गीतम्—

'बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमव्ययमश्नुते ॥' (भ०गी० ५।२१)

इति ॥ १२७ ॥

एवमेतदुपसंहृत्य तदानन्तर्येणोद्दिष्टस्य करणस्य प्रविवेचनं प्रतिजानीते—

आत्मा में ही अपनी आत्मा के साक्षात्कार का अवसर होने पर चिदेकरूप होने से अविभक्त तथा उस = निरूपितस्वरूप वाले आत्मा के लिए संकुचितता के अवभासन के द्वारा जब अपना अन्तःकरणवर्ग नियत ज्ञान एवं कर्तृत्व लक्षण वाली उपक्रिया को करने लगता है तब बुद्धिप्रमाता की दशा में विभाग होने के कारण तथा उस = स्वान्त का जो यह प्रचार = मैं इसको जानता हूँ—इस प्रकार का प्रकृष्ट आचरण, उसके विवश = उसके अधीन । अभिप्राय यह है कि जो बुद्धि में उपारूढ़ नहीं होगा उसके विषय में बाह्य इन्द्रियाँ क्या कर सकेंगी? चक्षु आदि इन्द्रियगण के ऐसा होने पर इष्ट अनिष्ट रूप सुख आदि जब देह आदि प्रमाता की दशा में विभक्त हो जाते हैं तब उस प्रकार अभेद, भेदाभेद और भेद रूप तीन श्रेणियों में स्पष्ट कर जो भेदबन्ध्योदय = निर्विशेष, होकर योगी स्थित रहता है वही भैरवमुद्रा में प्रवेशरूप तत्त्व हैं = पारमार्थिक रूप हैं । (उसका) चयन करना चाहिए = ग्राह्य ग्राहकदि रूप बाह्य क्षोभ से युक्त होने पर भी उसकी आसक्ति को छोड़कर केवल अपने स्वरूप में ही रहना चाहिए । इसलिए बाह्य आकांक्षा का क्षय हो जाने से सदैव समस्त इन्द्रियवृत्तियों की क्षीणता वाला होने से (योगी को) पूर्ण—रश्मिविभव कहा गया है । जैसा कि गीता में (उक्त) हैं—

बाह्य स्पर्शों में अनासक्त आत्मा वाला वह (योगी) अव्यय सुख का अनुभव करता है ॥ (गी० ५।२१) ॥ १२७ ॥

इस प्रकार इस (= आणवोपाय) का उपसंहार कर उसके बाद कथित कारण का विवेचन करने की प्रतिज्ञा करते हैं—

इत्युच्चारविधिः प्रोक्तः करणं प्रविविच्यते ।

उच्चार एव हि प्राणचिदात्मना प्रथमं द्विविधः । तत्र चिदात्मापि चित्प्राधान्येन विमर्शप्राधान्येन च भवन् द्विधा भवति—इति स एव त्रिविधः । तत् परतत्त्वान्तःप्रवेशात्मनोऽप्युपायस्य तद्भेदत्वादुच्चारात्मकत्वमेव—इति युक्तमुपसंहृतम्—'उच्चारविधिः प्रोक्तः' इति ॥

तच्च करणं न स्वोपज्ञमेवास्माभिः क्रियते—इत्याह—

तच्चेत्थं त्रिशिरःशास्त्रे परमेशेन भाषितम् ॥ १२८ ॥
ग्राह्यग्राहकचिद्व्याप्तित्यागाक्षेपनिवेशनैः ।
करणं सप्तधा प्राहुरभ्यासं बोधपूर्वकम् ॥ १२९ ॥
तद्व्याप्तिपूर्वमाक्षेपे करणं स्वप्रतिष्ठता ।

'चित्' संवित्तिः 'निवेशनं' संनिवेशः । इह ग्राह्यादिभिः सप्तभिः प्रकारैर्भिन्नं करणं नाम बोधपूर्वकमभ्यासं प्राहुः, बोध्यन्यग्भावेन स्वात्मैकतानतामापन्नं बोधमेव कथितवन्त इत्यर्थः । तद्धि करणं—

'सोऽहं (सर्वो) ममायं विभव इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता ॥'

(ई०प्र० ४।३।१२)

इस प्रकार उच्चार विधि कह दी गयी । अब कारण का विवेचन किया जा रहा है ॥ १२८- ॥

उच्चार ही पहले प्राण और चित् रूप से दो प्रकार का है । उनमें चिद् उच्चार भी चित्प्राधान्य और विमर्शप्राधान्य के भेद से दो प्रकार का होता है । इस प्रकार वही (= उच्चार ही) तीन प्रकार का है । परतत्त्व के भीतर प्रवेशरूप भी उपाय उसका भेद हैं इस कारण वह उच्चारात्मक ही है—इसलिए ठीक ही कहा कि—उच्चारविधि कह दी गई ॥

वह करण हम अपनी बुद्धि से ही नहीं कह रहे हैं—यह कहते हैं—

त्रिशिरोभैरव शास्त्र में वह (करण) परमेश्वर के द्वारा इस प्रकार कहा गया है । ग्राह्य, ग्राहक, चित्, व्याप्ति, त्याग, आक्षेप और निवेश (भेद) से करण को सात प्रकार का कहते हैं । (यह करण) बोधपूर्वक अभ्यास हैं। व्याप्तिपूर्वक आक्षेप होने पर अपने अन्दर प्रतिष्ठित होना ही करण है ॥ -१२८-१३०- ॥

चित् = संवित्ति; निवेशन = संनिवेश । ग्राह्य आदि सात प्रकारों से भिन्न बोधपूर्वक अभ्यास को करण कहते हैं । (विद्वान् लोगों ने) बोध्य को छिपाने के साथ-साथ अपनी एकतानता को प्राप्त बोध को ही (करण) कहा है । वह करण—

इत्याद्युक्तनीत्या व्याप्तिपूर्वं विश्वस्याक्षेपे 'स्वप्रतिष्ठता' स्वात्मन्येव विश्रान्तिरित्यर्थः । यदुक्तं तत्र—

'ग्राह्यं च ग्रहकं चैव संवित्तिं च तृतीयिकाम् ।
संनिवेशं तथा व्याप्तिमाक्षेपं त्यागमेव च ॥
करणं सप्तधा ख्यातमभ्यासं बोधपूर्वकम् ।
तद्व्याप्तिपूर्वमाक्षेपे करणं स्वप्रतिष्ठता ॥'

इति । ग्राह्यादीनां च तत्रैव—

'ग्राह्यस्वरूपविज्ञानं द्रव्यत्वे यद्व्यवस्थितम् ।
व्यक्तिनिष्ठं तु मन्तव्यं ग्राहकं तु स्फुटार्थकम् ॥
ग्राहयेच्चित्स्वरूपं तु व्यक्ताव्यक्तविचारकम् ।
प्रत्यक्षादिप्रमाणैश्च ग्रहीता गोलकस्थितिः ॥
गोलकं द्वारमित्युक्तं मनसा बाह्यतां ततः ।
न जहाति न गृह्णाति ग्रहीता ग्राहकः स्मृतः ।
लक्ष्यलक्षसमायोगात् प्रतिज्ञावस्तुयोगतः ।
उभयोर्नान्यविश्लेषं यथैवानुभवं स्मृतम् ॥
विचार्यमाणं यत्किञ्चित्स्वरूपविभवात्मकम् ।

"यह सब मेरा ही वैभव हैं"—ऐसा जानने वाले विश्वात्मा (योगी) के विकल्पों का प्रसरण होने पर भी (उसकी) महेशता बनी रहती हैं । (ई. प्र. ४।३।१२)

इत्यादि के द्वारा कही गयी नीति से व्याप्तिपूर्वक विश्व का आक्षेप होने पर स्वप्रतिष्ठिता = अपने में ही विश्रान्ति रहती है—यह तात्पर्य हैं । जैसा कि वहाँ कहा है—"ग्राह्य, ग्राहक, संवित्ति, संनिवेश, व्याप्ति, आक्षेप और त्याग—(इस प्रकार) करण सात प्रकार का कहा गया है । बोधपूर्वक अभ्यास को (करण कहते हैं) । व्याप्तिपूर्वक आक्षेप होने पर अपने में प्रतिष्ठित होना ही करण है ॥"

ग्राह्य आदि के विषय में वहीं पर—

जो द्रव्य में स्थित है वह ग्राह्यरूप विज्ञान हैं । और जो (विज्ञान) व्यक्ति में स्थित है वह स्पष्ट अर्थवाला ग्राहक (विज्ञान) हैं ।

व्यक्त और अव्यक्त का विचार करने वाला चैतन्य, जो गोलक में रहता है, प्रत्यक्ष आदि प्रमाणों के द्वारा (विषय का) ग्रहण करता है । गोलक को द्वार कहा गया है । मन के द्वारा बाहर गया हुआ (चैतन्य) न त्याग करता है न ग्रहण करता है । (जो) ग्रहण करने वाला (हैं वही) ग्राह्य कहा गया है ।

लक्ष्य और लक्षण के योग से तथा प्रतिज्ञातवस्तु के योग के कारण दोनों (= लक्ष्य लक्षण और प्रतिज्ञातवस्तु) का एक दूसरे से भेद न करना अनुभव (= संवित्ति) कहा गया है ॥

संनिवेशं तु तज्ज्ञेयं तद्व्याप्तिरभिधीयते ॥
स्वरूपस्थितिभावस्य एकदेशगतस्य च ।
घोणार्चिःप्रविकासं तु स्थानात्स्थानपदक्रमात् ॥
ज्ञायते वस्तुबोधज्ञस्त्रिप्रकारेण वस्तुनि ।
व्याप्तिस्तु कथिता सा तु सर्वज्ञा सर्वगा परा ॥
अनुभूय स्वरूपं तु निवृत्तिं नैव गच्छति ।
ज्ञानभेदपदप्राप्त्या अत्याक्षेपगमात्मनः ॥
स्वरूपं चिन्त्यमानोऽपि ग्राह्यप्राकारधर्मधीः ।
त्यजेत्पूर्वपदाद्भेदात् त्यागं तु परिकीर्तितम् ॥
पदस्थस्त्यागभागी च संवृतात्मपरस्य च ।
आक्षेपं तं विजानीयात्सर्वत्रावस्थितं प्रिये ।

इत्यादिना स्वरूपमुक्तम् ॥ १२९ ॥

नन्विहैतन्निर्भज्य कस्मान्नोक्तं किमागमपाठमात्रेण ?—इत्याशङ्क्याह—

गुरुवक्त्राच्च बोद्धव्यं करणं यद्यपि स्फुटम् ॥ १३० ॥

जो कुछ विचार्यमाण है वह स्वरूप का ही वैभव है—ऐस समझना सन्निवेश है ॥

स्वरूप में स्थिति की दशा अथवा (स्वरूप के) एक अंश मे (स्थिति की दशा जैसे) नथुने के तेज का विकास (या इसी प्रकार) एक स्थान से दूसरे स्थान पर जाने से वस्तु का बोध होता है यह बोध उक्त विधि से तीन प्रकार का होता है (यह भी सन्निवेश है) ।

व्याप्ति उसे कहते हैं जो कि सब को जानने की सर्वत्र वर्त्तमान रहने की स्थिति है । यह परा अवस्था है ।

निवृत्ति का निषेध तथा दोनों (= प्रवृत्ति एवं निवृत्ति) के अभाव को ज्ञानभेद के द्वारा हटाना आत्मा का आक्षेप है ॥

स्वरूप का चिन्तन करते हुए भी ग्राह्य रूप धर्मबुद्धि को छोड़ देना ही त्याग कहा गया है ।

पद में रहते हुए त्याग की भावना रखना तथा अपने को सब ओर से संवृत कर लेने को ही हे प्रिये ! सर्वत्र स्थित आक्षेप समझना चाहिये ।

इत्यादि के द्वारा (वहीं ग्राह्य आदि का) स्वरूप कहा गया है ॥ १२९ ॥

प्रश्न—यहाँ पर इसको अलग-अलग कर क्यों नहीं कहा गया? आगमपाठ से क्या लाभ ?—यह शङ्का कर कहते हैं–

यद्यपि करण स्पष्टरूप से गुरुमुख से जानने योग्य हैं तथापि आगम

तथाप्यागमरक्षार्थं तदग्रे वर्णयिष्यते ।

इह यद्यप्यनुभवैकगोचरत्वात् करणस्वरूपं गुरुमुखादेव स्फुटमवगन्तव्यं तथाप्यागमार्थो मा विच्छेदीत्येतदग्रे 'वर्णयिष्यते' अन्तरान्तरा पुरस्ताच्चर्चयिष्यते-इत्यर्थः । तथाहि—

'अर्थस्य प्रतिपत्तिर्या ग्राह्यग्राहकरूपिणी ।
सा एव मन्त्रशक्तिस्तु वितता मन्त्रसंततौ ॥' (तं० १६।२५६)
इत्यादिना षोडशाह्निके ग्राह्यग्राहकयोः ।
'यत्तु सर्वाविभागात्म स्वतन्त्रं बोधसुन्दरम् ।
सप्तत्रिंशं तु तत्प्राहुस्तत्त्वं परशिवाभिधम् ॥' (तं० ११।२१)

इत्यादिनैकादशाह्निके संवित्तेः ।

'इह किल दृक्क्रियेच्छाः शिव उक्तास्तास्तु वेद्यखण्डलके ।'
(तं० १५।३३८)

इत्यादिना पञ्चदशाह्निके व्याप्तेः ।

'एवं त्रिविधविसर्गविशसमापत्तिधाम्नि य उदेति ।
संविन्परामर्शात्मा ध्वनिस्तदेव मन्त्रवीर्यं स्यात् ॥
(तं० २९ ।१४०)

की रक्षा के लिए आगे उसका वर्णन किया जाएगा ॥ -१३०-१३१- ॥

यद्यपि केवल अनुभव का विषय होने के कारण करण का स्वरूप स्पष्टतया गुरुमुख से ही जानने योग्य है तथापि आगम का प्रतिपाद्य खण्डित न हो जाय इसलिए आगे इसका वर्णन किया जायगा अर्थात् आगे बीच-बीच में इसकी चर्चा की जायगी । वह इस प्रकार—

"अर्थ का जो ग्राह्यग्राहकरूप ज्ञान है वही मन्त्र शक्ति हैं (जो) मन्त्रों के प्रवाह में व्याप्त हैं ।" (तं. आ. १६।२५३)

इत्यादि के द्वारा सोलहवें आह्निक में ग्राह्य ग्राहक का (वर्णन) हैं ।

"जो सबका अविभागस्वरूप स्वतन्त्र सुन्दर बोध उसी को (विद्वान् लोग) परम शिव नामक सैंतीसवां तत्त्व कहते हैं" ॥ (तं. आ. ११।२१)

इत्यादि के द्वारा ग्यारहवें आहिक में संवित् का (वर्णन हैं) ।

ज्ञान क्रिया और इच्छा सब शिव ही हैं ये वेद्य खण्ड मे कही गयी हैं ।

इत्यादि के द्वारा पन्द्रहवें आह्निक में व्याप्तिका—

"इस प्रकार त्रिविध विसर्ग के आवेश की समापत्ति वाले स्थान में जो संवित् परामर्शरूप ध्वनि उदित होती है । वही मन्त्रवीर्य हैं" । (तं. आ. २९।१४०)

इत्यादिना—

'यत्र सर्वे लयं यान्ति दह्यन्ते तत्त्वसञ्चयाः ।
तां चितिं पश्य कायस्थां कालानलसमप्रभाम् ॥'

(तं० २५।१७२)

इत्यादिना चैकात्रिंशाह्निके त्यागस्याक्षेपस्य च तत्तन्मुद्रास्वरूपनिरूपणद्वारेण द्वात्रिंशाह्निके संनिवेशस्य स्वरूपं वक्ष्यति—इति तत एवैतत्सतत्त्वं स्वयमेवावधारणीयम् । एवं च व्यावर्णनेऽस्यायमभिप्रायो यदेकप्रघट्टकेनैव रहस्यार्थोपदेशो न न्याय इति । यदुक्तमनेनैवान्यत्र—

'नातिरहस्यमेकत्र ख्याप्यं न च सर्वथा
गोप्यम् इति हि अस्मद्गुरवः ।'

इति । तदस्माकमपि एवं-व्याख्याने श्रीमदभिनवगुप्तपादा एव प्रमाणम्—इति नात्र विद्वद्भिरस्मभ्यमसूयितव्यम् ॥ १३० ॥

एवं करणस्वरूपमुट्टङ्क्य तदनन्तरोद्दिष्टं वर्णतत्त्वं वक्तुमुपक्रमते—

उक्तो य एष उच्चारस्तत्र योऽसौ स्फुरन् स्थितः ॥ १३१ ॥
अव्यक्तानुकृतिप्रायो ध्वनिर्वर्णः स कथ्यते ।

इत्यादि के द्वारा तथा

"उसमें सब तत्त्वसमूह विलीन हो जाते हैं और जला दिए जाते हैं । शरीर में स्थित कालाग्नि के समान कान्ति वाली उस चिति को देखो ।" (तं. आ. २५।१७२)

इत्यादि के द्वारा उन्तीसवें आह्निक में त्याग और आक्षेप का (वर्णन है) भिन्न-भिन्न मुद्रास्वरूप के निरूपण के द्वारा बत्तीसवें आह्निक में सन्निवेश का स्वरूप कहेंगे । इसलिए इसे यथार्थता के साथ वहीं से जान लेना चाहिए । इस प्रकार पृथक् वर्णन में इसका अभिप्राय यह है कि एक अनुच्छेद के द्वारा ही रहस्य विषय का उपदेश उचित नहीं हैं । जैसा कि इन्होंने ही अन्यत्र कहा है—

अत्यन्त रहस्य को एक स्थान में नहीं बतलाना चाहिए और न सर्वथा छिपाना (चाहिये—ऐसा हमारे गुरु कहते थे) । तो हम लोगों के भी इस प्रकार की व्याख्या में श्रीमान् अभिनवगुप्त ही प्रमाण है । इसलिए विद्वान् लोग हमारे प्रति आक्रोश न करें ॥ १३० ॥

इस प्रकार करण तत्त्व का उल्लेख कर उसके बाद नामित वर्णतत्त्व का कथन करने के लिसे उपक्रम करते हैं—

जो यह उच्चार कहा गया उसमें जो यह अव्यक्त के अनुकरण जैसा ध्वनि स्फुरित होता हुआ स्थित रहता है वह वर्ण कहलाता

य एष प्राणात्मा प्रागुच्चार उक्तस्तत्र स्फुरन् स्थितः—

'नास्योच्चारयिता कश्चित्प्रतिहन्ता न विद्यते ।
स्वयमुच्चरते देवः प्राणिनामुरसि स्थितः ॥' (स्व०तं० ७।५७)

इत्याद्युक्त्या स्वरसत एवोच्चरन् । तथा

'एको नादात्मको वर्णः सर्ववर्णाविभागवान् ।
सोऽनस्तमितरूपत्वादनाहत इहोदितः ॥' (तं० ६।२१६)

इत्यादिवक्ष्यमाणयुक्त्या सर्ववर्णाविभागस्वभावत्वादव्यक्तप्रायो योऽसावनाहतरूपो नादः स वर्णोत्पत्तिनिमित्तत्वाद्वर्ण उच्यते वर्णशब्दाभिधेयो भवेदित्यर्थः ॥ १३१ ॥

नन्वेवंविधोऽयं वर्णः कुत्रोपलभ्यते ?—इत्याशङ्क्याह—

सृष्टिसंहारबीजं च तस्य मुख्यं वपुर्विदुः ॥ १३२ ॥

तस्य च सृष्टिबीजं संहारबीजं चेति बीजद्वयं 'मुख्यं वपुः' प्रधानमभिव्यक्तिस्थानमित्यर्थः ॥ १३२ ॥

नन्वेवमस्य परिज्ञानेन किं स्यात् ?—इत्याशङ्क्याह—

है ॥ -१३१-१३२- ॥

जो यह प्राणरूप उच्चार पहले कहा गया उसमें स्फुरित होता हुआ स्थित रहता है—

"इसका न तो कोई उच्चारण करने वाला और न (उसे) रोकने वाला है । प्राणियों के हृदय में स्थित यह देव स्वयं उच्चरित होता है ।" (स्व. तं. ७।५७)

इत्यादि उक्ति के द्वारा स्वभावतः ही उच्चरित होता हुआ तथा—

"एक नादात्मक वर्ण सभी वर्णों के मेल वाला है, वह कभी भी अस्त न होने वाला होने के कारण यहाँ अनाहत कहा गया है ।" (तं. आ. ६।२१६)

इत्यादि कही जाने वाली युक्ति से सभी वर्णों के मेलस्वभाव वाला होने के कारण प्रायः लगभग अव्यक्त जो यह अनाहत रूप नाद वह वर्णों की उत्पत्ति का कारण होने से वर्ण कहा जाता है = वर्ण शब्द का वाच्य होता है ॥ १३१ ॥

प्रश्न—इस प्रकार का वर्ण कहाँ मिलता है?—यह शङ्का कर कहते हैं—

विद्वान् सृष्टि एवं संहार के बीज को उसका मुख्य शरीर मानते हैं ॥ -१३२ ॥

और उसका सृष्टि बीज और संहार बीज ये दो बीज मुख्य शरीर = अभिव्यक्ति के प्रधान स्थान हैं ॥ १३२ ॥

प्रश्न—इसके परिज्ञान से क्या होगा?—यह शङ्का कर कहते हैं—

तदभ्यासवशाद्याति क्रमाद्योगी चिदात्मताम् ।

तच्छब्देन सृष्टिबीजादावभिव्यज्यमानो नादः परामृष्टः ॥

तदेवोपपादयति—

तथा ह्यनच्के साच्के वा कादौ सान्ते पुनःपुनः ॥ १३३ ॥
स्मृते प्रोच्चारिते वापि सा सा संवित्प्रसूयते ।

इह हि—

'......................द्विजमाद्यमजीवकम् ।' (मा० वि० १७।२९)

इत्याद्युक्तेः 'अनच्के' स्वररहिते

'वामजङ्घान्वितो जीवः........................।' (मा० वि० ३।५४)

इत्याद्युक्त्या 'साच्के' स्वरसहिते च ककारादिसकारान्ते वर्णकलापे पुनःपुनरुच्चारिते स्मृतेऽपि वा सा सा मर्मनिकृन्तनाप्यायनादिरूपा परस्परविलक्षणा 'संवित्' अनुभवो जायते। तेन सृष्टिबीजादावभिव्यज्यमानं नादं पौनःपुन्येनोच्चारयन् स्मरन् वापि योगी चिदैकात्म्यमनुभवेत्—इति युक्तमुक्तं 'तदभ्यासवशाद्याति क्रमाद्योगी चिदात्मताम्' इति ॥ १३३ ॥

उसके क्रमिक अभ्यास के कारण योगी चिदात्मता को प्राप्त होता है ॥ १३३- ॥

'तत्' शब्द से सृष्टि बीज आदि में अभिव्यक्त होता हुआ नाद समझा गया है ॥

उसी का उपपादन करते हैं—

स्वररहित या सस्वर 'क' से लेकर 'स' तक (के वर्णों का) स्मरण और उच्चारण होने पर यहाँ संवित् उत्पन्न होती हैं ॥ -१३३-१३४- ॥

पहला वर्ण (= अ) द्विज उस प्रकार की जीवनरहित (= स्वर रहित) है । (मा. वि. १७ ।२९)

इत्यादि उक्ति के कारण अनच्क = स्वररहित में जीव (= ठ स ल ह वामजङ्घा = 'ऐ') से युक्त हैं । (मा. वि. ३।५५)

इत्यादि उक्ति के द्वारा साच्क = स्वरसहित और ककार से लेकर सकार तक के वर्णसमूह के बार-बार उच्चारण या स्मरण होने पर सा सा = हृदय को काटने या भरने आदि के समान परस्पर विलक्षण, संवित् = अनुभव उत्पन्न होता है । इससे सृष्टि बीज आदि में अभिव्यज्यमान नाद का बार-बार उच्चारण या स्मरण करने वाला योगी चित् के साथ तादात्म्य का अनुभव करता है । इसलिए ठीक ही कहा—उसके अभ्यास के द्वारा योगी क्रमशः चिदात्मता को प्राप्त होता है ॥१३३॥

न केवलं वाच्यार्थाव्यतिरेकिणो लोकोत्तरा मान्त्रा वर्णा एवं यावल्लौकिका अपि—इत्याह—

बाह्यार्थसमयापेक्षा घटाद्या ध्वनयोऽपि ये ॥ १३४ ॥
तेऽप्यर्थभावनां कुर्युर्मनोराज्यवदात्मनि ।

वस्तुवृत्तेनासंभाविनं बाह्यं पृथुबुध्नोदरादिरूपम् 'अर्थम्' उत्तमवृद्धादिना कल्पितमिदमस्याभिधेयमित्येवमात्मकं 'समयं' चापेक्षमाणा अपि ये घटाद्याः शब्दास्ते स्ववाच्यार्थवार्तामात्रानभिज्ञा अपि आत्मन्यर्थादुच्चारिताः स्मृता वा पृथुबुध्नोदरादेरर्थस्य 'भावनां' साक्षात्कारं, मनोराज्यवदिति, यथा स्वोत्प्रेक्षा-विकल्पादौ कान्तादिशब्दाः कामशोकादिना भाव्यमानास्तत्रासंनिहितस्यापि कान्तादेरर्थस्य कुर्युः, एवं संभाव्यते इत्यर्थः । एवं समयादिनिरपेक्षाणां संविदैकात्म्येन वर्तमानानां मान्त्राणां वर्णानां पुनरेवंसंभावने का नाम शङ्का भवेदिति भावः ॥ १३४ ॥

आगमोऽप्येवमित्यर्थद्वारेणाह—

तदुक्तं परमेशेन भैरवो व्यापकोऽखिले ॥ १३५ ॥
इति भैरवशब्दस्य संततोच्चारणाच्छिवः ।

लोकोत्तर मान्त्र वर्ण केवल वाच्य अर्थ से भिन्न नहीं हैं बल्कि अलौकिक भी हैं—यह बतला रहे हैं—

बाह्य (रूप) एवं अर्थ के सङ्केत की अपेक्षा रखने वाली भी जो घट आदि ध्वनियाँ हैं वे भी आत्मा में मनोराज्य के समान अर्थभावना करती हैं ॥ -१३४-१३५- ॥

वस्तु के व्यवहार से उत्पन्न न होने वाले बाह्य चौड़ा गोल उदर आदि रूप तथा 'अर्थ' = उत्तम वृद्ध आदि के द्वारा कल्पित 'यह इसका वाच्य है' ऐसे सङ्केत की अपेक्षा वाले भी जो घट आदि शब्द हैं वे अपने वाच्य अर्थ की बात से अनभिज्ञ होते हुए भी आत्मा में अर्थात् उच्चारित अथवा स्मृत होकर मनोराज्य में वर्त्तमान पृथुबुध्नस्दर आदि युक्त अर्थ की भावना = साक्षात्कार, को (उत्पन्न करते हैं) । जैसे अपनी उत्प्रेक्षा या विकल्पना आदि में कान्ता आदि शब्द काम शोक आदि के द्वारा भावित होने पर वहाँ अवर्त्तमान भी कान्ता आदि की (भावना) करते हैं वैसे ही यहाँ भी सम्भव हैं । इसी प्रकार सङ्केत आदि से निरपेक्ष (तथा) संविद् के साथ अभिन्नतया वर्त्तमान मान्त्र वर्णो की इस प्रकार की सम्भावना में क्या शङ्का हो सकती हैं ॥ १३४ ॥

आगम भी ऐसा है—यह (बात) अर्थ के द्वारा कहते हैं—

वही परमेश्वर ने कहा है—भैरव सब में व्यापक हैं । इसलिए भैरव शब्द के निरन्तर उच्चारण से (योगी) शिव (हो जाता

'भैरव' इति निरुक्तदृष्ट्या सर्वं भ्रियाद्धारयति पुष्णाति रचयति अन्तर्बहिर्वा करोति सृष्टिस्थितिसंहारकृत् अखिले व्यापकः सकलजगत्क्रोडीकारेण भरितत्वात् पूर्णः—इत्येवमात्मव्याप्तिगर्भीकारेण भैरवशब्दस्य पौनःपुन्येन 'उच्चारणात्' मध्यधाम्नि हृदयात् द्वादशान्तं यावत्परामर्शनाच्छिवो भवेत्, भैरवैकात्म्यमनुभवेदित्यर्थः । उक्तमिति—श्रीविज्ञानभैरवे । यदुक्तं तत्र—

'भ्रियात्सर्वं रचयति सर्वदो व्यापकोऽखिले।
इति भैरवशब्दस्य संततोच्चारणाच्छिवः ॥'

(वि०भै० ११३ श्लो०)

इति ॥ १३५ ॥

ननु यदि नामैवमुच्चारणाद्भवेत् तदस्तु, स्मरणात् पुनरेतत् कथम्? इत्याशङ्क्याह—

श्रीमत्त्रैशिरसेऽप्युक्तं मन्त्रोद्धारस्य पूर्वतः ॥ १३६ ॥

मन्त्रोद्धारस्य पूर्वत इति,

'अधुना श्रोतुमिच्छामि मन्त्रोद्धारस्य लक्षणम् ।'

इति भगवत्या प्रश्ने कृते हि तत्समाधानमारभमाणेन भगवतैतत्स्मरणस्वरूपं

है) ॥ -१३५-१३६- ॥

"भैरव" इस (शब्द को) निरुक्त की दृष्टि से (देखने पर) जो सबका भरण, धारण, पोषण, रचना अन्दर या बाहर करता है, सृष्टिस्थितिसंहारकारी, सबमें व्यापक, समस्त जगत् को गोद में रखकर भरण करने से पूर्ण है—इस प्रकार आत्मव्याप्ति को गर्भीकृत करने से, भैरव शब्द का बार-बार उच्चारण करने से मध्य धाम में = हृदय से लेकर द्वादशान्त तक, परामर्श करने से (साधक) शिव हो जाता है = भैरव के साथ एकात्मता का अनुभव करता है । कहा गया है—विज्ञान भैरव मे । जैसा कि वहाँ कहा है—

'सबका, भरण करता है, रचना करता है, सब कुछ देने वाला है, सबमें व्यापक हैं । इस प्रकार भैरव शब्द का निरन्तर उच्चारण करने से (साधक) शिव हो जाता है । (वि० भै० ११३) ॥ १३५ ॥

प्रश्न—यदि उच्चारण से ऐसा होता है तो हो, स्मरण से यह कैसे हो सकता है ?—यह शङ्का कर कहते हैं—

त्रिशिरोभैरव में भी मन्त्रोद्धार के पहले कहा गया है ॥ -१३६ ॥

मन्त्रोद्धार के पहले—

'अब मन्त्रोद्धार का लक्षण सुनना चाहती हूँ'

प्रथमतरमेवोक्तमित्यर्थः । एतदेव हि विचार्यमाणं मन्त्राणां परं वीर्यमिति भावः । यदुक्तमनेनैव सूत्रविमर्शिन्याम्—

'तत एव सकलसिद्धिवितरणचतुरचिन्तामणिप्रख्यमागमिकाः स्मरणमेव मन्त्रादिप्राणितं मन्यते ।' (ई०प्र०वि० १।४।१) इति ॥ १३६ ॥

तदेव पठति—

स्मृतिश्च स्मरणं पूर्वं सर्वभावेषु वस्तुतः।
मन्त्रस्वरूपं तद्भाव्यस्वरूपापत्तियोजकम् ॥ १३७ ॥

इह अनुभवप्रत्यभिज्ञादिप्रत्ययान्तरवैलक्षण्येनोज्जृम्भमाणं 'स' इति प्रत्यवमर्शनात्मकमनुभूतार्थप्रकाशसंप्रमोषणरूपं 'स्मरणं स्मृतिः' तद्रूपा पारमेश्वरी शक्तिरित्यर्थः । तच्च वाच्यवाचकात्मकेषु स्फुरत्सु भावेषु 'पूर्वम्' उपादित्सादिपूर्वकोटाववश्यभावि, अन्यथा हि—

'स्मरणादभिलाषेण (पेन) व्यवहारः प्रवर्तते ।'

इत्यादिनीत्या तन्मूलः समग्र एव व्यवहार उत्सीदेत् । पूर्वमनुभूतोऽर्थ इदानीं

ऐसा भगवती के द्वारा प्रश्न करने पर उसके समाधान का आरम्भ करते हुए भगवान् के द्वारा यह स्मरण स्वरूप पहले ही कहा गया । विचार किए जाने पर यही मन्त्रों का परमवीर्य हैं—यह तात्पर्य हैं । जैसा कि इन्होंने सूत्रविमर्शिनी में कहा है—

'इसी कारण आगम के विद्वान् समस्त सिद्वियों को देने में चतुर चिन्तामणि के समान स्मरण को ही मन्त्र आदि का प्राण मानते हैं ।' (ई. प्र. वि. १।४।१) ॥ १३६ ॥

वही पढ़ते हैं—

स्मृति ही स्मरण है । यह सभी भावों का पूर्ववर्त्ती हैं । यह वस्तुतः मन्त्रस्वरूप हैं । वह अनुभवनीय (पदार्थ) के स्वरूप के तादात्म्य का व्यवस्थापक हैं ॥ १३७ ॥

अनुभव प्रत्यभिज्ञा आदि दूसरे ज्ञानों से विलक्षणता के साथ उत्पन्न होने वाला, 'वह' इस प्रकार प्रत्यवमर्शनात्मक तथा अनुभूत विषय के प्रकाश का असम्प्रमोषरूप स्मरण स्मृति हैं । अर्थात् उस रूप वाली परमेश्वर की शक्ति हैं । वह वाच्यवाचक रूप स्फुरित होने वाले पदार्थों में, पूर्व = ग्रहण की इच्छा आदि की पूर्व कोटि में अवश्य रहने वाली हैं । अन्यथा

'स्मरण के कारण इच्छा (= बातचीत) के द्वारा व्यवहार चलता है ।'

इत्यादि सिद्वान्त के द्वारा उसके कारण (चलने वाला) समस्त व्यवहार ही

नास्तीति निर्विषयत्वात् स्मृतिरेव नोल्लसेत्; अस्तित्वे वा तस्यानुभव एव भवेत्—इति कथं तन्मूलोऽयं व्यवहारः सिद्ध्येदित्याशङ्क्योक्तं—'वस्तुतो मन्त्रस्वरूपम्' इति । तद्धि स्मरणं वस्तुवृत्तेन मन्त्रयति स्वाभेदेन विश्वं परामृशति—इति 'मन्त्रः' परः प्रमाता तस्य स्वरूपं तदेकविश्रान्तमित्यर्थः । नन्वेमपि किं स्यात् ?—इत्याशङ्क्याह—'तद्भाव्यस्वरूपापत्तियोजकम्' इति । यतस्तत्परप्रमात्रात्म मन्त्रस्वरूपं 'भाव्यस्य' अनुभवनीयस्य घटादेरर्थस्य 'स्वरूपापत्तिः' स्वात्मसात्कारस्तत्र योजयति, तथात्वेन व्यवस्थापयतीत्यर्थः । यदि नाम हि तदविभागेन निखिलमिदमनुभूतं वस्तु न संभवेत् तत् स्मरणमेव न भवेदिति भावः । यदुक्तम्—

'सर्वेऽनुभूता यदि नान्तरर्थास्त्वदात्मसात्कारसुरक्षिताः स्युः ।
विज्ञातवस्त्वप्रतिमोषरूपा काचित् स्मृतिर्नाम न संभवेत्तत् ॥'

इति ॥ १३७ ॥

तामेव विशिनष्टि—

स्मृतिः स्वरूपजनिका सर्वभावेषु रञ्जिका ।
अनेकाकाररूपेण सर्वत्रावस्थितेन तु ॥ १३८ ॥

उच्छिन्न हो जायगा । पहले अनुभव किया गया पदार्थ इस समय नहीं हैं इस प्रकार विषयाभाव के कारण स्मृति ही उत्पन्न नहीं होगी, अथवा रहने पर अनुभव ही होगा—इस प्रकार तन्मूलक यह व्यवहार कैसे सिद्ध होगा ?—यह शङ्का कर कहा गया—वस्तुतः मन्त्रस्वरूप हैं । वह स्मरण वस्तु के वृत्त (= व्यवहार) के साथ मन्त्रणा करता है = अपने से अभिन्न रूप में विश्व का परामर्शन करता है इसलिए मन्त्र परप्रमाता (है) । उसका स्वरूप अर्थात् उसी मे विश्रान्त । ऐसा होने पर भी क्या होगा?—यह शङ्का कर कहते हैं—तद्भाव्य स्वरूपापत्तियोजक हैं । क्योंकि वह = परप्रमाता रूप मन्त्रस्वरूप, भाव्यकी = अनुभवनीय घट आदि विषय की, (जो) स्वरूपापत्ति = आत्मसात्कार, उसमें लगाता है = उस रूप में स्थापित करता है । यदि यह समस्त अनुभूत वस्तु उससे अविभक्त रूप में न सम्भव होती तो उसका स्मरण ही नहीं होता । जैसा कि कहा गया है—

'(हे परमेश्वर !) यदि हृदय में अनुभूत सारे पदार्थ तुम्हारे आत्मसात्कार के कारण सुरक्षित न होते तो विज्ञात वस्तु की अप्रमोषरूप कोई स्मृति नाम का (तत्त्व) सम्भव न होता' ॥ १३७ ॥

उसी को विशेष रूप से बता रहे हैं—

स्मृति अपने (वर्त्तमान) रूप की जनक हैं । वह सर्वत्र स्थित अनेक आकार के रूप से सभी पदाथों में स्फुट होने वाली हैं । (वह स्मृति) अपने स्वभाव की प्राप्ति है । परमार्थतः (वह) संवित् ही हैं । इसलिए उसे

स्वस्वभावस्य संप्राप्तिः संवित्तिः परमार्थतः ।
व्यक्तिनिष्ठा ततो विद्धि सत्ता सा कीर्तिता परा॥ १३९ ॥

यतः सा स्मृतिः 'व्यक्तिः' अर्थप्रकटनात्मा प्राच्योऽनुभवः 'तन्निष्ठा' तदभेदमापन्ना सती स्वस्येदानीन्तनकालावच्छिन्नस्य रूपस्य 'जनिका' स्मर्यमाणार्था-वभासिकेत्यर्थः । प्राच्यस्यैव ह्यनुभवस्येदानीन्तनकालावच्छेदेन पुनरुन्मेषो नाम स्मरणम्, अत एव पूर्वापरोभयकालावलम्बनेनौचित्योपनतः 'स' इति परामर्शोऽस्य परमार्थः ।

नन्वेवमपि स्मृतेर्विकल्पविशेषत्वात् निर्विषयत्वेन कथमर्थावभासकत्वमित्युक्तं 'सर्वभावेषु रञ्जिका' इति । 'अनेकाकाररूपेण सर्वत्रावस्थितेन तु' इति । सा हि 'सर्वत्र' सर्वेषु पूर्वावभातेषु घटादिषु भावेष्वर्थितादिवशाद् घटकाञ्चनद्रव्य-त्वाद्यात्मकेन 'अनेकेनैवाकारेण' कदाचिदपि स्वालक्षण्यात् स्वस्वरूप एवावस्थितेन घटाभासमात्राद्यात्मना 'रञ्जिका' स्वकाले स्फुटमेवावभासिकेत्यर्थः । यदुक्तम्—

'भासयेच्च स्वकालेऽर्थान्पूर्वाभासितमामृशन्।
स्वलक्षणं घटाभासमात्रेणाथाखिलात्मना ॥' (ई०प्र० १।४।२)

इति । एवं प्राच्यस्यानुभवस्य स्मृत्यभेदेनैवावभासात् स्मृत्यनुभवयोरैक्यं सिद्धम्—

अभिव्यक्ति में रहने वाली जानो । वह परा सत्ता कही गई हैं ॥ १३८-१३९ ॥

चूँकि वह स्मृति व्यक्ति = अर्थप्राकट्यरूप अतीत अनुभव, उसमें रहने वाली = उससे अभिन्न होते हुए स्वयं इस समय के काल से अवच्छिन्न रूप की जनिका = स्मर्यमाण अर्थ का अवभास कराने वाली हैं । अतीत अनुभव का वर्त्तमान काल में पुनः उन्मेष ही स्मरण है । इसलिए अतीत और वर्त्तमान दोनो कालों के आलम्बन के कारण औचित्य को प्राप्त 'वह' = परामर्श, इसका परमार्थ हैं ।

प्रश्न—ऐसा होने पर भी स्मृति के विशिष्ट विकल्प रूप होने के कारण निर्विषयक होने से, (यह) पदार्थों की अवभासिका कैसे होगी ?—इसलिए कहा गया—सर्वभावेषु रञ्जिका । और अनेकाकाररूपेण सर्वत्र अवस्थित है । वह (स्मृति) सर्वत्र = सभी पूर्व = अनुभूत घट आदि पदार्थों का, प्रयोजनवश घट, काञ्चन, द्रव्य आदि अनेक आकार में और कभी स्वलक्षण होने के कारण अपने स्वरूप में ही स्थित होने से केवल घटाभास रूप में, रञ्जिका = अपने काल में स्पष्ट अवभास कराने वाली हैं । जैसा कि कहा गया है—

पहले आभासित पदार्थ का अपने काल मे प्रत्यवमर्शन करने वाली (स्मृति कभी) केवल स्वलक्षण का और कभी सम्पूर्ण रूप से घटाभास का आभास कराती हैं । (ई. प्र. १।४।२) ।

इस प्रकार अतीत अनुभव का स्मृति से अभिन्न रूप में आभासन होने के

इति सा स्मृतिरेव स्वात्मनः संप्राप्तिः, पारमार्थिकी च संवित्तिरित्युक्तं 'स्वस्वभावस्य संप्राप्तिः संवित्तिः परमार्थतः' इति । यदुक्तम्—

'न च युक्तं स्मृतेर्भेदे स्मर्यमाणस्य भासनम्।
तेनैक्यं भिन्नकालानां संविदां वेदितैष सः ॥' (ई०प्र० १।४।३)

अतएव च—

'सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ॥' (ई०प्र० १।५।१४)

इत्यादिना निरूपितस्वरूपा पराकृत्रिमाहन्तापरामर्शात्मिका मान्त्री वीर्यभूमिरियम्, अत्रैवावधातव्यमित्युक्तं 'विद्धि सत्ता सा कीर्तिता परा' इति । विद्धीत्यत्र वाक्यार्थस्य कर्मत्वम् ॥ १३९ ॥

तदेवं लौकिकानां घटादीनां शब्दानामेवमुच्चारणात् स्मरणाद्वा यत्र संविदैकात्म्यावाप्तावुपायत्वं तत्र सृष्टिबीजादीनां का वार्ता ?—इत्याह—

किं पुनः समयापेक्षां विना ये बीजपिण्डकाः ।
संविदं स्पन्दयन्त्येते नेयुः संविदुपायताम् ॥ १४० ॥

कारण स्मृति ही अपनी आत्मा की प्राप्ति और परमार्थिक संवित्ति है । यही कहा गया—स्वस्वभावस्य... । जैसा कि कहा गया है—

"स्मृति से भेद होने पर स्मर्यमाण का भेदाभास युक्तिसङ्गत नहीं हैं । इसीलिये भिन्न कालों में वर्त्तमान संविदों की एकता ही हैं । और यही वह ज्ञाता है ।" (ई. प्र. १।४।३)

और इसीलिए—

"वह प्रकाशन करने वाली महासत्ता देश और काल के वैशिष्ट्य (= सीमा) से रहित हैं । वह यह सार होने के कारण परम शिव का हृदय कही गई हैं ।" (ई. प्र. १।५।१४)

इत्यादि के द्वारा जिसका स्वरूप वर्णित हैं (वह) यह परा, स्वाभाविक अहंभाव का परामर्श करने वाली, मन्त्रसम्बन्धी वीर्यभूमि हैं । इसी में अवधान करना चाहिए । इसलिए कहा गया—विद्धि सत्ता सा कीर्त्तिता परा । पूरा वाक्यार्थ 'विद्धि' क्रिया का कर्म हैं ॥ १३९ ॥

तो इस प्रकार जहाँ लौकिक घट आदि शब्दों का इस प्रकार उच्चारण अथवा स्मरण संविद् के साथ एकात्मता की प्राप्ति का उपाय हैं वहाँ सृष्टिबीज आदि की क्या बात?—यह कहते हैं—

समय की अपेक्षा के बिना जो बीज पिण्ड आदि हैं उनकी क्या बात ? ये संविद् का स्पन्दन कराते हैं तो क्या ये संविद् (की प्राप्ति) के

एते संविदुपायतां नेयुरिति काक्वा व्याख्येयम् ॥ १४० ॥

ननु समयानपेक्षमेव कथमेवमेते कुर्वन्ति ?—इत्याशङ्क्याह—

वाच्याभावादुदासीनसंवित्स्पन्दात्स्वधामतः ।
प्राणोल्लासनिरोधाभ्यां बीजपिण्डेषु पूर्णता॥ १४१ ॥

संविदैकात्म्येन स्फुरणात् व्यतिरिक्तस्य वाच्यस्याभावात्, तथा 'उदासीनः' स्वात्ममात्रविश्रान्तेरबहिर्मुखो योऽसौ संवित्स्पन्दस्तद्रूपात् 'स्वधामतः' स्वस्फारात्, तथा प्रमाणात्मनः 'प्राणस्योल्लासात्' प्रमेयोन्मुखं प्रसरणात्, तथा 'निरोधात्' अन्तर्मुखरूपे विश्रमात् सृष्टिसंहारकारित्वात् सृष्टिबीजादिरूपेषु 'बीजपिण्डेवु पूर्णता' अनन्योन्मुखत्वात् नैराकाङ्क्ष्यमित्यर्थः । घटादिषु लौकिकेषु पुनः शब्देषु वाच्यसद्भावादेरपूर्णत्वात् समयाद्यपेक्षत्वमित्यर्थसिद्धम् ॥ १४१ ॥

एवमेतत् सामान्येनाभिधाय विशेषमुखेनापि दर्शयति—

सुखसीत्कारसत्सम्यक्साम्यप्रथमसंविदः ।

उपाय नहीं हो सकते ॥ १४० ॥

क्या ये संविद् की उपायता को प्राप्त नहीं हो सकते ?—इस तरह इसकी व्याख्या काकुध्वनि से करनी चाहिए ॥ १४१ ॥

प्रश्न—समय की अपेक्षा के बिना ही ये इस प्रकार कैसे करते हैं ?—यह शङ्का कर कहते हैं—

वाच्य का अभाव होने से, उदासीन संवित्स्पन्द रूप होने से, अपने स्फार के कारण एवं प्राण के उल्लास तथा निरोध से बीजपिण्डों में पूर्णता होती है ॥ १४१ ॥

संविद् के साथ एकात्म होकर स्फुरण होने के कारण भिन्न वाच्य के न होने से, उदासीन = केवल अपनी आत्मा में विश्रान्ति के कारण अन्तर्मुख, जो यह संविद् का स्पन्द, तद्रूप होने से, स्वधाम = स्वस्फार के कारण, तथा प्रमाण रूप प्राण के उल्लास = प्रमेय की ओर प्रसार तथा निरोध = अन्तर्मुख रूप में विश्राम, (इन दोनों) के कारण सृष्टिसंहारकारी होने से सृष्टि के बीज आदि रूपों में = बीजपिण्डों में, पूर्णता = अन्योन्मुख न होने के कारण निराकाङ्क्षता है । घट आदि लौकिक शब्दों में वाच्य के होने से अपूर्ण होने के कारण समय आदि की अपेक्षा होती हैं—यह (बात) अर्थात् सिद्ध है ॥ १४१ ॥

इस प्रकार इसे सामान्य रूप से कह कर (अब) विशेष रूप से भी दिखला रहें हैं—

सुख, सीत्कार, सत्, सम्यक्, एवं साम्य सम्बन्धी प्रथम संविद् का

संवेदनं हि प्रथमं स्पर्शोऽनुत्तरसंविदः ॥ १४२ ॥
हृत्कण्ठ्योष्ठ्यत्रिधामान्तर्नितरां प्रविकासिनि ।
चतुर्दशः प्रवेशो य एकीकृततदात्मकः ॥ १४३ ॥
ततो विसर्गोच्चारांशे द्वादशान्तपथावुभौ ।
हृदयेन सहैकध्यं नयते जपतत्परः ॥ १४४ ॥

सुखादिसंबन्धिन्याः 'प्रथमायाः' आद्यायाः संविदो यत् 'प्रथमम्' आद्यमेव संवेदनम्, अनन्तरं हि संवेद्याद्यारुषितत्वमपि भवेदिति भावः । स नाम अनुत्तरसंविदः 'स्पर्शः' परसंवित्साक्षात्कारः इत्यर्थः । 'सुखं' चमत्कारातिशयः, 'सीत्कारः' तत्कारणं 'सत्' रमणीयं बाह्यं स्त्र्यादि वस्तु, सम्यगरमणीयमपि स्वोचितेन संनिवेशेनावस्थितं, 'साम्यं' रागद्वेषादिद्वन्द्वपरिहारः । अथ च सुखादीनामाद्या सकारमात्ररूपा या संवित् तस्याः संवेदनादप्येवम्—इति परबीजगतस्यामृतवर्णस्यापि तत्त्वं प्रदर्शितम् । यदुक्तं प्राक्—

'क्षोभाद्यन्तविरामेषु तदेव परमामृतम् ।
सीत्कारसुखसद्भावसमावेशसमाधिषु ॥' (तं० ३।१६७)

इति । अस्य च दन्त्यत्वेऽपि कन्दे विश्रान्तिरिति—

प्रथम संवेदन ही अनुत्तर संवित् का स्पर्श हैं । हृदय कण्ठ और ओष्ठ रूप तीन धाम के अन्दर भली भाँति विकसित होने वाले (आधार = सौः) में जो प्रवेश है (वह) चौदहवाँ तथा उस (= अमृत वर्ण) से अभिन्न हैं ।

इसके बाद विसर्ग के उच्चारांश में जप मे तत्पर (योगी) दोनों द्वादशान्तपथों को हृदय के साथ एकता को प्राप्त करा देता है ॥ १४२-१४४ ॥

सुख आदि से सम्बद्ध, प्रथम = पहली संविद्, का जो प्रथम = पहला, संवेदन, बाद में वह सम्वेद्य आदि से युक्त भी हो जाता है—यह भाव है । वह अनुत्तर संविद् का स्पर्श अर्थात् परासंविद् का साक्षात्कार हैं । सुख = अत्यधिक चमत्कार; सीत्कार = उसका कारण, सत् = रमणीय, स्त्री आदि बाहरी वस्तु, सम्यक् = रमणीय न होते हुए भी अपने उचित सन्निवेश के साथ स्थित, साम्य = राग द्वेष आदि द्वन्द्व का त्याग । यहाँ सुख आदि की प्रथम सकारमात्ररूप जो संवित्, उसके संवेदन से भी ऐसा होता है—इस प्रकार पराबीज वाले अमृत वर्ण (= स्) का भी तत्त्व (= सौः) दिखलाया गया । जैसा कि पहले कहा गया है—

क्षोभ से लेकर अन्तिम विराम वाले, सीत्कार, सुख, सद्भाव, समावेश और समाधि में वही परम अमृत (वर्त्तमान हैं) (तं. आ. ३।१६७)।

इस (= सकार) के दन्त्य होने पर भी (इसका) विश्राम कन्द में हैं । यह बात—

'कन्दहृत्कण्ठताल्वग्र......................।' (तं० ५।१४५)

इत्यादिवक्ष्यमाणार्थबलादवगन्तव्यम् । ततोऽपि 'अन्तः' मध्यधाम्नि नाडीत्रयस्यापि संमिलिततयात्यन्तं विकस्वरे ब्रह्मरन्ध्रोर्ध्ववर्तिनि नाड्याधाराभिधे परस्मिन्नाधारे यः प्रवेशः स चतुर्दशः, तस्येदं विश्रान्तिस्थानमित्यर्थः । नन्वत्र किमसौ केवलतयैव विश्राम्यत्युतान्यथा ? इत्याशङ्क्योक्तम्—'एकीकृततदात्मकः' इति । 'एकीकृतः' स्वाभेदेनास्थापितः—

'ओंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।' (भ०गी० १७।२३)

इत्यादिनीत्या तस्य परस्य ब्रह्मण आत्मा येनासावमृतवर्णसंभिन्न इत्यर्थः । ननु यद्येतदस्य विश्रान्तिस्थानम् उदयस्थानं पुनः किम् ?—इत्याशङ्क्याह—'हृत्कण्ठ्यौष्ठ्यत्रिधामा' इति तात्स्थ्यात् हृदकारः कण्ठ्यौष्ठ्यश्च औकारस्तयोः संहतत्वात् हृत्कण्ठौष्ठानि त्रीणि 'धामानि' उदयस्थानानि यस्यासावेवंविधः, तेन हृदयाद्युदयक्रमेण त्रिशूलभूमौ विश्राम्यति—इति शूलवर्णतत्त्वम् । तदनन्तरमपि विसर्गोच्चारांशे सावधानो जपतत्परो योगी उभौ 'द्वादशान्तपथौ' नासिक्यशिवद्वादशान्तौ सृष्ट्यात्मना 'हृदयेन सहैकध्यं नयते' शक्त्यादिसामरस्येन द्वादशान्तपर्यन्तं पराबीजमुच्चारयेदित्यर्थः ॥ १४४ ॥

"कन्द हृदय, कण्ठ और तालु के अग्र................." (तं. आं. ५।१५५)

इत्यादि आगे कहे जाने वाले (श्लोक के) अर्थ से जान लेना चाहिए । उसके भी भीतर = मध्य धाम में, तीनों नाड़ियों के मिल जाने से अत्यन्त विकसित, ब्रह्मरन्ध्र के (१२ अंगुल) ऊपर वर्त्तमान नाड्याधार नामक परआधार में जो प्रवेश है वह चौदहवाँ हैं । उसका यह (= सौः) विश्राम स्थल हैं । प्रश्न—क्या यहाँ पर वह अकेले विश्राम करता है या अन्य रूप से ?—यह शङ्का कर कहा गया—एकीकृत तदात्मकः । एकीकृत = अपने से अभिन्न रूप में स्थापित—

"ओम्, तत् एवं सत् इस प्रकार ब्रह्म का निर्देश तीन प्रकार का कहा गया है।" (भ० गी० १७।२३)

इत्यादि नीति के द्वारा उस पर ब्रह्म की आत्मा जिससे यह अमृत वर्ण (= स) से मिला हुआ है । प्रश्न—यह इसका विश्रान्तिस्थल हैं तो उदयस्थल कौन सा है ?—यह शङ्का कर कहते हैं—हृत् कण्ठ ओष्ठ तीन स्थान । उसमें रहने के कारण हृद्य, कण्ठ्य और ओष्ठ्य = औकार, उन दोनो के मिल जाने से हृदय, कण्ठ और ओष्ठ तीन धाम = उदय के स्थान हैं जिसके वह, उस प्रकार का । इसलिए हृदय आदि में उदय के क्रम से (यह) त्रिशूल भूमि मे विश्राम करता है । यह शूल वर्ण का रहस्य हैं । उसके बाद भी (सः में वर्त्तमान) विसर्ग के उच्चारणांश के बारे में सावधान जप में लगा हुआ योगी दोनो द्वादशान्त मार्गों को = नासिक्य और शिव द्वादशान्त को, सृष्टि रूप हृदय के साथ, एकता को ले जाता है = शक्ति आदि की समरसता के द्वारा द्वादशान्तपर्यन्त परा बीज का

एतदेव सङ्कलयति—

कन्दहृत्कण्ठताल्वग्रकौण्डिलीप्रक्रियान्ततः ।
आनन्दमध्यनाड्यन्तः स्पन्दनं बीजमावहेत् ॥ १४५ ॥

'कौण्डिली' शक्तिद्वादशान्तः 'प्रक्रियान्तः' शिवद्वादशान्तः । एवं कन्दात् प्रभृति तत्तदाधारोल्लङ्घनक्रमेण द्वादशान्तपर्यन्तं मध्यधामान्तरिदं सृष्टिबीजं 'स्पन्दनमावहेत्' अनुत्तरसंविदामर्शात्मना प्रस्फुरेदित्यर्थः ॥ १४५ ॥

एवमेतद्वर्णतत्त्वं संहारबीजानुसारेणापि अभिधत्ते—

संहारबीजं खं हृत्स्थमोष्ठ्यं फुल्लं स्वमूर्धनि ।
तेजस्त्र्यश्रं तालुकण्ठे बिन्दुरूर्ध्वपदे स्थितः ॥ १४६ ॥

तत्र खस्य कण्ठ्यत्वेऽप्युरस्यतोद्रेकेण हृत्स्थत्वं, 'फुल्लं' फकारस्तच्चौष्ठ्यम्, ओष्ठत एवोच्चारात्, 'तेजो' रेफस्तस्य मूर्धन्यत्वान्मूर्धन्येवावस्थानम् । त्र्यश्रमेकारस्तस्यापि कण्ठतालव्यत्वात् तालुकण्ठ एवावस्थितिः । 'ऊर्ध्वपदे' इति शक्तिशिवद्वादशान्तरूपे । एवं हृदादिस्थानविश्रान्तिपुरस्सरमेवोच्चारो भवेदिति भावः । यस्तु

उच्चारण करता है ॥ १४३-१४५ ॥

इसी को संग्रह रूप में कहते हैं—

कन्द, हृदय, कण्ठ, ताल्वग्र, कौण्डिली और प्रक्रियान्त तक आनन्द रूप मध्य नाडी के भीतर स्पन्दनबीज का स्फुरण करना चाहिए ॥ १४५॥

कौण्डिली = शक्तिद्वादशान्त; (= मूलाधार) प्रक्रियान्त = शिवद्वादशान्त (= ब्रह्मरन्ध्र से १२ अंगुल ऊपर)। इस प्रकार कन्द से लेकर उन-उन आधारों का क्रमशः उल्लङ्घन करते हुए द्वादशान्त तक मध्य धाम के भीतर इस सृष्टिबीज (= स्) का वहन करना चाहिए = अनुत्तर संविद् आमर्श के रूप में स्फुरण करना चाहिए ॥ १४५ ॥

इस प्रकार संहारबीज के अनुसार भी इस वर्णतत्त्व को कहते हैं—

संहार बीज = 'ख' हृदय में रहता है । फकार ओष्ठज है । तेजस् = र् अपनी मूर्धा में (रहता है) । त्र्यश्र = (= ए) तालु कण्ठ में और बिन्दु ऊर्ध्व पद में रहता है ॥ १४६ ॥

यद्यपि ख का स्थान कण्ठ हैं तो भी हृदय से उसका उद्रेक होने से (उसे) हृदयस्थ (माना गया है) । फुल्ल = फकार, वह ओष्ठ्य है क्योंकि ओष्ठ से उसका उच्चारण होता है । तेजस = रेफ । मूर्धन्य होने के कारण उसकी मूर्धा में स्थिति है । त्र्यश्र = एकार । कण्ठ्य तालव्य होने से उसकी भी कण्ठतालु में ही स्थिति है । ऊर्ध्वपद = शक्ति शिव दो द्वादशान्त । इस प्रकार हृदय आदि स्थानों

'खरूपे निर्वृतिं प्राप्य........................।' (तं० ५।७५)

इत्यादिना संवित्क्रमेण प्रागुच्चार उक्तः सोऽप्यत्रानुसंधेयः, संवित्क्रमस्य सर्वत्रैव भावात् ॥ १४६ ॥

नन्वेवमुक्तेन वर्णतत्त्वेन किं भवेत् ?—इत्याशङ्क्याह—

इत्येनया बुधो युक्त्या वर्णजप्यपरायणः ।
अनुत्तरं परं धाम प्रविशेदचिरात् सुधीः ॥ १४७ ॥

बुधः सुधीरित्यत्र 'ज्ञानित्वस्यात्र प्राधान्यमुक्तम्' इति दर्शितम् ॥ १४७ ॥

तदेवं वर्णतत्त्वमभिधाय भङ्ग्यन्तरेणाप्याह—

वर्णशब्देन नीलादि यद्वा दीक्षोत्तरे यथा ।

ननु किमेतत् स्वमनीषिकयैवोक्तमुत निबन्धान्तरं किञ्चिदत्रास्ति? इत्याशङ्क्याह —'दीक्षोत्तरे यथा' इति । अर्थाद्दीक्षोत्तराख्ये ग्रन्थे यथोक्तमिति ॥

तदेवाह—

संहारत्र्यग्निमरुतो रुद्रबिन्दुयुतान्स्मरेत् ॥ १४८ ॥

में विश्रामपूर्वक ही उच्चार होता है । और जो 'ख रूप में निवृत्ति को प्राप्त कर.. ....' (तं. ५।७५) इत्यादि के द्वारा संवित्क्रम से उच्चार कहा गया है उसका भी यहाँ अनुसन्धान करना चाहिए क्योंकि संवित्क्रम सब जगह रहता है ॥ १४६ ॥

प्रश्न—इस उक्त वर्णतत्त्व से क्या (लाभ) होगा ?—यह शङ्का कर कहते हैं—

इस प्रकार इस युक्ति के साथ वर्ण के जप में लगा हुआ विद्वान् ज्ञानी शीघ्र ही अनुत्तर धाम में प्रवेश कर जाता है ॥ १४७ ॥

बुधः सुधी यह (कहने से) यहाँ ज्ञान का प्राधान्य कहा गया है—यह प्रदर्शित होता है ॥ १४७ ॥

इस प्रकार वर्ण तत्त्व का कथन कर अब दूसरी रीति से भी कहते हैं—

अथवा वर्ण शब्द से नील आदि (का ग्रहण होता है) जैसा कि दीक्षोत्तर नामक ग्रन्थ में (उक्त है) ॥ १४८- ॥

प्रश्न—क्या यह अपनी बुद्धि से कहा गया है या इस विषय में कोई दूसरा ग्रन्थ भी (प्रमाण) हैं ?—यह शङ्का कर कहते हैं—जैसे कि दीक्षोत्तर में । अर्थात् दीक्षोत्तर नामक ग्रन्थ में जैसा कहा गया है ।

वही कहते हैं—

(योगी यदि) रुद्र विन्दु से युक्त संहार नृ अग्नि मरुत् का तन्मय होकर

हृदये तन्मयो लक्ष्यं पश्येत्सप्तदिनादथ ।
विस्फुलिङ्गाग्निवन्नीलपीतरक्तादिचित्रितम् ॥ १४९ ॥
जाज्वलीति हृदम्भोजे बीजदीपप्रबोधितम् ।
दीपवज्ज्वलितो बिन्दुर्भासते विघनार्कवत् ॥ १५० ॥

'संहार:' क्षकारो 'ना' पुमान् मकार: 'अग्नि:' रेफ: 'मरुत्' यकार:, एतान् पिण्डीभूतान् रुद्रेणै(णो)कारेण बिन्द्वर्धचन्द्रादिना च युतान् तावद्धृदये स्मरेत् यावत्तदेकतान: सन् सप्तदिनादूर्ध्वं 'लक्ष्यं पश्येत्' ध्येयं किञ्चित् प्रकटीभवेदित्यर्थ: । तद्धि अस्य लक्ष्यमुक्तस्वरूपं, यद्बीजं तदेव प्रकाशतादात्म्यात् दीपस्तेन 'प्रबोधितम्' अभिव्यञ्जितं सत् विस्फुलिङ्गप्रधानाग्निन्यायेन नीलपीताद्यनेकवर्णचित्रीकृतं हृदम्भोजे 'जाज्वलीति' स्पष्टनिरीक्षणीयतामेतीत्यर्थ: । एवमत्राप्येकतानस्य सतोऽस्य भावनातारतम्येन दीपवद् ग्रीष्मार्कवच्च यथायथं दीप्तो 'बिन्दु:' वेदयिता स्वात्मा भासते,

'आत्मानमत एवायं ज्ञेयीकुर्यात् ।' (ई०प्र० १।५।१५)

इत्याद्युक्तयुक्त्या लक्ष्यतामेतीत्यर्थ: ॥ १५० ॥

नन्वेवं लक्ष्यतामाप्तेनात्मनास्य किं स्यात् ?—इत्याशङ्क्याह—

हृदय में स्मरण करता है तो सात दिनों के अन्दर लक्ष्य की प्राप्ति कर लेता है । बीज रूपी दीप से प्रबोधित (लक्ष्य) नील पीत रक्त आदि (वर्णों) से चित्रित विस्फुलिङ्ग अग्नि के समान हृदयकमल में जलता है । दीप के समान जलने वाला विन्दु मेघरहित सूर्य के समान चमकता है ॥ -१४८-१५० ॥

संहार = क्ष, ना = पुरुष = म, अग्नि = र, मरुत् = य, परस्पर मिले हुए इनको, रुद्र = ओ, (इन सबका) विन्दु और अर्धचन्द्र आदि से युक्त कर हृदय में स्मरण करना चाहिए । (योगी) जब एकतान हो जाता है तब सात दिन के बाद लक्ष्य का दर्शन करता है अर्थात् (उसके सामने) ध्येय आंशिक रूप में प्रकट हो जाता है । पहले जिसका स्वरूप बतलाया गया वह लक्ष्य, जो बीज हैं वही प्रकाश के साथ एक होने से दीप है, उससे प्रबोधित = अभिव्यञ्जित होता हुआ विस्फुलिङ्ग प्रधान अग्नि की भाँति नील पीत आदि अनेक रङ्गों से विचित्र बनाया गया, हृदय कमल में जलता है = स्पष्ट निरीक्षण के योग्य हो जाता है । इस प्रकार यहाँ भी एकतान रहने वाले इस (योगी) के भावनातारतम्य के द्वारा दीप के समान और ग्रीष्मकालीन सूर्य के समान क्रमश: दीप्त बिन्दु = ज्ञान करने वाला आत्मा, भासित होता है ।

'इसलिए यह (योगी) आत्मा को ज्ञेय करे ।' (ई. प्र. १।५।१५)

इत्यादि उक्ति के अनुसार लक्ष्यता को प्राप्त करता है ॥ १५० ॥

स्वयंभासात्मनानेन तादात्म्यं यात्यनन्यधीः।
शिवेन हेमतां यद्वत्ताम्रं सूतेन वेधितम् ॥ १५१ ॥

अनेनेति आत्मना । शिवेनेति, स्वात्मैव हि परमेश्वरः शिवः—इति नः सिद्धान्तः इत्यभिप्रायः ॥ १५१ ॥

न चैवमस्यैव मन्त्रस्य वीर्यं यन्नीलपीताद्यनेकवर्णोदयद्वारेण स्वात्मसाक्षात्कारः अपि तु सर्वेषाम्—इत्याह—

उपलक्षणमेतच्च सर्वमन्त्रेषु लक्षयेत् ।

ननु सर्वेषां मन्त्राणां प्रतिनियतमेव फलं संभवेत्—इत्यविवादः । न हि अमृतबीजं मारणादि कर्तुमुत्सहते क्रूरबीजं वाप्यायनादि—इति कथं मन्त्रान्तर-निर्वर्त्यं कर्म मन्त्रान्तरेष्वपि भवेत् ?—इत्याशङ्क्याह—

यद्यत्सङ्कल्पसंभूतं वर्णजालं हि भौतिकम् ॥ १५२ ॥
तत् संविदाधिक्यवशादभौतिकमिव स्थितम् ।

यद्यन्नाम हि—

'विकल्पयोनयः शब्दा..................।'

प्रश्न—इस प्रकार लक्ष्य को प्राप्त आत्मा से इसका (= साधक का) क्या होगा ?—यह शङ्का कर कहते हैं—

एक ध्यान वाला (योगी) इस स्वप्रकाश आत्मा के द्वारा शिव के साथ (उसी प्रकार) एकता को प्राप्त हो जाता है जैसे पारद के द्वारा विद्ध ताँबा सोना बन जाता है ॥ १५१ ॥

इसके द्वारा = आत्मा के द्वारा । शिव के द्वारा—अपना आत्मा ही परमेश्वर शिव है यह हमारा सिद्धान्त हैं—यह अभिप्राय हैं ॥ १५१ ॥

नील पीत आदि अनेक वर्णो के उदय के द्वारा आत्मसाक्षात्कार होना केवल इसी मन्त्र की महिमा नहीं है बल्कि सभी मन्त्रों की हैं—यह कहते हैं—

यह (= उपर्युक्त कथन) उपलक्षण है । सभी मन्त्रों में इसे लगाना चाहिए ।। १५२- ।।

प्रश्न—सभी मन्त्रों का फल निश्चित हैं—यह सर्वसम्मत है । अमृतबीज मारण तर्पण नहीं कर सकता और क्रूरबीज (= जीवन) नहीं दे सकता तो फिर एक मन्त्र के द्वारा सिद्ध होने वाला यह कर्म दूसरे मन्त्रों से भी कैसे होगा?—यह शङ्का कर कहते हैं—

सङ्कल्प से उत्पन्न जो-जो वर्णसमूह भौतिक है वह (सब) संविद् की अधिकता के कारण अभौतिक जैसा हो जाता है ॥ -१५२-१५३- ॥

इत्यादिनीत्या सङ्कल्पसंभूतत्वात् 'भौतिकं' भेदानुप्राणितं मायीयं वर्णजातं तत्सर्वमेव संविदाधिक्यवशात् भौतिकत्वन्यग्भावनेन संविद एवोद्रेकादभौतिकमिव स्थितं, भेदरूपत्वेऽपि संविदद्वैतपरमार्थमेवेत्यर्थ: । इदमुक्तं भवति—

यद्यपि संविद एवायं सकल: स्फार:, तथापि तस्या आधिक्येनाप्रतीतौ भेदमयत्वात् एषां प्रतिनियतार्थक्रियाकारित्वम्; आधिक्येन प्रतीतौ पुन: सर्वेषां स्वात्मसाक्षात्कारलक्षणमविशिष्टमेव फलमिति । यदुक्तम्—

'एवमेषां स्वरूपांशस्पर्शे शिवमयी स्थिति: ।
तदनाच्छुरणे भिन्नसंसारस्थितिवर्तनम् ॥' इति ॥ १५२ ॥

अतश्च सर्वेषामेव मन्त्राणां संविदात्मन्यनुपाधौ रूपे विश्रान्तस्ताद्रूप्यमेवासादयेत्—इत्याह—

अतस्तथाविधे रूपे रूढो रोहति संविदि ॥ १५३ ॥
अनाच्छादितरूपायामनुपाधौ प्रसन्नधी: ।

नन्विह सर्वमन्त्राणां स्वरूपे तावदविवादसिद्ध एव भेद:—इति स फलेऽप्यवश्यमापतेत् कारणभेदाधीनत्वात् तस्य, तत् कथमेवमुक्तम् ?—

"शब्द विकल्प से उत्पन्न होते हैं...।"

इत्यादि शास्त्र के अनुसार सङ्कल्प से उत्पन्न होने के कारण जो भी भौतिक = भेद से युक्त, मायीय वर्णसमूह है वह सभी संविद् की अधिकता के कारण भौतिकत्व के छिपा देने से संविद् का ही विस्फार होने से अभौतिक के समान स्थित हैं । भेदरूप होने पर भी संविद् के साथ अद्वय होने से परमार्थ ही हैं । स्पष्टार्थ यह हैं—यद्यपि यह समस्त प्रपञ्च संविद् का ही है तो भी उसकी अधिकता से प्रतीति न होने पर भेदमय होने से ये (पदार्थ) सीमित एवं नियत अर्थक्रिया करते हैं । और जब (संविद् की प्रतीति) अधिकता से होती हैं तब सबका फल आत्मसाक्षात्कार रूप सामान्य ही होता है । जैसा कि कहा गया है—

"इस प्रकार इनके स्वरूपांश का स्पर्श होने पर इनकी स्थिति शिवमयी होती है । और उसका स्पर्श न होने पर भेदमय संसार की सत्ता वर्त्तमान रहती हैं" ॥ १५२ ॥

इसलिए सभी मन्त्रों की संविदात्मक अनुपाधि रूप में विश्रान्ति होने से (योगी) तद्रूपता को ही प्राप्त करता है । यह कहते हैं—

अत: अनावृतरूप वाली उपाधिरहित उस प्रकार की संविद् में वर्त्तभान योगी प्रसन्नचित्त होता हुआ आरूढ़ होता है ॥ -१५३-१५४- ॥

प्रश्न—सब मन्त्रों के स्वरूप में भेद निर्विवादसिद्ध है—अत: वह फल मे अवश्य आएगा क्योंकि वह (= फलभेद) कारणभेद के अधीन हैं, फिर ऐसा कैसे

इत्याशङ्क्याह—

नीले पीते सुखे दुःखे संविद्रूपमखण्डितम् ॥ १५४ ॥
गुरुभिर्भाषितं तस्मादुपायेषु विचित्रता ।

'गुरुभिः' वामनदत्ताचार्येण, भाषितमिति संवित्प्रकाशे । अनेनेदमुक्तं भवति—नीलादेर्वाच्यवाचकात्मनो विश्वस्य संविद्रूपत्वाविशेषात् न कश्चिद्वास्तवो भेदः संभवेदिति । ननु यद्येवं तत् कथमिदं वाच्यवाचकात्मवैचित्र्यमपह्नूयतां, नहि भातमभातं भवेत्, तदत्र किं प्रतिपत्तव्यम् ?—इत्याशङ्क्याह—'तस्मादुपायेषु विचित्रता' इति । एवं संवित्स्वातन्त्र्योल्लसितं यन्नामेदं वैचित्र्यं तदुपायमात्रविषयमेव पर्यवस्येत्, न तूपेयविषयमपीत्यर्थः । यदभिप्रायेणैव—

'संवित्तिफलभेदोऽत्र न प्रकल्प्यो मनीषिभिः ।' (मा०वि० २।२५)

इत्याद्युक्तम् ॥ १५४ ॥

एवमेकस्मिन्नेवोपेये प्राप्तव्ये परमियदुपायजातमुपदिष्टम्—इत्याह—

उच्चारकरणध्यानवर्णैरिभिः प्रदर्शितः ॥ १५५ ॥
अनुत्तरपदप्राप्तावभ्युपायविधिक्रमः ।

कहा गया?—यह शङ्का कर कहते हैं—

नील, पीत, सुख, दुःख में संविद् का रूप एक ही हैं ऐसा गुरु के द्वारा कहा गया है । इस कारण उपायों में विचित्रता (= अनेकता) होती हैं ॥ -१५४-१५५- ॥

गुरु = वामनदत्ताचार्य के द्वारा । कहा गया—संवित्प्रकाश (नामक ग्रन्थ में) । इससे यह उक्त होता है—घट आदि वाच्यवाचकरूप विश्व के संविद् रूप से अभिन्न होने के कारण वास्तविक कोई भेद सम्भव नहीं हैं । प्रश्न—यदि ऐसा है तो इस वाच्यवाचकरूप वैचित्र्य को कैसे छिपाया जाय ? (क्योंकि) जो प्रतीत हो रहा है वह अप्रतीत नहीं हो सकता । तो यहाँ क्या समझना चाहिए ?—यह शङ्का कर कहते हैं—इस कारण उपायों में विचित्रता है । इस प्रकार संवित् के स्वातन्त्र्य से उल्लासित जो यह वैचित्र्य है वह उपायमात्र विषयवाला ही रहेगा न कि उपेय को भी (अपना) विषय बनाएगा । जिस अभिप्राय से ही—

"बुद्धिमान् लोग यहाँ संविद्रूपी फल का भेद न समझें ।" (मा. वि. २।२५)

इत्यादि कहा गया है ॥ १५४ ॥

इस प्रकार एक ही उपेय को प्राप्त करने के विषय में इतने उपायसमूह का उपदेश किया गया—यह कहते हैं—

अनुत्तर पद की प्राप्ति के विषय में इन उच्चार करण ध्यान वर्ण के

ननूच्चारादीनामागमेऽप्यनेनैव क्रमेण पाठः—इति कथमिह तदुल्लङ्घनेन ध्यानोप्रक्रममेषां निर्देशः कृतः ?—इत्याशङ्क्याह—

अकिञ्चिच्चिन्तनं वीर्यं भावनायां च सा पुनः ॥ १५६ ॥
ध्याने तदपि चोच्चारे करणे सोऽपि तद् ध्वनौ ।
स स्थानकल्पने बाह्यमिति क्रममुपाश्रयेत् ॥ १५७ ॥

'अकिञ्चिच्चिन्तनं' शांभवः । 'भावना' शाक्तः । सेति भावना । तदिति करणं । स्थानकल्पन इति षष्ठादाह्निकात् प्रभृति वक्ष्यमाणे । एवं पूर्वं पूर्वमुत्तरत्रोत्तरत्र वीर्यमिति पाठक्रममपहाय—

'यो हि यस्माद् गुणोत्कृष्टः स तस्मादूर्ध्वमिष्यते ।'
(मा०वि० २।६०)

इत्यादिनीत्यार्थक्रमावलम्बनेनान्यथैवं निर्देशः कृतः—इति बलीयस्त्वादयमेव क्रमः समाश्रयणीय इत्यर्थः ॥ १५७ ॥

ननु यद्येवं तत् किमनेनैव क्रमेणोपेयप्राप्तिर्भवेदुतान्यथापि ?—इत्याशङ्क्याह—

द्वारा उपायविधि का क्रम दिखाया गया ॥ -१५५-१५६- ॥

प्रश्न—आगम में भी उच्चार आदि का इसी क्रम से पाठ है तो यहाँ उसका उल्लङ्घन करके ध्यान को पहले रखते हुए इनका निर्देश क्यों किया गया ?—यह शङ्का कर कहते हैं—

भावना = (शाक्तोपाय) की अपेक्षा अकिञ्चित्चिन्तन (= शाम्भवोपाय), और वह (= भावना) ध्यान (= आणवोपाय) की अपेक्षा, और वह (= आणवोपाय) उच्चार की अपेक्षा, वह (= उच्चार) भी करण की अपेक्षा और वह (= करण) ध्वनि की अपेक्षा और वह (= ध्वनि) स्थानकल्पना की अपेक्षा क्रमशः बलवत्तर हैं । इसलिये बाह्य क्रम को अपनाना चाहिए ॥ -१५६-१५७ ॥

अकिञ्चित्चिन्तन = शाम्भवोपाय, भावना = शाक्तोपाय । सा = भावना । तत् = करण । स्थानकल्पना जो कि छठें आह्निक से आगे कही जायगी । इस प्रकार पूर्व-पूर्व उत्तरोत्तर की अपेक्षा बलवत्तर हैं इसलिए पाठक्रम का त्याग कर

"जो जिसकी अपेक्षा गुणों में उत्कृष्ट है वह उससे ऊपर माना जाता है ।" (मा. वि. २।६०)

इत्यादि नीति के द्वारा अर्थक्रम के अवलम्बन के कारण दूसरे प्रकार से निर्देश किया गया—इसलिए बलवत्तर होने के कारण इसी क्रम को अपनाना चाहिए ॥ १५७ ॥

लङ्घनेन परो योगी मन्दबुद्धिः क्रमेण तु ।

'पर' इति तीव्रशक्तिपातानुविद्धः । योगीति, परतत्त्वैक्यभाग्भवेदित्यर्थः ॥

ननु पूर्व पूर्वमुत्तरस्योत्तरस्य वीर्यमित्युक्तेन किं स्यात् ?--इत्याशङ्क्याह—

वीर्यं विना यथा षण्ठस्तस्याप्यस्त्यथ वा बलम्।
मृतदेह इवेयं स्याद् बाह्यान्तःपरिकल्पना ॥ १५८ ॥

यथा पुंस्त्वापादकं वीर्यं विना पुरुषोऽपि 'षण्ठः' स्वकर्मण्यकिञ्चित्करः, अथवा तस्यापि चेष्टाद्यन्यथानुपपत्त्या किञ्चिद्वीर्यमस्ति—इत्यत्यन्तं जडप्रायत्वात् यथा शवशरीरमकिञ्चित्करम्, एवं स्थानकल्पनादिरूपा बाह्यान्तरुपायकल्पनापि निर्वीर्या सत्यकिञ्चित्कर्येव भवेदित्यर्थः ॥ १५८ ॥

इदानीमाह्निकार्थमेव श्लोकस्य प्रथमार्धेनोपसंहरति—

इत्याणवेऽनुत्तरताभ्युपायः प्रोक्तो नयः स्पष्टपथेन बाह्यः ।

प्रश्न—यदि ऐसा है तो क्या इसी क्रम से उपेय की प्राप्ति भी होती है या दूसरे प्रकार से भी ?—यह शङ्का कर कहते हैं—

उत्कृष्ट योगी दूसरे क्रम से (= क्रम का उल्लङ्घन करके भी) भी (किन्तु) मन्दबुद्धि वाला (योगी) क्रम से (प्राप्त करता है) ॥ १५८- ॥

पर = तीव्र शक्तिपात वाला । योगी, परतत्त्व के साथ एकता वाला हो जाता है ।

प्रश्न—पूर्व-पूर्व उत्तरोत्तर की अपेक्षा बलवत्तर है—यह कहने से क्या (लाभ) ? ......यह शङ्का कर कहते है—

जिस प्रकार पौरूष का आधान करने वाले वीर्य के बिना पुरुष नपुंसक होता है; अथवा उसके पास भी (कुछ न कुछ) बल होता है (इसलिए) यह बाह्य अन्तर की कल्पना मानो मरे हुए शरीर के बारे में होती हैं ॥ -१५८ ॥

जिस प्रकार पुरुषत्व को लाने वाले वीर्य के बिना पुरुष भी नपुंसक अर्थात् अपने कर्म को करने में असमर्थ रहता है अथवा चेष्टा आदि की दूसरी तरह सिद्धि नहीं हो सकती इसलिये (उसमें) कुछ वीर्य है ऐसा मान लेना चाहिये किन्तु अत्यन्त जड होने से जैसे मृत शरीर कुछ नहीं करता उसी प्रकार स्थान की कल्पना इत्यादि बाहरी और भीतरी उपाय की कल्पना वीर्यहीन होकर कुछ नही करेगी ॥ १५८ ॥

अब इस आह्निक के विषय का आधे श्लोक के द्वारा उपसंहार करते हैं—

बाह्यो नय इति उच्चारादि, इति शिवम् ॥

गुरुवरचरणप्रसादप्रध्वस्तसमस्तदुर्विकल्पौघः ।
विवरणमेतदरचयज्जयरथ इति पञ्चमाह्निके कश्चित् ॥

॥ इति श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तविरचिते श्रीतन्त्रालोके श्रीजयरथविरचितविवेकाभिख्यव्याख्योपेते आणवोपाय-प्रकाशनं नाम पञ्चममाह्निकं समाप्तम् ॥ ५ ॥

इस प्रकार आणवोपाय में अनुत्तरोपाय नामक बाह्य मार्ग स्पष्ट रूप से कहा गया ।

बाह्य नय = उच्चार आदि ।

॥ इस प्रकार श्रीमदाचार्यअभिनवगुप्तपादविरचित श्रीतन्त्रालोक के पञ्चम आह्निक की डॉ० राधेश्याम चतुर्वेदी कृत 'ज्ञानवती' हिन्दी टीका सम्पूर्ण हुई ॥ ५ ॥

॥ इति शिवम् ॥

॥ इस प्रकार आचार्यश्रीजयरथकृत श्रीतन्त्रालोक के पञ्चम आह्निक की 'विवेक' नामक व्याख्या की डॉ० राधेश्याम चतुर्वेदी कृत 'ज्ञानवती' हिन्दी टीका सम्पूर्ण हुई ॥ ५ ॥

षष्ठमाह्निकम्

* विवेक *

कवलयितुं किल कालं कलयति यो व्यायतास्यतां सततम् ।
जयति स सुजयः साक्षात्संसारपराकृतौ सजयः ॥

इदानीमाणवोपायस्यैवाङ्गभूतमुच्चारादिप्रमेयचतुष्टयानन्तरोद्दिष्टं स्थानकल्पनाख्यं परमं प्रमेयं द्वितीयार्धेनावतारयितुमुपक्रमते—

स्थानप्रकल्पाख्यतया स्फुटस्तु बाह्योऽभ्युपायः प्रविविच्यतेऽथ ॥ १ ॥

अथशब्दोऽधिकारे । तेनेतः प्रभृत्याद्वादशाह्निकं यत्किंचिदुच्यते तत्सर्वं स्थानकल्पनाधिकारेण, इति पञ्चदशाह्निकात्प्रभृति पुनरेतदेव बाह्यस्थण्डिल-मण्डलाद्यधिकृत्याभिधीयते—इत्याग्रन्थपरिसमाप्तेः प्राधान्यात् स्थानकल्पनस्यैव सकलोऽयं प्रपञ्च इति ॥ १ ॥

---

* ज्ञानवती *

काल को निगलने के लिए जो मुख को खोलते हैं, संसार के विनाश के विषय में जयशील साक्षात् सुन्दर जयरूप वह (परमेश्वर) सदा सर्वोत्कृष्ट हैं ।

अब आणवोपाय की ही अङ्गभूत, उच्चार आदि चार प्रमेय के बाद नामित स्थानकल्पना नामक परमप्रमेय की (श्लोक के) उत्तरार्द्ध के द्वारा अवतारणा करने का उपक्रम करते हैं—

अब स्थानप्रकल्पना नाम से स्पष्ट बाह्य उपाय का विवेचन किया जा रहा है ॥ १ ॥

अथ शब्द प्रारम्भ अर्थ में (प्रयुक्त है) । इसलिए यहाँ से लेकर बारहवें आह्निक तक जो कुछ कहा जायगा वह सब स्थानकल्पनापूर्वक । पन्द्रहवें आह्निक से फिर यही (= स्थानकल्पना) बाह्य स्थण्डिल मण्डल आदि को विषय बनाकर वर्णित होगी । इस प्रकार ग्रन्थ की समाप्ति तक प्रधान होने के कारण यह सारा प्रपञ्च स्थानकल्पना का ही हैं ॥ १ ॥

तदेवाह—

स्थानभेदस्त्रिधा प्रोक्तः प्राणे देहे बहिस्तथा ।

एषामपि भेदान्तराणि सन्ति—इत्याह—

प्राणश्च पञ्चधा देहे द्विधा बाह्यान्तरत्वतः ॥ २ ॥
मण्डलं स्थण्डिलं पात्रमक्षसूत्रं सपुस्तकम् ।
लिङ्गं तूरं पटः पुस्तं प्रतिमा मूर्तिरेव च ॥ ३ ॥
इत्येकादशधा बाह्यं पुनस्तद् बहुधा भवेत् ।

'पुस्तं' लेपादिनिर्मिताकृतिः । मूर्तिर्गुर्वादिसंबन्धिनी । तदित्यानन्तर्याद् बाह्यं, पुनरित्येकादशविधत्वेऽपि । बहुधेति मण्डलादीनामप्येकशूलत्रित्रिशूलादिक्रमेण नानात्वात् ॥ ३ ॥

एवं स्वरूपतः स्थानभेदमभिधाय तद्गतं विधिमप्युपदेष्टुं प्रतिजानीते—

तत्र प्राणाश्रयं तावद्विधानमुपदिश्यते ॥ ४ ॥

तदेवाह—

वही कहते हैं—

स्थानभेद तीन प्रकार का कहा गया है—प्राण में, देह में, और बाहर ॥ २- ॥

इनके अवान्तर भेद भी हैं—यह कहते हैं—

प्राण पाँच प्रकार का है । देह दो प्रकार का है—बाह्य और आभ्यन्तर । मण्डल, स्थण्डिल, पात्र, अक्षमाला, पुस्तक, लिङ्ग, तूर, पट, पुस्त, प्रतिमा और मूर्त्ति ये ग्यारह प्रकार के बाह्य है । पुनः वह बहुत प्रकार का है ॥ -२-४- ॥

पुस्त = लेप आदि से निर्मित आकृति । मूर्त्ति—गुरु आदि से सम्बद्ध । तद् पद से अव्यवहितपूर्व होने के कारण बाह्य (का ग्रहण करना चाहिए) । पुनः (का तात्पर्य है) ग्यारह भेद होने पर भी । बहुधा का अर्थ है—एकशूल द्विशूल त्रिशूल आदि क्रम से अनेक होने के कारण ॥ २ ॥

इस प्रकार स्थानभेद का स्वरूपवर्णन कर उसमें वर्त्तमान विधि का उपदेश करने के लिए प्रतिज्ञा करते हैं—

प्राण जिसका आश्रय है (उस) विधान का उपदेश किया जा रहा हैं ॥ -४ ॥

वही कहते है—

अध्वा समस्त एवायं षड्विधोऽप्यतिविस्तृतः ।
यो वक्ष्यते स एकत्र प्राणे तावत्प्रतिष्ठितः ॥ ५ ॥

वक्ष्यत इति भुवनाध्वप्रकाशनादौ । 'प्राण' इति सामान्यस्पन्दनात्मनि । यदुक्तम्—

'षड्विधाध्वविभागस्तु प्राणैकत्र यथा स्थितः ।'
(स्व०तं० ४।२३२)

इति । विशिष्टे पुनः पदमन्त्रवर्णात्मा त्रिविध एव । यद्वक्ष्यति

'षड्विधादध्वनः प्राच्यं यदेतत्त्रितयं पुनः ।
एष एव स कालाध्वा प्राणे स्पष्टं प्रतिष्ठितः ॥'
(तं०आ० ६।३७) इति ॥ ५ ॥

तदेवोपपादयति—

अध्वनः कलनं यत्तत्क्रमाक्रमतया स्थितम् ।
क्रमाक्रमौ हि चित्रैककलना भावगोचरे ॥ ६ ॥

नन्वेतत्क्रमाक्रमात्मतयैव कस्मात्स्थितमित्याशङ्क्याह—'क्रमेत्यादि' । इह द्विधैव भावानामवभासः क्रमेणाक्रमेण च; तत्र क्रमेण यथा कार्यकारणादौ, अक्रमेण यथा

यह समस्त अध्वा छः प्रकार का होते हुए भी बहुत विस्तृत है जो कि कहा जायगा । वह एक जगह प्राण में प्रतिष्ठित हैं ॥ ५ ॥

कहा जायगा—भुवन अध्वा के वर्णन आदि में । प्राण में = सामान्य स्पन्दन रूप (प्राण) में । जैसा कि कहा गया है—

"छः प्रकार का अध्वविभाग तो प्राण में एक जगह स्थित है ।" (स्व. तं. ४।२३२)

विशेष रूप में पद मन्त्र और वर्ण रूप तीन ही प्रकार का है । जो कि कहेंगे—जो यह तीन है वह छः प्रकार के अध्वा की अपेक्षा पूर्ववर्त्ती है । यह वह कालाध्वा है जो प्राण में स्पष्टरूप से प्रतिष्ठित हैं । (तं. आ. ६।३७) ॥ ५ ॥

उसी को बतलाते हैं—

अध्वा का जो आकलन वह क्रम और अक्रम रूप में स्थित हैं । ये क्रम और अक्रम चित्र के दर्शन में स्पष्ट होते हैं । पदार्थों के विषय में (भी ऐसा समझना चाहिये) ॥ ६ ॥

प्रश्न—यह क्रम और अक्रम रूप में ही क्यों स्थित हैं?—यह शङ्का कर कहते हैं—क्रमाक्रम इत्यादि । पदार्थों का ज्ञान दो प्रकार से होता है—क्रम से और बिना

चित्रज्ञानादौ । स च चित्रे यदैकस्यैवैकदैव च कंचित्पूर्वकालभाविनं समानकालभाविनं च भावमपेक्ष्य क्रमेणाक्रमेण चावभासः—इति । तद्या नाम भावानामेवं 'कलना' परिच्छित्तिः स एव क्रमाक्रमात्मा इति ॥ ६ ॥

ननु सर्वमिदं जगत्संविल्लग्नमेवावभासतेऽन्यथा ह्यस्य भानमेव न भजेत्, संविदि च नित्यत्वात्कालयोगो नास्ति, इति कथमसौ तदनुषक्तस्य भावजातस्यापि स्यात् ?—इत्याशङ्क्याह—

क्रमाक्रमात्मा कालश्च परः संविदि वर्तते ।

नन्वेवं 'क्रमाक्रमकथातीतं संवित्तत्त्वं सुनिर्मलम्' इत्याद्युक्तं व्याहन्येत, सौगतमतान्तःपातश्च स्यात्—इत्याशङ्क्याह—

काली नाम परा शक्तिः सैव देवस्य गीयते ॥ ७ ॥

यन्नाम परस्य प्रकाशस्य कालेन योगः सास्य 'शक्तिः' स्वेच्छावभासितस्य प्रमातृप्रमेयाद्यात्मनो जगतस्तत्तद्रूपतया कलने सामर्थ्यं न पुनः स्वात्मनि कश्चिदक्रमः क्रमो वा इति न ह्यग्नेर्दाहशक्तियोगे स्वात्मनि स्फोटाद्याविर्भावः ॥ ७ ॥

क्रम के । उनमें क्रम से (ज्ञान) जैसे कार्य कारण आदि में । अक्रम से जैसे-चित्र के ज्ञान आदि में । चित्र में एक का एक ही बार कभी पूर्वकालभावी कभी समानकाल भावी भाव की अपेक्षा क्रम से और अक्रम से अवभास होता है । तो जो भावों की इस प्रकार की कलना = परिच्छित्ति (= ज्ञान) होता है वही क्रम और अक्रमरूप काल है ॥ ६ ॥

प्रश्न—यह सब जगत् संविद् से युक्त होकर ही भासित होता है अन्यथा इसका भान ही नहीं होगा, और नित्य होने के कारण संविद् में काल का योग है नहीं तो उससे संलग्न पदार्थसमूह का वह (= कालयोग) कैसे होगा?—यह शङ्का कर कहते हैं—

क्रम और अक्रम रूप पर काल संविद् मे स्फुरित होता है ॥ ७- ॥

प्रश्न—ऐसा होने पर स्वच्छ निर्मल संवित्तत्त्व "क्रम और अक्रम की कथा से परे है ।"—इत्यादि कथन का व्याघात हो जायगा और बौद्धमत आ पड़ेगा?—यह शङ्का कर कहते हैं—

परमेश्वर की वही परा शक्ति काल नाम से कही जाती है ॥ -७ ॥

परप्रकाश का जो काल के साथ योग है वही इस (= परप्रकाश) की शक्ति है; (वही) अपनी इच्छा से अवभासित प्रमातृ प्रमेय आदि रूप को भिन्न-भिन्न रूप में रचने का सामर्थ्य है । (उस) आत्मा में कोई क्रम या अक्रम नहीं हैं । अग्नि का दाहशक्ति के साथ योग होने पर उस अग्नि में स्फोट आदि नहीं उत्पन्न होता ॥ ७ ॥

तदाह—

सैव संविद् बहिः स्वात्मगर्भीभूतौ क्रमाक्रमौ ।
स्फुटयन्ती प्ररोहेण प्राणवृत्तिरिति स्थिता ॥ ८ ॥

सैव कालशक्तियोगिनी संवित्स्वाविभागेनावस्थितौ क्रमाक्रमौ बहिः प्ररूढतयावभासयन्ती प्राणवृत्तिरिति स्थिता, प्राणनात्मतया प्रस्फुरितेत्यर्थः ॥ ८ ॥

ननु कथं नामेयं प्राणवृत्त्यात्मना प्रस्फुरिता—इत्याशङ्क्याह—

संविन्मात्रं हि यच्छुद्धं प्रकाशपरमार्थकम् ।
तन्मेयमात्मनः प्रोज्झ्य विविक्तं भासते नभः ॥ ९ ॥

यन्नाम हीदं प्रमातृप्रमेयात्मनो विश्वस्य स्वाविभागेनैवावभासनात्प्रकाशपरमार्थकम्, अत एव तदारूषणाया अभावाच्छुद्धं संविन्मात्रं तत्स्वस्वातन्त्र्यात् स्वात्मन्यपूर्णत्वावबिभासयिषया स्वाविभागेनावस्थितं विश्वात्म 'मेयं' आत्मनः सकाशात् 'प्रोज्झ्य' पृथक्कृत्य 'विश्वस्मादुत्तीर्णोऽहम्' इत्यामृश्य 'विविक्तं नभोऽवभासते' सकलभावशून्यत्वान्निरावरणरूपतया प्रस्फुरतीत्यर्थः ॥ ९ ॥

वही कहते हैं—

वही संविद् अपने से अभिन्न क्रम और अक्रम को प्ररोह के साथ बाहर प्रकट करती हुई प्राणवृत्ति के रूप में रहती हैं ॥ ८ ॥

वही = कालशक्ति वाली संवित् अपने से अविभक्तरूप में स्थित क्रम और अक्रम को बाहर स्पष्टतया अवभासित करती हुई प्राणवृत्ति के रूप में स्थित है = प्राणन के रूप में प्रस्फुरित हैं ॥ ८ ॥

प्रश्न—यह प्राणवृत्ति के रूप में क्यों स्फुरित हैं ?—यह शङ्का कर कहते हैं—

जो प्रकाश रूप परम स्वभाव वाला शुद्ध संविद् मात्र हैं वह मेय (= विश्व) को अपने से अलग कर पृथक् हुआ, आकाश के समान (= शून्य) भासित होता है ॥ ९ ॥

जो यह, प्रमातृ प्रमेय रूप विश्व को अपने से अभिन्न रूप में अवभासित करने से प्रकाशरूप परम स्वभाव वाला (है) इसलिए उस (= विश्व) के स्पर्श के अभाव के कारण शुद्ध संविन्मात्र है । वह अपने स्वातन्त्र्यवश अपने में अपूर्णता को अवभासित करने की इच्छा से अपने से अपृथक् रूप में स्थित विश्वरूप मेय को अपने से अलग करके । 'मैं विश्व से परे हूँ,' ऐसा आमर्श कर विविक्त हुआ आकाशवत् भासित होता है अर्थात् सकल भावों से शून्य होने के कारण निरावरण रूप में प्रस्फुरित होता है ॥ ९ ॥

अत एवाह—

तदेव शून्यरूपत्वं संविदः परिगीयते ।

'शून्यरूपत्वम्' इति शून्यप्रमातृत्वमित्यर्थः । शून्यत्वं चास्य सर्वस्य संवेद्यस्य संक्षयात् न तु संविदोऽपि, तथात्वे हि निखिलमिदमनेलमूकप्रायं स्यात् । यदुक्तम्—

'अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते ।
अभावः स समुद्दिष्टो यत्र भावाः क्षयं गताः ॥'

(स्व० ४।२९१) इति ।

'सर्वालम्बनधर्मैश्च सर्वसत्त्वैरशेषतः ।
सर्वक्लेशाशयैः शून्यं न शून्यं परमार्थतः ॥' इति च ॥

एतच्च परमुपेयमितो बाह्यानामित्याह—

नेति नेति विमर्शेन योगिनां सा परा दशा ॥ १० ॥

सेयं—

'न भावो नापि चाभावो मध्यमाप्रतिपत्तितः ।'

इसीलिए कहते है—

वही संविद् की शून्यरूपता कही जाती है ॥ १०- ॥

शून्यरूपता = शून्यप्रमातृता । इस समस्त संवेद्य का क्षय होने से, न कि संविद् का भी (क्षय होने से) शून्यता है । क्योंकि वैसा पर यह सब अनेल (= अवर्णनीय) मूकप्राय हो जायेगा । जैसा कि कहा गया है—

''अशून्य को शून्य कहा गया है । और शून्य अभाव को कहा जाता है । अभाव उसे कहा गया है जहाँ भाव नाश को प्राप्त हो गये होते है ।'' (स्व. तं. ४।२९१)

और

''(शून्य का तात्पर्य है) सभी आलम्बन धर्मों से, सभी सत्त्वों से और सभी क्लेशों तथा वासनाओं से पूर्णतः शून्य, न कि परमार्थतः शून्य ॥ ९ ॥

और यह इससे बाहर रहने वालों के लिए अन्तिम लक्ष्य है—यह कहते हैं—

वह नही हैं-नहीं है—इस प्रकार के विमर्श के द्वारा (ज्ञाप्य) योगियों की परा दशा है ॥ -१० ॥

सा यह—

'न भाव है और न अभाव है किन्तु मध्यमा प्रतिपत्ति (= भावात्मक एवं

इत्याद्युक्तयुक्त्या भावाभावविषयेण नेति नेति परामर्शद्वयेन मध्यमपदावेशशालिनां 'योगिनां' 'परा' शून्यातिशून्यरूपा 'दशा' विश्रान्तिस्थानमित्यर्थः । यदाहुः—

'शून्यतावस्थितः पश्चात्संवेदनविवर्जितः ।
निर्वाणः कृष्णवर्त्मेव निरुपाख्यो भवत्यसौ ॥' इति ॥ १० ॥

स एव च शून्यप्रमाता बहिर्मुखीभवन्प्राणप्रमातृतामासादयति—इत्याह—

स एव खात्मा मेयेऽस्मिन्भेदिते स्वीक्रियोन्मुखः ।
पतन्समुच्छलत्त्वेन प्राणस्पन्दोर्मिसंज्ञितः ॥ ११ ॥

स एव च 'खात्मा' शून्यप्रमाता—

'....................अभिलाषो मलोऽत्र तु ।' (स्व०तं० ४-१०४)

इत्याद्युक्तेरपूर्णम्मन्यतात्मकाणवमलयोगात्साकाङ्क्षतया पुनस्तत्स्वीकरणोन्मुखः सन् स्वस्मात् 'भेदिते' पृथक्कृतेऽस्मिन् नीलसुखादिरूपे 'मेये समुच्छलत्त्वेन पतन्' बहिर्मुखीभवन् प्राणादिशब्दव्यपदेश्यो भवेदित्यर्थः । किंचिच्चलनात्मनः स्वविमर्शरूपस्य स्पन्दनस्यैवायमाद्यः प्रसरः—इत्युपचारात्तच्छब्दव्यपदेश्यो न तु स एवायं,

---

अभावात्मक दोनों सत्त के विसर्जन) से, इत्यादि कही गई युक्ति से भाव और अभाव विषय वाले नेति-नेति इस दो परामर्श से (ज्ञाप्य) मध्यमपद के आवेश वाले योगियों की (यह) परा = शून्यातिशून्य रूप वाली दशा = विश्रामस्थान है । जैसा कि कहते हैं—शून्यता में स्थित और बाद के संवेदनो से रहित यह बुझी हुयी अग्नि के समान निरूपारव्य (अवक्तव्य) हो जाता है ॥ १० ॥

और यही शून्य प्रमाता बहिर्मुख होने पर प्राण प्रमाता बन जाता है—यह कहते हैं—

वही शून्यप्रमाता जब स्वीकार की ओर उन्मुख होता है तब पृथक् किए गए इस मेय के विषय में उच्छलत्ता के कारण गिरता हुआ प्राण, स्पन्द ऊर्मि संज्ञा वाला हो जाता है ॥ ११ ॥

वही खात्मा = शून्य प्रमाता

'यहाँ इच्छा ही मल है ।' (स्व.तं. ४।१०४)

इत्यादि उक्ति के द्वारा अपूर्णमन्यता रूप आणवमल से संपृक्त होने पर साकाङ्क्ष होने के कारण पुनः उसको स्वीकार करने की ओर उन्मुख होता हुआ, अपने से भेदित = अलग किए गए, इस घट सुख आदि रूप मेय के विषय में समुच्छलत्ता के कारण गिरता हुआ = बहिर्मुख होता हुआ प्राण आदि शब्दों से व्यवहार्य होता है । कुछ चलने वाला स्वविमर्श रूप स्पन्दन का ही यह प्रथम प्रसार है—इस कारण गौणरूप में उस शब्द के द्वारा व्यवहार्य होता है न कि वही यह है

तस्य शून्यप्रमात्रुल्लासादप्यूर्ध्वभावात् । एवमूर्मिशब्दादावुत्तरत्रापि ज्ञेयम् ॥ ११ ॥

यदभिप्रायेणैव भट्टश्रीकल्लटादयोऽप्येवमूचुः—इत्याह—

तेनाहुः किल संवित्प्राक्प्राणे परिणता तथा ।
अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ॥ १२ ॥

यद्यपि शून्यतावभासनपुरःसरं संवित्प्राणरूपतया परिस्फुरिता तथापि तदवभासनेऽस्या न कश्चिद्रूपान्तरोपग्रहः—इत्युक्तं 'प्राक् संवित्प्राणे परिणता' इति। तैरप्येतन्निर्मूलमेव नोक्तम्—इत्यागमोऽपि संवादितः 'अन्तःकरणेत्यादिना' । अन्तःकरणानां 'तत्त्वं' सारभूता बुद्धिस्तस्य बुद्धिप्रमातुरित्यर्थः । तेन बुद्धिप्रमातुरित्यर्थः । तेन बुद्धिप्रमातुः पूर्वं प्राणोल्लासः—इति सिद्धम् । अन्यथा कथं स तस्याश्रयः स्यात् ॥ १२ ॥

एवमयमेव परस्याः संविदः प्रथमः परिस्पन्दः—इति तदभेदवृत्त्यैव सर्वत्रास्य व्यवहारः—इत्याह—

इयं सा प्राणनाशक्तिरान्तरोद्योगदोहदा ।
स्पन्दः स्फुरत्ता विश्रान्तिर्जीवो हृत्प्रतिभा मता ॥ १३ ॥

'आन्तर' आद्यो योऽसौ 'उद्योग' उद्यन्तृतात्मा परिस्पन्दस्तत्र 'दोहदो'ऽभिलाषो

(इस प्रकार), क्योंकि शून्य प्रमाता के उल्लास के बाद उसकी सत्ता होती है । इसी प्रकार बाद वाले ऊर्मि आदि शब्दों के बारे में भी जानना चाहिए ॥ ११ ॥

इसी अभिप्राय से भट्ट कल्लट आदि ने भी ऐसा कहा है—यह कहते हैं—

इसलिए कहते हैं कि संवित् पहले प्राणरूप में परिणत हुई । (आगम भी हैं कि)—वायु अन्तःकरणों के तत्त्व की आश्रयता को प्राप्त हुई ॥१२॥

यद्यपि पहले शून्य रूप में अवभासन होने पर संवित् प्राण के रूप में स्फुरित हुई तथापि उस (= शून्यता के) अवभासन मे इसका कोई रूपान्तर नहीं हुआ—इसलिए कहा गया कि 'संवित् पहले प्राणरूप में परिणत हुई' । उसे (विद्वान्) ने भी इसे बिना प्रमाण के नहीं कहा । एतदर्थ—'अन्तःकरण' इत्यादि के द्वारा आगम भी साथ में कहा गया । अन्तःकरणों का तत्त्व = सारभूत = बुद्धि उसका अर्थात् बुद्धिप्रमाता का । इसलिए बुद्धिप्रमाता के पूर्व प्राण का उल्लास होता है । अन्यथा वह (प्राणवायु) कैसे उस (= अन्तःकरण तत्त्व) का आश्रय होगा ॥ १२ ॥

इस प्रकार यही पर संविद् का प्रथम स्पन्द है इसलिए उससे अभिन्न रूप में ही सर्वत्र इसका व्यवहार होता है—यह कहते हैं—

वह यह प्राणन शक्ति (जो कि) भीतरी परिस्पन्द के अभिलाष वाली है, स्पन्द, स्फुरत्ता, विश्रान्ति, जीव, हृदय और प्रतिभा कही गई है ॥१३॥

यस्याः सा तदेकनिष्ठेत्यर्थः ॥ १३ ॥

नन्वेवमुल्लसिताया अस्याः किं प्रयोजनम् ?—इत्याशङ्क्याह—

सा प्राणवृत्तिः प्राणाद्यै रूपैः पञ्चभिरात्मसात् ।
देहं यत्कुरुते संवित्पूर्णस्तेनैष भासते ॥ १४ ॥

सेयं सामान्यपरिस्पन्दात्मा प्राणवृत्तिः, पञ्चभिः प्राणापानाद्यै रूपैर्यत्तदन्त-र्बहिष्करणाद्याक्रान्तं पाञ्चभौतिकं 'देहमात्मसात्कुरुते' व्याप्यावतिष्ठते तेनैष देहो घटादिवत्संवेद्यत्वेऽपि संवित्पूर्णो भासते संवेत्तृतया प्रथत इत्यर्थः । अत एव मूढानामयं भ्रमो यच्चैतन्यविशिष्टात्कायादन्यः कश्चिन्नास्ति इति । यदुक्तम्—

'चैतन्यखचितात्कायान्नात्मान्योऽस्तीति मन्वते ।' इति ॥ १४ ॥

तदाह—

प्राणनावृत्तितादात्म्यसंवित्खचितदेहजाम् ।
चेष्टां पश्यन्त्यतो मुग्धा नास्त्यन्यदिति मन्वते ॥ १५ ॥

'मुग्धा' इति देहात्मनोर्विवेकमजानानाः । अयमेषां भावः—भूतान्येव हि

आन्तर = पहला, जो यह उद्योग = उद्यम रूप परिस्पन्द, उस विषय में दोहद = अभिलाषा, है जिसकी, वह अर्थात् इसी एक इच्छा वाली ॥ १३ ॥

प्रश्न—इस प्रकार उल्लासित इस (= प्राणशक्ति) का क्या प्रयोजन है ?—यह शङ्का कर कहते हैं—

वह प्राणवृत्ति पाँच प्राण आदि रूपों से देह को जो आत्मसात् करती है उससे यह (देह) संवित्पूर्ण भासित होता है ॥ १४ ॥

यह सामान्य परिस्पन्द रूप प्राणवृत्ति पाँच = प्राण अपान आदि रूपों के दारा जो भीतरी एवं बाहरी इन्द्रिय आदि से आक्रान्त पञ्चभौतिक शरीर को आत्मसात् करता है = व्याप्त करके स्थित रहता है, उससे यह देह घट आदि के समान वेद्य होते हुए भी संवित् से परिपूर्ण भासित होता है अर्थात् ज्ञाता के रूप मे प्रसिद्ध होता है । इसलिए मूर्खों को यह भ्रम होता है कि चैतन्य विशिष्ट शरीर से अन्य कोई नहीं हैं । जैसा कि कहा गया है—

चैतन्यविशिष्ट शरीर से भिन्न आत्मा नहीं है—ऐसा (चार्वाक लोग) मानते हैं ॥ १४ ॥

वह कहते हैं—

मूर्ख लोग प्राणन वृत्ति के साथ तादात्म्य को प्राप्त संवित् से युक्त देह से उत्पन्न चेष्टा को देखते हैं इसलिए दूसरा नहीं हैं—ऐसा मानते हैं ॥ १५ ॥

मृदाद्यवस्थायामचेतनान्यपि सुराकारतया परिणता गुडपिष्टादय इव मदशक्तिं, शरीराकारपरिणतानि चैतन्यं प्रतिपद्यन्ते, कालान्तरे च परिणामविशेषभावत्वाच्च तच्छून्यतामुपगच्छन्ति, तावन्तं च कालं चैतन्यानपायात्स्मृत्यनुसन्धानादिव्यवहार-निपुणतया चेष्टन्ते—इति किमन्येन तदतिरिक्तेनात्मनेति ॥ १५ ॥

एतदधिशयाना एव 'चार्वाका' इत्युच्यन्ते—इत्याह—

तामेव बालमूर्खस्त्रीप्रायवेदितृसंश्रिताम् ।
मतिं प्रमाणीकुर्वन्तश्चार्वाकास्तत्त्वदर्शिनः ॥ १६ ॥

तामेव मतिमिति, 'चैतन्यविशिष्टः कायः पुरुषः' इत्याद्युक्त्या चैतन्यखचितो देह एवात्मा न पुनस्तदतिरिक्तः कश्चित्—इत्येवंरूपाम् । बालादिसंश्रयेणास्या महाजनानुपसेव्यत्वं दर्शितम् । प्रमाणीकुर्वन्त इति, देहादूर्ध्वमपि यदि कश्चित्त-दतिरिक्त आत्मा संभवेत्तस्य पूर्वशरीरमपहाय शरीरान्तरमधितिष्ठत एतच्छरीर-शैशवादिदशानुभूतार्थस्मरणवत् पूर्वपूर्वशरीरानुभूतार्थस्मरणमपि भवेत् । न हि तस्य शरीरभेदेऽपि नित्यत्वात्स्मरणविशेषे कारणं किंचिदुत्पश्यामो येनेह जन्मन्येवानुभूतं

मुग्ध = शरीर और आत्मा के भेद को न जानने वाले । उनका यह विचार है—महाभूत ही मिट्टी आदि की अवस्था में जड़ रहते हुए भी, जैसे गुड जौ आदि सुरा के आकार में परिणत होने पर मद शक्ति को, उसी प्रकार शरीर के आकार में परिणत हो कर चैतन्य को प्राप्त होते हैं और कालान्तर में विशिष्ट परिणाम के कारण उस (= चैतन्य) से शून्य हो जाते हैं । उतने काल तक चैतन्य के नष्ट न होने से स्मृति अनुसन्धान आदि व्यवहार मे निपुण के समान चेष्टा करते हैं—इस प्रकार उससे (= पञ्चमहाभूत से) अतिरिक्त आत्मा (को मानने) से क्या लाभ? ॥ १५ ॥

इसको मानने वाले ही चार्वाक कहे जाते हैं—यह कहते हैं—

बालक मूर्ख और स्त्री के सदृश ज्ञाताओं में रहने वाली इसी बुद्धि को प्रमाण मानने वाले तत्त्वदर्शी चार्वाक हैं ॥ १६ ॥

उसी बुद्धि को 'चैतन्य से व्याप्त शरीर ही आत्मा है' इत्यादि उक्ति के द्वारा चैतन्य से युक्त शरीर ही आत्मा है उससे भिन्न कोई नहीं—इस प्रकार की (बुद्धि)। बाल आदि के द्वारा माने जाने से इस (बुद्धि) का वृद्ध लोगों के द्वारा न स्वीकृत होना सङ्केतित है । प्रमाण मानते हुए यदि शरीर के आगे भी कोई उससे भिन्न आत्मा संभव होता तो, जैसे इस शरीर में शैशव आदि अवस्था में अनुभूत विषयों का स्मरण होता है उसी प्रकार पूर्व शरीर को छोड़कर दूसरी शरीर धारण करने वाला वह पहले-पहले शरीरों मे अनुभूत विषयों का स्मरण करता । शरीर भिन्न होने पर भी उसके नित्य होने के कारण विशिष्ट संस्मरण होने में हम कोई कारण नहीं देखते जिससे (वह) इस जन्म मे ही अनुभूत (पदार्थ) का स्मरण करता है

स्मरति नान्यजन्मानुभूतम्—इति तस्मादूर्ध्वमन्यः कश्चिन्नात्मास्तीत्येव युक्तम् । यच्छ्रुतिरपि—

'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु-
विनश्यति न प्रेत्य संज्ञास्ति' (बृ०आ०उ० ४।५।१३)

इति । अतश्च परलोकादिचिन्तामपास्य यावज्जीवं सुखमेवासितव्यम्—इत्येषां तत्त्वमित्युक्तं 'तत्त्वदर्शिन' इति । यदाहुः—

'यावज्जीवं सुखं जीवेन्नास्ति मृत्युरगोचरः ।
भस्मीभूतस्य शान्तस्य पुनरागमनं कुतः ॥' इति ॥ १६ ॥

नन्वेवं तत्त्वमनुशीलयतामेषां किं स्यात् ?—इत्याशङ्क्याह—

तेषां तथा भावना चेद्दार्ढ्यमेति निरन्तरम् ।
तद्देहभङ्गे सुप्ताः स्युरातादृग्वासनाक्षयात् ॥ १७ ॥

'सुप्ता' इति अपवेद्यप्रलयाकलप्राया इत्यर्थः ॥ १७ ॥

तद्वासनाक्षये त्वेषां किं भवेत् ?—इत्याशङ्क्याह—

और दूसरे जन्म में अनुभूत का नहीं । इसलिए उससे ऊपर कोई आत्मा नाम की चीज नहीं हैं यही ठीक हैं । श्रुति भी है—

विज्ञानघन ही इन महाभूतों से उठकर उन्हीं में लीन हो जाता है । इसलिए मरने के बाद संज्ञा नहीं हैं । (बृ. उ. ४।५।१३)

इसलिए परलोक आदि की चिन्ता को छोड़कर जीवनपर्यन्त सुख से रहना चाहिए—यही इनका तत्त्व है । इसलिए कहा गया—तत्त्वदर्शी लोग । जैसा कि कहा है—

जीवनपर्यन्त सुख से जीना चाहिये । मृत्यु नहीं आएगी ऐसा नहीं है । भस्म हुए और शान्त (शरीर) का पुनः आगमन कैसा ॥ १६ ॥

प्रश्न—इस प्रकार तत्त्व का अनुशीलन करने वाले इन लोगों का क्या होता है?—यह शङ्का कर कहते हैं—

यह उनकी उस प्रकार की भावना निरन्तर पुष्ट होती गई तो उस शरीर के मर जाने के बाद उस प्रकार की वासना के नष्ट होने तक वे सुप्त रहेंगे ॥ १७ ॥

सोए रहेंगे—अपवेद्य प्रलयाकल के समान ॥ १७ ॥

प्रश्न—उस वासना का क्षय होने पर इनका क्या होता है ?—यह शङ्का कर कहते हैं—

तद्वासनाक्षये त्वेषामक्षीणं वासनान्तरम् ।
बुद्धं कुतश्चित्संसूते विचित्रां फलसम्पदम् ॥ १८ ॥

नन्वेषां सांख्यादिभिरपि साम्यं यत्तेषामप्येवंप्रायैव मुक्तिः, पुनरपि तत्तद्वासनानुसारं विचित्रफलोपभोगस्योदयात् । यद्वक्ष्यति—

'सांख्यवेदादिसंसिद्धाञ्छ्रीकण्ठस्तदहर्मुखे ।
सृजत्येव पुनस्तेन न सम्यङ्मुक्तिरीदृशी ॥'

(तं० ६।१५३) इति ।

तत्सर्वत्रास्यैव कथमवरतया निर्देशः । यदाहुः—'चार्वाकास्तु वराकाः प्रतिक्षेप्तव्या एव कः क्षुद्रतर्कस्य तदीयस्येह गणनावसरः' इति । तत्किमेतत् ? —इत्याशङ्क्याह—

अदार्ढ्यशङ्कनात्प्राच्यवासनातादवस्थ्यतः ।
अन्यकर्तव्यशैथिल्यात्संभाव्यानुशयत्वतः ॥ १९ ॥
अतद्रूढान्यजनताकर्तव्यपरिलोपनात् ।
नास्तिक्यवासनामाहुः पापात्पापीयसीमिमाम् ॥ २० ॥

यदप्यस्मदपेक्षया दर्शनान्तराणां तुल्यमेव पापत्वं तथापि नास्तिक्यवासनाया-

---

उस वासना का क्षय होने पर दूसरी वासनायें जो कि क्षीण नहीं हुई हैं, कहीं से जाग कर विचित्र फलों को उत्पन्न करती हैं ॥ १८ ॥

प्रश्न—इनकी सांख्य आदि से भी समानता है क्योंकि उनकी भी मुक्ति लगभग ऐसी ही है । क्योंकि बार-बार भिन्न-भिन्न वासनाओं के अनुसार विचित्र फलों के उपभोग का उदय होता है । जैसा कि कहेंगे—

"सांख्य वेद आदि के मार्गों के द्वारा सिद्धि को प्राप्त लोगों की, भगवान् अनन्तनाथ दिन के प्रारम्भ में पुनः सृष्टि करते ही हैं । इसलिए उनकी इस प्रकार की पूर्ण मुक्ति नहीं हैं" ॥ १८ ॥ (तं. आ. ६।१५३)

तो फिर उसी का ही सबसे निकृष्ट रूप में क्यों निर्देश किया गया । जैसा कि कहते हैं—बेचारे चार्वाक तो खण्डन करने योग्य हैं ही । उसके क्षुद्र तर्क की गणना का यहाँ कहाँ अवसर हैं ? तो यह क्या है ?—यह शङ्का कर कहते हैं—

दृढ़ता की शङ्का न होने से, प्राचीन वासना के उसी रूप में रहने से, दूसरे कर्त्तव्यों के कारण (इसके) शिथिल होने पर सम्भावित पश्चात्ताप से, रूढ अन्य (दर्शनों के अनुयायी) जनसमूह के कर्त्तव्य का लोप न होने से, अन्य पापी (दर्शनों) की अपेक्षा, इस नास्तिक वासना को अधिक पापवाली कहा गया है ॥ १९-२० ॥

स्ततोऽप्यतिशयेन पापत्वं, यतः 'प्राच्या' अनिषेध्यत्वात्पूर्वभाविनी येयमास्तिक्यवासना तस्यास्तादवस्थ्यं । नहि नास्तिक्यवासनाया दार्ढ्येन प्ररोहोऽस्ति येनैतदुपरमो भवेन्निर्मूलत्वेनादार्ढ्यस्यात्राशङ्क्यमानत्वात् । यथा परं ब्रह्म मूलत्वेनावलम्ब्य प्रपञ्चो मिथ्या—इत्याद्युच्यमानं दार्ढ्येन प्ररोहमियान्नैवमेतत्; आत्मनो हि नास्तित्वे किमन्यदवशिष्यते यन्नामाजडं मूलभूतमधिकृत्य सर्वमिदं सुव्यवस्थितं स्यात्; जडानामेव च परिणामो भवेदिति न चेतनत्वेनासौ युज्यते—इत्यन्यैर्बहूक्तमिति तत एवावधार्यम् । अत एवास्तिक्यवासनायास्तादवस्थ्येन 'अन्येषां' दर्शनान्तरस्थानाम् 'अग्निहोत्रं जुहुयात्', 'न हिंस्यात्सर्वभूतानि' इत्याद्यात्मना विधिनिषेधरूपेण 'कर्तव्येन' शैथिल्यमस्या जायते । यदात्मनोऽस्तित्वे यदि कैश्चित्पारलौकिकं किंचिदनुष्ठीयते तद्यावद्दूरे आस्ताम्; आत्मनः पुनर्नास्तित्वेऽप्यन्यैः कुशलप्रवृत्तिरकुशलविरतिश्च क्रियते—इत्यत्र निमित्तं किंचित्संभवेत्, अन्यथा सर्व एव किमेवं कुर्युः । अस्माकं च किंचिदपि कर्तव्यं नास्ति—इत्यस्थान एवास्माभिर्भ्रान्तं, किमिदं व्यामूढैरिवासितम्—इत्येवमात्मा पश्चात्तापोऽप्यत्र संभावनीयस्तस्मिन्नुत्पन्ने सति सुखमेव न्यायोपन्यासकदर्थनां परिहृत्य—

'सन्दिग्धेऽपि परे लोके त्याज्यमेवाशुभं बुधैः ।

यद्यपि हमारी अपेक्षा अन्य दर्शनों का पापी होना समान ही है तो भी नास्तिक्यवासना उन से भी अधिक पापवाली है । क्योंकि प्राच्य = निषेध्य न होने के कारण पहले वर्त्तमान जो यह आस्तिक्यवासना है वह उसी प्रकार रहती है; नास्तिक्य वासना प्रबलतर रूप में नहीं उत्पन्न होती जिससे यह (आस्तिक्य वासना) शान्त हो जाय क्योंकि (नास्तिक्यवासना के) निर्मूल होने के कारण यहाँ अदृढता की आशङ्का होती हैं । जिस प्रकार परम ब्रह्म को आधार मान कर (यह) प्रपञ्च मिथ्या है—इत्यादि वचन दृढ़तापूर्वक उद्धृत होता है वैसा यह नहीं है । आत्मा के न रहने पर दूसरा और क्या बचेगा जिस चेतन आधार को मान कर इस सबकी सुव्यवस्था होगी । जडों का ही परिणाम होता है इसलिए इस (= जड़) को चेतन नहीं कहा जा सकता ऐसा दूसरे लोगों ने बहुत कहा है—इसलिए वहीं से समझ लेना चाहिए। इसलिए आस्तिक्यवासना के तदवस्थ रहने से, अन्य = दूसरे दर्शनों के अनुयायियों, का 'अग्निहोत्र करना चाहिए ।' 'सब प्राणियों की हिंसा नहीं करनी चाहिए ।' इत्यादि विधिनिषेधरूप कर्त्तव्य से इस =(नास्तिक्य भावना) की शिथिलता हो जाती हैं । आत्मा के होने पर यदि कुछ लोग कुछ पारलौकिक अनुष्ठान करते हैं तो वह तो दूर की बात रही आत्मा के न होने पर भी दूसरे लोग उत्कृष्ट कार्य में प्रवृत्ति और अनुत्कृष्ट कार्य से निवृत्ति करते हैं—तो यहाँ कुछ कारण अवश्य होना चाहिए अन्यथा सभी लोग ऐसा क्यों न करने लगें । हमारा तो कोई कर्त्तव्य ही नहीं हैं फिर हम लोग गलत जगह घूम रहें हैं । (हम) मूर्खों ने क्या कर डाला—इत्यादि रूप पश्चात्ताप भी यहाँ सम्भव हैं । उसके उत्पन्न होने पर आसानी से न्यायपूर्वक प्राप्त निन्दा को छोड़कर –

यदि नास्ति ततः किं स्यादस्ति चेन्नास्तिको हतः ॥'

इत्यादिना मित्रसंमतेनाप्युपदेशेन तस्यामास्तिक्यवासनाया रूढयान्यया दर्शनान्तरस्थया जनतयावश्यमेवास्याः परिलोपः कार्यः—इति ॥ २० ॥

तदेवमत्र प्रसक्तानुप्रसक्तिकया परदर्शनकथा मा प्रसाङ्क्षीत् इति प्रकृतमेवानुसरति—

अलमप्रस्तुतेनाथ प्रकृतं प्रविविच्यते ।

तदेवाह—

यावान्समस्त एवायमध्वा प्राणे प्रतिष्ठितः ॥ २१ ॥
द्विधा च सोऽध्वा क्रियया मूर्त्या च प्रविभज्यते ।

द्विधेति देशकालभेदेन । तत्र क्रियया कालाध्वा प्रविभज्यते मूर्त्या च देशाध्वा । यदुक्तम्—

'मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ ।
क्रियावैचित्र्यनिर्भासात्कालक्रममपीश्वरः ॥'

(ई० प्र० २।१।५) इति ॥ २१ ॥

"पर लोक के सन्दिग्ध होने पर भी विद्वान् को चाहिए कि (वह) अशुभ (कार्यों) का त्याग कर दे । यदि (परलोक) नहीं है तो क्या होगा (= कोई नुकसान नहीं) और यदि है तो नास्तिक तो मारा गया ।"

इत्यादि मित्रसम्मत उपदेश के द्वारा आस्तिक्यवासना के उत्पन्न होने पर, रूढ अन्य = दूसरे दर्शनों में आस्था रखने वाली जनता, के द्वारा अवश्य ही इस (= नास्तिकवासना) का लोप कर दिया जायगा ॥ २० ॥

तो इस प्रकार यहाँ प्रसङ्गानुप्रसङ्ग के द्वारा दूसरे दर्शनों का वर्णन न आ पड़े इसलिए प्रस्तुत का ही अनुसरण करते हैं—

अप्रस्तुत का कथन समाप्त कर अब प्रस्तुत का विवेचन करते हैं ॥ २१- ॥

वही कहते हैं—

"यह जितना समस्त अध्वा प्राण में प्रतिष्ठित है वह अध्वा क्रिया और मूर्त्ति के द्वारा दो प्रकार से विभक्त होता है ॥ -२१-२२- ॥

दो प्रकार का—देश और काल के भेद से । उनमें क्रिया के द्वारा कालाध्वा का विभाग होता है और मूर्त्ति के द्वारा देशाध्वा का । जैसा कि कहा गया है—

"यह ईश्वर मूर्त्ति की विचित्रता से देशक्रम का आभास कराता है और क्रिया वैचित्र्य के निर्भास से काल क्रम का" ॥ २१ ॥ (ई. प्र. २।१।५)

ननु—

'अध्वा समस्त एवायं चिन्मात्रे संप्रतिष्ठितः ।
यत्तत्र नहि विश्रान्तं तन्नभःकुसुमायते ॥' (तं० ८।३)

इत्यादिवक्ष्यमाणनीत्यास्य संविदि प्रतिष्ठितत्वं युक्तं न जडात्मनि प्राणे ?—इत्याशङ्क्याह—

प्राण एव शिखा श्रीमत्त्रिशिरस्युदिता हि सा ॥ २२ ॥
बद्धा यागादिकाले तु निष्कलत्वाच्छिवात्मिका ।

'शिखा परिमिता शक्तिर्भैरवस्य तु कथ्यते ।
क्रियाशक्तिरिति ख्याता...................... ॥' इति ॥ २२ ॥

ननु को नामास्या बन्धो येन यागादौ निष्कलत्वाच्छिवात्मिकेयं स्यात् ?—इत्याशङ्क्याह—

यतोऽहोरात्रमध्येऽस्याश्चतुर्विंशतिधा गतिः ॥ २३ ॥
प्राणविक्षेपरन्ध्राख्यशतैश्चित्रफलप्रदा ।

यत्षष्टिघटिकासंख्याकस्य बाह्यस्याहोरात्रस्य मध्येऽस्याः प्राणरूपायाः पारमेश्वर्याः क्रियाशक्तेः प्राणचाराणां रन्ध्राख्यैर्द्वारसंख्याकैर्नवभिः शतैरुपलक्षिता,

---

प्रश्न—"यह सभी अध्वा चिन्मात्र में प्रतिष्ठित हैं । जो उसमें प्रतिष्ठित नहीं है वह आकाशकुसुम की भाँति हैं ।" (तं. आ. ८।३)

इत्यादि आगे कही जाने वाली नीति के अनुसार इसकी संविद् में प्रतिष्ठा उचित है न कि जडस्वरूप प्राण में ?—यह शङ्का कर कहते हैं—

प्राण ही शिखा है । त्रिशिरोभैरव में उसे बद्ध कहा गया है । याग आदि के समय निष्कल होने से (वह) शिवस्वरूपिणी होती है ॥ -२२-२३- ॥

"भैरव की परिमित शक्ति शिखा कही जाती है । वह क्रियाशक्ति (के नाम से) प्रसिद्ध है । ...." ॥ २२ ॥

प्रश्न—उसका बन्धन क्या है जिसके कारण याग आदि में निष्कल होने के कारण यह शिवात्मिका होती है ?—यह शङ्का कर कहते हैं—

क्योंकि दिन और रात्रि के बीच में इसकी चौबीस प्रकार की गति होती है । (इसलिए) प्राणविक्षेपों के रन्ध्र = छिद्र = नव, शत = सौ = ९०० के द्वारा उपलक्षित (वह) विचित्र फल देने वाली है ॥ -२३-२४- ॥

साठ घड़ी संख्या वाले बाह्य अहोरात्र के बीच इस प्राणरूपा पारमेश्वरी क्रिया-शक्ति के प्राणचारों के रन्ध्र नामक = द्वार संख्या वाले = नव सौ के द्वारा

अत एव चतुर्विंशतिभिः संक्रान्तिलक्षणैः प्रकारैरैहिकामुत्रिकभेदाच्चित्रफलप्रदा गतिरूर्ध्वाधरवाहलक्षणश्चारो भवेदित्यर्थः । अयमत्राभिप्रायः—इह खलु सर्वप्राणिनां—

'मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम् ।
तथा प्रवर्तते प्राणस्त्वयत्नादेव सर्वदा ॥' (स्व०तं० ७।५७)

इत्याद्युक्त्या स्वरसत एव मध्यमः प्राणो वहति—इति बाह्येनाहोरात्रेण—

'षट्शतानि वरारोहे सहस्राण्येकविंशतिः ।
अहोरात्रेण बाह्येन अध्यात्मं तु सुराधिपे ॥' (स्व०तं० ७।५३)

इत्याद्युक्त्यान्तः सषट्शता सहस्रैकविंशतिः प्राणचाराणां भवेत् । तत्र प्रतिघटिकं—

'शतानि त्रीण्यहोरात्राः षष्टिरेव तथाधिकाः ।
वर्षमेतत्समाख्यातं बाह्ये वैघटिका च सा ॥' (स्व०तं० ७।५१)

इत्याद्युक्त्या प्राणचाराणां सषष्टिस्त्रिशती—इति सार्धेन घटिकाद्वयेन नवशतानि भवन्ति, स एव च संक्रान्तीनां प्रत्येकमुदयः । यदुक्तम्—

उपलक्षित, इसलिए २४ संक्रान्तिलक्षण वाले प्रकारों से इस संसार वाले और पारलौकिक भेद से विचित्र फल देने वाली गति = ऊपर नीचे चलने वाला चार =(सञ्चरण) होता है । यहाँ यह अभिप्राय हैं—

इस (संसार) में सभी प्राणियों का—

"मन को भी दूसरी जगह डाल दिया गया; आँख को अन्यत्र गिरा दिया गया तो भी प्राण बिना प्रयास के सर्वदा चलता रहता है ।" (स्व. तं. ७।५७)

इत्यादि उक्ति के द्वारा मध्यम प्राण स्वाभविक रूप से चलता है—इसलिए बाह्य अहोरात्र के द्वारा

"हे सुन्दर आरोहवाली ! देवताओं की रानी ! बाह्य दिनरात्रि के द्वारा इक्कीस हजार छः सौ (२१६००) और अध्यात्म (= शरीर के अन्दर भी उतना ही प्राणसञ्चार होता है) ।" (स्व० तं. ६।५३)

इत्यादि उक्ति के द्वारा भीतर २१६०० बार प्राण का सञ्चार होता है । उसमें एक घड़ी में—

"साठ अधिक तीन सौ (= ३६०) दिनों का एक वर्ष कहा गया है । और बाह्य रूप में वह एक घड़ी है ।" (स्व० तं. ७।५१)

इत्यादि उक्ति के द्वारा ३६० प्राणचार को आधे सहित दो घड़ी (= २।१।२ घड़ी) से (गुणा करने पर) ९०० प्राणसञ्चार होते हैं । और यही (काल) संक्रान्तियों में प्रत्येक का उदय (काल) है । जैसा कि कहा गया है—

'चतुर्विंशतिसंक्रान्त्यः समधातोः स्वभावतः ।
शतानि नव वै हंस एकामेकां वहेत्सदा ॥'
(स्व०तं० ७।१६८) इति ।

सार्धं च घटिकाद्वयं चतुर्विंशतिधा गुणितं षष्टिर्घटिका भवन्ति—इत्यहोरात्रमध्ये तत्संख्याकानामुदयः । यदुक्तम्—

'बाह्ये चैव त्वहोरात्रे अध्यात्मं तु वरानने ।
चतुर्विंशतिसंक्रान्तीः प्राणहंसस्तु संक्रमेत् ॥
अहनि द्वादश प्रोक्ता रात्रौ वै द्वादश स्मृताः ।'
(स्व०तं० ७।१६६) इति ।

यद्यपीयन्तः प्राणचारा अहोरात्रमध्ये भवन्ति—इत्येतावदत्र वक्तव्यं, तथापि तथात्वे तेषां गणनामात्रं प्रदर्शितं भवेत् न तु तत्तद्विचित्रफलोदयनिमित्तत्वमपीत्येवमुक्तम् ॥ २३ ॥

नन्वेवंविधः शिखाया बन्धः—इति वक्तुं प्रस्तुते किमिदमप्रस्तुतमभिधीयते यत्प्राणचाराणामियती गतिरिति । नैतत्, अयमेव हि शिखाबन्धो यत्प्राणशक्तेः प्रतिचारमादिमध्यान्तेष्ववधानेन पुनः पुनः परामर्शनं नाम । यदभिप्रायेणैव—

"सम धातु वाले (= वात पित्त श्लेष्मा इन तीन धातुओं के उचित मात्रा में वर्त्तमान रहने से स्वस्थ शरीर वाले व्यक्ति) की स्वभावतः चौबीस संक्रान्तियाँ होती हैं । (यह) हंस एक-एक संक्रान्ति में ९०० (प्राणचारों) का वहन करता है ॥" (स्व० तं. ७।१६८)

ढाई घड़ी को २४ बार गुणा करने पर ६० घड़ियाँ होती है । इसलिये एक दिन रात्रि में उतनी संख्याओं वाले प्राणों का उदय होता है । जैसा कि कहा गया है—

"हे सुन्दर मुख वाली ! बाहर दिनरात में और शरीर के अन्दर प्राण हंस चौबीस संक्रान्तियों का संक्रमण करता है । दिन में बारह और रात्रि में बारह (संक्रान्तियां) कही गयी है ॥" (स्व. तं. २३।१।२)

यद्यपि दिनरात्रि के बीच इतने प्राणचार होते हैं—इतना ही यहाँ कहना है तो भी वैसा होने पर उनकी गणनामात्र यहाँ दिखलायी जानी चाहिये न कि भिन्न-भिन्न विचित्रफलों के उदय की कारणता; इसलिये ऐसा कहा गया ॥ २३ ॥

प्रश्न—इस प्रकार शिखा का बन्धन होता है—ऐसा कहने के लिये प्रस्तुत होने पर यह अप्रस्तुत क्यों कहा जा रहा है कि प्राणचारों की इतनी गति है? उत्तर—ऐसा नहीं है । यही शिखाबन्ध है कि प्राणशक्ति का, हर एक सञ्चार के आदि मध्य और अन्त में निरन्तर बार-बार परामर्श करना । इसी अभिप्राय से—

'षट् शातानि दिवा रात्रौ सहस्राण्येकविंशतिः ।
जपो देव्याः समुद्दिष्टः सुलभो दुर्लभो जडैः ॥'

(वि० भै० १५६)

इत्याद्यन्यत्रोक्तं, तदाह—

क्षपा शशी तथापानो नाद एकत्र तिष्ठति ॥ २४ ॥
जीवादित्यो न चोद्गच्छेत्तुट्यर्धं सान्ध्यमीदृशम् ।
ऊर्ध्ववक्त्रो रविश्चन्द्रोऽधोमुखो वह्निरन्तरे ॥ २५ ॥
माध्याह्निकी मोक्षदा स्याद् व्योममध्यस्थितो रविः ।
अनन्तमितसारो हि जन्तुचक्रप्रबोधकः ॥ २६ ॥
बिन्दुः प्राणो ह्यहश्चैव रविरेकत्र तिष्ठति ।
महासन्ध्या तृतीया तु सुप्रशान्तात्मिका स्थिता ॥ २७ ॥

यदात्रैकत्र वामपार्श्वे द्वादशान्ताद्धृदन्तं चरन्क्षपाशशी तिष्ठति हृदये निवृत्तगतिर्भवति प्राणादित्यश्च ततो नोद्गच्छति तदेदृशमपानीयमन्त्यं तुट्यर्धं सान्ध्यं वक्ष्यमाणनीत्योद्गच्छत्प्राणार्काद्यतुट्यर्धसंमीलनया स चतुर्भागाङ्गुलद्वय-प्रमाणप्राणचाररूपा प्राभातिकी सन्ध्या भवेदित्यर्थः । यदुक्तं तत्र—

"दिनरात में देवी का २१६०० जप योगी लोगों के लिये सुलभ (होते हुए) जड़ लोगों के द्वारा दुर्लभ है ।" (वि. मै. १२६)

इत्यादि दूसरे (ग्रन्थ) में कहा गया है । वही कहते हैं—

(जब) रात्रि, चन्द्रमा, अपान और नाद एक जगह रहते हैं तथा प्राणादित्य उदित नहीं होता (तो वह) तुटि का आधा भाग ऐसी (प्रभातकालीन) सन्ध्या होती है । जब सूर्य ऊर्ध्वमुख और चन्द्रमा अधोमुख होता है तथा अग्नि (दोनों के) बीच में रहता है तब मोक्षदायिनी मध्याह्न सन्ध्या होती है । क्योंकि (उस समय) अक्षीणतत्त्व वाला सूर्य जो कि जन्तुसमूह का उद्बोधक है, आकाश के मध्य में स्थित रहता है । जब बिन्दु प्राण दिन और सूर्य एक स्थान में होते हैं तो वह तीसरी सुप्रशान्तरूपा महासन्ध्या होती है ॥ -२४-२७ ॥

जब एकत्र = बायीं ओर, द्वादशान्त से हृदय तक चलता हुआ अपान रूपी चन्द्रमा स्थिर हो जाता है = हृदय में (पहुँच कर) गतिशून्य हो जाता है तथा प्राण आदित्य उस स्थान से ऊपर नहीं चलता तब इस प्रकार का = अपान से सम्बद्ध अन्तिम आधा तुटि वाला, सान्ध्य = आगे कही जाने वाली रीति से ऊपर उठते हुए प्राणादित्य के प्रथम तुट्यर्ध को मिश्रित करने से सवा दो अंगुल प्रमाण वाले प्राण का सञ्चार रूप प्रभात कालीन सन्ध्या होती है । जैसा कि वहाँ कहा गया है—

'स चन्द्रो विद्यमानोऽपि अपानो हृदि मध्यतः ।
यदा तूत्सन्नतां याति जीवादित्यो न चोद्गमेत् ॥
प्राभातिकीति विज्ञेया आत्मतत्त्वप्रबोधिनी ।
क्षपा शशी तथापानो नाद एकत्र तिष्ठति ॥
तुट्यर्धं ज्ञानमहसा सन्ध्या वै समुदाहृता ।' इति ।

तदनन्तरं च यदा प्राणात्मा रविरूर्ध्वमुखत्वेन चरंस्ताल्वाद्यात्मन्यन्तरे स्थितश्चन्द्रश्चापानात्माधोमुखत्वेन—इति तयोः प्रमाणप्रमेयात्मनोः सङ्घट्टात्प्रमातृरूपो वह्निरुदियात्तदेयं माध्याह्निकी सन्ध्या मोक्षदा स्यात्; यतो मध्यनाडीसंबन्धिनो 'व्योम्नः' सुषिरस्य 'मध्ये' तालुस्थाने स्थितो बहिर्मुखत्वेन प्रमाणत्वेऽपि प्रमातृरूपस्यानपायादनस्तमितसारो रविर्जन्तुचक्रस्य प्रकर्षेण 'बोधकः' प्रमाणप्रमेयमयत्वेऽपि प्रमातृरूपतयावभासक इत्यर्थः । यदुक्तं तत्र—

'ऊर्द्ध्ववक्त्रः स्थितो भानुश्चन्द्रश्चाधोमुखः स्थितः ।'

इत्युपक्रम्य—

'तदन्तराले उदितस्ताल्वाकाशान्तगोचरे ।
प्रमाणरहितो भाव्यः सुशान्तः शान्तबोधनात् ॥
व्योमवद् व्योमवह्निस्तु तुट्यर्धं कालकल्पनात् ।

'जब वह अपान रूपी चन्द्रमा विद्यमान रहते हुये भी हृदय के बीच में शान्त हो जाता है और प्राणादित्य ऊपर नहीं जाता तब आत्मतत्त्व की प्रबोधिका प्रभातकालीन सन्ध्या जाननी चाहिये । जब रात्रि अपान चन्द्रमा, और नाद एक स्थान में होते हैं तब वह आधा तुटि वाला (काल) ज्ञान रूप तेज वाली (= आत्मतत्त्वबोधक) सन्ध्या कही गई है ।'

उसके बाद जब प्राण रूपी सूर्य ऊपर मुख होकर चलता हुआ तालु आदि के मध्य स्थित होता है और अपान रूप चन्द्रमा अधोमुख रहता है तो दोनों प्रमाण प्रमेय रूपों के सङ्घट्ट से प्रमाता रूप वह्नि का उदय होता है तब यह मोक्षदायिनी मध्याह्न की सन्ध्या होती है क्योंकि मध्य नाड़ी से सम्बन्धित व्योम = छिद्र के मध्य = तालु स्थान में स्थित बहिर्मुखरूप में प्रमाण होते हुये भी प्रमातृरूप के नष्ट न होने से अक्षीणसार वाला सूर्य जन्तुसमूह का प्रकर्ष के साथ बोधक = प्रमाण-प्रमेयमय होने पर भी प्रमाता के रूप में अवभासक होता है । जैसा कि वहाँ कहा गया है—

'सूर्य ऊर्ध्वमुख और चन्द्रमा अधोमुख स्थित रहता है'—

इस प्रकार उपक्रम कर—

'उन दोनों के बीच तालु आकाश के मध्य में उदित हुए व्योमवह्नि की भावना करनी चाहिए । (वह व्योमवह्नि) तुट्यर्ध काल की कल्पना के कारण तथा शान्त

माध्याह्निकी तु विज्ञेया संध्या मोक्षप्रदायिका ॥
व्योममध्यस्थितः सूर्यः परादित्येति कथ्यते ।
अनस्तमितसारो हि जन्तुचक्रप्रबोधकः ॥' इति ।

तदनन्तरं च बिन्द्वाद्यात्मना रविर्यदैकत्र द्वादशान्ते 'तिष्ठति' निवृत्तगतिर्भवति, अर्थाच्चापानचन्द्रश्च नोद्गच्छति तदा निःशेषविश्वोपशमात्स्वप्रशान्तात्मिका, अत एवेयं महती सन्ध्या तृतीया 'स्थिता' स्वरसोदितत्वेन वर्तमानेत्यर्थः । यदुक्तम् तत्र—

'बिन्दुः प्राणोऽप्यहश्चैव रविरेकत्र तिष्ठति ।
सुप्रशान्तं तु संतिष्ठेन्मनोव्यावृत्तिवर्जितः ॥
कृत्वा प्रशान्तभूमौ च स्वरूपं सन्धिदेशतः ।
महासन्ध्या तु विज्ञेया तृतीया परिकीर्तिता ॥' इति ॥ २७ ॥

एतच्चोपसंहारद्वारेण प्रकृते योजयति—

एवं बद्धा शिखा यत्र तत्तत्फलनियोजिका ।

एवमुक्तेन प्रकारेण क्रमेण यत्र यागादौ प्राणशक्त्यात्मिका शिखा बद्धा मार्गान्तरखिलीकारेण मध्यधामन्येव निश्चलत्वमापादिता तत्र तस्य तस्य मन्त्र-संनिधानादेः फलस्य नियोजिका भवेदित्यर्थः । तदुक्तं तत्र—

बोध के कारण आकाश के समान, सुशान्त और प्रमाणरहित है । यह मोक्ष देने वाली मध्याह्न सन्ध्या है । व्योम के मध्य में स्थित सूर्य परादित्य कहलाता है । वह सारयुक्त और जीवगण का बोधक है ।''

उसके बाद बिन्दु आदि के रूप में सूर्य जब एकत्र = द्वादशान्त में स्थित = गतिहीन, होता है और फलतः अपान चन्द्र ऊपर नहीं आता उस समय सम्पूर्ण विश्व का उपशम हो जाने से स्वप्रशान्त रूप इसलिए यह तीसरी महा सन्ध्या स्थित होती है = स्वभावतः उदित होकर वर्त्तमान रहती है । जैसा कि वहाँ कहा गया है—''बिन्दु प्राण, दिन और सूर्य एक स्थान में स्थित होते हैं (उस समय) मन के व्यापार से रहित प्रशान्त होकर अपने रूप को प्रशान्त भूमि में रखकर रहना चाहिए । सन्धिदेश के कारण इसे महासन्ध्या जानना चाहिए । यह तीसरी (सन्ध्या) कही गई है'' ॥ २७ ॥

उपसंहार के द्वारा इसे प्रस्तुत से जोड़ते हैं—

इस प्रकार जहाँ शिखा का बन्धन किया जाता है (वहाँ) उन-उन फलों को देने वाली होती है ॥ २८- ॥

उक्त प्रकार वाले क्रम से जहाँ = याग आदि में प्राणशक्त्यात्मक शिखा बाँधी जाती है = दूसरे मार्गों को रोककर मध्य धाम में ही स्थिर की जाती है वहाँ

'तया निबद्धया देहे संनिधानं गुणेश्वराः ।
विदध्युः साधकेन्द्राणां देवि नास्त्यत्र संशयः ॥' इति ॥

एवं प्राणः पारमेश्वरी शक्तिरिति तत्र यदध्वनः प्रतिष्ठानमुक्तं तत्संविद्येव पर्यवस्येत्—इत्याह—

अतः संविदि सर्वोऽयमध्वा विश्रम्य तिष्ठति ॥ २८ ॥

नन्वमूर्तायां निष्क्रियायां च संविदि मूर्तः क्रमिकश्चाध्वा कथमास्ते ?—इत्याशङ्क्याह—

अमूर्तायाः सर्वगत्वान्निष्क्रियायाश्च संविदः ।
मूर्तिक्रियाभासनं यत्स एवाध्वा महेशितुः ॥ २९ ॥

एवमेवंविधायाः संविदो यन्नाम मूर्तिक्रियात्मनावभासनं स एव भुवनादिरूपो मन्त्रादिरूपो वाऽध्वा न त्वतिरिक्तः कश्चिदाधेयो येनैवमाशङ्का स्यात् ॥ २९ ॥

नन्वत्राध्वशब्दस्य प्रवृत्तौ किं निमित्तम् ?—इत्याशङ्क्याह—

अध्वा क्रमेण यातव्ये पदे संप्राप्तिकारणम् ।

उन-उन = मंत्रसन्निधान आदि के फल को देने वाली होती है । वही वहाँ कहा गया है—

हे देवि ! उसके बाँधने से बड़े-बड़े गुण साधकेश्वरों के शरीर में आते हैं उसमें कोई सन्देह नहीं हैं ॥ २७ ॥

इस प्रकार प्राण परमेश्वर की शक्ति हैं इसलिए उसमें जो अध्वा की प्रतिष्ठा कही गई इसका संविद् में ही अन्त होता है—यह कहते हैं—

इसलिए यह सम्पूर्ण अध्वा संविद् में ही विश्राम करके रहता है ॥ -२८ ॥

प्रश्न—अमूर्त्त और निष्क्रिय संविद् में मूर्त्त और क्रमिक अध्वा कैसे रहता है?—यह शङ्का कर कहते हैं—

निष्क्रिय और अमूर्त संविद् के सर्वगत होने से जो (उसका) मूर्त्ति और क्रिया के रूप में आभासित होना है वही परमेश्वर का अध्वा है ॥ २९ ॥

इस प्रकार ऐसी संविद् का जो मूर्त्ति और क्रिया के रूप में अवभासित होना है वही भुवन आदि रूप अथवा मन्त्र आदि रूप अध्वा है । दूसरा कोई आधेय नहीं है जिससे ऐसी शङ्का हो ॥ २९ ॥

प्रश्न—इसको अध्वा शब्द से पुकारने का क्या कारण है—यह शङ्का कर कहते हैं—

अध्वा गन्तव्य स्थान की क्रमिक प्राप्ति का कारण है । द्वैत (= भेद)

द्वैतिनां भोग्यभावात्तु प्रबुद्धानां यतोऽद्यते ॥ ३० ॥

'यातव्ये पदे' इति शिवतत्त्वात्मनि । भेददशायां हि तत्तत्तत्त्वोल्लङ्घनक्रमेण षट्त्रिंशं शिवतत्त्वं प्राप्यत्वेनोक्तम् । भोग्यभावादित्यदनीयत्वात्; अधिगतसंवित्तत्त्वा हि सर्वं स्वात्मसात्कुर्वन्तीति भावः । तेनाध्वैवाध्वा, अद्यत इत्यध्वा चेति ॥ ३०॥

ननु सर्वशब्दानां समयमात्रादेवार्थप्रतिपादनं सिद्ध्येत्—इति किमत्रान्वर्थस्मरणेन नहि सर्वत्रैवैतत्संभवेत् ?—इत्याशङ्क्याह—

इह सर्वत्र शब्दानामन्वर्थं चर्चयेद्यतः ।

यद्यप्यर्थाभिधाने शब्दानां त्रयी गतिर्यौगिकी रूढा योगरूढा च । तत्रापि यौगिक्या एव प्राधान्यं, सनिमित्तं तत्र तस्याः प्रवृत्तेः, अत एवान्यद्द्वयमत्रैव यथाकथंचिदन्तर्भावनीयं येन सर्वत्रैवान्वर्थचर्चा पारं यायात् ॥

तदाह—

उक्तं श्रीमन्निशाचारे संज्ञात्र त्रिविधा मता ॥ ३१ ॥
नैमित्तिकी प्रसिद्धा च तथान्या पारिभाषिकी ॥

वादियों के लिए भोग्य रूप में और प्रबुद्धों के लिए चूंकि (इसका) भक्षण (= तादात्म्यस्थापन) किया जाता है (इसलिए यह अध्वा कहलाता है) ॥ ३० ॥

यातव्यपद = शिव तत्त्व । भेददशा मे उन-उन तत्त्वों का क्रमिक उल्लङ्घन कर ३६ तत्त्वों को प्राप्य कहा गया है । योग्य होने के कारण = अदनीय (= भक्षणीय) होने के कारण । जिन लोगों ने संविद् का रहस्य जान लिया है वे सब को आत्मसात् कर लेते हैं । इसलिए (भेद पक्ष में) अध्वा ही अध्वा है और (अभेद पक्ष में) जिसका भक्षण किया जाय वह अध्वा है ॥ ३० ॥

प्रश्न—सभी शब्दों का सङ्केतमात्र से ही अर्थप्रतिपादन सिद्ध होता है तो यहाँ व्युत्पत्तिलभ्य अर्थ के स्मरण से क्या लाभ ? ऐसा सर्वत्र तो सम्भव नहीं हैं ?—यह शङ्का कर कहते है—

क्योंकि यहाँ सर्वत्र शब्दों के अन्वर्थ की ही चर्चा होती है ॥ ३१- ॥

यद्यपि अर्थ को बतलाने मे शब्दों की तीन गति है—यौगिक, रूढ और योगरूढ । तो भी उनमें यौगिक की ही प्रधानता है क्योंकि उस (= अर्थबोधन) में उसकी प्रवृत्ति सनिमित्तक होती है । इसलिए शेष दो इसी में जिस किसी प्रकार अन्तर्हित कर ली जाती हैं ताकि सर्वत्र अन्वर्थचर्चा सफल हो जाय ॥ ३० ॥

वही कहते है—

निशाचार में कहा गया है—संज्ञा तीन प्रकार की है—नैमित्तिकी,

पूर्वत्वे वा प्रधानं स्यात्तत्रान्तर्भावयेत्ततः ॥ ३२ ॥
अतोऽध्वशब्दस्योक्तेयं निरुक्तिर्नोदितापि चेत् ।
क्वचित्स्वबुद्ध्या साप्यूह्या कियल्लेख्यं हि पुस्तके ॥ ३३ ॥

प्रसिद्धेति, सनिमित्तत्वेऽपि क्वचिदेव रूढेः । यदुक्तं तत्र—

'संज्ञा हि त्रिविधा ज्ञेया शिवशास्त्रेषु सर्वदा ।
पारिभाषिकनैमित्ती सिद्धा चासौ प्रसिद्धिभाक्॥
इह नैमित्तिकी संज्ञा निमित्तात्तु समागता।' इति ।

एवमिह सर्वसंज्ञानां निमित्तताप्यवश्यं वाच्येत्यत्रैवमुक्तमित्याह —'अतो' इति । ननु यद्येवं तत्सर्वत्रैव कस्मादेवं नोक्तमित्याशङ्क्याह ?—नोदितेत्यादि । कियदिति, नह्यत्र शब्दव्युत्पादनं प्रस्तुतमिति भावः ॥ ३३ ॥

ननु परस्याः संविदो मूर्तिक्रियाभासनमध्वेत्युक्तं तत्र क्रियावभासने कतरोऽध्वा मूर्त्यवभासने च कतरः ?—इत्याशङ्क्याह—

तत्र क्रियाभासनं यत्सोऽध्वा कालाह्व उच्यते।
वर्णमन्त्रपदाभिख्यमत्रास्तेऽध्वत्रयं स्फुटम् ॥ ३४ ॥

प्रसिद्धा और पारिभाषिकी । पहली प्रधान है । अतः (शेष दो का) उसमें अन्तर्भाव कर लेना चाहिए । इसलिए अध्व शब्द की यह निरुक्ति की गयी। यदि कहीं (किसी शब्द की निरुक्ति) नहीं की गई तो उसे अपनी बुद्धि से समझ लेना चाहिए । पुस्तक में कितना लिखा जाय ॥-३१-३३॥

सनिमित्तक होने पर भी कहीं रूढ़ि से ही प्रसिद्ध हैं । जैसा कि वहाँ कहा गया है—

'शैव शास्त्र में संज्ञा सर्वदा तीन प्रकार की समझी जानी चाहिए पारिभाषिक, नैमित्तिक और सिद्ध । इनमें नैमित्तिकी संज्ञा प्रसिद्धि वाली है क्योंकि वह निमित्त से आयी है ।'

इस प्रकार यहाँ (= शैवशास्त्र में) सब संज्ञाओं की निमित्तता भी अवश्य कहनी चाहिए इसीलिये यहाँ अतः कहा । प्रश्न—यदि ऐसा है तो सभी जगह ऐसा क्यों नहीं कहा गया ?—यह शङ्का कर कहते हैं—नहीं कहा गया । कितना— अर्थात् यहाँ शब्द की व्युत्पत्ति प्रस्तुत नहीं की गयी ॥ ३३ ॥

प्रश्न—परा संवित् का मूर्त्ति और क्रिया के रूप में आभसित होना अध्वा है— यह कहा गया । उसमें क्रिया के अवभासन में कौन सा अध्वा है और मूर्त्ति के अवभासन में कौन सा ?—यह शङ्का कर कहते हैं—

उसमें जो क्रिया का आभासन है वह अध्वा काल नामक (= काल

यस्तु मूर्त्यवभासांशः स देशाध्वा निगद्यते ।
कलातत्त्वपुराभिख्यमन्तर्भूतमिह त्रयम् ॥ ३५ ॥

ननु यदि नाम मूर्तिक्रिययोर्वैचित्र्यावभासाद्देशकालभेदेनाध्वनो द्वैविध्यमुच्यते तदास्तां, तत्रापि प्रत्येकं त्रैविध्ये किं निमित्तम् ?—इत्याशङ्क्याह—

त्रिकद्वयेऽत्र प्रत्येकं स्थूलं सूक्ष्मं परं वपुः ।
यतोऽस्ति तेन सर्वोऽयमध्वा षड्विध उच्यते ॥ ३६ ॥

तेनेति, स्थूलसूक्ष्मपरत्वेन पदवर्णमन्त्रात्मतया भुवनतत्त्वकलात्मतया च प्रत्येकं त्रैविध्येन हेतुनेत्यर्थः । यदुक्तम्—

'पदानि मन्त्रारब्धानि मन्त्रा वर्णैकविग्रहाः ।
वर्णाः स्वनिष्ठा इत्येषां स्थूलसूक्ष्मपरात्मता ॥' इति ।

तथा

'भुवनव्यापिता तत्त्वेष्वनन्तादिशिवान्तके ।' (स्व० ४।९६)

इति । तथा

कलान्तर्भाविनस्ते वै निवृत्त्याद्यास्तु ताः कलाः ॥
(स्व०तं० ४।९७) इति ॥ ३६ ॥

अध्वा) कहलाता है । इसमें स्पष्टतया वर्ण मन्त्र पद नामक तीन अध्वायें हैं । और जो मूर्त्ति के अवभास का अंश है वह देशाध्वा कहा जाता है । इसमें कला तत्त्व और भुवन ये तीन अन्तर्भूत हैं ॥ ३४-३५ ॥

प्रश्न—यदि मूर्त्ति और क्रिया के वैचित्र्य के अवभास के कारण देश और काल के भेद से अध्वा दो प्रकार का कहा जाता है तो ठीक हैं किन्तु उनका फिर तीन प्रकार किस कारण से है ?—यह शङ्का कर कहते हैं—

इन दोनों त्रिकों में चूँकि प्रत्येक स्थूल सूक्ष्म और पर शरीर वाला है इसलिए यह समस्त अध्वा छ प्रकार का कहा जाता है ॥ ३६ ॥

इस कारण = स्थूल सूक्ष्म पर होने से पद वर्ण मन्त्र रूप में तथा भुवन तत्त्व और कला रूप में प्रत्येक के तीन प्रकार के कारण । जैसा कि कहा गया है—

"पद मन्त्रों से आरब्ध हैं । मन्त्र वर्णशरीर वाले हैं और वर्ण अपने में ही स्थित हैं यही इनकी स्थूलता सूक्ष्मता और परता है ।'

तथा

"अनन्त से लेकर शिवपर्यन्त तत्त्व भुवनों में व्याप्त हैं" ॥ ३६ ॥ (स्व. ४।९६)

तथा

तत्र प्रस्तुतं कालाध्वानं तावदवतारयति--

षड्विधादध्वनः प्राच्यं यदेतत् त्रितयं पुनः ।
एष एव स कालाध्वा प्राणे स्पष्टं प्रतिष्ठितः ॥ ३७ ॥

प्राच्यमिति पूर्वोद्दिष्टं पदमन्त्रवर्णाख्यम् । 'प्राण' इत्युपलक्षणं, तेनापानादावप्येवमेव ॥ ३७ ॥

नन्वेवं क्रमाक्रमात्मा काल उक्तः स एव किं तत्त्वानामन्तः परिगणितो न वा ?—इत्याशङ्क्याह—

तत्त्वमध्यस्थितात्कालादन्योऽयं काल उच्यते ।

अन्यस्तद्वैलक्षण्यात् ॥

तदेवाह—

एष कालो हि देवस्य विश्वाभासनकारिणी ॥ ३८ ॥
क्रियाशक्तिः समस्तानां तत्त्वानां च परं वपुः ।

'परं वपुः' इत्युत्पत्तिस्थानम्, अत एव 'विश्वावभासनकारिणी'

"वे कला में अन्तर्भूत हैं । वे कलायें निवृत्ति आदि (= प्रतिष्ठा, विद्या, शान्ता और शान्त्यतीता) हैं" ॥ ३६ ॥ (स्व. ४।९७)

उसमें प्रस्तुत कालाध्वा का प्रारम्भ करते हैं—

छ प्रकार के अध्वा में से जो ये पहले तीन है यही वह कालाध्वा है जो प्राण में स्पष्ट रूप से प्रतिष्ठित हैं ॥ ३७ ॥

प्राच्य = पहले कहे गए पद मन्त्र और वर्ण नामक । 'प्राण (पद) उपलक्षण है इसलिए अपान आदि में भी ऐसा ही है ॥ ३७ ॥

प्रश्न—इस प्रकार क्रम-अक्रम रूप काल कहा गया है उसकी तत्त्वों के अन्दर गणना की गई है या नहीं ?—यह शङ्का कर कहते हैं—

यह काल तत्त्वों के मध्य में स्थित काल से भिन्न कहा जाता है ॥ ३८- ॥

उससे विलक्षण होने से (वह) दूसरा है ।

वही कहते हैं—

यह काल परमेश्वर की विश्व को आभासित कराने वाली क्रिया शक्ति है और तत्त्वों का अन्तिम (कारण) शरीर है ॥ -३८-३९- ॥

पर शरीर = उत्पत्ति स्थान । इसीलिये 'विश्वावभासनकारिणी' कहा गया

इत्युक्तम् ॥ ३८ ॥

ननु परस्याः संविदो विश्वावभासकारित्वं नाम बहिरुन्मेष उच्यते तदेवमस्येश्वररूपत्वमुक्तं स्यादित्याह—

एतदीश्वरतत्त्वं तच्छिवस्य वपुरुच्यते ॥ ३९ ॥
उद्रिक्ताभोगकार्यात्मविश्वैकात्म्यमिदं यतः ।

'तत्' तस्माद् बहिरुन्मेषलक्षणाद्विश्वावभासकारित्वाद्धेतोरेतदीश्वरतत्त्वमुच्यते, कालात्मनः क्रियाशक्तेरेवैतद्विश्वकलनात्मकत्वं बहिर्मुखं रूपमित्यर्थः । ननु मायादीनामप्येवं रूपं संभाव्यते, इत्येतदेव कथमुक्तमित्याशङ्क्याह—'शिवस्य वपुः' इति । बहिरौन्मुख्येऽपि स्वात्मन्येव विश्रान्तं, यत इदं बहिर्मुखत्वस्य धाराधिरूढत्वादुद्रिक्ताभोगम्, अत एव कार्यात्म यद्विश्वं तस्य 'इदमहम्' इति प्रतीतेः 'ऐकात्म्यं' स्वात्मसात्कार इत्यर्थः । अत एव भेदाभेददशेयमिति सर्वैरुद्घोष्यते ॥ ३९ ॥

नन्वेवमनेनैव विकलनात्कालतत्त्वस्य पृथक् परिगणनं न प्राप्तमिति,

'एवं कालः प्रसर्तव्यस्तच्च तत्त्वमनिन्दितम् ।'

है ॥ ३८ ॥

प्रश्न—परा संविद् का विश्वावभासन (उसका) बाह्य उन्मेष कहा जाता है । तो इस प्रकार इसकी ईश्वररूपता ही कही गयी—यह कहते है—

इस कारण यह ईश्वर तत्त्व शिव का शरीर कहा जाता है । क्योंकि यह (= ईश्वर तत्त्व) उच्छूनता को प्राप्त कार्यरूप विश्व की (परमेश्वर के साथ) तदात्मता है ॥ -३९-४०- ॥

उससे = उस बाह्य उन्मेष रूप विश्वावभासकारिता के कारण यह ईश्वर तत्त्व कहा जाता है । यह कालात्मिका क्रियाशक्ति का ही स्वकलनात्मक बहिर्मुख रूप है। प्रश्न—माया आदि का भी ऐसा रूप हो सकता है फिर ऐसा ही क्यों कहा गया ?—यह शङ्का कर कहते हैं—शिव का शरीर है । बाह्य औन्मुख्य होने पर भी अपने में ही विश्रान्त है । क्योंकि यह बहिर्मुखता के धाराधिरूढ होने से उद्रिक्त आभोग वाला है । इसलिए कार्यात्मक जो विश्व है उसकी (यह मै हूँ) ऐसी प्रतीति होने से एकात्मता = स्वात्मसात्कार हो जाता है । इसीलिए यह सबके द्वारा भेदाभेद दशा कही जाती है ॥ ३९ ॥

प्रश्न—इस प्रकार इसी के द्वारा विश्व की रचना करने से का ल तत्त्व की पृथक् गणना प्राप्त नहीं होती (और)

'इस प्रकार काल का प्रसरण होता है और वह अनिन्दित तत्त्व है ।'

इत्यादिश्रुतिविरोध आपतेदिति किमेतत् ?—इत्याशङ्क्याह—

एतदीश्वररूपत्वं परमात्मनि यत्किल ॥ ४० ॥
तत्प्रमातरि मायीये कालतत्त्वं निगद्यते ।

ननु मायाप्रमातरि किमेवं कालतत्त्वमेवोत तत्त्वान्तराण्यपि—इत्याशङ्क्याह—

शिवादिशुद्धविद्यान्तं यच्छिवस्य स्वकं वपुः ॥ ४१ ॥
तदेव पुंसो मायादिरागान्तं कञ्चुकीभवेत् ।

शिवादीत्यनेन शिवशब्देनानाश्रितभट्टारक उक्तः । स्वकं वपुरित्यानन्दादिशक्तिरूपत्वात् । 'पुंसः' इति शिवस्यैव स्वस्वातन्त्र्याद् गृहीतपशुभावस्येत्यर्थः ॥ ४१ ॥

एतदेव विभजते—

अनाश्रितं यतो माया कलाविद्ये सदाशिवः॥ ४२ ॥
ईश्वरः कालनियती सद्विद्या राग उच्यते ।

यदुक्तम्—

'शक्त्यादिस्तत्त्ववर्गस्तु कञ्चुकत्वेन वै पशोः ।

इत्यादि श्रुति से विरोध हो जायगा तो यह क्या है ?—ऐसी शङ्का कर कहते हैं—

जो यह परमात्मा में ईश्वररूपता कही जाती है वह मायीय प्रमाता में काल तत्त्व कहा जाता है ॥ -४०-४१- ॥

प्रश्न—माया प्रमाता में क्या केवल काल तत्त्व ही हैं या दूसरे भी तत्त्व है?—यह शङ्का कर कहते हैं—

शिव तत्त्व से लेकर शुद्ध विद्या तत्त्व तक जो शिव का अपना शरीर है वही पुरुष का माया से लेकर राग तक कञ्चुक हो जाता है ॥ -४१-४२- ॥

शिवादि—यहाँ शिव शब्द से अनाश्रित भट्टारक कहे गए हैं । अपना शरीर—आनन्द आदि शक्तिरूप होने के कारण । पुंसः = अपने स्वातन्त्र्य से पशुभाव स्वीकार करने वाले शिव का ॥ ४१ ॥

इसी का विभाग करते हैं—

क्योंकि अनाश्रित शिव माया, सदाशिव कला और विद्या, ईश्वर काल और नियति तथा शुद्ध विद्या राग कही जाती है ॥ -४२-४३- ॥

जैसा कि कहा गया है—

शक्तिर्माया कला विद्या कालो नियतिरेव च ॥
सदाशिवेश्वरौ विद्या रागस्तु वरवर्णिनि ।'

इति ॥ ४२ ॥

न केवलमेषामेवंरूपत्वमेव यावत्प्रमातृत्वमपि—इत्याह—

अनाश्रितः शून्यमाता बुद्धिमाता सदाशिवः ॥ ४३ ॥
ईश्वरः प्राणमाता च विद्या देहप्रमातृता ।

नन्वेषां शून्यादिप्रमातृत्वे किं निमित्तम् ?—इत्याशङ्क्याह—

अनाश्रयो हि शून्यत्वं ज्ञानमेव हि बुद्धिता ॥ ४४ ॥
विश्वात्मता च प्राणत्वं देहे वेद्यैकतानता ।

शून्यमिति, विश्वोच्छेदात् । ज्ञानमिति, सदाशिवस्य ज्ञानशक्तिप्राधान्यात् । 'विश्वात्मता' इति बहिरुन्मेषरूपत्वात् । वेद्यैकतानतेति, तत्रैवाभिष्वङ्गात् ॥ ४४ ॥

एवं प्राणे विश्वात्मत्वमस्ति—इति तदेवात्र संप्रत्यभिधीयते—इत्याह—

तेन प्राणपथे विश्वाकलनेयं विराजते ॥ ४५ ॥
येन रूपेण तद्वच्मः सद्भिस्तदवधीयताम् ।

हे वरवर्णिनी ! शक्ति आदि तत्त्वसमूह पशु के कञ्चुक हैं । शक्ति माया, सदाशिव और ईश्वर कला और विद्या हैं काल—नियति और शुद्ध विद्या राग है ॥ ४२ ॥

इनकी यही रूपता नहीं है बल्कि ये प्रमाता भी हैं—यह कहते हैं—

अनाश्रित शिव शून्यप्रमाता, सदाशिव बुद्धिप्रमाता, ईश्वर प्राणप्रमाता और शुद्धविद्या देहप्रमाता है ॥ -४३-४४- ॥

प्रश्न—इनकी शून्य आदि की प्रमातृता में क्या हेतु है?—यह शङ्का कर कहते हैं—

अनाश्रय ही शून्यता है; ज्ञान ही बुद्धिता है; प्राण विश्वात्मता और देह में वेद्य की एकतानता है ॥ -४४-४५- ॥

शून्य—विश्व का उच्छेद होने के कारण । विश्वात्मता—बाह्य उन्मेष रूप होने के कारण । वेद्यैकतानता—उसी में आसक्ति होने के कारण ॥ ४४ ॥

इस प्रकार प्राण में विश्वात्मता है—वही यहाँ अब कहा जाता है—यह कहते हैं—

इस कारण यह विश्व का आकलन प्राणपथ में जिस रूप से विराजमान

येन रूपेणेति, कालात्मना ॥ ४५ ॥

ननु प्राणस्य सर्वशरीव्यापकत्वेनावश्यमवस्थानमस्ति, अन्यथा हि कानिचिदङ्गानि स्तम्भादिवत्स्तब्धान्येव भवेयुः, तदस्य श्रीस्वच्छन्दशास्त्रादौ हृदयादारभ्यैव चारः कस्मादुक्त ?—इत्याशङ्क्याह—

द्वादशान्तावधावस्मिन्देहे यद्यपि सर्वतः ॥ ४६ ॥
ओतप्रोतात्मकः प्राणस्तथापीत्थं न सुस्फुटः ।

इत्थमिति, ओतप्रोतत्वेन । न सुस्फुट इति—सर्वत्रैव देहे; क्वचिद्धि शरीरे सुस्फुटत्वेन प्राणोऽवभासते क्वचिच्चास्फुटत्वेनेति ॥ ४६ ॥

अत एवाह—

यत्नो जीवनमात्रात्मा तत्परश्च द्विधा मतः ॥ ४७ ॥
संवेद्यश्चाप्यसंवेद्यो द्विधेत्थं भिद्यते पुनः ।
स्फुटास्फुटत्वाद् द्वैविध्यं प्रत्येकं परिभावयेत् ॥ ४८ ॥

'यत्न' इति प्राणीयः स्पन्दः । जीवनमात्रात्मेति, स्वारसिको येनावयवानां स्तब्धतैव न स्यात् । तत्पर इच्छापूर्वकः । प्रत्येकमिति, चतुर्णां द्वैविध्येऽष्टधा प्राणीयो यत्न इति सिद्धम् ॥ ४८ ॥

है उसे (हम) कह रहे हैं । सज्जन लोग उस पर ध्यान दें ॥ -४५-४६-॥

जिस रूप से = काल के रूप में ॥ ४५ ॥

प्रश्न—प्राण की तो सारे शरीर में व्यापक रूप में स्थिति है, अन्यथा कुछ अङ्ग खम्भे आदि के समान स्थिर ही रहेंगे, फिर स्वच्छन्दतन्त्र आदि में इसका हृदय से ही सञ्चार क्यों कहा गया ?—यह शङ्का कर कहते हैं—

यद्यपि इस देह में प्राण द्वादशान्तपर्यन्त सर्वत्र ओतप्रोत रूप में है तो भी इस रूप में स्फुट नहीं है ॥ -४६-४७- ॥

इस प्रकार = ओतप्रोत रूप में । स्फुट नहीं है—शरीर में सब जगह । प्राण शरीर में कहीं स्फुट होकर अवभासित होता है और कहीं अस्फुट होकर ॥ ४६ ॥

इसीलिये कहते हैं—

प्रयत्न (= स्पन्द) जीवन स्वरूप और इच्छापूर्वक दो प्रकार का है । पुनः दो प्रकार का है—संवेद्य और असंवेद्य । इस प्रकार आगे फिर इसके प्रत्येक दो का भेद—स्फुट और अस्फुट ॥ -४७-४८ ॥

यत्न = प्राण का स्पन्द । जीवनमात्रात्मा = स्वाभाविक जिस कारण अवयवों की स्तब्धता ही नहीं होती । तत्पर = इच्छापूर्वक । प्रत्येक अर्थात् (उक्त) चारों का

तत्र स्वारसिकः प्राणीयो यत्नः कन्दात्प्रभृत्येव संवेद्यते किंत्वस्फुटत्वेन—इत्याह—

संवेद्यजीवनाभिख्यप्रयत्नस्पन्दसुन्दरः ।
प्राणः कन्दात्प्रभृत्येव तथाप्यत्र न सुस्फुटः॥ ४९ ॥

यदभिप्रायेणैव श्रीस्वच्छन्दशास्त्रे ततः प्रभृति प्राणादेरवस्थानमुक्तम्—इत्याह—

कन्दाधारात्प्रभृत्येव व्यवस्था तेन कथ्यते ।
स्वच्छन्दशास्त्रे नाडीनां वाय्वाधारतया स्फुटम् ॥ ५० ॥

तेनेति, प्राणस्य संवेद्यत्वेन हेतुनेत्यर्थः ।

यदुक्तं तत्र—

'नाभ्यधो मेढ्रकन्दे च स्थिता वै नाभिमध्यतः ।
तस्माद्विनिर्गता नाड्यस्तिर्यगूर्ध्वमधः प्रिये ॥'
(स्व०तं० ७।८) इति ॥ ५० ॥

ननु यद्येवं तत्तत्रैव—

'हृच्चक्रे तु समाख्याताः साधकानां हितावहाः ।
प्राणो वै चरते तासु अहोरात्रविभागतः ॥

दो-दो प्रकार होने से प्राणसम्बन्धी यत्न आठ प्रकार का होता है ॥ ४७-४८ ॥

उनमे स्वाभाविक प्रयत्न कन्द से ही होता है किन्तु अस्फुट रूप में—यह कहते हैं—

संवेद्य जीवन नामक प्रयत्न रूप स्पन्द से सुन्दर प्राण कन्द से चलता है तो भी यहाँ स्फुट नहीं है ॥ ४९ ॥

इसी अभिप्राय से स्वच्छन्दतन्त्र में वहाँ से प्राण आादि की स्थिति कही गई है—यह कहते हैं—

इस कारण स्वच्छन्दतन्त्र में स्पष्टतया वायु के आधार के रूप में नाड़ियों की व्यवस्था कन्द रूप आधार से कही जाती है ॥ ५० ॥

इस कारण = प्राण के संवेद्य होने के कारण । जैसा कि वहाँ कहा गया है—

'नाभि के नीचे मेढ्रकन्द में स्थित नाड़ियाँ उस नाभि के मध्य से तिर्यक् ऊपर और नीचे निकली है' ॥ ५० ॥ (स्व. तं. ७।८)

प्रश्न—यदि ऐसा है तो उसी (ग्रन्थ) में—

'साधकों का हितसाधन करने वाली (नाड़ियाँ) हृत्चक्र में (स्थित) कही गई हैं। दिन रात के विभाग से प्राण उसमें चलता है । जिस प्रकार स्पष्ट हो उस

तथा ते कथयिष्यामि प्रविभज्य यथा स्फुटम् ।'

(स्व०तं० ७।२१)

इत्यादिना हृदयात्प्रभृति वितत्य पुनः प्राणचारः कस्मादुक्त ?—इत्याशङ्क्याह—

तत्रापि तु प्रयत्नोऽसौ न संवेद्यतया स्थितः।

'तत्र' कन्दाधारे ह्यसावपीच्छापूर्वकः प्रयत्नो न स्फुटं संवद्यते—इति न तत्र वितत्य प्राणचार उक्तः । न हि स्वारसिकेन प्राणचारेणोक्तेन किंचित्फलं, स्वेच्छया हि चारितः प्राणस्तत्तत्सिद्धिनिमित्तं योगिनां स्यात् यदर्थमेवमुपदेशः । तच्च हृदयात्प्रभृत्येव भवेत्—इति तत्रैवासौ तथा निर्दिष्टः ॥

एतच्चास्माभिरप्येवमेवोच्यते—इत्याह—

वेद्ययत्नात्तु हृदयात्प्राणचारो विभज्यते ॥ ५१ ॥

वेद्ययत्नादिति, अर्थादिच्छापूर्वकस्य । 'विभज्यते' इति तुट्याद्यात्मना विभागेनोच्यत इत्यर्थः ॥ ५१ ॥

ननु व्यापकत्वात्सर्वत्राविशेषेऽपि प्राणनस्य क्वचित्स्फुटं तदीयो यत्नः संवेद्यते, क्वचिच्चान्यथेत्यत्र किं निमित्तम् ?—इत्याशङ्क्याह—

प्रकार अलग-अलग (मै) तुमसे कहूँगा ।'' (स्व. तं. ७।२१)

इत्यादि के द्वारा हृदय से लेकर विस्तृत रूप से पुनः प्राणचार कैसे कहा गया?—यह शङ्का कर कहते हैं—

वहाँ भी यह प्रयत्न संवेद्य के रूप में स्थित नहीं है ॥ ५१- ॥

वहाँ = कन्दाधार में यह इच्छापूर्वक प्रयत्न स्पष्ट प्रतीत नहीं होता । इसलिये वहाँ विस्तृत रूप से प्राण का सञ्चरण नहीं कहा गया । उक्त स्वारसिक प्राणचार का कोई फल नहीं है । स्वेच्छा से सञ्चारित प्राण योगियों की भिन्न-भिन्न सिद्धियों का कारण बनता है । इसी के लिये यह उपदेश है । और वह हृदय से ही चलता है। इसलिये वहीं इसका इस प्रकार का निर्देश है ॥ ५० ॥

और इसे हम भी ऐसा ही कहते हैं—यह कहते हैं—

जहाँ यत्न वेद्य है इस हृदय से प्राणचार का विभाग किया जाता है ॥ -५१ ॥

वेद्ययत्न = इच्छापूर्वक वाले । विभक्त होता है = तुटि आदि के रूप में अलग-अलग कहा जाता है ॥ -५१ ॥

प्रश्न—प्राण के व्यापक होने के कारण सर्वत्र समान होने पर भी उसका यत्न

प्रभोः शिवस्य या शक्तिर्वामा ज्येष्ठा च रौद्रिका।
सतदन्यतमावात्मप्राणौ यत्नविधायिनौ ॥ ५२ ॥

इह खलु परमेश्वरसंबन्धिन्या तासां वामादीनां मध्यादन्यतमया शक्त्या सहभूतावात्मप्राणौ यत्नविधायिनौ, प्रभुशक्तिरात्मा प्राणश्चेति त्रयः संमिलिताः प्राणस्पन्दं विदधतीत्यर्थः । यदुक्तम्—

'तत्रात्मा प्रभुशक्तिश्च वायुर्वै नाडिभिश्चरन् ।'

(स्व०७।७) इति ॥ ५२ ॥

एवमेषां समानेऽपि यत्नविधायित्वे क्वचित्कस्यचिन्मुख्यत्वम्—इत्याह—

प्रभुशक्तिः क्वचित्कन्दसङ्कोचस्पन्दने यथा ।
प्राणशक्तिः क्वचिन्मुख्या यथाङ्गमरुदीरणे ॥ ५३ ॥
आत्मशक्तिः क्वचित्प्राणचारे हार्दे यथा स्फुटम् ।
त्रयं द्वयं वा मुख्यं स्याद्योगिनामवधानिनाम् ॥ ५४ ॥

'अङ्गमरुदीरणे' चक्षुःस्फुरणादौ । अत्र हि भाविशकुनाशकुनप्रकाशनाद्यर्थं प्रभुशक्तेरेव प्राधान्येन प्राणस्पन्दने कर्तृत्वम् । 'कन्दस्य' आनन्देन्द्रियस्य सङ्कोचे

कहीं स्फुट समझा जाता है और कहीं अन्यथा इसमें क्या निमित्त है?—यह शङ्का कर कहते हैं—

भगवान् शिव की जो वामा ज्येष्ठा और रौद्री शक्तियाँ हैं उनमें से एक को साथ रखकर आत्मा और प्राण प्रयत्न (= स्पन्दन) करते हैं ॥ ५२ ॥

परमेश्वर से सम्बद्ध उन वामा आदि में से किसी एक शक्ति के साथ हुये आत्मा और प्राण प्रयत्न के विधायक होते हैं । परमेश्वर की शक्ति आत्मा और प्राण ये तीन मिलकर प्राण का स्पन्दन करते हैं । जैसा कि कहा गया है—

उस विषय में आत्मा, प्रभुशक्ति और प्राण नाड़ियों के द्वारा स्पन्द करते हैं ॥ ५२ ॥ (स्व. तं. ७।६)

इस प्रकार इनके समान रूप से यत्नविधायी होने पर भी कहीं किसी की प्रधानता रहती है—यह कहते हैं—

कहीं परमेश्वर की शक्ति मुख्य है । जैसे—अङ्गों की वायु के चलने में । कहीं आत्मशक्ति (प्रमुख है) जैसे—कन्द के सङ्कोच और स्पन्दन में । कहीं प्राणशक्ति स्फुट हैं । जैसे हृदय के प्राणसञ्चार में । योगी अथवा ध्यानी जनों के तीन अथवा दो मुख्य होते हैं ॥ ५३-५४ ॥

अङ्ग वायु के चलने में—(जैसे) आँख के फड़कने आदि में । वहाँ भावी शुभ शकुन या अपशकुन के प्रकाशनरूप प्रयोजन वाली प्रभुशक्ति ही प्रधान रूप से

विकासात्मनि स्पन्दने चात्मन एव प्राधान्यं, तत्र हि तदिच्छैव निबन्धनम् । हृदि च प्राधान्येन प्राणस्यैव स्वरसवाहित्वात्स्पन्दने कर्तृत्वम्, एतद् द्वयं पुनः सर्वत्रैव गुणभावेन स्थितमन्यथैवंभावाभावात् । एवमेषां स्वारसिकत्वेन गौणमुख्यभावमुक्त्वा प्रायत्निकत्वेनाप्यभिधत्ते 'त्रयम्' इत्यादिना । योगिनो हि तत्तत्फलेप्सवो यत्रैवावधानातिशयात्प्राणं योजयन्ति, तत्रैवात्मानं प्रभुशक्तिं तदन्यतमं वेति ॥ ५४ ॥

न केवलमेषां गौणमुख्यभावो भवेद्यावदन्यथापि—इत्याह—

अवधानाददृष्टांशाद् बलवत्त्वादथेरणात् ।
विपर्ययोऽपि प्राणात्मशक्तीनां मुख्यतां प्रति ॥ ५५ ॥

अवधानाद्यथा योग्यपि स्वावधानेनैव चक्षुः स्फारयेत्—इत्यत्रात्मनः प्राधान्यम्। अदृष्टांशाद्यथा गवामपि जन्मान्तरीयसंस्कारवशात् स्वारसिक्यैव प्राणशक्त्या नियतमङ्गं स्फुरेत् येनात्र तस्या एव प्राधान्यम् । बलवत्त्वाद्यथा मल्लादीनां श्रमाद्यभ्यासादायत्तीकृतया प्राणशक्त्यैव तत्तत्प्लुत्यादिसिद्धिः । ईरणाद्यथा वाताभिभूतानां प्राणस्य बलवत्त्वेऽपि प्रभुशक्त्यैव तत्तदङ्गपरिस्पन्दो भवेत्—इति तस्या एव मुख्यत्वम् । एवमेषां यत्रैवोद्रिक्तत्वेनावस्थानं तत्रैव प्राणीयस्यापि

प्राणस्पन्दन में कर्त्री हैं । कन्द = आनन्देन्द्रिय के सङ्कोच विकास रूप स्पन्दन में आत्मा का ही प्राधान्य हैं । इस विषय में उस (= आत्मा) की इच्छा ही कारण है। हृदय में प्राण के ही प्रधान रूप से स्वरसंवाही होने के कारण (वही) स्पन्द कारण है । शेष दो सर्वत्र गौण रूप से स्थित रहते हैं अन्यथा ऐसा नहीं हो सकेगा । इस प्रकार इनका स्वाभाविक गौणमुख्यभाव कहकर प्रयत्न के रूप में भी कहते हैं—तीन इत्यादि । भिन्न-भिन्न फल के चाहने वाले योगी लोग जहाँ पर ध्यानातिशय के कारण प्राण को लगाते हैं वहीं आत्मा और प्रभुशक्ति को या उनमें से किसी एक को भी (लगाते हैं) ॥ ५३-५४ ॥

इनका केवल गौणमुख्यसम्बन्ध ही नहीं हैं बल्कि दूसरे प्रकार का भी सम्बन्ध है—यह कहते हैं—

अवधान, अदृष्टांश, वलवत्ता और ईरण (= प्रेरणा) से भी प्राण, आत्मा और शक्ति का मुख्यता के प्रति विपरीत भाव होता है ॥ ५५ ॥

अवधान से जैसे योगी भी अपने अवधान से ही चक्षु का प्रसार करता है—यहाँ आत्मा की प्रधानता है । अदृष्टांश से—जैसे पशुओं के जन्मान्तरीय संस्कारवश स्वाभाविक प्राणशक्ति से निश्चित अङ्ग का स्फुरण होता है जिससे यहाँ उसी (= प्राण शक्ति ही) की प्रधानता होती है । बलवत्ता के कारण—जैसे—मल्ल आदि का श्रम आदि के अभ्यास से स्वाधीन बनायी गई प्राणशक्ति के ही द्वारा उन-उन कूदने आदि की सिद्धि होती है । ईरण से जैसे—वात रोग से अभिभूत व्यक्ति प्राण के बलवान् होने पर भी प्रभुशक्ति के द्वारा ही भिन्न-भिन्न अङ्गों का परिस्पन्द होता

यत्नस्य स्फुटतया संवेद्यत्वमन्यथा पुनरतथात्वमिति सिद्धम् ॥ ५५ ॥

ननु प्रभुशक्तिर्यद्यात्मप्राणाभ्यां सह प्राणीयं यत्नं विदधाति तदस्तु, तस्यास्तु त्रैविध्यं किमर्थमुक्तम् ?—इत्याशङ्क्याह—

वामा संसारिणामीशा प्रभुशक्तिर्विधायिनी ।
ज्येष्ठा तु सुप्रबुद्धानां बुभुत्सूनां च रौद्रिका ॥ ५६ ॥

'विधायिनी' इत्यर्थात्प्राणीयं यत्नं विदधातीति ॥ ५६ ॥

अत्र किं निमित्तम् ?—इत्याशङ्क्याह—

वामा संसारवमना ज्येष्ठा शिवमयी यतः ।
द्रावयित्री रुजां रौद्री रोद्ध्री चाखिलकर्मणाम् ॥ ५७ ॥

वामाद्या किं प्राभव्यः शक्तयः सृष्टिसंहारस्थित्यात्मिकाः—इति तथैषां प्राणीयं यत्नं विदधति यथा संसारिणामधोधःपातो भवेत्, सुप्रबुद्धानां शिवीभावापत्तिर्बुभुत्सूनां च शिवीभावौन्मुख्येन संसार एवावस्थानमिति । तदुक्तम्—

'अणुं स्वरूपदृश्वानं वामाधो विनिपातयेत् ।
रौद्री सांसारिकानन्दं कदाचिद्वितरेदपि ॥

है—इस प्रकार उसी (= प्रभुशक्ति) की प्रधानता है । इस प्रकार इनकी जहाँ उद्रिक्त होने के कारण स्थिति है वहीं प्राणीय प्रयत्न का भी स्पष्टरूप में संवेद्यत्व होता है अन्यथा फिर वैसा नहीं होता—यह सिद्ध है ॥ ५५ ॥

प्रश्न—प्रभुशक्ति यदि आत्मा और प्राण के साथ प्राणीय यत्न करती है तो वह करे । उसकी त्रिविधता किसलिए कही गई ?—यह शङ्का कर कहते हैं—

संसारी प्राणियों की स्वामिनी वामा प्रभुशक्ति प्राणीय यत्न का विधान करती हैं । ज्येष्ठा प्रबुद्धों की और रौद्री (प्रबुद्ध) होने की इच्छा रखने वालों के प्राणीय यत्न का विधान करती हैं ॥ ५६ ॥

विधायिनी = अर्थात् प्राणीय यत्न का विधान करती है ॥ ५६ ॥

इसमें क्या कारण है ?—यह शङ्का कर कहते हैं—

क्योंकि वामा संसार का वमन करने वाली है; ज्येष्ठा शिवमयी है और रौद्री पीड़ा को दूर करने वाली तथा समस्त कर्मों को रोकने वाली है ॥ ५७ ॥

वामा आदि प्रभु की शक्तियाँ सृष्टि संहार और स्थिति रूप हैं इसलिए वे ऐसा प्राणीय यत्न करती हैं जिससे संसारियों का अधःपतन हो जाय, सुप्रबुद्ध लोग शिवात्मता को प्राप्त हो जांय और (सुप्रबुद्ध) होने की इच्छा वालों की, शिवभाव की ओर उन्मुखता होने से संसार में ही स्थिति बनी रहे । वही कहा है—

ज्येष्ठा स्वातन्त्र्यलेशं तु तनुते ज्ञानकर्मणोः।' इति ॥ ५७ ॥

नन्वेतत्स्वरसत एव सिद्ध्येदिति किमनेनैवमुपदिष्टेन ?—इत्याशङ्क्याह—

सृष्ट्यादितत्त्वमज्ञात्वा न मुक्तो नापि मोचयेत् ।

नन्वत्र किं प्रमाणम् ?—इत्याशङ्क्याह—

उक्तं च श्रीयोगचारे मोक्षः सर्वप्रकाशनात् ॥ ५८ ॥

सर्वप्रकाशनादिति, सर्वस्य सृष्ट्यादेर्यथातत्त्वं परिज्ञानादित्यर्थः । नहि तदतिरिक्तमन्यत्किंचित्संभवेदिति भावः ॥ ५८ ॥

अत एवाह—

उत्पत्तिस्थितिसंहारान् ये न जानन्ति योगिनः ।
न मुक्तास्ते तदज्ञानबन्धनैकाधिवासिताः ॥ ५९ ॥

'तदज्ञानं' सृष्ट्यादितत्त्वासंवित्तिः ॥ ५९ ॥

ततश्च प्रकृते किम् ?—इत्याशङ्क्याह—

सृष्ट्यादयश्च ते सर्वे कालाधीना न संशयः ।

"वामा शक्ति आत्मसाक्षात्कार करने वाले अणु को नीचे गिरा देती है । रौद्री कदाचित् सांसारिक आनन्द को देती है और ज्येष्ठा ज्ञान और कर्म में किञ्चित् स्वातन्त्र्य प्रस्तुत करती हैं" ॥ ५७ ॥

प्रश्न—यह तो स्वभावतः सिद्ध हो जाता है फिर इस प्रकार के उपदेश से क्या लाभ?—यह शङ्का कर कहते हैं—

सृष्टि आदि के तत्त्व को जाने बिना न तो कोई मुक्त होता है और न (दूसरे को) मुक्त कर सकता है ॥ -५८ ॥

प्रश्न—इस विषय में क्या प्रमाण है ?—यह शङ्का कर कहते हैं—

श्रीयोगचार में सबके प्रकाशन से ही मोक्ष कहा गया है ॥ -५८ ॥

सर्वप्रकाशन से = सृष्टि आदि सबका तात्त्विक परिज्ञान होने से । क्योंकि उससे अतिरिक्त दूसरा कुछ सम्भव नहीं है ॥ ५८ ॥

इसीलिए कहते हैं—

जो योगी उत्पत्ति स्थिति और संहार को नहीं जानते वे उसके अज्ञान रूपी बन्धन की वासना से युक्त होने के कारण मुक्त नहीं है ॥ ५९ ॥

उनके अज्ञान = सृष्टि आदि तत्त्व का अज्ञान है ॥ ५९ ॥

उससे प्रस्तुत सन्दर्भ में क्या आया ?—यह शङ्का कर कहते हैं—

स च प्राणात्मकस्तस्मादुच्चारः कथ्यते स्फुटः ॥ ६० ॥

कालाधीना इति, सृष्टिः स्थितिः संहारश्चेति क्रमात्मकत्वात् । 'उच्चारः' इति प्राणचारः, तत्कथनेन हि सृष्ट्यादीनां यथातत्त्वं परिज्ञानं भवेदिति भावः ॥ ६० ॥

तदाह—

हृदयात्प्राणचारश्च नासिक्यद्वादशान्तः ।
षट्त्रिंशदङ्गुलो जन्तोः सर्वस्य स्वाङ्गुलक्रमात् ॥ ६१ ॥

नसते कुटिलं गच्छतीति नासिका शक्तिः, तस्या इदं (अयं) 'नासिक्यः' शाक्तो द्वादशान्तः । तदुक्तम्—

'षट्त्रिंशाङ्गुलश्चारो हृत्पद्माद्यावशक्तितः ।' (स्व०तं० ४।२३५)

इति ॥ ६१ ॥

ननु यद्येवं तदतिक्षुद्रे मशकादिसंबन्धिन्यतिमहति वा हस्त्यादिसत्के देहे कथमेतत्सङ्गच्छते?—इत्याशङ्क्याह—

क्षोदिष्ठे वा महिष्ठे वा देहे तादृश एव हि।

वे सब सृष्टि आदि काल के अधीन हैं इसमें कोई सन्देह नहीं है । और वह (= काल) प्राणात्मक है इस कारण स्पष्ट उच्चार कहा जाता है ॥ ६० ॥

कालाधीना = सृष्टि स्थिति और संहार ये क्रमिक हैं । उच्चार = प्राण का सञ्चार । उसके कथन से सृष्टि आदि का यथार्थ परिज्ञान होता है—यह भाव है ॥ ६० ॥

वह कहते हैं—

प्राणचार, हृदय से लेकर शाक्तद्वादशान्त तक सब जन्तुओं के अपनी अंगुलि के क्रम से ३६ अंगुल (परिमाण वाला) होता है ॥ ६१ ॥

नसते = टेढ़े-टेढ़े चलती है, इसलिए नासिका = शक्ति । उसका यह = नासिक्य = शाक्तद्वादशान्त । वही कहा है—

"हृदयकमल से लेकर शाक्त द्वादशान्त पर्यन्त ३६ अंगुल तक (प्राण का) चार होता है ।" (स्व. तं. ४।२३५) ॥ ६१ ॥

प्रश्न—यदि ऐसा है तो अत्यन्त क्षुद्र मशक आदि से सम्बद्ध या अति विशाल हाथी आदि से सम्बद्ध शरीर में यह कैसे सङ्गत होता है?—यह शङ्का कर कहते हैं—

छोटे से छोटे या बड़े से बड़े शरीर में वैसा ही होता है ॥ ६२- ॥

'तादृशः' षट्त्रिंशदङ्गुल एव किन्तु स्वाङ्गुलापेक्षया ॥

न च सर्वस्य जन्तोः प्राणचार एव समो यावद्वीर्यादयोऽपि—इत्याह—

वीर्यमोजो बलं स्पन्दः प्राणचारः समं ततः ॥ ६२ ॥

अयमत्राशयः—संविद एव ह्ययं स्फारो यत्क्षोदिष्ठो महिष्ठो वा जन्तुवर्गः समुज्जृम्भते, न च तस्याः क्वचित्कश्चिद्विशेषः । यदुक्तम्—

'यैव चिद् गगनाभोगभूषणे भाति भास्वति ।
धराविवरकोशस्थे सैव चित्कीटकोदरे ॥' (वासिष्ठे)

इति । तदाहिताश्च वीर्यादयः—इति तेषामपि विशेषे न किंचिन्निमित्तमुत्पश्यामः । यत्पुनरेषां तारतम्यमभिलक्ष्यते तत्र कर्मवैचित्र्यमपराध्यति, यत्पुंसामप्यन्योन्यापेक्षया वीर्याद्यतिशाययतीति ॥ ६२ ॥

एवं सपीठिकाबन्धं प्राणस्य चारमानमभिधाय तदानन्तर्येणानुजोद्देशोद्दिष्टमहोरात्राद्यपि विभक्तुमपक्रमते—

षट्त्रिंशदङ्गुले चारे यद् गमागमयुग्मकम् ।

वैसा = छत्तीस अंगुल ही, किन्तु अपनी अंगुलि की अपेक्षा ॥ ६१ ॥

सब प्राणियों का प्राणचार ही समान नहीं है बल्कि वीर्य आदि भी (समान हैं)—यह कहते हैं—

इसलिए वीर्य, ओज, बल, स्पन्द और प्राणचार यह सब समान है ॥ -६२ ॥

यहाँ यह आशय है—संविद् का ही यह माहात्म्य है कि छोटे से छोटा या बड़े से बड़ा भी जन्तुवर्ग फैला हुआ है अथवा प्राणनक्रिया करता है उस (= संविद्) का कहीं कोई विशेष नहीं हैं । जैसा कि कहा है—

जो संविद् प्रकाशमान आकाश के विस्तार रूपी आभूषण में दीप्त होती है वही चित् पृथ्वी के विवरकोश में वर्त्तमान कीट के उदर में भी (भासित होती है) । (यो०वा०)

वीर्य आदि उसी से व्याप्त हैं इसलिए उनके भी विशेष में हम कोई कारण नहीं देखते । और जो इनका तारतम्य दिखलायी पड़ता है उसमें कर्मवैचित्र्य का दोष है जो कि पुरुषों में भी एक दूसरे की अपेक्षा वीर्य को अतिशयित करता है ॥ ६२ ॥

इस प्रकार पीठिकाबन्ध के साथ प्राण के चारमान का कथन कर उसके बाद नामित अहोरात्र आदि को भी विभक्त करने के लिए उपक्रम कर रहे हैं—

(प्राण का) ३६ अंगुल चार होने पर जो (प्राण के) आने और जाने

नालिकातिथिमासाब्दतत्सङ्घोऽत्र स्फुटं स्थितः ॥ ६३ ॥

'गमागमौ' प्राणापानारूपावारोहावरोहौ । तच्छब्देन नालिकादीनां सर्वेषामेव परामर्शः ॥ ६३ ॥

एतदेव क्रमेण विभजते—

तुटिः सपादाङ्गुलयुक्प्राणस्ताः षोडशोच्छ्वसन् ।
निःश्वसंश्चात्र चषकः सपञ्चांशेऽङ्गुलेऽङ्गुले ॥ ६४ ॥
श्वासप्रश्वासयोर्नाली प्रोक्ताहोरात्र उच्यते ।
नवाङ्गुलाम्बुधितुटौ प्रहरास्तेऽब्धयो दिनम् ॥ ६५ ॥
निर्गमेऽन्तर्निशेनेन्दू तयाः संध्ये तुटेर्दले ।

सचतुर्भागमङ्गुलयुग्मं तुटिरुच्यते—इति तत्षोडशधा गुणितं षट्त्रिंशदङ्गुलानि भवन्तीत्युक्तं 'प्राणस्ताः षोडशोच्छ्वसन्' इति । अपानवाहेऽप्येवमित्युक्तम् 'निश्वसंश्चेति' तेनोभयत्र द्वात्रिंशत्तुटयः । यदुक्तम्—

'प्राणापानाश्रिते वाहे द्वात्रिंशत्तुटयः स्थिताः ।' इति ।

का जोड़ा है, नाडिका, तिथि, मास, वर्ष और उन सबका समूह यहाँ स्पष्टतया स्थित है ॥ ६३ ॥

गमागम = प्राण पान रूप आरोह और अवरोह । तत् शब्द से नालिका आदि सभी का ग्रहण समझना चाहिये ॥ ६३ ॥

इसी का क्रम से विभाग करते हैं—

सवा सहित अंगुल का जोड़ा (= २।१।४ अंगुल) दूरी तक श्वास जाने में जो समय लगे वह एक तुटि है । वे (= तुटियाँ) × सोलह उच्छ्वास (= ३६) निःश्वास और उतना ही (= ३२ तुटियाँ) अर्थात् ३२ × २।१।४ = ७२ अंगुल (काल) का एक चषक होता है । श्वास और प्रश्वास की नाली (= प्रवाह) अहोरात्र कहा जाता है । नव अंगुल अथवा अम्बुधि (= ४) तुटियों का एक प्रहर होता है । ४ प्रहर का एक दिन और ४ प्रहर की एक रात । उन दोनों की दो सन्ध्यायें दो तुटियाँ होती हैं ॥ ६४-६६- ॥

चतुर्थभाग के सहित १ अंगुल, का दो गुना (= २।१।४ अंगुल) तुटि कहा जाता है । इस प्रकार (इसको) सोलह गुना करने से छत्तीस अंगुल होते हैं । इसलिए कहा गया—प्राणः ताः ...। अपानवाह में भी ऐसा ही है, इसलिए कहा गया और निश्वास लेते हुए । इस प्रकार दोनों जगह मिला कर ३२ तुटियाँ होती है । जैसा कि कहा गया—

"प्राण और अपान के आश्रित प्रवाह में ३२ तुटियाँ स्थित हैं ।"

तथात्र षट्त्रिंशदङ्गुलात्मनि प्राणचारे सपञ्चभागमङ्गुलं प्रति चषकः—इति त्रिंशद्धा विभक्ते प्राणवाहे त्रिंशच्चषका भवन्ति, एवमपानवाहेऽपि—इति प्राणापानोभयमीलनेन चषकषष्ट्यात्मनो घटिकाया उदयः—इत्युक्तं 'श्वासप्रश्वासयोर्नाडी प्रोक्ता' इति । 'निर्गमे' प्राणस्य बहिरुल्लासे, 'नवाङ्गुलाम्बुधितुटौ' नवाङ्गुलिस्थानासु चतसृषु तुटिषु प्रहरो, नवस्वङ्गुलीष्वसावुदेतीत्यर्थः । यदुक्तम्—

'.................... प्रहरः स्यान्नवाङ्गुलः ।' इति ।

'ते' इति नवाङ्गुलिमानाः प्रहराः 'अब्धयः' चत्वारः, अन्तरित्यर्थादपानस्योदये। एवं निशापि चत्वारः प्रहराः । तदुक्तम्—

'अहोरात्रस्त्वथोऽष्टभिः..................।' (स्व०तं० ७।२८) इति ।

तावेव च प्राणापानौ 'इनेन्दू' सूर्याचन्द्रमसौ भवत इत्यर्थः । यदुक्तम्—

'वासरे तु चरेत्सूर्यो धारायां सञ्चरञ्छशी ।
चन्द्रसूर्योदयो ह्येष.............................. ॥'

(स्व०तं० ७।४०) इति ।

तयोः प्राणापानरूपयो रात्रिदिनयोरर्थाद्द्वादशान्ते हृदि च तुटेर्दले संध्ये । सायंप्रातःसंध्ययोः प्रत्येकं प्राणीयस्यापानीयस्य चान्त्यस्यान्त्यस्य च तुट्यर्धस्य

यहाँ ३६ अंगुल वाले प्राणचार में १।१।५ अंगुल का एक चषक होता है । इस प्रकार प्राणवाह को तीस बार विभक्त करने पर तीस चषक होते हैं; इसी प्रकार अपानवाह में भी । फलतः प्राण अपान दोनों को मिलाने पर साठ चषक वाली घटिका का उदय होता है । यही कहा गया—श्वास और प्रश्वास में (आने वाले ६० चषकों के काल को) नाड़ी कहा गया है । निर्गम = प्राण के बाहर जाने में, नव अंगुल समुद्र संख्या वाली तुटि में = नव अंगुल स्थान वाली चार तुटियों का एक प्रहर होता है । अर्थात् यह (प्रहर) नव अंगुलियों में उदित होता है । जैसा कि कहा गया—

".............प्रहर नव अंगुल का होता है ।"

वे = नव अंगुल प्रमाण वाले प्रहर, अब्धि = चार, अन्तः = अपान का उदय होने पर । इसी प्रकार रात्रि भी चार प्रहर की होती हैं वही कहा गया है—

"दिन रात आठ (प्रहरों) (वाला होता है)........... ।" (स्व. तं. ६।२८)

वे दोनों प्राण और अपान ही इन, इन्दु = सूर्य और चन्द्रमा होते हैं । जैसा कि कहा है—

"दिन में सूर्य चलता है । धारा (= रात्रि) में चन्द्रमा चलता है । यह चन्द्रमा और सूर्य का उदय............ ।" (स्व. ७।४०)

उन दोनों = प्राण अपान रूप रात्रि और दिन का द्वादशान्त और हृदय में

संमेलनया सकलैव तुटिरुदयस्थानमित्यर्थः । अत एव संध्ययोस्तुटिद्वयमहोरात्रस्य च त्रिंशत्तुटयः । यदाहुः—

'संध्याकालं विना त्रिंशत्तुटिकोऽहोरात्रः ।' इति ।

यत्तु—

'चतुर्थान्ते च देवेशि प्राणसूर्यः सदास्तगः ।
ततोऽस्तमयसंध्यात्र तुट्यर्धं तु भवेत्प्रिये ॥' (स्व०तं० ७।३६)

इति । तथा

'हृत्पद्मं तु यदा प्राप्तः प्रभातसमयस्तदा ।
तुट्यर्धं तु वरारोहे पूर्वसंध्या भवेत्ततः ॥' (स्व०तं० ७।३९)

इत्याद्युक्तं तत्केवलमेव प्राणवाहमधिकृत्यापानवाहं चेत्यधिगन्तव्यम् । एवं

'शक्तेर्मध्योर्ध्वभागे तु तुट्यर्धं यत्प्रकीर्तितम् ।
पक्षसन्धिस्त्वसौ ज्ञेयः.......................... ॥' (स्व०तं० ७।६८)

इत्यादौ पक्षसन्धिग्रन्थेऽप्ययमेवाशयो योज्यः । अन्यथा ह्येका तुटिरकृतविनियोगा स्यात् ॥ ६५ ॥

तुटि के दो दल दोनों सन्ध्यायें हैं । सायं प्रातः सन्ध्याओं में से प्रत्येक प्राण सम्बन्धी और अपान सम्बन्धी तथा अन्तिम-अन्तिम तुट्यर्ध को मिलाने से सम्पूर्ण तुटि उदय का स्थान है । इसीलिए सन्ध्याओं की दो तुटियाँ और अहोरात्र की तीस तुटियाँ (कही गई हैं) । जैसा कहते हैं—

'सन्ध्याकाल के बिना दिन रात तीस तुटि का है ।'

जो कि

'हे देवेशि ! चतुर्थ (प्रहर) के अन्त में प्राण सूर्य सदा अस्त हो जाता है । हे प्रिये ! इसके बाद इस समय आधा तुटि अस्तमय सन्ध्या (होती है) ।' (स्व. तं. ७।३६)

तथा

'जब (प्राणवाह) हृदयकमल को प्राप्त होता है तब प्रभात काल होता है , हे वरारोह वाली ! उसके बाद आधा तुटि पूर्व सन्ध्या होती है ।' (स्व. ७।३९)

इत्यादि कहा गया वह केवल प्राणवाह एवं अपानवाह को दृष्टि में रखकर— ऐसा समझना चाहिए । इसी प्रकार—

'शक्ति के बीच ऊपरी भाग में जो तुटि का आधा भाग कहा गया है उसे पक्षसन्धि समझना चाहिए ।' (स्व. तं. ७।६८)

इत्यादि पक्षसन्धि ग्रन्थ में यही आशय लगाना चाहिए । अन्यथा एक तुटि का

न केवलमत्र सूर्याचन्द्रमसोरेवोदयो यावद् ग्रहान्तराणामपि—इत्याह—

केतुः सूर्ये विधौ राहुर्भौमादेर्वारभागिनः ॥ ६६ ॥
प्रहरद्वयमन्येषां ग्रहाणामुदयोऽन्तरा ।

केतुः सूर्येऽन्तर्भवति, एवं विधौ राहुः । तेन य एव सूर्याचन्द्रमसोरुदयः स एवानयोरित्यर्थः । यदुक्तम्—

'राहुश्चरति सोमेन केतुश्चरति भास्वता ।' (स्व०तं० ७।४२) इति।

वारभागिनः पुनर्भौमादेर्ग्रहस्य प्रहरद्वयमुदयस्तस्य प्रत्यहोरात्रामाद्यन्तार्धप्रहरचतुष्टयोपभोगात्, अन्येषां षष्ठपञ्चमानां ग्रहाणामन्तरा प्रहरं प्रहरं प्रत्येकमुदयः प्रत्यहोरात्रमर्धप्रहरद्वयोपभोगात् । तदुक्तम्—

'पूर्वोऽष्टभागो दिवसाधिपस्य तथैव चान्ते दिवसस्य विद्यात् ।
शेषाः ग्रहाः षट्परिवर्तनेन भुञ्जन्ति होरां निशि पञ्चमेन ॥'

इति ॥ ६६ ॥

अत्रैव प्रथमार्धप्रहरादारभ्य क्रमेण फलं निर्दिशति—

विनियोग ही नहीं होगा ॥ ६५ ॥

केवल सूर्य चन्द्रमा का ही उदय ऐसा नहीं है बल्कि दूसरे ग्रहों का भी (है)—यह कहते हैं—

केतु सूर्य में राहु चन्द्रमा में (अन्तर्भूत हैं) । दिन के भागी भौम आदि का दोप्रहर (में) उदय होता है । अन्य ग्रहों का बीच में उदय (होता है) ॥ -६६-६७- ॥

केतु का सूर्य में अन्तर्भाव होता है । इसी प्रकार राहु का चन्द्रमा में । इसलिए जो सूर्य और चन्द्रमा का उदय (काल) है वही इन दोनों का भी है । जैसा कि कहा गया है—

'राहु चन्द्रमा के साथ चलता है और केतु सूर्य के साथ ।' (स्व.तं. ७।४७)

इसके बाद वार के भागी भौम आदि ग्रह का दो प्रहर का उदय निर्धारित है क्योंकि प्रत्येक का दिन रात के आदि और अन्त के आधे प्रहर का चार (= दो प्रहर) का उपभोग होता है । अन्य छठे पाँचवे बुध गुरु शुक्र शनि ग्रहों का प्रत्येक एक-एक प्रहर के बीच उदय होता है क्योंकि प्रति अहोरात्र आधे आधे दो प्रहर का उपभोग होता है । वही कहा गया है—

दिन का पूर्व अष्टभाग और उसी प्रकार दिन के अन्त (का अष्ट भाग सूर्य का भोग काल) जानना चाहिए । शेष छः ग्रह परिवर्त्तन से दिन और रात्रि के विषय में पाँच (के परिवर्त्तन) से भोग करते हैं ॥ ६६ ॥

सिद्धिर्दवीयसी मोक्षोऽभिचारः पारलौकिकी ॥ ६७ ॥
ऐहिकी दूरनैकट्यातिशया प्रहराष्टके ।

सिद्धिर्दवीयसीत्यादिना सप्त भेदाः ॥ ६७ ॥

ननु संध्यायाश्चतुर्धोदयोऽपि कथं द्विधैवोक्त ?—इत्याशङ्क्याह—

मध्याह्नमध्यनिशयोरभिजिन्मोक्षभोगदा ॥ ६८ ॥

अभिजयति सर्वान्विघ्नानित्यभिजिन्नक्षत्रविशेषः । यदुक्तम्—

'मध्याह्ने चार्धरात्रे च उदयोऽभिजितो भवेत् ।
अभीप्सितं फलं तत्र साधकानां भवेदिह ॥'
(स्व०तं० ७।४७) इति ।

स च तालुनि, इत्यधिगन्तव्यम् । यदुक्तम्—

'...............मध्याह्नस्तालुमध्यतः ।' (७।३३) इति ॥ ६८ ॥

न केवलमत्राभिजित एवोदयो यावदश्विन्यादीनामपि—इत्याह—

नक्षत्राणां तदन्येषामुदयो मध्यतः क्रमात् ।

यहीं पर प्रथम अर्धप्रहर से लेकर क्रमशः फल का निर्देश करते हैं—

आठ प्रहर में (क्रमशः) कुछ दूर की सिद्धि, मोक्ष, अभिचार, पारलौकिक सिद्धि, सांसारिक सिद्धि, अतिशय दूर की सिद्धि और अतिशय निकट की सिद्धि (समझनी चाहिए) ॥ -६७-६८- ॥

कुछ दूर की सिद्धि इत्यादि से सात भेद होते हैं ॥ ६७ ॥

प्रश्न—संन्ध्या का चार प्रकार का उदय भी कैसे दो ही प्रकार का कहा गया ?—यह शङ्का कर कहते हैं—

मध्याह्न और मध्य निशा में अभिजित् नक्षत्र मोक्ष और भोग देने वाली होती है ॥ -६८ ॥

सभी विघ्नों की जीतने वाला = अभिजित् विशिष्टनक्षत्र । जैसा कि कहा गया है—

"मध्याह्न और अर्धरात्रि में अभिजित् का उदय होता है । उस समय सा॰ःकों को अभीप्सित फल (प्राप्त) होता है ।" (स्व. तं. ७।४७)

और वह तालु में होता है—यह जानना चाहिए । जैसा कि कहा गया है—

"मध्याह्न तालु के मध्य में (होता है)" ॥ -६८ ॥ (स्व. तं. ७।३३)

यहाँ केवल अभिजित् का ही उदय नहीं होता बल्कि अश्विनी आदि का भी—यह कहते हैं—

'तदन्येषाम्' इति राशितारादीनाम् । यदुक्तम्

'ऋक्षाणिराशयश्चैव तारास्त्वंशास्तथैव च ।
प्राणे वै उदयन्त्येते अहोरात्रेण सुव्रते ॥' (स्व०तं० ७।३१)

इति । अत्र च नक्षत्राणां सत्रिभागमङ्गुलमुदयस्थानम्, एवमन्येषामपि संख्यानुसारमुदयस्थानं परिकल्पनीयम् ।

प्रहराष्टके च न नक्षत्राणामेवोदयोऽपि त्वन्येषामपि—इत्याह—

नागा लोकेशमूर्तीशा गणेशा जलतत्त्वत: ॥ ६९ ॥
प्रधानान्तं नायकाश्च विद्यातत्त्वाधिनायका: ।
सकलाद्याश्च कण्ठ्योष्ठ्यपर्यन्ता भैरवास्तथा ॥ ७० ॥
शक्तय: पारमेश्वर्यो वामेशा वीरनायका: ।
अष्टावष्टौ ये य इत्थं व्याप्यव्यापकताजुष: ॥ ७१ ॥
स्थूलसूक्ष्मा: क्रमात्तेषामुदय: प्रहराष्टके ।

'नागा' इत्यनन्ताद्या: । यदुक्तम्—

'इनस्त्वनन्त इत्युक्त: सोमो वासुकिरुच्यते ।
तक्षक: कुज इत्युक्त: कार्कोट: सोमजो भवेत्॥

उससे अन्य नक्षत्रों का भी क्रमश: मध्य से उदय होता है ॥ ६९- ॥

उससे अन्यों का = राशि तारा आदि का । जैसा कि कहा है—

"हे सुव्रते ! नक्षत्र, राशियाँ, तारायें और उसी प्रकार अंश ये एक रात दिन में प्राण में उदित होते हैं ।" (स्व. ७।३१)

इनमें नक्षत्रों का १।३।४ अंगुल उदय का स्थान है । इसी प्रकार दूसरों का भी संख्या के अनुसार उदयस्थान कल्पित कर लेना चाहिए ॥ ६८ ॥

आठ प्रहर में नक्षत्रों का ही उदय नहीं होता बल्कि दूसरों का भी—यह कहते हैं—

नाग, लोकेश, मूर्त्तीश, गणेश, जलतत्त्व से लेकर प्रकृति तत्त्व तक के नायक, विद्यातत्त्व के अधिनायक, सकल आदि, कण्ठ से लेकर ओष्ठ्य पर्यन्त भैरव, पारमेश्वरी शक्तियाँ, वामेश, वीरनायक इस प्रकार जो-जो आठ व्याप्यव्यापकतासम्बन्ध वाले स्थूल सूक्ष्म हैं, आठ प्रहरों मे उनका क्रमश: उदय होता है ॥ -६९-७२- ॥

नाग = अनन्त आदि । जैसा कि कहा गया है—

"सूर्य को अनन्त कहा गया है । चन्द्रमा वासुकि कहे जाते हैं । मङ्गल को तक्षक कहा गया है । सोमपुत्र (= बुध) को कार्कोटक कहा गया है । गुरु सरोज

सरोजो गुरुराख्यातो महाब्जः शुक्र उच्यते ।
शङ्खो मन्दगतिर्ज्ञेयः सप्त नागा ग्रहाः क्रमात् ॥
अष्टमः कुलिको नाम राहुः क्रूरग्रहो भवेत् ।' इति ।

एषां च ग्रहवदेव षट्परिवृत्त्यादिक्रमेणोदयः किन्तु कुलिकस्य शङ्खवन्मन्दगतिनैव सहोदयः । यदुक्तम्—

'शनैश्चरस्य यः कालस्तं भुङ्क्ते कुलिकः प्रिये ।
सोऽपि दुष्टः समाख्यातः सर्वकर्मस्वसिद्धिदः ॥' इति ।

लोकेश्वरादीनां पुनराद्यार्धप्रहरक्रमेणैवोदयोऽन्यथा सप्तानां ग्रहाणामष्टकैः सह सङ्गत्ययोगात् । एते च सर्व एवाष्टका भुवनाध्वनि वक्ष्यन्ते—इति तत एवावधार्याः—इति किं तद्व्यावर्णनग्रन्थविस्तरेण । व्याप्यव्यापकत्वे स्थूलसूक्ष्मत्वं हेतुः, हि सूक्ष्मेण व्याप्यत इति भावः । यथा ग्रहाणां नागा व्यापकास्तेषामपि लोकेश्वराः इत्याद्युत्तरोत्तरम् अत एव क्रमादित्युक्तम् । तदुक्तम्—

'ये ग्रहास्ते च वै नागा लोकपालाष्टकं च ते ।
मूर्तयश्चैव ते चाष्टावष्टौ ते च गणेश्वराः ॥'
(स्व०तं० ७।४३) इत्यादि ।

एवमनेन

और शुक्र महाब्ज कहा गया है । मन्दगति (= शनि) को शङ्ख समझना चाहिए । ये सात ग्रह क्रमशः नाग है । आठवाँ (= केतु) कुलिक और राहु क्रूर ग्रह है ।"

इनका ग्रहों के समान ही छ परिवृत्ति आदि के क्रम से उदय होता है । किन्तु केतु का शनि के समान शनि के साथ ही उदय होता है । जैसा कि कहा गया है—

"हे प्रिये ! शनैश्चर का जो काल है उसे केतु भोगता है वह भी दुष्ट और सब कार्यों को विफल करने वाला कहा गया है ।"

लोकेश्वर आदि का प्रथम अर्ध प्रहर के क्रम से ही उदय होता है । अन्यथा सात ग्रहों की आठ के साथ सङ्गति ही नहीं बनेगी । ये सभी आठ भुवन अध्वा (वाले वर्णन में) कहे जायेंगे । अतः वहीं से (इन्हें) जानना चाहिए । इसलिए उसके वर्णन के कारण ग्रन्थ को विस्तृत करने से क्या लाभ ? व्याप्यव्यापकता में स्थूलता और सूक्ष्मता हेतु है । स्थूल सूक्ष्म से व्याप्त होता है—यह तात्पर्य है । जैसे कि ग्रहों के व्यापक नाग है; लोकेश्वर इत्यादि उत्तरोत्तर उनके भी (व्यापक) है । इसीलिए 'क्रमात्' कहा है । वही कहा है—

"जो ग्रह हैं वे ही नाग हैं और वे ही लोकपाल हैं, वे ही आठ मूर्त्तियां हैं और वे ही आठ गणेश्वर हैं ।" इत्यादि । (स्व. तं. ७।४३)

इस प्रकार इसके द्वारा—

'तेन प्राणपथे विश्वाकलनेयं विराजते ॥' (तं० ६।४५)

इत्यादि यदुक्तं तत्स्मारितमित्यवसेयम् ॥ ७१ ॥

ननु यत्र प्रहराष्टके फलभेद उक्तस्तत्र दिननिशयोः कथं न ?—इत्याशङ्क्याह—

दिने क्रूराणि सौम्यानि रात्रौ कर्माण्यसंशयम् ॥ ७२ ॥

ननु

'वासनाभेदतः प्राप्तिः सांध्यमन्त्रप्रचोदिता ।'

इत्यादिदृशानुसन्धानभेदेन फलमपि भिद्यते—इति कथमेवं नियम एव भवेत् ?—इत्याशङ्क्याह—

क्रूरता सौम्यता वाभिसन्धेरपि निरूपिता ।

तेन कदाचिद्व्यत्ययोऽपि भवेदिति भावः ॥

ननु संध्याद्वयस्य फलं निर्दिष्टं सायंप्रातःसंध्ययोः पुनः किं न ?—इत्याशङ्क्याह—

"इससे प्राणपथ पर यह विश्व की कलना विराजित होती है ।" (तं. आ. ६।४५)

इत्यादि जो कहा गया उस का स्मरण करा दिया गया—यह समझना चाहिए ॥ ७१ ॥

प्रश्न—जहाँ आठ प्रहर में फलभेद कहा गया है वहाँ दिन और रात क्यों नहीं ?—यह शङ्का कर कहते हैं—

निःसन्देह दिन में क्रूर और रात्रि में सौम्य कर्म करना उत्तम है ॥ -७२ ॥

प्रश्न—"वासनाभेद के कारण प्राप्ति सान्ध्य मन्त्र से प्रेरित (होती है) ।"

इत्यादि के अनुसार अनुसन्धान के भेद से फल भी भिन्न होता है—तो इस प्रकार का नियम ही कैसे होगा?—यह शङ्का कर कहते हैं—

अभिसन्धि की भी क्रूरता और सौम्यता का निरूपण किया जा चुका है ॥ ७३- ॥

इससे कभी व्यत्यय (= उलटफेर) भी हो सकता है—यह भाव है ।

प्रश्न—(मध्याह्न और मध्यरात्रि) सन्ध्याद्वय का फल बतला दिया गया, सांय प्रातः सन्ध्याओं का क्यों नहीं ?—यह शङ्का कर कहते हैं—

दिनरात्रिक्षये मुक्तिः सा व्याप्तिध्यानयोगतः ॥ ७३ ॥
ते चोक्ताः परमेशेन श्रीमद्वीरावलीकुले ।

'दिनरात्रिक्षये' इति सायंप्रातःसन्ध्ययोः । 'ते' इति व्याप्तिध्यानादयः ॥ ७३ ॥

तदेव पठति—

सितासितौ दीर्घह्रस्वौ धर्माधर्मौ दिनक्षपे ॥ ७४ ॥
क्षीयेते यदि तद्दीक्षा व्याप्त्या ध्यानेन योगतः ।
अहोरात्रः प्राणचारे कथितो मास उच्यते ॥ ७५ ॥

यदि नाम प्राणापानरूपौ सितासितौ परस्परव्यावृत्त्या वर्तमानौ दीर्घह्रस्वादिशब्दव्यपदेश्यौ शुभाशुभौ पक्षौ 'क्षीयेते' अपोहात्मविकल्परूपताघट्टनेन निर्विकल्पात्मपरसंविद्रूपत्वेन परिस्फुरतस्तदेव व्याप्त्या ध्यानेन योगेन च दीक्षा, ज्ञानयोगक्रियात्मिकया दीक्षया निर्यन्त्रणमेव मुक्तिर्भवेदित्यर्थः । एतदेव हि व्याप्तिध्यानयोगानां मुख्यं रूपं यत्सितासितादिपक्षयोः प्रक्षयो नामेति । तदुक्तं तत्र—

'सितासितौ च यौ पक्षौ दीघह्रस्वौ च कीर्तितौ ।
धर्माधर्ममयौ पाशौ महाघोरौ भयानकौ ॥

दिन और रात्रि का क्षय होने पर मुक्ति होती है (और) वह व्याप्ति ध्यान और योग के कारण होती हैं और वे परमेश्वर के द्वारा वीरावली कुल में कहे गये हैं ॥ -७३-७४- ॥

दिनरात्रिक्षय के समय = सायं (सन्ध्या और) प्रातःसन्ध्या के काल में । वे = व्याप्ति ध्यान आदि ॥ ७३ ॥

वह पढते हैं—

यदि श्वेत-श्याम, दीर्घ-ह्रस्व, धर्म-अधर्म, दिन-रात रूप (परस्पर विरोधी) क्षीण होते हैं, व्याप्ति ध्यान और योग से वही दीक्षा (यथार्थ) है । प्राणचार (के प्रसङ्ग) में अहोरात्र कह दिया गया । (अब) मास कहा जा रहा है ॥ -७४-७५ ॥

यदि एक दूसरे के अभाव में रहने वाले तथा दीर्घ ह्रस्व आदि शब्दों से व्यवहार्य शुभ अशुभ प्राण अपान रूप श्वेत श्याम क्षीण होते हैं (अर्थात्) अपोहरूप विकल्परूपता के घट्टन (= संक्षय) से निर्विकल्पात्मक पर संविद् रूप में स्फुरित होते हैं तो वही व्याप्ति ध्यान और योग से दीक्षा है अर्थात् ज्ञान योग क्रिया रूपी दीक्षा के द्वारा निर्यन्त्रण ही मुक्ति है । सित असित आदि पक्षों का क्षय ही व्याप्ति ध्यान और योगों का मुख्य रूप है । वही वहाँ कहा है—

"जो दो पक्ष सित (= शुक्ल) और असित (= कृष्ण), तथा दीर्घ और ह्रस्व

द्वयोर्यत्र भवेच्छेदः क्षयेन्माया तु योगिनी ।
क्षये शून्यं परं ज्ञेयं दीक्षा ह्येषा प्रकीर्तिता ॥
नान्यथा भवते दीक्षा रजसां पातने न तु ।
नैव शास्त्रैर्भवेन्मुक्तिर्यजने नैव याजने ॥
एषा ब्रह्मविदां दीक्षा नान्यथा तु वदाम्यहम् ।' इति ।

तथा

'सितासितौ कथिष्यामि (वदिष्यामि) नामपर्यायवाचकैः ।'

इत्युपक्रम्य

'अहः शुक्लस्तथा प्राणः....................।' इति ।
'अधर्मश्च क्षपा चैव.........................।'

इति एवमहोरात्रमुपसंहृत्य मासमवतारयति 'अहोरात्र' इत्यादिना ॥ ७५ ॥

तमेवाह—

दिनं कृष्णो निशा शुक्लः पक्षौ कर्मसु पूर्ववत् ।

पूर्ववदिति, रात्रिन्दिनवत् । तेन कृष्णपक्षे क्रूराणि कर्माण्यन्यत्र च

कहे गए हैं वे धर्मअधर्मयुक्त पाश, महाघोर और भयानक हैं । उन दोनों का जब कर्त्तन हो जाता है तो यह योगिनी माया क्षीण हो जाती है । क्षय होने पर परमशून्य जानने योग्य होता है । यही (दी = दिन और क्षा = क्षपा अर्थात् रात्रि के द्वारा बोधित) दीक्षा कही गई है । दीक्षा दूसरी तरह नहीं होती (शिर पर) धूल या भस्म के गिराने से नहीं । शास्त्रों से मुक्ति नहीं होती । यजन और याजन से भी नहीं । यह ब्रह्मवेत्ताओं की दीक्षा है । मैं मिथ्या नहीं कहता हूँ ॥''

तथा—

''श्वेत श्याम को नाम के पर्यायवाची (शब्दों) के साथ कहूँगा ।''

ऐसा उप्रक्रम कर

''दिन तथा प्राण शुक्ल हैं................ ।''

''अधर्म और रात्रि...................... ।''

इस प्रकार दिन और रात्रि का उपसंहार कर 'अहोरात्र'—इत्यादि के द्वारा मास का प्रारम्भ करते हैं ॥ ७५ ॥

उसी को कहते हैं—

दिन कृष्ण पक्ष है, रात्रि शुक्ल पक्ष है । कर्मों के विषय मे पूर्ववत् (जानना चाहिये) ॥ ७६- ॥

सौम्यानीति। तदुक्तम्—

'क्रूरकर्माणि तत्रैव कुर्वन्सिद्धिमवाप्नुयात्।
शुभकर्माणि कृष्णे च न च सिद्ध्यन्ति सुव्रते॥' इति।

तथा

'तदारभ्य च कर्माणि शुभान्याभ्युदयानि च।
ध्यानमन्त्राभियुक्तस्य सिद्ध्यन्ते नात्र संशयः॥' इति॥

तत्रैव तिथिभागमाह—

याः षोडशोक्तास्तिथयस्तासु ये पूर्वपश्चिमे॥ ७६॥
तयोस्तु विश्रमोऽर्धेऽर्धे तिथ्यः पञ्चदशेतराः।

उक्ता इति, प्राणवाहेऽपानवाहे वा। तयोरिति, पूर्वपश्चिमयोस्तुट्योः। विश्रम इति, पक्षसंधित्वेन वक्ष्यमाणः। अर्धेऽर्ध इति, प्राणीयेऽपानीये च। तयोश्च संमेलनात्तुटिर्विश्रमस्थानं स्यान्नतु तुट्यर्धम्। 'इतरा' इति हृदि द्वादशान्ते च विश्रमस्थानत्वेनार्धार्धिकयोक्तायाः षोडश्यास्तुटेरन्या इत्यर्थः। यदुक्तम्—

पूर्ववत् = रात्रि दिन के समान। इसलिए कृष्ण पक्ष में क्रूर कर्म और दूसरे में सौम्य कर्म (करने चाहिए)।

वही कहा गया है—

"उसी में क्रूर कर्मों को करते हुए सिद्धि को प्राप्त करना चाहिए। हे सुव्रते! शुभ कर्म कृष्ण पक्ष में कभी भी सिद्धिप्रद नहीं होते।" तथा—

"ध्यान और मन्त्र से युक्त (पुरुष) के शुभ और आभ्युदयिक कर्म उस समय से (= पूर्वोक्त समय के अनुसार करने पर) सिद्ध होते हैं इसमें संशय नहीं है" ॥ ७५ ॥

वही पर तिथिभाग को कहते हैं—

जो सोलह तिथियाँ कही गई हैं उनमें जो पूर्व और पश्चिम (तुटियाँ) हैं उन दोनों का आधे-आधे में विश्राम होता है। शेष १५ तिथियाँ है ॥ -७६-७७- ॥

कही गई—प्राणवाह या अपानवाह में। उन दोनों का = पूर्व पश्चिम तुटियों का। विश्राम—पक्षसन्धि के रूप में आगे कहा जाने वाला। आधे-आधे में—प्राण के और अपान के उन दोनों का मेल होने से तुटि विश्राम स्थान है न कि तुटि का आधा। अन्य = हृदय और द्वादशान्त में विश्रामस्थान के रूप में आधा आधा रूप में कही गई सोलहवीं तुटि से भिन्न।

षोडशी—१/२, १, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, ३०। १/२, १५, १४, १३, १२, ११, १०, ९, ८, ७, ६, ५, ४, ३, २, १। इसमें ३० अमावस्या और

'तुट्यर्धं चाप्यधश्चोर्ध्वं विश्रमः परिकीर्तितः ।
मध्ये पञ्चदशोक्ता यास्तिथयस्ताः प्रकीर्तिताः ॥' (७।६१)

इति ॥ ७६ ॥

अत्राप्यहोरात्रविभागमाह—

सपादे द्व्यङ्गुले तिथ्या अहोरात्रो विभज्यते ॥ ७७ ॥
प्रकाशविश्रमवशात्तावेव हि दिनक्षपे।

'विभज्यत' इति प्रकाशविश्रमात्मना विभागेन व्यवस्थाप्यत इत्यर्थः । क्वचित् ह्यत्र प्रकाशस्य प्राधान्यं, क्वचिच्च विश्रमात्मन आनन्दस्य; तत्र प्रकाशप्राधान्ये दिनमन्यथा तु रात्रिरित्युक्तं 'तावेव हि दिनक्षपे' इति । तेनैककस्यास्तुटेः साष्टभागाङ्गुलपरीमाणमाद्यमर्धं प्रकाशरूपं दिनं, परं तु विश्रान्त्यात्मा रात्रिरिति । तदुक्तम्—

'प्रथमोदये हृत्पद्मात्तुट्यर्धं तु दिनं भवेत् ।
द्वितीये चैव तुट्यर्धे यदा चरति शर्वरी ॥'
(स्व०तं० ७।६२) इति ॥ ७७ ॥

ननु यदहोरात्रस्य प्रकाशविश्रान्तितारतम्येन दिननिशाविभाग उक्तस्तदास्तां को

---

१५ पूर्णिमा हैं । दोनों के बीच १/२ + १/२ करके १ तुटि विश्रामस्थल है ।

जैसा कि कहा गया—

नीचे और ऊपर तुटि का आधा भाग विश्राम कहा गया है । और मध्य में जो पन्द्रह कही गयीं वे तिथि कही गई हैं ॥ ७६ ॥ (स्व. ७।६१)

यहाँ भी दिन रात का विभाग कहते हैं—

तिथि के २।१।४ अंगुल में दिन रात का विभाग होता है । प्रकाश और विश्राम के कारण वे दिन और रात है ॥ -७७-७८- ॥

विभक्त होता है = प्रकाश और विश्राम के रूप में विभाग के द्वारा व्यवस्थित होता है । इसमें कहीं प्रकाश की प्रधानता है और कहीं विश्रामरूप आनन्द की । उनमें प्रकाश की प्रधानता होने पर दिन अन्यथा रात्रि (होती है) । इसलिए कहा गया—'वे दोनों ही आधे दिन और रात्रि, हैं ।' इसलिए एक-एक तुटि का पहला अर्ध जो कि साष्ट भाग अंगुल परिमाण (१।१।८) है प्रकाश रूप दिन है । दूसरा विश्रान्ति रूप रात्रि हैं । वही कहा है—

"हृदयकमल से प्रथम उदय में तुटि का आधाभाग दिन होता है । और दूसरे तुट्यर्ध में रात्रि होती है" ॥ ७७ ॥ (स्व. ७।६२)

प्रश्न—दिन और रात्रि के प्रकाश और विश्रान्ति के तारतम्य से जो दिन और

दोषः, यत्पुनर्बाह्याहोरात्रक्रमातिक्रमेणाप्युक्तमन्तः प्राणापानरूपं दिननिशाविभागमुल्लङ्घ्य तुट्यन्तरमितयोरवस्थानमुच्यते तदपूर्वमिव नः प्रतिभाति?—इत्याशङ्क्याह—

संवित्प्रतिक्षणं यस्मात्प्रकाशानन्दयोगिनी ॥ ७८ ॥
तौ क्लृप्तौ यावति तया तावत्येव दिनक्षपे।

प्रतिक्षणमिति, सदैव प्रकाशानन्दमयीत्यर्थः । अतश्च तथा संविद उदयः प्रमातॄणां वेद्यग्रहणपरत्वादेस्तारतम्यात्कस्यचित्क्षणः कस्यचित्कल्पः कस्यचिन्निमेषोऽपि वा स्यात् ॥ ७८ ॥

अत एवाह—

यावत्येव हि संवित्तिरुदितोदितसुस्फुटा ॥ ७९ ॥
तावानेव क्षणः कल्पो निमेषो वा तदस्त्वपि ।

नन्वेवमपि भवतु को दोषस्तत्राप्यस्या वेद्यग्रहणप्ररत्वं स्वात्मनि विश्रान्तिपरत्वं वा किं तुल्यकक्ष्यतयैव भवेदुतान्यथापि ?—इत्याशङ्क्याह—

यावानेवोदयो वित्तेर्वेद्यैकग्रहतत्परः ॥ ८० ॥
तावदेवास्तमयनं वेदितृस्वात्मचर्वणम् ।

रात्रि का विभाग कहा गया वह रहे उसमें क्या दोष है ? लेकिन जो बाह्य अहोरात्र के क्रम का अतिक्रमण करके भी कहा गया अन्तःप्राण अपान रूप दिन रात का विभाग (उसका) भी उल्लङ्घन कर तुट्यन्तर परिमित की सत्ता बता रहे हैं वह हमें अपूर्व जैसा लग रहा है—यह शङ्का कर कहते हैं—

जिस कारण संवित् प्रतिक्षण प्रकाश और आनन्द वाली है इसलिए उसके द्वारा जितनी मात्रा में (प्रकाश और आनन्द) कल्पित होते हैं उतने में ही दिन और रात्रि (होती है) ॥ -७८-७९- ॥

प्रतिक्षण = सदैव प्रकाश और आनन्दमयी । इसलिए उस प्रकार का संविद् का उदय प्रमाताओं के वेद्य के ज्ञान में लगे रहने के कारण तारतम्य से किसी के लिये क्षण किसी के लिये कल्प और किसी के लिए निमेष भी हो जाता है ॥ ७८ ॥

इसीलिए कहते हैं—

संवित् जितनी ही देर तक उदित हो कर सुस्फुट होती है उतना ही (समय) क्षण, कल्प अथवा निमेष होता है ॥ -७९-८०- ॥

प्रश्न—ऐसा भी हो क्या दोष है ? वहाँ भी इसकी वेद्यग्रहणपरता अथवा स्वात्मा में विश्रान्तिपरता क्या समान स्तर की है या अन्यथा भी ?—यह शङ्का कर कहते हैं—

'वित्तेः' इति संविदः । अस्तमयनमिति, वेद्यप्रकाशस्य न्यग्भावात् । 'चर्वणम्' इति विश्रान्तिः । एवकाराभ्यां च साम्यमेव द्योतितम् ॥ ८० ॥

ननु स्वात्मविश्रान्तिपरत्वेऽप्यन्तारूपाणां सुखादीनां वेद्यानां सद्भावात् तद्-ग्रहणपरत्वं न हीयेत्—इति कथमनयोस्तुल्यकक्ष्यत्वं स्यात् ?—इत्याशङ्क्याह—

वेद्ये च बहिरन्तर्वा द्वये वाथ द्वयोज्झिते ॥ ८१ ॥
सर्वथा तन्मयीभूतिर्दिनं वेत्तृस्थता निशा ।

वेद्यं नाम बहिरस्त्वन्तर्वा, मा वा भूत्किमनेन प्रयोजनं, यावता हि तन्मयीभावो नाम सर्वथा दिनं वेत्तृस्थता स्वात्मविश्रान्तिश्च निशा, इत्यस्माकं विवक्षितं; तेन यावद्वेद्यग्रहस्तावद्दिनमन्यथा तु रात्रिरिति । यदाहुः—

'ततो यत्र यावत्तावदनया वेद्यग्रहवेदकविश्रान्तिभूमौ प्रकाशानन्दावाभास्येते तत्र तावद्रूपे एव दिननिशे' इति ।

अतश्च दिननिशयोस्तुल्यकक्ष्यत्वमेव भवति, इति न कश्चिन्नियमः । 'द्वयोज्झिते' इत्यनेन वेद्यस्यानवक्लृप्तिरेवोपोद्बलिता न त्वेवमस्य संभवो दर्शितः,

---

संविद् का वेद्य के ज्ञान में तत्पर जितना उदय होता है उतना ही वेत्ता की स्वात्मचवर्णा रूप अस्तमयता भी है ॥ -८०-८१- ॥

वित्ति का = संविद् का । अस्तमयनवेद्य प्रकाश के छिप जाने से । चर्वणा = विश्रान्ति । श्लोकस्थ दो एवकारों के द्वारा समता ही बतलायी गई है ॥ ८० ॥

प्रश्न—स्वात्मविश्रान्तिपरता होने पर भी आन्तरिक सुख आदि वेद्य के रहने पर उसकी ग्रहणपरता तो कम नहीं होगी तो इन दोनों की तुल्यश्रेणिता कैसे होगी ? —यह शङ्का कर कहते हैं—

वेद्य के बाह्य या आन्तरिक अथवा दोनों होने पर अथवा दोनों को छोड़ देने पर सर्वथा तन्मय होना दिन और वेत्ता में स्थित होना रात्रि है ॥ -८१-८२- ॥

वेद्य बाह्य हो या आभ्यन्तर या न हो इससे क्या तात्पर्य ? क्योंकि तन्मयीभाव सर्वथा दिन है और वेत्ता में स्थिति और आत्मविश्रान्ति रात्रि है । जैसा कि कहते हैं—

"इसलिए जहाँ जब तक इसके द्वारा वेद्य का ग्रहण ओर वेदक की विश्रान्तिभूमि में प्रकाश और आनन्द आभासित होंगे तब तक उसी रूप वाले दिन और रात होगें ।"

इसलिए दिन और रात्रि की तुल्यकक्ष्यता ही होती है ऐसा कोई नियम नहीं है। 'द्वयोज्झिते' इस पद के द्वारा वेद्य की अनवकल्पना ही संकेतित है न कि

नह्यनन्तर्बहीरूपं वेद्यं किंचित्संभवेत् ॥ ८१ ॥

ननु योऽयं संविदः प्रकाशविमर्शयोरेकतरप्राधान्याद्विशेष उक्तः स किं प्रमातॄणामपि संभवेन्न वा ?—इत्याशङ्क्याह—

वेदिता वेद्यविश्रान्तो वेत्ता त्वन्तर्मुखस्थितिः ॥ ८२ ॥

'वेदिता' इति ज्ञाता, 'वेत्ता' इति विचारयिता विम्रष्टेत्यर्थः । तेनैकत्र प्रकाशप्राधान्यमन्यत्र तु विमर्शस्य—इति प्रमातुरपि द्वैविध्यम् ॥ ८२ ॥

वेत्तापि द्विधा—इत्याह—

पुरा विचारयन्पश्चात्सत्तामात्रस्वरूपकः ।

विमर्शनान्तरीयक एव हि स्वरूपलाभो भवेदिति भावः । एवमत्र ज्ञानविचारसत्तार्थतया त्रिविधोऽपि विधिराश्रयणीयो येन प्रमातुस्त्रैविध्यं सिध्येदिति भावः ॥

अत्रैव प्रसङ्गाज्जाग्रदादिस्वरूपमपि निरूपयति—

इस प्रकार इसकी उत्पत्ति दिखाई गयी बिना अन्तःस्थिति के बाह्य वेद्य सम्भव नहीं हैं ॥ ८१ ॥

प्रश्न—प्रकाश और विमर्श में से किसी एक की प्रधानता के कारण जो यह संविद् का वैशिष्ट्य कहा गया वह क्या प्रमाताओं के विषय में भी सम्भव है अथवा नहीं ?—यह शङ्का कर कहते हैं—

वेदिता वेद्य में विश्रान्त होता है और वेत्ता (वह है) जिसकी स्थिति अन्तर्मुखी हो ॥ -८२ ॥

वेदिता = ज्ञाता । वेत्ता = विचार करने वाला = विमर्शवान् । इसलिए एक में प्रकाश की प्रधानता है दूसरे में विमर्श की । इस प्रकार प्रमाता भी दो प्रकार के हैं ॥ ८२ ॥

वेत्ता भी दो प्रकार के हैं—यह कहते हैं—

पहले विचार करने वाला होता है बाद में सत्ता ही उसका स्वरूप हो जाता है ॥ ८३- ॥

स्वरूपलाभ विमर्श का नान्तरीयक[1] (विमर्श के बिना न होने वाला) ही है । इस प्रकार यहाँ ज्ञान, विचार और सत्ता की दृष्टि से तीनो प्रकार की विधि का आश्रयण करना चाहिए जिससे प्रमाता की भी तीन प्रकार की सिद्धि हो सकती है ॥ ८२ ॥

---

१. येन विना यत्र भवति तत्तस्य नान्तरीयकम् ।

जाग्रद्वेदितृता स्वप्नो वेत्तृभावः पुरातनः ॥ ८३ ॥
परः सुप्तं क्षये रात्रिदिनयोस्तुर्यमद्वयम् ।

जाग्रदिति, वेद्यविश्रान्तेरेव प्राधान्यात् । पुरातन इति, विम्रष्टृतात्मकः । स्वप्न इति, वेद्यस्य कथंचिदप्राधान्यात् । पर इति, सत्तामात्रनिष्ठः । सुप्तमिति, वेद्यक्षोभप्रक्षयात् । अद्वयमिति, प्रमातृभेदस्यापि विगलनात् । अनेन च 'विश्वात्मता च प्राणत्वम्' इत्याद्युक्तं स्मारितम् ॥ ८३ ॥

ननु रात्रिदिनयोर्बहिः कदाचित्साम्यं भवेत् कदाचिच्च वैषम्यमित्यत्र किं निमित्तम् ?—इत्याशङ्क्याह—

कदाचिद्वस्तुविश्रान्तिसाम्येनात्मनि चर्वणम् ॥ ८४ ॥
वेद्यवेदकसाम्यं तत् सा रात्रिदिनतुल्यता ।

यन्नाम कदाचिद्वेद्ये स्वात्मनि च तुल्यकक्ष्यतया विश्रान्तिर्भवेत् तदेव वेद्यवेदकयोः साम्यं भवेत्, तदनुप्राणितं च रात्रिदिनयोस्तुल्यत्वं, यत्सर्व एव योगिनो महापुण्यं विषुवत्कालमाचक्षते—यदुक्तम्—

'वेद्यवेदकसाम्येन वस्तुविश्रमचर्वणम् ।

यहीं पर प्रसङ्गवश जाग्रत आदि (अवस्थाओं) के स्वरूप का भी निरूपण करते हैं—

वेदित्रिता जाग्रत है, पुरातन वेतृभाव स्वप्न है; परावस्था सुषुप्ति है और रात्रि दिन का क्षय होने पर अद्वय तुर्य है ॥ -८३-८४- ॥

जाग्रत—वेद्यविश्रान्ति की ही प्रधानता होने से । पुरातन—विम्रष्टतारूप । स्वप्न—वेद्य की किसी तरह प्रधानता न होने से । पर—केवल सत्ता मे रहने वाला । सुप्त—वेद्य के क्षोभ का प्रक्षय होने से अद्वय क्योंकि उस समय प्रमाता का भेद भी नष्ट हो जाता है । इसके द्वारा 'विश्वात्मता प्राण है' इत्यादि पहले कहे गए का स्मरण कराया गया ॥ ८३ ॥

प्रश्न—रात्रि और दिन का बाहर कभी साम्य हो जाता है और कभी वैषम्य इसमें क्या कारण है ?—यह शङ्का कर कहते हैं—

कभी वस्तुविश्रान्ति की समता के द्वारा आत्मा में चर्वणा होती है । यही वेद्यवेदक की समता है और वही रात्रि और दिन की तुल्यता है ॥ -८४-८५- ॥

कभी वेद्य और आत्मा (= वेदक) में तुल्यकक्ष्यता होने के कारण जो विश्रान्ति होती है वही वेद्यवेदक की समता है और उससे अनुप्राणित रात्रि और दिन की तुल्यता है जिसको कि सभी योगी महापुण्य वाला विषुवत् काल कहते हैं । जैसा कि कहा गया है—

यदा कदाचिद्भवति सा रात्रिदिनतुल्यता ॥
विषुवत्कालयोगोऽसौ योगिभिः समुदाहृतः ।' इति ॥ ८४ ॥

एवं च वेद्यस्य वेदकस्य च विश्रान्तेराधिक्ये दिनस्य निशायाश्च दैर्घ्यं भवेदन्यथा त्वपचयः, तदाह—

वेद्ये विश्रान्तिरधिका दिनदैर्घ्याय तत्र तु ॥ ८५ ॥
न्यूना स्यात्स्वात्मविश्रान्तिर्विपरीते विपर्ययः ।
स्वात्मौत्सुक्ये प्रबुद्धे हि वेद्यविश्रान्तिरल्पिका ॥ ८६ ॥

न्यूनेति, अन्यथा हि वेद्यविश्रान्तेराधिक्यमेव न स्यात् । स्यादित्यर्थाद्रात्र्यपचयनिमित्तम्, 'विपरीत' इति स्वात्मनो विश्रान्तेराधिक्ये वेद्यस्य चान्यथात्वे; यतः स्वात्मन्यौत्सुक्ये विश्रान्त्यभिलाषे विकस्वरतामुपेयुषि वेद्यविश्रान्तिरल्पीयसी भवेत्, येन निशाया दैर्घ्यं दिनस्यापचयः । तदुक्तम्—

'द्राघीयसी वेद्यवृत्तिर्दिनदैर्घ्याय कल्पते ।
तथैव स्वात्मविश्रान्तिवृत्तिः स्याद्रात्रिविस्तरः ॥' इति ॥ ८६ ॥

अयमेव चात्र पक्षो युक्तः—इत्याह—

इत्थमेव दिवारात्रिन्यूनाधिक्यक्रमं वदेत् ।

"जब कभी वेद्य वेदक की समता के कारण वस्तुविश्राम की चर्वणा होती है तब वह रात्रि दिन की तुल्यता है । योगियों के द्वारा यह विषुवत् काल कहा गया है" ॥ ८४ ॥

इस प्रकार वेद्य और वेदक की विश्रान्ति की अधिकता होने पर दिन और रात्रि की दीर्घता या लघुता होती है—यह कहते हैं—

उसमें वेद्य में अधिक विश्रान्ति दिन की दीर्घता के लिए है । कम होने पर आत्मा में विश्रान्ति होती है । विपरीत होने पर उल्टा होता है । आत्मा की उत्सुकता के प्रबुद्ध होने पर वेद्यविश्रान्ति आंशिक होती है ॥ -८५-८६ ॥

न्यून—अन्यथा वेद्यविश्रान्ति की अधिकता ही नहीं होगी । स्यात्—अर्थात् रात्रि के अपचय का कारण । विपरीत (दशा) में—आत्मा की विश्रान्ति की अधिकता और वेद्य के अन्यथा होने में । क्योंकि आत्मा में उत्सुकता होने पर विश्रान्ति की इच्छा जब विकसित होने लगेगी तब वेद्य में विश्रान्ति कम हो जायगी जिससे रात्रि लम्बी और दिन छोटा होगा । वही कहा है—

"दीर्घ वेद्यवृत्ति दिन की दीर्घता का कारण होती है । उसी प्रकार आत्मा में विश्रान्ति की वृत्ति रात्रि के विस्तार (का कारण) होती है" ॥ ८५-८६ ॥

यहाँ यही पक्ष उचित है—यह कहते हैं—

नन्वन्तर्बहिश्च रात्रिदिनयोः स्थितेऽप्यौत्सर्गिके क्रमे यथान्तरसावुक्तयुक्त्या प्रकाशविमर्शयोरेकतरप्राधान्यात्प्रतिप्रमातृ विशिष्यते, तथा बहिरपि प्रतिभुवनं किं विशिष्यते न वा ?—इत्याशङ्क्याह—

यथा देहेष्वहोरात्रन्यूनाधिक्यादि नो समम् ॥ ८७ ॥
तथा पुरेष्वपीत्येवं तद्विशेषेण नोदितम् ।

विशेषेणेति देहमधिकृत्य, तथात्वेन हि तत्कथितं तत्तत्फलसंपत्तिनिमित्तं स्यादित्याशयः ॥ ८७ ॥

नन्वेवं रात्रिदिनविभजने किं प्रमाणम् ?—इत्याशङ्क्याह—

श्रीत्रैयम्बकसन्तानवितताम्बरभास्करः ॥ ८८ ॥
दिनरात्रिक्रमं मे श्रीशंभुरित्थमपप्रथत् ।

अत एवान्यथान्यैर्यत्तद्विभजनं कृतं तदग्राह्यमेव—इत्याह—

श्रीसन्तानगुरुस्त्वाह स्थानं बुद्धाप्रबुद्धयोः ॥ ८९ ॥
हृद आरभ्य यत्तेन रात्रिन्दिवविभाजनम् ।

इसी प्रकार दिन और रात्रि की न्यूनता और अधिकता के क्रम को कहना चाहिए ॥ ८७- ॥

प्रश्न—भीतर और बाहर रात्रि और दिन के स्वाभाविक क्रम के होने पर भी जैसे भीतर यह (क्रम) उक्त युक्ति से प्रकाश और विमर्श में से एक की प्रमुखता होने पर प्रत्येक प्रमाता के लिए विशिष्ट होता है उसी प्रकार प्रति भुवन क्या विशिष्ट होता है अथवा नहीं ?—यह शङ्का कर कहते हैं—

जिस प्रकार हम लोगों के शरीर में दिन रात का न्यूनाधिक्य समान होता है उसी प्रकार भुवनों के विषय में भी । इसलिए उसको विशेष रूप से नहीं कहा गया ॥ -८७-८८- ॥

विशेष रूप से—देह को आधार मान कर । उस प्रकार से यदि वह कहा जाता तो उस-उस फल की प्राप्ति का कारण हो जाता है—यह आशय है ॥ ८७॥

इस प्रकार रात और दिन को बाँटने में क्या प्रमाण है ?—यह शङ्का कर कहते हैं—

त्रैयम्बक परम्परा रूपी विस्तृत आकाश के सूर्य श्रीशम्भुनाथ ने मुझे दिन रात के क्रम को इस प्रकार बतलाया ॥ -८८-८९- ॥

इसलिए दूसरे लोगों ने जो उसका दूसरी प्रकार से विभाजन किया वह ग्राहय नहीं है—यह कहते हैं—

श्री सन्तान गुरु हृदय से लेकर जो बुद्ध और अप्रबुद्ध के स्थान का

तदसत्सितपक्षेऽन्तः प्रवेशोल्लासभागिनि ॥ ९० ॥
अबुद्धस्थानमेवैतद्दिनत्वेन कथं भवेत् ।

यन्नाम प्राच्यैर्हृदयादारभ्य द्वादशान्तं यावत्तुट्यर्धपरीमाणं प्राणीयमाद्यं स्थानं बुद्धस्य परं त्वबुद्धस्य—इत्युक्तं, तेनैव बुद्धाबुद्धास्थानवदनेन समाख्यौचित्याद्रात्रि-दिनयोरपि विभागः कृतो यद्बुद्धस्थानं दिनमबुद्धस्थानं तु रात्रिरिति, तत्त्वयुक्तं; यदन्तःप्रवेशात्मन्यपानवाहे स्थानस्याविशेषाद्रात्रित्वेन परिकल्पितमबुद्धस्थानमेव दिनं स्यात्—इति पूर्वापरव्याहतत्वम् ॥ ९० ॥

न चैतद्विद्वेषपूर्वमस्माभिरुक्तमिति न शिष्टनिन्दा कृता स्यात्—इत्याह—

अलं वानेन नेदं वा मम प्राङ्मतमत्सरः ॥ ९१ ॥
हेये तु दर्शिते शिष्याः सत्पथैकान्तदर्शिनः ।

इदानीं प्रकृतमेवावतारयति—

व्याख्यातः कृष्णपक्षो यस्तत्र प्राणगतः शशी ॥ ९२ ॥

और उसके आधार पर रात्रि और दिन का विभाजन करते हैं वह असमीचीन है । क्योंकि अन्तःप्रवेश के उल्लास वाले सित पक्ष में जो (स्थान है वह) अबुद्ध स्थान ही है । वह दिन के रूप में कैसे हो सकता है ॥ -८९-९१- ॥

जो कि प्राचीन लोगों के द्वारा कहा गया कि हृदय से लेकर द्वादशान्त तक आधी तुटि के परिमारण वाला प्राणसम्बन्धी प्रथम स्थान बुद्ध का और बाद का अप्रबुद्ध का है । उसी से बुद्ध और अबुद्ध की भाँति इसके द्वारा समाख्या के औचित्य से रात्रि और दिन का विभाग किया गया कि बुद्ध स्थान दिन है अबुद्ध स्थान रात्रि है—यह (कथन) अयुक्त है । क्योंकि अन्तःप्रवेश रूप अपानवाह में स्थान के समान होने से रात्रि के रूप में परिकल्पित अबुद्ध स्थान ही दिन हो जायेगा—इस प्रकार पूर्व और पश्चाद्वर्त्ती (के वर्णन) में विरोध हो रहा है ॥ ८९-९० ॥

इसको हमने ईर्ष्यावश नहीं कहा है इस प्रकार शिष्टनिन्दा नहीं की गई है—यह कहते हैं—

इतना (कहना) पर्याप्त है । यह मेरा प्राचीन मत के प्रति विद्वेष नहीं है । (अपितु) हेय को दिखला देने के बाद शिष्य सत्यमार्ग के एकान्त द्रष्टा हो जाते हैं ॥ -९१-९२- ॥

अब प्रस्तुत का ही वर्णन करते हैं—

जिस कृष्ण पक्ष की व्याख्या की गई उसमें प्राण में पहुँचा हुआ चन्द्रमा हर तिथि को आप्यायन रूप से एक-एक कला का त्याग

आप्यायनात्मनैकैकां कलां प्रतितिथित त्यजेत् ।
द्वादशान्तसमीपे तु यासौ पञ्चदशी तुटिः ॥ ९३ ॥
सामावस्यात्र स क्षीणश्चन्द्रः प्राणार्कमाविशेत् ।

प्राणगत इति, तत्रास्य प्राधान्यात् । तेन तुटिस्थानावस्थितां यां (यां) तिथिं प्राणादित्य आक्रमते तस्यां तस्यामपानचन्द्रः सुरादीनामपानरूपेण हेतुना 'एकैकां कलां त्यजेत्' एकैककलाह्रासक्रमेण क्षैण्यमासादयेत्; यावत्स एव कलामात्रशेषत्वात्क्षीणः सन् द्वादशान्तसमीपस्थायां पञ्चदशतुट्यात्मिकायाममावास्यायां 'प्राणार्कमाविशेत्' तदन्तर्लीनो भवेत्, यदेवास्य बहिरस्तमय इत्युच्यते ॥ ९३ ॥

न चैतन्निर्मूलमेवोक्तम्—इत्याह—

उक्तं श्रीकामिकायां च नोर्ध्वेऽधः प्रकृतिः परा ।
अर्धार्धे क्रमते माया द्विखण्डा शिवरूपिणी ॥ ९४ ॥
चन्द्रसूर्यात्मना देहं पूरयेत्प्रविलापयेत् ।

इह खलु 'परा' पूर्णा, अत एव 'शिवरूपिणी' शक्तिमदवियुक्ता 'प्रकृतिः', विश्वोत्पत्तिभूः संवित् 'माया' स्वरूपगोपनशीला प्रथमं प्राणात्मतया समुच्छलन्ती द्विखण्डा प्राणापानात्मतया द्वैध्यमापन्ना सती नोर्ध्व एव नाध एव अपि

करता है। द्वादशान्त के समीप जो यह पन्द्रहवीं तुटि है वह अमावस्या है । यहाँ वह चन्द्रमा क्षीण होकर प्राणरूपी सूर्य में प्रवेश कर जाता है ॥ -९२-९४- ॥

प्राणगत, वहाँ उसकी (= प्राण की) प्रधानता के कारण । इसलिए तुटि स्थान में स्थित जिस-जिस तिथि को प्राणरूप सूर्य आक्रान्त करता है उस-उस (तिथि) में अपान रूपी चन्द्र देवताओं आदि (= करणदेवियों) के अपान रूप से एक-एक कला का त्याग करता है अर्थात एक-एक कला के ह्रास के क्रम से (तब-तक) क्षीणता को प्राप्त करता है जब तक कि वही एक कला शेष होने के कारण क्षीण होकर द्वादशान्त के समीप वर्त्तमान पन्द्रहवीं तुटिरूप अमावास्या में प्राणसूर्य में प्रवेश कर जाता है अर्थात् उसके अन्दर लीन हो जाता है । जिसे कि इसका बाह्य अस्त कहा जाता है ॥ ९३ ॥

यह निर्मूल नहीं कह गया है—यह कहते हैं—

कामिका तन्त्र में कहा गया है कि परा शिवरूपिणी प्रकृतिस्वरूप माया दो खण्डों में होकर आधे-आधे में प्रवाहित होती है । चन्द्र और सूर्य के रूप में शरीर को पूरित और शोषित करती है ॥ -९४-९५- ॥

परा = पूर्ण = इसलिए शिवरूपिणी = शक्तिमान् = से सदा संलग्न, प्रकृति = विश्व की उत्पत्ति का कारण, संवित् माया = स्वरूपगोपनस्वभावा पहले प्राण के

तूर्ध्वाधःप्रवाहात्मना 'अर्धार्धे क्रमते' दक्षवामनाड्योरन्तः' समप्रविभागेन प्रवहतीत्यर्थः । अत एव प्राणापानदशामधिशयाना परा संविच्चन्द्रात्मनाप्याय-कारितया देहं प्रपूरयेत् सूर्यात्मना च चान्द्रीणामेव कलानामपचयात् 'प्रविलापयेत्' शोषयेदित्यर्थः ॥ ९४ ॥

ननु चान्द्रीणां कलानामपचये किं निमित्तम् ?—इत्याशङ्क्याह—

अमृतं चन्द्ररूपेण द्विधा षोडशधा पुनः ॥ ९५ ॥
पिबन्ति च सुराः सर्वे दशपञ्च पराः कलाः ।
अमा शेषगुहान्तःस्थामावास्या विश्वतर्पिणी ॥ ९६ ॥

यच्चन्द्ररूपेण षोडशधा भिन्नममृतं स्थितं तत्पुनर्द्विधा दृश्यमानसितरूप-पञ्चदशकलात्मना तद्भित्तिभूतातिस्वच्छाब्रूपकलात्मना चेत्यर्थः । तत्र पञ्चदश कलाः सर्व एव बहिः सुरादयोऽन्त करणानिःकार्याणि चाप्यायलिप्सया पिबन्ति येनासां प्रतिदिनमपचयः स्यात् ।

यदभिप्रायेणैव—

'यस्मिन्सोमः सुरपितृनरैरन्वहं पीयमानः
क्षीणः क्षीणः प्रविशति.................. ।' (साम्ब पं० ८ श्लोक)

रूप में उच्छलित होती हुई दो खण्डों वाली = प्राण और अपान रूप से दो प्रकार की न केवल ऊपर और नीचे उभयत्र प्रवाह के रूप अर्धार्ध का संक्रमण करती है, अर्थात् दायीं और बायीं नाडियों के भीतर समान रूप से बहती है । इसलिए प्राण और अपान दशा में वर्त्तमान परा संवित् चन्द्र के रूप में पूरणस्वभावा होने से शरीर को पूरित करती है और सूर्य के रूप में चन्द्रसम्बन्धी कलाओं का अपचय होने से प्रविलापन = शोषण, करती है ॥ ९४ ॥

प्रश्न—चान्द्री कलाओं के अपचय का क्या कारण है ?—यह शङ्का कर कहते हैं—

चन्द्रमा के रूप में जो दो और फिर सोलह (कलायें) हैं उनमें से देवता लोग पन्द्रह कलायें पी लेते हैं । शेष अत एव गुहा के भीतर वर्त्तमान अमा (नामक सोलहवीं कला) अमावास्या है (जो) विश्व को तृप्त करती है ॥ -९५-९६ ॥

जो चन्द्रमा के रूप में सोलह प्रकार से बँटा हुआ अमृत है वह पुनः दो प्रकार = श्वेतरूप पन्द्रह कला एवं इसकी आधार भूत अतिस्वच्छ जलरूप कला के रूप में। उनमें पन्द्रह कलाओं को सभी बाहरी देवता आदि एवं अन्तःकरण तथा कार्य को तृप्त करने की इच्छा से पीते हैं जिससे इन का प्रतिदिन क्षय होता है । जिस अभिप्राय से ही—

इत्याद्यन्यत्रोक्तम् । अमाख्या षोडशी पुनः कला सुराद्युपसंहृतकला-पञ्चदशकावशिष्टस्वभावत्वाच्छेषरूपा, अत एव गुहान्तरिव स्थितं वस्तु सुरक्षित-त्वादक्षीणं स्यात्तथैवेयमपीत्यर्थः । यतः सा विश्वस्य पञ्चदशकलाक्रोडीकारित-याप्यायकारिणी, अत एव येयममा सह यौगपद्येन पञ्चदशानां कलानां वसनात् 'अमावास्या' तद्व्यपदेश्येत्यर्थः । तिथौ पुनस्तदधिष्ठितत्वादौपचारिकस्तद्-व्यापदेश इत्याशयः ॥ ९६ ॥

एतदेव प्रकृते योजयति

एवं कलाः पञ्चदश क्षीयन्ते शशिनः क्रमात् ।
आप्यायिन्यमृताब्रूपतादात्म्यात्षोडशी न तु ॥ ९७ ॥

षोडशी न तु क्षीयते, यदब्रूपतादात्म्यादर्कस्तं क्षपयितुमक्षम इत्यभि-प्रायः ॥ ९७ ॥

इदानीमेतदनन्तरभाविनं कृष्णस्य शुक्लस्य च पक्षस्य सन्धिं दर्शयति—

तत्र पञ्चदशी यासौ तुटिः प्रक्षीणचन्द्रमाः ।
तदूर्ध्वगं यत्तुट्यर्धं पक्षसंधिः स कीर्तितः ॥ ९८ ॥

"जिसमें देवताओं पितरों और मनुष्यों के द्वारा प्रतिदिन पीयमान सोम क्रमशः क्षीण होता हुआ प्रवेश करता है ।" (साम्ब पं. श्लोक ८)

इत्यादि अन्यत्र कहा गया है । अमा नामक सोलहवीं कला देवता आदि के द्वारा पीत पन्द्रह कलाओं को आत्मसात् करने के कारण यह विश्व की आपूरक हैं । इसलिए यह अमा = सह = एक साथ पन्द्रह कलाओं का वसन (= आप्यायन आच्छादन, निवास) करने के कारण अमावस्या कहलाती है । उसके द्वारा आधिष्ठियत होने के कारण तिथि के विषय में उसका व्यवहार लाक्षणिक है ॥९६॥

इसी को प्रस्तुत से सम्बद्ध करते हैं—

इस प्रकार चन्द्रमा की पन्द्रह कलायें क्रमशः क्षीण होती हैं । जल रूप तादात्म्य के कारण आप्यायन करने वाली अमृता षोडशी कला (क्षीण) नहीं होती ॥ ९७ ॥

षोडशी क्षीण नहीं क्योंकि जल रूप तादात्म्य के कारण सूर्य उसको नष्ट करने में समर्थ नहीं है ॥ ९७ ॥

अब इसके बाद होने वाले कृष्ण और शुक्ल पक्ष की सन्धि को दिखलाते हैं—

उसमें जो यह प्रक्षीण चन्द्रमा वाली पन्द्रहवीं तुटि है उस के ऊपर होने वाली जो आधी तुटि वह पक्षसन्धि कही गयी हैं ॥ ९८ ॥

पञ्चदशी तुटिरित्यमावास्योदयस्थानम्, अत एव 'प्रक्षीणचन्द्रमा' इत्युक्तम् । यदिति, प्राणीयं षोडशतुटिसंबन्धि ॥ ९८ ॥

ननु संधिर्ह्युभयोर्भवति, तत्कथमेकस्यैव प्राणीयस्य तुट्यर्धस्यासौ स्यात् ?—इत्याशङ्क्याह—

तस्माद्विश्रमतुट्यर्धादामावस्यं पुरादलम् ।
परं प्रातिपदं चार्धमिति संधिः स कल्प्यते ॥ ९९ ॥

तत्प्राणीयमन्त्यं विश्रमतुट्यर्धमवलम्ब्य 'पुरादलं' प्रथममर्धमामावस्यं तत्संलग्नं 'परं' द्वितीयं चापानीयमाद्यं तुट्यर्धं प्रातिपदं तत्संलग्नम्, इत्यनयोरुभयोरर्धयोः संमेलनात्प्रतिपदमामावस्यान्तरालभूतोऽसावेकतुट्यात्मा 'सन्धिः कल्प्यते' तथा व्यपदिश्यत इत्यर्थः । तदुक्तम्—

'स पक्षसन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ।'

(अ० को० १।४।७) इति ।

इदमेवान्यत्र प्रधानतया पूजाकालत्वेनोक्तम् । यदुक्तम्—

'न दिवा पूजयेद्देवं रात्रौ नैव च नैव च ।
अर्चयेद्देवदेवेशं दिनरात्रिपरिक्षये ॥' इति ।

पन्द्रहवीं तुटि—यह अमावास्या का उदय स्थान है । इसीलिए उसे क्षीण चन्द्रमा वाली कहा गया है । जो (का अर्थ है) प्राणीय = सोलहवीं तुटि से सम्बद्ध ॥ ९८ ॥

प्रश्न—सन्धि तो दो में होती है तो (यहाँ) एक ही प्राणीय तुट्यर्ध(= सन्धि) कैसे होगी ?—यह शङ्का कर कहते हैं—

(जो) उस विश्रम तुट्यर्ध से लेकर अमावास्या का प्रथम आधा और प्रतिपदा का दूसरा आधा है वह सन्धि माना जाता है ॥ ९९ ॥

इस प्राणसम्बन्धी अन्तिम विश्रम तुट्यर्ध को आधार मान कर पुरादल = प्रथम आधा अमावास्या का, और उससे संलग्न पर = द्वितीय अपान सम्बन्धी तुट्यर्ध प्रतिपद् का, उससे संलग्न, इस प्रकार इन दोनों अर्धों के मेल से प्रतिपद् एवं अमावास्या के बीच का (काल) जो कि एक तुटि रूप है, सन्धि माना जाता है अर्थात् वैसा व्यवहार किया जाता है । वही कहा है—

"जो प्रतिपद् एवं पञ्चदशी का मध्य भाग है वह पक्ष सन्धि (कहलाता है) ।" (अ० को० १।४।७)

यही अन्यत्र प्रधानरूप से पूजाकाल कहा गया है । जैसा कि कहा गया है—

"देवता की पूजा दिन में नहीं करनी चाहिए और रात्रि में तो करनी ही नहीं

अत्र विश्रमतुट्यर्ध एवार्धार्धिकया विभक्ते यदि सन्धिर्व्याख्यायते तत्सन्धि-द्वयस्याप्येकैव तुटिरर्धार्धिकया स्यात्—इत्येकस्यास्तुटेर्विनियोगाभावादासमञ्जस्यं पर्यवस्येदित्यलं बहुना ॥ ९९ ॥

एवं प्राणे पक्षोदयं प्रदश्र्य सूर्यग्रहणमपि दर्शयति—

तत्र प्रातिपदे तस्मिंस्तुट्यर्धार्धे पुरादलम् ।
आमावस्यं तिथिच्छेदात्कुर्यात्सूर्यग्रहं विशत्॥ १०० ॥

अर्धं चार्धं च अर्धार्धं, तुटेरर्धार्धं तुट्यर्धार्धं, तस्मिन् सन्धित्वेन परिकल्पिते तुट्यर्धद्वय इत्यर्थः । तत्रैवं स्थिते सति तुट्यर्धद्वयमध्यादामावस्यं पूर्वमर्धम् अर्थात्परस्मिन्प्रातिपदेऽर्धे वक्ष्यमाणादृणशब्दाभिधेयात् तिथिच्छेदाद्विशत् सत् सूर्यग्रहणं कुर्यात्, प्रतिपदमावास्यासङ्घट्टात्सूर्यग्रहणं भवेदित्यर्थः ॥ १०० ॥

नन्वेतावन्मात्रात्सूर्यग्रहणं भवेदित्यत्र क इवाशयः ?—इत्याशङ्क्याह—

तत्रार्कमण्डले लीनः शशी स्रवति यन्मधु ।
तप्तत्वात्तत्पिबेदिन्दुसहभूः सिंहिकासुतः॥ १०१ ॥

मध्वित्यमृतं । तप्तत्वादिति, यथायथमर्केण संनिकर्षात् । इन्दुसहभूरिति

चाहिए । दिन और रात्रि के क्षयकाल में देवदेवेश की पूजा करनी चाहिए ॥''

यहाँ यदि विश्राम के तुट्यर्ध को आधा-आधा बाँट देने पर सन्धि कही जाय तो दो सन्धियों का आधा-आधा भी एक ही तुटि होगी, फिर एक तुटि का विनियोग न होने से असामज्जस्य हो जायगा इतना (कहना) पर्याप्त है ॥ ९९ ॥

इस प्रकार प्राण में पक्ष का उदय दिखाकर सूर्यग्रहण भी दिखाते हैं—

उसमें तुटि के दो अर्ध भागों में प्रथम अर्ध अमावास्या है और द्वितीय अर्ध प्रतिपद । दोनों के मध्य में तिथिछेद के कारण प्रविष्ट होता हुआ सूर्यग्रहण समझना चाहिए ॥ १०० ॥

आधा और आधा = अर्धार्ध । तुटि का अर्धार्ध = तुट्यर्धार्ध । उसे सन्धि मानने पर दो तुट्यर्ध । ऐसा होने पर दो तुट्यर्ध में से पूर्वार्द्ध अमावास्या है । अर्थात् दूसरे प्रतिपद् वाले अर्ध में वक्ष्यमाण ऋणशब्दाभिधेय तिथिच्छेद के कारण प्रवेश करने वाले को सूर्यग्रहण मानना चाहिए अर्थात् प्रतिपद् और अमावास्या के सङ्घट्ट से सूर्यग्रहण होता है ॥ १०० ॥

प्रश्न—इतने से ही सूर्यग्रहण हो जाता है उसमें क्या तात्पर्य है?—यह शङ्का कर कहते हैं—

उस अवस्था में सूर्यमण्डल में लीन चन्द्रमा तप्त होने के कारण जिस अमृत का क्षरण करता है चन्द्रमा का सहचर राहु उसे पीता है ॥ १०१ ॥

'विधौ राहुः' इत्याद्युक्त्या तत्सहचारित्वात्, अन्यथैषां त्रयाणामपि सङ्घट्टो न भवेदिति भावः । यदुक्तम्—

'रविबिम्बान्तरे देवि चन्द्रबिम्बं तदा भवेत् ।
तदन्तरे भवेद्राहुरमृतार्थी वरानने ॥
अमृतं स्रवते चन्द्रो राहुश्च ग्रसते तु तत् ।
पीत्वा त्यजति तद् बिम्बं तदा मुक्तः स उच्यते ।'
(स्व०तं० ७।७०) इति ॥ १०१ ॥

ननु त्रयाणामप्येषां सङ्घट्टे किं सतत्त्वम् ?—इत्याशङ्क्याह—

अर्कः प्रमाणं सोमस्तु मेयं ज्ञानक्रियात्मकौ ।
राहुर्मायाप्रमाता स्यात्तदाच्छादनकोविदः ॥ १०२ ॥
तत एव तमोरूपो विलापयितुमक्षमः ।

'तयोः' प्रमाणप्रमेययोः 'आच्छादनं' स्वात्मसात्कारेण तिरोधानं न पुनरत्यन्तमेव विलयः, संस्कारात्मना पुनरपि बोधकमाहात्म्यात्तदुदयस्य भावात्, अत एवोक्तं 'विलापयितुमक्षमः' इति । 'तत' इत्याच्छादकत्वात्, तमसो ह्यावरकत्वमेव तत्त्वम् ॥ १०२ ॥

नन्वेवमेतद्विलापने कः क्षम ?—इत्याशङ्क्याह—

मधु = अमृत । तप्त होने कारण—क्रमशः सूर्य के साथ सन्निकर्ष होने से । इन्दुसहम्—'विधु के विषय में राहु' इत्यादि उक्ति के द्वारा उसका सहचारी होने से, अन्यथा इन तीनों का सङ्घट्ट न होता । जैसा कि कहा है—

"हे देवि ! तब रविबिम्ब के अन्दर चन्द्रबिम्ब हो जाता है और हे वरानने ! अमृतार्थी राहु उस (= चन्द्रमा) के अन्दर हो जाता है । चन्द्रमा अमृत का क्षरण करता है और राहु उसको ग्रसता (= पीता) है । (जब) पीकर उस बिम्ब को छोड़ देता है तब वह (= चन्द्रमा) मुक्त कहा जाता है" ॥ १०१ ॥ (स्व.तं. ७।७०)

प्रश्न—इन तीनों के सङ्घटट् में तात्पर्य क्या है?—यह शङ्का कर कहते हैं—

सूर्य प्रमाण है; चन्द्रमा प्रमेय है । दोनों ज्ञान क्रिया रूप है । राहु उन दोनों के आच्छादन में पटु मायाप्रमाता है । इसीलिए विलय करने में अक्षम वह तमोरूप है ॥ १०२-१०३- ॥

'उन दोनों' = प्रमाण प्रमेयों के; आच्छादन = आत्मसात्कार के द्वारा तिरोधान, न कि अत्यन्त विलय । क्योंकि संस्काररूप होने से पुनः बोधक की महिमा से उसका उदय हो जाता है । इसीलिए कहा गया—विलापन में असमर्थ । इस कारण = आच्छादक होने के कारण । आवरक होना ही अन्धकार का तत्त्व (= स्वरूप या गुण) है ॥ १०२ ॥

तत्सङ्घट्टाद्वयोल्लासो मुख्यो माता विलापकः ॥ १०३ ॥

तेषां मातृमानमेयानां 'सङ्घट्टः' सामरस्यं ततः समुल्लसितमद्वयमेव मुख्यः प्रमाता विलापकस्तत्त्रयसङ्घट्टनेन परसंविन्मात्रसार एवेत्यर्थः । यदाहुः—

'प्राणार्कमानहठघट्टितमेयचन्द्र-
विद्रावितामृतरसोत्सुकितः खमाता ।
स्वर्भानुरावृणुत एव रविं रसं तु
पुण्ये ग्रहेऽत्र रसयेत्त्रयघट्टनज्ञः ॥' इति ॥ १०३ ॥

अत एव चायं कालो महापुण्यः—इत्याह—

अर्केन्दुराहुसङ्घट्टात् प्रमाणं वेद्यवेदकौ ।
अद्वयेन ततस्तेन पुण्य एष महाग्रहः ॥ १०४ ॥

'अद्वयेन' चिन्मात्रात्मना भवन्तीत्यर्थः । तदुक्तम्—

'राहुरादित्यचन्द्रौ च त्रय एते ग्रहा यदा ।
दृश्यन्ते समवायेन तन्महाग्रहणं भवेत् ॥

प्रश्न—इस प्रकार इसके विलायन में कौन समर्थ है ?—यह शङ्का कर कहते हैं—

उनके सङ्घटट् से दो का उल्लास होता है । मुख्य प्रमाता विलायक होता है ॥ -१०३ ॥

उन = माता मान और मेय का सङ्घटट् = सामरस्य । उसके कारण समुल्लसित अद्वय ही मुख्य प्रमाता विलापक है । अर्थात् उन तीनो के सङ्घटट् के कारण यह केवल परसंवित् सार (= परसंवित् तत्त्ववाला) है । जैसा कि कहते हैं—

"प्राण = सूर्य = प्रमाण के साथ हठात् सङ्घट्ट को प्राप्त प्रमेय = चन्द्र के द्वारा विद्रावित अमृत रस को पीने के लिए उत्सुक शून्यप्रमाता = राहु, सूर्य का ग्रसन करता है । इस पुण्य काल में तीनो के सङ्घट्ट को जानने वाला रस (= आनन्द) का आस्वादन करे" ॥ १०३ ॥

और इसीलिए यह समय अति पुण्य वाला है—यह कहते हैं—

सूर्य चन्द्रमा और राहु के सङ्घट्ट के कारण प्रमाण (= सूर्य) वेद्य (= चन्द्रमा) और वेदक (= राहु) अद्वय हो जाते हैं । इस कारण यह महाग्रह वाला (काल) पुण्य (काल) है ॥ १०४ ॥

अद्वय के द्वारा = चिन्मात्र रूप से, होते हैं । वही कहा गया है—

"राहु सूर्य और चन्द्रमा ये तीनों ग्रह जब समवाय (= सङ्घट्ट) की स्थिति में

स कालः सर्वलोकानां महापुण्यतमो भवेत् ॥'

(स्व० ७।७३) इति ॥ १०४ ॥

नन्वयं सूर्यादीनां सङ्घट्टः किं प्रतिपदमावस्यासंभेद एव भवेदुतान्यथापि?—इत्याशङ्क्याह—

अमावस्यां विनाप्येष सङ्घट्टश्चेन्महाग्रहः ।
यथार्के मेषगे राहावश्विनीस्थेऽश्विनीदिने ॥ १०५ ॥

अमावस्यां विनापि शुद्धायामेव प्रतिपदि यद्येष सङ्घट्टः स्यात् तदापीदं महद् ग्रहणं भवेदेव । यथा बहिश्चन्द्रार्कराहूणामश्विन्यामेवावस्थानादेकर्क्षेण वैशाखामावस्यायां प्रहरद्वयादूर्ध्वं शुद्धायामेव प्रतिपदि सूर्यस्य ग्रहणं संभवेत्, लम्बनस्य धनगतत्वाद् ग्रहणस्थित्यर्धस्य लम्बनादूनत्वात् । एवं यत्र प्रतिपदमामावास्यासंभेदेन सूर्यग्रहणं भवेत् तत्रामावस्यायां प्रग्रहणं मोक्षस्तु प्रतिपदि, अन्यथा तूभयमपि प्रतिपद्येवेत्यर्थसिद्धम् ॥ १०५ ॥

तदेवाह—

आमावास्यं यदा त्वर्धं लीनं प्रातिपदे दले ।

देखे जाते हैं तब महाग्रहण होता है । वह काल सब लोगों के लिए महापुण्यतम होता है'' ॥ १०४ ॥ (स्व. तं. ७।७३)

प्रश्न—यह सूर्य आदि का सङ्घट्ट क्या प्रतिपत् अमावस्या के संभेद में ही होता है या दूसरी तरह से भी ?—यह शङ्का कर कहते हैं—

अमावस्या के बिना भी यदि यह सङ्घट्ट होता है तो महाग्रहण होता है। जैसे कि सूर्य जब मेष राशि पर होता है (और उसी समय) अश्विनी के दिन राहु अश्विनी नक्षत्र पर स्थित होता है (तब भी महाग्रहण होता है) ॥ १०५ ॥

अमावास्या के बिना भी शुद्ध प्रतिपद् में यदि यह सङ्घट्ट होता है तो भी यह महाग्रहण ही होंता है । जैसे कि बाह्य चन्द्र सूर्य और राहु के अश्विनी नक्षत्र में ही रहने से एक नक्षत्र से विशाखा की अमावास्या में दो प्रहर के बाद शुद्ध प्रतिपद् में ही सूर्य का ग्रहण सम्भव होता है । क्योंकि उस समय लम्बन के धनराशि मे रहने के कारण ग्रहण की स्थिति आधी हो जाती है क्योंकि लम्बन कम रहता है ।

इसी प्रकार जहाँ प्रतिपद् एवं अमावास्या के संभेद से सूर्यग्रहण होता है वहाँ अमावास्या में ग्रहण होता है और प्रतिपद् में मोक्ष । अन्यथा दोनों (= ग्रहण और मोक्ष) प्रतिपद् में ही होते हैं यह अर्थात् सिद्ध है ॥ १०५ ॥

वही कहते हैं—

जब अमावास्या का आधा भाग प्रतिपदा के आधे भाग मे लीन हो

प्रतिपच्च विशुद्धा स्यात्तन्मोक्षो दूरगे विधौ॥ १०६ ॥

तन्मोक्षे च विधुदूरीभावो हेतुरित्युक्तं 'दूरगे विधौ' इति । तस्मिन् हि दूरीभूते तत्सहचारी राहुरपि तथा भवेदिति भावः ॥ १०६ ॥

अस्य च ग्रहणस्य महत्त्वे निमित्तं दर्शयति—

ग्रासमोक्षान्तरे स्नानध्यानहोमजपादिकम् ।
लौकिकालौकिकं भूयःफलं स्यात्पारलौकिकम् ॥ १०७ ॥

भूयःफलमित्यन्तफलम् । यदुक्तम्—

'तत्र स्नानं तथा दानं पूजाहोमजपादिकम् ।
यत्कृतं साधकैर्देवि तदन्तफलं भवेत् ॥'

(स्व०तं० ७।७४) इति ॥ १०७ ॥

पारलौकिकत्वे निमित्तमाह—

ग्रास्यग्रासकताक्षोभप्रक्षये क्षणमाविशन् ।
मोक्षभाग्ध्यानपूजादि कुर्वश्चंन्द्रार्कयोर्ग्रहे ॥ १०८ ॥

इह खलु योगी चन्द्रार्कयोर्ग्रहे सूर्यग्रहणे 'ग्रास्यग्रासकयोः' प्रमेयप्रमात्रोर्यः

जाता है और प्रतिपद् विशुद्ध हो जाती है तब चन्द्रमा के दूर होने पर मोक्ष होता है ॥ १०६ ॥

उसके (= ग्रहण) मोक्ष में चन्द्रमा का दूर होना ही कारण है इसलिए कहा गया—'चन्द्रमा के दूर होने पर' । उसके दूर होने पर उसका सहचारी राहु भी वैसा ही हो जाता है ॥ १०६ ॥

इस ग्रहण के महत्त्व में कारण बतलाते हैं—

ग्रास (= ग्रहण) और मोक्ष के बीच स्नान, ध्यान, होम और जप आदि लौकिक, अलौकिक, पारलौकिक और अनन्त फल देने वाला होता है ॥ १०७ ॥

भूयः फल वाला = अनन्त फल वाला । जैसा कि कहा गया—

'उस समय साधकों के द्वारा जो स्नान दान पूजा होम जप आदि किया जाता है, हे देवि ! वह अनन्त फल वाला होता है' ॥ १०७ ॥ (स्व. तं. ७।७८)

पारलौकिक होने में निमित्त बतला रहे हैं—

चन्द्रमा और सूर्य की ग्रास्यता और ग्रासकता के क्षोभ के क्षय में प्रवेश करने वाला (योगी) एक क्षण के लिए भी ध्यान पूजा आदि करता हुआ मोक्ष का भागी होता है ॥ १०८ ॥

संबन्धस्तद्रूपो यः 'क्षोभः' तत्प्रक्षयात्मनि परस्मिन्प्रमातर्याविशन् परां वृत्तिमवलम्ब्य क्षणमात्रं ध्यानादि कुर्वन् मोक्षभागपवृज्यत एवेत्यर्थः । यदुक्तम्—

'पक्षद्वयं परित्यज्य पूर्वोक्तकरणेन च।
उन्मन्यन्ते स्थितो नित्यं परवृत्त्यवलम्बकः ॥
परित्यज्य त्वधः सर्वं ध्यानामास्थाय योजयेत् ।
तस्य मुक्तिर्न सन्देहस्त्वन्यथा सिद्धिभाग्भवेत् ॥' इति ॥ १०८ ॥

तिथिच्छेदादित्युक्तमधिकावापेन लक्षयति—

तिथिच्छेद ऋणं कासो वृद्धिर्निःश्वसनं धनम् ।
अयत्नजं यत्नजं तु रेचनादथ रोधनात् ॥ १०९ ॥

यन्नाम कासवशेन शीघ्रमेव प्राणस्य प्रसरणात् सहसैवामावास्यो भागः प्रतिपद्भागमनुप्रविशति तदुच्यते ऋणं, तिथिच्छेदयोः कार्यकारणयोरभेदोपचारात्कासश्चेति । यन्नाम च निःश्वासवशादपानवाहस्य चिरेण प्रसरणात् तिथेरधिकीभावेन पूर्णतया पौर्णमास्युदयस्तदुच्यते वृद्धिर्धनं निःश्वसनं च, इत्येतच्चोभयं सर्वेषामयोगिनामपि कासश्वासादिना स्वरसत एवोत्पद्यते—इत्युक्तम् 'अयत्नजम्'

योगी चन्द्र और सूर्य के ग्रह में सूर्य के ग्रहण में ग्रास्य और ग्रासक = प्रमेय और प्रमाता, का जो सम्बन्ध तद्रूप जो क्षोभ उसके प्रक्षय रूप पर प्रमाता में आवेश करता हुआ परा वृत्ति का अवलम्बन कर एक क्षण के लिए भी ध्यान आदि करता हुआ मोक्ष का भागी अर्थाति् अपवर्ग को प्राप्त, होता है । जैसा कि कहा गया है—

"दोनों पक्षों को छोड़कर पूर्वोक्त करण के द्वारा उन्मना के अन्त में स्थित हुआ निरन्तर परावृत्ति का आवलम्बन करने वाला (योगी) जब सब कुछ नीचे छोड़कर ध्यानावस्थ होकर अपने को युक्त करता है तो उसकी मुक्ति हो जाती है (इसमें) कोई सन्देह नहीं है । अन्यथा (अनेक) सिद्धिवाला हो जाता है" ॥१०८॥

'तिथिच्छेद के कारण'—इस कथन को अधिक आवाप (= विस्तार) से लक्षित करते हैं—

तिथि की हानि को ऋण और कास (कहते हैं) । (तिथि की) वृद्धि को निःश्वसन और धन (कहते हैं) । यह सब बिना प्रयास के होता है । और प्रयास से होने वाला, रेचन और रोधन से होता है ॥ १०९ ॥

खाँसी के कारण शीघ्र ही प्राण का प्रसरण होने से जो अमावस्या वाला भाग प्रतिपद् के भाग में प्रवेश कर जाता है वह ऋण कहलाता है । तिथि और छेद (जो) कि कार्य और कारण (हैं) का लाक्षणिक अभेद मानने से कास होता है । और जो निःश्वास के कारण अपानवाह का देर से प्रसरण होने के कारण तिथि के अधिक होने से पूर्णतया पौर्णमासी का उदय होता है वह वृद्धि धन और निश्वसन

इति, यद्वशादन्तरा चन्द्रसूर्योपरागो भवन्नपि तैरनवधानान्न परं लक्ष्यते। योगिनां पुनश्चन्द्रसूर्योपरागयोग्ये तत्प्राणस्य रेचकपूरकाद्यात्मना यत्नेन भवेदित्युक्तं 'यत्नजम्' इति । यदुक्तम्—

'तिथिच्छेद ऋणं ज्ञेयं वृद्धौ चैव धनं भवेत् ।
ऋणं चैव भवेत्कासो निःश्वासो धनमुच्यते ॥'

(स्व०तं० ७।६४) इति ।

तथा

'तिथिच्छेदस्तथा वृद्धिः कासश्वासादि वा भवेत्।
अयत्नजो यत्नजस्तु प्राणवृत्तिनिरोधतः ॥' इति ॥ १०९ ॥

एतदेवापानवाहेऽप्यतिदेष्टुमाह—

एवं प्राणे विशति चित्सूर्य इन्दुं सुधामयम् ।
एकैकध्येन बोधांशुकलया परिपूरयेत् ॥ ११० ॥
क्रमसंपूरणाशालिशशाङ्कामृतसुन्दराः ।
तुट्यः पञ्चदशैताः स्युस्तिथयः सितपक्षगाः ॥ १११ ॥

'एवं' पूर्वोक्तयैव गत्या प्राणे 'विशति' शक्तेर्हृदन्तमवरोहति चिदात्मा

कहलाता है । ये दोनों सभी अयोगी जनों के (शरीर में) भी कास श्वास आदि के द्वारा स्वभावतः ही उत्पन्न होते हैं इसलिए कहा गया—'अयत्नम्' । जिसके कारण बीच में चन्द्रमा और सूर्य का ग्रहण (घटित) होता हुआ भी अनवधानता के कारण बिलकुल लक्षित नहीं होता । और योगियों के चन्द्र सूर्य के उपराग के योग्य इस प्राण का रेचक पूरक आदि के रूप में यत्नपूर्वक किया जाता है इसलिए कहा गया—'यत्नजम्' । जैसा कि कहा गया—

"तिथि का छेद ऋण समझना चाहिए । वृद्धि में धन होता है । ऋण कास होता है और निःश्वास धन कहा जाता है ।" (स्व. तं. ७।६४)

तथा—

"तिथि का छेद और वृद्धि अथवा कास श्वास आदि बिना प्रयास के होता है । प्राणवृत्ति के निरोध से उत्पन्न यत्नज होता है" ॥ १०९ ॥

यही अपानवाह में भी बतलाने के लिए कहते हैं—

इस प्रकार प्राण जब (हृदय के अन्दर) प्रवेश करता है तब चित्सूर्य अमृतमय चन्द्र को क्रमशः बोधांशुकला से पूरित करता है । क्रमशः संपूरण वाले चन्द्रमा की अमृतसुन्दर ये पन्द्रह तुटियाँ ही शुक्ल पक्ष की (पन्द्रह) तिथियाँ हैं ॥ ११०-१११ ॥

इस प्रकार = पूर्वोक्त रीति से, प्राण के प्रवेश करने पर = शक्ति के हृदय के

प्राणसूर्यः प्रतितुट्यैकैकध्येन प्रबुद्धांशुजालया कलया सुधामयमिन्दुं परिपूरयेत्, येन प्रतिपद्येककलो द्वितीयस्यां द्विकलः—इत्याद्यात्मना क्रमेण संपूरणाशालिनः शशाङ्कस्यामृतेन सुन्दरा एताः पञ्चदश तुट्य एव सितपक्षगास्तिथयो भवेयुः । यदुक्तम्—

'प्राणहंसो यदा प्राप्तस्त्वधस्तात्प्रथमां तुटिम् ।
पूर्वमर्धं त्वहः प्रोक्तं तुट्यर्धमपरं निशा ॥' (७।७७)

इत्युपक्रम्य

'प्रतिपत्सा तु विज्ञेया चन्द्रश्चैककलो भवेत् ।
द्वितीयायां द्वितीया तु वृद्धिमेति क्रमेण तु ॥
तिथयश्चैवमारभ्य यावत्पञ्चदशी तुटिः ।'
(स्व०तं० ७।७९) इति ॥ १११ ॥

अत्रैव च पक्षसन्धिताद्यप्यतिदिशति—

अन्त्यायां पूर्णमस्तुट्यां पूर्ववत्पक्षसन्धिता ।
इन्दुग्रहश्च प्रतिपत्सन्धौ पूर्वप्रवेशतः ॥ ११२ ॥
ऐहिकं ग्रहणे चात्र साधकानां महाफलम् ।
प्राग्वदन्यदयं मासः प्राणचारेऽब्द उच्यते ॥ ११३ ॥

भीतर आरूढ होने पर, चित्स्वरूप प्राणसूर्य क्रमशः एक-एक तुटि प्रबुद्ध अंशु जालवाली कला के द्वारा अमृतमय चन्द्र का पूरण करता है जिससे प्रतिपदा में एक कला वाला द्वितीया में दो कला वाला—इत्यादि क्रम से सम्पूर्ण कला वाले (पूर्णिमा के) चन्द्रमा की अमृत के कारण सुन्दर ये पन्द्रह तुटियाँ ही शुक्ल पक्ष वाली तिथियाँ होती है । जैसा कि कहा है—

"प्राण हँस जब नीचे से पहली तुटि को प्राप्त होता है तो (उसे तुटि का) पूर्वार्द्ध दिन कहा गया है और दूसरा तुट्यर्ध रात्रि ।" (स्व. तं. ७।७७)

ऐसा प्रारम्भ कर

'प्रतिपद् उसे समझना चाहिए (जब) चन्द्रमा एक कला वाला हो ।' द्वितीया में दूसरी (कला) वृद्धि को प्राप्त होती है । इस प्रकार आरम्भ कर तिथियाँ (तब तक बढ़ती है) जब तक पन्द्रहवीं तुटि होती है ॥ ११०-१११ ॥ (स्व. तं. ७।७९)

यहीं पर पक्षसन्धिता आदि को भी बतलाते हैं—

अन्तिम तुटि में चन्द्रमा (पूर्ववत् पूर्णमासी का होता है) । पूर्वप्रवेश के कारण प्रतिपद् सन्धि में चन्द्रग्रहण होता है । इस ग्रहण में (अनुष्ठान करने से) साधकों के लिए सांसारिक महाफल होता है । शेष बातें पहले जैसी हैं । यह मास है । अब प्राणचार में वर्ष का वर्णन किया

पूर्णो माश्चन्द्रो यस्यामेवंविधायां पञ्चदश्यां तुट्यां पूर्ववदिति, तुट्यर्धद्वय-संमेलनया । पूर्वेति, पूर्वं पौर्णमासं सन्धिलक्षणं तुट्यर्धं तत्प्रवेशात् । एतच्च यद्यपि पूर्ववदित्यतिदेशाद् गतार्थमेव तथापि पूर्णिमाप्रतिपत्संभेदेनैवेन्दुग्रहो भवेत् न तु शुद्धायामेव प्रतिपद्यपि—इति दर्शयितुं साक्षादुक्तम् । एहिकमिति, सृष्टिप्राधान्यात् । प्राग्वदन्यदिति, मातृमेयसंघट्टादि । यदाहु:—

'शक्तिसंस्नुतसुधारसक्रमात् पूर्णमिन्दुमणुराहुराहरन् ।
छादयेदिह महाशुभे ग्रहे द्रावितं पिबति तं महामुनिः ॥' इति ।

इदानीं मासमुपसंहरन्नब्दमवतारयति अयमित्यादिना ॥ ११३ ॥

तमेवाह—

षट्सु षट्स्वङ्गुलेष्वर्को हृदयान्मकरादिषु ।
तिष्ठन्माघादिकं षट्कं कुर्यात्तच्चोत्तरायणम् ॥ ११४ ॥

मकरादिष्वर्थान्मिथुनान्तेषु, तेन षड्भिरङ्गुलैः षड्गुणितानि षट्त्रिंशद्भवन्तीति भावः । माघे हि मकरस्योदयो यावदाषाढे मिथुनस्य । यदुक्तम्—

जाता है ॥ ११२-११३ ॥

पूर्ण है माः = चन्द्रमा, जिसमें, ऐसी पन्द्रहवीं तुटि में, पूर्ववत् = आधा-आधा तुटि मिलाने से (एक तुटि) पूर्व-पूर्व = पौर्णमास सन्धिरूप तुट्यर्ध, उसमें प्रवेश के कारण यह गतार्थ है तथापि पूर्णिमा और प्रतिपत् के सम्भेद से ही चन्द्रग्रहण होता है न कि शुद्ध प्रतिपद् में भी—यह दिखलाने के लिए साक्षात् कहा गया । इस लोकसम्बन्धीसृष्टि आदि की प्रधानता के कारण । प्राग्वत् अन्यत्—प्रमाता प्रमेय का सङ्घट्ट आदि। जैसा कि कहते हैं—

'शक्ति के द्वारा च्यावित सुधारस को क्रम से आहरण करता हुआ अणु (= छोटा) राहु पूर्णचन्द्र को इस महा अशुभ ग्रह मे ढँक लेता है उस द्रावित (सुधारस को) कोई बहुत बड़ा मुनि ही पीता है ।'

अब मास का उपसंहार करते हुए 'अयम्' इत्यादि के द्वारा वर्ष की अवतारणा करते हैं ॥ ११३ ॥

उसी को कहते हैं—

सूर्य हृदय से लेकर छह छह (६ × ६ = ३६) अंगुल मकर आदि में रहता हुआ माघ आदि छह (मासों की रचना) करता है और वह उत्तरायण होता है ॥ ११४ ॥

मकर आदि में अर्थात् मिथुनान्त में । इससे छह अंगुलियों के छह गुने छत्तीस होते हैं—यह भाव हैं । माघ में मकर का उदय होता है, आषाढ़ में मिथुन का । जैसा कि कहा गया है—

'षडङ्गुलं च संक्रामो मकरादिषु राशिषु ।
भानोर्माघाद्याषाढान्तं भवेत्तच्चोत्तरायणम् ॥' इति ॥ ११४ ॥

अत्रैव विषुवत्सङ्क्रान्तिं दर्शयति—

संक्रान्तित्रितये वृत्ते भुक्ते चाष्टादशाङ्गुले ।
मेषं प्राप्ते रवौ पुण्यं विषुवत्पारलौकिकम् ॥ ११५ ॥

अष्टादशाङ्गुल इति—प्रतिसंक्रान्त्यङ्गुलषट्कस्य भोगात् ।

'हृदयादुदयस्थानात्सङ्क्रान्तिर्मकरे स्मृता ।
षडङ्गुलान्यधस्त्यक्त्वा कुम्भे सङ्क्रमते पुनः ॥
कण्ठोर्ध्वं द्व्यङ्गुलं त्यक्त्वा मीने संक्रमते पुनः ।
गलोर्ध्वाद्यावत्ताल्वन्तं त्यक्त्वा मेषेऽथ संक्रमेत् ॥
नासान्तं यावत्संक्रान्तिरङ्गुलानि षडेव हि ।
एषा वै विषुसंक्रान्तिरुत्तरे संव्यवस्थिता ॥'

(स्व० तं० ७।९४) इति ।

विषुं व्याप्तिं साम्यमर्हति इति विषुवत् । 'विषुवत्पारलौकिकम्' इत्येतच्च यद्यपि निखिलस्यैवोत्तरायणस्य संभवति तथाप्यत्र विशेषेणेति स्वकण्ठेनैतदुक्तम् । यदुक्तम्—

"माघ से लेकर आषाढ़ तक मकर आदि राशियों में सूर्य का छ-छ अंगुल संक्रमण होता है और वह उत्तरायण है" ॥ ११४ ॥

यहीं पर विषुवत् की संक्रान्ति दिखलाते हैं—

तीनो संक्रान्तियों (= मकर कुम्भ और मीन) के बीत जाने पर अठारह अंगुल के मुक्त होने पर जब सूर्य मेष को प्राप्त होता है तब विषुवत् पारलौकिक पुण्य काल होता है ॥ ११५ ॥

अठारह अंगुल—प्रति संक्रान्ति छः अंगुल का भोग होने के कारण ।

"हृदय (जो कि सूर्य का) उदय स्थान (माना गया है) से मकर में संक्रान्ति मानी गई है। सूर्य फिर नीचे छ अंगुल छोड़कर कुम्भ में संक्रमण करता है । फिर कण्ठ से ऊपर दो अंगुल छोड़कर मीन में संक्रमण करता है । गले से लेकर तालु तक छोड़कर मेष में संक्रमण करता है । नासिका तक छ अंगुल ही संक्रान्ति हैं । उत्तरायण के सम्बन्ध में यही विषुवत् संक्रान्ति मानी गई है ।" (स्व. तं. ७।९८)

जो विषु = व्याप्ति = समानता = के योग्य है वह विषुवत् कहलाता है ।

'पारलौकिक विषुवत्'—यद्यपि यह पूरे उत्तरायण का सम्भव है तो भी यहाँ विशेष रूप से अपने कण्ठ से यह कहा गया है । जैसा कि कहा गया है—

'मकराच्च समारभ्य मिथुनान्तं च सुव्रते ।
उत्तरायणमत्रैतदैहिकीसिद्धिवर्जितम् ॥'
(स्व० तं० ७।९७) इति ॥ ११५ ॥

ननु यद्येतद्विषुवत्पारलौकिकं दक्षिणायनं पुनः कीदृक् ?—इत्याशङ्क्याह—

प्रवेशे तु तुलास्थेऽर्के तदव विषुवद्भवेत् ।
इह सिद्धिप्रदं चैतद्दक्षिणायनगं ततः ॥ ११६ ॥

'प्रवेशे' इति शक्तितो हृदन्तम् । 'तदेव' इत्यष्टादशाङ्गुलोपभोगात्मसंक्रान्तित्रयानन्तरभावीत्यर्थः । यदुक्तम्—

'शक्त्यधो हृदये हंसः संक्रामेत्कर्कटे प्रिये ।
षडङ्गुलानि संत्यज्य सिंहे वै संक्रमेत्पुनः ॥
षडङ्गुलैः पुनस्त्यक्तैः कन्यां संक्रमते पुनः ।
नासिकाग्रात्तु ताल्वन्तं त्यक्ते वै विषुवद्भवेत् ॥
तुलासंक्रान्तिरेषोक्ता दक्षिणं विषुवद्भवेत् ॥'
(स्व०तं० ७।११३) इति ।

इह सिद्धिप्रदमिति, यदुक्तम्—

'साधनं यत्कृतं तत्र इह जन्मनि सिद्धिदम् ।' इति ॥ ११६ ॥

"हे सुव्रते ! मकर से लेकर मिथुन तक उत्तरायण है । यह ऐहलौकिक सिद्धि से रहित है" ॥ ११५ ॥ (स्व. तं. ७।९७)

प्रश्न—यदि यह विषुवत् पारलौकिक है तो दक्षिणायन कैसा है?—यह शङ्का कर कहते हैं—

तुला मे सूर्य का प्रवेश होने पर वही विषुवत् होता है । यह ऐहलौकिक सिद्धि देने वाला है इसलिए दक्षिणायन को जाने वाला होता है ॥ ११६ ॥

प्रवेश (का तात्पर्य है)—शक्ति से लेकर हृदय तक । वही = अठारह अंगुल उपभोग वाली तीन (= कर्क सिंह कन्या) संक्रान्ति के (बीतने के) बाद होने वाला । जैसा कि कहा गया है—

'कर्कस्थ हंस (= सूर्य) जब शक्ति के नीचे हृदय में संक्रमण करता है । पुनः त्यक्त छः अंगुलों के साथ सिंह में संक्रमण करता है । पुनः छः अंगुलों के साथ कन्या में संक्रमण करता है । नासिका के अग्रभाग से लेकर तालुपर्यन्त त्याग होने पर विषुवत् होता है । यह तुला संक्रान्ति कही गई है । (इस समय) दक्षिण विषुवत् होता है ।' (स्व. तं. ७।११३)

यह (विषुवत्) इस लोक में सिद्धि देने वाला है । जैसा कि कहा गया है—

ननु मकरादे राशिद्वादशकस्य सामान्येन पारलौकिकैहलौकिकत्वेऽपि प्रत्येक-मस्ति कश्चिद्विशेषो न वा ?—इत्याशङ्क्याह—

गर्भता प्रोद्बुभूषिष्यद्भावश्चाथोद्बुभूषुता ।
उद्भविष्यत्त्वमुद्भूतिप्रारम्भोऽप्युद्भवस्थितिः ॥ ११७ ॥
जन्म सत्ता परिणतिर्वृद्धिर्ह्रासः क्षयः क्रमात् ।
मकरादीनि तेनात्र क्रिया सूते सदृक्फलम् ॥ ११८ ॥

'गर्भता' आधानं, प्रोद्भवितुमेषिष्यन् 'भावः' सत्ता यस्यासौ तथा आद्य इच्छापरिस्पन्दः । उद्भवितुमिच्छुरुद्बुभूषुस्तस्य भावस्तत्त्वं, उद्भवनात्मकैषणीय-संयुक्तमिच्छामात्रमित्यर्थः । 'उद्भविष्यत्त्वम्' उद्भवनाय स्वात्मन्येवोच्छलत्त्वेनाव-स्थानम् । 'उद्भूतिप्रारम्भः' तत्रैव नैविड्यम् । 'उद्भवस्थितिः' तत्रैवौन्मुख्यम् । एवं मकरादिराशिद्वादशकं क्रमादिति, गर्भतादिरूपं यतो भवति तेन हेतुनात्र बाह्य-बीजादिवज्जपादि क्रियापि गर्भताद्यनुगुणमेव फलं 'सूते' ददातीत्यर्थः । यदुक्तम्—

'आधानमिच्छा संयोग आनन्दो घनता स्थितिः ।
जन्म सत्ता परिणतिर्वृद्धिर्ह्रासः क्षयः क्रमात् ॥
माघान्मासात्समारभ्य स्थितयः परिकीर्तिताः ।
साधकानां सिद्धिविधौ भावानां चापि संभवे ॥' इति ॥ ११८ ॥

"इस समय जो साधन किया गया होता है वह इस जन्म में सिद्धि देने वाला होता है" ॥ ११६ ॥

प्रश्न—मकर आदि बारह राशियाँ सामान्यतः पारलौकिक और ऐहलौकिक हैं फिर भी उनका अलग-अलग कोई वैशिष्ट्य है या नहीं ?—यह शङ्का कर कहते हैं—

गर्भता, उद्बुभूषिष्यद्भाव, उद्बुभूषुता, उदभविष्यत्त्व, उद्भव का प्रारम्भ, उद्भव स्थिति, जन्म, सत्ता, परिपक्वता, वृद्धि, ह्रास और क्षय ये क्रमशः मकर आदि हैं । इसलिए यहाँ क्रिया समान फल देती है ॥ ११७-११८ ॥

गर्भता = आधान, भविष्य में होने के इच्छा वाला भाव = सत्ता है जिसकी वह = प्रथम इच्छा का परिस्पन्द । उत्पन्न होने की इच्छा वाला = उद्बुभूषु, उसका भाव = तत्त्व अर्थात् उद्भवनात्मक एषणीय से संयुक्त इच्छामात्र । उद्भविष्यत्व = उद्भवन के लिए अपने अन्दर ही उच्छलत्ता के रूप में स्थिति । उद्भूतिप्रारम्भ = उसी (= उच्छलता) में सघनता । उद्भवस्थिति = उसी में उन्मुखता । इस प्रकार मकर आदि बारह राशियाँ क्रमशः चूँकि गर्भता आदि रूप वाली होती हैं इस कारण यहाँ बाह्य बीज आदि के समान जप आदि क्रिया भी गर्भता आदि के अनुरूप ही फल को प्रसूत करती है अर्थात् देती हैं । जैसा कि कहा गया है—

अत्राप्यवान्तरोऽस्ति विशेषः—इत्याह—

आमुत्रिके झषः कुम्भो मन्त्रादेः पूर्वसेवने ।
चतुष्कं किल मीनाद्यमन्तिकं चोत्तरोत्तरम् ॥ ११९ ॥
प्रवेशे खलु तत्रैव शान्तिपुष्ट्यादिसुन्दरम् ।
कर्म स्यादैहिकं तच्च दूरदूरफलं क्रमात् ॥ १२० ॥

'झषो' मकरः । एतौ चार्थात्सिद्धमन्त्रस्य, असिद्धमन्त्रस्य तु मन्त्रादिसेवा-निमित्तं मीनादिचतुष्कं; 'प्रवेशे' इत्यपानवाहे । यदुक्तम्—

'तस्मादारभ्य मकराद्ध्यानहोमजपादिकम् ।
परलोकनिमित्ताय तदनन्तफलं भवेत् ॥
पुरश्चर्यानिमित्ताय मन्त्रग्रहव्रतं च यत् ।
मीनादावारभेत्सर्वं मन्त्रसिद्ध्यर्थमात्मनः ॥'

(स्व०तं० ७।१०३) इति ।

तथा

'तस्मादिहात्मसिद्ध्यर्थं पुष्ट्यर्थं चैव साधयेत् ।

'आधान, इच्छा, संयोग, आनन्द, घनता, स्थिति, जन्म, सत्ता, परिणाम, वृद्धि, ह्रास और क्षय क्रमशः माघ मास से लेकर साधकों की सिद्धि के विधान तथा पदार्थों की उत्पत्ति के विषय में ये स्थितियाँ कही गई हैं' ॥ ११८ ॥

यहाँ भी अवान्तर विशेषतायें हैं ।—यह कहते हैं—

पारलौकिक (कार्यो) में मकर और कुम्भ (गृहीत हैं) । मन्त्र आदि के पूर्व सेवन में मीन आदि चार गृहीत है । (इनमें) उत्तरोत्तर अधिक निकट (= उत्कृष्ट) है । प्रवेश के समय उन्हीं (मीन आदि चार) में शान्ति पुष्टि आदि सांसारिक कृत्य होते हैं और वे क्रमशः दूर-दूर तक फल देने वाले होते हैं ॥ ११९-१२० ॥

झष = मकर । ये दोनों (= मकर और कुम्भ) सिद्ध मन्त्र वाले के (लिए उपयुक्त हैं) । असिद्ध मन्त्र वाले के लिए तो मन्त्र आदि के सेवन के लिए मीन आदि चार हैं । प्रवेश में = अपानवाह में । जैसा कि कहा गया है—

"उस मकर से आरम्भ कर ध्यान होम जप आदि परलोक (की प्राप्ति) के लिए किया जाता है वह अनन्त फल वाला होता है। और जो मन्त्र ग्रह व्रत पुरश्चर्या के लिए किया जाता है, अपने मन्त्र की सिद्धि के लिए उन सबका मीन आदि में आरम्भ करना चाहिए ।" (स्व. तं. ७।१०३)

तथा—

"इसलिए यहाँ आत्मा की सिद्धि के लिए और पुष्टि के लिए दक्षिणायन वाले

दक्षिणायनजे काले यस्मात्सृष्टिः प्रजायते ॥'

(स्व०तं० ७।११०) इति ।

एवमुत्तरायणस्य वेद्यग्रहणपरत्वम्—इति यथायथं फलदानेऽप्यासन्नत्वं; दक्षिणायनस्य त्वन्तर्विश्रान्तिपरत्वम्—इति फलदाने यथायथं दूरत्वम् । अत एवोत्तरायणे दिनस्य वृद्धिर्निशाया ह्रासोऽत्र त्वन्यथा ॥ १२० ॥

तदाह—

निर्गमे दिनवृद्धिः स्याद्विपरीते विपर्ययः ।
वर्षेऽस्मिंस्तिथयः पञ्च प्रत्यङ्गुलमिति क्रमः ॥ १२१ ॥
तत्राप्यहोरात्रविधिरिति सर्वं हि पूर्ववत् ।

ननु मासारब्धो वर्षः—इति तेषां प्रत्यङ्गुलषट्के उदय उक्तः; ते च तिथ्यारब्धा—इति कथमत्र न तासाम् ?—इत्याशङ्क्याह—'प्रत्यङ्गुलं पञ्च तिथय' इति । तत्षट्के त्रिंशद्भवन्ति येन तत्र मासोदय उक्तः । 'तत्रापि' इत्यङ्गुलपञ्चांशे तेन प्रत्यङ्गुलदशांशं दिनं निशा च । 'सर्वं' पक्षादि, तेन पूर्वस्मिन्नङ्गुलत्रये कृष्णपक्षोऽन्यत्र तु परः । तदुक्तम्—

'अङ्गुले ह्यङ्गुले ह्यत्र तिथयः पञ्च संस्थिताः ।
तस्याप्यर्धं दिनं पूर्वमपरार्धं निशा भवेत् ॥

काल में, जहाँ से सृष्टि होती है, साधना करनी चाहिए ॥'' (स्व. तं. ७।११०)

इसी प्रकार उत्तरायण वेधग्रहणपरक है । इस प्रकार क्रमशः फलदान में भी निकटता हैं । दक्षिणायन तो अन्तःविश्रान्तिपरक है इसलिये फलदान में क्रमशः दूर है । इसीलिये उत्तरायण में दिन की वृद्धि और रात्रि का ह्रास होता है और यहाँ (= दक्षिणायन में) विपरीत है ॥ १२० ॥

वही कहते हैं—

(प्राण के) निर्गम में दिन की वृद्धि होती है और विपरीत अवस्था में विपर्यय होता है । इस वर्ष में प्रत्यङ्गुल पाँच तिथियाँ होती हैं यह क्रम है । उसमें भी अहोरात्र विधि है । शेष सब पूर्ववत् है ॥ १२१-१२२- ॥

प्रश्न—वर्ष मास से आरब्ध है इसलिए उन (= मासों) का प्रति छः अंगुल में उदय कहा गया है । और वे (= मास) तिथि से आरब्ध हैं तो उन (= तिथियों) का (उदय) यहाँ क्यों नहीं कहा गया ?—यह शङ्का कर कहते हैं—प्रति अंगुल पाँच तिथियाँ हैं । तो छः (से गुणा करने) पर तीस हो जाती हैं जिससे वहाँ महीने का उदय कहा गया है । 'उसमें भी' इससे सङ्केत किया गया कि एक अंगुल का दशांश दिन और रात्रि (होती है) । सब = पक्ष आदि । इससे पहले तीन अंगुल में कृष्ण पक्ष और दूसरे में दूसरा (शुक्लपक्ष होता है)। वही कहा गया है—

षट्पञ्चकास्तिथीनां ये तेऽहोरात्रास्तु मासिकाः ।
त्रिंशता तैरहोरात्रैर्द्विपक्षो मास उच्यते ॥'
(स्व०तं० ७।९१) इति ॥ १२१ ॥

ननु प्रहराष्टकन्यायेन मासद्वादशकस्यापि किमधिष्ठातारः केचित्संभवन्ति न वा ?—इत्याशङ्क्याह—

प्राणीये वर्ष एतस्मिन्कार्तिकादिषु दक्षतः ॥ १२२ ॥
पितामहान्तं रुद्राः स्युर्द्वादशाग्रेऽत्र भाविनः ।

यदुक्तम्—

'दक्षनामा तु यो रुद्रः कथितोऽत्र महेश्वरि ।
कार्तिकं मासमखिलं स तु भुङ्क्ते महेश्वरि ॥
चण्डो मार्गशिरोमासि हरः पौषे तु कीर्तितः ।
शौण्डी तु माघमासे च प्रमथः फाल्गुने तथा ॥
भीमश्चैत्रे समाख्यातो वैशाखे मन्मथः स्मृतः ।
शकुनिर्ज्येष्ठमासे तु आषाढे सुमतिस्तथा ॥
नन्दोऽथ श्रावणे मासि भाद्रे गोपालकस्तथा ।
पितामहश्च वीरेशो मासस्याश्वयुजस्य च ॥' इति ।

अग्र इत्येकीकारप्रकाशनाह्निके ॥ १२२ ॥

"इस (= प्राणचार) में एक-एक अंगुल में पाँच-पाँच तिथियाँ स्थित हैं । उसका भी पूर्वार्द्ध दिन और परार्द्ध रात्रि हैं । जो तिथियों के छः पञ्चक (६ × ५), वे महीने के दिन और रात हैं । उन तीस अहोरात्रों से दो पक्ष वाला मास कहा जाता है" ॥ १२१ ॥ (स्व. तं. ७।९१)

प्रश्न—प्रहराष्टक न्याय से बारह महीनों के भी क्या कोई अधिष्ठाता सम्भव हैं या नहीं ?—यह शङ्का कर कहते हैं—

इस प्राणीय वर्ष में कार्त्तिक आदि में दक्ष से लेकर पितामह तक, आगे वर्णन किए जाने वाले, बारह रुद्र होते हैं ॥ -१२२-१२३- ॥

जैसा कि कहा गया है—

"हे महेश्वरी ! दक्ष नामक जो रुद्र कहा गया है वह सम्पूर्ण कार्त्तिक मास को भोगता है । चण्ड मार्गशीर्ष, हर पौष, शौण्डी माघमास, प्रमथ फाल्गुन, भीम चैत्र, मन्मथ वैशाख, शकुनि ज्येष्ठ, सुमति आषाढ़, नन्द श्रावण, गोपालक भाद्रपद, पितामह वीरेश और अश्वयुज् (क्वार) के भोक्ता है ।" आगे—एकीकार प्रकाशन वाले आह्निक में (कहा जायेगा) ॥ १२२ ॥

इसका उपसंहार करते हुए दूसरा (विषय) प्रस्तुत करते हैं—

एतदुपसंहरन्नन्यदवतारयति—

प्राणे वर्षोदयः प्रोक्तो द्वादशाब्दोदयोऽधुना ॥ १२३ ॥
खरसास्तिथ्य एकस्मिन्नेकस्मिन्नङ्गुले क्रमात् ।
द्वादशाब्दोदये ते च चैत्राद्या द्वादशोदिताः ॥ १२४ ॥

खरसा इति । खेति, शून्यं 'रसाः' षट्, एवं षष्टिः । तेन प्रत्यङ्गुलमृतुरङ्गुलानां त्रयेऽयनं षट्के वर्षः । एवमेकस्मिन्नेव प्राणचारे वर्षोदये यथा प्रत्यङ्गुलषट्कं द्वादशानां संक्रान्तीनामुदयः एवमिहाब्दानामित्यभिप्रायः । यदुक्तम्—

'संक्रान्तयो द्वादशात्र यद्वदब्दे प्रकीर्तिताः ।
द्वादशाब्दोदये प्राणे वत्सरास्ते प्रकीर्तिताः ॥'
(स्व०तं० ७।१२६) इति ॥ १२४ ॥

ननु चैत्रस्य प्राक् तालुन्युदयः, इति ततः प्रभृति मन्त्रसेवादि कार्यमित्युक्तम्, इह तु हृदि तस्यैवोदय उक्तः; तदिदानीं साधकः कुत्र मन्त्रादिसेवां कुर्यात् ?—इत्याशङ्क्याह—

चैत्रे मन्त्रोदितिः सोऽपि तालुन्युक्तोऽधुना पुनः ।
हृदि चैत्रोदितिस्तेन तत्र मन्त्रोदयोऽपि हि ॥ १२५ ॥

उक्त इत्यब्दोदये । अधुनेति, द्वादशाब्दोदये ॥ १२५ ॥

प्राण में वर्ष का उदय कहा गया । अब बारह वर्षों का उदय (कहा जा रहा है) । एक-एक अंगुल में क्रमशः साठ तिथियाँ होती हैं । बारह वर्षो के उदय में वे चैत्र आदि बारह कहे गए हैं ॥ -१२३-१२४ ॥

खरसाः = ख = ० और = रस ६, इस प्रकार साठ । इस प्रकार प्रत्येक अंगुल १ में वर्ष (होता है) । इस प्रकार एक ही प्राणचार में वर्षोदय होने पर हर अंगुल में एक वर्ष । इस प्रकार जैसे एक ही प्राणचार में वर्षोदय होने पर हर छः अंगुल पर बारह संक्रान्तियों का उदय होता है उसी प्रकार यहाँ (= हर छः अंगुल पर बारह) वर्षों का (उदय होता है) यह अभिप्राय है । जैसा कि कहा गया है—

"जिस प्रकार एक वर्ष में बारह संक्रान्तियाँ कही गई हैं उसी प्रकार बारह वर्ष के उदय वाले प्राण में वे वर्ष कह गए हैं" ॥ १२४ ॥ (स्व.तं. ७।१२६)

प्रश्न—पहले चैत्र का तालु मे उदय कहा गया तो उसी (स्थान) से मन्त्रसेवा आदि कार्य कहा गया है । यहाँ उसी (= चैत्र) का हृदय में उदय कहा गया तो अब साधक मन्त्र आदि की सेवा कहाँ करे ?—यह शङ्का कर कहते हैं—

चैत्र में मन्त्र का उदय (होता है) वह भी तालु में कहा गया । फिर अब हृदय में चैत्र का उदय (कहा जा रहा है) तो मन्त्र का उदय भी वहीं (= हृदय में ही) होगा ॥ १२५ ॥

एवं द्वादशाब्दोदयमभिधाय षष्ट्यब्दोदयमप्यभिधत्ते—

प्रत्यङ्गुलं तिथीनां तु त्रिशते परिकल्पिते ।
सपञ्चांशाङ्गुलेऽब्दः स्यात्प्राणे षष्ट्यब्दता पुनः ॥ १२६ ॥

प्रत्यङ्गुलं तिथिशतत्रयमित्यङ्गुलपञ्चभागे षष्टिरहोरात्राः । एवं सपञ्चभागेऽङ्गुले षष्ट्यधिकशतत्रयात्माब्द उदियात् । ततः सपञ्चांशाङ्गुलेऽब्दस्योदयात्प्रागुक्तचषकोदयस्थित्या प्राणापानवाहात्मनि प्राणे षष्ट्यब्दता, षष्टिरब्दा भवन्तीत्यर्थः । यदुक्तम्—

'हृत्पद्माद्याव शक्त्यन्तं त्रिंशदब्दोदयो भवेत् ।'
(स्व०तं० ७।१३४) इति ॥ १२८ ॥

अत्रैवाहोरात्राणां सङ्कलनां दर्शयति—

शतानि षट् सहस्राणि चैकविंशतिरित्ययम् ।
विभागः प्राणगः षष्टिवर्षाहोरात्र उच्यते ॥ १२७ ॥

अनेन चात्र श्रोतृणामपूर्वदर्शनात् संमोहो मा भूत्—इति बाह्याहोरात्रगत-

---

कहा गया—(एक) वर्ष के उदय में । अब = बारह वर्षों के उदय में ॥ १२५ ॥

इस प्रकार द्वादशाब्द (अब्द = वर्ष) के उदय को कहकर साठ अब्दोदय को कहते हैं—

एक-एक अंगुल में तीन-तीन सौ तिथियों की कल्पना करने पर पञ्चम अंश के सहित एक अंगुल (= १×(१।५) अंगुल × ३००) में एक वर्ष होता है और प्राण में साठ वर्ष होते हैं ॥ १२६ ॥

एक-एक अंगुल में ३०० तिथियाँ हैं तो अंगुल के पञ्चम भाग में ६० दिन रात होंगे । इस प्रकार १।१।५ अंगुल में ३६० दिनो वाला वर्ष उदित है । फिर १।१।५ अंगुल में वर्ष का उदय होने से पहले कहे गए चषक के उदय की स्थिति से प्राणवाह और अपानवाह वाले प्राण में ६० वर्ष होंगे । जैसा कि कहा गया है—

"हृदय कमल से लेकर शक्ति पर्यन्त तीस वर्ष का उदय होता है" ॥ १२६॥ (स्व. तं. ७।१३४)

यहीं पर रात्रि और दिन का सङ्कलन दिखलाते हैं—

यह प्राणचार (= प्रश्वास निःश्वास) में वर्त्तमान इक्कीस हजार छः सौ विभाग साठ वर्ष का अहोरात्र विभाग कहा जाता है ॥ १२७ ॥

इससे इस विषय में श्रोता लोगों को अद्भुत बात सुनने से मोह न हो जाय

प्राणचारसंख्यासाजात्यमुद्भावितम् । तदुक्तम्—

'विंशतिस्तु सहस्राणि सहस्रं षट्शताधिकम् ।
अहोरात्रास्तु षष्ट्यब्दे संख्यातास्तु वरानने ॥'
(स्व०तं० ६।१३६) इति ॥ १२७ ॥

नन्वेवं तिथिविभाजनेऽस्य किं प्रयोजनम् ?—इत्याशङ्क्याह—

प्रहराहर्निशामासऋत्वब्दरविषष्टिगः ।
यश्छेदस्तत्र यः सन्धिः स पुण्यो ध्यानपूजने ॥ १२८ ॥

अब्दरवीत्यब्दद्वादशकं 'छेदः' समाप्तिः, 'सन्धिः' संध्या । अयमत्राशयः—

यन्नाम हि नित्यनैमित्तिकादि बाह्ये प्रयत्नशतैरपि पुरुषायुषेण निष्पत्तिं यायात् न वा, तदन्तरेकस्मिन्नेव प्राणचारे प्रहराहर्निशादिक्रमेण क्षणमात्रमवधानात्सुखमेव योगिनः सिध्येदिति । यदुक्तम्—

'चन्द्रसूर्योपरागे च पक्षमासायनेषु च ।
युगादिषु युगान्तेषु यच्च संवत्सरेऽप्यथ ॥
वर्षद्वादशके चैव षष्ट्यब्देऽथ वरानने ।

इसलिए बाह्य अहोरात्रगत प्राणसञ्चार की संख्या के साथ समानता बतलायी गई । वही कहा गया है—

"हे वरानने ! साठ वर्ष में बीस हजार तथा एक हजार छः सौ अर्थात् २१६०० दिन रात गिने गए हैं ॥ १२७ ॥ (स्व. तं. ७।१३६)

प्रश्न—इस प्रकार तिथियों के विभाजन में क्या तात्पर्य है?—यह शङ्का कर कहते हैं—

प्रहर, दिन रात, मास, ऋतु, वर्ष और साठ वर्ष में होने वाली जो समाप्ति उसमें जो सन्ध्या होती है वह ध्यान और पूजन में पुण्याधायक मानी जाती है ॥ १२८ ॥

अब्द रवि = बारह वर्ष, छेद = समाप्ति; सन्धि = सन्ध्या । यहाँ यह तात्पर्य है—

जो नित्य नैमित्तिक आदि (कर्म) बाह्य (जगत्) में सैकड़ों प्रयास करके भी पुरुष की आयु वाले एक व्यक्ति के द्वारा सम्पन्न किया जा सकता है या नहीं वह आन्तर (जगत्) में एक ही प्राणचार में दिन रात आदि के क्रम से एक क्षण के अवधान के द्वारा योगी आसानी से सम्पन्न कर लेता है । जैसा कि कहा गया है—

"हे वरानने ! चन्द्र सूर्य के ग्रहण काल में, पक्ष मास और अयन, युगादि, युगान्त, संवत्सर, द्वादश वर्ष और साठ वर्ष में ज्ञान, दान, यज्ञ, पूजा, होम, जप,

स्नानदानेन यज्ञैश्च पूजाहोमजपेन च ॥
ध्यानयोगतपोभिश्च बाह्ये कालेऽथ यत्कृतम् ।
अमुनोक्ते वरारोहे तत्फलं लभते महत् ॥
प्राणहंसगतिं चारे ज्ञात्वैकस्मिंस्तु तद्भजेत् ।'
(स्व०तं० ७।१४०) इति ।

यदभिप्रायेणैवाह—

'या अग्निहोत्राहुतयः सहस्रद्वासप्ततिः स्युः पुरुषायुषेण ।
नाड्यंशयुक्त्या सकृदाशु जुह्वत् संपादयेद्यस्तव मार्गवित्सः ॥'

इत्याद्यन्यैरुक्तम् । ननु भवतु नामैतद्यदन्तः क्षणमवधानमात्राद्योगिनो जन्मकृत्यं सिद्ध्येदिति, इदं तु न नः प्रतिभाति यदन्तःप्राणचारे नालिकाद्यब्दान्तं क्रमेणाभिधाय द्वित्रिचतुरब्दादिक्रमव्यतिक्रमेण निष्कारणमेव द्वादशाब्दाद्यभिहितमिति । तत्रापि द्वादशानामेवाब्दानामुदयो न त्रयोदशानां, षष्टिरेव न पुनरेकोनषष्टिरिति, तदधिकस्य चोदयानभिधानमिति न किंचिदत्र निमित्तमुत्पश्यामः—इति किमेतदिति न जानीमः । अत्रोच्यते—इह तावद्योगिनां प्राणे जिते सत्येतद्भवेत् न त्वन्यथा, प्राणजयश्च योगशास्त्राद्युक्त्या क्रमेणैव भवेत्; अत एव तत्र 'क्रामेदजितां मात्राम्'

ध्यान, योग, तपस्या से बाह्य काल में जो किया गया (फल) होता है । हे वरारोहे ! (योगी) इस कहे गए चार में प्राण रूपी हंस की गति को जान कर वह महान् फल प्राप्त करता है । इसलिए एक ही चार में प्राणरूपी हंस (= सूर्य) की गति को जानकर भजन करना चाहिए ।'' (स्व. तं. ७।१४०) ।

इसी अभिप्राय से कहते हैं—

''जो ७२००० अग्निहोम आहुतियाँ पुरुषायु वाले (व्यक्ति) के द्वारा सम्पन्न हो सकती है, नाड़ी के अंश की युक्ति से एक ही बार शीघ्र हवन करता हुआ जो (योगी) (उन आहुतियों को) सम्पन्न करता है वह तुम्हारे रास्ते को जानने वाला है ॥''

इत्यादि दूसरे लोगों के द्वारा कहा गया है ।

प्रश्न—यह ठीक है कि भीतर एक क्षण के अवधान से योगी को पूरे जन्म के कार्यों की सिद्धि हो जाती है किन्तु यह हमारी समझ में नहीं आता कि भीतरी प्राणचार के विषय में नाडी से वर्ष तक का क्रमशः कथन कर फिर दो तीन चार वर्ष आदि के क्रम को छोड़कर निष्कारण बारह वर्ष का कथन किया गया । उसमें भी बारह ही वर्षों का उदय कहा गया तेरह का नहीं, साठ का ही कहा गया उनसठ का नहीं और उस (साठ) से अधिक के उदय का कथन नहीं किया गया । तो हम इसमें कोई कारण नहीं देखते—अतः यह क्यों है हम नहीं समझ पा रहे हैं ? इस विषय में कहा जाता है—प्राण को जीत लेने पर योगियों को यह होता

इत्याद्युक्तम् । ततश्चात्र तुट्यादिक्रमेणैव यथायथं तारतम्यादब्दपर्यन्तं तदुदय उक्तः । एवं जितप्राणः कश्चिद्योगी यदि क्रममपहाय तत्र द्वादशानामब्दानामुदयमसंदध्यात्, तत्तस्य निमित्ततामियात् अत्यन्तमेव प्राणस्य जितत्वात्; न चेह ज्योतिःशास्त्रवत् संवत्सराणां क्रमः कश्चिद्विवक्षितो येनास्यातिक्रमः स्यात्; यावता हि जितप्राणो योगी यन्नाम तत्रानुसन्धत्ते तत्तस्य साक्षात्कृतं भवेत्—इत्यभिधानीयं, तच्चैवमस्तु नैवं वा को विशेषः। न चात्र योगिनां प्राणं जेतुं किंचिदपेक्षान्तरमस्ति येन क्रमोऽवश्यस्वीकार्यः स्यात् । न च सहसैवात्यन्तं विदूरेऽप्यनुसन्धानं कार्यम्—इत्यन्तरा सोपानकल्पतया द्वादशाब्दोदय उक्तः । एवं षष्ट्यब्दोदयेऽपि वाच्यम् । तस्माद्यथांशांशिकाक्रमेण विषं भक्षयन् कश्चिज्जीर्णविषः सन् अक्रमेण बह्वपि विषं भक्षयन् जरयेदेवमिहापि ज्ञेयम् । एतदेव च तदधिकस्याप्युदयानभिधाने निमित्तम् । एवं परां काष्ठां प्राप्तो योगी यत्किंचित्तत्रानुसंदध्यात् तदेव साक्षात्कुर्यात्—इत्यानन्त्यात्कियदन्यदभिधीयते इति । न ह्यतोऽधिकेनोक्तेन किंचित्प्रयोजनान्तरमुत्पश्यामः । यदुक्तमनेनान्यत्र—

'न षष्ट्यब्दोदयादधिकं परीक्ष्यते आनन्त्यात् ।' (तं०सा० ६आ०)

है अन्यथा नहीं । और प्राण का जय योगशास्त्र आदि की उक्ति के अनुसार क्रम से ही होता है । इसीलिए वहाँ कहा गया है—'न जीती गई मात्रा का अतिक्रमण करना चाहिए' इत्यादि । इसलिए यहाँ तुटि आदि के क्रम से ही उसी प्रकार क्रमशः वर्षपर्यन्त उसका उदय कहा गया । इस प्रकार प्राणजय करने वाला योगी यदि क्रम को छोड़कर वहाँ (= प्राणअपानवाह में) बारह वर्षों के उदय का अनुसन्धान करे तो प्राण को पूरी तरह से जीत लेने के कारण वह उस (उदय) का कारण बन जाता है । यहाँ (= आगम या योग में) ज्योतिष शास्त्र की भांति कोई क्रम विवादित नहीं है जिससे इसका अतिक्रमण हो जायगा । क्योकि प्राणजयी योगी वहाँ जिसका अनुसन्धान करता है वह उसके प्रत्यक्ष हो जाता है—यह कहना चाहिए वह इस प्रकार हो या न हो क्या फर्क पड़ता है । प्राणजय के लिए योगियों को किसी की अपेक्षा नहीं होती जिससे क्रम अवश्य स्वीकार किया जाय । और सहसा बहुत दूर का भी अनुसन्धान नहीं करना चाहिए इसलिए बीच में सोपान के तुल्य बारह वर्ष का उदय कहा गया । इसी प्रकार साठ वर्ष का उदय भी कहना चाहिए । इस कारण जैसे क्रम से थोड़ा-थोड़ा विष को खाने वाला कोई विषपक्व होता हुआ बिना क्रम के बहुत भी विष को खा लेने पर पचा लेता है उसी प्रकार यहाँ भी समझना चाहिए । उस (= साठ वर्ष) से अधिक के उदय को न कहने के पीछे यही कारण है । इस प्रकार परा काष्ठा को प्राप्त योगी जिस किसी का वहाँ अनुसन्धान करता है उसका प्रत्यक्ष कर लेता है । अनन्त होने से और अधिक क्या कहा जाय । जैसा कि इनके द्वारा अन्यत्र कहा गया है—

'साठ वर्ष के उदय से अधिक की परीक्षा नहीं की जाती क्योंकि (अब्दोदय का) आनन्त्य है ।' (तं. सा. ६)

इति । यत्पुनरन्यत्र विंशत्यधिकोत्तराब्दशतोदयोऽप्युक्तस्तदप्येवं प्रदर्शनपरमेवेत्येकस्मिन्नेव प्राणचारे कल्पोऽप्यनुपसंहितः साक्षात्कृतो भवेदेव को नामात्र विरोधः । यत्तु द्वादशानामेवाब्दानां षष्टेरेव वा कथमभ्युदयोऽभिहितः इत्युक्तं तद्यद्यपि शिंशपाचोद्यं तदन्याभिधानेऽप्येवञ्चोद्यावकाशात्, तथापि अत्यन्तमेवापूर्वार्थदर्शनेन श्रोतॄणामत्र संमोहो मा भूत् इति कारुण्याद्भगवता प्राच्यगणनाक्रमसजातीयमेवैतदुक्तमिति न कश्चिद्दोषः ॥ १२८ ॥

एवमन्तःकालस्य स्वरूपं निरूप्य बहिरपि निरूपयति—

इति प्राणोदये योऽयं कालः शक्त्येकविग्रहः ।
विश्वात्मान्तःस्थितस्तस्य बाह्यो रूपं निरूप्यते ॥ १२९ ॥

प्राणोदय इत्यर्थादपानोदयेऽपि विश्वात्मत्वे हेतुः 'शक्त्येकविग्रह' इति ॥

तदेवाह—

षट् प्राणाश्चषकस्तेषां षष्टिर्नाली च तास्तथा ।
तिथिस्तत्त्रिंशता मासस्ते द्वादश तु वत्सरः ॥ १३० ॥

और जो दूसरी जगह १२० वर्ष का उदय कहा गया वह भी इसी प्रकार दिखलाने के लिए है । इस प्रकार एक ही प्राणचार में अनुसन्धान किए जाने पर कल्प का साक्षात्कार हो जाय इसमें क्या विरोध है ? और जो यह कहा गया कि बारह या साठ ही वर्षों का अभ्युदय क्यों कहा गया वह जो यद्यपि शिंशपा से जानने योग्य है वह दूसरे का कथन करने पर भी इसी प्रकार जानने के योग्य अवसर वाला होता है इस कारण, तो भी अत्यन्त ही अपूर्व अर्थ के प्रदर्शन से श्रोताओं को यहाँ मोह न हो जाय इसलिए दयावश भगवान् (अभिनवगुप्त) ने प्राच्य गणनाक्रम का सजातीय ही इसे कहा इसलिए कोई दोष नहीं है ॥ १२८ ॥

इस प्रकार आभ्यन्तर काल के स्वरूप का निरूपण कर बाहर का भी निरूपण करते हैं—

इस प्रकार प्राण के उदय में जो यह काल शक्तिमात्रशरीर वाला विश्वात्मा (शरीर के) अन्दर स्थित है उसका बाहर रूप बतलाया जा रहा है ॥ १२९ ॥

प्राणोदय कहने का अर्थ अपान के उदय में भी (यह काल) विश्वात्मता में हेतु है—शक्तिमात्रविग्रह वाला ॥ १२९ ॥

वही कहते हैं—

छः प्राण = एक चषक । उनका साठ (६ × ६०=३६०) एक नाडी । वे (= नाड़ियाँ) वैसी (३६० × ६०=२१६००) = एक तिथि । वे तीस (= २१६०० × ३० = ६४८००० नाड़ियाँ) = एक मास । वे

अब्दं पित्र्यस्त्वहोरात्र उदग्दक्षिणतोऽयनात् ।
पितृणां यत्स्वमाने वर्षं तद्दिव्यमुच्यते ॥ १३१ ॥
षष्ट्यधिकं च त्रिशतं वर्षाणामत्र मानुषम् ।

तथेति षष्टिरेव । स्वमानेनेति मानुषात्मकस्वकाहोरात्रकल्पनयेत्यर्थः । यत्पित्र्यं वर्षं तदेव दिव्यमुच्यते, येन पितृणां देवानामप्यहोरात्रादि समानमेवेति भावः । तस्य च पित्र्यस्य दिव्यस्य वा वर्षस्य कियन्मानमित्युक्तं 'मानुषं षष्ट्यधिकं वर्षशतत्रयम्' इति ॥ १३१ ॥

एतदेव विभजति—

तच्च द्वादशभिर्हत्वा माससंख्यात्र लभ्यते ॥ १३२ ॥
तां पुनस्त्रिंशता हत्वाहोरात्रकल्पना वदेत् ।
हत्वा तां चैकविंशत्या सहस्रैः षट्शतेन च ॥ १३३ ॥
प्राणसंख्यां वदेत्तत्र षष्ट्याद्यब्दोदयं पुनः ।

तदिति, दिव्यं वर्षं 'द्वादशभिर्हत्वा, इति द्वादशभिर्विभज्य, तेनात्र मानुषवर्षत्रिंशदात्मा द्वादशो भागो मासः । तामिति, माससंख्यां 'त्रिंशता हत्वा' त्रिंशद्धा कृत्वा, तेनात्र मानुषवर्षात्मा त्रिंशो भागो दिव्योऽहोरात्रः । तामिति, मानुष-

---

(= मास) बारह = १ वर्ष होता है । उत्तरायण और दक्षिणायन की दृष्टि से एक वर्ष = पितरों का एक दिन रात होता है । पितरों का उनके मान से एक दिव्य वर्ष कहलाता है । उसमें मनुष्यों का ३६० वर्ष होता है ॥ १३०-१३२- ॥

तथा = साठ ही । अपने मान से = मनुष्य की अपनी अहोरात्र की कल्पना से । जो पितरों का एक वर्ष वही दिव्य (= देवताओं का भी एक वर्ष) कहलाता है । जिससे पितरों और देवताओं का भी दिन रात समान ही हैं । उस पितरों अथवा देवताओं का एक वर्ष किस परिमाण वाला है यह कहा गया—मनुष्यों का ३६० वर्ष ॥ १३१ ॥

इसी का विभाग करते हैं—

उस को बारह से भाग देकर मासों की संख्या प्राप्त की जाती हैं । उस (१ भाग) को तीस से भाग देने पर दिन रात की कल्पना कहनी चाहिए । उसे फिर २१६०० से भाग देकर प्राणचार की संख्या कहनी चाहिए । उस (= प्राण संख्या) में साठ से भाग देकर वर्ष का उदय (मानना चाहिए) ॥ -१३२-१३४- ॥

तत् = दिव्य एक हजार वर्ष को, बारह से हन कर = बारह से भाग देकर, इससे यहाँ मनुष्य के एक वर्ष का तीस वाला बारहवाँ भाग मास होता है । उस =

षष्ट्यधिकशतत्रयदिनात्मिकामहोरात्रकल्पनाम् 'एकविंशत्या सहस्त्रैः षट्शतेन च हत्वा' इति तथात्वेन भागशः कृत्वेत्यर्थः । एवं हि प्रति मानुषीं नालिकां दिव्यः प्राणचारो भवेदिति भावः । एवमविशिष्टैव सर्वत्र प्रत्यहं प्राणचारे संख्येत्याख्यातं स्यात् । तत्रेति प्राणसंख्यायां, पुनरित्यादाविवेत्यर्थः ॥ १३३ ॥

नन्वन्ये पित्र्यमेव वर्षं देवानां दिनमित्युक्तवन्तस्तत्कथमिह तयोः साम्यमुक्तं, किमत्र किंचित्साधकं प्रमाणमस्ति ?—इत्याशङ्क्याह—

उक्तं च गुरुभिः श्रीमद्रौरवादिस्ववृत्तिषु ॥ १३४ ॥

तदेव पठति—

देवानां यदहोरात्रं मानुषाणां स हायनः ।
शतत्रयेण षष्ट्या च नृणां विबुधवत्सरः ॥ १३५ ॥

पित्र्यं दिनं मानुषाणां हायन इत्यविवादः । देवानामप्येवमित्युक्तेरनयोः साम्यमेव—इत्यर्थसिद्धम् । नृणामित्यत्र हायनानामिति शेषः ॥

न केवलमेतद् गुरुभिरेवोक्तं यावदागमोऽप्येवमेव—इत्याह—

मास संख्या को तीस से हन कर = तीस भाग कर इससे यहाँ मनुष्य के एक वर्ष वाला तीसवाँ भाग देवताओं का एक दिन रात होता है । उसको =मनुष्य की ३६० दिन वाली अहोरात्र कल्पना को २१६०० से हन कर = उस रूप में भाग कर । इस प्रकार मनुष्य की प्रति एक नाड़ी में दिव्य प्राणचार होता है । इस प्रकार समान रूप से सर्वत्र प्रतिदिन प्राणचार में संख्या होती है—यह कहा गया । उसमें = प्राणसंख्या में । पुनः इत्यादि इव अर्थ मे प्रयुक्त है ॥ १३३ ॥

प्रश्न—दूसरे लोगों ने पितरों के एक वर्ष को देवताओं का एक दिन कहा है। तो कैसे यहाँ दोनों का साम्य कहा गया ? क्या इसमें कोई साधक प्रमाण है ? —यह शङ्का कर कहते हैं—

गुरुओं के द्वारा रौरव आदि अपनी वृत्तियों में कहा गया ॥ -१३४ ॥

वही पढ़ते हैं—

देवताओं का जो एक अहोरात्र है वह मनुष्यों का एक वर्ष है । मनुष्यों के ३६० (वर्षों) का एक देववर्ष होता है ॥ १३५ ॥

पितरों का एक दिन मनुष्यों का एक वर्ष होता है इसमें विवाद नहीं है । देवताओं का भी ऐसा है—इस उक्ति के कारण इन दोनों का साम्य ही है—यह अर्थात् सिद्ध है । 'मनुष्यों के'—'वर्षों का'—यह जोड़ लेना चाहिए ॥ १३५ ॥

यह केवल गुरुओं के द्वारा ही नहीं कहा गया बल्कि आगम भी ऐसा ही है—यह कहते हैं—

श्रीमत्स्वच्छन्दशास्त्रे च तदेव मतमीक्ष्यते ।
पितॄणां तदहोरात्रमित्युपक्रम्य पृष्ठतः ॥ १३६ ॥
एवं दैवस्त्वहोरात्र इति ह्यैक्योपसंहृतिः ।

पृष्ठत इति पश्चात् । यदुक्तम् तत्र—

'दक्षिणं चायनं रात्रिरुत्तरं चायनं दिनम् ।
पितॄणां तदहोरात्रमनेनाब्दस्तु पूर्ववत् ॥
एवं दैवस्त्वहोरात्रस्तत्राप्यब्दादि पूर्ववत् ।'

(स्व०तं० ११।२०८) इति ॥ १३६ ॥

एवं पित्र्यं वर्षं देवानां दिनमिति यदन्यैरुक्तं तदयुक्तमेव—इत्याह—

तेन ये गुरवः श्रीमत्स्वच्छन्दोक्तिद्वयादितः ॥ १३७ ॥
पित्र्यं वर्षं दिव्यदिनमूचुर्भ्रान्ता हि ते मुधा ।

'भ्रान्ता' इत्यत्र हेतुः 'उक्तिद्वयादितः' इति । पितॄणामित्येकोक्तिः, एवं दैव इति द्वितीया, आदिशब्दाद्गुरुवृत्तिकारोक्तिः ॥ १३७ ॥

इदानीमेतदुपजीवनेनैव युगादिव्यवस्थामप्याह—

स्वच्छन्दतन्त्र में भी यह मत दिखलायी पड़ता है । पितरों का वह एक दिन रात होता है—ऐसा उपक्रम कर बाद में इसी प्रकार देवताओं का अहोरात्र होता है—ऐसा एक (= समान) उपसंहार (किया गया) है ॥ १३६-१३७- ॥

पृष्ठतः = बाद में । जैसा कि वहाँ कहा गया है—

''दक्षिणायन (पितरों की) रात्रि और उत्तरायण (उनका) दिन है । यह पितरों का एक दिन रात है । इस रीति से एक वर्ष पहले जैसा (जानना चाहिए) । इसी प्रकार देवताओं का एक दिन रात और वर्ष आदि पूर्ववत् (जानना चाहिए)'' ॥ १३६ ॥ (स्व. तं. ११।२०८)

इस प्रकार पितरों का एक वर्ष देवताओं का एक दिन होता है—ऐसा जो दूसरे (= पौराणिक या वेदान्ती) लोगों के द्वारा कहा गया वह अयुक्त ही है—यह कहते हैं—

इससे जो गुरु पितरों के एक वर्ष को देवताओं का एक दिन कहते हैं स्वच्छन्द तन्त्र की दो उक्तियों के कारण वे व्यर्थ ही भ्रान्त हैं ॥ -१३७-१३८- ॥

भ्रान्त है—इसमें हेतु है—उक्तिद्वय आदि के कारण । पितृणाम् यह एक उक्ति है, दैव यह दूसरी । आदि शब्द से गुरुवृत्तिकार की उक्ति (लेनी चाहिए) ॥ १३८॥

दिव्यार्काब्दसहस्राणि युगेषु चतुरादितः॥ १३८ ॥
एकैकहान्या तावद्भिः शतैस्तेष्वष्ट संधयः ।
चतुर्युगैकसप्तत्या मन्वन्तस्ते चतुर्दश ॥ १३९ ॥
ब्रह्मणोऽहस्तत्र चेन्द्राः क्रमाद्यान्ति चतुर्दश ।

'अर्का' द्वादश । युगेषु चतुर्ष्वपि चतुरादित एकैकहान्येत्येषां विभागः; तेन कृते चत्वारि सहस्राणि, त्रेतायां त्रीणि, द्वापरे द्वे, कलावेकम्—इति दिव्यानां वर्षाणां दशसहस्राणि चतुर्षु युगेषु मानम् । अवशिष्टस्य सहस्रद्वयस्य विभागमाह 'तावद्भिरित्यादिना' । तावद्भिश्चतुस्त्र्यादिभिरेवाष्ट सन्धय इति चतुर्णां युगाना-माद्यन्तयोर्भावात्, उभयमीलनया तु चत्वारः । एवं कलेरन्तगं शतं कृतस्यादौ चत्वारि शतानीति कलिकृतयुगसंध्या पञ्चशतानि एवं कृतत्रेतयोः संध्या सप्त-शतानि, त्रेताद्वापरयोः पञ्च, द्वापरकलियुगयोस्त्रीणि गणयित्वा सहस्रद्वयम्,—इत्युभयतो दिव्यं वर्षसहस्रद्वादशकं चतुर्युगम् । तदुक्तम्—

'द्वादशाब्दसहस्राणि विज्ञेयं तु चतुर्युगम् ।
चतुर्भिस्तु कृतं देवि सहस्रैस्तु यथाक्रमम् ॥
त्रेता ज्ञेया त्रिभिर्देवि द्वाभ्यां वै द्वापरः स्मृतः ।
सहस्रेणैव वर्षाणां विज्ञेयस्तु कलिः प्रिये ॥'

(स्व०तं० ११।२१०) इति ।

अब इसी आधार पर युग आदि की व्यवस्था को भी कहते हैं—

दिव्य १२ हजार वर्षों को युगों में (बाँटने के लिए) चार से प्रारम्भ कर एक-एक की हानि के द्वारा (इनको बाँटा जाता है) । उतने ही सैकड़ों से उसमें आठ सन्धियाँ होती है । इकहत्तर चतुर्युगों का एक मन्वन्तर होता है । वे चौदह (मन्वन्तर) ब्रह्मा का एक दिन होता है । उसमें क्रम से चौदह इन्द्र होते हैं ॥ -१३८-१४०- ॥

अर्क = १२ । चारों युगों में चार से लेकर एक-एक की हानि से इनका विभाग होता है । इस प्रकार सत्ययुग में चार हजार, त्रेता में तीन, द्वापर में दो और कलियुग में एक हजार—यह चारो युगों का दिव्य दश हजार वर्ष परिमाण है । शेष दो हजार का विभाग बतलाते हैं—'उतने से ही' इत्यादि के द्वारा । उतने से ही = चार तीन आदि के द्वारा ही आठ सन्धियाँ चारो युगों के आदि और अन्त में होती हैं । दोनों को मिला देने से चार (हो जाता है) । इस प्रकार कलियुग के अन्त में एक सौ वर्ष और सत्ययुग के आदि का चार सौ वर्ष इस प्रकार कलि और सत्य युगों की सन्ध्या पाँच सौ वर्ष की है । इसी प्रकार कृतयुग और त्रेता की सन्ध्या सात सौ वर्ष, त्रेता द्वापर की पाँच सौ वर्ष और द्वापर कलयुग की तीन सौ—कुल मिला कर दो हजार वर्ष । इस प्रकार दोनों ओर से दिव्य बारह हजार वर्ष तक चार युग होता है । वही कहा गया है—

तथा

'शतानि चत्वारि कृते त्वादिरन्तश्च कीर्त्यते।
त्रेते शतत्रयं ज्ञेयं द्वापरे तु शतद्वयम् ॥
कलौ चापि शतं ज्ञेयं संध्यामानमिदं स्मृतम् ।'

(स्व०तं० ११।२१२) इति ।

त इति मन्वन्ताः । तत्रेति ब्राह्मेऽह्नि, चतुर्दशेति तेन प्रतिमन्वन्तरमेकैक इन्द्रः संहारं यातीत्यर्थः । तदुक्तम्—

'दिनेनैकेन ब्राह्मेण इन्द्राश्चैव चतुर्दश ।
राज्यं कृत्वा क्रमाद्यान्ति मन्वन्तरव्यवस्थया ॥'

(स्व०तं० ११।२२९) इति ।

अत एवानेन संहारचित्रताया अप्यवकाशो दत्तः ॥ १३९ ॥

तदाह—

ब्रह्माहोऽन्ते कालवह्नेर्ज्वाला योजनलक्षिणी ॥ १४० ॥
दग्ध्वा लोकत्रयं धूमात्त्वन्यत्प्रस्वापयेत्त्रयम् ।

लोकत्रयमिति, निरयेभ्यः प्रभृति भूर्भवःस्वपर्यन्तमित्यर्थः । यदुक्तम्—

"बारह हजार वर्ष तक चतुर्युग समझना चाहिए । हे देवि ! क्रमशः चार हजार वर्षों से कृतयुग होता है । त्रेता तीन और द्वापर दो तथा हे प्रिये एक हजार वर्षों से कलियुग जानना चाहिए ।" (स्व. तं. ११।२१०) ।

तथा

कृतयुग में आदि और अन्त में चार सौ, त्रेता में तीन सौ, द्वापर में दो सौ और कलियुग में एक सौ सन्ध्यामान कहा गया है । (स्व. ११।२१२)

वे = मन्वन्त । उसमें = ब्रह्मा के दिन में । चतुर्दश—अर्थात् एक मन्वन्तर में एक इन्द्र मरता है । वही कहा है—"ब्रह्मा के एक दिन में मन्वन्तर की व्यवस्था के अनुसार चौदह इन्द्र राज्य कर समाप्त हो जाते हैं । (स्व. तं. ११।२२९)

इसलिए इसके द्वारा संहार की विचित्रता को भी अवकाश दिया गया ॥ १४० ॥

वही कहते हैं—

ब्रह्मा के दिन के अन्त में कालाग्नि की एक लाख योजन वाली ज्वाला धूम से तीनो लोकों (= भू र्भुवः स्वः) को जला कर अन्य तीन लोकों (= महः जनः तपः) को धूम से आपूरित कर देती है ॥ -१४०-१४१- ॥

'सा दहेन्नरकान्देवि पातालानि समन्ततः ।
त्रींल्लोकांश्चैव दहति भूर्भुवःस्वःपदान्तकान् ॥'
(स्व०तं० ११।२३७) इति ।

अन्यदिति, महोजनस्तपःसंज्ञम् ॥ १४० ॥

ननु सर्वेषां भुवनेश्वराणामधोऽध एव सर्वत्र सृष्टिसंहारकारित्वं श्रूयते; वक्ष्यते च पुरस्तात्तदिदं पुनः कस्मादन्यथोक्तम्—इत्याशङ्क्याह—

निरयेभ्यः पुरा कालवह्नेर्व्यक्तिर्यतस्ततः ॥ १४१ ॥
विभुरधःस्थितोऽपीश इति श्रीरौरवं मतम् ।

अस्य खलु निरयेभ्यः पूर्वं सृष्टिरिति तदधोऽवस्थानं न तु तदपकर्षात्; अतश्च तदधःस्थितोऽपि विभुर्व्यापकत्वादूर्ध्वमपि संहारादौ स्वामीत्यर्थः । न चैतदस्माभिः स्वोपज्ञमेवोक्तमित्याह—'इति श्रीरौरवं मतम्' इति । तदुक्तम् तत्र—

'नरकाणामधः पूर्वं व्यक्तिरस्योपजायते ।
सर्वस्थानोऽपि संस्तस्मादधःस्थ इव लक्ष्यते ॥' इति ॥ १४१ ॥

तीनलोक = नरक से लेकर भू र्भुवः स्व तक । जैसा कि कहा गया है—

"हे देवि ! वह (= कालवह्नि की ज्वाला) नरकों और पातालों को चारो तरफ से जला देती है । भू भुर्वः स्वः पदों के अन्त में वर्त्तमान तीन लोकों को भी जलाती है ।" (स्व. तं. ११।२३७)

अन्यत् = महः जनः तप, नाम वाले ॥ १४० ॥

प्रश्न—सभी भुवनेश्वरों को नीचे-नीचे ही सर्वत्र सृष्टिसंहारकारी सुना जाता है और आगे कहा भी जायगा तो यह दूसरी प्रकार कैसे कहा गया ?—यह शङ्का कर कहते हैं—

चूँकि पहले कालाग्नि का प्राकट्य नरकों से ही होता है इसलिए नीचे रहने वाले भी विभु (होने के कारण) ईश्वर है—यह रौरव का मत है ॥ -१४१-१४२- ॥

इस (= कालवह्नि) की सृष्टि पहले नरकों से ही होती है इस कारण उनकी नीचे स्थिति रहती है न कि अपकर्ष के कारण । और इसीलिए वे नीचे रहकर भी विभु = व्यापक होने के कारण ऊपर भी संहार आदि के विषय में स्वामी हैं । यह हमने अपनी बुद्धि से नहीं कहा है—यह कहते हैं—श्री रौरव का मत है । वही वहाँ कहा गया है—

"पहले इसका प्राकट्य नरकों के नीचे होता है । इसलिए सभी स्थानो में रहते हुए भी यह नीचे स्थित मालुम होता है ॥ १४१ ॥

न केवलमेवं विश्वमास्ते यावदेकार्णवीभावेऽपि—इत्याह—

ब्रह्मनिःश्वासनिर्धूते भस्मनि स्वेदवारिणा ॥ १४२ ॥
तदीयेनाप्लुतं विश्वं तिष्ठेत्तावन्निशागमे ।

ननु यद्येवं तत्तदा तेषां भुवनानामीश्वरास्तद्वासिनो वा जीवाः कुत्रासते?—इत्याशङ्क्याह—

तस्मिन्निशावधौ सर्वे पुद्गलाः सूक्ष्मदेहगाः ॥ १४३ ॥
अग्निवेगेरिता लोके जने स्युर्लयकेवलाः ।
कूष्माण्डहाटकाद्यास्तु क्रीडन्ति महदालये ॥ १४४ ॥

'सूक्ष्मदेहगाः' पुर्यष्टकरूपाः । तुशब्दो व्यतिरेके । अत एव क्रीडन्तीत्युक्तम् ॥ १४४ ॥

निशाक्षये पुनः किं स्यात् ?—इत्याशङ्क्याह—

निशाक्षये पुनः सृष्टिं कुरुते तामसादितः ।

तामसादित इति, यदुक्तम्—

'प्रथमं तामसीं सृष्टिं करोति तमसोत्कटाम् ।' (स्व.तं. ११।२४४)

विश्व केवल इसी प्रकार नहीं रहता बल्कि एक समुद्र के रूप में भी रहता है—यह कहते हैं—

ब्रह्मनिःश्वास के द्वारा जब भस्म उड़ा दी जाती है तब उस (= ब्रह्म) के पसीने के जल से आप्लुत यह विश्व रात्रि के आगमन काल में स्थित रहता है ॥ -१४२-१४३- ॥

प्रश्न—यदि वह (= विश्व) ऐसा रहता है तो भुवनों के ईश्वर या उनमें रहने वाले जीव कहाँ रहते हैं ?—यह शङ्का कर कहते हैं—

उस रात्रि काल में सभी जीव सूक्ष्मदेह में स्थित हो अग्निवेग से प्रेरित होकर जन लोक में प्रलयकेवली के रूप में रहते हैं । और कूष्माण्ड हाटक आदि महत् लोक में खेलते हैं ॥ -१४३-१४४ ॥

सूक्ष्मदेहस्थ = पुर्यष्टकारूप वाले । 'तु' शब्द व्यतिरेक अर्थ में है । इसीलिये 'खेलते हैं'—ऐसा कहा गया है ॥ १४४ ॥

रात्रि समाप्त होने पर क्या होता है ?—यह शङ्का कर कहते हैं—

रात्रि बीत जाने पर (ब्रह्मा) पुनः तामसी सृष्टि करते हैं ॥ १४५- ॥

पहले तामसी । जैसा कि कहा गया है—

'अन्धकार के कारण पहले (ब्रह्मा) विकट तामसी सृष्टि करते हैं ।'

इत्युपक्रम्य

'तमोरज:समावेशान्मानवान्स सृजेत्पुन: ।
रज:सत्त्वसमाविष्ट: सृजेन्मुनिवरेश्वरान् ॥
गतनिद्र: प्रबुद्ध: स सत्त्वाविष्टो जगत्पति: ।
सृजेद्देवान्सलोकांश्च पूर्वयैव व्यवस्थया ॥'
(स्व०तं० ११।२४६) इति ॥

एवं प्रत्यहं कुर्वतो मन्वन्तराष्टाविंशत्यात्मकाहोरात्रकलनया स्वकवर्षशतान्तेऽस्य संहार:—इत्याह—

स्वकवर्षशतान्तेऽस्य क्षयस्तद्वैष्णवं दिनम् ॥ १४५ ॥
रात्रिश्च तावतीत्येवं विष्णुरुद्रशताभिधा: ।
क्रमात्स्वस्वशतान्तेषु नश्यन्त्यत्राण्डलोपत: ॥ १४६ ॥

एतदेव यथोत्तरमतिदिशति 'तदित्यादिना' । तद् ब्राह्मं वर्षशतम् । 'अण्डलोपत:' इत्यण्डलोपमवधिं कृत्वा, तेन तन्नाशाद्ब्रह्माण्डोऽपि नश्यतीत्यर्थ:। तदुक्तम्—

'विष्णोश्च तद्दिनं प्रोक्तं रात्रिर्वै तत्समा भवेत् ।

इस प्रकार प्रारम्भ कर

"वह (= ब्रह्मा) तमस् एवं रजस् के समावेश से मनुष्यों की सृष्टि करता है। रजस् एवं सत्त्व में समाविष्ट होकर श्रेष्ठ मुनि लोगों की रचना करता है । निद्रा बीत जाने पर जागने के बाद सत्त्व में समाविष्ट वह प्रजापति पूर्वव्यवस्था के अनुसार लोकों के सहित देवताओं की सृष्टि करता है" ॥ १४५ ॥ (स्व. तं. ११।२४६)

प्रति दिन इस प्रकार का कृत्य करने वाले इस (प्रजापति) का २८ मन्वन्तर रूप एक दिन रात्रि की कल्पना (जीवित रहने के बाद) से अपने एक सौ वर्ष के अन्त में इस की मृत्यु हो जाती है—यह कहते हैं—

अपने एक सौ वर्ष के अन्त में इस (= ब्रह्मा) की मृत्यु हो जाती है । वह विष्णु का एक दिन होता है । और एक सौ रुद्र क्रमश: अपने-अपने सौ वर्षों के अन्त में (अपने) अण्ड के लोप के साथ नष्ट हो जाते हैं ॥ -१४५-१४६ ॥

यही बात 'तद्' इत्यादि के द्वारा क्रमश: आगे भी बतलाते हैं । तत् = ब्रह्मा का एक सौ वर्ष । अण्डलोपत: = अण्डलोप को सीमा मान कर । इससे उस (ब्रह्मा) का नाश होने से ब्रह्माण्ड भी नष्ट हो जाता है । वही कहा गया है—

"वह विष्णु का एक दिन कहा गया है । (उनकी) रात्रि भी उतनी ही होती

अनेन परिमाणेन तस्याब्दं तु विधीयते ॥
वर्षाणां च शते पूर्णे सोऽपि याति परे लयम् ।
विष्णोरायुर्यदेवोक्तं रुद्रस्यैतद्दिनं प्रिये ॥'
(स्व०तं० ११।२६३) इति ।

'वत्सराणां शते पूर्णे शतरुद्रदिनक्षयात् ।
सोऽपि याति परं स्थानं...................... ॥'
(स्व०तं० ११।२७१) इति ।

'शतरुद्राश्च देवेशि स्वाब्दानां तु शतात्यये ।
ते प्रयान्ति परं तत्त्वं ततोऽण्डं च विनश्यति॥'
(स्व०तं० ११।२७३)

इति च । अण्डनाशाच्च कालाग्निरुद्रस्यापि नाशः—इत्यर्थसिद्धम् । यदुक्तम्—

'ततः कालाग्निरुद्रश्च कालतत्त्वे लयं व्रजेत् ।'
(स्व०तं० ११।२७७) इति ॥ १४६ ॥

अव्यक्तान्तमपीयमेव व्यवस्था—इत्याह—

अबाद्यव्यक्ततत्त्वान्तेष्वित्थं वर्षशतं क्रमात् ।
दिनरात्रिविभागः स्यात् स्वस्वायुःशतमानतः ॥ १४७ ॥

है। इस परिमाण से उनके एक वर्ष का विधान होता है । जो विष्णु की आयु कही गई हैं वह रुद्र का एक दिन कहा गया है ।" (स्व. तं.११।२६२)

"सौ रुद्रों का दिन नष्ट होने से जब एक सौ वर्ष पूरा हो जाता है तो वह भी पर पद को प्राप्त होता है ।" (स्व. तं. ११।२७१)

"हे देवीश्वरि ! अपने सौ वर्षों के बीत जाने पर वे पर तत्त्व में विलीन हो जाते हैं और फिर (उनके द्वारा अधिष्ठित) मायाण्ड भी नष्ट हो जाता है ।" (स्व. तं. ११।२७३)

अण्ड का नाश होने से कालाग्नि रुद्र का भी नाश हो जाता है—यह बात अर्थात् सिद्ध है । जैसा कि कहा गया है—

"इसके बाद कालाग्निरुद्र भी कालतत्त्व में लीन हो जाते हैं ।" (स्व. तं. ११।२७७) ॥ १४६-१४६ ॥

अव्यक्त तक यही व्यवस्था है—यह कहते हैं—

जल तत्त्व से लेकर अव्यक्त तत्त्व तक के विषय में इसी प्रकार क्रमशः एक सौ वर्ष का अपनी-अपनी आयु के एक सौ परिमाण से दिन और रात्रि का विभाग होता है ॥ १४७ ॥

एवं व्यवस्थयाव्यक्तस्थानां कियन्मानं दिनं भवेत्—इत्याशङ्क्याह—

ब्रह्मणः प्रलयोल्लाससहस्त्रैस्तु रसाग्निभिः ।
अव्यक्तस्थेषु रुद्रेषु दिनं रात्रिश्च तावती ॥ १४८ ॥

रसाग्निभिरिति, षट्त्रिंशता । ब्रह्मण इति, बुद्धितत्त्वस्थस्य न तु सत्यलोकस्थस्य; नहि तदायुष्कलनयैतत्कलयितुमेव शक्यमिति भावः । तेन बुद्धितत्त्वस्थस्य ब्रह्मणो गुणतत्त्वशतरुद्रदिनान्ते संहारस्तद्दिनारम्भे च सृष्टिः—इति तदीयेऽब्दे तस्य सषष्टिशतत्रयं प्रलयोल्लासा भवन्ति, ते च शतेन गुणिताः षट्त्रिंशत्सहस्त्रसंख्याका भवेयुरित्युक्तं 'रसाग्निभिः प्रलयोल्लाससहस्त्रैरिति । तावद्गुणपरीमाणं च गुणतत्त्ववासिनां रुद्राणामायुर्यदव्यक्तस्थानां दिनमित्युक्तम् 'अव्यक्तस्थेषु दिनं रात्रिश्च तावती' इति । यदुक्तम्—

'षट्त्रिंशत्तु सहस्त्राणि ब्रह्मणां प्रलयोद्भवाः ।
अव्यक्ते च दिनं प्रोक्तं रुद्राणां तन्निवासिनाम् ॥'
(स्व०तं० ११।२८९) इति ।

अस्याश्च व्यवस्थायाः शक्तितत्त्वान्तमविशेषेऽप्यव्यक्तान्तमेवमतिदेशस्येदमेव प्रयोजनं यदत्र गुणतत्त्ववर्तिरुद्रायुरपेक्षया दिनमानस्य संख्यानैयत्यमुत्पन्नमिति ॥ १४८ ॥

इस व्यवस्था के अनुसार अव्यक्त में रहने वालों का कितना बड़ा दिन होता है ?—यह शङ्का कर कहते हैं—

ब्रह्मा के ३६ हजार प्रलय और सृष्टि (का काल) अव्यक्त में वर्त्तमान रुद्रों का एक दिन होता है और उतनी ही रात्रि होती है ॥ १४८ ॥

रसअग्नि = ३६ । ब्रह्मा का = बुद्धितत्त्व में रहने वाले (ब्रह्म) का न कि सत्य लोक में रहने वाले का । क्योंकि उस (सत्यलोकस्थ ब्रह्मा) की आयु गणना के द्वारा इस (= बुद्धितत्त्वस्थ ब्रह्म की आयु) की गणना सम्भव नहीं है । इस कारण बुद्धितत्त्व में वर्त्तमान ब्रह्म का गुणतत्त्वस्थ रुद्र के एक दिन के अन्त में संहार और उस दिन के आरंभ में सृष्टि होती हैं । इस प्रकार उसके एक वर्ष में ३६० सृष्टि और प्रलय होते हैं । और उनको एक सौ से गुणा करने पर ३६ हजार संख्या वाले (सृष्टि और प्रलय) होते हैं, इसलिए कहा गया—"रसाग्नि.............सहस्त्रैः" । गुण तत्त्व में रहने वाले रुद्रों की उतने गुणा परिमाण वाली आयु अव्यक्त मे रहने वालों का एक दिन होता है । इसलिए कहा गया—"अव्यक्तस्थेषु ....तावती" । जैसा कि कहा गया है—"ब्रह्मा के ३६ हजार सृष्टि और प्रलय अव्यक्त में रहने वाले रुद्रों का एक दिन कहा गया है ।" (स्व.तं. ११।२८९)

इस व्यवस्था के शक्तितत्त्वपर्यन्त समान होने पर भी अव्यक्त तक ही ऐसा अतिदेश करने का यह प्रयोजन है कि गुणतत्त्व में रहने वाले रुद्रों की आयु की

अत्र च सृष्टिसंहारादौ कस्याधिकार:—इत्याशङ्क्याह—

तदा श्रीकण्ठ एव स्यात्साक्षात्संहारकृत्प्रभुः ।
सर्वे रुद्रास्तथा मूले मायागर्भाधिकारिणः ॥ १४९ ॥
अव्यक्ताख्ये ह्याविरिञ्चाच्छ्रीकण्ठेन सहासते ।

साक्षान्न तु विरिञ्चादिमुखेन, यतस्तदानीं विरिञ्चात्प्रभृति प्रकृतिगर्भाधिकारिण: सर्व एव तत्तद्भुवनेश्वररूपा रुद्रा अव्यक्ताख्ये मूले प्रकृतितत्त्वे श्रीकण्ठेन सहासते अर्थाच्छ्रीकण्ठनाथमेव नायकतया प्रधानीकृत्य तिष्ठन्तीत्यर्थ: । यदुक्तम्—

'प्रजा: प्रजानां पतय: पितरो मानवै: सह ।
सांख्यज्ञानेन ये सिद्धा वेदेन ब्रह्मवादिन: ॥
छन्द:सामानि चोङ्कारो बुद्धिस्तद्देवता: प्रिये ।
अह्नि तिष्ठन्ति ते सर्वे परमेशस्य धीमत: ॥' इति ॥ १४९ ॥

ननु

'महाकल्पस्य पर्यन्ते ब्रह्मा याति परे लयम् ।'

(स्व० ११।२६१)

इत्याद्युक्त्या तस्य परशिवे लय उक्तस्तत्कथमसावास्ते ?—इत्याशङ्क्याह—

अपेक्षा दिनमान की संख्या निश्चित है ॥ १४८ ॥

यहाँ सृष्टि संहार आदि में किसका अधिकार है?—यह शङ्का कर कहते हैं—

उस समय भगवान् श्रीकण्ठ ही साक्षात् संहारकर्त्ता होते हैं । तब ब्रह्म से लेकर माया में गर्भ के अधिकारी सभी रुद्र अव्यक्त नामक मूल (प्रकृति) में श्रीकण्ठ के साथ निवास करते हैं ॥ १४९-१५०- ॥

साक्षात् न कि ब्रह्मा आदि के द्वारा, क्योंकि उस समय ब्रह्मा से लेकर प्रकृति के गर्भ में रहने वाले सभी भिन्न-भिन्न भुवनों के स्वामी रुद्र अव्यक्त नामक मूल प्रकृतितत्त्व में श्रीकण्ठ के साथ रहते हैं । अर्थात् श्रीकण्ठनाथ ही नायक के रूप में प्रधान रूप से रहते हैं । जैसा कि कहा गया है—

"हे प्रिये ! प्रजायें, प्रजाओं के स्वामी, मनुष्यों के साथ पितृगण, सांख्यज्ञान के द्वारा सिद्ध, वेद के द्वारा ब्रह्मवादी, छन्द, साम, ओंकार, बुद्धि और उसके देवता, श्री मान् परमेश्वर के दिन में रहते हैं" ॥ १४९-१५०- ॥

प्रश्न—

"महाकल्प के अन्त में ब्रह्मा परतत्त्व में लीन हो जाते हैं ।"(स्व. ११।२६१)

इत्यादि उक्ति के अनुसार उनका पर शिव में लय कहा गया है तो कैसे वे (जीवित) रहतें हैं ?—यह शङ्का कर कहते हैं—

निवृत्ताधःस्थकर्मा हि ब्रह्मा तत्राधरे धियः ॥ १५० ॥
न भोक्ता ज्ञोऽधिकारे तु वृत्त एव शिवीभवेत् ।
स एषोऽवान्तरलयस्तत्क्षये सृष्टिरुच्यते ॥ १५१ ॥

यद्यसाववृत्तपरशक्तिपातस्तद्बुध्यधोनिवृत्तकर्मतया भोगाभावात्तत्र भोक्ता न भवेत् —इत्यत्रैवास्ते, अन्यथा पुनर्यदि ज्ञानी साक्षात्कृतात्मतत्त्वः स्यात् अधिकार-निवृत्त्यनन्तरं स 'शिवीभवेत्' तदैकात्म्येनैव प्रस्फुरेदित्यर्थः । एवमन्येषामपि ज्ञेयम् । अवान्तरलय इति, ब्रह्माण्डलयस्योक्तत्वात्प्रकृत्यण्डलयस्य च वक्ष्यमाण-त्वात् ॥ १५१ ॥

नन्वत्र

'बुद्धितत्त्वे स्थिता बौद्धा गुणेष्वप्यार्हताः स्थिताः ।
स्थिता वेदविदः पुंसि त्वव्यक्ते पाञ्चरात्रिकाः ॥'

इत्याद्युक्त्या केचिदात्मानो मुक्ताः संभवन्ति, केचिच्च बद्धास्तत्कथम-विशेषेणैवोक्तं 'तत्क्षये सृष्टिरुच्यते' इति । नहि मुक्तात्मनां पुनः संसृतिः स्यात्? —इत्याशङ्क्याह—

सांख्यवेदादिसंसिद्धाञ्छ्रीकण्ठस्तदहर्मुखे ।

वहाँ बुद्धि के अधोवर्त्ती कर्मों को समाप्त करने वाले ब्रह्मा भोक्ता नहीं होते । ज्ञानी होने के बाद अधिकार से निवृत्त होकर शिवभाव को प्राप्त हो जाते हैं । यह उनका अवान्तर लय हैं । उसका नाश होने पर सृष्टि होती हैं ॥ -१५०-१५१ ॥

यदि वे (ब्रह्मा) ऐसे हैं जिस पर शक्तिपात नहीं हुआ है तो बुद्धितत्त्व के नीचे वाले कर्म से निवृत्त होने के कारण भोग न होने से वे भोक्ता नहीं होते— इसलिए यहीं (= प्रकृति तत्त्व में) रहतें हैं । अन्यथा यदि ज्ञानी = आत्मतत्त्व का साक्षात् कर लेते हैं तो अधिकारनिवृत्ति के बाद शिव हो जाते हैं = उनसे अभिन्न रूप में स्फुरित होते हैं । इसी प्रकार दूसरे देवताओं के बारे में जानना चाहिए । अवान्तरलय = ब्रह्माण्डलय के उक्त और प्रकृत्यण्डलय के वक्ष्यमाण होने से ॥ १५१ ॥

प्रश्न—

"बौद्धलोग बुद्धि तत्त्व में, जैन गुणों में, वेद के विद्वान् पुरुष तत्त्व में और पाञ्चरात्रिक अव्यक्त में स्थित होते हैं ।"

इत्यादि उक्ति के द्वारा कुछ आत्माएं मुक्त मालुम होती हैं और कुछ बद्ध, तो कैसे सामान्य रूप से यह कह दिया गया कि 'उसका क्षय होने के बाद सृष्टि नहीं होती' क्योंकि मुक्त आत्माओं की सृष्टि नहीं होती ?—यह शङ्का कर कहते हैं—

सृजत्येव पुनस्तेन न सम्यङ् मुक्तिरीदृशी ॥ १५२ ॥

इदानीं पूर्वोक्तयैव नीत्या यथोत्तरं वृद्धिक्रमेण दिनादिव्यवस्थामतिदेशद्वारेण दर्शयति 'प्रधाने' इत्यादिना 'सामनसे पदे' इत्यन्तम्—

प्रधाने यदहोरात्रं तज्जं वर्षशतं विभोः ।
श्रीकण्ठस्यायुरेतच्च दिनं कञ्चुकवासिनाम् ॥ १५३ ॥
तत्क्रमान्नियतिः कालो रागो विद्या कलेत्यमी ।
यान्त्यन्योन्यं लयं तेषामायुर्गाहनिकं दिनम् ॥ १५४ ॥
तद्दिनप्रक्षये विश्वं मायायां प्रविलीयते ।
क्षीणायां निशि तावत्यां गहनेशः सृजेत्पुनः ॥ १५५ ॥
एवमव्यक्तकालं तु परार्धैर्दशभिर्जहि ।
मायाहस्तावती रात्रिर्भवेत्प्रलय एष सः॥ १५६ ॥
मायाकालं परार्धानां गुणयित्वा शतेन तु ।
ऐश्वरो दिवसो नादः प्राणात्मात्र सृजेज्जगत् ॥ १५७ ॥
तावती चैश्वरी रात्रिर्यत्र प्राणः प्रशाम्यति ।

अहोरात्रमिति, गुणतत्त्ववर्तिरुद्रायुरपेक्षया ब्राह्मप्रलयोल्लासद्वासप्ततिसहस्र-

---

सांख्य वेद आदि (की दृष्टि से) मुक्त (आत्माओं की) श्रीकण्ठ भगवान् उस दिन के प्रारम्भ में, पुनः सृष्टि करते ही हैं । इस कारण ऐसी (मुक्ति) सम्यक् मुक्ति नहीं हैं ॥ १५२ ॥

अब पहले कहे गए नियम के ही अनुसार उत्तरोत्तर वृद्धि के क्रम से दिन आदि की व्यवस्था को वर्णन के द्वारा 'प्रधाने' से लेकर 'सामनसे पदे' (श्लोक सं० १५३ से १६५) तक दिखलाते हैं—

प्रधानतत्त्व में जो दिन और रात्रि है उससे बने हुए एक सौ वर्ष व्यापक श्रीकण्ठ की आयु है और यह कञ्चुक मे रहने वालों का एक दिन हैं । वह (= कञ्चुक) क्रमशः नियति, काल, राग, विद्या और कला ये (पाँच है) वे एक दूसरे में लीन होती है । उनकी आयु गहनेश का एक दिन होता है । उस दिन का क्षय होने पर विश्व माया में लीन हो जाता है । उतनी ही लम्बी रात्रि के बीत जाने पर गहनेश पुनः सृष्टि करते हैं । इस प्रकार अव्यक्त काल को दश परार्ध से गुणा करने पर (जो गुणन फल है) उतना बड़ा मायीय दिन और उतनी ही बड़ी रात्रि होती है । यह प्रलय हैं । माया के काल को एक सौ परार्ध से गुणा करने पर ईश्वर का एक दिन होता है । इसमें प्राणस्वरूप नाद संसार की सृष्टि करता है । उतनी ही लम्बी ईश्वरीय रात्रि होती है जिसमें प्राण विश्राम करता है ॥ १५३-१५८- ॥

संख्याकम् । तज्जमिति, षष्ट्यधिकेन शतत्रयेण गुणयित्वा इत्यर्थः । एतदिति, वर्षशतपरीमाणं श्रीकण्ठीयमायुः । कञ्चुकवासिनामित्यर्थान्नियतितत्त्वस्थानां वामदेवादीनां न तु कालतत्त्वादिगतानामपि; तदपेक्षया हि कालतत्त्वादौ यथोत्तरं वृद्ध्यादिव्यवस्था संभवेत्, अत एव 'क्रमादन्योन्यं लयं यान्ति' इत्युक्तम् । आगमोऽप्येवं—

'ततो नियतिकालौ च रागो विद्या कला तथा।
परस्परं लयं यान्ति क्रमात्सर्वे स्वमानतः ॥'

(स्व०तं० ११ ।२९२) इति ।

तेषामिति, कलातत्त्वस्थानां महादेवादीनां न तु सर्वेषां कञ्चुकवासिनां; तथात्वे हि गाहनिकं दिनमव्यक्तकालसंख्यामपेक्ष्य पञ्चदशस्थानावस्थितेन दशगुणेन परार्धेन वक्ष्यमाणं गुणनं सङ्गतिमियात् । तत्सर्वेषामेव कञ्चुकवासिनां यथोत्तरमायुषो वृद्धया गाहनिकस्य दिनस्यानवच्छिन्नसंख्याप्रतिपादनार्थमेवं वक्ष्यमाणं सङ्गच्छते—इत्यलं बहुना । गणना तु ग्रन्थविस्तरभयान्न लिखिता—इति स्वयमेवाभ्यूह्या । तावत्यामिति, वक्ष्यमाणदिनसमानायाम् । जहीति गुणयेत्यर्थः । यदुक्तम्—

'प्राधानिकपरार्धेन दशधा गुणितेन च ।
माया संहरते सर्वं पुनश्चैव सृजेज्जगत् ॥

दिन रात्रि—गुणतत्त्व में रहने वाले रुद्र की आयु की अपेक्षा ७२ हजार संख्या वाला ब्रह्मा का प्रलयोल्लास । उससे उत्पन्न होने वाला अर्थात् उसमें तीन सौ साठ का गुणा करने पर । यह = एक सौ वर्ष परिमाण वाली श्रीकण्ठ की आयु । कञ्चुक में रहने वाले अर्थात् नियतितत्त्व में रहने वाले वामदेव आदि का न कि कालतत्त्व आदि में रहने वालों का भी; क्योंकि उनकी अपेक्षा कालतत्त्व आदि में उत्तरोत्तर वृद्धि आदि की व्यवस्था होगी इसलिए 'क्रमशः अन्योऽन्य में लीन हो जाते हैं'—ऐसा कहा गया। आगम भी ऐसा ही है—

"इसके बाद नियति काल राग विद्या और कला ये सब अपने-अपने परिमाण के अनुसार परस्पर लीन हो जाते हैं ।" (स्व. तं. ११।२९२)

उनका = कलातत्त्व में रहने वाले महादेव आदि का न कि सभी कञ्चुकवासियों का । क्योंकि वैसा होने पर ही गहनेश का दिन जिसका अव्यक्त काल की संख्या के आधार पर पन्द्रह स्थान में स्थित दश गुने परार्ध से आगे किया जाने वाला गुणन सङ्गत होता है । तो सभी कञ्चुकवासियों की उत्तरोत्तर आयु की वृद्धि से गहनेश के दिन की असीम संख्या को बतलाने के लिए ही वक्ष्यमाण सङ्गत होगा । अब बहुत कहने से क्या लाभ । ग्रन्थ के विस्तार के भय से गणना नही लिखी गई—अतः उसे स्वयं समझ लेना चाहिए । उतनी = आगे कहे जाने वाले दिन के समान । जहि = गुणा करो । जैसा कि कहा गया है—

"प्रधान की परार्ध संख्या को दश से गुणा करने पर (जो गुणनफल आता है

मायाकालपरार्धस्य शतधा गुणितस्य च।
ईश्वर: कुरुते सृष्टिं संहरेच्च पुन: सृजेत् ॥'

(स्व०तं० ११।२९७) इति ।

अनेन चात्रोत्तरोत्तरं काल: प्रकृष्यते—इत्युक्तं स्यात्; एवमुत्तरत्रापि ज्ञेयम् । 'नाद' इति बहिरुन्मेषरूपतया नदनस्वभाव ईश्वर: । प्राणात्मेति, प्राणप्रमातृत्वात् । प्रशाम्यतीति, अत ऊर्ध्वं प्राणस्य प्राधान्याभावात्, विश्वमिति तस्याप्यहन्तायां विश्रान्ते: ॥ १५७ ॥

न केवलमात्र नादात्मन: प्राणस्यैव प्रशमो यावद् बिन्द्वाद्यात्मिकाया: संविदोऽपि भविष्यति—इत्याह—

प्राणगर्भस्थमप्यत्र विश्वं सौषुम्नवर्त्मना ॥ १५८ ॥
प्राणे ब्रह्मबिले शान्ते संविद्याप्यवशिष्यते ।
अंशांशिकातोऽप्येतस्या: सूक्ष्मसूक्ष्मतरो लय:॥ १५९ ॥
गुणयित्वैश्वरं कालं परार्धानां शतेन तु ।
सदाशिवं दिनं रात्रिर्महाप्रलय एव च ॥ १६० ॥
सदाशिव: स्वकालान्ते बिन्द्वर्धेन्दुनिरोधिका: ।
आक्रम्य नादे लीयेत गृहीत्वा सचराचरम् ॥ १६१ ॥

उस परिमाण के काल से) माया सबका संहार करती है और फिर सृष्टि करती हैं।'' मायाकाल के परार्ध को एक सौ से गुणा करने से (उस काल के बाद) ईश्वर सृष्टि, संहार और पुन: सृष्टि करते हैं । (स्व. तं. ११।२९७)

इससे यहाँ उत्तरोत्तर काल का प्रकर्ष है—यह कहना चाहिए । इसी प्रकार आगे भी समझना चाहिये । 'नाद' = बाह्य उन्मेष रूप होने से नदनस्वभाव वाले ईश्वर । प्राणात्मा प्राणप्रमाता होने से । प्रशान्त होता है—क्योंकि उसके बाद प्राण की प्रधानता नहीं रहती। विश्व—क्योंकि उसकी भी अहन्ता में विश्रान्ति हो जाती है ॥ १५७ ॥

यहाँ केवल नादरूप प्राण का ही प्रशम नहीं अपितु बिन्दु आदि रूप वाली संविद् का भी हो जायगा—यह कहते हैं—

यहाँ प्राण के गर्भ में स्थित विश्व, सुषुम्णा के रास्ते प्राण के ब्रह्मरन्ध्र में शान्त हो जाने पर (शान्त हो जाता है) । तब शुद्ध विद्या शेष रह जाती है । इसका भी अंशांशी रूप में सूक्ष्म सूक्ष्मतर लय होता है । ईश्वर (की आयु) के काल को एक सौ परार्ध से गुणा करने पर सदाशिव का एक दिन होता है । यही महा प्रलय हैं। सदाशिव अपने काल के अन्त में बिन्दु अर्धचन्द्र और रोधिनी को आक्रान्त कर चराचर को लेकर नाद में

नादो नादान्तवृत्त्या तु भित्त्वा ब्रह्मबिलं हठात्।
शक्तितत्त्वे लयं याति निजकालपरिक्षये ॥ १६२ ॥
एतावच्छक्तितत्त्वे तु विज्ञेयं खल्वहर्निशम् ।
शक्तिः स्वकालविलये व्यापिन्यां लीयते पुनः ॥ १६३ ॥
व्यापिन्या तद्दिवारात्रं लीयते साप्यनाश्रिते ।
परार्धकोट्या हत्वापि शक्तिकालमनाश्रिते ॥ १६४ ॥
दिनं रात्रिश्च तत्काले परार्धगुणितेऽपि च ।
सोऽपि याति लयं साम्यसंज्ञे सामनसे पदे ॥ १६५ ॥

महाप्रलय इति, शुद्धाध्वनोऽपि संहरणात् । तदुक्तम्—

'ततः सदाशिवो देवः स्वमानेन च संहरेत् ।
सृजते च पुनर्भूय आत्मीये देव्यहर्मुखे ॥
महाप्रलय एवोक्तः सादाख्ये तु दिनक्षये ।'
(स्व०तं० ११।२९८) इति ।

'बिन्दुं चैवार्धचन्द्रं च भित्त्वा चैव निरोधिकाम् ।
नादतत्त्वे लयं याति गृहीत्वा सचराचरम् ॥'
(स्व०तं० ११।३००) इति ।

नादानुवृत्त्येति, नादान्तभूमिकामासाद्येत्यर्थः । यदुक्तम्—

लीन हो जाते हैं । नाद भी अपने काल का क्षय होने पर नादान्त वृत्ति के द्वारा ब्रह्मबिल का हठात् भेदन कर शक्तितत्त्व में लीन हो जाता है । शक्तितत्त्व में इतना दिन रात समझना चाहिए । अपना कालक्षय होने पर शक्ति पुनः व्यापिनी में लीन हो जाती है । व्यापिनी के साथ उसका दिन रात भी लीन हो जाता है । वह भी अनाश्रित (शिव) में लीन हो जाती है। शक्ति के काल को परार्ध कोटि से गुणा करने पर अनाश्रित शिव का एक दिन रात होता है । उस काल को परार्ध से गुणा करने पर साम्य नामक समनाः स्तर होता है जिसमें वह (अनाश्रित शिव) भी लीन हो जाते हैं ॥ -१५८-१६५ ॥

महाप्रलय—शुद्ध अध्वा का भी संहार होने से । वही कहा—

"हे देवि ! इसके बाद सदाशिव देव अपने प्रमाण से संहार करते हैं और फिर अपने दिन के प्रारम्भ में पुनः सृष्टि करते हैं । सदाशिव के दिन का नाश होने पर महाप्रलय कहा गया है ।" (स्व. तं. ११।२९८)

"बिन्दु अर्धचन्द्र और निरोधिका का भेदन कर चराचर को समेट कर (सदाशिव) नादतत्त्व में लीन हो जाते हैं ।" (स्व. तं. ११।३००)

'नाद: सौषुम्नमार्गेण भित्त्वा ब्रह्मबिलं प्रिये ।
शक्तितत्त्वे लयं याति शक्तितत्त्वदिनक्षये ॥'
(स्व०तं० ११।३०१) इति ।

एतावदिति, सदाशिवायु:संख्यातम् । तदिति, य: शक्तिलयकाल: । परार्ध-कोट्येति, यदुक्तम्—

'शक्तिकालपरार्धस्य कोटिधा गुणितस्य तु ।
अनाश्रितस्य देवस्य दिनमेकं प्रकीर्तितम् ॥'
(स्व०तं० ११।३०३)

सोऽपीत्यनाश्रित: । तदुक्तम्—

'अनेन परिमाणेन परार्धगुणितेन च ।
सोऽपि याति परं स्थानं कारणं समनाश्रयम् ॥'
(स्व०तं० ११।३०४) इति ॥ १६५ ॥

नन्वेवं समनाया अपि लय: कस्मान्नोच्यते—इत्याशङ्क्याह—

स काल: साम्यसंज्ञ: स्यान्नित्योऽकल्य: कलात्मक: ।
यत्तत्सामनसं रूपं तत्साम्यं ब्रह्म विश्वगम् ॥ १६६ ॥

यत: स विश्वकलनाकारी काल: समनाख्या येयं कलाशक्तिस्तदात्मकोऽत

नादान्तवृत्ति के द्वारा = नादान्त भूमिका को प्राप्त कर । जैसा कि कहा गया है—

"नाद सुषुम्ना के मार्ग से ब्रह्मबिल का भेदन कर, शक्तितत्त्व के दिन के क्षीण हो जाने पर शक्तितत्त्व में लीन हो जाता है ।" (स्व. तं. ११।३०१)

एतावत् = सदाशिव की आयु की संख्या वाला । वह = जो शक्तिलय का काल है । परार्ध कोटि से—जैसा कि कहा गया है—

"शक्तिकाल के परार्ध को एक करोड़ से गुणा करने पर अनाश्रित देव (= सदाशिव) का एक दिन कहा गया है ।" (स्व. तं. ११।३०३)

वह भी = अनाश्रित भी । वही कहा गया है—

"परार्ध से गुणा किए गए इस परिमाण से वह भी समना वाले पर कारण में लीन हो जाता है" ॥ १५९-१६६ ॥ (स्व. तं. ११।३०४)

प्रश्न—समना का भी लय क्यों नहीं कहा जाता ?—यह शङ्का कर कहते हैं—

वह काल साम्य संज्ञा वाला, नित्य, कलाहीन कलाशक्ति रूप हैं । जो वह समना का रूप है वह साम्य तथा विश्व में व्याप्त ब्रह्म हैं ॥ १६६ ॥

एव नित्यो, न ह्यस्याः समनाख्यायाः शक्तेर्महाप्रलयेऽपि नाशः—इत्याशयः । यदभिप्रायेणैवान्यैः 'शंभुः पुरुषो माया नित्यम्' इत्याद्युक्तम् । अत एव पृथिव्यादेरनाश्रितान्तस्य विश्वस्याभेदात्मना साम्येनावस्थानात्साम्यशब्दाभिधेयः । अत एव भेदप्रथाया अभावात् 'अकल्यः' कलयितुमशक्य इत्यर्थः । शक्त्यन्तं हि विश्वसंहारे वृत्ते सकलोऽयमणुवर्गः संभूय समनायामेवास्ते—इत्याह—'यत्तत्सामनसं रूपं तद्विश्वगं साम्यम्' इति । न चैवमपि भेदवादिवदिदं परस्माद् ब्रह्मणोऽतिरिक्तमित्युक्तं 'ब्रह्म' इति, परब्रह्मरूपमित्यर्थः । तदुक्तम्—

'स कालः साम्यसंज्ञश्च जन्ममृत्युभयापहः ।
तस्याप्यूर्ध्वममेयस्तु कालः स्यात्परमावधिः ॥
नित्यो नित्योदितो देवि अकल्यश्च न कल्यते ।'
(स्व०तं० ११।३४६) इति ॥ १६६ ॥

न केवलमत्र प्रलयावसरे विश्वस्यावस्थानमेव यावत्सृष्टिर(ष्टाव)पि—इत्याह—

अतः सामनसात्कालान्निमेषोन्मेषमात्रतः ।
तुट्यादिकं परार्धान्तं सूते सैवात्र निष्ठितम् ॥ १६७ ॥

निमेषोन्मेषमात्रत इति, सदाशिवेश्वरदशामधिशयानादित्यर्थः । यदुक्तम्—

क्योंकि वह विश्व की रचना करने वाला काल, समना नाम वाली जो यह कलाशक्ति है, उस रूप वाला है इसीलिए नित्य हैं । इस समना नामक शक्ति का महाप्रलय में भी नाश नहीं होता—यह तात्पर्य है । इसी अभिप्राय से दूसरे लोगों ने 'शम्भु पुरुष, माया नित्य' इत्यादि कहा है । इसलिए पृथ्वी से लेकर अनाश्रित शिवपर्यन्त विश्व के अभेदेन साम्येन स्थित होने से इसका नाम साम्य हैं । इसीलिए भेदविस्तार का अभाव होने से अकल्य = कलना होने में अशक्य है । शक्तिपर्यन्त विश्व का संहार होने पर यह समस्त जीववर्ग सामूहिक रूप से समना में ही रहता है—यह कहते हैं—'जो वह समना का रूप है वह विश्वव्यापी साम्य है ।' इतना होने पर भी भेदवादियों के समान यह परब्रह्म से अतिरिक्त नहीं है—इसलिए कहा गया—ब्रह्म = परब्रह्म रूप। वही कहा गया है—

"हे देवि ! वह काल साम्य नाम वाला जन्ममृत्यु के भय को हटाने वाला है। उसके भी ऊपर अमेय काल हैं जो कि परम अवधि वाला नित्य, नित्योदित और अकल्य समझा जाता है" ॥ १६६ ॥ (स्व. तं. ११।२४६)

यहाँ प्रलयकाल में विश्व की स्थिति ही नहीं रहती बल्कि सृष्टि भी (होती है)—यह कहते हैं—

इसलिए निमेष उन्मेष मात्र से समना के काल से वही इसमें वर्त्तमान तुटि से लेकर परार्ध पर्यन्त की सृष्टि करती है ॥ १६७ ॥

निमेष उन्मेष मात्र से = सदाशिव और ईश्वर की दशा में वर्त्तमान होकर ।

'स चाधः कलयेत्सर्वं व्यापिन्याद्यं धरावधि ।
तुट्यादिभिः कलाभिश्च देव्यध्वानं चराचरम् ॥'
(स्व०तं० ११।३०७) इति ।

अत एव चान्यैरस्मच्छास्त्रप्रक्रियामजानानैः 'शक्त्यन्तं महाप्रलये वृत्ते सकलोऽयमणुवर्गः प्रलयान्त ऊर्ध्वोर्ध्वमवस्थितेरभिधानात्परिशिष्टं शिवतत्त्वमेवासादयेत् । तदासादनमेव च मुक्तिः; तदक्रमेण सर्वेषामनायासमेव सा सिद्ध्येदिति किं शास्त्रानुष्ठानादिना' इत्यादि यच्चोदितं तदुत्थानोपहतमेव । न हि शक्त्यन्तं प्रलयेऽप्येषां शिवतत्व एवावस्थानं समनायामेवमभिधानात्

'समनान्तं वरारोहे पाशजालमनन्तकम् ।' (स्व०तं० ४।४२९)

इत्याद्युक्त्या तदन्तं च बन्ध एव—इति को नाम तत्र मुक्तेरवकाशः । न चैवमपि शंभुवत्समनाया अपि नित्यत्वादभेदवादक्षतिः, भेदमेवाधिकृत्य सृष्टिप्रलयादिव्यवहारस्योत्थानात्; वस्तुतः पुनरभेदवादचर्चा प्रतिपदमिह दर्शिता दर्शयिष्यते च—इत्यलं बहुना ॥ १६७ ॥

एवमुक्तवक्ष्यमाणपरिमाणोपयोगिन्याः संख्यायाः क्रमेण रूपं दर्शयति—

जैसा कि कहा गया है—

"हे देवि ! वह व्यापिनी से लेकर पृथिवीपर्यन्त नीचे-नीचे तुटि आदि और कला आदि से चर एवं अचर सब अध्वा की सृष्टि करता है ।" (स्व. तं. ११।३०७)

इसलिए हमारी शास्त्रप्रक्रिया को न जानने वाले दूसरे लोगों ने जो कहा कि शक्तिपर्यन्त महाप्रलय होने पर यह समस्त जीववर्ग प्रलय के अन्त में ऊपर-ऊपर स्थिति के कथन के कारण अवशिष्ट शिवतत्त्व को ही प्राप्त करेगा । उसको प्राप्त करना ही मुक्ति है, तो बिना क्रम के सब की अनायासेन मुक्ति हो जायगी फिर शास्त्रीय अनुष्ठान करने से क्या लाभ ?—यह कथन तो प्रारम्भ में ही कट गया । क्योंकि शक्तिपर्यन्त प्रलय होने पर भी इनकी शिवतत्त्व में स्थिति नहीं रहती बल्कि समना में रहती है ।

"हे वरारोहे ! यह अनन्तपाशजाल समना तक हैं ।" (स्व. तं. ४।५२९)

इत्यादि उक्ति से वहाँ (= समना) तक बन्धन ही है तो मुक्ति का अवकाश कैसा ? यह भी नहीं हैं कि शम्भु के समान समना के भी नित्य होने से अभेदवाद खण्डित हो जायगा क्योंकि भेद को ही मानकर सृष्टिप्रलय आदि का व्यवहार चलता है । वस्तुतः अभेदवाद की यह चर्चा हर कदम पर दिखलायी गई है और दिखलायी जाएगी—इतना पर्याप्त हैं ॥ १६७ ॥

इस प्रकार उक्त और वक्ष्यमाण परिणाम की उपयोगिनी संख्या का क्रमशः रूप दिखलाते हैं—

दशशतसहस्रमयुतं लक्षनियुतकोटि सार्बुदं वृन्दम् ।
खर्वनिखर्वे शङ्खाब्जजलधिमध्यान्तमथ परार्धं च॥ १६८ ॥

अब्जेति पद्मं, जलधीति सागरः ॥ १६८ ॥

नन्वेवमवस्थानमेषां कथं स्यात् ?—इत्याशङ्क्याह—

इत्येकस्मात्प्रभृति हि दशधा दशधा क्रमेण कलयित्वा ।
एकादिपरार्धान्तेष्वष्टादशसु स्थितिं ब्रूयात् ॥ १६९ ॥

यदुक्तम्—

'एकं दशगुणं पूर्वं शतं दशगुणं तु तत् ।
शतं दशगुणं कृत्वा सहस्रं परिकीर्तितम् ॥
सहस्रं दशधा चैवमयुतं तद्धि कीर्तितम् ।
दशायुतानि लक्षं तु नियुतं दश तानि तु ॥
दश तानि च कोटिः स्याद्दश कोट्यस्तदर्बुदम् ।
अबुदैर्दशभिर्वृन्दं खर्वं दशभिरेव तैः ॥
दशभिस्तन्निखर्वं तु शङ्खः स्याद्दश तानि तु ।
शङ्खुभिर्दशभिः पद्मं दश पद्मानि सागरः ॥
सागरैर्दशभिर्मध्यमन्तस्तैर्दशभिः स्मृतः ।
अन्तं दशाहतं कृत्वा परार्धं तु प्रकीर्तितम् ॥
एवमष्टादशैतानि स्थानानि गणितस्य तु ।' इति ॥ १६९ ॥

दश, सौ, हजार, दश हजार, लाख, दशलाख, करोड़ अर्बुद, वृन्द,खर्व, निखर्व, शङ्ख, अब्ज, जलधि, मध्यान्त और परार्ध ॥ १६८ ॥

अब्ज = पद्म, जलधि = सागर ॥ १६८ ॥

प्रश्न—इनकी इस प्रकार स्थिति कैसे होती है ?—यह शङ्का कर कहते हैं—

इस प्रकार एक से लेकर क्रमशः दश-दश गुना गिनकर एक से लेकर परार्ध पर्यन्त अठारह (सोपानो) में (संख्या की) स्थिति को कहना चाहिए ॥ १६९ ॥

जैसा कि कहा गया है—

''पहले एक को दश गुना, फिर (उसका) दश गुना सौ, सौ को दश गुना करने पर सहस्र कहा गया है । हजार को दश गुना करने पर दश हजार कहा गया है । दश-दश हजार = अयुत (= एक लाख) और वह दश गुना नियुत (= दश लाख) उसका दश गुना करोड़, दश करोड़ का अरब, दश अरब का वृन्द, दश वृन्द का एक खर्व, दश खर्व का एक निखर्व, दश निखर्व का एक शङ्खु,

एवमत्र सृष्टिप्रलयानामानन्त्येऽपि गौणमुख्यभावं दर्शयितुमाह—

चत्वार एते प्रलया मुख्याः सर्गाश्च तत्कलाः ।
भूमूलनैशशक्तिस्थास्तदेवाण्डचतुष्टयम् ॥ १७० ॥

मुख्या इत्यवान्तराणामनन्तानां प्रलयानां सर्गाणां चात्रैवान्तर्भावात् । 'तत्कला' इति तेषां प्रलयानां सर्गाणां च 'कला' पृथिव्यादिभेदचतुष्टयरूपा अंशा इत्यर्थः । तदेवेति, भूमूलादि । तदुक्तम्—

'निजशक्तिवैभवभरादण्डचतुष्टयमिदं विभागेन ।
शक्तिर्माया प्रकृतिः पृथ्वी चेति प्रभावितं प्रभुणा॥'
(प० सा० ४ श्लोक) इति ॥ १७० ॥

अत्रैव स्रष्टृसंहर्तृविभागमपि दर्शयति—

कालाग्निर्भुवि संहर्ता मायान्ते कालतत्त्वराट् ।
श्रीकण्ठो मूल एकत्र सृष्टिसंहारकारकः ॥ १७१ ॥
तल्लयो वान्तरस्तस्मादेकः सृष्टिलयेशिता ।
श्रीमानघोरः शक्त्यन्ते संहर्ता सृष्टिकृच्च सः॥ १७२ ॥

दश शङ्कु का एक पद्म, दश पद्म का एक अन्त, दश अन्त का एक परार्ध कहा गया है । इस प्रकार गणित के अठारह स्थान हैं'' ॥ १६९ ॥

सृष्टि और प्रलयों के अनन्त होने पर भी गौण मुख्य भाव को दिखाने के लिए कहते हैं—

पृथिवीमूल (= प्रकृति) नैश (= माया) और शक्ति में स्थित ये चार मुख्य प्रलय और सृष्टि हैं उनकी कलाएँ ही ये (भूमि आदि) चार अण्ड हैं ॥ १७० ॥

मुख्य—अवान्तर अनन्त प्रलयों और सर्गों का इसी में अन्तर्भाव होने के कारण। तत्कला = उन प्रलयों और सर्गों की कलाएं पृथिवी आदि चार भेद रूप अंश । वही = पृथिवी प्रकृति आदि । वही कहा गया है—

''परमेश्वर के द्वारा अपनी शक्ति के वैभव के भार से शक्ति, माया, प्रकृति और पृथिवी—ये चार अण्ड विभागशः (= अलग-अलग) बनाए गये'' ॥ १७० ॥ (प. सा. ४)

यहीं पर स्रष्टा और संहर्त्ता का विभाग भी दिखलाते हैं—

पृथिवी खण्ड में कालाग्नि संहर्त्ता हैं; मायाण्ड में कालतत्त्व राट्; मूल प्रकृत्यण्ड में सृष्टि और संहार को करने वाले श्रीकण्ठ हैं । बीच में जो उस (पृथ्वी प्रकृति एवं माया) का लय होता है उसके सर्जक और संहारक—शाक्ताण्ड के अन्त में श्रीमान् अघोर ही संहारक है और वे ही

संहर्ता न पुनः स्रष्टा तद्धि ब्रह्मादीनामेव हि पूर्वमुक्तं, कालतत्त्वराडिति कालतत्त्वाधिपः श्रीकण्ठः । यदुक्तम्—

'एकवीरः शिखोदश्च श्रीकण्ठः कालमाश्रितः ।'

(मा०वि० ५।२७) इति ।

श्रीकण्ठ इत्यव्यक्तस्थः । एकत्रेति त्रिष्वपि योज्यम् । तल्लय इति श्रीकण्ठकर्तृकः संहारः । यद्वा त्रिष्वपि पृथिव्यादिषु स्थानेषु परापररूपता- मधिशयानः श्रीकण्ठनाथ एककः सृष्टिसंहारकारकः । यदुक्तम्—

'श्रीकण्ठ एव परया मूर्त्या कालाग्निरुच्यते ।' इति ।

तथा

'त्रिष्वेव संस्थितो रुद्रः कालरूपी महेश्वरः ।' इति ।

'शक्त्यन्ते' इति शुद्धाध्वनि । तदुक्तम्—

'तदूर्ध्वे शुद्धमध्वानं यावच्छक्त्यन्तगोचरम् ।
तत्सर्वं संहरेद् घोरमघोरो घोरनाशनः ॥' इति ॥ १७२ ॥

न केवलं शक्त्यन्तं प्रलयस्यैव महत्त्वं यावत्सृष्टेरपीत्याह—

सृष्टिकर्त्ता भी हैं ॥ १७१-१७२ ॥

संहर्त्ता न कि सृष्टिकर्त्ता क्योंकि वह (स्रष्टृत्व) तो पहले ही ब्रह्म आदि का कह दिया गया है । कालतत्त्वराट् = कालतत्त्व का राजा श्रीकण्ठ । जैसा कि कहा गया है—

"एक वीर शिखण्डीश और श्रीकण्ठ काल तत्त्व में रहते हैं ।" (मा. वि. ५।२७)

श्रीकण्ठ = अव्यक्त में रहने वाला । 'एकत्र' इस (पद) को तीनो में जोड़ना चाहिए । तल्लयः = श्रीकण्ठ के द्वारा किया गया संहार अथवा तीनों पृथिवी आदि स्थानों में पर अपर रूपता को धारण करने वाले श्रीकण्ठनाथ अकेले ही सृष्टि और संहार करने वाले हैं । जैसा कि कहा गया—

"श्रीकण्ठ ही परमूर्त्ति के रूप मे कालाग्नि कहे जाते हैं ।" तथा

"तीनों (अण्ड कटाहों) में रुद्र कालरूपी महेश्वर (के रूप में) स्थित हैं ।"

शक्यन्त = शुद्ध अध्वा में । वही कहा गया है—

"उसके ऊपर शक्तिपर्यन्त जो शुद्ध अध्वा है उस समस्त घोर का संहार घोरनाशक अघोर करते हैं" ॥ १७२ ॥

शक्तिपर्यन्त केवल प्रलय का ही महत्त्व नहीं है, सृष्टि का भी है—यह कहते हैं—

तत्सृष्टौ सृष्टिसंहारा निःसंख्या जगतां यतः।
अन्तर्भूतास्ततः शाक्ती महासृष्टिरुदाहृता ॥ १७३ ॥

ननु पृथिव्यादितत्त्वप्रलये यैव तन्निवासिनामणूनां व्यवस्था सैव किं तत्त्वेश्वरणां न वा ?—इत्याशङ्क्याह—

लये ब्रह्मा हरी रुद्रशतान्यष्टकपञ्चकम् ।
इत्यन्योन्यं क्रमाद्यान्ति लयं मायान्तकेऽध्वनि॥ १७४ ॥
मायातत्त्वलये त्वेते प्रयान्ति परमं पदम् ।

शुद्धाध्वव्यवस्थितानां पुनः किं परमं पदम् ?—इत्याशङ्क्याह—

मायोर्ध्वे ये सिताध्वस्थास्तेषां परशिवे लयः ॥ १७५ ॥
तत्राप्यौपाधिकाद्भेदाल्लये भेदं परे विदुः ।

तत्रापीति, परशिवे । परे विदुरिति, न पुनरस्माकमिदं मतमित्याशयः ॥ १७५ ॥

नन्वेवमपवृक्तेषु पुनः सृष्टौ तत्र केषामधिकारः ?—इत्याशङ्क्याह—

एवं तात्त्वेश्वरे वर्गे लीने सृष्टौ पुनः परे ॥ १७६ ॥

क्योंकि उस (शक्ति) की सृष्टि में संसार के असंख्य सृष्टिसंहार अन्तर्भूत हैं इसलिए शक्तिसृष्टि महासृष्टि कही गई है ॥ १७३ ॥

प्रश्न—पृथिवी आदि तत्त्वों के प्रलय होने पर उनमें रहने वाले जीवों की जो व्यवस्था होती है वही क्या उन तत्त्वों के ईश्वरों की भी होती हैं या नहीं?—यह शङ्का कर कहते हैं—

प्रलय होने पर ब्रह्मा विष्णु और १४० रुद्र ये सब अन्योऽन्य क्रम से माया अन्त वाले अध्वा में लय को प्राप्त होते हैं और माया तत्त्व का लय होने पर ये परम पद को प्राप्त होते हैं ॥ -१७४-१७५- ॥

शुद्ध अध्वा में रहने वालों का परम पद क्या है ?—यह शङ्का कर कहते हैं—

माया से ऊपर जो शुद्ध अध्वा में रहने वाले हैं उनका परम शिव में लय हो जाता है । उसमें भी औपाधिक भेद से लय होने पर दूसरे लोग भेद मानते हैं ॥ -१७५-१७६- ॥

वहाँ भी = परमशिव में भी । दूसरे लोग मानते हैं । हमारा यह मत नहीं हैं—यह आशय हैं ॥ १७५ ॥

प्रश्न—इस प्रकार अपवर्ग को प्राप्त हो जाने पर फिर सृष्टि के विषय में किसका अधिकार होता है?—यह शङ्का कर कहते हैं—

तत्साधकाः शिवेष्टा वा तत्स्थानमधिशेरते ।

तत्साधका इति—

'लोकधर्मिणमारोप्य मते भुवनभर्तरि ।'

इत्यादिना निरूपिताश्चर्यादिक्रमेण प्रेप्सिततत्तद्भुवनैश्वर्याः । शिवेष्टा इति, तदिच्छामात्रानुगृहीताः ॥ १७६ ॥

नन्वेवमप्येषां ब्रह्मादिशब्दप्रवृत्तौ किं निमित्तम् ?—इत्याशङ्क्याह—

ब्राह्मी नाम परस्येव शक्तिस्तां यत्र पातयेत् ॥ १७७ ॥
स ब्रह्मा विष्णुरुद्राद्या वैष्णव्यादेरतः क्रमात् ।

'अत' इति शक्तेः । तदुक्तम्—

'ब्राह्मी च वैष्णवी शक्तिरधिकारपदं गता ।
यं चाधितिष्ठत्यात्मानं तत्संज्ञां स प्रपद्यते ॥
तदाधिकारं कुरुते इच्छया परमात्मनः ।'
(स्व०तं० ११।२६५) इति ॥ १७७ ॥

ननु ब्राह्मी नाम यदि शिवस्यैव शक्तिस्तत्कथमसावन्यं यायाद्येनायं ब्रह्मेत्यु-

---

इस प्रकार जब तत्त्वेश्वरवर्ग परतत्त्व में लीन हो जाता है तब पुनः सृष्टि होने पर उसके साधक या शिव को इष्ट (जीव) उस स्थान का ग्रहण करते हैं ॥ -१७६-१७७- ॥

उसके साधक—

"स्वीकृत भुवनभर्त्ता के पद पर लोकधर्मी को आरोपित कर" इत्यादि के द्वारा निरूपित चर्या आदि के क्रम से ईप्सित उन-उन भुवनों के ऐश्वर्य वाले। शिवेष्ट = उन (= शिव) की इच्छा मात्र से अनुगृहीत ॥ १७६ ॥

ऐसा होने पर भी इनको ब्रह्म आदि शब्द से पुकारे जाने में क्या हेतु है ?—यह शङ्का कर कहते हैं—

ब्राह्मी नामक परमेश्वर की शक्ति हैं। (वह परमेश्वर) उस (शक्ति) को जहाँ गिरा देता है वह ब्रह्म (हो जाते हैं)। उसी क्रम से वैष्णवी आदि शक्ति से विष्णु रुद्र आदि (होते हैं) ॥ -१७७-१७८- ॥

अतः = शक्ति से। वही कहा गया है—

"ब्राह्मी और वैष्णवी शक्ति अधिकार को प्राप्त होकर जिस आत्मा पर अधिष्ठित होती है वह (आत्मा) उस (= ब्रह्मा, विष्णु) संज्ञा को प्राप्त होता है। तब परमात्मा की इच्छा से वह अपने अधिकार (का प्रयोग) करता है" ॥ १७७ ॥ (स्व. तं. ११।२६५)

च्यते, न ह्यन्यदीयधर्मस्यान्यत्रान्वयः संभवेत् ?—इत्याशङ्क्याह—

शक्तिमन्तं विहायान्यं शक्तिः किं याति नेदृशम्॥ १७८ ॥
छादितप्रथिताशेषशक्तिरेकः शिवस्तथा ।

न ह्येतच्छिवलक्षणं शक्तिमन्तं विहायान्यं ब्रह्मादिलक्षणं शक्तिर्याति' इत्येवंविधमुक्तं, किं त्वनन्तशक्तिखचितत्वेऽपि कांचिच्छक्तिं प्रच्छाद्य कांचिच्च प्रकटीकृत्यैक एव शिवस्तथा ब्रह्मविष्ण्वाद्यात्मनावभासत इति ॥ १७८ ॥

ननु प्राणस्य परं तत्त्वं प्रत्युपायत्वमस्तीति प्रागुपक्रान्तं तत्तदनभिधाय तदाश्रयेण सृष्टिसंहारादीनामेव स्वरूपमुच्यते—इति किमेतत् ?—इत्याशङ्क्याह—

एवं विसृष्टिप्रलयाः प्राण एकत्र निष्ठिताः ॥ १७९ ॥
सोऽपि संविदि संविच्च चिन्मात्रे ज्ञेयवर्जिते ।
चिन्मात्रमेव देवी च सा परा परमेश्वरी ॥ १८० ॥
अष्टात्रिंशं च तत्तत्त्वं हृदयं तत्परापरम् ।

संविदीति, तत्तन्नीलाद्याभाससंभिन्नायां परिमितात्मरूपायाम् । चिन्मात्रमेव चाष्टात्रिंशं तत्त्वमित्येतदग्र एवोपपादयिष्यते—इति नेहायस्तम् । तत्स्थितमेवास्य

प्रश्न—ब्राह्मी यदि शिव की ही शक्ति है तो यह दूसरे के पास क्यों जाती है जिससे कि यह ब्रह्मा कहलाते हैं । दूसरे के धर्म का दूसरे से सम्बन्ध सम्भव नहीं होता ?—यह शङ्का कर कहते हैं—

शक्तिमान् को छोड़कर शक्ति दूसरे के पास क्यों जाती हैं?—ऐसा नहीं हैं । एक शिव ही (अपनी) शक्ति को (कहीं) छादित (और कहीं) प्रकट कर उस प्रकार (रहता है) ॥ -१७८-१७९- ॥

यह शिवलक्षण वाले शक्तिमान् को छोड़कर दूसरे ब्रह्मालक्षण वाले शक्तिमान् के पास जाती हैं—ऐसा नहीं कहा गया है । किन्तु अनन्त शक्ति से युक्त होने पर भी किसी शक्ति को छिपा कर और किसी को प्रकट कर एक ही शिव उस प्रकार = ब्रह्मा विष्णु आदि के रूप में भासता है ॥ १७८ ॥

प्रश्न—प्राण परतत्त्व (की प्राप्ति) का उपाय है ऐसा पहले प्रारम्भ किया गया। अब उसको न कहकर उसके आधार पर सृष्टि संहार आदि का ही स्वरूप कहा जा रहा है—यह क्या है ?—यह शङ्का कर कहते हैं—

इस प्रकार सृष्टि और प्रलय प्राण में एक जगह प्रतिष्ठित हैं । वह (= प्राण) भी संविद् में और संवित् ज्ञेयरहित चिन्मात्र में निष्ठित हैं । वह परा पारमेश्वरी देवी चिन्मात्र ही हैं । वह अड़तीसवाँ तत्त्व है और वही परात्पर हृदय भी है ॥ -१७९-१८१- ॥

संविद् में = भिन्न-भिन्न घट आदि आभासों से संभिन्न परिमित आत्मरूपा में ।

चिन्मात्रविश्रान्तत्वं यद्वशादेवात्र नालिकादिषष्ट्यब्दोदयान्तं लयोदययोर्वैचित्र्यमिति ॥ १८० ॥

तदाह—

तेन संवित्त्वमेवैतत्स्पन्दमानं स्वभावतः ॥ १८१ ॥
लयोदया इति प्राणे षष्ट्यब्दोदयकीर्तनम् ।

संवित्त्वमिति—ये नाम लयोदयास्तत्संवित्स्वातन्त्र्यम्—इत्येवं संविदधीनमेव सर्वमेतत्कालीयं वैचित्र्यं, न पुनरस्वाधीनं किञ्चिद्रूपं बहिरस्तीत्युक्तं स्यात् ॥ १८१ ॥

अत आह—

इच्छामात्रप्रतिष्ठेयं क्रियावैचित्र्यचर्चना ॥ १८२ ॥
कालशक्तिस्ततो बाह्ये नैतस्या नियतं वपुः ।

नैतस्या नियतं वपुरिति, तथात्वे हि यत्रैकचषकोदयस्यत्रैवाब्दोदयः कथं भवेदिति भावः ॥ १८२ ॥

ननु कथमतिपरिमितस्यापि कालांशस्य वैतत्येनावभासो भवेत् ?—

चिन्मात्र ही ३८ तत्त्व हैं यह आगे सिद्ध किया जायगा—इसलिए यहाँ नहीं कहा गया। इसलिए इसका चिन्मात्र में विश्रान्त होना सिद्ध हो गया जिस कारण ही यहाँ नाडी से लेकर ६० वर्ष के उदय तक लय और उदय का वैचित्र्य है ॥ १८० ॥

उसी को कहते हैं—

इसलिए स्वभावतः स्पन्दमान यह संवित् ही प्राण का लय और उदय है इसलिए प्राण में साठ वर्ष के उदय का कथन (किया गया) ॥ -१८१-१८२- ॥

संवित्त्व—जो लय और उदय हैं वह संवित् का स्वातन्त्र्य ही है । इस प्रकार यह सब काल का वैचित्र्य संविद् के ही अधीन है । स्वाधीन कुछ बाहर है ही नहीं ऐसा कहना चाहिये ॥ १८१ ॥

इसलिए कहते हैं—

यह क्रियावैचित्र्य की चर्चा (परमेश्वर की) इच्छा के ऊपर प्रतिष्ठित है । वही बाहर काल शक्ति है । इस कारण इसका स्वरूप निश्चित नहीं है ॥ -१८२-१८३- ॥

इसका स्वरूप निश्चित नहीं है क्योकि वैसा होने पर जहाँ एक चषक का उदय होता है वही एक वर्ष का उदय कैसे होगा ?—यह तात्पर्य है ॥ १८२ ॥

इत्याशङ्क्याह—

स्वप्नस्वप्ने तथा स्वप्ने सुप्ते सङ्कल्पगोचरे ॥ १८३ ॥
समाधौ विश्वसंहारसृष्टिक्रमविवेचने ।
मितोऽपि किल कालांशो विततत्वेन भासते ॥ १८४ ॥

यत्राद्यां स्वाप्नीमेव दशां जाग्रद्दशात्वेन परिकल्प्य द्वितीयां स्वप्नत्वेन कश्चिदभिमन्यते स स्वप्नस्वप्न उच्यते । एवं स्वप्ने क्षणेनैव हरिश्चन्द्रस्येवानेककालिकोऽप्यनुभवोऽभवदिति युक्तमुक्तं—'मितेऽपि काले वैतत्येनावभासः' इति । 'सुप्ते' इति सुषुप्तदशायाम्; तत्र हि क्षणमात्रमपि मोहादौ 'चिरस्य गाढमूढोऽहमासम्' इत्याद्यभिमानोदयः । 'सङ्कल्पगोचरे' इति स्वतन्त्रविकल्पादौ; तत्र हि क्षणेनैव कल्पपरिकल्पनमपि शक्यम् । 'समाधौ' इति विश्वसाक्षात्कारात्मनि । विश्वसंहारसृष्टिक्रमस्य 'विवेचने' समनन्तरोक्तकालीयप्रमेयसङ्कलनाबुद्धावित्यर्थः ।

एतच्च कालीयं वैतत्यं स्वपरदृष्टत्वेनापि वैचित्र्यमियात्—इत्याह—

प्रमात्रभेदे भेदेऽथ चित्रो विततिमाप्यसौ ।

प्रश्न—अत्यन्त सीमित कालांश का भी विस्तार के साथ अवभास कैसे होता है ?—यह शङ्का कर कहते हैं—

जाग्रत, स्वप्न, सुषुप्ति, सङ्कल्प के विषय, समाधि एवं विश्व के संहार और सृष्टि क्रम के विवेचन में सीमित भी कालांश विस्तृत रूप में भासित होता है ॥ -१८३-१८४ ॥

जहाँ पहली स्वप्न वाली दशा को ही जाग्रत दशा के रूप में मानकर दूसरी को स्वप्न मानते हैं तो वह जाग्रत दशा स्वप्नस्वप्न कहलाती हैं । इस प्रकार स्वप्न मे एक क्षण में राजा हरिश्चन्द्र (की स्वप्नकालीन घटना) के समान अनेककालिक अनुभव हुआ इसलिए ठीक कहा गया 'सीमित काल में व्यापक आभास होता है ।' सुप्त मे = सुषुप्तिदशा में ।

उसमें एक क्षण के लिए भी मोह आदि के समय 'बहुत देर तक (मैं) गम्भीर रूप से मूढ था' ऐसा अभिमान उत्पन्न होता है । सङ्कल्प गोचर में = स्वतन्त्र विकल्प आदि में । उस स्थिति में एक क्षण के द्वारा एक कला की भी परिकल्पना सम्भव हैं। समाधि में—विश्वसाक्षात्काररूप वाली । विश्वसंहार और सृष्टि के क्रम के विवेचन में = अव्यवहितपूर्व कहे गए कालिक प्रमेय की सङ्कलना वाली बुद्धि में ॥ १८३ ॥

यह कालिक वैचित्र्य अपने और दूसरे के द्वारा दृष्ट होने से भी विचित्र हो जाता है—यह कहते हैं—

यह विस्तार प्रमाता के अभेद और भेद होने पर भी विचित्र हो जाता है ॥ १८५- ॥

अनेनैतत्स्वप्नादावनुभूतम्—इति प्रमात्रन्तरैकीकारेण विततिम्नोऽवभासः; मयैवैतदसाधारण्येनानुभूतम्—इति वा ॥

इदानीं प्राणीयमेव कालविभागमपानेऽप्यतिदिशति—

एवं प्राणे यथा कालः क्रियावैचित्र्यशक्तिजः ॥ १८५ ॥
तथापानेऽपि हृदयान्मूलपीठविसर्पिणी ।

यद्यपि द्वादशान्ताद्धृदन्तमपाने कालवैचित्र्यमुक्तं तथापि हृदयान्मत्तगन्धपर्यन्तं प्रसरणेऽस्यैव प्राधान्यमित्येवमुक्तम् । तदुक्तम्—

'अपानस्यापि सञ्चारे सर्पितेयं सुविस्तृता ।
गुदं यावत्ततो वायुरधस्तादुपयाति हि ॥' इति ॥ १८५ ॥

नन्वत्रापि प्राणवत्कालवैचित्र्यं किं सञ्चेत्यते न वा ?—इत्याशङ्क्याह—

मूलाभिधमहापीठसङ्कोचप्रविकासयोः ॥ १८६ ॥
ब्रह्माद्यनाश्रितान्तानां चिनुते सृष्टिसंहृती ।

'रासभी वडवा यद्वत्' (तं० ५।५८) इत्यादिप्रागुक्तयुक्त्या जन्माधारोदितायाः

इससे (यह अर्थ निकलता है कि) स्वप्न आदि में क्षणमात्र में किया गया अनुभव भी दूसरे प्रमाताओं से तादात्म्य स्थापित कर विस्तार के साथ अवभासित हो सकता है । अथवा मैंने ही इसका असाधारण रूप से अनुभव किया ऐसा भी अनुभव होता है ॥ १८४ ॥

अब प्राणीय कालविभाग का ही अपान मे भी अतिदेश करते हैं—

इस प्रकार जैसे प्राण में काल क्रिया की वैचित्र्यशक्ति से उत्पन्न होता है उसी प्रकार हृदय से लेकर मूलाधार तक फैलने वाले अपान मे भी (वह उत्पन्न होता है) ॥ -१८५-१८६- ॥

यद्यपि द्वादशान्त से हृदय तक (वर्त्तमान) अपान में काल का वैचित्र्य कहा गया तथापि हृदय से गुदा तक फैलने में इसी की प्रधानता है—ऐसा कहा गया ।

वही कहा गया है—

अपान के भी सञ्चार में उसका यह विस्तृत फैलाव गुदापर्यन्त है । उसके बाद वायु नीचे जाती है ॥ १८५ ॥

प्रश्न—यहाँ भी प्राण के समान कालवैचित्र्य ज्ञात होता है या नहीं ?—यह शङ्का कर कहते हैं—

मूल आधार नामक महा पीठ वाली (शक्ति) के सङ्कोच और विकास सम्बन्धी, ब्रह्मा से लेकर अनाश्रित शिव पर्यन्त सृष्टि और संहार को (योगी) समझता है ॥ -१८६-१८७- ॥

शक्तेर्यौ सङ्कोचविकासौ तौ ब्रह्माद्यनाश्रितान्तस्य विश्वस्य सृष्टिसंहारादौ योगिनामनुभवसिद्धावित्युक्तं—'चिनुते सृष्टिसंहृती' इति ॥ १८६ ॥

ननु यद्येवं तत्सर्वत्र प्राणोदय एव प्राधान्येनैतत्कस्मान्निर्दिष्टम् ?—इत्याशङ्क्याह—

शश्वद्यद्यप्यपानोऽयमित्थं वहति किंत्वसौ ॥ १८७ ॥
अवेद्ययत्नो यत्नेन योगिभिः समुपास्यते ।

ननु यद्यत्र ब्रह्मादीनां कारणानां सृष्ट्यादि संभवेत् तत्कुत्र कस्यावस्थानम् ?—इत्याशङ्क्याह—

हृत्कन्दानन्दसङ्कोचविकासद्वादशान्तगाः ॥ १८८ ॥
ब्रह्मादयोऽनाश्रितान्ताः सेव्यन्तेऽत्र सुयोगिभिः ।

'द्वादशान्तः' शक्तेरुदयविश्रान्तिस्थानम् । सुयोगिभिरित्यन्तःप्राणे सावधानैर्न सामान्यैस्तेषामपानस्यावेद्ययत्नतया तत्सेवनस्य यत्नसाध्यत्वात् ॥ १८८ ॥

ननु व्यापकत्वादेषां स्वरसत एव सर्वत्रावस्थानं सिद्धमित्यत्र विशेषाभिधाने किं

'जिस प्रकार गदही या घोड़ी' (तं. आ. ५।५८) इत्यादि पहले कहे गए नियम के अनुसार जन्माधार में प्रकट हुई शक्ति का जो सङ्कोच और विकास वे दोनों ब्रह्म से लेकर अनाश्रित शिव पर्यन्त विश्व के सृष्टि संहार आदि योगियों के अनुभवसिद्ध है—यह 'सृष्टि और संहार का चयन करता है'—के द्वारा कहा गया ॥ १८६ ॥

प्रश्न—यदि ऐसा है तो सर्वत्र यह प्राण का उदय ही प्रधान रूप से क्यों कहा गया ?—यह शङ्का कर कहते हैं—

यद्यपि यह अपान इस प्रकार निरन्तर वहता है तो भी यह अवेद्य प्रयास वाला (अपान) योगियों के द्वारा प्रयत्नपूर्वक उपासित होता है ॥ -१८७-१८८- ॥

प्रश्न—यदि यहाँ (शरीर में) ब्रह्म आदि कारणों की सृष्टि सम्भव है तो किसकी कहाँ स्थिति है ?—यह शङ्का कर कहते हैं—

हृदय, कन्द, आनन्द, सङ्कोच, विकास और द्वादशान्त में रहने वाले ब्रह्मा से लेकर अनाश्रित शिव तक (सभी देवता) यहाँ सुयोगियों के द्वारा पूजित होते हैं ॥ -१८८-१८९- ॥

द्वादशान्त = शक्ति के उदय और विश्रान्ति का स्थान । सुयोगियों के द्वारा अर्थात् अन्तःप्राण में सावधान न कि सामान्य (योगियों) के द्वारा । क्योंकि अपान अवेद्य यत्न वाला होने पर उनके लिए उसका सेवन यत्नसाध्य होता है ॥ १८८॥

प्रश्न—व्यापक होने के कारण इनकी (= ब्रह्मा आदि की) स्थिति सर्वत्र

प्रयोजनम् ?—इत्याशङ्क्याह—

एते च परमेशानशक्तित्वाद्विश्ववर्तिनः ॥ १८९ ॥
देहमप्यश्नुवानास्तत्कारणानीति कामिके ।

तत्कारणानीति, तस्य देहस्य कारणानि तत्तदधिष्ठानद्वारेणोत्पत्तिनिमित्त-मित्यर्थः ॥ १८९ ॥

कामिकीयमेव ग्रन्थं पठति—

बाल्ययौवनवृद्धत्वनिधनेषु पुनर्भवे ॥ १९० ॥
मुक्तौ च देहे ब्रह्माद्याः षडधिष्ठानकारिणः ।

तद्बाल्ये ब्रह्मणोऽधिष्ठानकारित्वं, यावन्मुक्तावनाश्रितस्येति ॥ १९० ॥

नन्वस्मद्दर्शने मुक्तेः किमनाश्रिताधिष्ठानं युक्तम् ?—इत्याशङ्क्याह—

तस्यान्ते तु परा देवी यत्र युक्तो न जायते ॥ १९१ ॥
अनेन ज्ञातमात्रेण दीक्षानुग्रहकृद्भवेत् ।

अन्त इति, यदुक्तम्—

स्वभावतः सिद्ध है तो यहाँ विशेष कथन का क्या प्रयोजन है ?—यह शङ्का कर कहते हैं—

यह (ब्रह्मा आदि) परमेश्वर की शक्ति होने के कारण विश्वव्यापी होते हुए देह को भी धारण करने वाले हैं अतः उस (= देह) के कारण हैं—ऐसा कामिक में (कहा गया है) ॥ -१८९-१९०- ॥

उसके कारण = उस = देह के कारणभूत अर्थात् उन-उन के अधिष्ठान के द्वारा उत्पत्ति के कारण ॥ १८९ ॥

कामिकीय ग्रन्थ को ही पढ़ते हैं—

बचपन, युवावस्था, वृद्धत्व, मृत्यु, पुनर्जन्म और मुक्ति (के काल) में शरीर में ब्रह्मा आदि छह अधिष्ठातृ देव रहते हैं ॥ -१९०-१९१- ॥

इस प्रकार बचपन में (शरीर में) ब्रह्मा अधिष्ठान करते हैं और मुक्ति में अनाश्रित शिव ॥ १९० ॥

प्रश्न—हमारे दर्शन में मुक्ति को अनाश्रित के द्वारा अधिष्ठित होने को क्यों उचित (माना गया) ?—यह शङ्का कर कहते हैं—

उस (= अनाश्रित) के अन्त में तो परादेवी हैं जहाँ (शिष्य) गुरु के द्वारा नियोजित नहीं होता । इस (प्रक्रिया को गुरु के द्वारा) जान लेने मात्र से (योगी) दीक्षारूप अनुग्रह करने वाला हो जाता है ॥ -१९१-१९२- ॥

'षट्त्यागात्सप्तमे लय: ।' (स्व०तं० ४।२६७) इति ।

'युक्त'इत्यर्थाद् गुरुणा योजित: ॥ १९१ ॥

नन्वपानस्य कालवैचित्र्याभिधाने प्रक्रान्ते किमनेनोपदिष्टेन ?—इत्याशङ्क्याह—

समस्तकारणोल्लासपदे सुविदिते यत: ॥ १९२ ॥
अकारणं शिवं विन्देद्यत्तद्विश्वस्य कारणम् ।

हेये हि सुष्ठु ज्ञाते सुखमुपादेये विश्रान्तिर्भवेदिति भाव: ॥ १९२ ॥

ननु प्राणक्रमेण 'द्वादशान्ते पर: शिव:' इत्याद्युक्त्या तत्तत्कारणोल्लङ्घनेन तत्र शिवे विश्रान्ति: स्यादिह पुन: सा कुत्र यत्रैवं स्यात् ?—इत्याशङ्क्याह—

अधोवक्त्रं त्विदं द्वैतकलङ्कैकान्तशातनम् ॥ १९३ ॥
क्षीयते तदुपासायां येनोर्ध्वाधरडम्बर: ।

यत्र नामापानस्य विश्रान्तिस्तदिदं द्वैतकलङ्कापहम् 'अधोवक्त्रं' षष्ठस्रोतोरूपं

अन्त में । जैसा कि कहा गया है—

"छ: १. ऊर्ध्व शून्य (शक्ति) २. अध: शून्य (हृदय) ३. मध्य शून्य (कण्ठ तालु आदि) ४. चतुर्थ शून्य (व्यापिनी) ५. पञ्चम शून्य (समना) और ६. षष्ठ शून्य (उन्मना) का त्याग करने पर सातवें (शून्य) में लय होता है ।" (स्व. तं. ४।२६७)

युक्त = गुरु के द्वारा लगाया गया ॥ १९१ ॥

प्रश्न—अपान के कालवैचित्र्य का कथन चल रहा था तो यह उपदेश क्यों (किया जा रहा है) ?—यह शङ्का कर कहते हैं—

क्योंकि समस्त कारणों के उल्लासस्थानों को अच्छी तरह जान लेने पर, जो विश्व का कारण है उस कारणहीन शिव को (योगी) जान लेता है ॥ -१९२-१९३- ॥

हेय के भली भाँति ज्ञात होने पर उपादेय में सरलता पूर्वक विश्रान्ति होती है—यह तात्पर्य है ॥ १९२ ॥

प्रश्न—प्राणक्रम के द्वारा 'द्वादशान्त में परम शिव रहते हैं' इत्यादि उक्ति के द्वारा उन-उन कारणों का उल्लङ्घन करने से उस शिव तत्त्व में विश्रान्ति होती है । यहाँ वह कहाँ होगी जहाँ ऐसा हो ?—यह शङ्का कर कहते हैं—

यह द्वैतकलङ्क को पूर्णत: नष्ट करने वाला अधोवक्त्र है । जिसके द्वारा, उसकी उपासना करने पर, ऊर्ध्व और अधर का डम्बर (= आभास, दिखावा) नष्ट हो जाता है ॥ -१९३-१९४- ॥

योगिनीवक्त्रमित्युच्यते; यतोऽयमद्वैतार्थोपदेशिनां रहस्यशास्त्राणामुदयो, येन द्वैतापहतत्वेन हेतुना तत्र विश्रान्तिभाजाम् 'ऊर्ध्वाधरडम्बरः' शाम्येत् चिदानन्दैकघनपरशिवैकात्म्यमुल्लसेदित्यर्थः ॥ १९३ ॥

नन्वत्रैवं विश्रान्तिः किं प्राणवत्तुट्यादिक्रमेणैव भवेदुतान्यथापि ? इत्याशङ्क्याह—

अत्रापानोदये प्राग्वत्षष्ट्यब्दोदययोजनाम् ॥ १९४ ॥
यावत्कुर्वीत तुट्यादेर्युक्तांगुलविभागतः ।

युक्तं तुट्यनुगुणमंगुलविभागमाश्रित्य तुट्यादेरारभ्य षष्ट्यब्दोदययोजनां यावत् प्राग्वदत्रापानोदयेऽर्थाद्योजनां कुर्वीत, येनैवं विश्रान्तिः स्यात् ॥ १९४ ॥

न केवलमेतदपाने यावत्समानेऽपि इत्याह—

एवं समानेऽपि विधिः स हि हार्दीषु नाडिषु ॥ १९५ ॥
सञ्चरन्सर्वतोदिक्कं दशधैव विभाव्यते ।

जहाँ अपान का अन्त होता है वह द्वैतकलङ्क को नष्ट करने वाला अधोवक्त्र = छठां स्रोत रूप योगिनीवक्त्र कहा जाता है । जहाँ से इस, अद्वैत तत्त्व का उपदेश करने वाले रहस्य शास्त्रों, का उदय होता है । जिस द्वैतनाशरूप हेतु के द्वारा उसमें विश्राम करने वालों का ऊर्ध्व और अधः डम्बर शान्त हो जाता है अर्थात् चिदानन्द एक घन परम शिव के साथ तादात्म्य का उल्लास होता है ॥ १९३ ॥

प्रश्न—यहाँ ऐसी विश्रान्ति क्या प्राण तुटि आदि के क्रम से होती है या दूसरी प्रकार की भी ?—यह शङ्का कर कहते हैं—

पहले की भाँति युक्त अंगुलविभाग के अनुसार तुटि से लेकर साठ वर्ष के उदय की योजना तक यहाँ अपान के उदय में करनी चाहिए ॥ -१९४-१९५- ॥

युक्त = तुटि के अनुकूल अंगुल विभाग के आधार पर तुटि से लेकर साठ वर्ष के उदय की योजना तक पहले (प्राण) के समान अपान के उदय में योजना करनी चाहिए जिससे इस प्रकार विश्रान्ति हो जाय ॥ १९४ ॥

यह केवल अपान में ही नहीं है समान में भी है—

यह कहते हैं—

समान में भी यह विधि है । वह (समान) हृदय की नाडियों में सर्वदिक सञ्चरण करता हुआ दश प्रकार का ही माना जाता है ॥ -१९५-१९६- ॥

हार्दीषु, हृदि तासामभिव्यक्तेः, वस्तुतस्त्वासां नाभेरुदयः । यदुक्तम्—

'नाभ्यधो मेढ्रकन्दे च स्थिता वै नाभिमध्यतः ।
तस्माद्विनिर्गता नाड्यस्तिर्यगूर्ध्वमधः प्रिये ॥
चक्रवत्संस्थितास्तत्र प्रधाना दश नाडयः ।'

(स्व०तं० ७।८) इति ।

समानस्यापि मुख्यया वृत्त्या नाभिरेव स्थानम् । यदुक्तम्—

'हृद्गुदे नाभिकण्ठे च सर्वसन्धौ तथैव च ।
प्राणाद्याः संस्थिता ह्येते...................... ॥'

(स्व०तं० ७।३०१) इति ॥ १९५ ॥

नन्वेवं व्यपदेशस्य किं निमित्तम् ?—इत्याशङ्क्याह—

दश मुख्या महानाडीः पूरयन्नेष तद्गताः ॥ १९६ ॥
नाड्यन्तराश्रिता नाडीः क्रामन्देहे समस्थितिः ।

मुख्या इति प्रधानाः । तदुक्तम्—

'इडा च पिङ्गला चैव सुषुम्ना च तृतीयिका ।
गान्धारी हस्तिजिह्वा च पूषा चैवार्यमा तथा ॥

हृदय वाली में—क्योंकि हृदय में ही उनकी अभिव्यक्ति होती है । वस्तुतः तो इन (= नाडियों) का उदय नाभि से होता है । जैसा कि कहा गया है—

"हे प्रिये ! नाभि के नीचे मेढ्र कन्द में स्थित नाड़ियाँ उस नाभिमध्य से तिर्यक् ऊपर और नीचे की और निकलती हैं । उनमें प्रधान दश नाडियाँ चक्र के समान स्थित हैं ।" (स्व. तं. ७।८)

समान का भी मुख्यरूप से नाभि ही स्थान हैं । जैसा कि कहा गया—

"हृदय, गुदा, नाभि, कण्ठ और सभी सन्धियों में ये प्राण आदि स्थित है.... ...." ॥ १९५ ॥ (स्व. तं. ७।३०१)

प्रश्न—इस प्रकार के व्यवहार का क्या कारण है ?—यह शङ्का कर कहते हैं—

दश मुख्य महा नाड़ियों को पूरित करता हुआ यह (= समान वायु) उसमें वर्त्तमान अन्य नाड़ियों की आश्रित नाड़ियों को संक्रान्त करता हुआ सम रूप से स्थित है ॥ -१९६-१९७- ॥

मुख्य = प्रधान । वही कहा गया है—

"इडा, पिङ्गला, सुषुम्ना, गान्धारी, हस्तिजिह्वा, पूषा, अर्यमा, अलम्बुसा, कुहू और शङ्खिनी दशवी कही गई है । प्राण जिसमें होकर बहता है ऐसी ये दश

अलम्बुसा कुहूश्चैव शङ्खिनी दशमी स्मृता ।
एताः प्राणवहाः प्रोक्ताः प्रधाना दश नाडयः ॥'
(स्व०तं० ७।१६) इति ।

'तद्गताः' इति तद्भेदरूपद्वासप्ततिसहस्रसंख्याकाः । नाड्यन्तरेतितदुपभेद-रूपाणि । यदुक्तम्—

'द्वासप्ततिसहस्राणि नाड्यस्ताभ्यो विनिर्गताः ।
पुनर्विनिर्गताश्चान्या आभ्योऽप्यन्याः पुनः पुनः ॥'
(स्व०तं० ७।९) इति ।

अत एव देहे समननात्समाननामायमित्युक्तं 'समस्थितिः' इति ॥ १९६ ॥

ननु यदि नामायं दश नाडीराक्रम्य वर्तते तावतास्य किमायातं येन दशधात्वमुच्यते ?—इत्याशङ्क्याह—

अष्टासु दिग्दलेष्वेष क्रामंस्तद्दिक्पतेः क्रमात् ॥ १९७ ॥
चेष्टितान्यनुकुर्वाणो रौद्रः सौम्यश्च भासते ।

तद्दिक्पतेरिति, इन्द्रादेः । चेष्टितानीति, स्तम्भादिरूपाणि । रौद्रो याम्यादौ, सौम्यश्च वारुण्यादौ; अत एव पुंसां प्रतिक्षणं क्रोधहर्षाद्याविर्भावः । यदुक्तम्—

नाड़ियाँ प्रधान कही गई हैं ।" (स्व. तं. ७।१६)

तद्गत = उनके भेदरूप बहत्तर हजार संख्या वाली । नाड्यन्तर = उनकी उपभेद रूप । जैसा कि कहा गया है—

"उनसे (= दशप्रधान नाडियों से) बहत्तर हजार नाड़ियाँ निकली हैं । पुनः इनसे बार-बार अन्य नाड़ियाँ भी निकली हैं ।" (स्व. तं. ७!९)

इसलिए शरीर में समनन करने से यह (वायु) समान नाम वाला है । अतः कहा गया—समस्थिति ॥ १९६ ॥

प्रश्न—यदि यह (वायु) दश नाडियों को आक्रान्त कर के वर्त्तमान है तो इससे इसका क्या वैशिष्ट्य हो जाता है जिससे इसका दश प्रकार कहा जा रहा है ?—यह शङ्का कर कहते हैं—

आठ दिग्दलों में सञ्चरण करता हुआ यह उन-उन दिशाओं के स्वामी की चेष्टाओं का क्रमशः अनुकरण करता हुआ रौद्र और सौम्य प्रतीत होता है ॥ -१९७-१९८- ॥

उन-उन दिशापतियों की—इन्द्र आदि की । चेष्टित = स्तम्भन आदि रूप । रौद्र दक्षिण आदि में । सौम्य—पश्चिम आदि में । इसीलिए पुरुषों में प्रतिक्षण क्रोध और हर्ष आदि का अविर्भाव होता है । जैसा कि कहा गया है—

'पद्मस्याष्टदलस्येत्थं तन्मध्ये भोगभुक्सदा।
संस्थितः सर्वगोऽप्यस्मात्कारणात्सुप्रतीयते ॥
येनाशु विषयान्दृष्ट्वा विचारयति सादरम् ।
शोकः क्रोधो विषादो वा विस्मयस्ताप एव च ॥
हर्षो वाप्यथ संचिन्त्य हृदयेनैव भाव्यते ।' इति ॥ १९७ ॥

एवमस्य सर्वत्र साम्येनावस्थानेऽपि मुख्यया वृत्त्या नाडीत्रय एव चारः—इत्याह—

स एव नाडीत्रितये वामदक्षिणमध्यगे ॥ १९८ ॥
इन्द्वर्काग्निमये मुख्ये चरंस्तिष्ठत्यहर्निशम् ।

नाडीत्रितये इति, इडापिङ्गलासुषुम्नात्मके । यदुक्तम्—

'दक्षिणे तु स्थितः सूर्यो वामे सोमो विराजते ।
पाके प्रकाशकत्वे च मध्यस्थश्चैव पावकः ॥' (स्व.तं. ७।५२)

इति यदुक्तम्—

'दशानां तु परं देवि नाडीत्रयमुदाहृतम् ।
बिन्दुनादात्मिके द्वे वै मध्ये शक्त्यात्मिका स्मृता॥' इति ।

नन्वत्र कथमसावहर्निशं चरन्नास्ते ?—इत्याशङ्क्याह—

"इस कारण सर्वत्र गमनशील भी (वह) इस प्रकार अष्टदल कमल के बीच भोग के भोक्ता (के रूप में) सदा स्थित प्रतीत होता है क्योंकि विषयों को देखकर शीघ्र सादर विचार करता है । शोक, क्रोध, विषाद, विस्मय, ताप अथवा हर्ष का चिन्तन कर हृदय से ही अनुभव करता है" ॥ १९७ ॥

इस प्रकार इसकी सर्वत्र समान रूप से स्थिति होने पर भी मुख्य रूप से तीन ही नाड़ियों में सञ्चार होता है—यह कहते हैं—

वह दिन रात वाम दक्षिण और मध्य, जो कि चन्द्र सूर्य और अग्निमय है, तीन मुख्य नाड़ियों में सञ्चरण करता हुआ स्थित है ॥ -१९८-१९९- ॥

तीन नाड़ियों में = इडा पिङ्गला और सुषुम्ना में । जैसा कि कहा गया है—

"दाहिनी ओर सूर्य बायीं ओर चन्द्र और पाक तथा प्रकाश करने वाला अग्नि मध्य में स्थित है ।" (स्व. तं. ७।५२)

जैसा कि कहा गया है—

"हे देवि ! दश नाड़ियों में तीन नाड़ियाँ प्रधान कही गई हैं । उनमें दो बिन्दु और नाद रूप हैं । मध्य में (वर्त्तमान सुषुम्ना नाडी) शक्तिरूप है ।"

सार्धनालीद्वयं प्राणशतानि नव यत्स्थितम् ॥ १९९ ॥
तावद्वहन्नहोरात्रं चतुर्विंशतिधा चरेत् ।

'षट्प्राणाश्चषकस्तेषां षष्टिर्नाली तथा तिथिः ।'

इत्याद्युक्त्या बाह्यायां घटिकायामन्तःप्राणचाराणां सषष्टिशतत्रयमुदियात्, इति बाह्येन सार्धेन घटिकाद्वयेन नवशतानि वहन् षष्टिघटिकात्म बाह्यमहोरात्रं चतुर्विंशतिभिः प्रकारैरर्थात् स एव समानश्चरेत्, येनात्र सषट्शतसहस्रैक-विंशत्यात्मकप्राणचाराश्रयेण चतुर्विंशतिः संक्रान्तीनामुदियात् । यदुक्तम्—

'चतुर्विंशतिसंक्रान्त्यः समधातोः स्वभावतः ।
शतानि नव वै हंस एकामेकां वहेत्सदा ॥'

(स्व.तं. ७।१६८) इति ।

'बाह्ये चैव त्वहोरात्रे अध्यात्मं तु वरानने ।
चतुर्विंशतिसंक्रान्तीः प्राणहंसस्तु संक्रमेत् ॥
अहनि द्वादश प्रोक्ता रात्रौ वै द्वादश स्मृताः ।'

(स्व०तं० ७।१६६) इति च ॥ १९९ ॥

एतदेव विभजते—

प्रश्न—यह (प्राण) दिन रात क्यों चलता रहता है ?—यह शङ्का कर कहते हैं—

(यह प्राण) ढाई घड़ी (= १ घंटा) में ९०० बार चलता है । एक दिन और रात्रि मिलाकर उसी प्रकार चलता हुआ २४ गुना (= २४ × ९०० = २१६००) बार चलता है ॥ -१९९-२००- ॥

"छ प्राण का एक चषक उन (चषकों) का साठ गुना एक नाडी फिर उसी प्रकार तिथि ।"

इत्यादि उक्ति के द्वारा बाहरी घटिका (= घड़ी) में ३६० प्राणचारों का उदय होता है । उस प्रकार बाध्य २॥ घटिका में ९०० बार चलता हुआ ६० घड़ी वाले एक दिन रात में २४ गुना वही समान वायु चलता है । जिससे इस (शरीर) में २१६०० प्राणचारों के आधार पर २४ संक्रान्तियों का उदय होता है । जैसा कि कहा गया है—

"समधातु (= स्वस्थ शरीर वाले मनुष्य) की स्वाभाविक रूप में २४ संक्रान्तियाँ होती हैं । एक-एक संक्रान्ति में (यह प्राणरूपी) हंस ९०० बार प्रवाहित होता है ।" (स्व. तं. ७।१६८)

"बाह्य दिन-रात और आध्यात्मिक (स्थिति) में हे वरानने ! यह प्राणहंस २४ संक्रान्तियाँ पार करता है । १२ संक्रान्तियाँ दिन में और बारह रात्रि में कही गई हैं" ॥ १९९ ॥ (स्व. तं. ७।१६६)

विषुवद्वासरे प्रातः सांशां नालीं स मध्यगः॥ २०० ॥
वामेतरोदक्सव्यान्यैर्यावत्संक्रान्तिपञ्चकम् ।
एवं क्षीणासु पादोनचतुर्दशसु नालिषु ॥ २०१ ॥
मध्याह्ने दक्षविषुवन्नवप्राणशतीं वहेत् ।
दक्षोदगन्योदग्दक्षैः पुनः संक्रान्तिपञ्चकम् ॥ २०२ ॥
नवासुशतमेकैकं ततो विषुवदुत्तरम् ।
पञ्चके पञ्चकेऽतीते संक्रान्तेर्विषुवद्बहिः॥ २०३ ॥
यद्वत्तथान्तः सङ्क्रान्तिर्नवप्राणशतानि सा।

'विषुवद्वासरे' रात्रिन्दिनसाम्यात्मनि मेषसंक्रान्तिदिने प्रातः सार्धशतचतुष्टयप्राण-चारात्मिकां सचतुर्भागां घटिकां मध्यगः सौषुम्नमार्गावस्थितः सन् स समानस्तावद्वामेतरोदक्सव्यान्यैर्वामदक्षनाड्योः प्रत्येकं सार्धनालीद्वयं पञ्चधा गमागमैश्चरेत् यावद्वृषादिकन्यान्तं संक्रान्तिपञ्चकं भवेत्, येन सभागत्रयासु त्रयोदशसु घटिकासु व्यतीतासु मध्यनाड्यां मध्याह्नसमये दक्षविषुवत्तुलासंक्रान्तिर्नवप्राणशतीं वहेत्, सार्धघटिकाद्वयमुदियादित्यर्थः । ततोऽपि दक्षोदगन्योदग्दक्षैर्दक्षवामनाड्योः समानस्य

इसी का विभाग करते हैं—

मेष की संक्रान्ति के दिन प्रातःकाल में सांश नाड़ी में वह सुषुम्नावाही (प्राण) वाम और दक्षिण (नाडियों) में वाम (= उत्तर) फिर उत्तर (= दक्षिण) फिर उत्तर फिर सव्य (= दक्षिण) फिर अन्य (= उत्तर) इस प्रकार पाँच संक्रान्ति (२) + (२) करता है । इस प्रकार एक चौथाई कम चौदह (= १३।३।४) नाड़ियों में मध्याह्न में वह दक्षिण विषुवत् में ९०० बार चलता है । दक्षिण फिर उत्तर फिर अन्य (= दक्षिण) फिर उत्तर फिर दक्षिण के द्वारा पुनः पाँच संक्रान्ति करता है । इसके बाद विषुवत् के उत्तर में एक-एक में ९०० संक्रान्ति करता है । विषुवत् के बाहर पाँच-पाँच संक्रान्ति के बीत जाने पर जैसे (प्राण संक्रान्ति होती है) उसी प्रकार ९०० प्राणसंक्रान्ति भीतर भी होती हैं ॥ -२००-२०४- ॥

विषुवत् दिन में = जब रात और दिन बराबर होते है तब अर्थात् मेष की संक्रान्ति के दिन, प्रातः ४५० प्राणचारों वाली = चतुर्भागसहित (= १।१।४) घटिका तक, मध्यस्थ सुषुम्ना में स्थित हुआ वह = समान वायु, दक्षिण और वाम नाड़ियों में प्रत्येक में २।१।२ घड़ी तक पाँच गुना गमनागमन कर चलता रहता है। वृष से कन्या तक पाँच संक्रान्तियाँ होती है जिससे १३।३।४ घड़ियों के व्यतीत होने पर मध्य नाडी में मध्याह्न काल में दक्षिण विषुवत् = तुलासक्रान्ति । ९०० वाला यह प्राण ९०० बार चलता है अर्थात् २।१।२ घड़ी (उसमें) रहता है। उसके बाद दक्षिण वाम नाड़ियो में समान (प्राण) के पाँच बार गमागमन से

पञ्चधा गमागमैः पुनरेकैकं नवासुशतं प्रत्येकं सार्धनालीद्वयं वृश्चिकादिमीनान्तं सङ्क्रातिपञ्चकमुदेतीत्यर्थः । तदनन्तरं च मध्यनाड्यां सायमुत्तरं मेषसङ्क्रान्तिरूपं विषुवत् प्राग्वत्सार्धशतचतुष्टयप्राणचारात्म सचतुर्भागैकघटिकोदयं भवेद्येन त्रिंशद्-घटिकात्मनि दिने सङ्क्रान्तिद्वादशकमुदियात् । तत्र सङ्क्रान्तीनामेकादशकम-खण्डम्, एका तु सायंप्रातरर्धार्धिकया, तस्य चार्धद्वयस्य पक्षसन्धिवद्रात्रीयार्धद्वय-संमेलनेऽप्यखण्डत्वम्, इति सायंप्रातरुत्तरविषुवद्द्वयं मध्याह्नार्धरात्रयोश्च दक्षविषुवद्-द्वयमिति । यद्वक्ष्यति—

'रात्र्यन्तदिनपूर्वांशौ मध्याह्नो दिवसक्षयः ।
स शर्वर्युदयो मध्यमुदक्तो विषुतेदृशी ॥'

(तं० ६।२०५) इति ।

एतच्च दक्षविषुवद्दिनोदयाभिप्रायेण—

'दक्षिणादुत्तरं याति उत्तराद्दक्षिणं यदा ।
दक्षिणोत्तरसंक्रान्तिः सा चैवं संविधीयते ॥
दक्षिणस्यां यदा नाड्यां संक्रामेत्तु यंदोत्तरम् ।
यावदर्धं तु तत्रस्थं मध्येनोत्तरतो वहेत् ॥
तावत्तु विषुवत्प्रोक्तमुत्तरं तूत्तरायणे ।
उत्तराद्दक्षिणायां तु संक्रामन्स वरानने ॥

पुनः एक-एक में ९०० के हिसाब से २।१।२ घड़ी तक की सीमा रखकर वृश्चिक से मीन तक पाँच संक्रान्तियाँ बनती हैं । उसके बाद मध्य नाड़ी में सायंकाल मेष की संक्रान्ति रूप विषुवत् पहले की भाँति ४५० प्राणचारात्मक १।१।४ घड़ी तक उदय होता है । इस प्रकार तीस घड़ी वाले दिन में १२ संक्रान्तियाँ उदित होती हैं। उनमें ११ संक्रान्तियाँ अखण्ड हैं और एक सांय और प्रातः आधी-आधी होती हैं । उन दोनों आधों को, पक्षसन्धि के समान, रात्रिकालीन दो आधों के साथ मिला देने पर वे भी अखण्ड हो जाती हैं । इस प्रकार सायं और प्रातः दो उत्तर विषुवत् और मध्याह्न और मध्य रात्रि में दो दक्षिण विषुवत् होते हैं । जैसा कि कहेंगे—

रात्रि का अन्त, दिन का पूर्वांश, मध्याह्न, सायं, रात्रि का उदय और (रात्रि का) मध्य इस प्रकार उत्तर विषुवत् से उदय होता है । (तं. आ. ६।२९६)

दक्षिण विषुवत् दिन के उदय के अभिप्राय से स्वच्छन्दतन्त्र में कहा गया है—

"जब (प्राण) दक्षिण से उत्तर और उत्तर से दक्षिण को जाता है तो इस प्रकार यह दक्षिणउत्तर संक्रान्ति होती हैं । जब दक्षिण नाड़ी में उत्तर की ओर संक्रमण करता है उसमें जितना आधा मध्य से उत्तर की ओर चलता है उतना उत्तरायण में उत्तर विषुवत् कहा गया है । हे वरानने ! उत्तर से दक्षिण में संक्रमण करता हुआ

यावदर्धं वहेत्तत्र अर्धं दक्षिणतो वहेत् ।
विषुवद्दक्षिणं तावद्दक्षिणायनजं प्रिये ॥' (स्व.तं. ७।१६३)

इत्यादि श्रीस्वच्छन्दशास्त्रेऽभिहितम् । न चान्तरपूर्व एवायं संक्रान्तीनामुदय इत्याह—'पञ्चक' इत्यादि । सङ्क्रान्तिरिति, विषुवद्रूपा । 'नवप्राणशतानि सा' इत्यनेन यथोक्तमेव मानं स्मारितम् ॥ २०३ ॥

एतदेवान्यत्राप्यतिदिशति—

एवं रात्रावपीत्येवं विषुवद्दिवसात्समात् ॥ २०४ ॥
आरभ्याहर्निशावृद्धिह्रासस‌ङ्क्रान्तिगोऽप्यसौ ।

इत्येवं बाह्येनाहोरात्रेण संक्रान्तिचतुर्विंशतेरुदयादि सर्वं समात् त्रिंशद्घटिका-द्विषुवद्दिवसादारभ्योक्तम्, अन्यथा ह्यहर्निशयोर्वृद्धिह्रासौ न स्यातां, येन संक्रान्तिष्वपि चयापचयाभ्याम् अहनि द्वादश संक्रान्तयो रात्रौ च, इत्येवं विभागनियमो नोक्तः स्यात् ॥ २०४ ॥

अत्र च विषुवत्संक्रान्तीनां विभागं स्फुटयति—

रात्र्यन्तदिनपूर्वांशौ मध्याह्नो दिवसक्षयः ॥ २०५ ॥

जितना आधा प्रवाहित होता है उसमें आधा दक्षिण से प्रवाहित होता है । हे प्रिये ! उतना दक्षिणायन वाला दक्षिण विषुवत् कहा जाता है ।'' (स्वं तं. ७।१६३)

यह संक्रान्तियों का उदय आन्तर पूर्व नहीं है; इसलिए कहते हैं—'पञ्चक' इत्यादि। संक्रान्ति—विषुवत् रूपा । वह ९०० प्राणचार वाली होती है—इस (कथन) से पहले कहे गये परिमाण का स्मरण कराया गया ॥ २०३ ॥

इसी (विषय) को दूसरी जगह भी निर्दिष्ट करते हैं—

इसी प्रकार रात्रि में भी (प्राण सञ्चार होता है) । सम विषुवत् दिवस से आरम्भ कर दिन रात की वृद्धि और ह्रास में तथा संक्रान्ति में भी यह (समान वायु) चलता है ॥ -२०४-२०५- ॥

इस प्रकार बाह्य अहोरात्र के द्वारा २४ संक्रान्तियों का उदय आदि सब सम = ३० घड़ी वाले, विषुवत् दिवस से लेकर कहा गया । अन्यथा दिन और रात्रि के वृद्धि और ह्रास नहीं होंगे । संक्रान्तियों में भी उपचय और अपचय के द्वारा दिन में १२ और रात्रि में बारह संक्रान्तियाँ होती है—यह विभाग का नियम नहीं कहा गया होता ॥ २०४ ॥

यहाँ विषुवत्संक्रान्तियों का विभाग स्पष्ट करते हैं—

रात्रि का अन्त, दिन का पूर्वभाग, मध्याह्न, दिन का अन्त, रात्रि का प्रारम्भ और (रात्रि का) मध्य, ऐसा उत्तर से विषुवत् का उदय

स शर्वर्युदयो मध्यमुदक्तो विषुतेदृशी ।

मध्यमित्यर्थाच्छर्वर्याः । 'उदक्तः' इति उत्तराद्विषुवत आरभ्येत्यर्थः । यदुक्तम्—

'पूर्वाह्णे विषुवत्त्वेकं मध्याह्ने तु द्वितीयकम् ।
तृतीयं चापराह्णे वै अर्धरात्रे चतुर्थकम् ॥
चतुर्धा विषुवत्प्रोक्तमहोरात्रेण मुक्तिदम् ॥'

(स्व.तं. ७।१६७) इति ॥ २०५ ॥

नान्वासां चतसृणां संक्रान्तीनामेवं व्यपदेशे किं निमित्तम् ?—इत्याशङ्क्याह—

व्याप्तौ विषेर्यतो वृत्तिः साम्यं च व्याप्तिरुच्यते ॥ २०६ ॥
तदर्हति च यः कालो विषुवत्तदिहोदितः ।

वृत्तिरिति, 'विष्लृ व्याप्तौ' इति पाठात् । 'अर्हति' इत्यर्हेऽर्थे वतेः प्रयोगात् ॥ २०६ ॥

ननु विषुवत्संक्रान्तौ यद्येवं नियमस्तत्तदितरासु का व्यवस्था ?—इत्याशङ्क्याह—

विषुवत्प्रभृति ह्रासवृद्धी ये दिनरात्रिगे ॥ २०७ ॥

होता है ॥ -२०५-२०६ ॥

मध्य—अर्थात् रात्रि का (मध्य) । उदक्तः—उत्तर विषुवत् से आरम्भ करके । जैसा कि कहा गया—

"पूर्वाह्न में एक विषुवत्, मध्याह्न में दूसरा, अपराह्ण में तीसरा और अर्धरात्रि में चौथा एक दिन रात में मुक्ति को देने वाला यह चार प्रकार का विषुवत् कहा गया है" ॥ २०५ ॥ (स्व. तं. ७।१६७)

प्रश्न—इन चार संक्रान्तियों के ऐसे वर्णन (विषुवत् कहने) का क्या कारण है ?—यह शङ्का कर कहते हैं—

चूंकि 'विष्लृ' धातु की वृत्ति (= तात्पर्य) व्याप्ति है । और व्याप्ति साम्य को कहा जाता है । जो काल उसके योग्य होता है वह यहाँ विषुवत् कहा गया है ॥ -२०६-२०७- ॥

वृत्ति—'विष्लृ व्याप्तौ' ऐसा पाठ होने से । 'अर्हति' इस का अर्थ है कि योग्य अर्थ में 'वति' प्रत्यय का प्रयोग हुआ है ॥ २०६ ॥

प्रश्न—यदि विषुवत् संक्रान्ति के विषय में यह नियम है तो दूसरी (संक्रान्तियों) में क्या व्यवस्था है?—यह शङ्का कर कहते हैं—

विषुवत् से लेकर एक दिन और रात्रि में होने वाले जो ह्रास और

तत्क्रमेणैव संक्रान्तिह्रासवृद्धी दिवानिशोः।

तत्क्रमेणेति, रात्रिदिनवृद्धिह्रास्यपरिपाट्या तेन पञ्चत्रिंशद्घटिके दिने चतुर्दश संक्रान्तयः, पञ्चविंशतिघटिकायां रात्रौ दशेति ॥ २०७ ॥

तदेवोपसंहरति—

इत्थं समानमरुतो वर्षद्वयविकल्पनम् ॥ २०८ ॥
चार एकत्र नह्यत्र श्वासप्रश्वासचर्चनम् ।

वर्षद्वय इति, संक्रान्तिचतुर्विंशतेरुदयात् । एकत्रेति, न तु प्राग्वत्प्राणापानात्मनि चारद्वये ॥ २०८ ॥

ननु किमत्र वर्षद्वयमेवोदियादुतान्यदपि ?—इत्याशङ्क्याह—

समानेऽपि तुटेः पूर्वं यावत्षष्ट्यब्दगोचरम् ॥ २०९ ॥
कालसंख्या सुसूक्ष्मैकचारगा गण्यते बुधैः ।

सुसूक्ष्मत्वे हेतुः 'एकचारगा' इति । पूर्वं हि तुट्याद्युदयश्चारद्वये प्रोक्तः—इत्येतदपेक्षया तत्र स्थौल्यं संभाव्यमिति भावः ॥ २०९ ॥

वृद्धि हैं उसी क्रम से दिन और रात्रि में संक्रान्तियों के ह्रास और वृद्धि होते हैं ॥ -२०७-२०८- ॥

उसी क्रम से = रात्रि और दिन के वृद्धि और ह्रास की रीति से । इससे ३५ घड़ी वाले दिन में १४ संक्रान्तियाँ तथा २५ घड़ी वाली रात्रि में दश संक्रान्तियाँ होती हैं (क्योंकि २(१/२) घड़ी की एक संक्रान्ति होती है) ॥ २०७ ॥

उसी का उपसंहार करते हैं—

इस प्रकार समान वायु की दो वर्ष की कल्पना हैं । इसका सञ्चरण एक स्थान में होता है । यहाँ श्वास प्रश्वास की चर्चा नहीं है ॥ -२०८-२०९- ॥

दो वर्ष—२४ संक्रान्तियों का उदय होने से । एकत्र = न कि पहले की भांति प्राण अपान रूप दो सञ्चरणों में ॥ २०८ ॥

प्रश्न—यहाँ दो ही वर्षों का उदय होता है या अन्य का भी ?—यह शङ्का कर कहते हैं—

समान वायु में भी तुटि से पूर्व ६० वर्ष तक की गणना की जाती है । एक चार में होने वाली यह गणना अत्यन्त सूक्ष्म होने से विद्वानों के ही द्वारा गिनी जाती है ॥ -२०९-२१०- ॥

सुसूक्ष्मता में हेतु हैं—'एकचारगा' अर्थात् एकप्राणचार में रहने वाली । पहले

नन्वत्राप्येवं विभागेन कोऽर्थ ?—इत्याशङ्क्याह—

संध्यापूर्वाह्णमध्याह्नमध्यरात्रादि यत्किल ॥ २१० ॥
अन्तःसंक्रान्तिगं ग्राह्यं तन्मुख्यं तत्फलोदितेः ।

एतदुपसंहरन्नन्यदवतारयति—

उक्तः समानगः काल उदाने तु निरूप्यते ॥ २११ ॥

तदेवाह—

प्राणव्याप्तौ यदुक्तं तदुदानेऽप्यत्र केवलम् ।
नासाशक्त्यन्तयोः स्थाने ब्रह्मरन्ध्रोर्ध्वधामनी ॥ २१२ ॥
तेनोदानेऽत्र हृदयान्मूर्धन्यद्वादशान्तगम् ।
तुट्यादिषष्ठिवर्षान्तं विश्वं काले विचारयेत् ॥ २१३ ॥

यदि परमत्रानयोः प्राणोदानयोरियान्विशेषो यत्प्राणस्य ब्रह्मरन्ध्रवर्तिनासिक्यद्वादशान्तमुदयस्थानमस्य तु ऊर्ध्वधामवर्तिशक्तिद्वादशान्तमिति । तेनेति, शक्तिद्वादशान्तं यावदुदानव्याप्तेः ॥ २१३ ॥

तुटि आदि का उदय दो चारों में कहा गया—इसलिए इसकी अपेक्षा उसमें स्थूलता की संभावना है ॥ २०९ ॥

अन्यत्र भी इस प्रकार विभाग करने से क्या प्रयोजन ?—यह शङ्का कर कहते हैं—

सन्ध्या, पूर्वाह्ण, मध्याह्न, मध्यरात्रि आदि जो कुछ है वह सब अन्तःसंक्रान्ति से सम्बद्ध समझना चाहिए । उसमें फल का उदय होने से वह मुख्य है ॥ -२१०-२११- ॥

इसका उपसंहार करते हुए दूसरे का उपक्रम करते हैं—

समान से सम्बद्ध काल का वर्णन कर दिया गया । उदान वाले (काल) का निरूपण किया जा रहा है ॥ -२११ ॥

वही कहते हैं—

प्राणव्याप्ति के विषय में जो कहा गया वही उदान के विषय मे भी है । यहाँ केवल नासाशक्त्यन्त के स्थान पर ब्रह्मरन्ध्र और ऊर्ध्व धाम (समझना चाहिए) । इसलिए यहाँ उदान में हृदय से लेकर मूर्धन्य द्वादशान्त तक तुटि से लेकर साठ वर्ष का सम्पूर्ण काल का विचार करना चाहिए ॥ २१२-२१३ ॥

यहाँ इन दोनों प्राण और उदान में इतना अन्तर है कि प्राण का उदयस्थान ब्रह्मरन्ध्र में वर्त्तमान नासिक्यद्वादशान्त है और इसका ऊर्ध्वधाम में रहने

नन्वेवं कालीयो विभागः किं व्याने संभवेन्न वा ?—इत्याशङ्क्याह—

व्याने तु विश्वात्ममये व्यापके क्रमवर्जिते ।
सूक्ष्मसूक्ष्मोच्छलद्रूपमात्रः कालो व्यवस्थितः ॥ २१४ ॥

सूक्ष्मसूक्ष्मेति, स्पन्दमात्रात्मेत्यर्थः । अत्रैव विश्वात्ममयत्वादिविशेषणद्वारेण हेतुत्रयम्; अत एव चास्य व्यापकत्वात्मना विशेषेणाननाद् व्यानत्वम् ॥ २१४ ॥

एषां च क्रमेण सृष्ट्यादिपञ्चकृत्यकारित्वमस्ति—इत्याह—

सृष्टिः प्रविलयः स्थेमा संहारोऽनुग्रहो यतः ।
क्रमात्प्राणादिके काले तं तं तत्राश्रयेत्ततः ॥ २१५ ॥

तं तमिति, प्राणादिकम् । तत्रेति, सृष्ट्यादिकारित्वे ॥ २१५ ॥

एवं प्राणे चारमानादि सर्वमभिधाय तदानन्तर्येणानुजोद्देशोद्दिष्टं वर्णोदयं वक्तुमुपक्रमते—

प्राणचारेऽत्र यो वर्णपदमन्त्रोदयः स्थितः ।
यत्नजोऽयत्नजः सूक्ष्मः परः स्थूलः स कथ्यते ॥ २१६ ॥

वाला शक्तिद्वादशान्त । इस कारण—शक्तिद्वादशान्त तक उदान की व्याप्ति होने से ॥ २१३ ॥

प्रश्न—इस प्रकार का कालसम्बन्धी विभाग व्यान में सम्भव है या नहीं ?—यह शङ्का कर कहते हैं—

विश्वात्ममय व्यापक और क्रमरहित व्यान में केवल सूक्ष्म-सूक्ष्म उच्छलत्तारूप काल व्यवस्थित है ॥ २१४ ॥

सूक्ष्म-सूक्ष्म = केवल स्पन्दरूप । यहीं विश्वात्ममयत्व आदि विशेषण के द्वारा तीन हेतु कहे गए हैं । और इसीलिये इसके व्यापक होने से विशेष रूप से अनन (= प्राणन) करने के कारण यह व्यान है ॥ २१४ ॥

ये (= पाँच प्रकार वाले वायु) क्रमशः सृष्टि आदि पाँच कृत्य करते हैं—

यह कहते हैं—चूँकि सृष्टि, निग्रह, स्थिति, संहार और अनुग्रह ये क्रमशः प्राण आदि के काल में होते हैं इसलिए वहाँ उस-उस का आश्रयण करना चाहिए ॥ २१५ ॥

उस-उस = प्राण आदि का । वहाँ = सृष्टि आदि करने में ॥ २१५ ॥

इस प्रकार प्राण में चारमान आदि सबका कथन कर उसके बाद अनुजोद्दिष्ट वर्ण का उदय कहना प्रारम्भ करते हैं—

इस प्राणचार में जो वर्ण पद मन्त्र का उदय स्थित है वह यत्नज

इह तावत्प्राणचारे वर्णानां पदानां मन्त्राणां चोदय इति स्थितम् । स तु द्विधा—स्वारसिकः प्रायत्निकश्चेति । तत्राद्यो वर्णानां, तेषां नैयत्येन सर्वत्रैवाविशेषात्; द्वितीयस्तु पदानां मन्त्राणां च । ते हि वर्णवदपरिगणितत्वादनियताः, इति योगीच्छानिबन्धन एवैषामुदयः । यो हि यस्याभिप्रेतो मन्त्रादिः स तस्योदयं कारयेत्; अतश्च परेच्छाधीनत्वादेषां प्रायत्निक एवोदयः, स च समनन्तराह्निके प्रतिपादयिष्यते । यद्वक्ष्यति—

'इत्ययत्नजमाख्यातं यत्नजं तु निगद्यते ।'

(तं० ७।२) इति ॥ २१६ ॥

इह पुनर्वर्णोदय एवायत्नजः परसूक्ष्मस्थूलात्मतया त्रिप्रकारोऽभिधीयते । तत्र परस्यापि वर्णोदयस्य तरतमभावेन द्वैविध्यमिति परतमं तदुदयमभिधातुमुपक्रमते—

एको नादात्मको वर्णः सर्ववर्णाविभागवान् ।
सोऽनस्तमितरूपत्वादनाहत इहोदितः ॥ २१७ ॥

इह खल्वेक एव सर्ववर्णसामान्यात्मा सततोच्चरद्रूपत्वादनाहतशब्दाभिधेयो नादात्मको वर्ण 'उदितः' सततमेवोदयमान आस्त इत्यर्थः ॥ २१७ ॥

अयत्नज, सूक्ष्म, पर और स्थूल कहा जाता है ॥ २१६ ॥

प्राणचार में वर्णों पदों और मन्त्रों का उदय होता है यह निश्चित है । वह दो प्रकार का होता है—स्वाभाविक और यत्नज । उनमें से पहला वर्णों का है क्योंकि वे नियत रूप से सर्वत्र समान है । दूसरा पदों और मन्त्रों का है । वे वर्ण के समान परिगणित न होने से अनियत है इसलिए इनका उदय कराता है । अतः दूसरे की इच्छा के अधीन होने से इनका उदय प्रायत्निक ही है । वह बाद वाले आह्निक में बतलाया जायगा । जैसा कि कहेंगे—

"यह अयत्नज कहा गया । अब यत्नज कहा जाता है" ॥ २१६ ॥ (तं. आ. ७।२)

यहाँ वर्ण का उदय ही अयत्नज है (जो कि) पर सूक्ष्म और स्थूल रूप से तीन प्रकार का कहा जाता है । उनमें पर वर्णोदय भी परतर और परतम भाव से दो प्रकार का है । इसलिए उसके परतम उदय को कहने के लिए उपक्रम करते हैं—

नादात्मक वर्ण एक है जिसमें सब वर्ण बिना विभाग के रहते हैं । वह अनस्तमित रूप वाला होने के कारण अनाहत रूप इस (जगत्) में सतत उदीयमान है ॥ २१७ ॥

सभी वर्णों का सामान्यरूप से निरन्तर उच्चरित होने के कारण अनाहत शब्द से कहा जाने वाला नादात्मक वर्ण एक और उदित = निरन्तर ही उदीयमान

स एव च परमुपेयः—इत्याह—

स तु भैरवसद्भावो मातृसद्भाव एष सः ।
परा सैकाक्षरा देवी यत्र लीनं चराचरम् ॥ २१८ ॥

द्वितीयं परतमपि एषामुदयमभिधातुमाह—

ह्रस्वार्णत्रयमेकैकं रव्यंगुलमथेतरत् ।
प्रवेश इति षड्वर्णाः सूर्येन्दुपथगाः क्रमात् ॥ २१९ ॥
इकारोकारयोरादिसन्धौ संध्यक्षरद्वयम् ।
एओ इति प्रवेशे तु ऐऔ इतिद्वयं विदुः ॥ २२० ॥
षण्ठार्णानि प्रवेशे तु द्वादशान्तललाटयोः ।
गले हृदि च बिन्द्वर्णविसर्गौ परितः स्थितौ ॥ २२१ ॥

'रव्यंगुलम्' इति द्वादशाङ्गुलम्; अत एवाकारादेर्ह्रस्वत्रयस्योदयात्प्राणवाहे षट्त्रिंशदंगुलानि भवन्ति । इतरदिति, दीर्घत्रयम् । षड्वर्णा इति, अकाराद्युकारान्ताः । क्रमादिति—सूर्यपथे ह्रस्वानां त्रयमिन्दुपथे च दीर्घाणामिति । आदि-

---

है ॥ २१७ ॥

और वही परम उपेय है—यह कहते हैं—

वही भैरवसद्भाव है वही यह मातृसद्भाव है । वही वह परा एकाक्षरा देवी है जहाँ चर और अचर लीन होता है ॥ २१८ ॥

इनके दूसरे परतर उदय को बतलाने के लिए कहते हैं—

तीन ह्रस्व वर्ण (= अ इ उ, में से) प्रत्येक रवि (= १२)—अंगुल (प्राणवाह वाला है) फिर (प्राण के) प्रवेश में दूसरे (= दीर्घ आ ई ऊ) भी १२ अंगुल प्राणवाह वाला है । इस प्रकार छ वर्ण (= अ इ उ आ ई ऊ,) क्रमशः सूर्य और चन्द्र मार्ग पर चलने वाले हैं । उकार या ईकार तथा उकार (या ऊकार वर्णों) की आदि (= अ आ) के साथ सन्धि होने पर ए ओ दो सन्ध्यक्षर बनते हैं । और प्रवेश में (= पुनः अ या आ के साथ युक्त होने पर) ऐ और औ ये दो (सन्ध्यक्षर) माने (गए) हैं । (प्राण के) प्रवेश में षण्ठ वर्ण (= ऋ और ऌ) द्वादशान्त और ललाट में (उदित होते हैं) बिन्दु वर्ण (= अनुस्वार) और विसर्ग कण्ठ और हृदय में चारो ओर स्थित हैं ॥ २१९-२२१ ॥

रव्यंगुल = बारह अंगुल । इसलिए अकार आदि तीन ह्रस्व वर्णों का उदय होने से प्राणवाह में ३६ अंगुल होते हैं । अन्य = तीन दीर्घ । छ वर्ण = अ से लेकर ऊ तक । क्रमशः = सूर्यपथ में तीन ह्रस्वों का और चन्द्रपथ में तीन दीर्घों

संधाविति, अकारेणाकारेण च 'संधौ' संधिकार्ये कृते सतीत्यर्थः । अस्यैव संध्यक्षरद्वयस्यादिसंधावितरत्संध्यक्षरद्वयम् । एषां च प्रत्येकमष्टादशांगुलमुदयो येन प्राणापानवाहयोर्व्याप्तिः सिद्ध्येत् । प्रवेश इति न तु निर्गमेऽपि । द्वादशान्तेति न तु समचतुर्भागकलनया, तेन द्वादशान्ते ॠकारः, इत्यादि क्रमः । 'परितः' इति सर्वतः । तेन प्राणे बिन्दोः षट्त्रिंशदङ्गुलात्मन्यभ्युदयो विसर्गस्य त्वपाने, द्वयोरपि बिन्दुनादात्मकत्वात् ॥ २२१ ॥

एतदेवान्यत्राप्यतिदिशति—

कादिपञ्चकमाद्यस्य वर्णस्यान्तः सदोदितम्।
एवं सस्थानवर्णानामन्तः सा सार्णसन्ततिः ॥ २२२ ॥

अन्तरिति, तेन यदेवाकारस्योदयस्थानं तदेव कवर्गस्येति । सस्थानवर्णानामितीकारादीनां सा सेति चवर्गादिका, तदिकारोदयस्थाने चवर्गस्य यकार-शकारयोश्चोदय इत्यादिक्रमः ॥ २२२ ॥

ननु सर्वत्रायं नियमः किं संभवेन्न वा ?—इत्याशङ्क्याह—

का (उदय होता है) । आदि सन्धि में = अकार और आकार के साथ सन्धि में = सन्धि कार्य किए जाने पर । इन्हीं दो सन्ध्यक्षरों की पुनः आदि दो अक्षरों के साथ सन्धि करने पर अन्य दो सन्ध्यक्षर (उदित होते हैं) । इनमें से प्रत्येक का अठारह अंगुल उदय होता है जिससे प्राणवाह और अपानवाह की व्याप्ति सिद्ध होती है । प्रवेश में—न कि निर्गम में भी । द्वादशान्त में—न कि समान चार भाग की गणना से । इससे द्वादशान्त में ॠकार (और ललाट में ॡकार) यह क्रम समझना चाहिए। परितः = सर्वतः । इसलिए ३६ अंगुल वाले प्राण में बिन्दु का उदय और अपान मे विसर्ग का (उदय) होता है । क्योंकि दोनों बिन्दु और नाद रूप हैं ॥ २२१ ॥

यही अन्यत्र भी बतलाते हैं—

क आदि पाँच (= क...ङ) आद्य वर्ण (= अ) के अन्दर सदा उदित हैं । इसी प्रकार सस्थान वर्णों (इ, ॠ, ॡ, उ) के भीतर वह-वह वर्ण सन्तति (= चवर्ग यश, टवर्ग र ष, तवर्ग लस, प वर्ग व) उदित होती है ॥ २२२ ॥

अन्तः—इस कारण जो अकार का उदय स्थान है वही कवर्ग का भी है । सस्थान वर्णों का = इकार आदि का । वह-वह = अवर्ग आदि । इस प्रकार इकार के उदयस्थान में चवर्ग यकार और शकार का उदय होता है—इत्यादि क्रम है ॥ २२२ ॥

यह नियम सर्वत्र सम्भव है या नहीं ?—यह शङ्का कर कहते हैं—

हृद्येष प्राणरूपस्तु सकारो जीवनात्मकः ।
बिन्दुः प्रकाशो हार्णश्च पूरणात्मतया स्थितः ॥ २२३ ॥

यद्यपि सस्थानतया सकारस्य दन्ता उदयस्थानं हकारस्य च कण्ठ-स्तथापि प्राणात्मजीवनरूपत्वात्सकारो हृद्युदेति हकारश्च प्रकाशात्मकत्वात्सर्वत इति ॥ २२३ ॥

एतदुपसंहरन्नन्यदवतारयति—

उक्तः परोऽयमुदयो वर्णानां सूक्ष्म उच्यते ।

सूक्ष्मश्च त्रिधेति । तत्र सूक्ष्मसूक्ष्मं तावदुदयमाह—

प्रवेशे षोडशौन्मुख्ये रवयः षण्ठवर्जिताः ॥ २२४ ॥
तदेवेन्द्वर्कमत्रान्ये वर्णाः सूक्ष्मोदयस्त्वयम् ।

षोडशेति, अपानवाहस्यानन्दप्राधान्यात्; अत एव परोदयेऽप्यपानवाह एव षण्ठवर्णानामुदय उक्तः । 'औन्मुख्ये' इति निर्गमे । तेनापाने प्रत्येकं सचतुर्भाग-मंगुलद्वयमुदयः प्राणे पुनरंगुलत्रयमिति । तदेव वर्णानां षोडशकं द्वादशकं वावलम्ब्यान्ये सस्थानाः कवर्गाद्या इन्द्वर्कप्राणापानविषये समुदयन्ति—इत्यत्र

यह प्राणरूप जीवनात्मक सकार हृदय में (उदित होता है) बिन्दुरूप ह वर्ण प्रकाशरूप होने से सर्वव्यापी रूप में स्थित हैं ॥ २२३ ॥

यद्यपि समानस्थानता के कारण स का उदयस्थान दन्त और हकार का (उदय-स्थान) कण्ठ है तथापि प्राणात्मक जीवन रूप होने के कारण सकार हृदय में उदित होता है और हकार प्रकाशात्मक होने से सर्वत्र ॥ २२३ ॥

इसका उपसंहार करते हुए दूसरे की अवतारणा करते हैं—

वर्णों का यह पर उदय कहा गया । अब सूक्ष्म कहा जा रहा है ॥ २२४- ॥

सूक्ष्म तीन प्रकार का होता है । उनमें से सूक्ष्म सूक्ष्म उदय को कहते हैं—

षण्ठ वर्णों को छोड़कर प्रवेश में सोलह और औन्मुख्य में रवि (= बारह, वर्ण उत्पन्न होते हैं) । वही चन्द्र और सूर्य है यहाँ अन्य वर्ण उदित होते हैं । यह सूक्ष्म उदय हैं ॥ -२२४-२२५- ॥

सोलह =अपानवाह के आनन्दप्रधान होने से । इस लिए पर उदय में भी अपानवाह में ही षण्ठ वर्णों का उदय कहा गया । औन्मुख्य में = निर्गम में । इस प्रकार अपान में प्रत्येक उदय २।१।४ अंगुल का है और प्राण में तीन अंगुल का । तो इस प्रकार सोलह या बारह वर्णों के आधार पर अन्य समानस्थान वाले कवर्ग आदि चन्द्र और सूर्य = प्राण और अपान के विषय में उदित होते हैं । इस प्रकार

सूक्ष्मेऽपि वर्णोदये सूक्ष्मोऽयमुदय इत्यर्थः ॥ २२४ ॥

एवं सूक्ष्मसूक्ष्मं वर्णोदयमभिधाय सूक्ष्मस्थूलमप्याह—

कालोऽर्धमात्रः कादीनां त्रयस्त्रिंशत उच्यते ॥ २२५ ॥
मात्रा ह्रस्वाः पञ्च दीर्घाष्टकं द्विस्त्रिःप्लुतं तु लृ ।

दीर्घाष्टकमिति, संध्यक्षरैः सह । द्विरिति, द्विमात्रं, त्रिरिति त्रिमात्रं, दीर्घाणां च प्लुतत्वेऽपि तन्नोक्तं तस्योच्चारणापेक्षत्वात्; नह्येषां दीर्घत्ववत्प्लुतत्वमपि स्वाभाविकमिति भावः । एवं लृकारस्यापि प्लुतत्वमेव स्वभावः—इति दीर्घत्वापरिगणनेन तदेवेहास्य प्राधान्येनोक्तमिति न कश्चिद्दोषः । तेन कादीनां त्रयस्त्रिंशदर्धमात्राः ह्रस्वानां दश, दीर्घाणां द्वात्रिंशत्, प्लुतस्य षडित्येकाशीतिरर्धमात्राणामिति ॥ २२५ ॥

नन्वेवं विभाजने किं प्रमाणम् ?—इत्याशङ्क्याह—

एकाशीतिमिमामर्धमात्राणामाह नो गुरुः ॥ २२६ ॥

तस्याप्येवमभिधाने क इवाशयः ?—इत्याशङ्क्याह—

यहाँ सूक्ष्म वर्णोदय में यह सूक्ष्म उदय है ॥ २२४ ॥

इस प्रकार सूक्ष्म-सूक्ष्म वर्णोदय का कथन कर अब सूक्ष्म-स्थूल को भी कहते हैं—

क् आदि ३३ वर्णों का काल आधी मात्रा वाला कहा जाता है । ह्रस्व मात्राएँ ५ हैं, आठ दीर्घ दो मात्राओं और प्लुत तीन मात्राओं का होता है । लृ (दीर्घ नहीं होता वह प्लुत होता है ॥ -२२५-२२६- ॥

दीर्घ आठ होते हैं—सन्ध्यक्षरों के साथ । द्विः = दो मात्रा वाला । त्रिः = तीन मात्रा वाला । दीर्घ प्लुत भी होते हैं (किन्तु) यह नहीं कहा गया क्योंकि उनके (= प्लुत के) उच्चारण के लिए प्रयास करना पड़ता है । इनका प्लुतत्व दीर्घत्व के समान स्वाभाविक नहीं हैं । इसी प्रकार लृकार का भी प्लुत ही स्वभाव है । इसलिए दीर्घत्व की गणना न कर उसी (= प्लुत) को यहाँ प्रधान रूप से कहा गया । इसलिए कोई दोष नहीं हैं । इस प्रकार क आदि ३३ अर्ध मात्रा वाले, ह्रस्व १०, दीर्घ ३२ और प्लुत ६ इस प्रकार ८१ अर्धमात्रायें होती हैं ॥ २२५ ॥

प्रश्न—इस प्रकार के विभाजन में क्या प्रमाण है ?—यह शङ्का कर कहते हैं—

हमारे गुरु ने अर्धमात्राओं की (संख्या) ८१ कही है ॥ -२२६ ॥

उन (= हमारे गुरु) के इस कथन में क्या तात्पर्य है ? यह शङ्का कर कहते

यद्वशाद्भगवानेकाशीतिकं मन्त्रमभ्यधात् ।

यद्वशादिति, अस्याः परस्या मन्त्रमातुरेकाशीतिमात्रासद्भावात् । एकाशीतिकमिति, तावत्संख्याकपदारब्धत्वात् ॥

ननु भगवतो व्योमव्याप्यभिधानेऽप्येतन्निमित्तमित्यत्र किं प्रमाणम् ?—इत्याशङ्क्याह—

एकाशीतिपदा देवी शक्तिः प्रोक्ता शिवात्मिका॥ २२७ ॥
श्रीमातङ्गे तथा धर्मसङ्घातात्मा शिवो यतः ।

शक्तिरिति, व्योमव्यापिरूपा । प्रोक्तेति श्रीमातङ्गे । यदुक्तम् तत्र—

'एकाशीतिपदा देवी या सा शक्तिः शिवात्मिका ।'

(म० तं० १।७।३१) इति ।

तथा

'मन्त्राश्च शक्तिगर्भस्थाः शक्तिर्वै पारमेश्वरी ।
कालानलान्तमध्वानं शिवाद् व्याप्तं यया मुने ॥
एकाशीतिदोपेता विद्यापादे मयोदिता ।' (म० तं०) इति ।

नन्वस्या व्योमव्यापिरूपिण्याः पारमेश्वर्याः शक्तेस्तत्तद्भृदादिमन्त्रात्मकत्वेऽपि

है—

जिस कारण भगवान् ने ८१ मन्त्रों को कहा ॥ २२७ ॥

जिस कारण—इस पर मन्त्रमातृ में ८१ मात्राएँ होने के कारण । एकाशीतिक—उतनी संख्या वाले पदों से आरब्ध होने के कारण ॥ २२७ ॥

प्रश्न—भगवान् के व्योमव्यापी कथन में भी यह कारण है—इसमें क्या प्रमाण है ?—यह शङ्का कर कहते हैं—

मातङ्ग तन्त्र में देवी शिवात्मिका शक्ति ८१ पदों वाली कही गई हैं । क्योंकि शिव उसी प्रकार के धर्मो का सङ्घात हैं ॥ -२२७-२२८- ॥

शक्ति—व्योमव्यापी रूप । कही गई है—मातङ्ग तन्त्र में । जैसा कि वहाँ कहा गया है—

"जो ८१ पदों वाली देवी है वह शिवात्मिका शक्ति है ।" (म. तं. १।७।३१)

तथा

"हे मुनि ! मन्त्र शक्ति के गर्भ में रहते हैं और शक्ति परमेश्वर की है जिसके द्वारा शिव से लेकर कालपर्यन्त अध्वा व्याप्त है । ८१ पदों से युक्त वह मेरे द्वारा विद्यापाद में कही गई है ।" (म. तं.)

कथं शिवात्मकत्वमपि स्यात् ?—इत्याशङ्क्योक्तं—'तथेत्यादि' । यत्तथोक्तेन प्रकारेण धर्माणां

'पत्युर्धर्माः शक्तयस्तु..........................।' (म०तं० १।२०)

इत्याद्युक्त्या शक्तीनामेकाशीत्यात्मा यः सङ्घातस्तदात्मा शिवः—इति सामस्त्येनास्यास्तदात्मकत्वम् । तदुक्तं तत्र—

'एकत्रैव समस्तानि एकाशीतिपदानि तु ।
अष्टषष्ट्यधिकं प्रोक्तं वर्णानां तु शतत्रयम् ॥
अर्चा तु देवदेवस्य समस्तव्यस्तरूपिणी ।' इति ।
'एकोऽपि वर्णो देवानां वाचकः परिकीर्तितः ।
सर्वेऽप्येकस्य युज्यन्ते यतस्ते विश्वमूर्तयः ॥' इति च ॥

न चैतदागमेनैव सिद्धं यावद्युक्तितोऽपि—इत्याह—

तथा तथा परामर्शशक्तिचक्रेश्वरः प्रभुः ॥ २२८ ॥
स्थूलैकाशीतिपदजपरामर्शैर्विभाव्यते ।

'शक्तिमतः खलु शक्तिरनन्या' इत्याद्युक्तयुक्त्या वस्तुतः सर्वशक्त्यविभिन्न-स्वभावोऽपि 'प्रभुः' परमेश्वरः शिवस्तत्तद्वर्णारब्धत्वात् स्थूलानि यान्येकाशीतिपदानि तज्जा ये प्रणवाद्याः परामर्शास्तैस्तथा तथा सर्वात्मानन्तादितया परामर्शो

प्रश्न—इस व्योमव्यापिनी पारमेश्वरी शक्ति के उन-उन हृदादि मन्त्रात्मक होने पर भी कैसे (वह) शिवात्मक भी होगी ? यह शङ्का कर कहा गया—'तथा इत्यादि' । तथा = उक्त प्रकार से धर्मों का—

"शक्तियाँ तो पति के धर्म है ।" (म. तं. १।२०)

इत्यादि उक्ति के द्वारा ८१ शक्तियों का जो सङ्घात है तदात्मक ही शिव हैं—इस प्रकार सम्पूर्णतया यह (शक्ति) तदात्मक है । वही वहाँ कहा गया है—

"८१ पद एक ही जगह सङ्घटित हैं । वर्ण ३६८ हैं । देवाधिदेव की पूजा समस्तव्यस्तरूपिणी है ।"

"एक भी वर्ण देवताओं का वाचक कहा गया है सभी एक के (वाचक) हो सकते हैं क्योंकि वे (एक-एक वर्ण) बिश्वमूर्त्ति है" ॥

यह आगम से ही नहीं युक्ति से भी सिद्ध है—यह कहते हैं—

वह परमेश्वर स्थूल इक्यासी पदों से उत्पन्न परामर्शों के द्वारा उस-उस प्रकार से परामर्शशक्तिचक्र का ईश्वर समझा जाता है ॥ -२२८-२२९- ॥

शक्ति शक्तिमान् से अभिन्न है—इत्यादि उक्त युक्ति के द्वारा वस्तुतः सभी शक्तियों से अभिन्न स्वभाव वाला भी प्रभु = परमेश्वर शिव, भिन्न-भिन्न वर्णों से

यस्यैवंविधो यद्वदादिशक्तिचक्रं तस्य 'ईश्वरः' संयोजनवियोजनकारी 'विभाव्यते' एवं यस्य ज्ञप्तिः क्रियते इत्यर्थः । अत एव चात्र सर्वात्मादीनां यावता परामर्शः सिद्ध्येत् तावत्येव पदत्वं, येनैकाशीतित्वं स्यात् ॥ २२८ ॥

तदाह—

तत एव परामर्शो यावत्येकः समाप्यते ॥ २२९ ॥
तावत्तत्पदमुक्तं नो सुप्तिङ्नियमयन्त्रितम् ।

नो सुप्तिङ्नियमः, तथात्वे हि

'नमः शिवायेति पदं षडर्णं प्रणवादिकम् ।'

इत्याद्युक्त्यैकत्वेऽप्यस्य पदस्य त्रिपदत्वमापतेदिति गणना विसंवदेत् ॥२२९॥

ननु यद्येवं तदेकाशीत्यर्धमात्रात्मिकेयमेव भगवती परा शक्तिरवस्थितेति किमनेनैतत्समव्याप्तिकेन व्योमव्यापिनोपदिष्टेन ?—इत्याशङ्क्याह—

एकाशीतिपदोदारविमर्शक्रमबृंहितः ॥ २३० ॥
स्थूलोपायः परोपायस्त्वेष मात्राकृतो लयः ।

आरब्ध होने के कारण स्थूल जो इक्यासी पद उनसे उत्पन्न जो प्रणव आदि परामर्श वे, उस-उस प्रकार सर्वात्म अनन्त आदि चक्र, उसका ईश्वर = संयोग वियोग करने वाला, जाना जाता है अर्थात् इस प्रकार जिसका ज्ञान किया जाता है । और इसीलिए यहाँ जितने से सर्वात्म आदि का परामर्श सिद्ध हो सके उतना ही पद है जिससे (वे) इक्यासी हैं ॥ २२८ ॥

वही कहते हैं—

इसीलिए जितने में एक परामर्श समाप्त होता है उतना वह (= एक) पद कहा गया है न कि सुप् और तिङ् से नियमित को पद कहते हैं ॥ -२२९-२३०- ॥

सुपतिङ् नियम नहीं है क्योंकि ऐसा होने पर—

"प्रणव आदि में है जिसके ऐसा ॐ नमः शिवाय पद छ वर्णो वाला है ।"

इत्यादि उक्ति से एक पद होने पर भी यह तीन पद हो जाएगा और गणना से विरोध हो जायेगा ॥ २२९ ॥

प्रश्न—यदि ऐसा है तो ८१ अर्ध मात्रा वाली यह भगवती पराशक्ति है ही फिर इसके समान व्याप्ति वाले व्योमव्यापी का उपदेश करने से क्या लाभ?—यह शङ्का कर कहते हैं—

इक्यासी पदों के उदार विमर्श के क्रम से बढ़ाया गया यह

'लयः' इति स्वात्ममात्रविश्रान्तिः । 'स्थूलोपायः' इत्यनेनोपदेश्यभेदादुपदेशस्यापि भेदः—इति प्रकाशितम् ॥ २३० ॥

एवमेतत्प्रसङ्गादभिधाय प्रकृतमेवानुसरति—

अर्धमात्रा नव नव स्युश्चतुर्षु चतुर्षु यत् ॥ २३१ ॥
अंगुलेष्विति षट्त्रिंशत्येकाशीतिपदोदयः ।

प्रत्यंगुलचतुष्टयं नवार्धमात्राः—इत्यंगुलषट्त्रिंशदात्मनि प्राणचारेऽर्धमात्राणामेकाशीतिरुदियात् ॥ २३१ ॥

आसां चोदये विभागान्तरमस्ति—इत्याह—

अङ्गुले नवभागेन विभक्ते नवमांशकाः ॥ २३२ ॥
वेदा मात्रार्धमन्यत्तु द्विचतुःषड्गुणं त्रयम् ।

एकैकस्मिन्नंगुले नवधा विभाजिते षट्त्रिंशतोअंगुलानां सचतुर्विंशतिशतत्रयं मानं भवेत् । भागानां तत्रैकैकस्यार्धमात्रात्मनो व्यञ्जनस्य चत्वारो नव भागा उदयस्थानमित्युक्तं 'नवमांशका वेदाः मात्रार्धम्' इति । अन्यत्पुनर्ह्रस्वदीर्घप्लुत-

---

स्थूल उपाय मात्रा के द्वारा किया गया लय (होने पर) परोपाय (हो जाता है) ॥ -२३०-२३१- ॥

लय = स्वात्ममात्र में विश्रान्ति । 'स्थूलोपाय' इस कथन के द्वारा उपदेश्य के भेद से उपदेश का भी भेद होता है—यह प्रकाशित किया गया ॥ २३० ॥

इस प्रकार प्रसङ्गवश यह कथन कर अब प्रस्तुत का अनुसरण करते हैं—

जो चार अंगुल के अन्तराल में ९-९ आधी मात्राएँ होने से (४ × ९) ३६ अर्धमात्राएँ होती हैं और इक्यासी पदों का उदय होता है ॥ -२३१-२३२- ॥

एक चतुरंगुल में ९ अर्धमात्राएँ—इस प्रकार ३६ अंगुल वाले प्राणचार में ८१ अर्धमात्राएँ उदित होगी ॥ २३१ ॥

इनके उदय में विभागन्तर भी है—यह कहते हैं—

एक अंगुल को नव भागों में विभक्त करने पर वेद (= ४) नवमांश = आधी मात्रा होती है । अन्य तीन (= ह्रस्व दीर्घ और प्लुत) दो, चार और छः गुना (नवमांश वाले) हैं ॥ -२३२-२३३- ॥

एक-एक अंगुल को नव भाग में बाँटने पर ३६ अंगुलों का ३२४ मान होता है । उनमें एक-एक भाग आधामात्रा का होता है । इस प्रकार व्यंञ्जन का उदयस्थान चार नव भाग (= ४।९) है । वही कहा गया—'चार नवमांश आधा

लक्षणं त्रयं द्विचतुःषड्गुणं, ह्रस्वस्यैकमात्रत्वादष्टौ नव भागा उदयस्थानं, दीर्घस्य द्विमात्रत्वात्षोडश, प्लुतस्य त्रिमात्रत्वाच्चतुर्विंशतिः ॥

एतदेव सङ्कलयति—

एवमङ्गुलरन्ध्रांशचतुष्कद्वयगं लघु ॥ २३३ ॥
दीर्घं प्लुतं क्रमाद् द्वित्रिगुणमर्धं ततोऽपि हल्।

'रन्ध्रांशानां' नवभागानां 'चतुष्कद्वयम्' अष्टौ नवभागा इत्यर्थः । लघ्विति, ह्रस्वं 'ततो' लघोरपीत्यर्थः । तेन पञ्चानां ह्रस्वानां प्रत्येकमष्टसु भागेषूदयाच्चत्वारिंशन्नव नव भागा भवन्ति, दीर्घाणामष्टानां प्रत्येकं षोडशभागकलनया साष्टाविंशतिशतम् इति । प्लुतस्य चतुर्विंशतिस्त्रयस्त्रिंशतां हलां प्रत्येकं भागचतुष्टयकलनया द्वात्रिंशदधिकं शतमिति । यद्यप्येकाशीतेरर्धमात्राणां प्रत्येकमङ्गुलीयाश्चत्वारो नव भागा उदयस्थानमित्येव स्पष्टमभिधातव्यं, तथाप्येवमभिधानेऽयमाशयो यदादौ ह्रस्वानामुदयस्तदनन्तरं दीर्घाणां प्लुतस्य व्यञ्जनानां च, इति क्रमः प्रदर्शितो भवेदिति ॥ २३३ ॥

नन्वेतन्मध्ये क्षकारश्चेद् गण्यते तदा कियत्योऽर्धमात्रा अधिकीभवन्ति, तथात्वे

मात्रा वाले हैं' । और दूसरे ह्रस्व दीर्घ प्लुत स्वरूप तीन दो चार, और छः गुने (मान) वाले (उदय स्थान) हैं । ह्रस्व का, एक मात्रा होने से आठ नव भाग (= ८।९) उदय स्थान है, दीर्घ का, दो मात्रा होने के कारण सोलह नवमांश और प्लुत का चौबीस (नवमांश उदयस्थान हैं) ॥ २३२ ॥

इसी का संग्रह बतलाते हैं—

इस प्रकार एक अंगुल के रन्ध्रांश = नवमांश के चार का दो गुना (= ४×२।९) लघु होता है । दीर्घ और प्लुत क्रमशः दो और तीन गुना और उस (= लघु) का आधा हल् होता है ॥ -२३३-२३४- ॥

रन्ध्रांशों का = नव भागों का, चतुष्कद्वय = आठ नवभाग । लघु = ह्रस्व । उससे = लघु से । इस प्रकार पाँच ह्रस्वों में से प्रत्येक का आठ भागों में उदय होने से (८ × ५) = ४० नवभाग होता है । आठ दीर्घ (वर्णों) का प्रत्येक का सोलह भाग मानने पर (१६ × ८) = १२८ (नव भाग होते हैं) । प्लुत की २४ मात्रा, और तैंतीस हलों के प्रत्येक ४ भाग को जोड़ने से १३२ (नवमांश होते हैं) । यद्यपि इक्यासी अर्धमात्राओं का प्रत्येक ४।९ अंगुल उदयस्थान हैं—ऐसा स्पष्ट कहना चाहिए तो भी इस प्रकार के कथन में यह आशय है कि—पहले ह्रस्व (वर्णों) का उदय होता है उसके बाद दीर्घ प्लुत (वर्णों) और व्यञ्जनों का (उदय होता है)—ऐसा क्रम प्रदर्शित हो जाय ॥ २३३ ॥

प्रश्न—यदि इसके बीच में क्षकार की गणना की जाय तो कितनी अर्धमात्राएँ

वासां कथमुदयः ?—इत्याशङ्क्याह—

क्षकारस्त्र्यर्धमात्रात्मा मात्रिकः स तथान्तरा ॥ २३४ ॥
विश्रान्तावर्धमात्रास्य तस्मिंस्तु कलिते सति ।
अङ्गुलार्धेऽद्रिभागेन त्वर्धमात्रा पुरा पुनः ॥ २३५ ॥
क्षकारः सर्वसंयोगग्रहणात्मा तु सर्वगः ।
सर्ववर्णोदयाद्यन्तसन्धिषूदयभाग्विभुः ॥ २३६ ॥

कथमस्य त्र्यर्धमात्रात्मकत्वमित्याशङ्क्योक्तं—'मात्रिकः' इत्यादि । ककारसकारात्मकार्धमात्राद्वयारब्धत्वात् । अन्तरा विश्रान्ताविति, ककारान्तरमर्धमात्रीयं कालं विश्रम्य सकारस्योच्चारात् । 'कलिते' इत्येकाशीत्या, तेनार्धमात्राणां चतुरशीतिरिति । 'अद्रि' इति सप्त । अङ्गुलार्धे हि सप्तधा विभक्ते प्रत्यङ्गुलं चतुर्दश भागाः—इति षट्त्रिंशतोऽङ्गुलानां सचतुष्टयं शतपञ्चकं भागानां भवेत् । तेनार्धाङ्गुलीयेषु षट्सु सप्तभागेष्वर्धमात्रेति षट्त्रिंशदङ्गुलात्मनि प्राणचारे चतुरशीतेरर्धमात्राणामुदय इति । नन्वेवमेकाशीतिकलोदयपक्षे क्षकारस्य नास्त्येवोदयः-इत्युक्तं स्यादित्याशङ्क्याह—पुरेत्यादि । सर्वसंयोगग्रहणात्मेति, संयोगान्तलक्षणपरत्वात् ।

अधिक होंगी ? या वैसा होने पर इन (= अर्धमात्राओं) का कैसे उदय होगा ?—यह शङ्का कर कहते हैं—

क्षकार की तीन अर्धमात्राएँ हैं । वह बीच में एक (= ष्) मात्रिक हैं । बीच में विश्रान्ति होने पर इसकी आधी मात्रा होती है । उससे (= इक्यासी से) इसको जोड़ने पर (चौरासी मात्राएँ होती हैं) । आधे अंगुल को अद्रि (= सात) से भाग देने पर आधी मात्रा होती है । क्षकार सभी संयोग का ग्रहण रूप और सर्वत्र गमनशील हैं । (वह) विभु (होने के कारण) सभी वर्णो के उदय के आदि और अन्त की सन्धियों में उदय का भागी होता है ॥ -२३४-२३६ ॥

यह तीन अर्धमात्रा वाला कैसे है?—यह शङ्का कर कहा गया—मात्रिक इत्यादि। ककार एवं सकार रूप दो अर्ध मात्राओं से आरब्ध होने के कारण । (वह मात्रिक है)। अन्तरा = विश्रान्ति में । ककार के (उच्चारण के बाद) आधा मात्रा वाले काल तक विश्राम करने के बाद सकार का उच्चारण होता है । 'जोड़ने पर'—इक्यासी से । इस प्रकार चौरासी अर्धमात्राएँ हो जाती हैं । अद्रि = सात । आधा अंगुल को सात भाग करने पर एक अंगुल में चौदह भाग होगें—इस प्रकार ३६ अंगुल के ५०४ भाग होंगे। इससे आधी अंगुली वाले छः × सात (४२) भागों में आधी मात्रा होने से ३६ अंगुल वाले प्राणचार में ८४ अर्धमात्राओं का उदय होता है । प्रश्न—इस प्रकार ८१ कलाओं के उदय के पक्ष में क्षकार का उदय ही नहीं होगा—ऐसा कहना चाहिए था ?—यह शङ्का कर कहते हैं—पहले ।

यदुक्तं प्राक्—

'योनिरूपेण तस्यापि योगे क्षोभान्तरं विदुः ।
तन्निदर्शनयोगेन पञ्चाशत्तमवर्णता ॥'

(तं० ३।१८९) इति ।

अनुत्तरविसर्गानुप्राणितयोः ककारसकारयोः प्रत्याहारतयोपादाने निखिलस्य वर्णजातस्य गर्भीकारात् । अत एवायं सर्ववर्णानामादावन्ते परस्परं संमेलनात्मनि 'संधौ' चोदयभाक्सर्ववर्णानुस्यूततयोदियात्, यतोऽयं विभुः' व्यापक इत्यर्थः ॥ २३६ ॥

नन्वेवं वर्णोदयेनाभिहितेन कोऽर्थः ?—इत्याशङ्क्याह—

इत्थं षट्त्रिंशके चारे वर्णानामुदयः फले ।
क्रूरे सौम्ये विलोमेन हादि यावदपश्चिमम् ॥ २३७ ॥

'वर्णानाम्' इत्यकारादीनां, उदय इत्यर्थाद्धृदयाद्द्वादशान्तम् । 'क्रूरे' इति मुक्तिलक्षणे, 'सौम्ये' इति तत्तत्सिद्ध्यात्मनि भोगलक्षणे । 'विलोमेन' इत्यर्थादपानोदये । विलोममेवाह—'हादि यावदपश्चिमम्' इति । तदुक्तम्—

सर्वसंयोगग्रहणरूप—क्योंकि संयोगान्त लक्षणपरक हैं । जैसा कि पहले कहा गया है—

"उस (= क आदि) का भी योनि के रूप में योग होने पर दूसरा क्षोभी होता है । उस (दूसरे क्षोभ) के निदर्शन के कारण (क्षकार) पचासवाँ वर्ण होता है ।" (तं. आ. ३।१८९)

अनुत्तर और विसर्ग से अनुप्राणित ककार और सकारको प्रत्याहार के रूप में लेने पर समस्त वर्णसमूह के गर्भ में आ जाने से । इसीलिए यह (= क्षकार) सभी वर्णों के आदि और अन्त में परस्पर सम्मेलनस्वरूप सन्धि में उदय का भागी होता है = सभी वर्णों में अनुस्यूत होकर उदित होता है जिस कारण यह विभु = व्यापक हैं ॥ २३५-२३७ ॥

प्रश्न—इस प्रकार वर्णों के उदय के कथन से क्या लाभ?—यह शङ्का कर कहते हैं—

इस प्रकार (प्राण के) ३६ चार में वर्णों का उदय होता है । उसका फल क्रूर और सौम्य है । विलोम से (लेने पर) हकार से लेकर अपश्चिम (अन्त) तक (उदय होता है) ॥ २३७ ॥

वर्णों का = अकार आदि का । उदय—हृदय से लेकर द्वादशान्त तक । **क्रूर में** = मुक्ति लक्षण वाले में । सौम्य में = भिन्न-भिन्न सिद्धिस्वरूप भोगलक्षण वाले में । विलोम से = अर्थात् अपान का उदय होने पर । विलोम को ही कहते हैं—

'अधः प्रवहणे सिद्धिर्हृत्पद्मं यावदागतः ।
मुक्तिश्चैव भवेदूर्ध्वे परतत्त्वे तु सुव्रते ॥'
(स्व०तं० ७।५६) इति ।

वस्तुतस्त्वकारस्य हृद्युदयस्थानं, हकारस्य तु द्वादशान्त इति ॥ २३७ ॥

एवमेतदुपजीवनेनैव सूक्ष्मपरमपि वर्णानामुदयमाह—

हृद्यकारो द्वादशान्ते हकारस्तदिदं विदुः ।
अहमात्मकमद्वैतं यः प्रकाशात्मविश्रमः ॥ २३८ ॥

अद्वैतमिति, प्रत्याहारक्रमेणाशेषवर्णान्तःकारात् । प्रकाशेति, यदुक्तम्—

'प्रकाशस्यात्मविश्रान्तिरहंभावो हि कीर्तितः ।'
(अ०प्र०सि० २२) इति ॥ २३८ ॥

एतच्चापानोदयेऽप्येतिदेष्टुमाह—

शिवशक्त्यविभागेन मात्रैकाशीतिका त्वियम् ।
द्वासप्ततावङ्गुलेषु द्विगुणत्वेन संसरेत् ॥ २३९ ॥

शिवशक्त्योरविभाग इति, बिन्दुनादात्मप्राणापानोभयमेलनायामित्यर्थः ।

ह से लेकर अन्तिम तक । वही कहा गया है—

"हे सुव्रते ! नीचे की ओर बहने में सिद्धिप्रद (जप) हृदयकमल तक आता है। ऊर्ध्व परतत्त्व में जप का प्रवाह होने से मुक्ति होती हैं ।" (स्व. तं. ७।५६)

वस्तुतः अकार का उदय स्थान हृदय है और हकार का द्वादशान्त ॥ २३७ ॥

इस प्रकार इसी के कारण वर्णो का सूक्ष्म और पर उदय भी कहते हैं—

हृदय में अकार और द्वादशान्त में हकार (का उदय होता है) । इसको अहमात्मक अद्वैत मानते हैं जो कि प्रकाश की आत्मविश्रान्ति है ॥ २३८॥

अद्वैत—प्रत्याहार के क्रम से सभी वर्णों को अन्तः (= स्वात्म में समाहित) कर लेने के कारण । प्रकाश—जैसा कि कहा गया है—

"प्रकाश की स्वरूप में विश्रान्ति अहंभाव कही गई हैं" ॥ २३८ ॥ (अ. प्र. सि. १।२२)

इसको अपान के उदय में भी अतिदिष्ट करने के लिए कहते हैं—

शिव और शक्ति का विभाग न होने से यह इक्यासी मात्रा बहत्तर अंगुल में दो गुने रूप में चलती हैं ॥ २३९ ॥

शिव शक्ति का अविभाग—बिन्दु नादात्मक प्राण अपान दोनों को मिलाने पर ।

एकाशीतिरित्युपलक्षणं, तेन चतुरशीतिरपि । द्विगुणत्वेनेति, षट्त्रिंशतोअंगुलानाम् ॥ २३९ ॥

एतदुपसंहरन्नन्यदवतारयति—

उक्तः सूक्ष्मोदयस्त्रेधं द्विधोक्तस्तु परोदयः ।
अथ स्थूलोदयोऽर्णानां भण्यते गुरुणोदितः ॥ २४० ॥

अथ इत्यानन्तर्ये । गुरुणोदित इति सर्वशेषः ॥

तत्र वर्गक्रमेण तावद्वर्णानां स्थूलमुदयमाह—

एकैकमर्धप्रहरं दिने वर्गाष्टकोदयः ।
रात्रौ च ह्रासवृद्ध्यत्र केचिदाहुर्न केऽपि तु॥ २४१ ॥

ह्रासवृद्धीति, बाह्यमहोरात्रमपेक्ष्यानपेक्ष्य वा ॥ २४१ ॥

तत्र बाह्याहोरात्रानपेक्षिमते साम्येनैवैषामुदयः—इत्याह—

एष वर्गोदयो रात्रौ दिवा चाप्यर्धयामगः ।

इक्यासी—यह उपलक्षण है । इससे चौरासी भी (समझना चाहिए) । दो गुने रूप में—छत्तीस अंगुलों का ॥ २३९ ॥

इसका उपसंहार करते हुए दूसरे (विषय) की अवतारणा करते हैं—

सूक्ष्म उदय तीन प्रकार का कहा गया । परोदय दो प्रकार का कहा गया । अब गुरु के द्वारा कहा गया वर्णों का स्थूल उदय कहा जा रहा है ॥ २४० ॥

अथ (शब्द) आनन्तर्य अर्थ में हैं ।'गुरु के द्वारा कहा गया'—इसे सबके अन्त में जोड़ना चाहिए ॥ २४० ॥

वर्ग के क्रम से वर्णों का स्थूल उदय बतलाते हैं—

दिन के एक-एक अर्ध प्रहर के हिसाब से आठ वर्गों का उदय होता है । रात्रि में ह्रास और वृद्धि को कुछ लोग मानते हैं कुछ लोग नहीं ॥ २४१ ॥

ह्रास और वृद्धि—बाह्य दिनरात्रि की अपेक्षा करके और अपेक्षा न करके ॥ २४१ ॥

उनमें से बाह्य अहोरात्र की अपेक्षा न करने वालों के मत में इनका उदय साम्यपूर्वक होता है—यह कहते हैं—

यह वर्ग का उदय रात्रि और दिन में आधे पहर के हिसाब से होता

'अर्धयामग' इति, प्रतिवर्गं सार्धचतुरङ्गुलमुदय इत्यर्थः ॥

एवं बाह्याहोरात्रानपेक्षिमतमभिधाय तदितरेषोमपि दर्शयति—

प्राणत्रयोदशशती पञ्चाशदधिका च सा ॥ २४२ ॥
अध्यर्धा किल संक्रान्तिर्वर्गे वर्गे दिवानिशोः ।

सेति प्राणचारीया सार्धत्रयोदशशती । 'अध्यर्धा' इति सार्धा, प्रतिसंक्रान्ति नवानां प्राणचारशतानामभिधानात् । तेन दिने द्वादशानां संक्रान्तीनामुदयः, इति साष्टशतं सहस्रदशकं प्राणचाराणां भवेत् । रात्रावप्येवं सषट्शतसहस्रैकविंशतिः ॥ २४२ ॥

अहोरात्रमेलनायां पुनः प्रतिसंक्रान्तित्रयमेकैकस्य वर्गस्योदयः—इत्याह—

तदैक्ये तूदयश्चारशतानां सप्तविंशतिः ॥ २४३ ॥

एवं प्रागुक्तसंक्रान्तिद्वयवद् बाह्याहोरात्रह्रासवृद्ध्यनुसारं वर्गाष्टकोदयस्यापि ह्रासवृद्धी भवतः—इति सिद्धम्, अन्यथा प्रतिवर्गोदयं प्राणचाराणां नैयत्यं न

है ॥ २४२- ॥

आधे पहर के हिसाब से—प्रतिवर्ग ४।१।२ अंगुल उदय होता है ॥

इस प्रकार बाह्य अहोरात्र की अपेक्षा न रखने वाले मत को कह कर उससे भिन्न लोगों का भी (मत) दिखलाते हैं—

पचास अधिक तेरह सौ (= १३५०) प्राणचार—यह १।१।२ संक्रान्ति रात और दिन के एक-एक वर्ग में होती है ॥ -२४२-२४३- ॥

वह = प्राणचार वाली १३५० । अध्यर्धा = आधे के सहित प्रति संक्रान्ति = सार्धा; क्योंकि एक संक्रान्ति में ९०० प्राणचारों का उदय कहा जाता है । इस प्रकार दिन में १२ संक्रान्तियों का उदय होता है उससे १०८०० प्राणचारों का (उदय) होता है । रात्रि में भी इतना ही । इस प्रकार २१६०० (प्राणचार उदित होते हैं) ॥ २४२ ॥

दिन रात को मिला देने पर पुनः तीन-तीन संक्रान्ति के हिसाब से एक-एक वर्ग का उदय होता है—यह कहते हैं—

उनको एक कर देने पर २७०० प्राणचारों का उदय होता है ॥ -२४३ ॥

इस प्रकार पहले कही गई दो संक्रान्ति के समान बाह्य अहोरात्र के ह्रास और वृद्धि के अनुसार आठ वर्ग के उदय के भी ह्रास और वृद्धि होते हैं—यह सिद्ध हो गया । अन्यथा एक-एक वर्ग के उदय में प्राणचारों की निश्चितता नहीं

स्यात् ॥ २४३ ॥

ननु क्षकारेण सह नव वर्गाः—इति येषां मतं तत्रैषामुदये प्राणचाराणां कीदृग्विभागः ?—इत्याशङ्क्याह—

नव वर्गांस्तु ये प्राहुस्तेषां प्राणशती रवीन् (विः) ॥
सत्रिभागैव संक्रान्तिर्वर्गे प्रत्येकमुच्यते ॥ २४४ ॥
अहर्निशं तदैक्ये तु शतानां श्रुतिचक्षुषी ।

रवीनिति—द्वादश । सत्रिभागेति—प्राणशतत्रयस्याधिक्येनोपदानात् । तेन प्रतिवर्गं प्राणचाराणां शतद्वादशकम्—इति वर्गनवके साष्टशतं सहस्रदशकं भवेत् 'तदैक्ये' इत्यहर्निशमेलने । 'श्रुतिचक्षुषी' इति चतुर्विंशतिः ॥

एवं वर्णानां वर्गक्रमेण स्थूलमुदयमभिधाय क्रमान्तरेणाप्याह—

स्थूलो वर्गोदयः सोऽयमथार्णोदय उच्यते ॥ २४५ ॥

तदाह—

एकैकवर्णे प्राणानां द्विशतं षोडशाधिकम् ।
बहिश्चषकषट्त्रिंशद्दिन इत्थं तथा निशि ॥ २४६ ॥

होगी ॥ २४३ ॥

प्रश्न—क्षकार के साथ नव वर्ग होते हैं—ऐसा जिनका मत है वहाँ इनके उदय में प्राणचारों का कैसा विभाग होगा ?—यह शङ्का कर कहते हैं—

जो लोग नव वर्गों का कथन करते हैं उनके हिसाब से १२०० प्राण (= चार प्रतिवर्ग होता है) । रात और दिन में प्रत्येक वर्ग (९०० के) तीसरे भाग के (= प्रतिसंक्रान्ति) सहित (= १२००) संक्रान्ति प्रत्येक वर्ग में कही जाती है । उनको मिला देने पर श्रुति चक्षुष (चौबीस) सौ (प्राणचार) होते हैं ॥ २४४-२४५- ॥

रवीन् = बारह । त्रिभाग के सहित—तीन सौ प्राणचारों के अधिक होने से । इससे प्रतिवर्ग बारह सौ प्राणचार होते हैं । इस प्रकार नव वर्गों में १०८०० (प्राणचार) होते हैं । तदैक्य में = दिन और रात को मिला देने पर । श्रुतिचक्षुषी = चौबीस (सौ प्राणचार होते हैं) ॥ २४४ ॥

इन वर्णों का वर्गक्रम से स्थूल उदय कह कर क्रमान्तर से भी कहते हैं—

यह स्थूल वर्गोदय है । अब वर्ण का उदय कहा जाता है ॥ -२४५ ॥

वही कहते हैं—

एक-एक वर्ण (के उदय) में २१६ प्राणचार होते हैं । बाह्य दृष्टि से

चषकषट्त्रिंशदिति, प्रतिचषकं षण्णां प्राणचाराणामुदयात् । तेन पञ्चाशतो वर्णानां साष्टशतं सहस्रदशकं प्राणचाराणां स्यात् ॥ २४६ ॥

अत्र चोदये विशेषं दर्शयति—

शतमष्टोत्तरं तत्र रौद्रं शाक्तमथोत्तरम् ।
यामलस्थितियोगे तु रुद्रशक्त्यविभागिता ॥ २४७ ॥

'यामलस्थितियोगे' इत्युभयसंमेलनायाम् ॥ २४७ ॥

एतदेव चाहोरात्रसंमेलनायां द्विगुणी भवेत्—इत्याह—

दिनरात्र्यविभागे तु दृग्वह्न्यब्ध्यसुचारणाः ।
सपञ्चमांशा नाडी च बहिर्वर्णोदयः स्मृतः ॥ २४८ ॥

दृग्वह्न्यब्धिरिति, द्वात्रिंशदधिकं शतचतुष्टयम् 'असुचारणाः' इति प्राणसञ्चारणाः । सपञ्चमांशा नाडीति, चषकषट्त्रिंशतो द्वैगुण्यात् ॥ २४८ ॥

एतदुपसंहरन्नन्यदवतारयति—

इति पञ्चाशिका सेयं वर्णानां परिचर्चिता ।

---

३६ चषक दिन में तथा उतने ही रात्रि में (प्राणचार होते हैं) ॥ २४६ ॥

३६ चषक—प्रति चषक ६ प्राणचारों का उदय होने से ।

इस प्रकार (एक दि अर्थात् १२ घण्टों में) पचास वर्णों का १०८०० प्राणचार होता है ॥ २४६ ॥

इस उदय में विशेष दिखलाते हैं—

उसमें १०८ रौद्र उसके बाद शाक्त होता है । यामल स्थिति में रुद्र और शक्ति का विभाग नहीं रहता ॥ २४७ ॥

यामलस्थितियोग = दोनों को मिला देने पर ॥ २४७ ॥

यही अहोरात्र को मिला देने पर दूना हो जाता है—यह कहते हैं—

दिन रात को मिला देने पर दृक् (= २) वह्नि (= ३) अब्धि (= ४) (अर्थात् ४३२) संख्याक प्राणचार होता है । बाह्यरूप में वर्ण का उदय काल १।१।५ नाड़ी कहा गया है ॥ २४८ ॥

दृक् वह्नि अब्धि = ३२ अधिक ४ सौ; असुचारण = प्राणसञ्चार । सपञ्चमांशा नाडी = ३६ चषक को दो गुना करने से ॥ २४८ ॥

इसका उपसंहार करते हुए दूसरे की अवतारणा करते हैं—

इस प्रकार वर्णों की पञ्चाशिका (= ५० मातृकाओं) का वर्णन

एकोनां ये तु तामाहुस्तन्मतं संप्रचक्ष्महे ॥ २४९ ॥

तदाह—

वेदाश्चाराः पञ्चमांशन्यूनं चारार्धमेकशः ।
वर्णेऽधिकं तद्द्विगुणमविभागे दिवानिशोः ॥ २५० ॥

'वेदा'श्चत्वारः । पञ्चमांशेनार्थात्किंचिदंशेन 'न्यूनं' रहितम् । अधिकमिति, षोडशाधिकशतद्वयस्योपरीत्यर्थः । तेनैकोनपञ्चाशतो वर्णानां प्रत्येकं षोडशाधिकशतद्वयात्मकत्वात् चतुरशीतिशतपञ्चकाधिकं सहस्रदशकं प्राणचारा भवन्ति, अधिकैश्च प्रत्येकं चतुर्भिः सषण्णवतिशतम् । अनेन च चाराणां सार्धचतुर्विंशतेः किंचिदंशन्यूनं पञ्चभागं विंशति (?) साष्टशतं सहस्रदशकम् ॥ २५० ॥

एतदेवोपसंहरति—

स्थूलो वर्णोदयः सोऽयं पुरा सूक्ष्मो निगद्यते ।

सूक्ष्म इत्यर्थात्परोऽपि पुरा निगदित इत्यर्थः ॥ २५१ ॥

इदानीमाह्निकार्थमार्यायाः प्रथमार्धेनोपसंहरति—

इति कालतत्त्वमुदितं शास्त्रमुखागमनिजानुभवसिद्धम् ।

किया गया । जो लोग उसे उन्चास वाली मानते हैं, उनका मत कह रहे हैं ॥ २४९ ॥

उसे कहते हैं—

चार (प्राण) चार पञ्चमांश कम आधाचार एक वर्ण में अधिक होता है । दिन रात को मिला देने पर उसका दूना (अधिक होता है) ॥ २५०॥

वेद =चार । पञ्चमांश से अर्थात् थोड़े अंश से, न्यून = रहित । अधिक— २१६ के ऊपर । इस प्रकार ४९ वर्णों में से प्रत्येक के २१६ (प्राणचारा)त्मक होने से १०५८४ प्राणचार होते हैं । प्रत्येक के साथ ४ अधिक होने से १९६, और इससे २४।१।२ चारों का कुछ अंश न्यून पाँच भाग = १०८२० होता है ॥ २५० ॥

इसी का उपसंहार करते हैं—

यह स्थूल वर्णोदय हैं । सूक्ष्म पहले ही कहा गया ॥ २५१ ॥

सूक्ष्म—अर्थात् पर भी पहले कह दिया गया ॥ २५१ ॥

अब इस आह्निक का प्रतिपाद्य आर्या के पूर्वार्द्ध से समाप्त करते हैं—

इस प्रकार शास्त्रमुख के वचन तथा अपने अनुभव से सिद्ध काल

मुखागमेति—'शैवी मुखमिहोच्यते' (वि०भै० २० श्लोक)

इत्यादिन्यायेन परतत्त्वप्रवेशोपायत्वाद् गुरुस्तस्य 'आगमो' वचनमित्यर्थः । सिद्धमिति—

'यतः शास्त्रक्रमात्तज्ज्ञगुरुप्रज्ञानुशीलनात् ।
आत्मप्रत्ययितं ज्ञानं पूर्णत्वाद्भैरवायते ॥' (तं० ४।७७)
इत्याद्युक्तयुक्त्या पारिपूर्ण्येन लब्धसिद्धीति शिवम् ॥
प्राणापानसमाश्रयचारप्रविचारचातुरीनिष्ठः ।
षष्ठाह्निके वरिष्ठां विवृत्तिमिमां जयरथश्चक्रे ॥

॥ इति श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तविरचिते श्रीतन्त्रालोके श्रीजयरथविरचितविवेकाभिख्यव्याख्योपेते कालतत्त्व-प्रकाशनं नाम षष्ठमाह्निकं समाप्तम् ॥ ६ ॥

तत्त्व कहा गया ॥ २५२ ॥

॥ इस प्रकार श्रीमदाचार्य अभिनवगुप्तपादविरचित श्रीतन्त्रालोक के षष्ठ आह्निक की डॉ० राधेश्यामचतुर्वेदीकृत 'ज्ञानवती' हिन्दी टीका सम्पूर्ण हुई ॥ ६ ॥

मुखागम—'इस (शास्त्र) में शैवी मुख कहा जाता है ।' (वि. भै. २०)

इत्यादि न्याय के अनुसार परतत्त्व में प्रवेश के लिए उपाय होने से (यह) गुरु हैं उसका आगम = वचन ।

सिद्ध है—

''क्योंकि शास्त्र के अध्ययन के क्रम तथा उसके ज्ञानी गुरु की प्रज्ञा के अनुशीलन से आत्मा के (विषय में) निश्चित ज्ञान पूर्ण होने के कारण (साधक) भैरवरूप में स्फुरित होता है ।'' (तं. आ. ४।६६)

इत्यादि उक्त युक्ति से परिपूर्णता के द्वारा सिद्धि को प्राप्त ।

॥ इस प्रकार आचार्यश्रीजयरथकृत श्रीतन्त्रालोक के षष्ठ आह्निक की 'विवेक' नामक व्याख्या की डॉ० राधेश्यामचतुर्वेदीकृत 'ज्ञानवती' हिन्दी टीका सम्पूर्ण हुई ॥ ६ ॥

सप्तममाह्निकम्

* विवेक *

तत्तन्मन्त्राभ्युदयप्रगुणीकृतचण्डभैरवावेशः ।
विद्रावितभवमुद्रो द्रढयतु भद्राणि जयरुद्रः ॥

इदानीं कालतत्त्वानुषक्तमेव द्वितीयार्धेन चक्रोदयं वक्तुमुपक्रमते—

अथ परमरहस्योऽयं चक्राणां भण्यतेऽभ्युदयः ॥ १ ॥

चक्राणामिति मन्त्राद्यात्मनाम् ॥ १ ॥

ननु सर्वमन्त्रसामान्यभूताया भगवत्या मातृकायाः समनन्तरमेवोदय उक्तः, तत्तद्विशेषरूपाणां मन्त्राद्यात्मनां चक्राणामप्युदयाभिधाने किं निमित्तम् ?—इत्याशङ्क्याह—

---

* ज्ञानवती *

भिन्न-भिन्न मन्त्रों के अभ्युदय के द्वारा कई गुना किए गए चण्ड भैरव के आवेश वाले, भव मुद्रा को हटाने वाले, जयरुद्र मङ्गल को पुष्ट करें ।

अब द्वितीय श्लोकार्ध से काल तत्त्व से सम्बद्ध चक्रोदय को कहने के लिए उपक्रम करते हैं—

अब परम रहस्यस्वरूप यह चक्रों का उदय कहा जा रहा है ॥ १ ॥

चक्रों का—मन्त्र आदि स्वरूप वाले (चक्रों का) ॥ १ ॥

प्रश्न—सभी मन्त्रों की सामान्यभूता भगवती मातृका का उदय अव्यवहित पूर्व में कहा गया, उन-उन विशेष रूप वाले मन्त्रात्मक चक्रों के भी उदय के कथन का क्या कारण है ?—यह शङ्का कर कहते हैं—

इत्ययत्नजमाख्यात यत्नजं तु निगद्यते ।

नन्वेतन्निगदनेन कोऽर्थः—इत्याशङ्क्याह—

बीजपिण्डात्मकं सर्वं संविदः स्पन्दनात्मताम् ॥ २ ॥
विदधत्परसंवित्तावुपाय इति वर्णितम् ।

सर्वमिदं बीजपिण्डात्मकं मन्त्रजातम् अर्थात्प्राणान्तरुदयत् संविदः स्पन्दनात्मतां शाक्तस्वरूपावेशं विदधत् परसंवित्तावुपायः पारम्पर्येण शाम्भवमपि रूपमाविशेत्,—इत्याणवोपाये वर्णतत्त्वान्तर्वर्णितं तन्नास्यानर्थक्यमित्यर्थः ॥ २ ॥

नन्विह मन्त्राणां प्राणान्तरेवमुदयः—इत्यभिधातु प्रक्रान्तं, स च यत्नजः, इति तत्र यत्ने क्रियमाणे तदेव सिद्ध्येत् नान्यदिति कथमत्रैव परसंविदुपायत्वमप्येषां स्यात् ?—इत्याशङ्क्याह—

यथारघट्टचक्राग्रघटीयन्त्रौघवाहनम् ॥ ३ ॥
एकानुसंधियत्नेन चित्रं यन्त्रोदयं भजेत् ।
एकानुसंधानबलाज्जाते मन्त्रोदयेऽनिशम् ॥ ४ ॥

इस प्रकार अयत्नज (उदय) कहा गया । यत्नज का कथन किया जा रहा है ॥ २- ॥

प्रश्न—इसके कथन से क्या लाभ ?—यह शङ्का कर कहते हैं—

बीजपिण्डात्मक सम्पूर्ण (मन्त्रसमूह) संविद् की स्पन्दनात्मता का विधान करता हुआ पर संवित्ति के विषय में उपाय (बन जाता है) इस कारण (इसका) वर्णन (प्रस्तुत) है ॥ -२-३- ॥

यह सब बीजपिण्डात्मक मन्त्रसमूह अर्थात् प्राण के भीतर उदित होता हुआ संविद् की स्पन्दनात्मता = शाक्तस्वरूप आवेश का विधान करता हुआ परसंविद् के विषय में उपाय होता हुआ परम्परया शाम्भव रूप में भी आविष्ट होता है—इसलिए आणवोपाय में बीच में वर्णतत्त्व का वर्णन किया गया इसलिये यह निरर्थक नहीं है ॥ २ ॥

प्रश्न—मन्त्रों का प्राण के भीतर इस प्रकार उदय होता है—यह कहने के लिए उपक्रम हुआ और वह (= उदय) यत्नज है—इसलिए उस विषय में प्रयास किए जाने पर वही सिद्ध होगा दूसरा नहीं तो कैसे यहीं पर ये परसंवित् के उपाय भी हो जायेंगे ?—यह शङ्का कर कहते हैं—

जिस प्रकार रहट के चक्र के अग्र (भाग में लगा हुआ) घटी (= छोटी-छोटी बाल्टी) के समूह के द्वारा वाहन, एक से सम्बद्ध प्रयत्न के द्वारा विचित्र यन्त्र के उदय को प्राप्त होता है (उसी प्रकार) एक

तन्मन्त्रदेवता यत्नात्तादात्म्येन प्रसीदति ।

इहारघट्टवाहकस्य यन्त्रमात्रवाहनक्रियाविषयत्वात् एकेनैवानुसंधानेन अरघट्ट-चक्राग्रगतघटीसंबन्धिनो यन्त्रस्यौघेन नैरन्तर्येण वाहनं यथा 'चित्रं यन्त्रोदयं भजेत्' ऊर्ध्वाधोमुखरिक्तपूर्णघटीचक्रात्मना वैचित्र्येण निष्पत्तिमियात्, तथा साधकस्यानिशं मन्त्रोदयविषयेणैकेनैवानुसंधानेन न केवलमेतदुदय एव सिध्येत् यावत्तन्नान्तरीयक-तया प्रयत्नान्तरमन्तरेण एतन्मन्त्रदेवतापि तादात्म्येन प्रसीदतीति । इदमत्र तात्पर्यम्—यथा हि यन्त्रं वाहयन् अरघट्टवाहकस्तत्र वैचित्र्यान्तरमपि प्रयत्नान्तर-निरपेक्षमासादयेत्, एवं साधकोऽपि मन्त्रोदय एव प्रयतमानः परसंविदै-कात्म्यमिति । एवं चक्रोदयः परसंविदासादने निमित्तमित्यावश्याभिधेयः,—इत्युक्तं स्यात् ॥ ४ ॥

तदाह—

खे रसैकाक्षि नित्योत्थे तदर्धं द्विकपिण्डके ॥ ५ ॥
त्रिके सप्त सहस्राणि द्विशतीत्युदयो मतः ।
चतुष्के तु सहस्राणि पञ्च चैव चतुःशती ॥ ६ ॥

अनुसन्धान के बल से निरन्तर मन्त्र का उदय होने पर उस मन्त्र की देवता भी तादात्म्य के कारण बिना प्रयास के प्रसन्न हो जाती हैं ॥-३-५-॥

जैसे रहट चलाने वाले के केवल यन्त्र (= गोलचक्का) चलाने की क्रिया करने से एक ही अनुसन्धान से रहट के चक्के के अग्रभाग में लगी हुई बाल्टी से सम्बद्ध यन्त्र के समूह से निरन्तर वाहन, विचित्र यन्त्रोदय को प्राप्त होता है (अर्थात्) ऊपर नीचे मुख वाले खाली और भरी हुई बाल्टियों के चक्कर रूप वैचिच्य के साथ पूर्णता की प्राप्त होता है; उसी प्रकार रात दिन मन्त्रोदयविषयक एक अनुसन्धान से न केवल साधक मन्त्रोदय सिद्ध होता है बल्कि उसके नान्तरीयक होने के कारण अन्य प्रयास के बिना भी उस मन्त्र के देवता भी तादात्म्य के कारण प्रसन्न हो जाते हैं । यहाँ यह तात्पर्य है—जिस प्रकार रहट चलाने वाला मशीन को चलाता हुआ उसी में बिना अन्य प्रयास के दूसरा वैचित्र्य (= बाल्टी से पानी गिराना और फिर खाली बाल्टी को नीचे ले जाकर भरना) भी प्राप्त कर लेता है उसी प्रकार साधक भी मंत्र के उदय के विषय मे ही प्रयास करता हुआ पर संविद् के साथ एकात्मता को भी (प्राप्त कर लेता है) । इस प्रकार चक्र का उदय पर संविद् की प्राप्ति में निमित्त है—यह अवश्य कहना चाहिए—ऐसा कहना चाहिए था ॥ ४ ॥

वही कहते हैं—

नित्य उदित प्राण में २१६०० चार होते हैं । दो पिण्डवाले (= दो प्राणचारों की कालावधि को एक बना लेने पर पूरे दिन रात मे पूर्वोक्त २१६०० का) आधा (= १०८०० प्राणचार), तीन पिण्डवाले (प्राणचार

पञ्चार्णेऽब्धिसहस्राणि त्रिशती विंशतिस्तथा ।
षट्के सहस्रत्रितयं षट्शती चोदयो भवेत् ॥ ७ ॥
सप्तके त्रिसहस्रं तु षडशीत्यधिकं स्मृतम् ।
शतैस्तु सप्तविंशत्या वर्णाष्टकविकल्पिते ॥ ८ ॥
चतुर्विंशतिशत्या तु नवार्णेषूदयो भवेत् ।
अधिषष्ट्येकविंशत्या शतानां दशवर्णके ॥ ९ ॥
एकान्नविंशतिशतं चतुःषष्ठिः शिवार्णके।
अष्टादश शतानि स्युरुदयो द्वादशार्णके ॥ १० ॥
त्रयोदशार्णे द्वाषष्ट्या शतानि किल षोडश ।
त्रिचत्वारिंशता पञ्चदशेति भुवनार्णके ॥ ११ ॥
चतुर्दशशती खाब्धिः स्यात्पञ्चदशवर्णके ॥
त्रयोदशशती सार्धा षोडशार्णे तु कथ्यते ॥ १२ ॥
शतद्वादशिका सप्तदशार्णे सैकसप्ततिः ।
अष्टादशार्णे विज्ञेया शतद्वादशिका बुधैः ॥ १३ ॥
चतुर्विंशतिसंख्याके चक्रे नवशती भवेत् ।
सप्तावंशतिसंख्याते तूदयोऽष्टशतात्मकः ॥ १४ ॥
द्वात्रिंशके महाचक्रे षट्शती पञ्चसप्ततिः ।
द्विचतुर्विंशके चक्रे सार्धा शतचतुष्टयीम् ॥ १५ ॥
उदयं पिण्डयोगज्ञः पिण्डमन्त्रेषु लक्षयेत् ।
चतुष्पञ्चाशके चक्रे शतानां तु चतुष्टयम् ॥ १६ ॥

में) ७२०० उदय माना गया है । चार वाले में ५४००, पाँच वर्ण वाले में ४३२०; छ. वाले में ३६०० उदय होता है । सात (वर्ण) या पिण्ड वाले में ३०८६ (प्राणचार का उदय) कहा गया है । आठ वर्ण वाले में २७००; नव वर्ण वाले में २४०० (प्राणचार का) उदय होता है । दश वर्ण वाले में २१६०; ग्यारह वर्ण वाले में १९६४; बारह वर्ण वाले में १८०० उदय होते हैं । तेरह वर्ण वाले में १६६२; चौदह वर्ण वाले में १५४३; पन्द्रह वर्ण वाले में १४४०; सोलह वर्ण वाले में १३५० (उदय) कहा जाता है सत्रह वर्ण वाले में १२६१ अठारह वर्ण वाले में १२०० (उदय) विद्वानों को समझना चाहिए । चौबीस संख्या वाले चक्र में ९०० (प्राणचार) होता हैं । सत्ताईस संख्या वाले में ८०० उदंय (होता है) । बत्तीस संख्या वाले महाचक्र में ६७५; ४८ चक्र में ४५० (उदय समझना चाहिए) । पिण्डयोग को जानने वाला चौवन (वर्ण) वाले चक्र में पिण्ड मन्त्रों में ४०० उदय जाने । चौसठवें चक्र में ३३७।२।३, (उदय)

सप्तत्रिंशत्सहार्धेन त्रिशत्यष्टाष्टके भवेत् ।
अर्धमर्धत्रिभागश्च षट्षष्ठिर्द्विशती भवेत् ॥ १७ ॥
एकाशीतिपदे चक्रे उदयः प्राणचारगः ।
चक्रे तु षण्णवत्याख्ये सपादा द्विशती भवेत् ॥ १८ ॥
अष्टोत्तरशते चक्रे द्विशतस्तूदयो भवेत् ।'

खे इति द्वे शून्ये, रसाः षट्, अक्षीति द्वयं, नित्योत्थ इति स्वरसत एव हि सततं प्रवहतः प्राणस्य सषट्शतसहस्रैकविंशत्या (तिः) चाराणां भवेदिति भावः । एवमेकपिण्डात्मनो मन्त्रस्य प्रतिप्राणचारं तदानुगुण्यात् तत्संख्याक एवोदयः; तेन प्रतिप्राणचारमेकैकस्य पिण्डस्य वर्णस्य वोदयात् द्व्यादिपिण्डवर्णात्मनां मन्त्राणां नित्योदितप्राणाचारार्धत्रिभागक्रमेण न्यूनसंख्याक उदयः,—इत्याह—'तदर्धं द्विकपिण्डके' इति । तस्याः सषट्शतायाः सहस्रैकविंशतेरर्धं साष्टशतं सहस्रदशकम् । अत्र हि स्वारसिकप्राणचारद्वयकालस्यैकप्राणचारतयोदयस्य चिकीर्षितत्वं; 'जपः प्राणसमः कार्यः' इति हि सर्वत्राविशेषेणोद्घोष्यते, अत एवेह यत्नजत्वमुक्तम् । सप्त सहस्राणि द्विशतीति, स्वारसिकप्राणचारत्रयकालस्यैकप्राणचारतयोदयस्य कर्तुमभिप्रेतत्वात् । एवमुत्तरत्रापि अवसेयम् । अब्धीति चत्वारः । षडशीत्यधिकमिति भूम्ना, एवं हि चारद्वयमधिकं भवेत्, तेनात्र प्रतिचारं किंचिदंशन्यूनता कार्या येन गणनासाम्यं स्यात् । न चैतदस्माभिः स्वोत्प्रेक्षितमुक्तमिति साक्षादागम एव

होता है । इक्यासी (वर्ण) वाले चक्र में २६६।१।२ प्राणचारों का उदय (होता है) । छानवे (वर्ण) वाले चक्र में २२५ (प्राणचार) होता है । और १०८ (वर्ण) वाले चक्र में दो सौ उदय होता है ॥-५-१९- ॥

खं = दो शून्य, रस = छः अक्षि = दो । नित्योत्थ = स्वाभाविक रूप से निरन्तर प्रवहमान प्राण का २१६०० चार होता है । इस प्रकार एक पिण्ड रूप मन्त्र का प्रति प्राण और उसी के अनुसार उतनी संख्या वाला उदय होता है । इस प्रकार प्रत्येक प्राणचार में एक-एक पिण्ड अथवा वर्ण का उदय होने से दो (तीन) आदि पिण्ड या वर्ण वाले मन्त्रों का नित्योदित प्राणचारों के आधे या तिहाई के क्रम से कम संख्या वाला ही उदय होता है—यह कहते हैं—'दो पिण्ड वाले में उसका आधा' । उस २१६०० का आधा १०८०० । यहाँ स्वाभाविक दो प्राणचार के काल का एक प्राणचार के रूप में उदय चिकीर्षित है । "जप को प्राण के साथ करना चाहिए" यह सर्वत्र समान रूप से घोषित किया जाता है । इसलिए यहाँ यत्नजत्व कहा गया । ७२००—स्वाभाविक तीन प्राणचार के काल को एक प्राणचार के रूप में उदय का (काल) मानना वाञ्छित है—इस कारण । इसी प्रकार आगे भी समझ लेना चाहिए । अब्धि = ४ । छियासी अधिक यह अधिकता के कारण । इस प्रकार दो प्राणवाह अधिक हो जाता है । इसलिए यहाँ एक-एक चार में कुछ अंश में कमी करनी चाहिए जिससे गणना समान हो जाय । यह हमने

पठितः । अस्माभिरप्यत्र गणना विभज्य न दर्शिता ग्रन्थविस्तरभयादनुपयोगाच्च। अधिकषष्ठिरेकविंशतिशती तया दशवर्णग इत्युदयः । 'शिवाः' रुद्रा एकादश, चतुःषष्टिरिति भूम्ना, एवं हि चारचतुष्टयमधिकं भवेत् । द्वाषष्ट्येति भूम्ना, षण्णां प्राणचाराणामतिरेकात् । त्रिचत्वारिंशतेति भूम्ना, चारद्वयाधिक्यात् । पञ्चदशेति शतानि । भुवनेति चतुर्दश । खाब्धिरिति चत्वारिंशत् । सैकसप्ततिरिति भूम्ना चारसप्तकातिरेकात् । न चात्र संख्यायाः कश्चित्क्रमो विवक्षितः,—इत्येकोनविंशादीनां चक्राणामन्तरानुपदेशे न कश्चिद्दोषो, यावता हि अत्र प्रतिप्राणचारमेकैकस्य चक्रस्योदये यत्नः कार्यः,—इत्यभिधित्सितं तच्चैवमपि सिद्ध्येदिति । 'द्विचतुर्विंशके' इत्यष्टाचत्वारिंशदात्मक इत्यर्थः । 'अष्टाष्टके' इति चतुःषष्ठ्यात्मके। सहार्धेनेति येनावशिष्टा द्वात्रिंशत्प्राणचारा भवन्ति । अर्धमिति अर्धत्रिभाग इति, येन सार्धाश्चत्वारिंशत्प्राणचारा भवेयुः सार्धास्त्रयोदश चेत्युभयथा चतुःपञ्चाशदिति गणनासाम्यं स्यात् । तदुक्तं श्रीयोगिनीकौले—

'नित्योदिते सहस्राणि एकविंशच्छतानि षट् ।
द्विके दश सहस्राणि तथाष्टौ च शतानि तु ॥
त्रिके सप्त सहस्राणि द्विशतीत्युदयः स्मृतः ।
चतुष्के तु सहस्राणि पञ्च तुर्यशतानि तु ॥
पञ्चाक्षरे सहस्राणि चत्वारि त्रिशतोदयः ।
विंशाधिकः समाख्यातो ज्ञेयश्चोदयवाहिभिः ॥

अपनी बुद्धि से ही नहीं कहा है यह बतलाने के लिए साक्षात् आगम का ही कथन किया गया । हमने भी यहाँ गणना को बाँटकर नहीं दिखलाया क्योंकि ग्रन्थ बड़ा हो जायगा और उसका कोई उपयोग नहीं है । २१६०—इसके द्वारा दश वर्णों में वर्त्तमान प्राणचार का उदय होता है । शिव = रुद्र = ग्यारह । चौंसठ यह अधिकता के कारण । इस प्रकार चार प्राणवाह अधिक हो जाता है । पन्द्रह = पन्द्रह सौ । भुवन = १४ । रवाब्धि = ४० । ७१ यह अधिकता के कारण । क्योंकि सात प्राणवाह अधिक हैं। यहाँ संख्या का कोई क्रम विवक्षित नहीं है।—इसलिए इक्कीस आदि चक्रों का बीच में उपदेश न करने पर कोई दोष नहीं है । क्योंकि यहाँ प्रत्येक प्राणचार में एक-एक चक्र के उदय के विषय में प्रयास करना चाहिए—यह कहना चाहते हैं; वह बात ऐसे भी सिद्ध हो जाती है । दो चौबीस में = ४८ में । आठ अष्टक में = ६४ में । आधे के साथ—जिससे अवशिष्ट प्राणचार ३२ हो जाते हैं । आधा = तीन भाग का आधा, जिससे ४५० प्राणचार हो जाते हैं । आधे के साथ तेरह इस प्रकार दोनों तरह से ५४—यह गणना समान हो जाती है । योगिनीकौल में कहा गया है—

"नित्योदित (प्राणचार) में (संख्या) २१६०० है । दो वाले में १०८०० तीन में ७२०० उदय माना गया है । चार में ५४०० पञ्चाक्षर में ४३२०

षट्के तु त्रिसहस्राख्यः षट् शतान्तोदयः स्मृतः ।
सप्तके त्रिसहस्रं तु षडशीत्यधिकं स्मृतम् ॥'

इत्यादि ।

'अष्टोत्तरशते चक्रे मन्त्रपिण्डाक्षरात्मके ।
द्विशतात्मा पुनः प्रोक्त उदयः सर्वसिद्धिदः ॥'

इत्यन्तम् ॥ ५-१८ ॥

न चैतावतैव विरन्तव्यमित्याह—

क्रमेणेत्थमिदं चक्रं षट्कृत्वो द्विगुणं यदा ॥ १९ ॥
ततोऽपि द्विगुणेऽष्टांशस्यार्धमध्यर्धमेककम् ।
ततोऽपि सूक्ष्मकुशलैरर्धार्धादिप्रकल्पने ॥ २० ॥
भागषोडशकस्थित्या सूक्ष्मश्चारोऽभिलक्ष्यते ।

'इत्थं' वक्ष्यमाणेन प्रकारेणेदमष्टोत्तरशतात्मकं चक्रं क्रमेण षट्कृत्वो द्विगुणं प्रथमं षोडशाधिकशतद्वयात्मकं यावदन्ते सद्वादशशतनवकाधिकषट्सहस्रात्मकं यदा भवेत् तदा तस्मिन्नपि द्विगुणे सचतुर्विंशतिशताष्टकाधिकसहस्त्रत्रयोदशात्मकं चक्रेऽध्यर्धमत्रेति कृत्वा सार्धमेककं प्राणस्य चरणमष्टांशस्यार्धं षोडशो भागश्चोदयो भवेदित्यर्थः । तदनन्तरमपि भागषोडशकस्थित्यार्धार्धादिकल्पने कृते सति 'सूक्ष्म-

---

(प्राणचार) उदयवादी लोगों के द्वारा ज्ञात होना चाहिए । छ में ३६०० उदय कहा गया है । सात में ३०८६ मानाा गया है ।" यहाँ से लेकर—

"१०८ मन्त्रपिण्डाक्षर वाले चक्र में, समस्त सिद्धियों को देने वाला २०० उदय कहा गया है ।"

यहाँ तक (प्राणचार की संख्या का कथन है ।) ॥ ५-१८ ॥

इतने से ही विराम नहीं करना चाहिए—यह कहते हैं—

इस प्रकार इस चक्र को क्रम से छ बार दो गुना (करते हैं) फिर उसका भी दो गुना करने पर अष्टांश का आधा फिर आधे में से एक-एक को उससे भी सूक्ष्म (गणना में) कुशल लोगों के द्वारा आधा-आधा बाँटने पर सोलह भाग वाली स्थिति के द्वारा सूक्ष्मचार समझा जाता है ॥ -१९-२१- ॥

इत्थम् = आगे कहे जाने वाले प्रकार से, यह १०८ चक्र क्रमशः छ बार दो गुना (होता है) पहला दो गुना २१६ और इस प्रकार अन्त में (द्रगुना करने पर) जब ६९१२ हो जाता है तब उसका भी दो गुना करने पर १३८२४ चक्र का उदय होने पर इसका आधा कर, प्राण का १।१।२ चरण अष्टांश का आधा =

कुशलैः' परधाराधिरूढैर्योगिभिः 'सूक्ष्मो'अतिपरिमितः प्राणीयश्चारांशोअ'भिलक्ष्यते' ज्ञायते इत्यर्थः । इदमत्र तात्पर्यम्—एवंकलनायां हि प्राणचारीयः षोडशो भागः सषट्शतपञ्चचत्वारिंशत्सहस्राधिकलक्षत्रयात्मनश्चक्रस्योदयः स्यात्; तस्याप्यर्धकल्पने सशतद्वयैकनवतिसहस्राधिकलक्षषट्कात्मनश्चक्रस्य द्वात्रिंशो भागः; तस्याप्येवं कल्पने सचतुःशतद्व्यशीतिसहस्राधिकत्रयोदशलक्षात्मनश्चक्रस्य चतुःषष्टितमो भागः, —इत्यन्तमेव परिमितः प्राणचारीयो भागो योगिनामभिलक्ष्यो भवतीति ॥१९-२०॥

नन्वेवमभिलक्षणेन योगिनां किं स्यात् ?—इत्याशङ्क्याह—

एवं प्रयत्नसंरुद्धप्राणचारस्य योगिनः ॥ २१ ॥
क्रमेण प्राणचारस्य ग्रास एवोपजायते ।

ग्रास इति विरुद्धतया पुनरनुदयात् ॥ अतोऽप्यस्य किं स्यात् ?—इत्याशङ्क्याह—

प्राणग्रासक्रमावाप्तकालसङ्कर्षणस्थितिः ॥ २२ ॥
संविदेकैव पूर्णा स्याज्ज्ञानभेदव्यपोहनात् ।

ज्ञानभेदापोहनमेवोपपादयति—

सोलहवाँ भाग उदयकाल होता है । उसके बाद भी सोलह भाग की स्थिति से आधा-आधा बाँटने पर सूक्ष्म कुशल = परधारा में अधिरूढ योगियों के द्वारा सूक्ष्म' = अति परिमित प्राणचारांश अभिलक्षित होता है = जाना जाता है । यहाँ यह तात्पर्य है—इस प्रकार गणना करने पर प्राणचार के सोलहवें भाग (२१६०० × १६ =) में ३४५६०० चक्रों का उदय होगा । उसकी भी अर्धकलना करने पर ६९१२०० वाले चक्र का बत्तीसवाँ भाग होता है । उसका भी आध करने पर १३८२४०० चक्र का चौंसठवाँ भाग—इतने तक ही परिमित, प्राणचार का भाग योगियों का लक्ष्य होता है ॥ १९-२० ॥

प्रश्न—इस प्रकार के लक्ष्य से योगियों को क्या लाभ होता है?—यह शङ्का कर कहते हैं—

इस प्रकार प्रयत्नपूर्वक प्राणचार का निरोध करने वाले योगी का क्रमशः प्राणचार का ग्रास ही हो जाता है ॥ -२१-२२- ॥

ग्रास—विरूद्धरूप से पुनः (प्राणचार का) उदय न होने से ॥ २१ ॥

इससे भी इसका क्या होता है ?—यह शङ्का कर कहते है—

प्राण के ग्रास के द्वारा क्रमशः कालसङ्कर्षण की स्थिति को प्राप्त होने से एक पूर्ण संवित् उत्पन्न हो जाती है अर्थात् ज्ञान के भेद के हट जाने के कारण, (योगी के लिए) एक और ज्ञान का बोधक महाप्रकाश पूर्णता के साथ प्राप्त हो जाता है ॥ -२२-२३- ॥

तथा हि प्राणचारस्य नवस्यानुदये सति ॥ २३ ॥
न कालभेदजनितो ज्ञानभेदः प्रकल्पते ।

कालस्य हि साक्षात् प्राणोऽधिष्ठानमिति प्राणस्यानुदये कालोऽपि नोदियात्, इति तस्याभावात् तज्जनितोऽपि ज्ञानस्य भेदो न भवेत्,—इति युक्तमुक्तम्—'एकैव पूर्णा संवित्स्यात्' इति ॥ २३ ॥

ननु प्राणग्रासक्रमेण कालस्यापि ग्रासो वृत्तः,—इति तदाहितश्चेत्संविदि भेदो नास्ति तज्ज्ञेयाहितो भविष्यति येनेदं नीलज्ञानमिदं पीतज्ञानमिति विभागः, इत्येतावतैव कथमेकत्वमस्याः सिद्ध्येत् ?—इत्याशङ्क्याह—

संवेद्यभेदान्न ज्ञानं भिन्नं शिखरिवृत्तवत् ॥ २४ ॥

नहि एकान्ततः संवेद्यभेदः संविदं भिन्द्यात् । एवं हि तत्तद्गृहाणां नामादिवेद्यभेदेऽपि कथमेकमेव नगरादिज्ञानं स्यादित्युक्तं 'शिखरिवृत्तवत्' इति । उन्नतप्रदेशावस्थितस्य हि पुंसस्तत्तदाभासमय एक एव प्रकाशो भवेदिति भावः । यदाहुः—

ज्ञानभेद के नाश को ही बतलाते हैं—

इस प्रकार नये प्राणचार का उदय न होने पर कालभेद के कारण उत्पन्न होने वाला ज्ञानभेद नहीं होता ॥ -२३-२४- ॥

प्राण काल का साक्षात् अधिष्ठान है । इसलिए प्राण का उदय न होने पर काल भी उदित नहीं होता—फलतः उसका अभाव होने के कारण तज्जनित ज्ञानभेद भी नहीं होता—इसलिये ठीक ही कहा गया है—'एक ही पूर्ण संवित् (उदित) होती है ॥ २३ ॥

प्रश्न—प्राणग्रास के क्रम से काल का भी ग्रास होता है । यदि संविद् में उसके द्वारा किया गया भेद नहीं है तो ज्ञेय के द्वारा (उत्पन्न) किया गया (भेद) होगा जिससे 'यह नील ज्ञान है', यह पीत ज्ञान है'—ऐसा विभाग होता है । तो इससे भी इस (= संवित्) की एकता कैसे सिद्ध होगी ?—यह शङ्का कर कहते हैं—

संवेद्य के भेद से ज्ञान भिन्न नहीं होता । जैसे कि पर्वत पर होने वाला (ज्ञान) ॥ -२४ ॥

ज्ञेय का भेद आवश्यक रूप से संविद् का भेद नहीं करता । ऐसा होने पर भिन्न-भिन्न गृहों का नाम आदि वेद्य (विषय) का भेद होने पर भी '(पर्वत के शिखर पर चढ़ कर देखने पर) एक ही नगर आदि' रूप वाला ज्ञान कैसे होगा? इसलिए कहा गया—शिखरिवृत्त के समान । ऊँचे प्रदेश (पर्वत आदि) में खड़े पुरुष को भिन्न-भिन्न आभास वाला एक ही प्रकाश होता है—यह तात्पर्य है । जैसा

'तस्मात्सत्यपि बाह्येऽर्थे धीरेकानेकवेदनात् ।
अनेकसदृशाकारा नानेकेव प्रसज्यते ॥' इति ।

तस्मादस्य काल एव भेदकः, स चातिसूक्ष्मक्षणात्माभिमतो येन ज्ञानस्योत्पादानन्तरं निरोधो भवेत् ॥ २४ ॥

तदाह—

कालस्तु भेदकस्तस्य स तु सूक्ष्मः क्षणो मतः ।

तुशब्दो हेतौ । स इति कालः ॥

ननु चास्य सौक्ष्म्ये कोऽवधिः ?—इत्याशङ्क्याह—

सौक्ष्म्यस्य चावधिर्ज्ञानं यावत्तिष्ठति स क्षणः ॥ २५ ॥

तेन नियतोभयान्तपरिच्छिन्ना ज्ञानीयैव सत्तास्य सत्तेत्यर्थः ॥ २५ ॥

नन्वस्य परोपाधिकः कस्मादेवं निर्देशः ?—इत्याशङ्क्याह—

अन्यथा न स निर्वक्तुं निपुणैरपि पार्यते ।

कि कहते हैं—

"इसलिए बाह्य अर्थ के रहने पर भी एक और अनेक ज्ञान के कारण अनेक सदृश आकार वाली (बुद्धि) अनेक नहीं होती ।"

इस कारण इस (= ज्ञान) का भेदक काल ही है । और वह अति सूक्ष्म क्षणस्वभाव वाला माना गया है जिससे ज्ञान की उत्पत्ति के बाद उसका निरोध हो जाता है ॥ २४ ॥

वही कहते हैं—

क्योंकि काल ही उसका भेदक है और वह सूक्ष्म क्षण माना गया है ॥ २५- ॥

(पहला) 'तु' शब्द हेतु अर्थ में है । वह = काल ॥

प्रश्न—इसकी सूक्ष्मता की सीमा क्या है ?—यह शङ्का कर कहते है—

(इसकी) सूक्ष्मता की सीमा ज्ञान है । जब तक (एक ज्ञान) रहता है वह क्षण (एक) ही होता है ॥ -२५ ॥

इससे नियत दोनों अन्तों से परिच्छिन्न ज्ञानसम्बन्धी सत्ता ही इस (= क्षण) की सत्ता है ॥ २५ ॥

प्रश्न—इसका ऐसा परोपाधिक निर्देश क्यों (किया गया) ?—यह शङ्का कर कहते है—

अन्यथेति 'अभेद्यो निरंश: काललवक्षण:' इत्यादिना साक्षाल्लक्षणेनेत्यर्थ: । एवं हि उत्पादानन्तरं निरोध इत्येवमुच्यमाने तस्याद्यन्तौ कथितौ स्यातां तत्सद्भावे च मध्यमप्यवश्यसंभाव्यम्,—इत्यस्यादिमध्यावसानैस्त्र्यंशत्वमापतेदिति निरंशत्वेऽभिधित्सिते सांशत्वमभिहितं स्यात् । यदाहु:—

'यथान्तोऽस्ति क्षणस्यैवमादिर्मध्यं च चिन्त्यताम् ।
आत्मकत्वात्क्षणस्यैवं न लोकस्य क्षणे स्थिति: ॥'

इति । इत्थम्—

'आदिमध्यावसानानि चिन्त्यानि क्षणवत्पुन: ।'

इत्याद्युक्तयुक्त्यादिमध्यान्तरूपाणां तदंशानामप्येवंविचारे क्रियमाणे स एव पर्यनुयोग:,—इत्यनवस्थानात् न किंचित्सिद्ध्येत्,—इत्यतिनिपुणैरपि तस्य लक्षणं कर्तुं न शक्यं, कृतं वा न प्ररोहमियात् ॥

ननु यद्येवं तज्ज्ञानस्यापि कोऽवधिर्येनैतन्निरूपितं भवेत् ?—इत्याशङ्क्याह—

अन्यथा कुशल लोगों के द्वारा भी उसका निर्वचन नहीं किया जा सकता ॥ २६- ॥

अन्यथा = अभेद्य और निरंश काल का भाग क्षण (कहलाता) है ।' इत्यादि साक्षात् लक्षण के द्वारा । इस प्रकार उत्पाद के बाद निरोध होता है—ऐसा कहने पर उसके आदि और अन्त कहे जाने और उनके होने पर मध्य भी अवश्य होगा—इस प्रकार यह आदि मध्य और अन्त के कारण तीन अंश वाला होने लगेगा । फलत: निरंशत्व कहने की इच्छा थी और सांशत्व कहा जायगा । जैसा कि कहते हैं—

'जिस प्रकार क्षण का अन्त है उसी प्रकार (उसका) आदि और मध्य भी सोचना चाहिए । क्षण के इस प्रकार के होने से लोक की क्षण में स्थिति (उनको ज्ञात) ही नहीं होगी ।'

इस प्रकार—

'क्षण की भाँति आदि मध्य और अन्त्य भी चिन्त्य है ।'

इत्यादि उक्त युक्ति के द्वारा आदि मध्य और अन्तरूप उसके अंशो का इस प्रकार विचार किए जाने पर वही दोष आता है फलत: अनवस्था होने से कुछ सिद्ध नहीं होगा—इसलिए अत्यन्त निपुण लोगों के द्वारा भी उसका लक्षण नहीं किया जा सकता और कर भी दिया गया तो (उसका) विस्तार (प्रचार) नहीं होगा ॥ २५ ॥

प्रश्न—यदि ऐसा है तो ज्ञान की क्या सीमा होगी जिससे इसका निरूपण हो सकें?—यह शङ्का कर कहते हैं—

ज्ञानं कियद्भवेत्तावत्तदभावो न भासते ॥ २६ ॥

कियदिति, क्षणिकत्वेऽपि किंपरिमाणमित्यर्थः । 'तदभावः' इति ज्ञानाभावः, तेन यावत्तदभावो न वृत्तस्तावदेकमेव तज्ज्ञानं भवेदिति भावः । अभावश्च प्रत्यक्ष-ग्राह्यः कार्यश्चेति अन्यत्रोपपादितमिति तत एवावधार्यम् ॥ २६ ॥

ननु यद्येवं तत्तदभावोऽपि कदा जायते येन ज्ञानस्याप्यवधिः ?—इत्याशङ्क्याह—

तदभावश्च नो तावद्यावत्तत्राक्षवर्त्मनि ।
अर्थे वात्मप्रदेशे वा न संयोगविभागिता ॥ २७ ॥

ज्ञानस्य च तावदभावो न जायते यावदिन्द्रियाणामर्थस्य प्रमातुर्वा संयोग-विभागौ न स्यातां, तदविरतेन्द्रियव्यापारस्य प्रमातुर्नीलादिविषये ज्ञाने जायमाने यदा नीलादिना विभाग उत्पद्यते, पीतादिना वा संयोगस्तदा तदभाव इति । ननु प्रदीपादिवत् प्रतिक्षणं करणोपयोगात् ज्ञानस्य क्षणिकत्वे सर्वेषां तावदविवादोऽन्यथा विततकरणव्यापारस्यापि प्रमातुर्नीलादिज्ञानं न स्यात्, तत्किमेतदुक्तं यदिन्द्रियाणां यावन्न संयोगविभागोदयस्तावदेकमेव ज्ञानमिति; एवं हि धारावाहिनां विज्ञानानाम-

---

ज्ञान कितना होना चाहिए? (उत्तर है—कि) उतना जब तक कि उसका अभाव न प्रतीत हो ॥ -२६ ॥

कितना अर्थात् क्षणिक होने पर भी किस परिमाण वाला? उसका अभाव = ज्ञान का अभाव । इस प्रकार जब तक उसका अभाव न हो जाय तब तक वह ज्ञान एक ही होता है । अभाव का ज्ञान प्रत्यक्ष होता है और वह (= अभाव) कार्य है—यह बात अन्यत्र कही गई है इसलिए वहीं से जान लेना चाहिए ॥ २६॥

प्रश्न—यदि ऐसा है तो उसका अभाव भी कब उत्पन्न होता है जिससे ज्ञान की भी सीमा (निर्धारित) होती है?—यह शङ्का कर कहते है—

उसका अभाव तब तक नहीं (उत्पन्न) होता जब तक इन्द्रिय, विषय अथवा ज्ञाता में संयोग विभाग उत्पन्न नहीं होता ॥ २७ ॥

ज्ञान का तब तक अभाव नहीं उत्पन्न होता जब तक इन्द्रियों, अर्थ अथवा प्रमाता का संयोग-विभाग न हो जाय । तो निरन्तर इन्द्रियव्यापार वाले प्रमाता का नील आदि विषयक ज्ञान उत्पन्न होने पर जब नील आदि से विभाग उत्पन्न हो जाता है या पीत आदि के साथ संयोग (होता है) तब उसका अभाव होता है । प्रश्न—दीपक आदि के समान प्रतिक्षण इन्द्रियों का उपयोग होने के कारण ज्ञान को क्षणिक मानने में सबकी सहमति है अन्यथा इन्द्रियव्यापारयुक्त भी प्रमाता को नील आदि का ज्ञान नहीं होगा तो यह कैसे कहा गया कि जब तक इन्द्रियों का संयोग विभाग उत्पन्न न हो तब तक एक ही ज्ञान होता है, इस प्रकार से तो

भावोऽभिहितो भवेत् । सत्यं, किन्तु भवदभिरुचितं निरन्वयविनाशात्म क्षणिकत्वं ज्ञानस्य न स्यात्, इत्यभिदध्मः । अनन्तरं हि त्रिचतुरादिक्षणावस्थायि ज्ञानं भवेदिति समनन्तरं क्षणनिर्णयेनैवोपपादितम् । तस्मादेकरसेऽपि नीलादिविषये विज्ञानेऽन्तरा चक्षुरादीन्द्रियविभागादिना तदभावादि स्थितमेव किंतु न तथा सञ्चेत्यते; तेन धारावाहिनां विज्ञानानामप्यभावो न स्यादिति न कश्चिद्विरोधः ॥ २७ ॥

ननु संयोगविभागितापि किं सकारणिका भवेत् न वा ?—इत्याशङ्क्याह—

सा चेदुदयते स्पन्दमयी तत्प्राणगा ध्रुवम् ।
भवेदेव ततः प्राणस्पन्दाभावे न सा भवेत् ॥ २८ ॥

स्पन्दमयीति, स्पन्दः प्रकृतिर्मूलकारणं यस्याः सा स्पन्दाधीनैव इत्यर्थः । देशाद्देशान्तरं हि चलद्वस्तु वस्त्वन्तरेण संयुज्यते वियुज्यते वेत्यभिप्रायः । स्पन्दश्च प्राणाश्रयः, इति पारम्पर्येण संयोगविभागितापि प्राणगतैव निश्चितं भवेत्, इति प्राणस्पन्दाभावे सा न भवेत्; निमित्ताभावे नैमित्तिकस्याप्यभावः—इतिनीत्या तद्भावोऽपि कुतस्त्य इत्यर्थः ॥ २८ ॥

धारावाही विज्ञानों का भी अभाव कहा जाना चाहिए ? (आपका प्रश्न) सत्य है किन्तु आप (= बौद्ध) का अभिमत ज्ञान का निरन्वय विनाश वाला क्षणिकत्व नहीं होगा (हम) यह कह रहे हैं । बाद में तीन चार आदि क्षण तक स्थित रहने वाला ज्ञान होगा यह पूर्वोक्त क्षणनिर्णय से ही सिद्ध कर दिया गया है । इसलिए नील आदि विषयक विज्ञान के एक रस होने पर भी बीच में चक्षु आदि इन्द्रियविभाग आदि के द्वारा उस (= ज्ञान) का अभाव आदि होता तो है ही किन्तु (उसका) अनुभव नहीं होता । इसलिए धारावाही विज्ञानों का भी अभाव नहीं होगा—इस प्रकार कोई विरोध नहीं है ॥ २७ ॥

प्रश्न—संयोग विभाग भी क्या किसी कारण से होते हैं या नहीं?—यह शङ्का कर कहते हैं—

यदि स्पन्दकारणवाली वह (= संयोगविभागिता) उदित होती है तो (वह) निश्चित प्राणगता होती है । इस कारण प्राणस्पन्द के अभाव में वह नहीं होती ॥ २८ ॥

स्पन्दमयी = स्पन्द है प्रकृति अर्थात् मूल कारण जिसकी वह, अर्थात् स्पन्दाधीन । एक स्थान से दूसरे स्थान को चलने वाली वस्तु ही दूसरी वस्तु से संयुक्त होती है अथवा वियुक्त होती है—यह अभिप्राय है और स्पन्द प्राण के अधीन है । इस प्रकार परम्परा से संयोग विभाग भी प्राण के अधीन है-यह निश्चित है । इस प्रकार प्राणस्पन्द के अभाव में वह नहीं होगी । कारण के अभाव में कार्य भी नहीं होता—इस नीति के अनुसार उसका अस्तित्व भी कहाँ से होगा ?—यह

ननु भवतु नाम संयोगविभागिता मा वा भूत् किमनया नश्चिन्तया, यावता ह्यत्र प्राणग्रासक्रमेण कालग्रासे वृत्ते एकैव पूर्णा संवित्स्यादित्युपक्रान्तं तदेव कथं निर्वहेत् इत्युच्यताम् ?—इत्याशङ्क्याह—

तदभावान्न विज्ञानाभावः सैवं तु सैव धीः ।

तस्याः संयोगविभागितायाः अभावाद्विज्ञानस्याप्यभावो न स्यात्, यद्धि यदन्वयव्यतिरेकानुविधायि तत्तत्कार्यं भवेदिति भावः । एवं हि सति सा प्राच्या या धीः संवित्सैवेयं नतु संविदन्तरमेकैव पूर्णा संवित्स्यादित्यर्थः ॥

नन्वेवमेकस्या एव संविदः किं पूर्वापरैकीकाराद्वैतत्येनावभासो भवेत् ?—इत्याशङ्क्याह—

न चासौ वस्तुतो दीर्घा कालभेदव्यपोहनात् ॥ २९ ॥

असाविति धीः, दीर्घेत्यर्थान्न सूक्ष्मापि, दैर्घ्यादि हि कालाधीनं, न चास्यास्तत्स्पर्श एवास्ति अकालकलितत्वात् ॥ २९ ॥

तदाह—

अर्थ है ॥ २८ ॥

प्रश्न—संयोग विभाग हों या न हों हमें इस चिन्ता से क्या लाभ ? यहाँ प्राणग्रास के क्रम से काल का ग्रास सम्पन्न होने पर एक ही पूर्ण संवित् उदित होती है—यह (वर्णन) प्रारब्ध हुआ था, वही कैसे होता है इसे बतलाइये ?—यह शङ्का कर कहते है—

उसके अभाव से विज्ञान का भी अभाव नहीं है । इस प्रकार वह वही बुद्धि है ॥ २९- ॥

उसके = संयोगविभागिता के अभाव के, कारण विज्ञान का भी अभाव नहीं होता । जो जिसके अन्वयव्यतिरेक का अनुगामी है वह उसका कार्य होता है—यह तात्पर्य है । ऐसा होने पर वह = पहले से वर्त्तमान, धी = संवित्, वही यह है न कि दूसरी (क्योंकि) संवित् एक और पूर्ण होती है ॥

प्रश्न—क्या इस प्रकार एक ही संवित् का पूर्वापर एकीकृत अद्वैत के रूप में अवभास होता है ?—यह शङ्का कर कहते है—

कालभेद के अपोहन के कारण यह (बुद्धि) वस्तुतः दीर्घ नहीं है ॥ -२९ ॥

यह = बुद्धि, दीर्घा—अर्थात् सूक्ष्म भी नहीं है । दीर्घता आदि काल के अधीन है और इस (= बुद्धि) का उस (= काल) से स्पर्श तक नहीं है क्योंकि वह काल से कलित (= सम्बद्ध, अधीन) नहीं है ॥ २९ ॥

वस्तुतो ह्यत एवेयं कालं संविन्न संस्पृशेत्।

एवं वस्तुतो नित्यत्वमप्यस्या न संभवेत्, तद्धि कालत्रयानुगामित्वमुच्यते नतु सदाभासमानत्वम्, एवं हि त्रिषु कालेषु भासमानत्वमुक्तं स्यात् । यदाहुः—

'न सदा न तदा न चैकदेत्यपि सा यत्र न कालधीर्भवेत् ।
तदिदं भवदीयदर्शनं न च नित्यं न च कथ्यतेऽन्यथा ॥'
(उ० स्तो० १२।५)

ननु यद्येवमकालकलिता वस्तुत एकैव संविदस्ति तत्कथमयं बहिर्भेदनिष्ठो व्यवहारः सिद्ध्येत् ?—इत्याशङ्क्याह—

अत एकैव संवित्तिर्नानारूपे तथा तथा ॥ ३० ॥
विन्दाना निर्विकल्पापि विकल्पो भावगोचरे ।

अतः कालसंस्पर्शाभावात् एकैव निर्विकल्पापि संवित्तिर्नानारूपेऽनेकाभाससंमूर्छनात्मनि भावविषये तथा तथा नीलानीलादिरूपतया विन्दाना विमृशन्ती विकल्प इत्युच्यते, इति न बाह्यस्यापि व्यवहारस्य विप्रलोपः ॥ ३० ॥

वही कहते है—

इसीलिए वस्तुतः यह संवित् काल का स्पर्श नहीं करती ॥ ३०- ॥

इस प्रकार वस्तुतः इस (= संवित्) की नित्यता भी सम्भव नहीं है । क्योंकि वह (= नित्यत्व) तीनो काल का अनुगामी माना जाता है न कि सदा आभासमान होने वाला । ऐसा होने पर तीनो कालों में भासमानता कही जानी चाहिए था । जैसा कि कहते हैं—

"न सदा, न किसी विशिष्ट काल में और न एक बार—ऐसी जिसके बारे में कालबुद्धि नहीं होती ऐसा है यह आपका दर्शन । यह न नित्य न दूसरी प्रकार का कहा जा सकता है ।" (उ० स्तो. १२।५)

प्रश्न—यदि इस प्रकार अकालकलित वस्तुतः एक ही संविद् है तो यह बाहरी भेदगत व्यवहार कैसे सिद्ध होगा?—यह शङ्का कर कहते है—

इसलिए एक ही संवित् निर्विकल्पक होते हुए भी अनेक रूप पदार्थों के विषय में भिन्न-भिन्न (रूपों) का विमर्श करती हुई विकल्प (कही जाती है) ॥ -३०-३१- ॥

इस कारण = कालसंस्पर्श के अभाव के कारण, एक ही निर्विकल्प भी संवित् नाना रूप वाले = अनेक आभास की संमूर्छना वाले, पदार्थों के विषय में उस-उस प्रकार = नील अनील आदि के रूप से, विन्दाना = विमर्श करती हुई, विकल्प कही जाती है । इस प्रकार बाह्य भी व्यवहार का लोप नहीं होता ॥ ३० ॥

ननु तथा तथा विमर्शेऽप्यस्याः कथमेकत्वमेव ?—इत्याशंक्याह—

स्पन्दान्तरं न यावत्तदुदितं तावदेव सः ॥ ३१ ॥
तावानेको विकल्पः स्याद्विविधं वस्तु कल्पयन्।

तत्तस्मात्पूर्वोक्तात्तत्तदर्थादिसंयोगविभागोत्पादलक्षणात् हेतोर्यावद्विकल्प्यवस्त्वन्तरविषयं स्पन्दान्तरं नोदितं तावन्नानाप्रकारं वस्तु कल्पयन्नपि तावान्दीर्घदीर्घ एक एव विकल्पः स्यात् न पुनरनेक इत्यर्थः । यत्तदनेकाभाससंमूर्छनात्मतया विकल्प्यमानेऽपि नीलादौ विकल्पस्यैक्यमेव तावत् एकस्यैवानुसंधानस्य भावात् अन्यथा पुनरस्य स्वरूपलाभ एव न भवेदिति भावः ॥ ३१ ॥

तदाह

ये त्वित्थं च विदुस्तेषां विकल्पो नोपपद्यते ॥ ३२ ॥
स ह्येको न भवेत्कश्चित् त्रिजगत्यपि जातुचित् ।

ये इति बौद्धाः । इत्थमिति स्पन्दान्तरोदय एव विकल्पान्तराणामुदयो नत्वेकस्मिन्नेव स्पन्दे इत्यर्थः । एक इति, येन स्मृत्यपलापाद्यनेकाश्रयनिबन्धनो बाह्यो व्यवहारः सिद्ध्येत् ।

प्रश्न—भिन्न-भिन्न विमर्श होने पर यह एक ही कैसे है ?—यह शङ्का कर कहते हैं—

इस कारण जब तक दूसरा स्पन्द उदित नहीं होता तब तक विविध वस्तुओं की कल्पना करता हुआ उतना बड़ा एक ही विकल्प रहता है ॥ -३१-३२- ॥

तत् = उस पूर्वोक्त भिन्न-भिन्न अर्थ आदि के संयोग विभाग की उत्पत्ति लक्षण वाले कारण से, जब तक किसी दूसरी विकल्प्य वस्तु से सम्बद्ध दूसरा स्पन्द उदित नहीं होता तब तक अनेक प्रकार की वस्तु की कल्पना करता हुआ भी उतना = बड़े से बड़ा एक ही विकल्प होता है न कि अनेक । जो कि अनेक आभासों की संमूर्च्छना के रूप में नील आदि के विकल्पित होने पर भी नील आदि के विषय में विकल्प एक ही होता है वह उतना बड़ा एक ही अनुसन्धान होने के कारण । अन्यथा पुनः इसका स्वरूपलाभ ही नहीं होगा ॥ ३१ ॥

वही कहते हैं—

जो ऐसा नहीं मानते उनके मत में विकल्प की सिद्धि नहीं होती । तीनों लोक में कभी भी कोई एक विकल्प नहीं होता ॥ -३२-३३- ॥

जो लोग = बौद्ध । इस प्रकार = दूसरे स्पन्द का उदय ही दूसरे विकल्पों का उदय होता है न कि एक ही स्पन्द में—यह अर्थ है । एक—जिससे स्मृति का अपलाप आदि अनेक आश्रय सम्बन्धी बाह्य व्यवहार सिद्ध होता है ॥ ३२ ॥

एतदेव दर्शयति—

शब्दारूषणया ज्ञानं विकल्पः किल कथ्यते ॥ ३३ ॥
सा च स्यात्क्रमिकैवेत्थं किं कथं को विकल्पयेत् ।
घट इत्यपि नेयान्स्याद्विकल्पः का कथा स्थितौ ॥ ३४ ॥
न विकल्पश्च कोऽप्यस्ति यो मात्रामात्रनिष्ठितः ।

कथ्यते इति भवद्भिः । यदुक्तं—'अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना' इति । सेति—शब्दारूषणा, क्रमिकेति—वाचः क्रमभावित्वात्, इत्थं क्रमिकत्वाद्विकल्पस्योदितानां तत्क्षणानां प्रध्वस्तत्वान्नवानां चानुदयात् को न कश्चित्कल्पितोऽपि विकल्पात्मा प्रमाता किमुत्पन्न प्रध्वस्तप्रकल्प्यं पूर्वापरानुसंधानादेरभावाच्च कथं विकल्पयेत् विकल्पस्य स्वरूपलाभ एव न भवेदित्यर्थः । अत एव घकारोच्चारकाले टकारस्याभावात्तदुच्चारकाले च तस्य प्रध्वस्तत्वात् यत्र 'घट' इत्येतावन्मात्रोऽपि विकल्पो न सिध्येत् तत्र व्यवहारादिचिन्ता दूर एवास्तां, तदवस्थानमात्रेऽपि का वार्तेत्यर्थः । नहि तन्मते कोऽप्येवंविधो विकल्पोऽस्ति यस्यांशमात्रेऽपि परिनिष्ठितत्वं, तथात्वे ह्येषां क्षणभङ्गव्रतविलोपो भवेदिति भावः ॥ ३३-३४ ॥

यही दिखलाते हैं—

शब्द से संसक्त होने के कारण ज्ञान को विकल्प कहा जाता है । और वह (= शब्दारूषणा अर्थात् शब्दसंसक्ति) क्रमिक ही होती है । इस प्रकार कौन किसकी किस प्रकार विकल्पना करेगा । 'घट' इतना सा भी विकल्प (उत्पन्न) नहीं हो सकता (उसके) ठहरने की क्या बात । कोई भी ऐसा विकल्प नहीं है जो एक मात्रा में रहता हो ॥ -३३-३५- ॥

कहा जाता है—आप (= बौद्ध) लोगों के द्वारा । जैसा कि कहा गया है—'कल्पना (वह) प्रतीति है (जो) कथन के सम्बन्ध के योग्य प्रतिभास वाली हो ।' वह = शब्दारूषणा । क्रमवाली—क्योंकि वाणी क्रम से उत्पन्न होती है । इस प्रकार = विकल्प के क्रमिक होने से, उसके उदित क्षणों के नष्ट होने से और नवीन (क्षणों) के उदित न होने से, कौन = कोई कल्पित भी विकल्प वाला प्रमाता, किसको = उत्पन्न और नष्ट के द्वारा कल्पनीय, पूर्वापर अनुसन्धान आदि के अभाव के कारण, कैसे विकल्पना करेगा ? विकल्प उत्पन्न ही नहीं होगा—यह तात्पर्य है । इसलिए घकार के उच्चारण के समय टकार की स्थिति के न होने से और टकार के उच्चारणकाल में घकार के नष्ट हो जाने से जहाँ 'घट' इतना भी विकल्प सिद्ध नहीं होता वहाँ व्यवहार आदि की चिन्ता तो दूर ही है । उसकी स्थितिमात्र के विषय में भी क्या बात हो सकती है । बौद्ध मत में कोई भी ऐसा विकल्प नहीं है जो अंशमात्र में भी पूर्ण हो क्योंकि ऐसा होने पर इनका क्षणभङ्गसिद्धान्त लुप्त हो जायेगा ॥ ३३-३४ ॥

नन्वेकमेव मालासूत्रवत्सर्वत्रानुयायि ज्ञानं किंचिन्नास्ति, इत्यस्माकं मतं नतु क्षणभङ्गुराण्यनेकानि ज्ञानानि न सन्तीति; तत्तान्येव समुदितानि बाह्यव्यवहारनैपुण्यभाञ्जि भविष्यन्ति, इति को दोषः ?—इत्याशङ्क्याह—

न च ज्ञानसमूहोऽस्ति तेषामयुगपत्स्थितेः ॥ ३५ ॥

अयुगपत्स्थितेरिति, उत्पादानन्तरं तन्निरोधस्याभिधानात् ॥ ३५ ॥

तस्माद्वैकल्पिकः सकल एवायं व्यवहारस्तन्मते न सिद्धयेत् ।

इत्याह—

तेनास्तङ्गत एवैष व्यवहारो विकल्पजः ।

तेनास्मत्पक्ष एव ज्यायानित्याह—

तस्मात्स्पन्दान्तरं यावन्नोदियात्तावदेककम् ॥ ३६ ॥
विज्ञानं तद्विकल्पात्मधर्मकोटीरपि स्पृशेत् ।

तद्यावद्विकल्पान्तरनिष्ठं स्पन्दान्तरं नोदेति तावद् गोत्वशुक्लत्वचलत्वाद्यात्मकं धर्मौघमपि विकल्पयेत् एकमेवैतद्वैकल्पिकं ज्ञानं स्यात् येनैकानुसंध्यनुप्राणितः

प्रश्न—माला में वर्त्तमान सूत्र के समान एक ही सर्वत्र अनुयायी ज्ञान (नामक की) कोई चीज नहीं है—यह हमारा मत है न कि क्षणभङ्गुर अनेक ज्ञान नही है—यह । तो वे ही समुदित होकर बाह्य व्यवहार में कुशल हो जाते है ? इस प्रकार क्या दोष हैं ?—यह शङ्का कर कहते है—

ज्ञानसमूह (का अस्तित्व) नहीं हो सकता क्योंकि वे (ज्ञान) एक साथ स्थित नहीं रहते ॥ -३५ ॥

अयुगपत् स्थिति के कारण—उत्पत्ति के बाद उसके निरोध का भी कथन होने से ॥ ३५ ॥

इस कारण यह समस्त वैकल्पिक व्यवहार उनके मत में सिद्ध नहीं होगा—यह कहते हैं—

इसलिए विकल्प से उत्पन्न होने वाला यह व्यवहार समाप्त ही हो गया ॥ ३६- ॥

इसलिए हमारा पक्ष ही अधिक उत्तम है—यह कहते हैं—

इसलिए जब तक दूसरा स्पन्द उदित नहीं होता तब तक एक ही विज्ञान करोड़ों विकल्प रूप धर्मो का स्पर्श कर सकता है ॥ -३६-३७- ॥

तो जब तक दूसरे विकल्पों में रहने वाला दूसरा स्पन्द उदित नहीं होता तब तक गोत्व, शुक्लत्व, चलत्व आदि रूप धर्मसमूह की भी कल्पना करता हुआ यह

समग्र एवायं व्यवहारः सिध्येत् ॥ ३६ ॥

न चैतदपूर्वतया स्वोपज्ञमेवोक्तमित्याह—

एकाशीतिपदोदारशक्त्यामर्शात्मकस्ततः ॥ ३७ ॥
विकल्पः शिवतादायी पूर्वमेव निरूपितः ।

तत उक्तानेकधर्मपरामर्शकत्वेऽप्येकत्वलक्षणाद्धेतोर्व्योमव्यापिरूपः शुद्धविद्यात्मा विकल्पस्तत्तदनेकहृदादिशक्त्यामर्शकत्वेऽप्येकत्वात् पार्यन्तिकफलरूपां शिवतामेव ददातीति पूर्वमेवास्माभिरुक्तम् ॥ ३७ ॥

नन्वेवमेकस्मिन्नेव प्राणचारे एकपिण्डात्मकाच्चक्रादारभ्य सचतुःशतद्व्यशीतिसहस्राधिकत्रयोदशलक्षात्मकचक्राद्यन्तं यावच्चक्राणां स्वारसिक एवोदयो वर्तते,—इति योगिनां प्रतिनियतचक्रविषयः कथमवगमो भवेत् ?—इत्याशङ्कां दृष्टान्तोपदर्शनेनोपशमयति—

यथा—

कर्णौ नर्तयामीत्येवं यत्नात्तथा भवेत् ॥ ३८ ॥
चक्रचारगताद्यत्नात्तद्वत्तच्चक्रगैव धीः ।

वैकल्पिक ज्ञान एक ही होता है जिससे एक अनुसन्धान से अनुगत यह सम्पूर्ण व्यवहार सिद्ध होता है ॥ ३६ ॥

इसे अपूर्व रूप में अपनी बुद्धि से ही नहीं कहा गया—यह कहते हैं—

इस कारण इक्यासी पदों वाली उदार शक्ति के आमर्श वाला विकल्प शिवभाव को देने वाला होता है—यह पहले ही कह दिया गया है ॥ -३७-३८- ॥

इस कारण = उक्त अनेक धर्म का परामर्शक होने पर भी एकरूप होने के कारण; व्योमव्यापी रूप शुद्ध विद्या वाला विकल्प भिन्न-भिन्न अनेक हृदय आदि शक्ति का आमर्शक होने पर भी एक होने के कारण अन्तिम फलरूप शिवता को ही देता है—यह हमने पहले ही कह दिया है ॥ ३७ ॥

प्रश्न—इस प्रकार एक ही प्राणचार में एक पिण्डात्मक चक्र से आरम्भ करके १३८२४०० चक्र के अन्त तक चक्रों का स्वाभाविक ही उदय होता है तो योगियों को एक-एक चक्र का ज्ञान कैसे होता है ?—इस शङ्का को दृष्टान्त बताकर शान्त करते हैं—

जैसे 'दोनों कानों को हिलाता हूँ' (ऐसी इच्छा के कारण) ऐसा यत्न करने पर वैसा होता है (दोनों कान हिलते हैं) उसी प्रकार चक्र के चार में होने वाले प्रयत्न से चक्रगामिनी ही बुद्धि होती है ॥ -३८-३९- ॥

कर्णौ नर्तयामीत्येवमिच्छापूर्वकात्प्राणीयाद्यत्नात् यद्वद्योगिनस्तथा भवेत्, गोस्फुरितादिन्यायेन कर्णद्वयमेव नृत्यत्स्यात् तद्वदेकपिण्डादिचक्रप्रधानो यः प्राणीयश्चारस्तद्गतादपि यत्नात्तच्चक्रगैव धीः प्रारिप्सितोदयप्रतिनियतचक्रनिष्ठ एवावबोधो भवेदित्यर्थः । अयमत्र भावः—इह खलु योगिना यत्र क्वापि कर्मणि यस्य कस्यचिन्मन्त्रस्यावश्यं प्राणसाम्येनोच्चारः कार्यः अन्यथा हि न कार्यसिद्धिः स्यात् । तदुक्तम्—

'जपेत्तु प्राणसाम्येन ततः सिद्धिर्भवेद् ध्रुवम् ।
नान्यथा सिद्धिमाप्नोति हास्यमाप्नोति सुन्दरि ॥' इति ।

ततश्चैकपिण्डात्मनोऽन्यस्य वा चक्रस्योदये तुल्य एव विधिः प्राणसाम्यस्य सर्वत्राविशेषात् ॥ ३८ ॥

तदाह—

जपहोमार्चनादीनां प्राणसाम्यमतो विधिः ॥ ३९ ॥

होमेति, तत्रापि मन्त्रोच्चारस्य भावात् । अत इत्युक्ताच्चक्रोदयाद्धेतोः, संख्यायास्तु स्वारसिकप्राणचाराभिप्रायेण वर्णभूयस्त्वाभूयस्त्वनिबन्धनं तथात्वमिति न कश्चिद्विरोधः ॥ ३९ ॥

'कानों को हिलाता हूँ'—इस प्रकार इच्छापूर्वक प्राणीय यत्न से जैसे योगी को उस प्रकार का होने लगता है = गोस्फुरित आदि न्याय (= पशु अपनी इच्छा से पीठ आदि अङ्गों का चर्म हिलाते हैं) से कान ही हिलते हैं उसी प्रकार एक पिण्ड आदि मुख्य चक्र वाला जो प्राणीय चार उसमें होने वाले भी यत्न से, चक्रगामिनी ही बुद्धि = प्रारिप्सित उदय वाले चक्र से ही सम्बद्ध बोध, होता है। यहाँ यह तात्पर्य है—योगी जिस किसी कर्म में जिस किसी मन्त्र का आवश्यक रूप से प्राणसाम्य के साथ उच्चारण करे अन्यथा कार्यसिद्धि नहीं होती । वही कहा गया है—

"हे सुन्दरि प्राणसाम्य के साथ जप करना चाहिए । तब सिद्धि निश्चित होती है। अन्यथा (साधक) सिद्धि को प्राप्त नहीं होता हास्य को प्राप्त होता है ।"

इसलिए एक पिण्डात्मा या अन्य (पिण्डात्मक) चक्र के उदय के सम्बन्ध में समान ही विधि है क्योंकि प्राणसाम्य सब जगह एक ही है ॥ ३८ ॥

वही कहते हैं—

इस कारण जप होम अर्चन आदि के (विषय में) प्राणसाम्य का विधान है ॥ -३९ ॥

होम—वहाँ भी मन्त्रोच्चार के होने से । इस कारण = उक्त चक्रोदय के कारण। संख्या का वैसा होना स्वाभाविक प्राणचार के अभिप्राय से वर्ण की

किमत्र प्रमाणम् ?—इत्याशङ्क्याह—

सिद्धामते कुण्डलिनीशक्तिः प्राणसमोन्मना।
उक्तं च योगिनीकौले तदेतत्परमेशिना ॥ ४० ॥

तदेतत्परमेशिना श्रीसिद्धयोगीश्वरीमते श्रीयोगिनीकौले चोक्तमिति संबन्धः । तत्तदेकपिण्डाद्यात्मकमन्त्ररूपतया बहिरुल्लसन्ती वर्णकुण्डलिन्याख्या पारमेश्वरी शक्तिर्यदि नाम प्राणसमा प्राणसाम्येनोदयमियात् तदुन्मना शिवैकात्म्येन प्रस्फुरेदित्यर्थः । यदुक्तं तत्र—

'कुर्यात्प्राणसमं जप्यं होमं प्राणसमं कुरु ।
एवं प्राणसमा शक्तिः कुण्डलाख्या मनोन्मनी ॥' इति ॥ ४० ॥

श्रीयोगिनीकौलग्रन्थं पठति—

पदमन्त्राक्षरे चक्रे विभागं शक्तितत्त्वगम् ।
पदेषु कृत्वा मन्त्रज्ञो जपादौ फलभाग्भवेत् ॥ ४१ ॥

पदप्रधानानि मन्त्राक्षराणि यत्रैवंविधे चक्रे पदेषु शक्तितत्त्वगं विभागं कृत्वा एकैकं पदं प्रतिप्राणचारं प्रविभागेनोदयं कारयित्वा जपहोमादौ मन्त्रोदयं जानानो

अधिकता और न्यूनता के कारण है । इस प्रकार कोई विरोध नहीं है ॥ ३८ ॥

इसमें क्या प्रमाण है?—यह शङ्का कर कहते है—

सिद्धा (= मालिनीविजयोत्तर) तन्त्र एवं योगिनीकौल तन्त्र मे परमेश्वर ने इस बात को कहा है कि कुण्डलिनी शक्ति प्राणसमा और उन्मना है ॥ ४० ॥

इस बात को परमेश्वर ने सिद्धयोगीश्वरतन्त्र एवं योगिनीकौल तन्त्र में कहा है—यह अन्वय है । भिन्न-भिन्न एक पिण्डात्मक मन्त्र के रूप में बाह्य जगत् में उल्लसित होती हुई वर्णकुण्डलिनी नामक पारमेश्वरी शक्ति यदि प्राणसमा = प्राणसाम्य के साथ उदित होती है तो उन्मना शिव से अभिन्न होकर स्फुरित होती है । जैसा कि वहाँ कहा गया है—

"जप को प्राण के साथ करना चाहिए । होम को प्राण के साथ करना चाहिए । इस प्रकार कुण्डलिनी नामक प्राणसमा शक्ति मनोन्मना नाम वाली होती है" ॥ ३९ ॥

योगिनीकौल ग्रन्थ को पढ़ते हैं—

पद (प्रधान) मन्त्राक्षर वाले चक्र में पदों में शक्तितत्त्वगामी विभाग कर मन्त्रवेत्ता जप आदि में फल का भागी होता है ॥ ४१ ॥

जहाँ मन्त्राक्षर पदप्रधान है, इस प्रकार के चक्र में पदों में शक्तितत्त्वानुसारी

योगी फलभाग्भवेत्, यथोचितं फलमाप्नुयादित्यर्थः ॥ ४१ ॥

ननु कोऽसौ विभागः किं वा फलम् ?—इत्याशङ्क्याह—

द्वित्रिसप्ताष्टसंख्यातं लोपयेच्छतिकोदयम् ।

इह चक्राणां प्रागुक्तवदेकद्वित्रिसप्ताष्टादिपदपिण्डसंख्यातम्, अर्थात् शतिकोदयमनेकपदपिण्डात्मकचक्रपर्यन्तं विभागमाश्रित्य, अर्थात् प्राणचारं लोण्येत् प्राणग्रासं कुर्यादित्यर्थः । एतदेव हि मुख्यं फलं योगिनां यदकालकलितायां परस्यां संविद्यनुप्रवेश इति ।

एवं चात्रैवावधातव्यमित्याह—

इति शक्तिस्थिता मन्त्रा विद्या वा चक्रनायकाः ॥ ४२ ॥
पदपिण्डस्वरूपेण ज्ञात्वा योज्याः सदा प्रिये ।
नित्योदये महातत्त्वे उदयस्थे सदाशिवे ॥ ४३ ॥
अयुक्ताः शक्तिमार्गे तु न जप्ताश्चोदयेन ये ।
ते न सिद्ध्यन्ति यत्नेन जप्ताः कोटिशतैरपि ॥ ४४ ॥

इति प्रागुक्तं सर्वं ज्ञात्वा चक्रप्रधाना मन्त्रा विद्या वा पदपिण्डस्वरूपेण

विभाग कर अर्थात् एक-एक पद का एक-एक प्राणचार के अनुसार अलग-अलग उदय कराकर जप होम आदि के विषय में मन्त्रोदय को जानने वाला योगी फल का भागी होता है अर्थात् फल को प्राप्त करता है ॥ ४१ ॥

प्रश्न—यह विभाग क्या है ? फल क्या हैं ?—यह शङ्का कर कहते हैं—

दो तीन सात आठ (आदि) संख्या वाले (अर्थात्) एक सौ उदय तक (प्राणचार का) लोप करना चाहिए ॥ ४२- ॥

चक्रों का पहले कथित (रीति) के समान एक दो तीन सात आठ आदि पद पिण्डसंख्या वाले अर्थात् एक सौ (चक्रों के) उदय तक अनेक पद पिण्डात्मक चक्रपर्यन्त विभाग कर प्राणचार का लोप करना चाहिए = प्राणग्रास करना चाहिए । (इसका) यही मुख्य फल है कि योगियों को अकालकलित परसंविद् में प्रवेश हो जाता है ॥

ऐसा यहीं पर समझना चाहिए—यह कहते हैं—

इस प्रकार चक्रप्रधान मन्त्रों अथवा विद्याओं को पदपिण्ड के रूप में शक्तिस्थित जानकर सदा (जप आदि में) जोड़ना चाहिए । प्रिय, नित्योदित, महातत्त्व, उदयस्थ, निरन्तर कल्याणकारी शक्तिमार्ग में न जोड़े गए जो मन्त्र आदि उदय के साथ नहीं जपे गए होते वे करोड़ों यत्न के द्वारा जपे जाने पर भी सिद्ध नहीं होते ॥ -४२-४४ ॥

समनन्तरोक्तपदपिण्डादिगत्या 'शक्तिस्थिता:' प्राणसाम्येनोदिताः सर्वकालं जपादौ योज्या येन यथोचिता योगिनां सिद्धिः स्यात् । अन्यथा हि नित्योदयेऽत एव परमुपेयत्वान्महातत्त्वे, सृष्टिप्राधान्यादुदयस्थेऽत एव तत्सिद्धिप्रदायित्वात् सदैव श्रेयोरूपे शक्तिरूपे मध्यधाम्न्ययोजिताः, तथा प्राणस्योदयेन निर्गमने अर्थात्प्रवेशेनापि ये मन्त्रादयो न जप्तास्ते कोटिशतैर्यत्नेनापि जप्ता न सिद्ध्यन्ति, तां पूर्णां दातुं न शक्ता इत्यर्थः । यदुक्तम्—

'न विन्दति यदा मन्त्री सृष्टिसंहारवर्त्मनी ।
उदयास्तमरूपेण मन्त्रा अल्पफलप्रदाः ॥
भोगं मोक्षं न यच्छन्ति जप्ता ध्यातास्तु पूजिताः ।
ईषत्फलं प्रयच्छन्ति शिवाज्ञासंप्रचोदिताः ॥' इति ।

मन्त्रा विद्या वेत्यनेनानुजोद्देशोद्दिष्टो मन्त्रविद्याभेदोऽप्यासूत्रितः ॥ ४४ ॥

ननु सर्वेषां मन्त्रादीनामविशेषेणैव किमियं व्यवस्था किमन्यथा वा ?— इत्याशङ्क्याह—

मालामन्त्रेषु सर्वेषु मानसो जप उच्यते ।
उपांशुर्वा शक्त्युदयं तेषां न परिकल्पयेत् ॥ ४५ ॥

इति = पूर्वोक्त सब कुछ जानकर, चक्रप्रधान मन्त्रसमूह या विद्यायें, पदपिण्ड रूप में = पूर्वोक्त पद पिण्ड आदि रीति से, शक्तिस्थित = प्राणसाम्य के साथ उदित, सब समय में जप आदि में जोड़ना चाहिए जिससे योगियों को यथोचित सिद्धि मिल सके । अन्यथा नित्योदित, इसलिए परम उपेय होने से महातत्त्व, सृष्टिप्रधान होने के कारण उदयस्थ इसलिए उस सिद्धि का प्रदाता होने के कारण सदा श्रेयोरूप शक्तिरूप मध्य धाम में संयुक्त न किए गये, तथा प्राण के उदय = निर्गम अर्थात् प्रवेश के द्वारा भी जो मन्त्र आदि नहीं जपे जाते वे (अन्य) करोड़ों यत्न से भी जपे जाने पर भी सिद्ध नहीं होते = सिद्धि को पूर्ण रूप से देने में समर्थ नहीं होते । जैसा कि कहा गया है—

"जब मन्त्र का जप करने वाला सृष्टि संहार रास्तों को उदय और अस्त के रूप में नहीं जानता तो मन्त्र (उसको) अल्प फल देने वाले होते हैं । जप ध्यान अथवा पूजा किए गए (वे मन्त्र) भोग और मोक्ष नहीं देते हाँ शिव की आज्ञा से प्रेरित होकर थोड़ा फल देते है ।"

मन्त्र अथवा विद्या इस (कथन) से अनुजोद्देश में कहा गया । मन्त्र अथवा विद्या का भेद भी बतला दिया गया ॥ ४२-४४ ॥

प्रश्न—सभी मन्त्र आदि के विषय में क्या सामान्यरूप से यही व्यवस्था है या दूसरे प्रकार की भी ?—यह शङ्का कर कहते हैं—

सभी माला मन्त्रों में मानस या उपांशु जप (का विधान) कहा

सर्वेष्विति विद्यास्वपि, मानस इति ।

तदुक्तम्—

'आत्मा न शृणुते यं स मानसो जप उच्यते ।
आत्मना शृणुते यस्तु तमुपांशुं विजानते ॥
परे शृण्वन्ति यं देवि सशब्दः स उदाहृतः ।'

(स्व०तं० २।१४७)

इति । वेति विकल्पे । सशब्दस्यार्थसिद्धो निषेधः ॥

ननु समनन्तरमेवोक्तं यच्छक्तिवर्त्मन्ययोजिता मन्त्रा न सिद्ध्यन्तीति तत्कथमिदमुच्यते—'शक्त्युदयं तेषां न परिकल्पयेत्' ?—इत्याशङ्क्याह—

पदमन्त्रेषु सर्वेषु यावत्तत्पदशक्तिगम् ।
शक्यते सततं युक्तैस्तावज्जप्यं तु साधकैः ॥ ४६ ॥
तावती तेषु वै संख्या पदेषु पदसंज्ञिता ।
तावन्तमुदयं कृत्वा त्रिपदोक्त्यादितः क्रमात् ॥ ४७ ॥
द्वादशाख्ये द्वादशिते चक्रे सार्धं शतं भवेत् ।
उदयस्तद्धि सचतुश्चत्वारिंशच्छतं भवेत् ॥ ४८ ॥

गया है। उनके विषय में शक्ति के उदय की कल्पना नहीं करनी चाहिए ॥ ४५ ॥

सभी में—विद्याओं में भी मानस, वही कहा गया है—

"जिसको (जापक) स्वयं न सुनता हो वह मानस जप कहा जाता है । जिसे अपने द्वारा सुना जाता है उसे उपांशु मानते हैं । हे देवि ! जिसको दूसरे लोग भी सुनते हैं वह सशब्द कहा गया है" ॥ (स्व. तं. २।१४७)

वा (शब्द) विकल्प (अर्थ) में है । शब्दोच्चारणसहित जप का निषेध अर्थात् सिद्ध है ॥ ४५ ॥

प्रश्न—अभी-अभी कहा गया कि शक्तिमार्ग में संयुक्त न किए गए मन्त्र सिद्ध नहीं होते तो यह कैसे कहा जा रहा है कि—'उनके शक्त्युदय की कल्पना नहीं करनी चाहिए ।'—यह शङ्का कर कहते है—

सभी पदप्रधान मन्त्रों में जितना उसे पदशक्तिगामी किया जा सकता है युक्त साधकों के द्वारा उतना जप सदा किया जाना चाहिए । (जिससे) त्रिपदोक्ति आदि के क्रम से उन पदों में उतना (प्राण का) उदय कर उतनी पद संज्ञा हो जाय बारह पद किए गए (अतः बारह पद वाले) द्वादश मन्त्र को १२ से गुण करने पर द्वादश नामक चक्र में जो (प्राण का) उदय

षोडशाख्ये द्वादशिते द्वानवत्यधिके शते ।
चारार्धेन समं प्रोक्तं शतं द्वादशकाधिकम् ॥ ४९ ॥
षोडशाख्ये षोडशिते भवेच्चतुरशीतिगः।
उदयो द्विशतं तद्धि षट्पञ्चाशत्समुत्तरम् ॥ ५० ॥
चाराष्टभागांस्त्रीनत्र कथयन्त्यधिकान्बुधाः ।
अष्टाष्टके द्वादशिते पादार्धं विंशतिं वसून् ॥ ५१ ॥
उदयः सप्तशतिका साष्टा षष्टिर्यतो हि सः।

पदप्रधानेषु सर्वेषु विद्यादिरूपेषु मन्त्रेषु पदानां प्राणाशक्तेश्च साम्यं गतं तज्जपादि अभियुक्तैः साधकैर्यावत्कर्तुं शक्यते तावदेव सर्वकालं जपनीयं, येन तेषु पदेषु त्रिपदोक्त्यादिकं क्रममवलम्ब्य 'त्रिषु बहुत्वं परिसमाप्यते' इत्यादिर्नीत्या क्रमेणैकैकं पदं बहुपदतया विभज्य समस्तस्य परस्य प्राणचारसाम्येन सकृदुच्चारयितुमशक्यत्वात् तावन्तं पदांशपरीमाणं प्राणशक्तावुदयं कृत्वा तावती

होता है वह १४४ होता है । उसमे ६ चक्रों को जोड़ने पर चक्रों की संख्या १५० होती है । १५० को १४४ से गुणा करने पर २१६०० गुणन फल होता है २४ घण्टे मे एक स्वस्थ आदमी का इतना ही प्राणचार होता है । षोडश नामक चक्र को १२ से गुणा करने पर (उस चक्र में) १९२ (प्राणचारों का) उदय होता है । चार के आधे के साथ ११२ कहा गया है। षोडश नामक अर्थात् सोलह पदों वाले (चक्र) को फिर सोलह से गुणा करने पर ८४ (प्राणचार का) उदय होता है और उसमें २५६ (चक्र) होते हैं ॥

विद्वान् लोग यहाँ तीन आठ भाग ३।८ चार अधिक कहते हैं । अष्टाष्टक (= ६४) को बारह से गुणा करने पर एक-एक द्वादशक में, एक पादार्ध में २८ (प्राणचारों का) उदय होता है । क्योंकि वह संख्या ७६८ है (२१६०० प्राणचार मे ७६८ से भाग देने पर २८ लब्धि और ९८ शेष बचता है यह शेष ७६८ का आठवां भाग है । इसी प्रकार १६ पदों के चक्र को १६ से गुणा करने पर २५६ होता है और इससे २१६०० मे भाग देने पर भी ९६ शेष बचता है ॥ ४६-५२- ॥

पदप्रधान (= पदों के समूहरूप) सभी विद्यादिमन्त्रों में पदों और प्राणशक्ति के साम्य को प्राप्त वह जप आदि, अभियुक्त साधकों के द्वारा, जितना करना सम्भव है उतना ही सब समय जप करना चाहिए, जिससे उन पदों में त्रिपदोक्ति आदि के क्रम का अवलम्बन कर = 'तीन में बहुत्व समाप्त हो जाता है' इत्यादि नीति के द्वारा क्रमशः एक-एक पद को अनेक पदों के रूप में विभक्त कर, समस्त पद का प्राणचारसाम्य के साथ एक बार उच्चारण कर सकना सम्भव न होने के कारण,

पदांशपरिमाणैव पदसंज्ञिता जपस्य संख्या स्यादिति । अयमत्र भावः—न केवलमनेकपदस्य मन्त्रस्य प्राणशक्तौ सकृदुच्चारयितुमशक्यत्वं यावद् बह्वर्णतया तत्पदस्यापीति तस्याप्यंशांशिकया विभागः कार्यो येन शनैः शनैरेकमेकं तदंशे प्राणसाम्येनोच्चारयतां योगिनां लक्षजपादि सिद्ध्येदिति । तदुक्तं तत्र—

'पदमन्त्राक्षरे चक्रे विभागं शक्तितत्त्वगम् ।
पदेषु कृत्वा मन्त्रज्ञो जपं नित्यं तु कारयेत् ॥
द्वित्रिसप्ताष्टसंख्यातं लोपयेच्छतिकोदयम् ।
इति शक्तिस्थिता मन्त्रा विद्या वा चक्रनायकाः॥
पदपिण्डस्वरूपेण ज्ञात्वा योज्याः सदा प्रिये ।
नित्योदये महातत्त्वे उदयस्थे सदाशिवे ॥
अयुक्तः शक्तिमार्गे तु अजप्ताश्चोदयेन तु ।
नैव सिद्ध्यन्ति यत्नेन.......................... ॥'

इति । तथा—

'मालामन्त्रेषु सर्वेषु मानसो जप उच्यते ।
शक्त्योदयं तु वै तेषु न कदाचित्प्रकल्पयेत् ॥
यतस्तेषां वरारोहे मानसस्तु जपः स्मृतः ।
क्वचिच्चैव उपांशुः स्याज्जपः शास्त्रेषु कीर्तितः ॥

उतने पदांशपरिमाण का प्राणशक्ति में उदय कर उतने पदांश परिमाण वाली ही पद नाम वाली जप की संख्या होती है । यहाँ यह तात्पर्य है—न केवल अनेक पद वाले मन्त्र का प्राणशक्ति में एक बार उच्चारण असम्भव है बल्कि अनेक वर्ण वाला होने के कारण उस पद का भी । इसलिए उस (= पद) का भी कई अंश में विभाग करना चाहिए जिससे धीरे-धीरे उसके एक-एक अंश को प्राणसाम्य के साथ उच्चारण करने वाले योगियों को लाख जप आदि की सिद्धि हो जाय । वही वहाँ कहा गया है—

"पद (प्रधान) मन्त्रों के अक्षर वाले चक्र मे पदों में शक्तितत्त्व के अनुसार विभाग करके मन्त्रवेत्ता नित्य जप करे ॥ दो तीन सात आठ से लेकर एक सौ तक शतिकोदय का लोप करना चाहिए । इस प्रकार चक्रप्रधान मन्त्र या विद्याएं जब प्राणसाम्य के साथ उदित होती है तो हे प्रिये ! (उनको) पदपिण्ड के रूप में जान कर जोड़ देना चाहिए ॥ नित्योदित महातत्त्व उदयस्थ एवं सदा कल्याणकारी शक्तिमार्ग में न जोड़े गए और उदय के साथ न जपे गए (वे मन्त्र) सिद्ध नहीं होते ।" तथा

"सभी मालामन्त्रों में मानस जप (का अनुष्ठान) कहा जाता है । उनके विषय में कभी भी शक्ति के उदय की कल्पना नहीं करनी चाहिए । क्योंकि हे वरारोहे ! उनका जप मानस कहा गया है । कहीं-कहीं शास्त्रों में उपांशु जप कहा गया है ।

महामन्त्रेषु सर्वेषु यावत्तत्पदशक्तिगम् ।
शक्यते सततं युक्तैः प्रजप्तुं साधकोत्तमैः ॥
तावती तेषु वै संख्या पदेषु पदसंज्ञिता ।
तावन्तमुदयं कृत्वा त्रिपदोक्त्यादितः क्रमात् ॥' इति ।

अतश्च सामस्त्येन मालामन्त्रादीनां प्राणशक्तावुदयं कर्तुं न शक्यते—इत्युक्तमेषां शक्त्युदयं न परिकल्पयेदिति । न तु सर्वसर्विकया, तथात्वे हि जपस्याल्पफलप्रदत्वादधमत्वं स्यात् । यदुक्तम्—

'अधमस्तु जपः प्रोक्तः प्राणसंख्याविवर्जितः ।' इति ।

पदविभागमेव दर्शयति द्वादशेत्यादिना । 'द्वादशाख्ये' द्वादशपदात्मके मालामन्त्राद्यात्मनि चक्रे 'द्वादशिते' सञ्जातद्वादशसंख्याके प्रत्येकं पदद्वादशकस्य द्वादशधा विभागे कृते सति द्वादशानां चतुश्चत्वारिंशदधिकं शतं भवेत् येन तस्यापि प्रत्येकं सार्धं शतं प्राणचाराणामुदयः,—इति सषट्शता सहस्रैकविंशतिः प्राणचारणां स्यात् । तथा षोडशपदात्मके चक्रे द्वादशधा कृते तदंशानां द्वानवत्यधिकं शतं षण्णवतेरवशिष्टत्वादयं चोदयः । तथा षोडशाख्ये एव चक्रे षोडशधा कृते षोडशांशानां षट्पञ्चाशदधिकं शतद्वयं भवेदिति भावः । तस्य प्रत्येकं प्राणचाराणां चतुरशीतिः षण्णवतेरेवावशिष्टत्वात् चाराष्टभागैरयमुदयो भवेत् । तथाष्टाष्टके चतुष्षष्टिपदात्मके चक्रे द्वादशधा कृते प्रतिपदं द्वादशकं

सभी महामन्त्रों में जितना वह पद शक्तिगामी होता है उतना युक्त उत्तम साधकों के द्वारा जप किया जा सकता है । त्रिपदोक्ति आदि के क्रम से उतना उदय कर उन पदों में उतनी पद वाली संख्या होती है ॥'

इसलिए प्राणशक्ति में सम्पूर्ण मालामन्त्र आदि का (सम्पूर्ण रूप) से उदय करना सम्भव नहीं है । इसलिए कहा गया—इनके शक्त्युदय की कल्पना नहीं करनी चाहिए । न कि सभी मन्त्रों में, क्योंकि वैसा होने पर अल्पफलदायी होने के कारण जप अधम हो जायगा । जैसा कि कहा गया है—

'प्राणसंख्या से रहित जप अधम कहा गया है ।'

द्वादश इत्यादि के द्वारा पद विभाग को ही दिखाते हैं—द्वादशाख्य = द्वादशपद वाले मालामन्त्र आदि चक्र को द्वादशित करने पर = बारह संख्या वाला होने पर १२ पदों में से प्रत्येक को १२ भाग करने पर (१२×१२) बारहों का १४४ (रूप) हो जाता है । जिससे उसमें से एक-एक का १५० प्राणचारों का उदय होता है । इस प्रकार (१४४×१५०) = २१६०० प्राणचार हो जाते हैं । इसी प्रकार सोलह पद वाले चक्र को १२ से गुणा करने पर ९६ अवशिष्ट होने से १९२ द्वादशांश का उदय होता है । उसी प्रकार षोडश चक्र को १६ से गुणा करने पर २५६ षोडशांश होता है । उसमें ९६ के ही अवशिष्ट होने से चार

प्राणचाराणां विंशतिवसूनष्टाविंशतिं तथा षण्णवतेरर्धावशिष्टत्वात् पादार्धमष्टभागमुदयो यतश्चतुःषष्ट्यात्मनश्चक्रस्य द्वादशभिर्गुणनात् अष्टषष्ट्यधिकशतसप्तकलक्षणा सा संख्या भवेदित्येवमत्र सर्वत्र प्राणचाराणां सषट्शता सहस्रैकविंशतिरेव भवेत् ॥

एतदेवोपसंहरति—

एष चक्रोदयः प्रोक्तः साधकानां हितावहः ॥ ५२ ॥

ननु प्राणचारोदयानुसारं चक्राणामुदय इति स एव कीदृक् येन सोऽपि स्यात् ?—इत्याशङ्क्याह—

निरुध्य मानसीर्वृत्तीश्चक्रे विश्रान्तिमागतः ।
व्युत्थाय यावद्विश्राम्येत्तावच्चारोदयो ह्ययम् ॥ ५३ ॥

इह खलु योगी सङ्कल्पात्मिका मानसीर्वृत्तीः 'निरुध्य' अन्तर्मुखीकृत्य 'चक्रस्य' एकपिण्डाद्यात्मनो मन्त्रस्य 'विश्रान्तिं' मध्यधामैकात्म्यमागतः सन् यावदुत्थाय हृद आरम्भ्य द्वादशान्तपर्यन्तं निर्गम्य पुनरन्तः प्रविश्य हृद्येव विश्राम्येत् तावदयं प्राणस्योदयो भवेदित्यर्थः ॥ ५३ ॥

अष्टभागों के अनुसार ८४ प्राणचारों का उदय होता है । उसी प्रकार अष्टाष्टक = ६४ पद वाले चक्र, को १२ से गुणा करने पर एक-एक १२ पद में बीस + वसु = २८ तथा ९६ के आधे के बच जाने से अष्ट भाग पादार्ध उदय होता है जिससे ६४ चक्रों की १२ से गुणा करने पर ७६८ संख्या होती है । इस प्रकार यहाँ सर्वत्र २१६०० ही प्राणचार होते हैं ॥ ४६-५१ ॥

इसी का उपसंहार करते हैं—

यह साधकों के लिए हितकारी चक्रोदय कहा गया ॥ -५२ ॥

प्रश्न—प्राणचारों के उदय के अनुसार शक्ति चक्रों का उदय होता है । वही (= प्राणचारोदय) कैसा है जिससे वह (चक्रोदय) भी होता है ?—यह शङ्का कर कहते हैं—

(साधक) मानसी वृत्तियों को रोक कर चक्र में विश्रान्ति को प्राप्त कर पुनः व्युत्थान कर जब फिर विश्राम करता है तब तक यह एक प्राणचार का उदय होता है ॥ ५३ ॥

योगी सङ्कल्पात्मक मानसिक वृत्तियों को, रोककर = अन्तर्मुख कर, चक्र की = एक पिण्डस्वरूप मन्त्र की, विश्रान्ति = सुषुम्ना के साथ एकात्मता, को प्राप्त कर जब तक व्युत्थान को प्राप्त होकर = हृदय से लेकर द्वादशान्त तक बाहर निकलकर, पुनः अन्दर की ओर प्रवेश कर हृदय में ही विश्राम करता है तब तक यह प्राण का (एक) उदय होता है ॥ ५३ ॥

अत्रैव त्रैरूप्यं निरूपयन् सिद्ध्यादिविभागमप्याह—

पूर्णे समुदये त्वत्र प्रवेशैकात्मनिर्गमाः ।
त्रय इत्यत एवोक्तः सिद्धौ मध्योदयो वरः ॥ ५४ ॥

अत्र पुनः सम्यक् मध्यधामैकात्म्येन प्रवेशपर्यन्तं प्राणस्योदये निर्गमे 'पूर्णे' यथोक्तगत्या परिपूर्तिं प्राप्ते प्रवेशैकात्म्यनिर्गमलक्षणास्त्रयः प्रकाराः सन्तीत्यतः प्रकारत्रयमध्यात्सिद्धिनिमित्तमैकात्म्यलक्षणो मध्योदय एव प्रवेशादपि 'वरः' श्रेष्ठ उक्त इत्यर्थः ॥ ५४ ॥

नन्वेवंवचने किं प्रमाणम् ?—इत्याशङ्क्याह—

आद्यन्तोदयनिर्मुक्ता मध्यमोदयसंयुताः ।
मन्त्रविद्याचक्रगणाः सिद्धिभाजो भवन्ति हि ॥ ५५ ॥
मन्त्रचक्रोदयज्ञस्तु विद्याचक्रोदयार्थवित् ।
क्षिप्रं सिद्ध्येदिति प्रोक्तं श्रीमद्विंशतिके त्रिके ॥ ५६ ॥

'आद्यन्तोदयौ' निर्गमप्रवेशौ, 'मध्यमोदयो' मध्यधामैकात्म्यम् । हिर्हेतौ । तेनैवं मन्त्रविद्याचक्रोदयं जानानो योगी निर्विलम्बमेव सिद्धिभाग्भवेदित्यर्थः ॥ ५६ ॥

यहीं पर तीन रूपों का निरूपण करते हुए सिद्धि आदि विभागों को भी कहते हैं—

यहाँ समुदय के पूर्ण होने पर प्रवेश ऐकात्म्य और निर्गम तीन (प्रकार) है । इनमें से सिद्धि के विषय में मध्यउदय ही श्रेष्ठ कहा गया है ॥ ५४ ॥

यहाँ सम्यक् = मध्यधाम की एकात्मता के द्वारा प्रवेशपर्यन्त प्राण का उदय = निर्गम, पूर्ण होने पर = उक्त रीति से पूर्णता को प्राप्त होने पर प्रवेश, ऐकात्म्य, निर्गम लक्षण वाले तीन प्रकार होते हैं । इनमें से = तीनों प्रकारो में से, सिद्धि का कारणभूत ऐकात्म्यलक्षण मध्योदय ही प्रवेश की अपेक्षा वर = श्रेष्ठ, कहा गया है ॥ ५४ ॥

इस प्रकार के कथन में क्या प्रमाण है ?—यह शङ्का कर कहते हैं—

आदि और अन्त के उदय से रहित (अत एव) मध्यम उदय से संयुक्त मन्त्रविद्याचक्रों के ज्ञाता योगी सिद्धि के भागी होते हैं ॥ मन्त्रचक्र के उदय को जानने वाला तथा विद्याचक्र के अर्थ का वेत्ता जल्दी ही सिद्धि को प्राप्त होता है यह विंशतिकत्रिक शास्त्र में कहा गया है ॥ ५५-५६ ॥

आद्यन्त उदय = निर्गम और प्रवेश । मध्यम उदय = मध्यधाम के साथ तादात्म्य । 'हि' हेतु अर्थ मे है । तो इस प्रकार मन्त्रचक्र और विद्याचक्र के उदय को जानने वाला योगी बिना विलम्ब के सिद्धि का भागी होता है ॥ ५६ ॥

ननु जितप्राणस्यारूढस्य योगिनः किं नामासाध्यं यत्र प्राणगं कुर्यात्, प्राणं जयतः पुनरारुरुक्षोः कथमेतत्सिध्येत् ?—इत्याशङ्क्याह—

द्विस्त्रिश्चतुर्वा मात्राभिर्विद्यां वा चक्रमेव वा।
तत्त्वोदययुतं नित्यं पृथग्भूतं जपेत्सदा ॥ ५७ ॥
पिण्डाक्षरपदैर्मन्त्रमेकैकं शक्तितत्त्वगम् ।
बह्वक्षरस्तु यो मन्त्रो विद्या वा चक्रमेव वा॥ ५८ ॥
शक्तिस्थं नैव तं तत्र विभागस्त्वोंनमोन्तगः ।

आरुरुक्षुः पुनर्योगी नित्यं द्विःत्रिश्चतुर्वाभ्यासतारतम्यानुसारमेकद्व्यादिक्रमेण

'त्रिर्जानुवेष्टनान्मात्रा त्रिगुणच्छोटिकात्रयात् ।' (मा० वि० १७।१२)

इति लक्षिताभिर्मात्राभिरनेकाक्षरां विद्यामनेकपिण्डं वा चक्रमनेकपदं वा मन्त्रमेकैकं पिण्डाक्षरपदैः पृथग्भूतमेकमेव पिण्डमक्षरं पदं वा पूर्वोक्तयुक्त्या प्राणशक्तितत्त्वगतं कृत्वा तत्त्वोदययुतं मध्यधामैकात्म्येन सदा जपेत्, लक्षजपादि कुर्यादित्यर्थः । अत एव पदादिविभागशून्यो बह्वक्षर एव यः पुनर्मन्त्रादि-स्तमारुरुक्षुर्योगी तावतः प्राणनिरोधस्याशक्यत्वात् शक्तिस्थं नैव कुर्यात्

प्रश्न—प्राणजयी आरूढ योगी के लिए क्या असाध्य है जिसको (वह) प्राणाधीन नहीं कर सकता ? और प्राण को जीतने वाले आरुरुक्षु को यह कैसे सिद्ध होता है?—यह शङ्का कर कहते है—

(योगी) नित्य दो तीन अथवा चार मात्राओं से विद्या अथवा चक्र को अलग-अलग पिण्डाक्षरपदों से पृथक्भूत को शक्तितत्त्वगामी बनाकर तत्त्वोदय से युक्त कर सर्वदा जप करे ।

जो अनेक अक्षरों वाला मन्त्र या विद्या या चक्र है उसे शक्तिगामी न बनाए । उसमें विभाग ॐ नमः अन्त वाला होता है ॥ ५७-५९- ॥

(साधनापथ पर) आरूढ होने की इच्छा वाला योगी प्रति दिन दो तीन या चार बार के अभ्यास के क्रम के अनुसार एक दो आदि के क्रम से

"तीन बार जानु के वेष्टन या तीन छोटिका (= चुटकी) के तिगुने से एक मात्रा होती है ।" (मा. वि. १७।१२)

इस प्रकार लक्षण बनाई गई मात्राओं से अनेक अक्षर वाली विद्या अथवा अनेक पिण्ड वाले चक्र अथवा अनेक पद वाले मन्त्र में से एक-एक को पिण्ड अक्षर और पद के द्वारा अलग हुए एक पिण्ड अक्षर या पद को पूर्वोक्त युक्ति के द्वारा प्राणशक्तितत्त्वगामी बनाकर, तत्त्वोदय से युक्त कर = मध्यधाम की एकात्मता के साथ सदा जप करना चाहिए = एक लाख जप आदि करना चाहिए । इसलिए पद आदि के विभाग से शून्य अनेक अक्षर वाला जो मन्त्र आदि उस पर आरोह की इच्छा वाला योगी, उतना प्राणनिरोध असम्भव होने से, शक्तिस्थ न करे =

शक्त्युदयमेषां न परिकल्पयेदित्यर्थः । ननु यद्येषां बह्वक्षरतया सामस्त्येन प्राणशक्तावुदयं कर्तुं न शक्यते तत्समनन्तरोक्तक्रमेण व्यस्ततयैतदस्तु—इत्याशङ्क्योक्तं—तत्रेत्यादि । ओंनमोन्तग इति, नतु मन्त्रान्तरवत् पदपिण्डादिक्रमेणैषां विभागोऽस्ति येनांशांशिकयापि शक्तावुदयः सिद्ध्येत्; अतश्चारुरुक्षुभिरेवंविधानां मन्त्राणां जप एव न कार्यः—इत्युक्तं स्यात् ॥ ५९ ॥

आरूढस्य पुनर्योगिनो न केवलं पूर्ण एव समुदये प्रवेशादित्रैविध्यं यावत्तदंशेष्वपीत्याह—

अस्मिंस्तत्त्वोदये तस्मादहोरात्रस्त्रिशस्त्रिशः ॥ ५९ ॥
विभज्यते विभागश्च पुनरेव त्रिशस्त्रिशः ।

तस्मात्पूर्वोक्ताद्धेतोः, अस्मिन् प्रक्रान्ते 'तत्त्वोदये' कार्यकारणयोरभेदोपचारात् चक्रोदये प्राणापानत्माहोरात्रस्त्रिशस्त्रिशो विभज्यते, केवल एव प्राणोऽपानो वा प्रवेशैकात्म्यनिर्गमात्मना प्रकारत्रयेण विभागमापद्यते इत्यर्थः । तेन षट्त्रिंशदात्मनोरुभयोरपि प्राणापानवाहयोः प्रत्येकं प्रवेशादित्रैविध्यमिति प्रवेशादेः प्रत्यङ्गुलद्वादशकमुदयः । एवमात्मा विभागोऽपि पुनस्त्रिशस्त्रिश एव, प्रवेशाद्यपि प्रवेश-

---

इनके शक्ति उदय की कल्पना न करे । प्रश्न—यदि अनेक अक्षर वाला होने के कारण इनका सम्पूर्णतया प्राणशक्ति में उदय नहीं किया जा सकता तो पीछे कहे गए क्रम से अलग-अलग कर इसे किया जाय ?—यह शङ्का कर कहा गया है—'तत्र' इत्यादि । ॐ नमः अन्त में होता है—न कि दूसरे मन्त्रों के समान पद पिण्ड आदि के क्रम से इनका विभाग है जिससे अंश-अंश करके भी शक्ति में उदय सिद्ध हो सके । इसलिए आरोह की इच्छा वाले योगी इस प्रकार के मन्त्रों का जप न करें—यह कहना चाहिए ॥ ५७-५८ ॥

आरूढ़ योगी की केवल पूर्णसमुदय मे ही प्रवेश आदि तीन प्रकार की क्रियायें नहीं है बल्कि उसके (= समुदय के) अंशों में भी है—यह कहते हैं—

इस कारण इस तत्त्वोदय में अहोरात्र का तीन-तीन करके विभाग होता है और फिर (एक-एक) विभाग तीन-तीन बार (विभक्त होता है) ॥ -५९-६०- ॥

इस कारण = पूर्वोक्त कारण से, इस = प्रकरणप्राप्त, तत्त्वोदय में = कार्यकारण का अभेद मान लेने से चक्रोदय मे, प्राण अपान रूप अहोरात्र का तीन-तीन विभाग होता है । अर्थात् केवल प्राण या अपान प्रवेश ऐकात्म्य और निर्गम रूप तीन प्रकार से विभक्त होता है । इससे छत्तीस संख्या वाले दोनों प्राणवाह और अपानवाह के प्रवेश आदि तीन प्रकार होने से प्रवेश आदि में प्रत्येक का बारह-बारह अंगुल उदय होता है । ऐसा विभाग भी फिर तीन-तीन ही होता है अर्थात् प्रवेश आदि भी प्रवेश ऐकात्म्य और निर्गम रूप से तीन-तीन प्रकार का

निर्गमैकात्म्यलक्षणप्रकारत्रयभाग्भवेदित्यर्थः, । तेन प्रत्यङ्गुलचतुष्टयमपि प्रवेशादीनामुदयः,—इति सिद्धम्; तदारूढस्य योगिनः परिमिते प्राणचारीयेऽप्यंशेऽप्येवं चक्रोदयः सिद्ध्येदित्यभिप्रायः ॥

एवमेतत्प्रसङ्गादभिधाय प्रकृतमेवानुसरति—

पूर्वोदये तु विश्रम्य द्वितीयेनोल्लसेद्यदा ॥ ६० ॥
विशेच्चार्धार्धिकायोगात्तदोक्तार्धोदयो भवेत् ।
यदा पूर्णोदयात्मा तु समः कालस्त्रिके स्फुरेत् ॥ ६१ ॥
प्रवेशविश्रान्त्युल्लासे स्यात्स्वत्र्यंशोदयस्तदा ।

तस्मात् 'पूर्वस्मिन्' प्रधाने मध्यधामात्मनि 'उदये विश्रम्य' तदैकात्म्येन स्थित्वा 'यदा द्वितीयेन' निर्गमात्मना प्रकारेण 'उल्लसेत्' प्राणक्रमेणोर्ध्वं गच्छेत्, अर्थात्तृतीयेनापि प्रवेशात्मना प्रकारेण 'विशेत्' अपानक्रमेण हृदन्तं प्रवेशं कुर्यात् तदा प्राणापानयोः प्रत्येकमर्धार्धिकया संबन्धात् सषट्शतसहस्रैकविंशत्यात्मन उक्तस्य कालस्यार्धेन प्राणचाराणां साष्टशतं सहस्रदशकमुदयो भवेत् । यदा पुनः 'पूर्णः' सषट्छतसहस्रैकविंशतिरूपो योऽसावुदयस्तदात्मा कालः प्रवेशविश्रान्त्युल्लासाख्ये त्रिके साम्येन स्फुरेत् तदा प्रवेशादीनां प्रत्येकं 'स्वः' आत्मीयो यः

होता है । इस प्रकार प्रवेश आदि का चार-चार अंगुल भी उदय होता है—यह सिद्ध हो गया । तात्पर्य यह है कि उसमें आरूढ़ योगी का परिमित प्राणचारीय अंश में भी इस प्रकार का चक्रोदय सिद्ध होता है ॥ ५९ ॥

इस प्रकार प्रसङ्गात् इसका कथन कर प्रस्तुत का अनुसरण करते हैं—

योगी जब मध्यउदय में विश्राम करके दूसरे (= निर्गम) से उल्लासित होता है और (प्राण अपान के) आधे-आधे के योग से प्रवेश करता है तब उक्त (२१६००) के आधे (= १०८०० प्राणचारों) का उदय होता है । और जब पूर्ण उदय वाला यह काल प्रवेश विश्रान्ति उल्लास नामक तीन में समान रूप से स्फुरित होता है तब अपने त्र्यंश का उदय होता है ॥ -६०-६२- ॥

इस कारण पूर्व = प्रधान = सुषुम्ना वाले, उदय में विश्राम कर = उसके साथ एकात्मरूप में स्थित होकर, जब द्वितीय = निर्गम प्रकार से (योगी) उल्लासित होता है = प्राणक्रम से ऊपर जाता है अर्थात् तीसरे भी प्रवेश नामक प्रकार से प्रवेश करता है = अपान के क्रम से हृदय तक प्रवेश करता है, तब प्राण और अपान मे से प्रत्येक के आधा-आधा से सम्बन्ध होने से २१६०० वाले उक्त काल के आधे से १०८०० प्राणचारों का उदय होता है । और जब पूर्ण = २१६०० उदय वाला कालप्रवेश विश्रान्ति और उल्लास तीनो में समान रूप से स्फुरित होता है तब प्रवेश आदि में से प्रत्येक स्व = आत्मीय जो ७२०० =

सशतद्वयसहस्रसप्तकात्मा 'त्र्यंशः' तस्योदयो भवेदित्यर्थः ॥

ननु प्राक्—

'अन्तः संविदि सर्वोऽयमध्वा विश्रम्य तिष्ठति ।' (तं० ६।२८)

इति प्रतिज्ञातं तत्कथमिह कालाध्वनः प्राण एवैवं प्रतिष्ठितत्वमुच्यते ?—इत्याशङ्क्याह—

इत्येष कालविभवः प्राण एव प्रतिष्ठितः ॥ ६२ ॥
स स्पन्दे खे स तच्चित्यां तेनास्यां विश्वनिष्ठितिः ।

'प्राण' इति प्राधान्यात् तेनापानादावपि । स इति प्राणः । 'स्पन्दे' इति सामान्यात्मिकायामाद्यप्रसररूपायां प्राणनावृत्तौ । 'खे' इति शून्यप्रमातरि । स इति मेयौत्सुक्येन बहिःसमुच्छलन्प्राणस्पन्दादिशब्दव्यपदेश्यो भवेदिति भावः । तदिति खं, चित एव स्वातन्त्र्याच्छून्यरूपत्वेन परिस्फुरणात् । तेनेत्युक्तेन पारम्पर्येण हेतुना, विश्वेति षड्विधस्याध्वनः । यद्वक्ष्यति—

'अध्वा समस्त एवायं चिन्मात्रे संप्रतिष्ठितः ।
यत्तत्र न हि विश्रान्तं तन्नभःकुसुमायते ॥

त्र्यंश है, उसका उदय होता है ॥ ६०-६१ ॥

प्रश्न—पहले

"यह समस्त अध्वा संवित् के भीतर विश्राम करके स्थित रहता है ।"

यह प्रतिज्ञा की गई तो कैसे यहाँ कालाध्वा की प्राण में ही इस प्रकार प्रतिष्ठा कही जा रही है ?—यह शङ्का कर कहते हैं—

यह काल का विस्तार प्राण में ही प्रतिष्ठित है । वह (= प्राण) स्पन्द में, वह (= स्पन्द) शून्य में और वह (= शून्य) चित् तत्त्व में, इस प्रकार इस (= चित्) में समस्त (अध्वाओं की) प्रतिष्ठा है ॥ -६२-६३- ॥

प्राण में—ऐसा प्रधान होने के कारण (कहा गया) इससे (यह समझना चाहिए कि) अपान आदि में भी (उसकी प्रतिष्ठा)। वह = प्राण । स्पन्द में = सामान्य आद्यप्रसररूपा प्राणनावृत्ति में । ख में = शून्यप्रमाता में । वह—मेय के औत्सुक्य के कारण बाहर उच्छलित होता हुआ प्राण स्पन्द आदि शब्द से व्यवहृत होता है । वह = आकाश; शून्यरूपा चिति शक्ति ही (अपने) स्वातन्त्र्य के कारण शून्यरूप से परिस्फुरित होती है उस कारण । इसलिए = उक्त परम्परारूप हेतु से । विश्व = छ प्रकार के अध्वा का । जैसा कि कहेंगे—

"यह समस्त अध्वा चिन्मात्र में प्रतिष्ठित है । जो उसमें विश्राम नहीं कर रहा है वह आकाशकुसुम के समान (तुच्छ) है इसलिये संविद् के द्वारा सृष्ट शून्य,

संविद्द्वारेण तत्सृष्टे शून्ये धियि मरुत्सु च।
नाडीचक्रानुचक्रेषु बहिर्देहेऽध्वसंस्थितिः ।'(तं० ८।४) इति ॥

एवं संविदधीनावेव विश्वस्य सृष्टिसंहारावित्याह—

अतः संवित्प्रतिष्ठानौ यतो विश्वलयोदयौ ॥ ६३ ॥
शक्त्यन्तेऽध्वनि तत्स्पन्दासंख्याता वास्तवी ततः ।

अतः कालस्य पारम्पर्येण संविद्येव निष्ठितत्वात् संवित्कर्तृकावेव यतो विश्वस्य सृष्टिसंहारौ, ततः शक्त्यन्तेऽध्वनि तेषां प्रागुक्तानां सृष्टिसंहाराद्यात्मनां स्पन्दानां

'तत्सृष्टौ सृष्टिसंहारा निःसंख्या जगतां यतः।
अन्तर्भूता ततः शाक्ती महासृष्टिरुदाहृता॥'

इत्याद्युक्तयुक्त्यावान्तराणां स्पन्दानामन्तर्भावात् असंख्यातापि वास्तवी सन्मात्रैकरूपत्वात् पारमार्थिकीत्यर्थः । या हि नाम बहिः कश्चन परिस्पन्दः स संवित्सतत्त्व एव—इत्यभिप्रायः ॥

न चैतदस्मदुपज्ञमेव, यावदागमेऽपि एवमित्याह—

उक्तं श्रीमालिनीतन्त्रे गात्रे यत्रैव कुत्रचित् ॥ ६४ ॥

बुद्धि, नाडी चक्रानुचक्रवर्त्ती प्राण एवं बाह्य शरीर में अध्वा की स्थिति है ।'' (तं. आ. ८।४) ॥ ६२ ॥

इस प्रकार विश्व के सृष्टि और संहार संविद् के ही अधीन है—यह कहते हैं—

इसलिए चूँकि संसार के सृष्टि और प्रलय संवित् में प्रतिष्ठा वाले हैं इस कारण शक्त्यन्त अध्वा में उन स्पन्दों की संख्या की अनुक्ति भी वास्तवी है ॥ -६३-६४- ॥

अतः = काल के परम्परया संविद् में ही प्रतिष्ठित होने से, चूँकि विश्व के सृष्टि और संहार की कर्त्री संवित् है इसलिए शक्ति पर्यन्त अध्वा में उन पहले कहे गए सृष्टिसंहाराद्यात्मक स्पन्दों का—

''चूँकि विश्व की सृष्टि में संसार के असंख्य सृष्टिसंहार अन्तर्भूत है अतः शाक्ती (सृष्टि) महासृष्टि कही गयी है ।''

इत्यादि कही गई युक्ति से अवान्तर स्पन्दों का (मुख्य स्पन्द में) अन्तर्भाव होने से अनुक्त भी संख्या वास्तवी अर्थात् सन्मात्र एक रूप होने के कारण पारमार्थिकी है । अभिप्राय यह है कि जो कोई बाह्य परिस्पन्द है वह भी संवित् तत्त्व ही है ॥ ६३ ॥

यह हमारी बुद्धि की उपज नहीं है, आगम में भी ऐसा है—यह कहते हैं—

मालिनीविजयोत्तर तन्त्र में कहा गया है कि शरीर में जहाँ कहीं भी

विकार उपजायेत तत्तत्त्वं तत्त्वमुत्तमम् ।

इह खलु परसंविदावेशशालिनो योगिनो यत्रैव कुत्रचिच्चक्षुरादौ गात्रे 'सर्वो ममायं विभवः' इत्यादिसङ्कल्पपूर्वक उपजायमानो यो विकारः स्पन्दस्तस्य यत्तत्त्वं सर्वभावानां स्वाविभागेनावभासनं तदुत्तमं तत्त्वं, संविदनतिरेकात्परः परमार्थ इत्यर्थः । तदुक्तं तत्र—

'यत्रैव कुत्रचिद् गात्रे विकार उपजायते ।
सङ्कल्पपूर्वको देवि तत्तत्त्वं तत्त्वमुत्तमम् ॥' इति ।
(मा०वि० १८।४२)

ननु भवतु नामैतत् तत्राप्यस्य प्राणस्य देहनिष्ठत्वेन कस्माद्रूपमुच्यते ?—इत्याशङ्क्याह—

प्राणे प्रतिष्ठितः कालस्तदाविष्टा च यत्तनुः॥ ६५ ॥
देहे प्रतिष्ठितस्यास्य ततो रूपं निरूप्यते ।

तदाविष्टेति, तच्छब्देन प्राणपरामर्शः । तत इति, प्राणस्य तनावाविष्टत्वात् ॥

ननु कथं नाम देहस्य तदावेशः ?—इत्याशङ्क्याह—

चित्स्पन्दप्राणवृत्तीनामन्त्या या स्थूलता सुषिः ॥ ६६ ॥

विकार उत्पन्न हो वही तत्त्व उत्तम तत्त्व है ॥ -६४-६५- ॥

पर संविद् के आवेश वाले योगी के जिस किसी चक्षु आदि शरीरावयव में 'यह सब मेरा विभव है' इत्यादि सङ्कल्प के साथ उत्पन्न होने वाला जो विकार (= पीड़ा फूली आदि) स्पन्द, उसका जो तत्त्व = सब भावों का अपने से अविभक्त रूप में अवभासित होना, वही उत्तम तत्त्व है अर्थात् संविद् से अतिरिक्ति न होने से (यह) परम परमार्थ है । वही वहाँ कहा गया है—

"हे देवि ! शरीर में जहाँ कहीं भी सङ्कल्पपूर्वक विकार उत्पन्न होता है वह तत्त्व उत्तम तत्त्व है" ॥ ६४ ॥ (मा. वि. १८।४२)

प्रश्न—ऐसा है तो हो फिर भी इस प्राण का रूप देह में कैसे कहा जाता है?—यह शङ्का कर कहते हैं—

चूँकि काल प्राण में प्रतिष्ठित है और शरीर उस (= प्राण) में आविष्ट है इसलिए इसका रूप देह में प्रतिष्ठित माना जाता है ॥ -६५-६६- ॥

तदाविष्ट—यहाँ तत् शब्द से प्राण को समझना चाहिये । इस कारण = प्राण के शरीर में आविष्ट होने के कारण ॥ ६५ ॥

प्रश्न—शरीर का उस (= प्राण) से आवेश कैसे है ?—यह शङ्का कर कहते हैं—

सा नाडीरूपतामेत्य देहं संतानयेदिमम् ।

प्राङ्निरूपितस्वरूपाणां चिदादीनां कार्यजननौन्मुख्यादन्त्या, अत एव चिदादेरन्तःकरणात् सुषिशब्दव्यपदेश्या या स्थूलता बहीरूपतया श्यानीभावः सा—

'पादाङ्गुष्ठाग्रतो व्यक्ता नाभितो हृदयं गता ।
सुषुम्ना नाम सा ज्ञेया ब्रह्मरन्ध्राब्जनिर्गता ।
प्राणिनां प्राणसञ्चारे निर्मिता परमेष्ठिना ॥'

इत्याद्युक्त्या प्रथमं मध्यस्थूणान्यायेन मध्यनाडीरूपतामाश्रित्य वक्ष्यमाण-प्रमाणमिमं देहं संतानयेत् सर्वतो भेदोपभेदरूपतया नाड्यन्तरोपजननात् जालवत् संतानवन्तं कुर्यादित्यर्थः ॥

अतश्चागमोऽप्येवमित्याह—

श्रीस्वच्छन्देऽत एवोक्तं यथा पर्णं स्वतन्तुभिः ॥ ६७ ॥
व्याप्तं तद्वत्तनुर्द्वारिद्वारिभावेन नाडिभिः ।

चित्, स्पन्द और प्राण की वृत्तियों में से जो अन्तिम सुषि (नामक) स्थूलता है वह नाड़ीरूपता को प्राप्त कर इस शरीर का विस्तार करती है ॥ -६६-६७- ॥

पहले जिनका स्वरूप बतलाया जा चुका हैं ऐसे चित् आदि के कार्य उत्पन्न करने की उन्मुखता के कारण अन्तिम, अत एव चित् आदि के आन्तर होने से सुषि शब्द से व्यवहार्य जो स्थूलता = बाह्य रूप में सङ्कोच, वह

"पैर के अंगुष्ठ के अग्र भाग से व्यक्त होकर नाभि से होते हुए हृदय को जाने वाली (नाड़ी) को सुषुम्ना जानना चाहिए । जो कि (आगे चलकर) ब्रह्मरन्ध्र रूपी कमल से निकलती है । (यह) परमेष्ठी के द्वारा प्राणियों के प्राणसञ्चार के लिए बनाई गई है ।"

इत्यादि उक्ति के द्वारा (चित् की स्थूलता) पहले मध्यस्थूणा न्याय (= झोपड़ी खड़ी करने के लिए के लिए पहले बीच में स्तम्भ, थून्हीं, लगाते हैं) से मध्य नाडी के रूप में वक्ष्यमाण प्रमाण वाले इस शरीर को विस्तृत करती है अर्थात् चारो ओर से भेद-उपभेद रूप में दूसरी नाडियों को उत्पन्न कर जाल के समान सन्तानवान् बनाती है ॥ ६६ ॥

इसलिए आगम भी ऐसा है—यह कहते हैं—

इसीलिए स्वच्छन्दतन्त्र में कहा गया है कि जैसे पत्ता अपने तन्तुओं से व्याप्त होता है उसी प्रकार शरीर मुख्य गौण सम्बन्ध से नाडियों के द्वारा व्याप्त है ॥ -६७-६८- ॥

यथा पलाशपत्रं मध्यतन्त्ववलम्बिभिरात्मीयैस्तन्त्वन्तरैः सर्वत्र व्याप्तं तथा शरीरमपि भेदोपभेदरूपत्वेन द्वारद्वारिकया मध्यनाडिसंलग्नाभिर्गुणप्रधानभावेनावस्थिताभिर्नाडीभिरिति वाक्यार्थः । यदुक्तं तत्र—

'नाभ्यधो मेढ्रकन्दे च स्थिता वै नाभिमध्यतः ।
तस्माद्विनिर्गता नाड्यस्तिर्यगूर्ध्वमधः प्रिये ॥
चक्रवत्संस्थितास्तत्र प्रधाना दश नाडयः ।
द्वासप्ततिसहस्राणि नाड्यस्ताभ्यो विनिर्गताः ॥
पुनर्विनिर्गताश्चान्याः आभ्योऽप्यन्याः पुनः पुनः ।
यावत्यो रोमकोट्यस्तु तावत्यो नाडयः स्मृताः ।
यथा पर्णं पलाशस्य व्याप्तं सर्वत्र तन्तुभिः ।'
(स्व०तं० ७।११) इति ।

ननु 'मारुतापूरिताः सर्वाः' इत्याद्युक्त्या सर्वा एव तावन्नाडयः प्राणवहाः, ताभिश्च निखिलमेव शरीरं व्याप्तमिति नास्त्यत्र विमतिः, तत्कथं हृदयाद् द्वादशान्तं मत्तगन्धस्थानं वा यावत्षट्त्रिंशदङ्गुल एव प्राणचार उक्तः ?—इत्याशङ्क्याह—

पादाङ्गुष्ठादिकोर्ध्वस्थब्रह्मकुण्डलिकान्तगः ॥ ६८ ॥
कालः समस्तश्चतुरशीतावेवाङ्गुलेष्वितः ।

जैसे पलाश का पत्ता मध्यतन्तु के अधीन रहने वाले अपने तन्त्वन्तरों से सर्वत्र व्याप्त होता है उसी प्रकार शरीर भी भेदोपभेद रूप में गौण मुख्य भाव से मध्यनाडी से संलग्न तथा गौण मुख्यभाव से स्थित नाडियों के द्वारा (व्याप्त है)—यह वाक्यार्थ है । जैसा कि वहाँ कहा गया है—

"हे प्रिये ! नाभि के नीचे मेढ्रकन्द में स्थित और उस नाभि के बीच से नाड़ियाँ तिर्यग् ऊपर और नीचे की ओर निकली हुई है । उनमें प्रधान दश नाड़ियाँ चक्र की भाँति स्थित है । उनसे फिर ७२००० नाडियाँ निकली हुई है । इनसे फिर दूसरी और उनसे फिर अन्य (निकली हुई हैं) । जिस प्रकार पलाश का पत्ता सर्वत्र तन्तुओं से व्याप्त है उसी प्रकार जितने रोम कूप है उतनी नाड़ियाँ (शरीर में व्याप्त) मानी गई है ।" (स्व. तं. ६।११)

प्रश्न—"सब (नाड़ियाँ) वायु से आपूरित हैं" इत्यादि उक्ति के द्वारा सभी नाडियाँ प्राणवाहिनी है और उन नाडियों से पूरा शरीर व्याप्त है इस विषय मे किसी को मतभेद नहीं है तो हृदय से लेकर द्वादशान्त तक या गुदप्रदेश तक ३६ अंगुल का ही प्राणचार कैसे कहा गया ?—यह शङ्का कर कहते हैं—

पैर के अंगूठे से लेकर ऊपर ब्रह्मबिल के अन्त तक वर्त्तमान समस्त काल चौरासी अंगुल में ही हैं । (पादांगुष्ठ के) नीचे द्वादशान्त तक ९६

द्वादशान्तावधिं किंचित्सूक्ष्मकालस्थितिं विदुः ॥ ६९ ॥
षण्णवत्यामधः षड्द्विक्रमाच्चाष्टोत्तरं शतम् ।

उर्ध्वस्था ब्रह्मकुण्डलिका ब्रह्मबिलं, समस्तः प्रागुक्तः कालश्चतुरशीताङ्गुलेष्विति सार्धत्रिहस्तात्मकत्वात् देहस्य । इत इति, गतः स्थित इत्यर्थः । षण्णवत्यामङ्गुलेष्विति पूर्वतो योज्यम् । तथात्वे च द्वादशानामङ्गुलानामाधिक्येनोपादानात् सूक्ष्मशब्दसन्निधेः पूर्वापरयोर्मानयोः स्थूलत्वं परत्वं चार्थसिद्धम् । अध इति पादाङ्गुष्ठात् । षड्द्विक्रमादिति, षण्णां द्वियोऽसौ द्वादशाङ्गुलात्मा क्रमस्तस्माद्यदूर्ध्व इवाधोऽपि द्वादशान्तः संभवेदिति भावः ॥

नन्वेवं देहस्य मानवैचित्र्ये प्राणादेरपि कश्चिदतिशयो न वा ?—इत्याशङ्क्याह—

अत्र मध्यमसञ्चारिप्राणोदयलयान्तरे ॥ ७० ॥
विश्वे सृष्टिलयास्ते तु चित्रा वाय्वन्तरक्रमात् ।

अत्र त्रिप्रकारप्रमाणावच्छिन्ने देहे प्राधान्यान्मध्यवाहिनः प्राणस्य ये उदयलया निर्गमप्रवेशास्तदन्तराले विश्वे प्रागुक्तकलना एव सर्वे सृष्टिसंहारा भवन्ति, किंत्वेषामपानवाय्वन्तरक्रमादेव प्राग्वद्वैचित्र्यं नतु देहवैचित्र्यादित्यर्थः ॥

अंगुलो में १२ से लेकर १०८ तक क्रमशः कुछ सूक्ष्म काल तक (प्राण की) स्थिति मानते हैं ॥-६८-७०- ॥

ऊपर स्थित ब्रह्मकुण्डली = ब्रह्मबिल, समस्त पहले कहा गया काल चौरासी अंगुलो में रहता है क्योंकि शरीर ३।१।२ हाथ का होता है । इतः = गया है = स्थित है । ९६—(यहाँ) अंगुलों में (इतना) पहले से जोड़ लेना चाहिए । वैसा होने पर १२ अंगुल अधिक ग्रहण करने से 'सूक्ष्म शब्द का कथन होने के कारण पूर्व और पर मान की (क्रमशः) स्थूलता और परता अर्थात् सिद्ध होती है । नीचे—पैर के अंगूठे के । षड्द्विक्रमात्—छ का दो गुना जो यह १२ अंगुलरूप क्रम, उससे जो ऊपर की भांति नीचे भी द्वादशान्त संभव है ॥ ६८-६९ ॥

प्रश्न—इस प्रकार शरीर का विचित्र परिमाण होने पर प्राण आदि का भी कोई अतिशय होता है या नहीं ?—यह शङ्का कर कहते हैं—

इस (= शरीर) में मध्यसञ्चारी प्राण के उदय और लय के बीच समस्त सृष्टि और प्रलय होते हैं । और वे वायु के अन्तर के क्रम से विचित्र होते हैं ॥ -७०-७१- ॥

यहाँ = तीन प्रकार के परिमाण से परिमित देह में, प्रधान रूप से मध्यवाही प्राण के जो उदय लय = निर्गम और प्रवेश है उनके बीच में सभी = जिनकी गणना पहले की गई है वे सब, सृष्टि संहार होते हैं । किन्तु अपान वायु के

इदानीमाह्निकार्थमेव श्लोकस्य प्रथमार्धेनोपसंहरति—

इत्येष सूक्ष्मपरिमर्शनशीलनीय-
श्चक्रोदयोऽनुभवशास्त्रदृशा मयोक्तः ॥ ७१ ॥

सूक्ष्मपरिमर्शनेत्यनेन अत्यन्तमस्यावधानगम्यत्वमुक्तमिति शिवम् ॥

प्रतिनियतमन्त्रसमुदयचारभिदनुभवनिभालनोद्युक्तः ।
सप्तममाह्निकमेतद्व्याकृतावाञ्जयरथाभिख्यः ॥

॥ इति श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तविरचिते श्रीतन्त्रालोके श्रीजयरथविरचितविवेकाभिख्यव्याख्योपेते चक्रोदय-प्रकाशनं नाम सप्तममाह्निकं समाप्तम् ॥ ७ ॥

अन्तरक्रम के कारण ही इनका पहले की भाँति वैचित्र्य होता है न कि देहवैचित्र्य के कारण ॥ ७० ॥

अब इस आह्निक के विषय का आधे श्लोक से उपसंहार करते हैं—

इस प्रकार यह सूक्ष्म परामर्श से जानने योग्य चक्रोदय अनुभवशास्त्र (शैवागम) की दृष्टि से मेरे द्वारा कहा गया ॥ -७१ ॥

॥ इस प्रकार श्रीमदाचार्यअभिनवगुप्तपादविरचितश्रीतन्त्रालोक के सप्तम आह्निक की डॉ० राधेश्याम चतुर्वेदी कृत 'ज्ञानवती' हिन्दी टीका सम्पूर्ण हुई ॥ ७ ॥

सूक्ष्म परिमर्शन—इस (कथन) के द्वारा यह शैवागम अत्यन्त ध्यान के द्वारा जानने योग्य है—यह कहा गया ॥

॥ इस प्रकार आचार्यश्रीजयरथकृत श्रीतन्त्रालोक के सप्तम आह्निक की 'विवेक' नामक व्याख्या की डॉ० राधेश्यामचतुर्वेदीकृत 'ज्ञानवती' हिन्दी टीका सम्पूर्ण हुई ॥ ७ ॥